श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः

क्र० २४२

१

२६२ ।२२५

नैकाय्यतत्त्वार्थविद्भिर्निबद्धं ... प्रवस्थापन० ... श्रुतिसंबोधन ०
मेवतत्त्वरूपार्थः

म॰ टी॰ २

श्रीगणेशायनमः वंदेपरंब्रह्मनामाभिन्नंतौतस्यापरंब्रह्महरिर्विरिंचेर्वान् शिवान्वतुल
स्यान्तनमोऽस्मियाभिर्वेश्चोदयस्यामलपालनेपि गौडेनंदनवासिनाम्निसुजनैर्वंद्येवरेन्द्र्यांकु
लेश्रीमद्भट्टदिवाकरस्यतनयःकुल्लूकभट्टोऽभवत् काश्यामुत्तरवाहिजह्नुतनयातीरेस
मंपंडितैस्तेनेयंक्रियतेहितायविदुषांमन्वर्थमुक्तावली सर्वज्ञस्यमनोरसर्वविदपिव्या
ख्यामिसद्वाङ्मयंयज्ज्ञानाद्रूभिर्मुनीनामनिवरैरेतद्वृत्र्व्याकृतं तांव्याख्यामधुनातनैर
पिकृतांन्याय्यांब्रुवाणस्यमेभक्त्यामानववाङ्मयेभवभिदेभूयाद्गिरीशःस्मरः मीमांसेव
कृसेवितासिसहृदयस्तर्कःश्रमस्तोऽस्मिवेदांताःपरमात्मबोधयरवोयोयंमयोपासिताः
पातालस्थाकरणानिवालमाविलाप्रज्ञाभिरभ्यर्थयेयन्नीतोपसमयोमनूक्तिविवृतौसाहा
य्यमास्थयतां हेषांदेदोषरचितस्सतांहितायमन्वर्थतत्त्वकथनायममोद्यतस्यदेवाय
दिवृत्र्वंदिशिपिप्ततलनंतपापिनिलारकोभवतमेजगदंतरात्मा मानववृत्तावसारेया
व्याख्यानुयामयोऽलिक्षाःप्राचीनाअपिरुचिरव्याख्यातगमधोघाणं मनुमित्यादि श्रव
महर्षीणांधर्मविषयप्रश्नेमनोःश्रूयतामित्युत्तरदानपर्यंतश्लोकचतुष्टयेनेतस्यशास्त्र
स्यप्रेक्षावत्प्रवृत्त्यंगभूतानिविषयसंबंधप्रयोजनान्युक्तानि तत्रधर्मएवविषयःतेन
सहवचनसंदर्भरूपस्यमानवशास्त्रस्यप्रतिपाद्यप्रतिपादकलक्षणःसंबंधःप्रमा।
णंतरामश्चिकृष्टस्वर्गापवर्गादिसाधनस्यधर्मस्यशास्त्रैकगम्यत्वात् प्रयोजनंतस्व।
र्गापवर्गादितस्यधर्माधीनत्वात् यद्यपिपत्युपगमनादिरूपःकामोऽप्यत्राभिहितः।
तथापिऋतुकालाभिगामीस्यात्स्वदारनिरतःसदेतिऋतुकालादिनियमेनसोपिध
र्मएव एवंचार्थार्जनमपिऋतामृताभ्यांजीवेत्तेमादिनियमेनधर्मएवेत्यवगंतव्यं
मोक्षोपायत्वेनात्राभिहितस्यात्मज्ञानस्यापिधर्मत्वाद्धर्मविषयत्वं मो[illegible]
क्षस्यशास्त्रस्योपप[illegible] श्रूयतामित्यनेनवाक्या[illegible]

२

म॰स्मृ॰
टी॰
२

2

किमब्रुवन्नित्याकांक्षायामाह भगवन्निति ऐश्वर्यादीनां भगशब्दो वाचकः तदुक्तं विष्णुपुरा
णे ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरितः मतुव्
तेन संबोधनं भगवन्निति वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः सर्वे च ते वर्णाश्चेति सर्ववर्णा
स्तेषामन्तरप्रभवाणां च संकरजातानामपि अनुलोमप्रतिलोमजातानामंबष्ठक्षत्तृप्रभृती
नां तेषां विजातीयमैथुनसंभवत्वेनाश्वतरवत्तरणीसम्पर्काश्वतरवत्तज्जात्यन्तरत्वात् वर्णा
शब्देनाग्रहणादेषां पृथक्प्रश्नः एतेनास्य शास्त्रस्य सर्वोपकारकत्वं दर्शितं यथावद्यो धर्मो
यस्य वर्णस्य येन प्रकारेणार्हति इत्यनेनाश्रमधर्मादीनामपि प्रश्नः अनुपूर्वशः क्रमेण
जातकर्म तदनु नामधेयमित्यादिना धर्मान्नोऽस्मभ्यं वक्तुमर्हसि सर्वधर्माभिधाने योग्यो
भवसि तस्माद्ब्रूहीति योषाणामध्याहार्यं यत्तु ब्रह्मस्वहत्यादिरूपो धर्मः कोऽपि तेन मप्य च तत्त्वा

भगवन्सर्ववर्णानां यथावदनुपूर्वशः अन्तरप्रभवाणां च धर्मान्नो व
क्तुमर्हसि २ त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयंभुवः अचिन्त्य।
स्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभो ॥

यस्मिन्न विधिरूपधर्मविषयत्वेन न स्वतन्त्रतया ३ सकलधर्माभिधानयोग्यत्वे हेतुमा
ह त्वमेक इत्यादि हि यस्माद्धेतो यस्मात्त्वमेकोऽद्वितीयः अस्य सर्वस्य प्रत्यक्षश्रुतस्य स्मृत्याद्य
नुमेयस्य च विधानस्य विधीयते तेन कर्माण्यग्निहोत्रादीनीति विधानं वेदस्तस्य स्वयंभु
वोऽपौरुषेयस्य अचिन्त्यस्य बहुशाखाभिन्नत्वादियत्तया परिच्छेत्तुमयोग्यस्य अप्रमेयस्य
मीमांसादिन्यायनिरपेक्षतयाऽनवगम्यमानप्रमेयस्य कार्यमनुष्ठेयमग्निहोत्रादि त
त्त्वं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिवेदान्तवेद्यमेवंरूपः प्रतिपाद्यभागस्तं वेत्तीति कार्य
तत्त्वार्थवित् मेधातिथिस्तु कर्ममीमांसावासनया वेदस्य कार्यमेव तत्त्वरूपोऽर्थस्तं वेत्ती
ति कार्यतत्त्वार्थविदित्याह तन्न वेदान्तानां ब्रह्मण्यपि प्रामाण्याभ्युपगमात् कार्य
मेव तत्त्वरूपार्थः [illegible] व्यवस्थापनसमर्थत्वात्प्रभो इति संबोधनं ॥

उ॰
२

हणात् श्रुत्युपष्टम्भ...तया प्रामाण्यं तथा च छान्दोग्यब्राह्मणे श्रूयते मनुर्वै य
त्किंचिदवदत्तद्भेषजं भेषजताया इति बृहस्पतिरप्याह वेदार्थोपनिबन्धृत्वात्प्राधान्यं
हि मनोः स्मृतं मन्वर्थविपरीता या स्मृतिः सा न प्रशस्यते तावच्छास्त्राणि शोभन्ते तर्क
व्याकरणानि च धर्मार्थमोक्षोपदेष्टा मनुर्यावन्न दृश्यते महाभारतेप्युक्तं पुराणं मान
वो धर्मः साङ्गो वेदश्चिकित्सितं आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः विरोधि वेदा
दितर्कैर्न हन्तव्यानि अनुकूलस्तु मीमांसादितर्कः प्रवर्तनीय एव अत एव वक्ष्यति आर्षं
धर्मोपदेशं च वेदशास्त्राविरोधिना यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर इति सकलवे
दार्थाभिमननान्मनुं महर्षयः पप्रच्छुरिति श्लोकद्वयेनोच्यते अनेनेतिवचनं प्रब्रुव

श्रीगणेशाय नमः स्वयंभुवे नमस्कृत्य ब्रह्मणेऽमिततेजसे मनुप्रणी
तान्विविधान्धर्मान्वक्ष्यामि शाश्वतान् १ मनुमेकाग्रमासीनमभिगम्य
महर्षयः प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् २

श्लोकस्यादौ मनुनिर्देशो मङ्गलार्थः परमात्मन एव संसारस्थितये सार्वज्ञ्यैश्वर्यादिसंप
न्नमनुरूपेणाविर्भूतत्वात् तदभिधानस्य मङ्गलातिशययत्वात् वक्ष्यति च एनमेके
वदन्त्यग्निं मनुमन्ये प्रजापतिमिति एकाग्रं विषयान्तराव्याक्षिप्तचित्तं आसीनं स्वासनोप
विष्टं तादृशस्यैव महर्षिप्रश्नोत्तरदानयोग्यत्वात् अभिगम्याभिमुखं गत्वा महर्ष
यो महान्तस्ते ऋषयश्चेति तथा प्रतिपूज्य पूजयित्वा यद्वा पूर्वं मनुना स्वा
गतासनदानादिना सत्कृतास्तस्य पूजां कृत्वेति प्रतिशब्दाद्बुद्ध्यते यथान्यायं यथान्या
यविधानेन प्रश्नः कर्तव्यस्तेन प्रणतिभक्तिश्रद्धातिशयादिना वक्ष्यति च नापृष्टः कस्य
चिद्ब्रूयान्न चान्यायेन पृच्छत इति अभिगम्य प्रतिपूज्य अब्रुवन्निति क्रियात्रयेपि महर्षीभि

म-स्मृ-
टी-
३

3

मेयाह पत्रगुणेपदं धर्मेषफलकीर्तनं तदग्रस्तुतं धर्मोनिमाशास्त्रस्यसमर्थवत् किंचकर्मणांफ
लानिर्दृष्टिंनियामेमन्वंतोमहर्षिभिः द्वादशवर्षमात्रणसावनतामाहेनप्रच्छ्यते इदंत्ववदामः म
नीनांधर्मविषये प्रश्ने जगत्कारणतया ब्रह्मप्रतिपादनं धर्मकथनमेवेतिनाप्रसक्ताभि।
धानंआत्मज्ञानस्यापिधर्मरूपत्वात् मनुनैव धृतिःक्षमादमोस्तेयंशौचमिंद्रियनिग्रहः
ह्रीविद्यासत्यमक्रोधोदशकंधर्मलक्षणमिति दशविधधर्माभिधानेविद्याशब्दवाच्य
मात्मज्ञानंधर्मत्वेनोक्तं महाभारतेपि आत्मज्ञानंतितिक्षा च धर्मःसाधारणोनृपेत्यात्म
ज्ञानंधर्मत्वेनाभिहितं याज्ञवल्क्येनतुपरधर्मत्वेनयदाह इज्याचारदमाहिंसादानस्वा
ध्यायकर्मच अयंतुपरमोधर्मोयद्योगेनात्मदर्शनमिति जगत्कारणत्वेनचब्रह्मलक्षणंप्र
तएवब्रह्ममीमांसायां अथातोब्रह्मजिज्ञासेतिसूत्रानंतरंब्रह्मलक्षणकथनाय जन्माद्य
स्ययतइति द्वितीयसूत्रंभगवान्बादरायणःप्रणिनाय अस्यजगतोयतोजन्मादिसृष्टि)
स्थितिप्रलयमितिसूत्रार्थः तथाचश्रुतिः यतोवाइमानिभूतानिजायंतेयेनजातानिजीवं
तियत्प्रयंत्यभिसंविशंतीतितद्विजिज्ञासस्वतद्ब्रह्मेतिप्राधान्येनजगदुत्पत्तिस्थितिप्रलय
निमित्तोपादानब्रह्मप्रतिपादनमात्मज्ञानरूपपरमधर्मावगमायप्रथमाध्यायेकृत्वा
संस्कारादिरूपधर्मतदंगतयाद्वितीयाध्यायप्रभृतिक्रमेणवक्ष्यतीतिनकश्चिद्विरोधः किंचप्रश्नोत्तर
वाक्यानामेवस्वरसादयंप्रतीयोपिलभ्यते तथाहि धर्मान्पृष्टोमनुर्वैस्वंजगतःकारणंब्रुवन् आ
त्मज्ञानंपरंधर्मंविवेदेतिव्यंजकमुक्तवान् प्राधान्यात्प्रथमाध्यायेशास्त्रस्यैवकीर्तनं धर्मोन्मत्त
तदंगत्वात्प्रकृतेनमनेतं इदमिमध्यन्तेनसर्वमसत्प्रतिभासमन्तवज्जगन्निर्दिश्यते इदंजग
त्तमोभूतंतमसिस्थितमासीत् तमःशब्देनगुणवृत्त्याप्रकृतिर्निर्दिश्यते तमउवतमः सप्रणातमसि
लीनाः प्रकाशनाशायत्तेनप्रकाशात्तेनएवंप्रकृतौलीनास्तदपिभावाभावयोरन्तइतिगुणयोगः प्रल
यकालेसूक्ष्मरूपतयाप्रकृतौलीनमासीदित्यर्थः तथाचश्रुतिः तमआसीत्तमसागूढमग्रइति
प्रकृतिरपिब्रह्मात्मनाव्याकृतासीदतएवाप्रज्ञातमप्रत्यक्षमकल्पप्रमाणग्राह्यंतथाअप्रत्यक्षो
चरः प्रज्ञातइत्युक्तं ... तिप्रज्ञानलक्षणमस्मिन्नमेयलक्षणतःनेनेतिलक्षणलिंगं

मु-
३

स तैः सम्यक्तैर्महर्षिभिः ... पृष्टो नेन न्यायेन भक्तिश्रद्धातिशयादिना पृष्टः सन्नामय्य।
यानत्वं प्रत्युवाच श्रूयतामित्युपक्रम्य अमितमपरिच्छिन्नमोजः सामर्थ्यं ज्ञानं तत्त्वाभिधानादौ
यस्य स तथा अत एव सर्वज्ञत्वं सर्वशक्तित्वं तथा महर्षीणामपि प्रश्नविषयः महात्मभिर्महानुभावैः
आर्च्य पूजयित्वा आङ्पूर्वस्यार्च्चतेर्ल्यपं वृत्तसरूपं यथमस्याभिधानमपि पूजनपुरस्सरमेव कार्य
मित्यनेन दर्शितं ननु मनुना प्रणीतत्वेऽस्य शास्त्रस्य सम्यक्पृष्टः प्रत्युवाचेति न युक्तं अहं पृष्टो
ब्रवीमीति प्रयुज्येत अन्यप्रणीतत्वे च कथं मानवीयं संहितेति उच्यते प्रायेणाचार्याणामि
यं शैली यत्स्वाभिप्रायमपि परोपदेशमिव वदन्ति अत एव कर्मण्येवापि जैमिनिः फलार्थत्वा
दिति जैमिनिरेव सूत्रं अत एव तदुपर्यपि बादरायणः सम्भवादिति बादरायणस्यैव पारीरक
सूत्रं अथवा मन्वादिष्टा धर्मास्तच्छिष्येण भृगुणा तदनुज्ञया उपनिबद्धाः अत एव वक्ष्य।

स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः प्रत्युवाचार्च्य तान्सर्वान्महर्षींच्छ्रूयतामिति ॥ ४ ॥
आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥ ५ ॥

ति एतच्चोक्तं भृगुः शास्त्रं श्रावयिष्यत्यशेषत इति अतो भृगुरत एव स तैः पृष्टः प्रत्युवाचेति म
न्वादिष्टधर्माभिधानं धाश्च मानवीयं संहितेति ४ श्रूयतामित्युक्त्वा प्रश्नमपेयमाह आसीदिदं
ननु धर्मविषये प्रश्ने तत्रैवोत्तरं दातुमुचितं तत्कोयमप्रश्नतः प्रलयदशायां कालात्ली
नमसगतः सृष्टिप्रकरणावतारः अत्र मेधातिथिः समासदर्थशास्त्रस्य महाप्रयोजनवत्त्व
मनेन मर्यादा प्रतिपाद्यते ब्रह्माद्याः स्थावरान्ताः संसारगतयो धर्माधर्मनिमित्ता अत्र प्र
तिपाद्यन्ते तं समवाक्स्वरूपेण वेष्टिताः कर्महेतुनेति वक्ष्यति च एता दृष्ट्वास्य जीवस्य
गतीः स्वेनैव चेतसा धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मनः तत्स्वनिरतिशयैश्वर्य
हेतुर्धर्मः तद्विपरीतश्चाधर्मः तस्य विज्ञानार्थमिदं शास्त्रं महाप्रयोजनमध्येतव्य
मित्यायं ध्यायतामयमित्येतेन गोविन्दराजस्यापीदमेव समाधानं तेनेत्यमनोहरं ध

सोभिध्याय परमात्मा नानाविधाः प्रजाः सिसृक्षुरभिध्याय आपो जायंतामित्यभिध्यानमात्रेणाप
एव ससर्ज अभिध्यानपूर्विकां सृष्टिं वदता मनुना प्रकृतिर्वा चेतना स्वतंत्रा परिणमत इति अयं
पक्षो न संमतः किं तु ब्रह्मैवाव्याकृतशक्त्यात्मना जगत्कारणमिति त्रिदंडिवेदांतसिद्धांत एवा
भिमतः श्रुतिश्चात्र तथाच्छांदोग्योपनिषदि तदैक्षत बहु स्यां प्रजायेयेति अत एव शारीरकसूत्रकृ
ता व्यासेन सिद्धांतितमीक्षतेर्नाशब्दमिति ईक्षतेरीक्षणश्रवणात् न प्रधानं जगत्कारणमशब्दं
हि तन्न विद्यते शब्दः श्रुतिर्यस्य तदशब्दमिति सूत्रार्थः स्वाच्छरीरादव्याकृतरूपादव्याकृतमे
व भगवद्गीतादिवेदांतदर्शने प्रकृतिशब्देन चेतनस्य शरीरमव्याकृतशब्देन च पंचभूतबुद्धींद्रियप्रा
णमनःकर्मविद्यावासना एव सूक्ष्मरूपतया नामरूपात्मना स्थिताः अभिधीयंते अव्याकृतस्य च ब्र
ह्मणः सह भेदाभेदस्वीकाराद्ब्रह्माद्वैतं शक्त्यात्मना ब्रह्म जगद्रूपतया परिणमत इत्युभयमप्यु

4

सोभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः अप एव ससर्जादौ तासु वीर्यमवासृजत्
८ तदंडमभवद्धैमं सहस्रांशुसमप्रभं तस्मिन्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ९

पपद्यते आदौ स्वकार्यभूमिष्वप्सु अंडसृष्टेः प्रागपां सृष्टिः श्रेयं महदहंकारतन्मात्रक्रमेणैवो
द्व्या महाभूतादिवंनयन्निति पूर्वमभिधानादनंतरमपि महदादिसृष्टेर्वक्ष्यमाणत्वात्तास्व
प्सु बीजं शक्तिरूपमारोपितवान् ८ तद् तद्बीजं परमेश्वरेच्छया हैममंडमभवत् हैममि
व हैमं शुद्धिगुणयोगात् न तु हैममेव तदीयैकशकलेन भूमिनिर्माणस्य वक्ष्यमाणत्वात् भू
मेश्वरे महत्वस्य प्रत्यक्षबाधितत्वात् उपचारश्च यणे सहस्रांशुरादित्यस्तत्समप्रभं तस्मिन्नंडे हि
रण्यगर्भोहमस्मीति भेदाभेदवासनया परमेश्वरोपासनाकृतात् तदीयं लिंगशरीरावच्छि
न्नं जीवमनुप्रविश्य स्वयं परमात्मैव हिरण्यगर्भरूपतया प्रादुर्भूतः सर्वलोकपितामह
इति वा तस्य नाम ९

तदप्यनाप्तेः [illegible] कोऽतर्क्योऽपि तमसावस्थानं तदानीं वाच्यवाचकस्थूलशब्दाभावाच्छब्देनाप्य ।
विज्ञेयं एतदेव प्रमाणत्रयेण सतर्केणाद्यया प्रमेयमनुमानाभ्युपगतं अतएवाविज्ञेयं इत्युपमयोपमाय ।
गोचरश्रुतिश्च प्रलये श्रुतिप्रत्यक्षाभावात् न च नासीदेवेति वाच्यं तदानीं श्रुतिसिद्धत्वात् तथा च श्रू
यते तद्धेदं तर्ह्यव्याकृतमासीत् छान्दोग्योपनिषदि च सदेव सोम्येदमग्र आसीत् इदं जगत्सदे ।
वासीदव्यक्तात्मनासीदित्यर्थः सन्देहोऽस्यवाचीय तत्स्वप्नं सत्रिमिव सर्वतः प्रसुप्तमिवेति स्व
कार्याक्षममित्यर्थः ५ अथ किमभूदित्याह तत इत्यादि ततः प्रलयकालावसानेऽनन्तरं स्वयंभूः पर
मात्मा स्वयं भवतीति स्वेच्छया शरीरपरिग्रहं करोतीति न त्वितरजीववत्कर्मोपात्तदेहः तथाच
श्रुतिः स एकधा भवति द्विधा भवतीति भगवानैश्वर्यादिसंपन्नः अव्यक्तो बाह्यकरणागोचरो
योगाभ्यासावगम्य इति यावत् इदं महाभूतादि आकाशादीनि महाभूतानि आदिग्रहणान्

ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदं । महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः ६
योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः । सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ७

महदादीनि च व्यञ्जयन् प्रथमं सूक्ष्मरूपेण ततः स्थूलरूपेण प्रकाशयन् वृत्तौजा वृत्त ।
मप्रतिहतमुच्यते बलमेव सृष्टिसर्गानुष्ठाने प्रक्रमस्तच्च सृष्टिक्रियाप्रतिघातरहितव्याप्तं यत्तथा दि
शेन वृत्तमप्रतिहतमोजः सृष्टिसामर्थ्यं यस्य स तथा तमोनुदः प्रकृतिप्रेरकः तदुक्तं भगवद् ।
गीतायां मयाध्यक्षेण प्रकृतिः सूयते सचराचरमिति प्रादुरासीत्प्रकाशितोऽभवत् तमोनुदः
प्रलयावस्थाध्वंसक इति मेधातिथिगोविन्दराजौ ६ योऽसाव योऽसाविति सर्वनामद्वयेन स
कललोकवेदपुराणेतिहासादिप्रसिद्धं परमात्मानं निर्दिशति अतीन्द्रियग्राह्य इन्द्रियमतीत्य
वर्त्तत इति अतीन्द्रियं मनस्तद्ग्राह्य इत्यर्थः तदाह व्यासः नैवासौ चक्षुषा ग्राह्यो न च शिष्टैरपी
न्द्रियैः मनसा तु प्रसन्नेन गृह्यते सूक्ष्मदर्शिभिः सूक्ष्मो बहिरिन्द्रियागोचरः अव्यक्तः व्यक्तिर
वयवस्तद्रहितः सनातनो नित्यः सर्वभूतमयः सर्वभूतात्मा अत एवाचिन्त्यः इयत्तया परि
च्छेत्तुमशक्यः स एव स्वयमुद्बभौ महदादिकार्यरूपतया प्रादुर्भूत इत्युद्भवमितिः प्रादुर्भाव

इदानीं महदादिक्रमेणैव जगन्निर्माणमिति दर्शयितुं तन्नत्सृष्टिमाह उद्ववर्हेति ब्रह्मा आत्मनः
परमात्मनः सकाशात् ईनेन रूपेण मनउद्धृतवान् परमात्मन एव ब्रह्मरूपेणोत्पन्नत्वात् परमात्मन
एव मनःसृष्टिर्वेदान्तदर्शनेन प्रधानानुगा च श्रुतिः एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि
च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी मनश्च श्रुतिसिद्धत्वात् प्रागपहृतानेनोन्नीति गा
त्रसदसदात्मकत्वात्तत्सदेव मन सः पूर्वमहंकारतत्त्वमहमित्यभिमानात्मकं कार्ये प्रभोरीश्वरं स्व
कार्यकरणक्षमं १४ महान्तं महान्तमिति महदाख्यतत्त्वमहंकारात् पूर्वं परमात्मन एवाव्याकृ
तनाम्नि रूप प्रकृतिसहिताउद्धृतवान् आत्मनउत्पन्नत्वादात्मानं आत्मोपकारत्वाद्वा यान्यभि
हितान्यभिधास्यते च तान् समुत्पत्तिमन्ति सर्वाणि सत्वरजस्तमोगुणयुक्तानि विषयाणां शब्दस्पर्शा
रूपरसगन्धानां ग्राहकाणि शनैः क्रमेणावेदांतसिद्धत्वेन श्रोत्रादीनि दृष्टीपायूपस्थवाक्पाणि
पंचबुद्धीन्द्रियाणि च शब्दान् पंच पाय्वादीनि कर्मेन्द्रियाणि शब्दतन्मात्रादीनि च पंच चोत्पादित

उद्ववर्हात्मनश्चैव मनः सदसदात्मकं मनसश्चाप्यहंकारमभिमंतारमीश्वरं १४ महांतमे
व चात्मानं सर्वाणि त्रिगुणानि च विषयाणां गृहीतॄणि शनैः पंचेंद्रियाणि च १५

वान् तत्त्वाभिधानपूर्वकस्रष्टाभिधानाद्वेदान्तसिद्धान्त एव मनोरभिमत इति शास्त्रकं तत्र संगच्छते
इदानीं महदादिक्रमेण सृष्ट्यभिधानाद्वेदान्तदर्शनेन च परमात्मन एवाकाशादिक्रमेण सृष्टिः कृता त
था च तैत्तिरीयोपनिषत्सु समाद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः
अद्भ्यः पृथिवीति उच्यते प्रकृतितो महदादिक्रमेण सृष्टिरिति भगवद्गीतासु दर्शनेनोपपद्यते
इति तद्विरोधात् उच्यते अव्याकृतमेव प्रकृतिरित्युक्तं तत्र सृष्ट्युन्मुखत्वं तत्र सृष्ट्यादिकाले यामहत्
तदेव महत्तत्त्वं ततोऽहंकारस्याभिमानाभिमानात्मकं तत्कालकार्यात्वं महाव्याकृतस्याहंकारतत्त्वं तत्स्थाकाशा
दिपंचभूतसूक्ष्माणि क्रमेण पंचज्ञानेन्द्रियपंचतन्मात्राणि तान्यपि एव स्थूलान्युत्पन्नानि पंच महाभूता
नि सूक्ष्म स्थूलक्रमेणैव कार्योपदर्शनादिति न विरोधः अव्याकृतयुगाणेपि सत्त्वरजस्तमसां सत्त्वा
णि त्रिगुणानीत्युपपद्यते भवति वा सत्त्वरजस्तमः साम्यरूपेवभूतप्रकृतिः भवति च तन्त्रान्तरेऽपि एव
महदहंकारतन्मात्राणि तत्रापि प्रकृतिर्जस्त्रगुणेः नन्वेति मनोः स्वर सः प्रतीयते इति सर्वभूतेषु चात्मा

इदानीं नाम प्रसिद्धनारायणशब्दार्थनिर्वचनेनोक्तमेवार्थं दृढयति आपो नारा इत्यादिना ।
आपो नारा नाम्ना प्रोच्यन्ते अपां नारा नाम प्रसिद्धेस्तदर्थमाह एतत्त्वा नराख्यस्य परमात्मनः
सूनवोऽपत्यानि तस्येदमित्यणप्रत्ययान्निष्पन्नत्वेऽपि पुंस्त्वात्तथापि छांदसत्वात्स्त्रीत्वमपि स्मृतिप्रयो
क्तत्वाद्यास्तेषां विषयः छंदसि विकल्पं तदुक्तं पाणिनिनाऽप्यसमस्तसाभावपदे शामान्यलक्षणे
ऽपि कृते नारा इति रूपसिद्धिः आपो यस्य परमात्मनो ब्रह्मस्वरूपेणावस्थितस्य पूर्वं समयनमाश्र
य इति अयनं नारायण इत्यनाम मे प्रख्यातः गोविंदराजेन तु आपो नरा इति प्रोक्ता इति पठितं
व्याख्यातं च नरायण इति प्राप्ते अन्येषामपि दृश्यत इति दीर्घत्वे नारायण इति रूपं अन्ये त्वा
पो नारा इति पठंति ११ यत्तत्का यत्तदिति सर्वनाम प्रसिद्धं लोकवेदादिसर्वप्रसिद्धं परमात्मानं

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ११
यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकं तद्विसृष्टः स पुरुषः लोके ब्रह्मेति कीर्त्यते १२
तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरं स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा १३
ताभ्यां स शकलाभ्यां तु दिवं भूमिं च निर्ममे मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतं

निर्दिशति कारणं सर्वोत्पत्तिमतां अव्यक्तं बहिरिंद्रियागोचरं नित्यमुत्पत्तिविनाशरहितं वे
दांतप्रसिद्धत्वात्स्वभावं प्रमत्वात् अगोचरत्वाद् सतः स्वभावमिव यद्यपि प्रख्यातं असद्भावस्त
योपात्मभूतं तथा च श्रुतिः ऐतदात्म्यमिदं सर्वमिति तद्विसृष्टः तेनोत्पादितः स पुरुषः
सर्वं ब्रह्मेति संकीर्त्यते १२ तस्मिन् तस्मिन्पूर्वोक्तेऽण्डे स ब्रह्मा वक्ष्यमाणेन ब्राह्ममाने
न संवत्सरमुषित्वा स्थित्वात्मनैवाण्डं द्विधा भवत्विति आत्मगतध्यानमात्रेण तदण्डं द्वि
धा कृतवान् १३ ताभ्यां सशकलाभ्यां तेऽण्डे ताभ्यां सशकलाभ्यामुत्तरेण ऊर्ध्वलोकमध
रेण भूर्लोकं तयोर्मध्ये आकाशं दिशश्चांतरालादिभिः सहाष्टौ समुद्राख्यमपां स्थानं
स्थिरं निर्मितवान् १४

क्रमेणोत्पत्तिक्रमः शब्दादि

आद्याद्यस्य गुणं त्वेषां एषामिति पूर्वेण तन्मात्रोक्तेन त्वाविशन्तीति भूतानां मत्र भूतानां परामर्शः तेषां आकाशादीनां गुणमवाप्नोति तत्राद्याद्यस्य आकाशादेर्गुणं शब्दादिकं वाय्वादिः परः परः प्राप्नोति एतदेव स्पष्टयति यो य इति एषां मध्ये यो यो यावतां पूरणो वृत्तो द्वित्वे स्थितो यदि द्वितीयो द्विगुणस्तृतीयस्त्रिगुण इत्येवमादिमन्वादिभिः स्मृतः एतेनेदमुक्तं भवति आकाशस्यैको गुणः शब्दः वायोः शब्दस्पर्शौ तेजसः शब्दस्पर्शरूपाणि अपां शब्दस्पर्शरूपरसाः भूमेः शब्दस्पर्शरूपरसगन्धाः अत्र यद्यपि निमेषोन्मेषो इति द्विवचनेनायमाकाशस्येति प्राप्तं तथापि स्मृतीनां छन्दः समानविषयत्वात् तां पां स्वशक्त्येति प्रथममाकाशस्यैवोल्लेखेनोपक्रम्येति रूपसिद्धिः २० सर्वेषां तु स नामानि स परमात्मा हिरण्यगर्भरूपेणावस्थितः सर्वेषां नामानि गौरिति अश्व इति कर्माणि च ब्राह्मणस्याध्ययनादीनि क्षत्रियस्य प्रजारक्षणादीनि पृथक्पृथक् पूर्वकल्पे यान्यभवंस्तान्येव वेदशब्देभ्य एवावगम्य निर्मितवान् भग

आद्याद्यस्य गुणं त्वेषामवाप्नोति परः परः । यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः ॥ २० ॥
सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक् । वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥ २१ ॥

वता व्यासेनापि ब्रह्ममीमांसायां वेदपूर्वकं जगन्निर्माणं दर्शितं तथा च शारीरकसूत्रं शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् अस्यार्थः वेदानां नित्यत्वे वैदिकवस्वादिशब्दे देवतादौ विनि विरोधः स्यादित्याशङ्क्य तत्प्रसंगादिति चेन्नास्ति विरोधः कस्मात् प्रभवात् प्रलयकालेऽपि परमात्मनि सूक्ष्मरूपेण वेदराशिः स्थितः कल्पादौ हिरण्यगर्भस्य परमात्मन एव प्रथमं देहभृतो मनसि प्रवृत्त्यावस्थानात् तस्मात् प्रवृत्तस्येव प्रादुर्भवति तेन प्रदीपस्थानीयेन व्यक्तिरूपमादि प्रविभक्तं जगदभिधेयप्रभृति निर्मिमीते कथमिदं गम्यते प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः प्रत्यक्षं श्रुतिरनपेक्षत्वात् अनुमानं स्मृतिरनुमीयमानश्रुतिसापेक्षत्वात् तथा च श्रुतिः एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिन्दव इति पितॄन् तिरःपवित्रमिति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रमभि सौभगेत्यन्याः प्रजाः स्मृतिश्च सर्वेषां तु स नामानि इत्यादिका मनुप्रणीता एव पृथक्संस्थाश्च लौकिकीश्च व्यवस्थाः कुलालस्य घट

6

तेषां त्ववयवान् तेषां षण्णां पूर्वोक्तानामहंकारस्य तन्मात्राणां च ये सूक्ष्मा अवयवाः तानात्ममात्रासु ष
ण्णां स्वविकारेषु योजयित्वा मनुष्यतिर्यक्स्थावरादीनि सर्वभूतानि परमात्मा निर्मितवान् च तत्र
तन्मात्राणां विकाराः पंचमहाभूतानि अहंकारस्येंद्रियाणि पृथिव्यादिषु तेषु शरीररूपतया प
रिणतेषु तन्मात्राहंकारयोजनानां तेनात्मसकलस्य कार्यजातस्य निर्माणात् अत एवामितौजसा
मनल्पकार्यनिर्माणेनातिवीर्याणामित्युक्तं १६ यन्मूर्त्यवयवाः सूक्ष्माः यस्य मूर्तिः शरीरं तत्संपा
दका अवयवाः सूक्ष्मास्तन्मात्राहंकाररूपाः षट् तस्य ब्रह्मणः सप्रकृतिकमप्युमानि वक्ष्यमा
णानि भूतानीन्द्रियाणि च पूर्वोक्तानि कार्यत्वेनाश्रयन्ति तन्मात्रेभ्यो भूतोत्पत्तेरहंकाराच्चेंद्रि
योत्पत्तेस्तथा च पठन्ति प्रकृतेर्महांस्ततोहंकारः तस्माद्गणश्च षोडशकात्पंचभ्यः पंचमहाभू
तानीति तस्मात्तस्य ब्रह्मणो या मूर्तिः स्वभावस्तां तथापरिणतामिंद्रियादियुक्तां लोकाः
शरीरमिति वदन्ति षडाश्रयणाच्छरीरमिति शरीरनिर्वचनेनानेन पूर्वोक्तोत्पत्तिक्रम एव दृ

तेषां त्ववयवान्सूक्ष्मान्षण्णामप्यमितौजसां संनिवेश्यात्ममात्रासु सर्वभूतानि च निर्ममे १६
यन्मूर्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयन्ति षट् तस्माच्छरीरमित्याहुस्तस्य मूर्तिं मनीषिणः
तदाविशन्ति भूतानि महान्ति सह कर्मभिः मनश्चावयवैः सूक्ष्मैः सर्वभूतकृदव्ययं १७
तेषामिदं तु सप्तानां पुरुषाणां महौजसां सूक्ष्माभ्यो मूर्तिमात्राभ्यः संभवत्यव्ययाद्व्ययं

कोशतः १७ तदाविशन्ति भूतानि पूर्वश्लोके तस्येति प्रकृतं ब्रह्म तत्तदिति परामृश्यते तद्ब्र
ह्माद्यादिपंचतन्मात्रात्मनावस्थितं महाभूतान्याकाशादीनि आविशन्ति तेभ्य उत्पद्यन्ते सह क
र्मभिः स्वकार्यैस्तत्राकाशस्यावकाशदानं कर्म वायोर्व्यूहनं विन्यासरूपं तेजसः पाकः अपां संग्र
हणं पिण्डीकरणं पृथिव्या धारणं अहंकारात्मनावस्थितं ब्रह्म मनश्चाविशति अहंकारा
दुत्पद्यत इत्यर्थः अवयवैः स्वकार्यैः शुभाशुभसंकल्पसावधैः सूक्ष्मैर्बाह्येन्द्रि
यागोचरैः सर्वभूतकृत्सर्वोत्पत्तिनिमित्तं मनोजन्यशुभाशुभकर्मप्रभवत्वाज्जगतः अव्यय
मविनाशि १८ तेषामिदं तु सप्तानां महदहंकारतन्मात्राणां सप्तसंख्यानां पुरुषाणामात्म
न उत्पन्नत्वात् बुद्धिग्राह्यत्वाच्च पुरुषाणां महौजसां स्वकार्यसंपादनेनातिवीर्यवतां सूक्ष्माभ्यो
मूर्तिमात्राः शरीरसंपादकभागास्ताभ्य इदं जगन्नश्वरं संभवति अनश्वराद्व्ययात्कार्यत

म. स्मृ.
टी.
१

अण्व्यो मात्रा विनाशिन्यः दशार्धानां पञ्चानां महाभूतानां याः सूक्ष्मा मात्राः पञ्चतन्मात्ररू पा विनाशिन्यः पञ्चमहाभूतरूपतया परिणामिन्यस्ताभिः सहोक्तं वक्ष्यमाणं चेदं सर्वमुत्प द्यतेऽनुपूर्वशः क्रमेण सूक्ष्मात्सूक्ष्मं स्थूलात्स्थूलतरं अनेन सर्वेण तेषु गुणेमानसीयुक् क्तार्थं वक्ष्यमाणं च सृष्टिः कस्याश्चिन्न तन्निरपेक्षास्मादिति तिरोभाषिकामपनिनीषुस्तद्द्वारेणाव यं हृदि स्थितिमध्ये पुनः पूर्वोक्तं स्मारितवान् २७ यं तु कर्मणि यस्मिन्स प्रजापतिर्येजा तिविशेषं व्याघ्रादिकं यस्मिन्कर्मणि पापादहिंसामारणादिकादौ पादृष्टादेर्नियुक्तवान्स जाति विशेषः पुनः पुनरपि सृज्यमानः स्वकर्मवशेन तदेव कर्म संश्रितवान् एतेन प्राणिकर्मसापे क्षप्रजापतेः सत्त्वमाधमजातिनिर्माणेन वागाद्यधीनमिति दर्शितं अतः वक्ष्यति यथाकर्म

अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः । ताभिः सार्धमिदं सर्वं संभवत्यनुपूर्वशः ॥
२७ यं तु कर्मणि यस्मिन्स न्ययुङ्क्त प्रथमं प्रभुः । स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः ॥
२८ हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते । यद्यस्य सोऽदधात्सर्गे तत्तस्य स्वयमाविश त् २९ यथर्तुलिङ्गान्यृतवः स्वयमेवर्तुपर्यये । स्वानि स्वान्यभिपद्यन्ते तथा कर्माणि देहि नः ३०

7

तपोयोगात्सृष्टं स्थावरजंगममिति २८ एतदेव प्रपञ्चयति हिंस्राहिंस्रे मृदुक्रूरे हिंस्रं कर्म सिंहादेः करिमारणादिकं अहिंस्रं हरिणादेः मृदुः दयाप्रधानं विप्रादेः क्रूरं क्षत्रि यादेः धर्मो यथा ब्रह्मचर्यादेः गुरुशुश्रूषादिः अधर्मो यथा तस्यैव मांससेवामैथुनमेवना दिः ऋतं सत्यं तच्च प्रायेण देवानाम् अनृतमसत्यं तदपि प्रायेण मनुष्याणां तथा च श्रुतिः सत्यवाचो देवाः अनृतवाचो मनुष्या इति एषां मध्ये यत्कर्म प्रजापतिः सर्गादौ यस्याधा रयत् स पश्चात्तत्कालमपि स तदेव कर्म प्राक्तनादृष्टवशात्स्वयमेव भेजे २९ अत्र दृ ष्टान्तमाह यथर्तुलिङ्गान्यृतवः यथा वसन्तादिऋतवः ऋतुचिह्नानि चूतमञ्जर्यादी नि ऋतुपर्याये स्वकार्यावसरे स्वयमेव प्राप्नुवन्ति तथा देहिनोऽपि हिंस्राहिंस्रादीनि क

मं.
१

कर्मात्मनां च देवानां । स ब्रह्मा देवानां गणमसृजत्प्राणिनामिन्द्रादीनां कर्मात्मनां कर्मप्राणस्वभावो ये-
षां तेषामप्राणिनां च ग्रावादीनां साध्यानां च देवविशेषाणां समूहं यज्ञं च ज्योतिष्टोमादिकं क-
ल्पान्तरेष्वप्यनुष्ठीयमानत्वान्नित्यं साध्यानां च गणस्य पृथग्वचनं सूक्ष्मत्वात् २२ अग्निवायुर-
विभ्यस्तु त्रयाणामृग्यजुःसामसंज्ञं वेदत्रयमग्निवायुरविभ्यस्तु ब्रह्मा आकृष्टवान् सनातनं नित्यं वेदा-
पौरुषेयत्वपक्ष एव मनोरभिमतः पूर्वकल्पे ये वेदास्त एव परमात्ममूर्तेर्ब्रह्मणः सर्वज्ञस्य ।
स्मृत्यारूढास्तानेव कल्पादावग्निवायुरविभ्य आचकर्ष श्रौतश्चायमर्थो न शङ्कनीयः तथा
च श्रुतिः अग्नेर्ऋग्वेदो वायोर्यजुर्वेदः आदित्यात्सामवेद इत्याकर्षणार्थत्वाच्च दुहिधातोर्नानाति
अग्निवायुरवीणामकर्षिकमेतावितत्र्युपादानत्वेन यज्ञसिद्ध्यर्थं त्रयीमंपाद्यत्वाद्यज्ञानामापी-
नस्य हीरवहितमानानामेव वेदानामभिव्यक्तिप्रदर्शनार्थमाकर्षणवाचका गौणदुहिः प्र

कर्मात्मनां च देवानां सोऽसृजत्प्राणिनां प्रभुः । साध्यानां च गणं सूक्ष्मं यज्ञं चैव सनातनं ॥ २२ ॥
अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनं । दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणं ॥ २३ ॥
कालं कालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा । सरितः सागराञ्छैलान्समानि विषमाणि च ॥
तपो वाचं रतिं चैव कामं च क्रोधमेव च । सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन्निमाः प्रजाः ॥ २४ ॥
कर्मणां च विवेकाय धर्माधर्मौ व्यवेचयत् । द्वन्द्वैरयोजयच्चेमाः सुखदुःखादिभिः प्रजाः ॥ २६ ॥

युक्तः २३ कालं कालविभक्तीश्च ब्रह्मसृजेत् तन्नस्त्रोकवर्तिनीं क्रियां सर्वत्रध्यते आदित्यादि।
तिथ्याः अपरं पं कालं कालविभक्तीर्मासत्वायनाद्याः नक्षत्राणि कृत्तिकादीनि ग्रहान् सूर्यादीन् सरि-
तो नदीः सागरान्समुद्रान् शैलान्पर्वतान्समानि समस्थलानि विषमाणि उच्चावचस्थानानि २४ तपो
वाचं रतिं चैव तपः प्रजापत्यादि वाचं वाणीं रतिं चेतः परितोषं कामं इच्छां क्रोधं चेतो विकार-
रूपमेतत् श्लोकोक्तं पूर्वश्लोकोक्तं च सृष्टिं चकार स्रष्टुमनः इतिस्वादिः कर्माणि तानुरूपाः प्रजाः
वस्तुप्राणादेवादिकाः कर्तुमिच्छन् २५ कर्मणां च विवेकाय धर्मो यज्ञादिः स कर्तव्यः अ-
धर्मो ब्रह्मवधादिः स न कर्तव्यः इति कर्मणां विभागाय धर्माधर्मौ व्यवेचयत्पृथक्त्वेनाभ्य-
धात् धर्मस्य फलं स्वर्गं अधर्मस्य फलं दुःखं धर्माधर्मफलभूतैर्द्वन्द्वैः परस्परविरुद्धैः सु-
खदुःखादिभिरिमाः प्रजा योजितवान् आदिग्रहणात्कामक्रोधरागद्वेषक्षुत्पिपासाशोकमोहादिभिः २६

यक्षरक्षःपिशाचांश्च एते सृजन्निति पूर्वेण संबन्धः। यक्षा वैश्रवणाद्यनुचराः रक्षांसि रावणादीनि पिशाचास्तेभ्योऽपकृष्टा अशुचिमरुदेशवासिनः गंधर्वाश्चित्ररथादयः अप्सरस उर्वश्यादयः असुरा विरोचनादयः नागा वासुक्यादयः सर्पास्ततोऽपकृष्टाः अलगर्दादयः सुपर्णा वैनतेयादयः पितॄणामाज्यपादीनां गणाः समूहः एषां भेदस्तु इतिहासादिप्रसिद्धो नास्मदादिगोचरः ३७ विद्युतोऽशनिमेघांश्च मेघेषु दृश्यते दीर्घाकारं । ज्योतिर्विद्युत् मेघादेव पतज्ज्योतिर्वृक्षादिविनाशकं तदशनिः मेघाः प्रसिद्धाः रोहितं नानावर्णदण्डाकारं दिवि दृश्यते तदेव वक्रमिन्द्रधनुः उल्का रेखाकारमन्तरिक्षात्पतज्ज्योतिः निर्घातो भूमांतरिक्षगतउत्पातध्वनिः केतवः शिखावन्ति ज्योतींषि उत्पातरूपाणि उच्चावचानि

यक्षरक्षःपिशाचांश्च गंधर्वाप्सरसोऽसुरान् नागान्सर्पान्सुपर्णांश्च पितॄणांश्च पृथग्गणान्
३७ विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च
३८ किन्नरान्वानरान्मत्स्यान्विविधांश्च विहंगमान् पशून्मृगान्मनुष्यांश्च व्यालांश्चोभय
तोदतः ३९ कृमिकीटपतंगांश्च यूकामक्षिकमत्कुणं सर्वं च दंशमशकं स्थावरं च पृ
थग्विधं ४० एवमेतैरिदं सर्वं मन्नियोगान्महात्मभिः यथाकर्म तपोयोगात्सृष्टं स्थाव
रजंगमं ४१

ज्योतींषि ध्रुवागस्त्यादीनि नानाप्रकाराणि ३८ किन्नरान्वानरा न्मत्स्यान् किन्नराश्च मुखादेवयोनयो नरविग्रहाः वानराः प्रसिद्धाः मत्स्या रोहितादयः विहंगमाः पक्षिणः पशवो गवाद्याः मृगा हरिणादयः व्यालाः सिंहाद्याः उभयतोदतः द्वे दंतपं क्ती येषां उत्तराधरे भवतः ३९ कृमिकीटपतंगांश्च कीटाः कृमिभ्यः किंचित्स्थूलाः पतंगाः शलभाः यूकादयः प्रसिद्धाः द्वन्द्वं तत्र उभसनेनैकवद्भावः स्थावरं वृक्षलतादिभेदेन विवि धप्रकारं ४० एवमेतैरिदं सर्वं एवमित्युक्तप्रकारेण एतैर्मरीच्यादिभिरिदं स्थावरजंग मं सृष्टं यथाकर्म यस्य जंतोर्यादृशं कर्म तदनुरूपतया देवमनुष्यतिर्यगादियोनिषु मदीयेन म न्नियोगान्महात्मानः तपोयोगान्महत्तपः कृत्वा सर्वमेतत्सृष्टमिति दर्शितं ४१

लोकानां तु विवृद्ध्यर्थं भूर्लोकादीनां तु वाकुलार्थं मुखबाहूरुपादेभ्यो ब्राह्मणक्षत्रियवैश्यशू द्रान्यथाक्रमं निर्मितवान् ब्राह्मणादिभिः सायंप्रातरग्नावाहुतिः प्रक्षिप्ता सूर्यमुपतिष्ठते सू र्याद्वृष्टिः वृष्टेरन्नमन्नात्प्रजा वा कुलस्य वृद्धिरिति च यज्ञोपास्ताहुतिः सम्यगिति दैव्या च श क्त्या मुखादिभ्यो ब्राह्मणादिनिर्माणं ब्राह्मणेन विशंकनीयं श्रुतिसिद्धत्वात् तथा च श्रुतिः ब्राह्मणोऽस्य मुखमासीदिति ३१ द्विधा कृत्वात्मनो देहं स ब्रह्मा निजदेहं द्विखंडं कृत्वा अर्द्धेन पुरुषो जातः अर्द्धेन नारी तस्यां मैथुनधर्मेण विराट्संज्ञं पुरुषं निर्मितवान् श्रुति श्च ततो विराडजायतेति ३२ तपस्तप्त्वासृजद्यं तु स विराट् तपो विधाय यं निर्मितवान् तं मां मनुं जानीत अस्य सर्वस्य जगतः स्रष्टारं भो द्विजसत्तमाः एतेन स्वजन्मोत्कर्षमाख्यो

लोकानां च विवृद्ध्यर्थं मुखबाहूरुपादतः। ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत् ३१
द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत्। अर्द्धेन नारी तस्यां स विराजमसृजत्प्रभुः ३२
तपस्तप्त्वासृजद्यं तु स स्वयं पुरुषो विराट्। तं मां वित्तास्य सर्वस्य स्रष्टारं द्विजसत्तमाः ३३
अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरं। पतीन्प्रजानामसृजं महर्षीनादितो दश ३४
मरीचिमत्र्यंगिरसौ पुलस्त्यं पुलहं क्रतुं। प्रचेतसं वसिष्ठं च भृगुं नारदमेव च ३५
एते मनूंस्तु सप्तान्यानसृजन्भूरितेजसः। देवान्देवनिकायांश्च महर्षींश्चामितौजसः ३६

लिखायामवभिहितवान्स्वलोकानां प्रतीतिविषयप्रत्ययार्थं ३३ अहं प्रजाः सिसृक्षुस्तु अहं प्रजाः स्रष्टुमिच्छन् दुष्करं तपस्तप्त्वा दश प्रजापतीन् अयमसृष्टवान् येऽपि प्रजानां स्रष्टार एकत्वात् ३४ मरीचिमत्र्यंगिरसौ तथैते दश प्रजापतयो नामतो निर्दिष्टाः ३५ एते मनूंस्तु सप्तान्यान् एते मरीच्यादयो दश भूरितेजसः बहुतेजसोऽन्यान् सप्त परिमिततेजस्कान्मनून्देवांश्च अ स्रष्टं सृष्टान्देवनिकायान्देवनिवासस्थानानि स्वर्गादीनि महर्षींश्च सृष्टवन्तः मनुशब्दोऽय मधिकारवाची चतुर्दशमन्वंतरेषु यस्य यत्र सर्गाधिकारः स एव तस्मिन्मन्वंतरे स्वा यंभुवस्वारोचिषादिनामभिर्मनुरिति व्यपदिश्यते ३६

अपुष्पफलवंतो ये तासाम्नाम्ना काश्चाभिधानकोशादवसेयाः नामसंकीर्त्तिसंबंधप्रयत्नमप्रकृतत्वान्न किंतु
कर्मभोगोपजन्मनीतिप्रकृतं तदर्थमेव सदुच्यते ये वनस्पतयस्तेषां पुष्पमंतरेणैव फलं जन्म
उत्पद्यन्ते पुष्पाणि जायन्ते तेभ्यः फलमित्येवं वृक्षास्तूभयरूपाः प्रथमान्तानि ४७ गुच्छ
गुल्मं तु विविधं मूलत एव यस्तवलतासमूहो भवति न काण्डानि ते गुच्छा मल्लिकाद्याः गु
ल्मा एकमूलाः संघातजाताः शरेक्षुप्रभृतयः तृणजातयः उलपाद्याः प्रतानास्तंतुयुक्ता
स्त्रपुषालाबुप्रभृतयः वल्लयो गुडूच्याद्याः याभूमेर्वृक्षमारोहंति एतान्यपि बीजकाण्डरुहाणि
नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति नपुंसकत्वं ४८ तमसा बहुरूपेण एते वृ
क्षादयस्तमोगुणेन विविधदुःखफलेनाधर्महेतुकेन व्याप्ता अन्तश्चैतन्या भवंति यद्यपि स

अपुष्पाः फलवंतो ये ते वनस्पतयः स्मृताः पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ४७ गुच्छगु
ल्मं तु विविधं तथैव तृणजातयः बीजकाण्डरुहाण्येव प्रतानावल्ल्य एव च ४८ तमसा ब
हुरूपेण वेष्टिताः कर्महेतुना अन्तःसंज्ञा भवंत्येते सुखदुःखसमन्विताः ४९ एतदंतास्तु
गतयो ब्रह्माद्याः समुदाहृताः घोरेस्मिन्भूतसंसारे नित्यं सततयायिनि ५० एवं सर्वं स सृष्ट्वेदं
मां चाचिंत्यपराक्रमः आत्मन्यंतर्दधे भूयः कालं कालेन पीडयन् ५१

चैतन्येनैव चेतयन्ते तथापि व्यापारादिकार्यविरहान्न तथा व्यपदिश्यन्ते त्रिगुणारब्धत्वेऽपि चैषां
तमोगुणबाहुल्यात्तथा व्यपदेशः अत एव सुखदुःखसमन्विताः सत्त्वस्यापि भावात् कदा
चित्सुखलेशोऽपि जलदजनितजलसेकादेरेषां जायते ४९ एतदन्तास्तु गतयः स्थावर
पर्यन्ता ब्रह्मोपक्रमा गतयस्तु उत्पत्तयः कथिताः भूतानां देहवतां संसारे जन्ममरणप्रबंधे
दुःखबहुलतया भीषणेऽस्थायिनः स्वरे ५० उत्पत्तिसर्गमभिधाय प्रलयदशामाह एवं सर्व
स सृष्ट्वेदं एवं उक्तप्रकारेणेदं सर्वं स्थावरजंगमं मां जगत्स्रष्टारं प्रजापतिं अचिन्त्यशक्तिः
आत्मनि शरीरत्यागरूपमन्तर्धानं कृतवान् सृष्टिकालं प्रलयकालेन नाशयन्प्राणिनां

येषां तु यादृशं कर्म येषां पुनर्यादृशं कर्म इह संसारे पूर्वाचार्यैः कथितं यथौषध्यः फलपा।
कांताः ब्राह्मणादीनां यजनाध्ययनादिकर्म तत्तथैव वो युष्माकं वक्ष्यामि जन्मादिक्रमयोगं
च ४२ पशवश्च मृगाश्चैव जरायुगर्भाद्वेष्टनाच्चर्मतस्तन्मनुष्यादयः प्रादुर्भवंति पश्चात्
मुक्ता जायंते एषामेव जन्मक्रमः प्रागुक्तो विद्यतः दंतमाह समानार्थो दतशब्दः प्रकृ-
त्यंतरमस्ति तस्य दंत प्रथमा बहुवचने रूपमुभयतो दत इति ४३ अंडजाः पक्षिणः स-
र्पाः अंडत्वादौ भवंति ततो जायंते तेषां जन्मक्रमः नक्राः कुंभीरः स्थलजानि कृकला-
सादीनि औदकानि शंखादीनि ४४ स्वेदजं दंशमशकं स्वेदः पार्थिवद्रव्याणां तापन

येषां तु यादृशं कर्म भूतानामिह कीर्तितं तत्तथा वोऽभिधास्यामि क्रमयोगं च जन्मनि ४२
पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः रक्षांसि च पिशाचाश्च मानुषाश्च जरायुजाः
अंडजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः यानि चैवंप्रकाराणि स्थलजान्यौदकानि
च ४४ स्वेदजं दंशमशकं यूकामक्षिकमत्कुणं ऊष्मणश्चोपजायंते यच्चान्यत्किंचिदी-
दृशं ४५ उद्भिज्जाः स्थावराः सर्वे बीजकांडप्ररोहिणः ओषध्यः फलपाकांता बहुपुष्पा
फलोपगाः ४६

क्लेदः ततो दंशकादि जायते ऊष्मणश्च स्वेदहेतुतापाद्यच्चान्यदपीदृशं दंशादिसदृशं यूका
पिपीलिका जायते ४५ उद्भिज्जाः स्थावराः सर्वे उद्भेदनमुद्भित्तद्भावे क्विपुद्भिद्भ्यो जाय-
ते ऊर्ध्वं बीजं भूमिं च भित्वा उद्भिज्जा वृक्षास्ते च द्विविधाः केचिद्बीजादेव जायंते केचि-
त्कांडात् शाखावारोपितात् वृक्षत्वं यांति इदानीं येषां यादृशं कर्म तदुच्यते ओषध्यो
व्रीहियवादयः फलपाकेनैव नश्यंति वृक्षपुष्पफलयुक्ताश्च भवंति ओषधिषां
व्रीह्यादेव कृदिकारादिकारान्तिनः ङीपुद्दीर्घे तेओषध्य इति रूपं ४६

मनु॰
टी॰
१०

यदाणुमात्रिको भूत्वा अणवो मात्राः पुर्यष्टकरूपा यस्य स अणुमात्रकः पुर्यष्टकशब्देन भूता
दीन्यष्टावुच्यन्ते तदुक्तं सनन्दनेन भूतेन्द्रियमनोबुद्धिवासनाकर्मवायवः अविद्या चाष्ट
कं प्रोक्तं पुर्यष्टमृषिसत्तमैः ब्रह्मपुराणेऽप्युक्तं पुर्यष्टकेन लिङ्गेन प्राणाद्येन स युज्य
ते तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन तु यदाणुमात्रिकः भूत्वा स्थास्नु वृक्षा
दिहेतुभूतं चरिष्णु मानुषादिकारणं बीजं प्रविश्याधितिष्ठति तदा संसृष्टः पुर्यष्ट
कयुक्तो मूर्तिं स्थूलदेहान्तरं कर्मानुरूपं विमुञ्चति गृह्णाति आमसंयोगिकं जीवस्योत्क्रम
णमभिधाय प्रकृतमुपसंहरति ५६ एवं स जाग्रत्स्वप्नाभ्याम् उक्तेनानेन प्रकारेण
स्वीयजाग्रत्स्वप्नाभ्यामिदं स्थावरजङ्गमं संजीवयति मारयति चाजस्रं सततमव्ययः
अविनाशी ५७ इदं शास्त्रं तु कृत्वासौ असौ ब्रह्मा इदं शास्त्रं कृत्वा सृष्ट्यादौ मां

यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च समाविशति संसृष्टस्तदा मूर्तिं विमुञ्चति
एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरं संजीवयति चाजस्रं प्रमापयति चाव्ययः ५७
इदं शास्त्रं तु कृत्वासौ मामेव स्वयमादितः विधिवद्ग्राहयामास मरीच्यादींस्त्वहं मुनीन्

मेव विधिवद्ग्राहितवान् अध्यापितवानहं मरीच्यादीनध्यापितवान् न
नु ब्रह्मकृतत्वे कथं मानवव्यपदेशः तत्र मेधातिथिः शास्त्रशब्देन शास्त्रा
र्थो विधिनिषेधसमूहोऽभिधीयते तं ब्रह्मा मनुं ग्राहयामास मनुस्तत्प्रतिपादकं ग्रन्थं
कृतवानिति न विरोधः अन्ये तु ब्रह्मकृतमेवेदं मनुना प्रथमं मरीच्यादिभ्यः स्वरूपतो
ऽर्थतः प्रकाशितमतो मानवव्यपदेशः वेदापौरुषेयत्वेऽपि काठकादिव्यपदेशवदित्याहुः
तेन ब्रह्मणा ग्रन्थशतसहस्रमिदं धर्मशास्त्रं कृत्वा मनुरध्यापितः तेन च स्ववचनेन संक्षिप्य
शिष्येभ्यः प्रतिपादितमित्यविरोधः तथा च नारदः शतसहस्रोऽयं ग्रन्थ इति स्मरति
स ५८

मु॰
१०

यदा स देवो जागर्ति यदासौ प्रजापतिर्जागर्ति सृष्टिस्थिती इच्छति तदेदं जगत्स्था सचेष्टा ।
साहारविहारादिचेष्टां लभते यदा स्वपिति निवृत्तेच्छो भवति शांतात्मा उपसंहारमनास्त
देदं जगत्प्रलीयते सर्वं निमेव सपद्यति ५२ तस्मिन्स्वपिति तु स्वस्थे तस्मिन्प्रजाप
तौ निवृत्तेच्छे स्वस्थे उपसंहृतमनोदेहव्यापारे कर्मलब्धदेहाः क्षेत्रज्ञाः स्वकर्मभ्यो दे
हग्रहणादिभ्यो निवर्त्तंते मनश्च सर्वेंद्रियसहितं भवति इदानीं महाप्रलयमाह ५३
युगपत्तु प्रलीयंते एकस्मिन्नेव काले यदा तस्मिन्परमात्मनि सर्वभूतानि प्रलयं ।
यांति तदायं सर्वभूतानामात्मा निर्वृतो निवृत्तजाग्रत्स्वप्नव्यापारः सुखं स्वपिति

यदा स देवो जागर्ति तदेवं चेष्टते जगत् यदा स्वपिति शांतात्मा तदा सर्वं निमीलति ५२
तस्मिन्स्वपिति तु स्वस्थे कर्मात्मानः शरीरिणः स्वकर्मभ्यो निवर्त्तंते मनश्च ग्लानिमृच्छ
ति युगपत्तु प्रलीयंते यदा तस्मिन्महात्मनि तदायं सर्वभूतानामात्मा सुखं स्वपिति निर्वृतः
५४ तमोयं तु समाश्रित्य चिरं तिष्ठति सेंद्रियः न च स्वं कुरुते कर्म तदोत्क्रामति मूर्ति
तः ५५

सुप्त इव भवति यद्यपि नित्यज्ञानानंदस्वरूपे परमात्मनि न स्वापस्तथापि
जीवधर्मोऽयमुपचर्यते इदानीं प्रलयप्रसंगेन जीवस्योत्क्रमणमपि श्लोकद्वये
नाह ५४ तमोयं तु समाश्रित्य अयं जीवस्तमो ज्ञाननिवृत्तिं प्राप्य बहुकालं इं
द्रियसहितस्तिष्ठति न चात्मीयं कर्म श्वासप्रश्वासादिकं करोति तदा मूर्त्तितः स्व
मदेहादुत्क्रामति अन्यत्र गच्छति लिंगशरीरावच्छिन्नस्य जीवस्योत्क्रमणागमनम
प्युपपद्यते तथा चोक्तं बृहदारण्यके तमुत्क्रामंतं प्राणोऽनूत्क्रामति प्राणमनू
त्क्रामंतं सर्वे प्राणा अनूत्क्रामंति प्राणग्रहणं इंद्रियाणां कदा देहांतरं गृह्णातीत्याह ५५

म॰स्मृ॰
टी॰
२२

अहोरात्रे विभजते मानुषदैवसंबंधिनो दिनरात्रिकालौ आदित्यः पृथक्करोति तयोर्मध्ये भूतानां स्वापार्थं रात्रिर्भवति कर्मानुष्ठानार्थं च दिनं ॥६५॥ पित्र्ये रात्र्यहनी मासः मानुषाणां मासः पितॄणामहोरात्रे भवतः तत्र पक्षद्वयेन विभागः कर्मानुष्ठाय कृष्णः पक्षोऽहः स्वापार्थं शुक्लः पक्षो रात्रिः ॥६६॥ दैवे रात्र्यहनी वर्षं मानुषाणां वर्षं देवानां रात्रिदिने भवतः तयोरप्ययं विभागः नराणामुदगयनं देवानामहः तत्र प्रायेण दैवकर्मणामनुष्ठानात् दक्षिणायनं तु रात्रिः ॥६७॥ ब्राह्मस्य तु क्षपाहस्य ब्रह्मणोऽहोरात्रस्य यत्परिमाणं प्रत्येकं युगानां च कृतादीनां तत्क्रमेण समासतः संक्षेपतः शृणुत प्रकृतेऽपि कालविभागे म

अहोरात्रे विभजते सूर्यो मानुषदैविके रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ॥६५॥
पित्र्ये रात्र्यहनी मासः प्रविभागस्तु पक्षयोः ॥६६॥
दैवे रात्र्यहनी वर्षं अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनं ॥६७॥
ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः एकैकशो युगानां तु क्रमशस्तन्निबोधत ॥६८॥
चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगं तस्य तावच्छती संध्या संध्यांशश्च तथाविधः

ब्रह्माहोरात्रस्य एव युगपरिज्ञानं तन्नदीयज्ञानस्य गुणफलसिद्ध्यर्थं वक्ष्यति ब्राह्मं पुण्यमहर्विदुरिति तद्वेदनात्पुण्यं भवतीत्यर्थः ॥६८॥ चत्वार्याहुः सहस्राणि कृतयुगकालं मन्वादयो वदंति तस्य तावद्वर्षशतानि संध्यांशश्च भवति युगस्य पूर्वा संध्या उत्तरस्य संध्यांशः तदुक्तं विष्णुपुराणे तत्प्रमाणैः शतैः संध्या पूर्वा तत्राभिधीयते संध्यांशकश्च तत्तुल्यो युगस्यानंतरो हि यः संध्यासंध्यांशयोरंतर्यः कालो मुनिसत्तम युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञकः वर्षसंख्या चेयं दिव्यमानेन तस्यैवानंतरं प्रकृतत्वात् दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितं चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे इति वि

टी॰
२२

11

एतद्वोऽयं भृगुः शास्त्रं एतच्छास्त्रमयं भृगुर्युष्माकमखिलं श्रावयिष्यति यस्मादेषोऽशेष
मेतन्मत्तोऽधीतवान् ५९ ततस्तथा स तेनोक्तो मध्ये मनुना तथोक्तोऽयं श्रावयिष्यतीत्यु
क्तः ततोऽनंतरमनेकमुनिसन्निधौ गुरुसंभावनया प्रीतमनास्तानृषीन्शृणुतामिति
प्रत्युवाच ६० स्वायंभुवस्यास्य मनोः ब्रह्मपौत्रस्यास्य मनोः षड्वंश्याः प्रभवा अन्ये म
नवः कार्यकारिणः स्वस्वकाले सृष्टिपालनादावधिकृतास्ताः प्रजा उत्पादितवन्तः
६१ स्वारोचिषश्चोत्तमश्च एते मनवः षट् मनोर्निर्दिष्टाः ६२ स्वायंभुवाद्याः सप्तैते

एतद्वोऽयं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः । एतद्धि मत्तोऽधिजगे सर्वमेषोऽखिलं मुनिः ॥
५९ ततस्तथा स तेनोक्तो महर्षिर्मनुना भृगुः । तानब्रवीदृषीन्सर्वान्प्रीतात्मा श्रूयतामिति ॥
स्वायंभुवस्यास्य मनोः षड्वंश्या मनवोऽपरे । सृष्टवन्तः प्रजाः स्वाः स्वा महात्मानो महौजसः ॥ ६१
स्वारोचिषश्चोत्तमिश्च तामसो रैवतस्तथा । चाक्षुषश्च महातेजा विवस्वत्सुत एव च ॥ ६२
स्वायंभुवाद्याः सप्तैते मनवो भूरितेजसः । स्वे स्वेऽन्तरे सर्वमिदमुत्पाद्यापुश्चराचरम् ॥ ६३
निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला । त्रिंशत्कला मुहूर्तः स्यादहोरात्रं तु तावतः ॥

ते स्वायंभुवप्रमुखाः सप्तामी मनवः स्वीयस्वीयाधिकारकाले इदं सर्वं जगदुत्पा
द्य पालितवन्तः ६३ इदानीमुक्तमन्वन्तरसृष्टिप्रलयादिकालपरिमाणप
रिज्ञानायाह निमेषा दश चाष्टौ च अक्षिपक्ष्मणोः स्वाभाविकं कंपनं निमेषस्तत्
सहचारी निमेषः तेऽष्टादश काष्ठानामकालः त्रिंशत्काष्ठाः कलासंज्ञकः कालः त्रिं
शत्कला मुहूर्ताख्यः कालः तावतस्त्रिंशन्मुहूर्तानहोरात्रं कालं विद्यात् तत्तावत इति
द्वितीयानिर्देशाद्दिवसादिमाप्याहारः ६४

म॰ स्मृ॰
टी॰
२२

तस्य सोऽहर्निशस्यान्ते सर्वस्मात्तस्य सर्वोत्कृष्टस्याहोरात्रस्यान्ते प्रतिबुद्धो भवति प्रतिबुद्धश्चायं लीयमनः सृजति भूर्लोकादित्रयसृष्ट्यर्थं नियुङ्क्ते न तु जनयति तस्य महाप्रलयानन्तरजातत्वादनेन त्ववान्तरप्रलये भूर्लोकादित्रयमात्रनाशात् सृष्ट्यर्थं मनो नियुङ्क्ते रेव मनःसृष्टिः तथा च पुराणेष्वप्युक्तं मनःसिसृक्षया प्रयुक्तं सर्गाय निदधे पुनरिति अथवा मनःशब्दोऽयं महत्तत्त्वपर एवं च सति तन्महाप्रलयानन्तरमुत्पन्नं महान्तमेव वे त्यादिना सृष्टिः रचितस्योक्तान्तयापि तत्त्वं भूतानामत्र क्रमेतद्गुणं च कथयितुं महाप्रलयानन्तरितामेव महदादिसृष्टिं भूतसृष्टिं च हिरण्यगर्भस्य परमात्मत्वात् तत्क

तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते प्रतिबुद्धश्च सृजति मनः सदसदात्मकं ७४
मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः
आकाशात्तु विकुर्वाणात्सर्वगन्धवहः शुचिः बलवाञ्जायते वायुः स वै स्पर्शगुणो
मतः ७६

र्तृतामनुवदति एतेनेदमुक्तं भवति ब्रह्मा महाप्रलयानन्तरितस्सृष्ट्यादौ परमात्मरूपेण महदादितत्त्वानि जगत्सृष्ट्यर्थं सृजति अत एव योऽसौ वक्ष्यति इत्येषां सृष्टिरादितः इति अवान्तरप्रलयानन्तरं तु मनःप्रभृतिसृष्टावभिधानक्रमेणैव प्रायस्त्वान्निवृत्ते सृष्टिवादि तदुक्तिर्निःप्रयोजनो न वादः स्यात् ७४ मनःसृष्टिं विकुरुते मनो महान् सृष्टिं करोति परमात्मनः स्रष्टुमिच्छया प्रेर्यमाणं तस्मादाकाशमुत्पद्यते तं च पूर्वोक्तानुसारादहङ्कारतन्मात्राक्रमेण तस्य शब्दं गुणं विदुर्मन्वादयः ७५ आकाशात्तु विकुर्वाणात् आकाशात्तु विकारजनकात्सर्वगन्धवहः पवित्रो बलवांश्च वायुरुत्पद्यते स च स्प

पु॰ २२

इतरेषु चसंध्येषु अंशेषु त्रेताद्वापरकलियुगेषु संध्यासंध्यांशसहितेषु एकहान्या सहस्राणि शतानि च भवन्ति चतेनेदं संपद्यते । त्रीणि वर्षसहस्राणि त्रेतायुगं तस्य त्रीणि वर्षशतानि संध्यासंध्यांशयोः । एवं द्वे वर्षसहस्रे द्वापरः तस्य द्वे वर्षशते संध्यासंध्यांशयोः । एवं वर्षसहस्रं कलिः तस्यैकं वर्षशतं संध्यासंध्यांशयोः ७० यदेतत्परिसंख्यातं एतस्य श्लोकस्यार्थे यदेतन्मानुषचतुर्युगपरिगणितमेतद्देवानामेकयुगमुच्यते चतुर्युगाणामेव संध्यासंध्यांशयोरप्यन्तर्गतत्वादाह एतद्द्वादशसाहस्रमिति सार्धः एकचतुर्युगो । देवद्वादशसहस्रसंख्यो दिव्यं युगमिति तन्मेधातिथिभ्रमो नादर्त्तव्यः मनुनानन्तरं दिव्ययुगसहस्रेण ब्राह्मस्याह्नोऽभिधानात् विष्णुपुराणेन मानुषचतुर्युगसहस्रेण ब्राह्मा-

इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु । एकापायेन वर्त्तन्ते सहस्राणि शतानि च ७०
यदेतत्परिसंख्यातमादावेव चतुर्युगं । एतद्द्वादशसाहस्रं देवानां युगमुच्यते ७१
दैविकानां युगानां तु सहस्रं परिसंख्यया । ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः । रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः ७२

हः कीर्तनात् मानुषचतुर्युगेनैव दिव्ययुगावगमात् तथा विष्णुपुराणे कृतं त्रेता द्वापरश्च कलिश्चेति चतुर्युगं प्रोच्यते तत्सहस्रं तु ब्रह्मणो दिवसो मुने ७१ दैविकानां युगानां च देवयुगानां सहस्रं ब्राह्मं दिनं तावत्संख्यसहस्रमेव रात्रिः परिसंख्ययेति श्लोकपूर्णार्थोऽनुवादः ७२ तद्वै युगसहस्रान्तं युगसहस्रेणान्तः समाप्तिर्यस्य तद्ब्राह्मं अहस्तत्परिमाणां च रात्रिं ये जानन्ति तेऽहोरात्रज्ञा इति [illegible] ब्राह्ममहोरात्रं ज्ञातव्यमिति विधिः कल्प्यते अत एव पुण्यमहस्तत्त्वाज्ज्ञानमपीति विधिगतिः कृतं ७३ ॥

म॰स्मृ॰
टी॰
२३

इतरेष्वागमाद्धर्मः सत्ययुगादन्येषु त्रेतादिष्वागमाद्धर्मं ज्ञानविद्यादेर्वृत्तान्तस्यैव पूर्वश्लो
कप्रकृतत्वादागमाद्वेदादिति गोविन्दराजमेधातिथी धर्मो यागादिः यथाक्रमं प्रतियुगं पादं।
पादमवरोपितो हीनः तथाविधधनादियाजितो धर्मः प्रचरति सोऽपि चौर्यासत्यछद्मभिः प्रतियु
गं पादशो ह्रासमुपगच्छति त्रेतादियुगेः सह चौरिकानृतछद्मानां यथासंख्येन त्रेतायां सर्वे पाद
शनात् ८२ अरोगाः सर्वसिद्धार्थाः रोगादिनिमित्ताधर्माभावादरोगाः सर्वसिद्धकाम्यफलाः
प्रतिबन्धकाधर्माभावात् चतुर्वर्षशतायुषत्वं च स्वाभाविकमधिकायुः सामर्थ्याद्धर्मबलादधि
कायुषोऽपि भवन्ति तेन दशवर्षसहस्राणि रामो राज्यमकारयदित्यविरोधः शतायुर्वै पुरुषः

इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः। चौरिकानृतमायाभिर्धर्मश्चापैति पादशः॥ ८२
अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः। कृते त्रेतादिषु ह्येषां वयो ह्रसति पादशः॥ ८३
वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम्। फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम्॥
अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे। अन्ये कलियुगे नृणां युगह्रासानुरूपतः॥ ८५
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते। द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे॥ ८६
सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः। मुखबाहूरुपज्जानां पृथक्कर्माण्यकल्पयत्॥

इत्यादिश्रुतौ तु यावत्सामर्थ्यं तु शतपरः कलिपर्यायाः एवंरूपाः मनुष्याः कृते भवन्ति त्रेतादिषु पुनः पा
दपादह्रासः आयुरल्पं भवतीति ८३ वेदोक्तमायुर्मर्त्यानां शतायुर्वै पुरुष इत्यादि वेदोक्तमायुः
कर्मणां च काम्यानां फलविषयाः आशिषो ब्राह्मणादीनां च शापानुग्रहसामर्थ्यादिप्रभावा
युगानुरूपेण फलन्ति ८४ अन्ये कृतयुग इति कृतयुगेऽन्ये धर्मा भवन्ति त्रेतादिष्वन्ये।
यि युगापचयानुरूपेण धर्मवैलक्षण्यं ८५ तपः परं कृतयुगे यद्यपि तपःप्रभृती
नि सर्वाणि सर्वयुगेष्वनुष्ठेयानि तथापि सत्ययुगे तपः प्रधानं महाफलमिति ज्ञाप्य
ते एवं आत्मज्ञानं त्रेतायुगे द्वापरे यज्ञं दानं कलौ ८६ सर्वस्यास्य तु सर्गस्य सत्त्वसम्
हा तेजा अस्य सर्गस्य अस्य त्रिलोकस्य रक्षार्थं मुखबाहूरुजातानां ब्राह्मणादीनां वि
भागेन कर्माणि दृष्टादृष्टार्थानि निर्मितवान् ८७

टी॰
२३

23

वायोरपि विकुर्वाणात् वायोरपि तेज उत्पद्यते विरोचिष्णु स्वपरप्रकाशकं तमोनाशनं भास्वत्।
प्रकाशकं तच्च रूपगुणमभिधीयते ७७ ज्योतिषश्च विकुर्वाणात् तेजसः आप उत्पद्यन्ते
ताश्च रसगुणाः स्मृताः अद्भ्यो गन्धगुणा भूमिः इत्येषा महाप्रलयानन्तरं सृष्टिरादिभू
तसृष्टिः तैरेव भूतैरेवान्तरप्रलयानन्तरमपि भूरादिलोकत्रयनिर्माणं ७८ यत्प्राग्
द्वादशसाहस्रं यत्पूर्वं द्वादशवर्षसहस्रपरिमाणं संध्यासंध्यांशसहितं मानुषाणां च
तुर्युगं देवानामेकयुगमुक्तं तदेकसप्ततिगुणं मन्वन्तराख्यः कालः इह शास्त्रेऽभिधीय
ते तत्रैकस्य मनोः स्वायंभुवादेरधिकारः ७९ मन्वन्तराण्यसंख्यानि यद्यपि चतुर्दश मन्व
न्तराणि पुराणेषु प्रसिद्धानि तथापि सर्गप्रलययोरानन्त्यादसंख्यानि अत आह सर्गः
संहारश्चासंख्यः एतत्सर्वं क्रीडन्निव प्रजापतिः पुनः पुनः कुरुते असंख्यो हि प्रवृत्तिः को

वायोरपि विकुर्वाणाद्विरोचिष्णु तमोनुदं ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते ७७
ज्योतिषश्च विकुर्वाणादापो रसगुणात्मकाः अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः
यत्प्राग्द्वादशसाहस्रमुदितं दैविकं युगं तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते ७८ म
न्वन्तराण्यसंख्यानि सर्गः संहार एव च क्रीडन्निवैतत्कुरुते परमेष्ठी पुनः पुनः ७९ चतु
ष्पात्सकलो धर्मः सत्यं चैव कृते युगे नाधर्मेणागमः कश्चिन्मनुष्यान्प्रतिवर्तते ८०

शतप्रचाप्तकामत्वाच्च स्वार्थेति उक्तवानाह प्रश्नः परमेष्ठिनो नाप्तकामत्वात् लीलार्थमपि प्रवृत्तिरिति प
रमेष्ठी प्रयोजनं विना परमात्मनः सृष्ट्यादिकर्मप्रवृत्तिरिति चेत् लीलयैवं स्वभावत्वात्।
व्याख्यातरि वक्त्र चालनादौ तथाप्यारोपकं तु लोकवल्लीलाकैवल्य ८० चतुष्पात्सक
लो धर्मः सत्ययुगे सर्वो धर्मश्चतुष्पात्सर्वाङ्गसंपन्न आसीत् धर्मस्याव्ययपादसंभवात् वृ
षो हि भगवान्धर्मः इत्यागमे वृषरूपत्वेन कीर्तनात् तस्य पादचतुष्टयेन संपूर्णत्वात् सत्ययुगे
पि सत्यादिधर्माणां सर्वैर्योः समग्रत्वात् संपूर्णत्वं परोऽयं चतुष्पाच्छब्दः अथवा तपः परमि
त्यत्र मनुनैव तपोज्ञानयज्ञदानानां चतुर्णां कीर्तनात् तदेव ब्राह्मण्यात् स्नातकत्वेन निरूपिताः
सत्ययुगे समग्राश्चत्वारः तथा सत्यं च तस्मिन्नासीत् सकलधर्मश्रेष्ठत्वात् [illegible] पृथगुह

यस्यास्येन सदाश्नन्ति यस्य विप्रस्य मुखेन स्वर्गस्थाः सर्वदा देवा हव्यानि पितरः कव्यानि भुंजते
ततोऽन्यत्प्रकृष्टतमं किं भूतं भवेत् ९५ भूतानां प्राणिनः श्रेष्ठाः भूतानां स्थावरजंगमानां म
ध्ये प्राणिनः कीटादयः श्रेष्ठाः कदाचित्सुखलेशयोगात् तेषामपि बुद्धिजीविनः सार्थनिरर्थोपसर्प
णापसर्पणकारिणः पश्वादयः तेभ्योऽपि मनुष्याः प्रकृष्टज्ञानसंबंधात् तेभ्योऽपि ब्राह्मणाः सर्व
पूज्यत्वादपवर्गाधिकारयोग्यत्वाच्च ९६ ब्राह्मणेषु च विद्वांसो ब्राह्मणेषु मध्ये विद्वांसो
महाफलज्योतिष्टोमाद्यधिकारित्वात् तेभ्योऽपि कृतबुद्धयः अनायातेऽपि कृतं मयेति बुद्धिर्येषां शा
स्त्रोक्तानुष्ठानेषूत्पन्नकर्तव्यताबुद्धय इत्यर्थः तेभ्योऽप्यनुष्ठातारः हिताहितप्राप्तिपरिहार

यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः कव्यानि चैव पितरः किं भूतमधिकं ततः ९५
भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः
ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवादिनः ९७
उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती विप्रो धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ९८
ब्राह्मणो जायमानो हि पृथिव्यामधिजायते ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ९९
सर्वं स्वं ब्राह्मणस्येदं यत्किंचिज्जगतीगतं श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति १००

भागित्वात्तेभ्योऽपि ब्रह्मविदः मोक्षलाभात् ९७ उत्पत्तिरेव विप्रस्य ब्राह्मणदेहजन्ममात्रमे
व धर्मस्य शरीरमविनाशि यस्मादसौ धर्मार्थं जातः धर्मार्थं गृहीतात्मज्ञानेन मोक्षाय संपद्य
ते ९८ ब्राह्मणो जायमानो हि यस्माद्ब्राह्मणो जायमानः पृथिव्यामधि उपरि भवति श्रेष्ठ
सर्वः सर्वभूतानां धर्मरक्षायै प्रभुः ब्राह्मणोपदिष्टत्वात्सर्वधर्माणां ९९ सर्वं स्वं ब्राह्म
णस्येह पृथिव्यां यत्किंचिज्जगद्गतं धनं तद्ब्राह्मणस्य स्वमिति स्तुत्योच्यते स्वमिव स्वं न तु ब्राह्मणस्या
पि मनुनास्तेयस्यापि वक्ष्यमाणत्वात् यस्माद्ब्रह्ममुखोद्भवत्वेनाभिजनेन श्रेष्ठतया सर्वं
ब्राह्मणोऽर्हति सर्वग्रहणयोग्यो भवति १००

अध्यापनमध्ययनं अध्यापनादीनामिह सृष्टिप्रकरणे सृष्टिविशेषतयाभिधानं विधिस्त्वेषामु
त्तरत्र भविष्यति अध्यापनादीनि षट्कर्माणि ब्राह्मणानां कल्पितवान् ८८ प्रजानां रक्ष
णादीनि क्षत्रियस्य कल्पितवान् विषयेषु गीतनृत्यवनितोपभोगादिष्वप्रसक्तिस्तेषां पुनः
पुनरनासेवनं समासतः संक्षेपतः ८९ पशूनां रक्षणं पशुपालनादीनि वैश्यस्य कर्माणि
कल्पितवान् वणिक्पथं स्थलजलपथादिना वाणिज्यं कुसीदं वृद्ध्याधनप्रयोगः ९० एकमे
व तु शूद्रस्य प्रभुर्ब्रह्मा शूद्रस्य ब्राह्मणादिवर्णत्रयपरिचर्यात्मकं कर्म कल्पितवान् एकमेवेति
प्राधान्यप्रदर्शनार्थं दानादेरपि तस्य विहितत्वादनसूयया गुणानिन्दया ९१ इदानीं प्राधान्ये

वैश्यस्य कृषिमेव च ३

अध्यापनमध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् ८८
प्रजानां रक्षणं दानमिज्याध्ययनमेव च विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः ८९
पशूनां रक्षणं दानमिज्याध्ययनमेव च वणिक्पथं कुसीदं च शुश्रूषामनसूयया ९०
एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् एतेषामेव वर्णानां शुश्रूषामनसूयया ९१
ऊर्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्तितः तस्मान्मेध्यतमं त्वस्य मुखमुक्तं स्वयंभुवा ९२
उत्तमांगोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात् सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ९३
तं हि स्वयंभूः स्वादास्यात्तपस्तप्त्वादितोऽसृजत् हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये ९४

न सर्गरक्षणार्थत्वाद्ब्राह्मणस्य तदुपक्रमधर्माभिधानत्वाद्ब्राह्मणस्तुतिमाह ऊ
र्ध्वं नाभेर्मेध्यतरः सर्व एव पुरुषो मेध्यः नाभेरूर्ध्वमतिशयेन मेध्यस्ततोऽपि मुखमस्य मेध्यतम
मुक्तं ब्रह्मणा ९२ ततः किमत आह उत्तमांगोद्भवात् उत्तमांगं मुखं तदुद्भवात् क्षत्रादिभ्यः
पूर्वोत्पन्नत्वात् अध्यापनव्याख्यानादिना पुरुषोपकारातिशयेन वेदधारणाच्च सर्वस्यास्य जगतो
धर्मानुशासनेन ब्राह्मणः प्रभुः ९३ कुत उत्तमांगादस्य मुखमुत्पन्नमित्यत आह तं हि स्वयंभूः स्वादा
स्यात् तं ब्राह्मणं ब्रह्मा आत्मीयमुखाद्देवपित्र्यहविःकव्यवाहनाय तपः कृत्वा सर्वस्य जगतो
रक्षार्थं च क्षत्रियादिभ्यः प्रथमं सृष्टवान् पूर्वोक्तहव्यकव्यवाहनं स्पष्टयति ९४

म॰ स्मृ॰ टी॰ २५

इदं स्वस्त्ययनं श्रेष्ठं अभिप्रेतार्थस्याविनाशः स्वस्ति तस्यायनं प्रापकं एतच्चास्य शास्त्रस्याध्ययनं ज
पहोमादिवो धर्मकलापश्रेष्ठं स्वस्त्ययनान्तरापेक्षया श्रेष्ठं बुद्धिविवर्द्धनमेतच्छास्त्राभ्यासेनाशेष ।
विधिनिषेधपरिज्ञानाद्यशस्यं हितं पश्यन्स्वविद्वत्तयाख्यातिलाभात्तथायुष्यं निःश्रेयसं निःश्रेयस
साधनोपायोपदेशकत्वात् ७ अस्मिन्धर्मोऽखिलेनोक्तो अस्मिंश्च शास्त्रे धर्मः समग्रेण
निहितः अनियमस्त्वप्रसिद्ध्या सर्वेषां कर्मणां च विहितनिषिद्धानामिष्टानिष्टफले वर्णानां चतु
र्णामेव पुरुषधर्मरूपश्चाचारः शाश्वतः पारंपर्यागतः धर्मत्वेप्याचारस्य प्राधान्यख्याप

यथैव वेदाध्ययनं धर्मशास्त्रमिदं तथा अध्येतव्यं ब्राह्मणेन नियतं स्वर्गमिच्छता ६ इदं
स्वस्त्ययनं श्रेष्ठमिदं बुद्धिविवर्द्धनं इदं यशस्यं सततमिदं निःश्रेयसं परं ७ अस्मिन्धर्मो
ऽखिलेनोक्तो गुणदोषौ च कर्मणां चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः ८ आ
चारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च तस्मादस्मिन्सदा युक्तो नित्यं स्यादात्मवान्द्विजः ९
आचाराद्विच्युतो विप्रो न वेदफलमश्नुते आचारेण तु संयुक्तः संपूर्णफलभाक् स्मृतः १०
एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिं सर्वस्य तपसो मूलमाचारं जगृहुः परं ११

15

नाय पृथग्ग्रहणं प्राधान्यमेवमाह ८ आचारः परमो धर्म इति युक्तो यत्नवानात्महि
तेच्छुः सर्वस्मान्मालीतिश्चात्मशब्देनात्महितेच्छा लक्ष्यते ९ आचाराद्विच्युतो आचारा
द्विच्युतो विप्रो न वैदिकं फलमाप्नोति आचारयुक्तः पुनः समग्रफलभाग्भवति १०
एवमाचारतो दृष्ट्वा उक्तप्रकारेणाचाराद्धर्मप्राप्तिं मुनयो दृष्ट्वा तपसश्चान्द्रायणादेः
समग्रस्य कारणमाचारमनुष्ठेयतया गृहीतवन्तः उत्तरत्र वक्ष्यमाणस्याचारस्योद्देश
तिः शास्त्रस्यार्था ११

३॰ २५

स्वमेव ब्राह्मणो भुङ्क्ते यत्परस्यान्नं ब्राह्मणो भुङ्क्ते परस्य च वस्त्रं परिधत्ते गृहीत्वान्यस्मै ददाति तद
पि ब्राह्मणस्य स्वमिति पूर्ववत्स्तुतिः एवं सति ब्राह्मणस्य कारुण्यादस्मै भोजनादि कुर्वन्ति इत
रे प्रकृष्टब्राह्मणकर्माभिधायकशास्त्रप्रशंसां प्रक्रमते २ तस्य कर्मविवेकार्थं ब्राह्मण
स्य कर्मज्ञानार्थं शेषाणां क्षत्रियादीनां च स्वायंभुवो ब्रह्मपौत्रो धीमान्सर्वविषयज्ञानवान्मनु
रिदं शास्त्रं विरचितवान् ३ विदुषा ब्राह्मणेनेदं एतच्छास्त्राध्ययनफलज्ञेन ब्राह्मणेनैत
च्छास्त्रं व्याख्यानाध्यापनोचितं प्रयत्नतोऽध्येतव्यं शिष्येभ्यश्चेदं व्याख्यातव्यं नान्येन क्ष
त्रियादिना अध्ययनमात्रं त्वव्याख्यानाध्यापनोचितं प्रयत्नतोऽध्ययनं कर्तव्यं शिष्येभ्यश्चेदं) वेद
तेन त्रिवर्णस्याध्ययनेऽपि निषेकादिः श्मशानान्तो [illegible] विधास्यते अनुवादमात्रमेतदिति तत्त्वम्।

स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च आनृशंस्याद्ब्राह्मणस्य भुञ्जते हीतरे जनाः २ त
स्य कर्मविवेकार्थं शेषाणां चानुपूर्वशः स्वायंभुवो मनुर्धीमानिदं शास्त्रमकल्पयत् ३ वि
दुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः शिष्येभ्यश्च प्रवक्तव्यं सम्यङ्नान्येन केनचित् ४
इदं शास्त्रमधीयानो ब्राह्मणः शंसितव्रतः मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते १०४
पुनाति पङ्क्तिं वंश्यांश्च सप्तसप्तपरावरान् पृथिवीमपि चैवेमां कृत्स्नामेकोऽपि सोऽर्हति ५

धीतिपि मतं तत्त्र मनोहरं हि नैवाध्ययनं ब्राह्मणेनैवाध्यापनव्याख्याने इत्यस्य लाभात् यत्त्वध्य
धीयीरं [illegible] वर्णेषु [illegible] विषयमिति वदन्ति विप्रेणैवाध्याप्यमिति विधानं संभव।
स्यपि [illegible] ४ इदं शास्त्रमधीयानो इदं शास्त्रं पठन्न
धीयमानं [illegible] शंसितव्रतो नियमितव्रतः मनोवाक्कायसंभवैः पापैर्न संबध्यते १०४ पु
नाति पङ्क्तिं वंश्यांश्च इदं शास्त्रमधीयान इत्यनुवर्तते अपाङ्क्त्योपहतां पङ्क्तिं मातृपूर्वा
न्पितृपूर्वांश्च [illegible] पवित्रीकरोति वंश्यांश्च सप्तसप्तपरान्पुत्रादीन्सप्तावरान्पित्रादीन्पृथिवीम
पि कृत्स्नां [illegible] तेन परिगृहीतेन योग्यो भवति ५

वैश्यशूद्रयोरुपचारं वैश्यशूद्रोपचारं स्वधर्मानुष्ठानं एतच्च वक्ष्यते संकीर्णानामनुलोमप्रति
लोमजातानामुत्पत्तिः आपदि जीविकोपदेश आपद्धर्मः एतद्दशमे प्रायश्चित्तविधिरेकादशे
११६ संसारगमनं संसारगमनं देहान्तरप्राप्तिरूपं उत्तममध्यमाधमभेदेन त्रिविधं शुभाशुभ।
कर्महेतुकं निःश्रेयसमात्मज्ञानं सर्वोत्कृष्टमोक्षलक्षणश्रेयोहेतुत्वात् कर्मणां च विहितनिषि
द्धानां गुणदोषपरीक्षणं ११७ देशधर्मान् जातिधर्मान् प्रतिनियतदेशेनानुष्ठीयमाना देशध
र्मा ब्राह्मणादिजातिधर्माः कुलविशेषाश्रयाः कुलधर्माः वेदबाह्यागमसमाश्रयाः
प्रतिषिद्धव्रतचर्याः पाषण्डास्तेषां यो यस्य कृष्णोपि पाषण्डः तन्निमित्ता ये धर्माः पाषण्डिनो
पि कर्मत्वात्तस्माद्वचनैर्गणस्य धर्मा न अभिधानाद्गणः समूहो वादीनां ११८ यथेद

वैश्यशूद्रोपचारं च संकीर्णानां च संभवं आपद्धर्मं च वर्णानां प्रायश्चित्तविधिं तथा
संसारगमनं चैव त्रिविधं कर्मसंभवं निःश्रेयसं कर्मणां च गुणदोषपरीक्षणं ११७
देशधर्मान् जातिधर्मान् कुलधर्मांश्च शाश्वतान् पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवा
न्मनुः ११८ यथेदमुक्तवाञ्छास्त्रं पुरा पृष्टो मनुर्मया तथेदं यूयमप्यद्य मत्सकाशान्निबो
धत ११९ इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां प्रथमोऽध्यायः १

मुक्तवांश्छास्त्रं पूर्वं मया पृष्टो मनुर्यथेदं शास्त्रमुक्तमभिहितवान् तथैवान्यूनातिरिक्तं
मत्सकाशाच्छृणुतेति ऋषीणां भृगुवाक्यमिदं प्रायः पुनरभिधानं ११९ इति नन्दवासी
यात्मजश्रीकुल्लूकभट्टकृतायां मन्वर्थमुक्तावल्यां मनुवृत्तौ प्रथमोऽध्यायः समाप्तः १
गौडे नन्दनवासिनाम्नि सुजनैर्वन्द्ये वरेन्द्र्यां कुले विप्रो भट्टदिवाकरस्य तनयः कुल्लूकभट्टो
भवत् वृत्तिलवमनुस्मृतौ शिवपुरे ध्याये द्वितीयेऽधुनारम्भे प्रक्रियते हिताय विदुषां
मन्वर्थमुक्तावली १

इदानीं शिष्याणां सुखप्रतिपत्तये वक्ष्यमाणार्थानुक्रमणिकामाह जगतश्च समुत्पत्तिं पाषंड
गणधर्मांश्चेत्यंतं जगदुत्पत्तिर्यथोक्ता ब्राह्मणस्तु तिष्ठेत्सर्गे रक्षणार्थं तेन ब्राह्मणस्य माहा
त्म्यादिकं च सदृष्टेरेवं लभ्यते भवति एतत्प्रथमाध्यायप्रमेयं संस्काराणां जातकर्मादीनां च वि
धिरनुष्ठानं ब्रह्मचारिणां व्रतचरणमुपचारश्च गुर्वादीनामभिवादनोपासनादि सवोढ,
ह्णो विभाषिकाव द्वतीति एकवद्भावः एतद्द्वितीयाध्यायप्रमेयं स्नानं गुरुकुलान्निवर्त
मानस्य संस्कारविशेषस्तस्य प्रकृष्टं विधानं १२ दाराधिगमनं चैव दाराधिगमनं वि
वाहः तद्विशेषाणां ब्राह्मादीनां च लक्षणं महायज्ञाः पंचवैश्वदेवादयः श्राद्धस्य विधिः शा

जगतश्च समुत्पत्तिं संस्कारविधिमेव च व्रतचर्योपचारं च स्नानस्य च परं विधिं ११ दा
राधिगमनं चैव विवाहानां च लक्षणं महायज्ञविधानं च श्राद्धकल्पं च शाश्वतं १२ वृ
त्तीनां लक्षणं चैव स्नातकस्य व्रतानि च भक्ष्याभक्ष्यं च शौचं च द्रव्याणां शुद्धिमेव च १३
स्त्रीधर्मयोगं तापस्यं मोक्षं संन्यासमेव च राज्ञश्च धर्ममखिलं कार्याणां च विनिर्णयं १४
साक्षिप्रश्नविधानं च धर्मं स्त्रीपुंसयोरपि विभागधर्मं द्यूतं च कंटकानां च शोधनं १५

श्वतः प्रतिसर्गमनादिप्रवाहरूपत्वान्नित्यः एष तृतीयाध्यायार्थः १२ वृत्तीनां लक्षणं चैव जी
वनोपायानामृतादीनां लक्षणं स्नातकस्य गृहस्थस्य व्रतानि नियमाः एतच्चतुर्थाध्यायप्रमेयं भक्ष्यं
यथाविध्यभक्ष्यं लशुनादि शौचं मरणादौ ब्राह्मणस्य दशाहादिना द्रव्याणां शुद्धिरुदकादिना
१३ स्त्रीधर्मयोगं धर्मोपायं एतत्पंचमिकं तापस्यं तापसानां यत्वानप्रस्थ्यापहितं तन्नाम मोक्षं
मोक्षहेतुत्वाद्यतिधर्मं पतिधर्मस्तुपि संन्यासं गृहस्थानामुपदेशः प्राधान्याव्यापन्नार्थं एष ष
ष्ठाध्यायार्थः राज्ञोऽभिषिक्तस्य सर्वोऽदृष्टादृष्टार्थो धर्मः एष सप्तमाध्यायार्थः कार्याणामृणा
दीनामर्थिप्रत्यर्थिसमर्पितानां विनिर्णयो विचार्य तत्त्वनिर्णयः १४ साक्षिणां च प्रश्ने पृष्टिधानं
अष्टहार्योपि साक्षिप्रश्नस्य विधानं निर्णयो पापपत्वात्पृथगुक्तः एतदष्टमिकं स्त्रीपुंस्यो
र्धापत्यो संनिधौ च यत्र धर्मस्तदनुष्ठानकर्तव्यं विभागस्य धर्मे यथापि कर्तव्यं विभागोपिकार्यो

कामात्मता न प्रशस्ता फलाभिलाषशीलत्वं पुरुषस्य कामात्मता सा न प्रशस्ता बंधहेतुत्वात् स्वर्गादिफलाभिलाषेण काम्यानि कर्माण्यनुष्ठीयमानानि पुनर्जन्मने भवंति नित्यनैमित्तिकानि त्वात्मज्ञानसहकारितया मोक्षाय कल्पंते न च पुनरिच्छामात्रमनेन निषिध्यते तदाह न चैवेति यतो वेदस्वीकरणं वैदिककर्मसकलकर्मसंबंधश्चेच्छाविषयावेव २ तत्रोपपत्तिमाह संकल्पमूलः कामो वै अनेन कर्मणेदमिष्टफलं साध्यत इत्येवंविषया बुद्धिः संकल्पः तदनंतरमिष्टसाधनतयावगते तस्मिन्निच्छा जायते तदर्थं प्रयत्नं कुरुते चेत्यतो यज्ञाः संकल्पसंभवाः व्रतानि नियमरूपाश्च धर्माश्चतुर्थाध्याये वक्ष्यमाणाः सर्व इत्यनेनान्येपि शास्त्रार्थाः संकल्पादेव जायंते इच्छामंतरेण तेपि न संभवंतीत्यर्थः गोविंदराजस्तु व्रतान्यनुष्ठेयरूपाणि

27

कामात्मता न प्रशस्ता न चैवेहास्त्यकामता काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः २
संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः व्रतानि यमधर्माश्च सर्वे संकल्पजाः स्मृताः ३
अकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित् यद्यद्धि कुरुते कर्म तत्तत्कामस्य चेष्टितं ४
तेषु सम्यग्वर्तमानो गच्छत्यमरलोकतां यथा संकल्पितांश्चेह सर्वान्कामान्समश्नुते ५

यमाः धर्माः प्रतिषेधात्मका इत्याह ३ अत्रैव लौकिकं नियमं दर्शयति अकामस्य क्रिया काचित् लोके या काचिद्भोजनादिका क्रिया साप्यनिच्छतो न कदाचिद्दृश्यते तस्मात्सर्वं कर्म लौकिकं वैदिकं च यद्यत्पुरुषः कुरुते तत्तदिच्छाकार्यं ४ संप्रति तत्फलाभिलाषविधिं दर्शयति तेषु सम्यग्वर्तमानो नात्रेच्छा निषिध्यते किंतु यथाशास्त्रोक्तकर्मसु सम्यग्वृत्तिर्विधीयते बंधहेतुफलाभिलाषं विना यथाशास्त्रीयकर्मणामनुष्ठानं तेषु तेषु सम्यग्वृत्तिः सम्यग्वर्तमानो मरलोकताम् अमरणधर्मकं ब्रह्मभावं गच्छति मोक्षं प्राप्नोतीत्यर्थः तथाभूतश्च सर्वेश्वरत्वादिहापि लोके सर्वानभिलषितान्प्राप्नोति तथा च बृहदारण्यके स यदा पितृलोककामो भवति संकल्पादेवास्य पितरः संभवंतीत्यादि ५

प्रथमाध्याये ब्रह्मस्वरूपपरमात्मज्ञानरूपधर्मज्ञानाय जगत्कारणं ब्रह्म प्रतिपाद्य अधुना ब्रह्मज्ञानाङ्गभूतसंस्काराद्युपेतधर्मं प्रतिपादयिष्यन् धर्मसामान्यलक्षणं प्रथममाह विद्वद्भिः सेवितः सद्भिः विद्वद्भिर्वेदविद्भिः सद्भिर्धार्मिकै रागद्वेषशून्यैरनुष्ठितो हृदयेनाभिमुख्येन ज्ञातस्तेनेन श्रेयःसाधनमभिहितं तत्रवरमात्मनोऽभिमुखी भवति वेदविद्भिर्ज्ञात इति विशेषणोपादानसामर्थ्याच्च ज्ञातवेदमेव श्रेयःसाधनेज्ञानेकारणत्वं विवक्षितं तत्त्वेकृताधिकारा हृतइत्यते धृतवेकृणेवहननेश्चतो वेदप्रमाणकः श्रेयःसाधनं धर्मइत्यनेनैवं विधो यो धर्मस्तं शृणुत उक्तार्थं पद्यहस्तौ काः वेदविद्भिर्ज्ञात इति प्रयुञ्जानो विशेषणं वेदादेव प्रतिपत्तितो धर्मः इत्युक्तवान्मनुः हृदयेनाभिमुख्येन ज्ञातइत्यपि निर्दिष्टवान् श्रेयःसाधनमित्याह। ततस्याभिमुखेमनः वेदप्रमाणकः श्रेयःसाधनं धर्मइत्यतः मनुरुक्तमेवमुक्तवान्यो विदग्धरे

विद्वद्भिः सेवितः सद्भिः नित्यमद्वेषरागिभिः हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत २

धर्मलक्षणं अतएव हारीतः अथातो धर्मं व्याख्यास्यामः श्रुतिप्रमाणको धर्मः श्रुतिश्च द्विविधा वैदिकी तान्त्रिकी च भविष्यपुराणेऽपि च धर्मः श्रेयःसमुद्दिष्टं श्रेयोऽभ्युदयलक्षणं सतु पञ्चविधः प्रोक्तो वेदमूलः सनातनः अस्यसम्यगनुष्ठानात्स्वर्गो मोक्षश्च जायते इहलोके सुखैश्वर्यमतुलञ्चखगाधिप श्रेयः श्रेयःसाधनमित्यर्थः जैमिनिरपीदं धर्मलक्षणमसूत्रयत् चोदनालक्षणोऽर्थो धर्मः इति उदयं चोदनयालक्ष्यते यः श्रेयःसाधनं ज्योतिष्टोमादिः अनर्थः प्रत्यवायसाधनं श्येनादितच्चवेदप्रमाणकं श्रेयःसाधनं ज्योतिष्टोमादिधर्म इति सूत्रार्थः स्मृत्यादयोऽपि वेदमूलत्वेनैव धर्मे प्रमाणमिति दर्शयिष्यामः यो वेदविदान्तस्तु हृदयेनाभ्यनुज्ञात इति ग्रन्थतः करणविचिकित्साशून्य इति व्याख्यातवान्तन्मते वेदविद्भिरनुष्ठितः संशयशून्यश्च धर्म इति धर्मलक्षणं स्यात् एतच्च हृदयार्थप्राप्तमगमनादिसाधारणं धर्मलक्षणमिति वक्तव्यमनुष्ठयेत्ते मेधातिथिस्तु हृदयेनाभ्यनुज्ञात इति पदं चित्तप्रवर्त्तयतीति व्याख्याय

श्रुतिस्मृत्युदितं धर्ममिति। श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्मानव इह लोके धार्मिकत्वेनानुशंसितां कीर्तिं परलोके च धर्मफलमनुत्कृष्टं स्वर्गापवर्गादिसुखरूपं प्राप्नोति। अनेन वास्तवगुणकथनेन श्रुतिस्मृत्युदितं धर्ममनुतिष्ठेदिति विधिः कल्प्यते ॥९॥ श्रुतिस्तु वेदो विज्ञेयो लोकप्रसिद्धसंज्ञासंज्ञिसंबंधानुवादोऽयं श्रुतिस्मृत्योः प्रतिकूलतर्केणामीमांस्यत्वविधानार्थं स्मृतेः श्रुतितुल्यत्वबोधनेनाचारादिभ्यो बलवत्त्वप्रतिपादनार्थं च तेन स्मृतिविरुद्धाचारो हेय इत्युक्तमस्य फलं श्रुतिर्वेदो मन्वादिशास्त्रं स्मृतिस्ते उभे प्रतिकूलतर्केण न विचारयितव्ये यतस्ताभ्यां निःशेषेण धर्मो बभौ प्रकाशतां गतः ॥१०॥ योऽवमन्येत ते तूभे यः पुनस्ते द्वे श्रुतिस्मृती द्विजोऽवमन्येत स शिष्टैः। द्विजानुष्ठेयाध्ययनादिकर्मणो निःसार्यः पूर्वश्लोके सामान्येन मीमांसानिषेधात्प्रतिकूलमीमां

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः। इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखं ॥९॥
श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः। ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥१०॥
योऽवमन्येत ते तूभे हेतुशास्त्राश्रयात् द्विजः। स साधुभिर्बहिष्कार्यो नास्तिको वेदनिंदकः ॥११॥
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणं ॥१२॥

सायां न प्रवर्तनीयेति भ्रमो मा भूदिति विशेषयति हेतुशास्त्राश्रयात् वेदवाक्यं न प्रमाणं वाक्यत्वाद्विप्रलंभकवाक्यवदिति प्रतिकूलतर्कावष्टंभेन चार्वाकादिर्नास्तिकत्वान्नास्तिको यतो वेदनिंदकः ॥११॥ इदानीं धर्मे तु सदाचार एवांतरभावसंभवाद्वेदमूलत्वेव तत्तेन स्मृतिशीलादिप्रकारनियम इति दर्शयितुं चतुर्विधं धर्मप्रमाणमाह वेदः स्मृतिः वेदो धर्मे प्रमाणं सकाश्चिन्मन्वादिस्मृत्या यानुमितश्रुत्यैव तात्पर्येण तत्प्रमाणपरिगणने प्रत एव श्रुतिस्मृत्युदितं धर्ममित्यत्र द्वयमेवाभिहितवान् सदाचारः शिष्टाचारः स्वस्य चात्मनः प्रियमात्मतुष्टिः ॥१२॥

इदानीं धर्मे प्रमाणान्याह वेदोऽखिलो धर्ममूलं वेदऋग्यजुःसामाथर्वलक्षणः समग्रो विध्य
र्थवादमन्त्रात्मा धर्मे मूलं प्रमाणं अर्थवादानामपि विध्येकवाक्यतया स्तावकत्वेन धर्मे प्रमाण
त्वं यदाह जैमिनिः विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः मन्त्राणामपि विधिवाक्यैक
वाक्यतयैव धर्मे प्रामाण्यं प्रयोगकाले चानुष्ठेयस्मारकत्वं वेदस्य च धर्मे प्रामाण्यं यथापौ
नुभववक्तृकरणात्तद्रूपस्या पसिद्धं स्मृत्यादीनामपि तन्मूलत्वेनैव प्रामाण्यप्रतिपादनार्थमनूद्य
ते मन्वादीनां वेदविदां स्मृतिशीले च धर्मे प्रमाणं वेदविदामिति विशेषणोपादानाद्वेदमूलत्वे
नैव स्मृत्यादीनां प्रामाण्यमभिमतं शीलं ब्रह्मण्यतादि तदाह हारीतः ब्रह्मण्यता पितृदेवभक्त
ता सौम्यता परोपतापिता मृदुता अनसूयता ऽपारुष्यं मैत्रता प्रियवादित्वं कृतज्ञता शरण्यता ।
कारुण्यं प्रशान्तिश्चेति त्रयोदशविधं शीलं गोविंदराजस्तु शीलं रागद्वेषपरित्याग इत्याह आ

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ६
यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ७
सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा श्रुतिप्रामाण्यतो विद्वान्स्वधर्मे निविशेत वै ८

चारः कंबलवल्कलाद्याचाररूपः साधूनां धार्मिकाणां आत्मतुष्टिश्च वैकल्पिकपदार्थविषया
धर्मे प्रमाणं तदाह गार्ग्यः वैकल्पिके आत्मतुष्टिः प्रमाणं वेदादन्येषां वेदमूलत्वेन
प्रामाण्येऽभिहितेऽपि मनुस्मृतेः सर्वोत्कर्षख्यापनाय विशेषेण वेदमूलतामाह ६ यः क।
श्चित्कस्यचिद्धर्मो यः कश्चित्कस्यचिद्ब्राह्मणादेर्मनुना धर्म उक्तः स सर्वो वेदे प्रतिपादि
तः यस्मात्सर्वज्ञोऽसौ मनुः सर्वज्ञतया चात्र विप्रकीर्णमुपलभ्यमानं वेदार्थं सम्यक्ज्ञात्वा लो
कहिताय उपनिबद्धवान् गोविंदराजस्तु सर्वज्ञानमय इत्यस्य सर्वज्ञानाकर इव वेद इति वेद
विशेषणतामाह ७ सर्वं तु समवेक्ष्येदं सर्वं शास्त्रजातं वेदार्थावगमोचितं मीमांसाव्या
करणादिकं ज्ञानमेव चक्षुस्तेन निखिलं विशेषेण पर्यालोच्य वेदप्रामाण्येनानुष्ठेयमव

८

म॰ स्मृ॰ टी॰ १९

सरस्वतीदृषद्वत्योः धर्मस्य स्वरूपं प्रमाणं परिभाषा चोक्ता इदानीं धर्मानुष्ठानयोग्यदेशाना
ह सरस्वतीदृषद्वत्योर्नद्योर्यदन्तरं तं ब्रह्मावर्तं देशमाहुः देवनदी देवनिर्मितशब्दौ च प्राश
स्त्यार्थौ ॥ १७ ॥ तस्मिन्देशे य आचारः तस्मिन्देशे ब्राह्मणादीनां शिष्टानां सम्भवात्तेषां ब्राह्मणादि
वर्णानां संकीर्णजातिपर्यन्तानां य आचारः पारम्पर्यक्रमागतो न त्विदानीन्तनः स सदाचारो ऽ
भिधीयते ॥ १८ ॥ कुरुक्षेत्रं च मत्स्याश्च मत्स्यादिशब्दा देशवाचका बहुवचनान्ता एवं पञ्चा
लाः कान्यकुब्जदेशाः शूरसेनका माथुरा देशाः एष ब्रह्मर्षिदेशो ब्रह्मावर्तात् किंचिदूनः
॥ १९ ॥ एतद्देशप्रसूतस्य कुरुक्षेत्रादिदेशजातस्य ब्राह्मणस्य सकाशात् सर्वे मानुषा आत्मीयं

19

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरं । तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ १७ ॥ तस्मि
न्देशे य आचारः पारंपर्यक्रमागतः । वर्णानां सान्तरालानां स सदाचार उच्यते ॥ १८ ॥ कु
रुक्षेत्रं च मत्स्याश्च पंचालाः शूरसेनकाः । एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनन्तरं ॥ १९ ॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः । स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥ २० ॥
हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥ २१ ॥
आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् । तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥ २२ ॥
कृष्णसारस्तु चरति मृगो यत्र स्वभावतः । स ज्ञेयो याज्ञियो देशो म्लेच्छदेशस्ततः परः ॥ २३ ॥

चारं शिक्षेरन् ॥ २० ॥ हिमवद्विन्ध्ययोर्मध्यं उत्तरदक्षिणदिगवस्थितौ हिमवद्विन्ध्यौ पर्वतौ
तयोर्मध्ये विनशनात् सरस्वत्यन्तर्धानदेशात् यत्पूर्वं प्रयागाच्च पश्चिमे स मध्यदेशनामा
देशः कथितः ॥ २१ ॥ आसमुद्रात्तु वै पूर्वात् आपूर्वसमुद्रादापश्चिमसमुद्रात् हिमवद्विन्ध्य
योश्च यन्मध्यं तमार्यावर्तदेशं पण्डिता जानन्ति मर्यादायामयमाङ् नाभिविधौ तेन समुद्र
मध्यद्वीपानां नार्यावर्तता आर्या अत्रावर्तन्ते पुनः पुनरुद्भवन्तीत्यार्यावर्तः कृष्णसार
स्तु चरति कृष्णमृगो यत्र स्वभावतः चरति न तु बलादानीतः स यज्ञार्हो देशो ज्ञातव्यः अ
न्यो म्लेच्छदेशो ऽयज्ञार्हो ॥ २३ ॥

कु॰ १९

अर्थकामेष्वसक्तानां अर्थकामलिप्साशून्यानां धर्मोपदेशोऽयं येन त्वर्थकामसमीहया लोकप्रत्ययार्थं धर्ममनुतिष्ठन्ति तेषां धर्मफलमित्यर्थः। धर्मं ज्ञातुमिच्छतां प्रकृष्टं प्रमाणं श्रुतिः प्रकर्षबोधनेन च श्रुतिस्मृतिविरोधे स्मृत्यर्थो नादरणीय इत्यभिप्रायः। अतएव जाबालः श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी अविरोधे सदा कार्यं स्मार्तं वैदिकवत्सदा। भविष्यपुराणेप्युक्तं श्रुत्या सह विरोधे तु बाध्यते विषयं विना। जैमिनिरप्याह विरोधे त्वनपेक्षं स्यादसति ह्यनुमानं श्रुतिविरोधे स्मृतिवाक्यमनपेक्षमप्रमाणमनादरणीयं असति विरोधे मूलवेदानुमानमित्यर्थः॥ १३ श्रुतिद्वैधं तु यत्र स्यात् यत्र पुनः श्रुत्योरेव द्वैधं परस्परविरुद्धार्थप्रतिपादनं तत्र द्वावपि मन्वादिना धर्मौ स्मृतौ तुल्यबलतया विकल्पानुष्ठा-

अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते। धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः॥ १३
श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ। उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः॥ १४
उदितेऽनुदिते चैव समयाध्युषिते तथा। सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः॥ १५
निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः। तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्य-

नं विधानेन च विरोधाभावाय मन्वादिभिः पूर्वैरपि विद्वद्भिः सम्यग्वक्तुमशीघ्रैस्तौ ह्यावपि तौ धर्मौ उक्तौ समानन्यायतया स्मृत्योरपि विरोधे विकल्प इति प्रकृतोपयोगः। तुल्यबलत्वाविशेषान्न हि दृष्टोऽतः तुल्यबलविरोधे विकल्पः॥ १४ श्रुतिद्वैधमुदाहरति उदितेऽनुदिते चैव सूर्ये नक्षत्रवर्जितः कालः समयाध्युषितशब्देनोच्यते ततः सूर्योदयमरुणकिरणवान्प्रविरलतारकः कालोऽनुदितः परस्परविरुद्धकालत्रयश्रवणेऽपि सर्वथा विकल्पेनाग्निहोत्रहोमः प्रवर्तते देवतोद्देशेन द्रव्यत्यागात्मको यागः यज्ञशब्दोऽत्र होमे गौणः उदिते होतव्यमित्यादिका वैदिकी श्रुतिः॥ १५ निषेकादिः श्मशानान्तो गर्भाधानादिरन्त्येष्टिपर्यन्तो यस्य वर्णस्य मन्त्रैरेवानुष्ठानकलाप उक्तो द्विजातेरित्यर्थः। तस्यास्मिन्मानवधर्मशास्त्रेऽध्ययनश्रवणेऽधिकारः ज्ञातव्यो नान्यस्य कस्यचित्स्त्रीशूद्रादेः एतच्छास्त्राध्ययनं यथाधिकारमेतदेवेदं कर्तव्यमनवच्छिन्नस्वाध्याय

ज्जातः पापसंभवो येनैनसां पापत्वयदेतनमनयनमाह गार्भैर्होमैर्जातकर्म येगर्भशुद्धये क्रियन्ते ते गा
र्भा होमाः एतच्च पलक्षणं गर्भाधानादेर्होमरूपत्वात् जातकर्म मंत्रवत्सर्पिःप्राशना
दिरूपं तज्जातकर्म चौडं चूडाकर्म मौञ्जीनिबंधनमुपनयनं एतैर्बैजिकं प्रतिषिद्धमैथु
नादिना पैतृकरेतोदोषाद्यत्पापं गार्भिकं चाशुचिमातृगर्भवासजं तद्द्विजातीनाम
पमृज्यते २७ स्वाध्यायेन व्रतैर्होमैः वेदाध्ययनेन मधुमांसवर्जनादिरूपैर्नियमैः
होमैः सावित्रचरुहोमादिभिः सायंप्रातर्होमैश्च त्रैविद्याख्येन च व्रतेन प्राधान्याद
स्य पृथगुपन्यासः इज्यया ब्रह्मचर्यावस्थायां देवर्षिपितृतर्पणरूपया गृहस्थावस्थायां तु

गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबंधनैः बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते २७
स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः २८
प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीयते मंत्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषां २९
नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत् पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ३०

पुत्रोत्पादनेन महायज्ञैश्च पंचभिर्ब्रह्मयज्ञादिभिः यज्ञैश्च ज्योतिष्टोमादिभिः ब्राह्मी ब्रह्मप्राप्तियो
ग्ययं तनुरत्र क्रियते आत्मा क्रियते कर्मसहकृत ब्रह्मज्ञानेन मोक्षावाप्तेः २८ प्राङ्नाभि
वर्द्धनात्पुंसो नाभिच्छेदनात्पूर्वं पुरुषस्य जातकर्माख्यः संस्कारः क्रियते तत्र चास्य स्वगृ
ह्योक्तमंत्रैः सुवर्णमधुघृतानां प्राशनं २९ नामधेयं दशम्यां तु जातकर्मेति पूर्वश्लो
के जन्मनः प्रकृतत्वाज्जन्मापेक्षयैव दशमे द्वादशे वाऽहनि अस्य शिशोर्नामधेयं स्वयमसं
भवे कारयेत् अपवादार्थो यं तु तिक्रान्ते नामकर्मविधीयत इति शावेवचनादशमेद
ऽतीते एकादशाहः इति व्याख्येयं तत्राप्यकरणे प्रशस्ते तिथौ प्रशस्ते एव मुहूर्ते नक्ष
त्रे गुणान्विते च ज्योतिषावगते कर्तव्यं नाम कर्तव्यमिति ३०

एतान्द्विजातयो देशान् अन्यदेशोद्भवा अपि द्विजातयो यत्नाहेतादृष्टत्वाच्च एतान्देशान्प्र
यत्नादाश्रयेरन् च शूद्रस्तु वृत्तिपीडितो वृत्त्यर्थमन्यदेशमप्याश्रयेत् २४ एषा धर्मस्य वो यो
निः एषा युष्माकं धर्मस्य योनिः संक्षेपेण कथिता योनिर्हेतुः कारणं वेदोऽखिलो धर्ममूल
मित्यादिनोक्तमित्यर्थः गोविंदराजस्तु इह धर्मशब्दोऽपूर्वाख्ये धर्मे वर्त्तत इति विद्वद्भिः
सेवित इत्यत्र तत्कारणत्वादौ स चापूर्वाख्यस्य धर्मस्य योनिरिति व्याख्यातवान् संभवश्चो
त्पत्तिर्जगत उक्ता इदानीं वर्णधर्मान् शृणुत वर्णधर्मशब्दश्च वर्णधर्माश्रमधर्मवर्णाश्रमध
र्मगुणधर्मनैमित्तिकधर्माणां पंचानामुपलक्षकः ते च भविष्यपुराणे व्याख्याताः व
र्णधर्मः स्मृतस्त्वेक आश्रमाणाम्मतः परः वर्णाश्रमस्तृतीयस्तु गौणो नैमित्तिकस्तथा व

एतान्द्विजातयो देशान्संश्रयेरन्प्रयत्नतः शूद्रस्तु यस्मिन्कस्मिन्वा निवसेद्वृत्तिकर्षितः
एषा धर्मस्य वो योनिः समासेन प्रकीर्तिता संभवश्चास्य सर्वस्य वर्णधर्मान्निबोधत २५
वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनां कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च

र्णत्वमेकमाश्रित्य यो धर्मः संप्रवर्त्तते वर्णधर्मः स उक्तस्तु यथोपनयनं नृप यस्त्वाश्र
मं समाश्रित्य अधिकारः प्रवर्त्तते स खल्वाश्रमधर्मस्तु भिक्षादंडादिको यथा वर्णत्वमा
श्रमत्वं च योऽधिकृत्य प्रवर्त्तते स वर्णाश्रमधर्मस्तु मौंजीया मेखला यथा यो गुणेन प्रवृ
त्तो गुणधर्मः स उच्यते यथा मूर्द्धाभिषिक्तस्य प्रजानां परिपालनं निमित्तमेकमाश्रि
त्य यो धर्मः संप्रवर्त्तते नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा २५ वैदिकैः क
र्मभिः पुण्यैः वेदमूलत्वाद्वैदिकैः पुण्यैः शुभैर्मंत्रप्रयोगादिकर्मभिर्द्विजातीनां गर्भा
धानादिः शरीरसंस्कारः कर्त्तव्यः पावनः पापक्षयहेतुः प्रेत्य परलोके संस्कृतस्य या
गादिफलसंबंधात् इह लोके च वेदाध्ययनाद्यधिकारात् २६

गर्भाष्टमेऽब्दे कुर्वीत गर्भसंवत्सरादष्टमे वर्षे ब्राह्मणस्योपनायनं कार्यं उपनयनमेवोपनायनं प्रज्ञाद्यण् गर्भादेकादशे क्षत्रियस्य गर्भाद्द्वादशे वैश्यस्य ॥३६॥ ब्रह्मवर्चसकामस्य वेदाध्ययन

तदर्थज्ञानादि प्रकर्षकृतं तेजो ब्रह्मवर्चसं तत्कामस्य ब्राह्मणस्य गर्भात्पंचमे वर्षे उपनयनं कार्यं क्ष-

त्रियस्य हस्त्यश्वादि राज्यबलार्थिनो गर्भात् षष्ठे वैश्यस्य बहुकृष्यादि चेष्टार्थिनो गर्भाष्टमे गर्भवर्षाष्टमे ॥३७॥

यद्यपि बालस्य कामना न संभवति तथापि पितुरेव फलकामना तत्स्थ उपचर्यते ... अष्टमैकादशाद्द्वादशवर्षे द्वे गुणप

रवृत्तत्वात् आषोडशाद्ब्राह्मणस्य अभिविधावाङ् ब्राह्मणक्षत्रियविशामष्टमैकादशद्वादशवर्षेषूपनयनकालातिक्रान्तकालो भवतीति

आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते षोडशवर्षपर्यंतं ब्राह्मणस्य सावित्र्यनुवचनमुपनयनं नातिक्रान्तकालं भवति

एवं द्वाविंशति वर्षपर्यंतं क्षत्रियस्य चतुर्विंशतिवर्षपर्यंतं वैश्यस्य ॥३८॥

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनं गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ॥३६॥

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥३७॥

आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते आद्वाविंशात्क्षत्रबंधोराचतुर्विंशतेर्विशः ॥३८॥

अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः सावित्रीपतिता व्रात्या भवंत्यार्यविगर्हिताः ॥३९॥

नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् ब्राह्मान्यौनांश्च संबंधानाचरेद्ब्राह्मणः सह ॥४०॥

पर्यंतमिति यमवचनदर्शनात् तथा च यमः पतिता यस्य सावित्री दशवर्षाणि पंच च ब्राह्मणस्य विशे-

षेण तथा राजन्यवैश्ययोः प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः विवस्वतः सुतः श्रीमान्यमो धर्मा-

र्थतत्त्ववित् सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहितः हविष्यं भोजयेद्द्विजान्ब्राह्मणान्सप्त पंच वा ॥३८॥

अत ऊर्ध्वं त्रयोऽप्येते एते ब्राह्मणादयो यथाकालं यथाशास्त्रमानुकल्पिकोऽप्युपनयनकालादूर्ध्वं ततः षोडश

वर्षादिपर्यंतः तत्रासंस्कृता ऊर्ध्वं सावित्रीपतिता उपनयनहीनाः शिष्टगर्हिता व्रात्यसंज्ञाः प्रयोजनं

भवंति ॥३९॥ नैतैरपूतैर्विधिवत् एतैर्व्रात्यैरपूतैर्यथाविधि प्रायश्चि-

त्तव्रात्यानां याजनं ... आपद्यपि कदाचिदध्यापनकन्यादानादीन्संबंधान्ब्राह्मणो ना-

चरेत् प्रायश्चित्तमकुर्वद्भिः सह

मङ्गल्यं ब्राह्मणस्य स्यात् ब्राह्मणादीनां यथाक्रमं मङ्गलबलधननिन्दावाचकानि शुभबलवसुदीनादीनि नामानि
कर्तव्यानि इदानीमुपपदनियमार्थमाह ३१ शर्मवद्ब्राह्मणस्य स्यात् एषां यथाक्रमं शर्मरक्षापुष्टिप्रे
ष्यवाचकानि शर्म वर्म भूति दासादीन्युपपदानि कार्याणि उदाहरणानि च शुभशर्मा बलवर्मा वसुभू
तिः दीनदास इति तथा च यमः शर्म देवश्च विप्रस्य वर्म त्राता च भूभुजः भूतिर्दत्तश्च वैश्यस्य दासः शू
द्रस्य कारयेत् विष्णुपुराणेप्युक्तं शर्मवद्ब्राह्मणस्योक्तं वर्मेति क्षत्रसंयुतं गुप्तदासात्मकं नाम प्रश
स्तं वैश्यशूद्रयोः ३२ स्त्रीणां सुखोद्यमक्रूरं सुखोच्चार्यमक्रूरार्थं वाचि व्यक्ताभिधेयं मनःप्रीतिज
ननं मङ्गलवाचि दीर्घस्वरान्तमाशीर्वादकेनाभिधानेन शब्देनोपेतं स्त्रीणां नाम कर्तव्यं यथा यशो

मङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितं वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितं ३१
शर्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितं वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतं ३२
स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरं मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्
चतुर्थे मासि कर्तव्यं शिशोर्निःक्रमणं गृहात् षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले ३४
चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात् ३५

दादेवीति ३३ चतुर्थे मासि कर्तव्यं चतुर्थे मासि बालस्य जन्मगृहान्निष्क्रमणं आदित्यादिदर्शनार्थं का
र्यं अन्नप्राशनं षष्ठे मासे यथाकुलधर्मं तेन यन्मङ्गलमिष्टं तत्कर्तव्यं तेनोक्तकालादन्यकालेपि निः
क्रमणादि तथा च यमः ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनं सकलसंस्कारशेषश्चायं तेनतु
न्नाणमादिकमप्युपपदं कुलाचारेण कर्तव्यं ३४ चूडाकर्म द्विजातीनां चूडाकरणं प्रथमे वर्षे
तृतीये वा द्विजातीनां धर्मतो धर्मार्थं कार्यं श्रुतिचोदनात् यत्र बाणाः संपतन्ति कुमारा विशिखा इवेति
मन्त्रलिङ्गात् कुलधर्मानुसारेण चायं विवस्थितविकल्पः अत एव आश्वलायनगृह्ये तृतीये वर्षे
चूडाकरणं यथाकुलधर्मं वा ३५

म॰ स्मृ॰
टी॰
२२

ब्राह्मणो बैल्व इत्यादि यद्यपि द्वंद्वनिर्देशो समुच्चयावगमात् कारणमपि समुच्चितस्यैव ग्राह्यं तथापि के
शांतिको ब्राह्मणस्य दंडः कार्यः प्रमाणत इति प्रतिगृह्येप्सितं दंडमुपस्थायेति विधावेकत्वस्य वि
वक्षितत्वाद्बैल्वः पालाशो वा ब्राह्मणस्य दंड इति वाशिष्ठे विकल्पदर्शनात् एकस्यैव दंडस्य धार
णं विकल्पितयोरेवैकं ब्राह्मणस्यैवं यान्यस्य च योर्विकल्पेन द्वौ द्वौ दंडौ वक्ष्यमाणो केशांतमर्हति
४५ केशांतिक इत्यादि केशललाटनासिकपर्यंतपरिमाणः क्रमेण ब्राह्मणादीनां कर्त्त।
व्याः ४६ ऋजवः ते दंडाः सरला अव्रणाः शोभनदर्शनाः सवल्कलाः अग्निदाहरहिता भ
वेयुः न च तैः प्राणिजातं सम्पन्नमुद्वेजनीयं ४७ प्रतिगृह्येत्यादि उक्तलक्षणमात्मनोभिमतं दं
गृहीत्वा आदित्याभिमुखः स्थित्वाग्निं प्रदक्षिणीकृत्य यथाविधि भैक्षं याचयेत् ४८ भवत्पूर्वं

ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ पैलवौदुंबरौ वैश्यो दंडानर्हंति धर्मतः ४५
केशांतिको ब्राह्मणस्य दंडः कार्यः प्रमाणतः ललाटसम्मितो राज्ञः स्यात्तु नासांतिको विशः
ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः अनुद्वेगकरा नृणां सत्वचोनाग्निदूषिताः ४७
प्रतिगृह्येप्सितं दंडमुपस्थाय च भास्करं प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ४८
भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरं ४९
मातरं वा स्वसारं वा मातुर्वा भगिनीं निजां भिक्षां भिक्षेत प्रथमं या चैनं नावमानयेत्
समाहृत्य तु तद्भैक्षं यावदर्थममायया निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः ५१

22

मित्यादि ब्राह्मणो भवति भिक्षां देहीति भवच्छब्दपूर्वं भिक्षायाचनमञ्जावयेत् क्षत्रियो भिक्षां ।
भवति देहीति भवन्मध्यं वैश्यो भिक्षां देहि भवतीति भवदुत्तरं ४९ मातरमित्यादि उपनय
नाङ्गभूतां भिक्षां प्रथमं मातरं भगिनीं स्वमातुर्वा भगिनीं सहोदरीं याचेत् या चैनं ब्रह्मचारिणं
प्रत्याख्यानेन नावमन्येत पूर्वासंभवादुत्तरपरिग्रहः ५० समाहृत्येत्यादि तद्भैक्षं बहुभ्यः
समाहृत्य यावदर्थं तृप्तिमात्रोचितं गुरवे निवेद्य अमायया तद्दर्शनं स्वत्वं प्रच्छाद्य एवमेतत्कृत
न गृहीष्यतीत्यादिमाप्याच्य निरंकेण तदनुज्ञातः कृताचमनः शुचिः प्राङ्मुखो भुंजी
त काम्यमिदानीं भोजनमाह ५१

कु॰
२२

कार्ष्णरौरवबास्तानि कार्ष्णमिति विशेषानभिधानेपि मृगविशेषोपक्रमसामर्थ्यात् हारिणमेतैरेवं बाह्वसंज्ञा
ह्मणस्य इति आपस्तंबवचनाच्च कृष्णमृगो रुरुस्तेन कृष्णमृगरुरुछागानां चर्माणि ब्रह्मचारिण उत्तरीयाणि व
सीरन् च चर्मणामुत्तरीयाणीति गृह्यवचनात्तथा शाणक्षौमामेषलोमभवान्यधोवसनानि ब्राह्मणादिक्र
मेण परिदधीरन् ४१ मौञ्जी त्रिवृदित्यादि मुञ्जमयी त्रिगुणा समगुणत्रयनिर्मिता स्निग्धस्पर्शा ब्राह्मण
स्य मेखला कर्तव्या क्षत्रियस्य मूर्वामयी ज्या धनुर्गुणरूपा मेखला अत्र ज्यात्वविनाशोपपत्तेस्त्रिवृत्त्वं नास्ती
ति मेधातिथिगोविंदराजौ वैश्यस्य शाणसूत्रमयी अत्र त्रैगुण्यं वर्त्तत एव त्रिगुणा प्रदक्षिणा मेखलाइ
ति सामान्येन प्रचेतसा त्रैगुण्याभिधानात् ४२ मुञ्जालाभे त्वित्यादि कर्त्तव्या इति बहुवचननिर्देशाद्ब्र
ह्मचारित्रयस्य च प्रकृतत्वान्मुञ्जालाभे क्षत्रियस्य वैश्यस्य यथासमत्वा कौश्यादीनां च तिसृणां विधानात् मुञ्जा
द्यलाभ इति बोद्धव्यं कर्त्तव्या इति बहुवचनमुपपन्नतरं भिन्नजातिसंबंधतयेति गोविंदराजमेधातिथयोऽपि

कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः। वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ॥ ४१ ॥
मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला। क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी ॥ ४२ ॥
मुञ्जालाभे तु कर्त्तव्याः कुशाश्मन्तकबल्वजैः। त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥ ४३ ॥
कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्। शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥ ४४ ॥

बहुवचनपाठः सम्मतः मुञ्जाद्यलाभे ब्राह्मणादीनां त्रयाणां यथाक्रमं कुशादिभिस्त्रयाणां विशेषेण मेखलाः
कार्याः त्रिगुणेनैकग्रंथियुक्ताः त्रिभिर्वा पंचभिर्वा अत्र वाशब्दनिर्देशात् पूर्वोक्तानविशादिभिः क्रमेणासं
बंधः किंतु सर्वत्र यथाकुलाचारं विकल्पः ग्रंथिभेदश्चायं मेखलानुवृत्त्यापेक्षासंभवात् ग्रहीतव्यः का
र्पासमित्यादि यद्यपि विन्यासविशेषस्योपवीतसंज्ञां वक्ष्यति तथापि ब्राह्मणस्य कार्पासं क्षत्रियस्य
शाणसूत्रमयं वैश्यस्य मेषलोमनिर्मितं त्रिवृदिति त्रिगुणादिकं कृत्वा ऊर्ध्ववृतं दक्षिणावर्तितमत
न्तु सर्वत्र संबध्यते यद्यपि पूर्णत्रयमेवोर्ध्ववृतं मनुनोक्तं तथापि तत् त्रिगुणीकृत्य त्रिगुणं कार्यं तदु
क्तं छंदोगपरिशिष्टे ऊर्ध्वं तु त्रिगुणं कार्यं तन्तुत्रयमधोवृतं त्रिवृत्तं चोपवीतं स्यात्तस्यैको ग्रंथि
रिष्यते देवलोप्याह यज्ञोपवीतं कुर्वीत सूत्राणि नव तन्तवः ४४

म॰स्मृ॰ टी॰ २९

नोच्छिष्टमित्यादि भुक्तावशिष्टं कस्यचिन्न दद्यात् चतुर्थ्यां प्राप्तायां संबंधमात्रविवक्षया षष्ठी अन्नेनैव सामान्यनिषेधेन शूद्रस्यापि उच्छिष्टदाननिषेधे सिद्धे नोच्छिष्टं न हविष्कृतमिति शूद्रगोचरनिषेधस्य तत्वार्थः स्नातकव्रतत्वार्थः दिवासायंभोजनयोः मध्ये न भुंजीत वारद्वयेप्यतिभोजनं न कुर्यात् नातिसौहित्यमाचरेदिति चात्मर्थं स्नातकव्रतत्वार्थं उच्छिष्टः सन् क्वचिन्न गच्छेत् ५६ अतिभोजने दोषमाह अनारोग्यमित्यादि अरोगो रोगाभावः तस्मै हितमारोग्यं आयुष्याहितमायुष्यं यस्मादतिभोजनस्यारोग्यमायुष्यं च न भवति अजीर्णजनकत्वेन रोगमरणहेतुत्वात् अस्वर्ग्यं च स्वर्गहेतुयागादिविरोधित्वात् अपुण्यमितरप्रतिपक्षत्वात् लोकविद्विष्टं बहुभोजितया लोकैर्निंदनात् तस्मात्तन्न कुर्यात् ५७ ब्राह्मेणेत्यादि ब्राह्मादिसंज्ञेयं

नोच्छिष्टं कस्यचिद्दद्यान्नाद्याच्चैव तथांतरा । न चैवात्यशनं कुर्यान्न चोच्छिष्टः क्वचिद्व्रजेत् ५६
अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनं । अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ५७
ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् । कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन ५८
अंगुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते । कायमंगुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ५९

शास्त्रसंव्यवहारार्था स्तुत्यर्थत्वान्न तु मुख्यं ब्रह्मदेवताकत्वं संभवति अनायासकृतत्वात्तीर्थशब्दोपि पावनत्वगुणयोगात् ब्राह्मेण तीर्थेन सर्वदा विप्रादिराचामेत् कः प्रजापतिस्तदीयः कायः कस्येदमित्यणउकारस्यात्तादेशः त्रैदशिको दैवः ताभ्यां वा पितृतीर्थेन कदाचिदपि नाचामेत् ५८

अप्रसिद्धत्वाद्ब्राह्मादितीर्थान्याह अंगुष्ठमूलस्येत्यादि अंगुष्ठमूलस्याधोभागे ब्राह्मं कनिष्ठांगुलिमूले कायं अंगुलीनामग्रे दैवं पित्र्यं तयोरधः अंगुष्ठप्रदेशिन्योर्मध्येपि अतीर्थं मन्वादय आहुः यद्यपि कायमंगुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः इत्यत्र चांगुलिमात्रमुक्तं तथापि स्मृत्यंतराद्विशेषपरिग्रहः तथा च याज्ञवल्क्यः कनिष्ठादेशन्यंगुष्ठमूलान्यग्रं करस्य च प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ५९

कु॰ २३

आयुष्यमित्यादि आयुषे हितमन्नं प्राङ्मुखो भुङ्क्ते आयुःकामः प्राङ्मुखो भुञ्जीतेत्यर्थः यशसे हितं दक्षि-
णामुखो भुङ्क्ते श्रियमिच्छन्प्रत्यङ्मुखः ऋतं सत्यं तत्फलमिच्छन्नुदङ्मुखो भुञ्जीत ५२ उपस्पृश्येत्यस्मा-
दिना नित्येयरारवेश्रीयोदाचम्येति यद्यपि भोजनमात्राचमनविहितं तथाप्यद्भिः खानि च संस्पृशेदि-
तिग्रहणविधानार्थोऽनुवादः नित्यं ब्रह्मचर्यानंतरमपि हि नचाचम्यान्नं भुञ्जीत समाहितोऽनन्यमनाः भु-
क्त्वा चाचामेत्सम्यग्यथाशास्त्रं प्रक्षाल्य पाणिपादौ चत्रिः पिबेदंबुवीक्षितमित्यादि दक्षायुक्तमपि द्र-
ष्टातिजलेन खानीद्रियाणि षट्छिद्राणि संस्पृशेत्तानि च शिरःस्थानानि प्राणचक्षुःश्रोत्रा-
णि गृहीतव्यानि खानि चोपस्पृशेत् शीर्षस्थानीतियोतमस्मरणमुपस्पर्शनेन खानि च संस्पृशेदि-
ति एकयाभिधानान्निरवधानस्याचमनं खस्पर्शनादिकमिति कर्तव्यतेति दर्शितं ५३ पू-

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः ५२
उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः भुक्त्वा चोपस्पृशेत्सम्यगद्भिः खानि च संस्पृशेत् ५३
पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः ५४
पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति अपूजितं तु तद्भुक्तमुभयं नाशयेदिदं ५५

जयेदशनमित्यादि सर्वदान्नं पूजयेत् तदुक्तमादिपुराणे अन्नं विष्णुः स्वयं प्राह इत्युपहृत्य प्रा-
णार्थी मां समुपायेत्समां संपूजयेत्सदा अनिंदंश्चैतदद्याच्च दृष्ट्वा तुष्येत्प्रसीदति हेतेन रत्नमपि ।
विदं अन्नदर्शनेन नमज्जेत्प्रतिनंदेन्नित्यमस्माकमेतदस्त्विति अभिधायवंदने तदुक्तमादिपुराणे
अन्नं दृष्ट्वा प्रणम्यादौ प्रांजलिः कथयेत्ततः अस्माकं नित्यमस्त्वेतदिति भक्त्यास्तुवन्नमेत्सर्वशः सर्व-
मन्नं ५४ पूजितमित्यादि यस्मात्पूजितमन्नं सामर्थ्यं वीर्यं च ददाति अपूजितं पुनरेतदुभयं नाश-
यति तस्मात्सर्वदा पूजयेदन्नमिति पूर्वश्लोकवाक्यतायन्नमिदं फलश्रवणं तस्यार्थवादस्तादव-
पात्तदुपरितत्त्वायवन्नित्यं कामनाविशेषत्वेनापि नित्यश्रुत्यरविरुद्धानि नित्यश्रुतिविरोधात्फलश्र-
वणं स्तुत्यर्थमिति तु मेधातिथिगोविंदराजौ ५५

मेखलामजिनं दण्डं मेखलादीनि विनष्टानि भिन्नच्छिन्नानि च जले प्रक्षिप्यान्यानि नवानि गृह्णीतैर्मन्त्रैर्गृह्णीयात् ॥६४॥ केशान्तः षोडशे वर्षे केशान्ताख्यं गृह्योक्तं संस्कारकर्म गोदानाख्यं ब्राह्मणस्येति वोपनयनवचनात्क्रमेण षोडशे वर्षे ब्राह्मणस्य गर्भेद्वाविंशे क्षत्रियस्य वैश्यस्य ततो द्वाविंशाद्व्यधिके गर्भे चतुर्विंशे कर्तव्यः ॥६५॥ अमन्त्रिका तु कार्येयं उपमावृदयं जातकर्मादिक्रियाकलापः समग्र उक्तकालक्रमेण शरीरसंस्कारार्थं स्त्रीणाममन्त्रकः कार्यः ॥६६॥ अनेनोपनयनेपि प्राप्ते विशेष माह वैवाहिको विधिः स्त्रीणां विवाहविधिरेव स्त्रीणां वैदिकः संस्कार उपनयनाख्यो मन्वादि भिः स्मृतः पतिसेवैव गुरुकुले वासो वेदाध्ययनरूपः गृहकृत्यमेव सायंप्रातः समिद्धोमरूपाग्निच र्या तस्माद्विवाहादेरुपनयनस्थाने विधानादुपनयननिवृत्तिरिति ॥६७॥ एष प्रोक्तो द्विजातीनां

मेखलामजिनं दण्डमुपवीतं कमण्डलुं अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥६४॥
केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥६५॥
अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः संस्कारार्थं शरीरस्य यथाकालं यथाक्रमं ॥६६॥
वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ॥
एष प्रोक्तो द्विजातीनामौपनायनिको विधिः उत्पत्तिव्यञ्जकः पुण्यः कर्मयोगं निबोधत ॥
उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः आचारमग्निकार्यं च संध्योपासनमेव च ॥६९॥
अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जि ॥

औपनायनिक उपनयनसम्बन्धि जातकर्मादिनात्तु भमपद वृद्धिः अयं द्विजानामुपनयनसंबन्धी कर्मकला प उक्तः उत्पत्तेर्द्वितीयजन्मनो व्यञ्जकः इदानीमुपनीतस्य येन कर्मणा योगस्तं शृणुत ॥६८॥ उप नीय गुरुः शिष्यं गुरुः शिष्यमुपनीय प्रथममेकालिंगे गुदे इत्यादि वक्ष्यमाणं शौचं स्ना नाचमनादिमाचारं अग्नौ सायंप्रातः समिद्धोमानुष्ठानं समन्त्रकं संध्योपासनविधिं च शिक्षयेत् ॥६९॥ अध्येष्यमाणस्त्वाचान्तो अध्ययनं करिष्यमाणः शिष्यो यथाशास्त्रं कृताचमन उदङ्मुखः कृताञ्जलिः पवित्रवस्त्रः कृतेन्द्रियसंयमो गुरुणाध्याप्यः शास्त्रं वादी द्विजः शिष्य दङ्मुख इति गौतमवचनात् प्राङ्मुखस्याप्यध्ययनं ब्रह्माञ्जलिकृत इति वाहितन्यादिभिः

सामान्येनोपदिष्टस्याचमनस्यानुष्ठानक्रममाह त्रिराचामेदित्यादि पूर्वं ब्राह्मादितीर्थेन जलं गण्डूषत्रयं पि-
बेत् अनन्तरं संवृत्तौष्ठाधरौ वारद्वयमंगुष्ठमूलेन संमृज्यात् संहतांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखमि-
तिस्रोणविषाणाभि[illegible]नात् खानि चेन्द्रियाणि जलेन स्पृशेत् मुखसमीपसन्निधानात् मुखखान्येव गृह्यन्
मोप्याह खानि चोपस्पृशेत् शीर्षाणि हृदयं तत्त्वोपेतिः प्रत्युषदुम्याकूपनिषत् हृदयदेशत्वेनात्मना
त्मनः श्रवणाद्यात्मानं हृदयं शिरश्चाद्भिरेव संस्पृशेत् ६० अनुष्णाभिरफेनाभिः अनुष्णीकृता-
भिः फेनवर्जिताभिर्ब्राह्मादितीर्थेन शौचमिच्छन्नेकान्ते जनैरनाकीर्णे शुचिदेशे उपविष्टः प्राङ्मुख
उदङ्मुखो वा सर्वदा आचामेत् आपूर्णत्वेन उष्णाभिश्चाकारणव्यतिरेकादित्यभिधानाद्यर्थादि।
कारणव्यतिरेकेणाचामेत् व्याधौ तूष्णीकृताभिरप्याचमने दोषाभावः तीर्थव्यतिरेकेणाचम-
ने शौचाभाव इति दर्शयितुमत्रास्यापि तीर्थस्य पुनर्वचनं ६१ हृद्गाभिः पूयते विप्रः आचमनजलं

त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखं खानि चोपस्पृशेदद्भिरात्मानं शिर एव च ६० अ-
नुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्मवित् शौचेप्सुः सर्वदाचामेदेकान्ते प्रागुदङ्मुखः ६१
हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरेव च
उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः सव्ये प्राचीन आवीती निवीती कण्ठसज्जने ६३

परिमाणमाह ब्राह्मणो हृदयगामिनीभिः क्षत्रियः कण्ठगामिनीभिः वैश्योऽन्तरास्यप्रविष्टाभिः कंठम
आप्ताभिरपि स्पृष्टाभिर्जिह्वौष्ठान्तेनापि स्पृष्टाभिरद्भिः पूतो भवति अन्त इति तृतीयान्तात्तसिः ६२ उद्धृते
दक्षिणे पाणौ आचमनांगत्वमुपवीतस्य दर्शयितुमुपवीतलक्षणं ततः प्रसंगेन प्राचीनावीती
त्यादिलक्षणमाह दक्षिणे पाणावुद्धृते वामस्कन्धस्थिते दक्षिणकक्षमन्ववलम्बे यज्ञसूत्रे वस्त्रे
वोपवीती द्विजः कथ्यते वामपाणावुद्धृते दक्षिणस्कन्धस्थे वामकक्षमन्ववलम्बे प्राचीनावीती भ-
ण्यते सव्ये प्राचीन आवीतीत्यद्वेदान्तरेधा उक्ताः तथा गोभिलः दक्षिणं बाहुमुद्धृत्य शिरोऽव-
धाय सव्येंऽसे प्रतिष्ठापयति दक्षिणं कक्षमन्ववलम्बं भवति एवमुपवीती भवति सव्यं बाहुमु-
द्धृत्य शिरोऽवधाय दक्षिणेंऽसे प्रतिष्ठापयति सव्यं कक्षमन्ववलम्बं भवत्येवं प्राचीनावीती भ-
वति निवीती कण्ठसज्जने इति शिरोऽवधाय दक्षिणपाणिपादाय कण्ठे कृते कण्ठदेशसज्जने ऋजु

त्रिभ्य एव तु वेदेभ्यः तस्मात्त्रिभ्य एव वेदेभ्य ऋग्यजुःसामभ्यः तदित्यृच इति प्रतीकेनानूदितायाः सावि
त्र्याः पादं पादमिति त्रीन्पादान्ब्रह्माख्य आकर्षत परमेस्थाने तिष्ठतीति परमेष्ठी ७७ यतः एवमतः एतद
क्षरमेतां च एतदक्षरमोंकाररूपमेतां च त्रिपदां सावित्रीं व्याहृतित्रयपूर्विकां संध्याकाले जपन्वेदज्ञो
विप्रादिर्वेदाध्ययनपुण्येन युक्तो भवति अतः संध्याकाले प्रणवव्याहृतित्रयोपेतां सावित्रीं जपेदि
ति विधिः कल्प्यते ७८ सहस्रकृत्वस्त्वभ्यस्य संध्यायामन्यत्र च काले एतत्त्रिकं तु प्रणवव्याहृतित्र
यसावित्र्यात्मकं ग्रामाद्बहिर्नदीतीरारण्यादौ सहस्रावृत्तिं जपित्वा महतोऽपि पापात्सर्प इव कञ्चुकान्मु
च्यते तस्मात्पापक्षयार्थमिदं जपनीयमिति प्रकरणेऽपि लाघवार्थमुक्तं ग्रन्थे नैतच्च सीचारणमपि तु।

त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ७७ एत
दक्षरमेतां च जपन्व्याहृतिपूर्विकां संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ७८ सहस्रकृ
त्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः महतोऽप्येनसो मासात्त्वचेवाहिर्विमुच्यते ७९ एतयर्चा विसं
युक्तः काले च क्रियया स्वया विप्रक्षत्रियविड्योनिर्गर्हणां याति साधुषु ८० ओंकारपूर्विका
स्तिस्रो महाव्याहृतयोऽव्ययाः त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखं ८१ योऽधीतेऽहन्यहन्येतां
त्रीणि वर्षाण्यतन्द्रितः स ब्रह्म परमभ्येति वायुभूतः खमूर्तिमान् ८२

नः कालेऽवसानात् ७९ एतयर्चा विसंयुक्तः संध्यायामन्यत्र च समयेऽक्रेवैतया सावित्र्यासुक्तः स्वक
सावित्रीजपः सम्यक्ज्ञातहोमादिरूपया स्वक्रियया च काले युक्तो ब्राह्मणः क्षत्रियोऽपि वैश्योऽपि सज्ज
नेषु निंदां याति तस्मात्स्वकाले सावित्रीजपं स्वक्रियां चावश्यं न त्यजेत् ८० ओंकारपूर्विकास्तिस्रो
ओंकारपूर्विकास्तिस्रो महाव्याहृतयः भूर्भुवः स्वरित्येतास्त्रयपत्रसपाप्तिकारणत्वेनाव्ययास्त्रिपदा
च सावित्री ब्रह्मणो वेदस्य मुखमाद्यं एतत्पूर्वक वेदाध्ययनारंभादथवा ब्रह्मणः परमात्मनः आप्तिर्द्वा
रं एतदध्ययनजपादिना निष्पापस्य ब्रह्मज्ञानप्रकर्षेण ब्रह्मप्राप्तिः ८२ ग्रन्थ एवाह योऽधीतेऽहन्यह
न्येतां यः प्रत्यहमनलसः सावित्रीं प्रणवव्याहृतियुक्तां वर्षत्रयमध्यीते स परं ब्रह्माभिमुखो गा

ॐ २५

ब्रह्मारंभेवसानेच वेदाध्ययनारंभेकालेतत्समापनेचकृतेगुरोःपादोपसंग्रहणंकार्यंहस्तौचसंहत्य।
संश्लिष्टौकृत्वाध्येतव्यमसएवब्रह्मांजलिःस्मृतइतिपूर्वश्लोकोक्तब्रह्मांजलिशब्दार्थव्याकारः ७१
व्यस्तपाणिनाकार्यं पादोपसंग्रहणंकार्यमित्यनंतरमुक्तंतद्व्यस्तपाणिनाकार्यमितिविधी
यतेकीदृशोव्यत्यासःइत्यतआह सव्येनपाणिनासव्यःपादोदक्षिणेनपाणिनादक्षिणःपादो
गुरोःस्प्रष्टव्यउत्तानहस्ताभ्यांवेदपादयोःस्पर्शनंकार्यं तदाहपैठीनसिः उत्तानाभ्यांहस्ताभ्यांदक्षि
णंदक्षिणेनसव्यंसव्येनपादौअभिवादयेत् दक्षिणपरिभावेनचायंव्यत्यासःशिष्टसमाचारात्
७२ अध्येष्यमाणंतुगुरुः अध्येष्यमाणमध्ययनंकरिष्यमाणंशिष्यमनलसोगुरुरधीष्वभोइतिप्र

ब्रह्मारंभेवसानेचपादौग्राह्यौगुरोःसदा संहत्यहस्तावध्येयंसहिब्रह्मांजलिःस्मृतः ७१ व्य
स्तपाणिनाकार्यमुपसंग्रहणंगुरोः सव्येनसव्यःस्प्रष्टव्योदक्षिणेनतुदक्षिणः ७२ अ।
ध्येष्यमाणंचगुरुर्नित्यकालमतंद्रितः अधीष्वभोइतिब्रूयाद्विरामोऽस्त्वितिचारमेत् ७३।
ब्राह्मणःप्रणवंकुर्यादादावंतेचसर्वदा स्रवत्यनोंकृतंपूर्वंपरस्ताच्चविशीर्यते ७४।
प्राक्कूलान्पर्युपासीनःपवित्रैश्चैवपावितः प्राणायामैस्त्रिभिःपूतस्ततओंकारमर्हति
अकारंचाप्युकारंचमकारंचप्रजापतिः वेदत्रयान्निरदुहद्भूर्भुवःस्वरितीतिच ७५

यमेवंवदेत् शेषेविरामोऽस्त्वित्यभिधायारमेतनिवर्तेत ब्राह्मणःप्रणवंकुर्यात् ब्राह्मणोवेदस्या
ध्ययनारंभेसमाप्तौचओंकारंकुर्यात् यस्मात्पूर्वंयस्यओंकारोनकृतःतत्स्रवतिशनैःशनैर्न।
श्यतियस्यपरस्तान्नकृतस्तद्विशीर्यतेअवस्थितिमेवनलभते ७४ प्राक्कूलान्पर्युपासीनः प्रा
क्कूलान्प्रागग्रान्कुशानध्यासीनःपवित्रैःकुशैःकरद्वयस्थितैःपवित्रीकृतःप्राणायामा
स्त्रयःपंचदशमात्राइतिगौतमस्मरणात् पंचदशमात्रैस्त्रिभिःप्राणायामैःप्रयतःअकारा
दिलक्षणस्वरवाच्यब्रह्ममानाततोऽध्ययनार्थमोंकारमर्हति ७५ अकारंचाप्युकारंच एतदक्ष
रमेतांचेतिवक्ष्यतितस्यायमर्थःअकारउकारमकारंचप्रणवावयवभूतंब्रह्मावेदत्रयात्।
ऋग्यजुःसामलक्षणाद्भूर्भुवःस्वरितिव्याहृतित्रयंचक्रमेणनिरदुहदुद्धृतवान् ७६

म॰स्मृ॰
टी॰
२६

जप्येनैवतुसंसिध्येत् ब्राह्मणोजप्येनैवनिःसंदेहांसिद्धिंलभतेमोक्षप्राप्तियोग्योभवति अन्यद्वैदिकंया
गादिकंकरोतुनकरोतुवायस्मान्मैत्रोब्राह्मणोब्रह्मणःसंबंधीब्रह्मणिलीयतइत्यागमेउच्यते मित्र
मेवमैत्रःस्वार्थेऽण् यागादिषुपशुजीवादिवधात्नसर्वप्राणिप्रियतासंभवति तस्माद्यागादिनावि।
नापिप्रणवादिजपनिष्ठोनिस्तरतीतिजपप्रशंसानतुयागादीनांनिषेधस्तेषामपिशास्त्रीयत्वात्
८७ इदानींसर्ववर्णानुष्ठेयंसर्वपुरुषार्थोपयुक्तमिन्द्रियसंयममाह इन्द्रियाणांविचरतां इन्द्रिया
णांविषयेष्वपहरणशीलेषुप्रवर्तमानानांत्वपितादृविषयदोषज्ञानेनसंयमेयत्नंकुर्यात् सारथिरिव
यथायुक्तानामश्वानां ८८ एकादशेन्द्रियाण्याहुः पूर्वपण्डितायान्येकादशेन्द्रियाण्यूचुस्तान्यशेषाणि।
स्त्रार्थंसर्वाणिकर्मतोनामतश्चक्रमाद्वक्ष्यामि ८९ श्रोत्रंत्वक्चक्षुषीजिह्वा एकादशसुश्रोत्रादीनिद।

जप्येनैवतुसंसिध्येद्ब्राह्मणोनात्रसंशयः कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्यते ८७ इं
द्रियाणांविचरतांविषयेष्वपहारिषु संयमेयत्नमातिष्ठेद्विद्वान्यन्तेववाजिनां ८८ ए
कादशेन्द्रियाण्याहुर्यानिपूर्वेमनीषिणः तानिसम्यक्प्रवक्ष्यामियथावदनुपूर्वशः ८९
श्रोत्रंत्वक्चक्षुषीजिह्वानासिकाचैवपंचमी पायूपस्थंहस्तपादंवाक्चैवदशमीस्मृता ९०
बुद्धीन्द्रियाणिपंचैषांश्रोत्रादीन्यनुपूर्वशः कर्मेन्द्रियाणिपंचैषांपाय्वादीनिप्रचक्षते ९१
एकादशंमनोज्ञेयंस्वगुणेनोभयात्मकं यस्मिन्जितेजितावेतौभवतःपंचकौगणौ ९२

शैतानिबहिरिन्द्रियाणिनामतोनिर्दिष्टानिपायूपस्थंहस्तपादमितिद्वंद्वश्चप्राणितूर्यसेनांगानामिति
प्राण्यंगद्वंद्वत्वादेकवचनं ९० बुद्धीन्द्रियाणिपंचैषां एषांदशानांमध्येश्रोत्रादीनिपंचक्रमोक्ता
निबुद्धेःकरणत्वात् कर्मेन्द्रियाणिचतद्विदोवदंति ९१ एकादशंमनोज्ञेयं एकादशसंख्यापूर
कंचमनोरूपमन्तरिन्द्रियंज्ञातव्यंस्वगुणेनसंकल्परूपेणउभयरूपेन्द्रियगणप्रवर्तकस्वरूपश्च।
तथैवयस्मिन्मनसिजितेउभावपिपंचकौबुद्धीन्द्रियकर्मेन्द्रियगणौजितौभवतःपंचकाविति त
दस्यपरिमाणमित्यनुवृत्तौसंख्यायाःसंज्ञासंघसूत्राध्ययनेष्विति पंचसंख्यापरिमितसंघात
कः ९२

टी॰
२६

2.6

एकाक्षरं परं ब्रह्म एकाक्षरमोंकारः परं ब्रह्म परब्रह्मावाप्तिहेतुत्वात् ओंकारस्य जपेन तदर्थस्य। परं ब्रह्मणो भावनया तदवाप्तेः प्राणायामाः सप्रणवसव्याहृतिसशिरस्कगायत्रीभिस्त्रिरावृत्ति-भिः कृताः चान्द्रायणादिभ्योऽपि परं तपः प्राणायामा इति वक्ष्यवचनिर्देशात् त्रयोऽपि विधिपूर्वकं तेषां दुःसत्त्वसावित्र्याश्चान्यत्प्रकृष्टं मन्त्रजातं नास्ति मौनादपि सत्यं विशिष्यते एषां च तदुक्तं स्तुत्यान्-त्वार्थे तान्युपासनीयानीति विधिः कल्प्यते धरणीधरेण तु एकाक्षरं परं ब्रह्म प्राणायामं परं तप इति पठितं व्याख्यातं च एकाक्षरं परं यस्मात् तदेकाक्षरं परं एवं प्राणायामपरमपि मेधातिथि-प्रभृतिभिर्दूषितं लिखितं यतः लिखनपाठान्तरं तत्र व्याख्याने धरणीधरः ८३ क्षरन्ति सर्वा वैदिक्यो सर्वा वेदविहिता होमयागादिरूपाः क्रियाः स्वरूपतः फलतश्च विनश्यन्ति अक्षरं तु प्रणवरूपमक्षयं ब्रह्मावाप्तिहेतुत्वात्फलद्वारेणाक्षरं ब्रह्मभावस्याविनाशात् कथमस्य ब्र-

> एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ८३
> क्षरन्ति सर्वा वैदिक्यो जुहोतियजतिक्रियाः अक्षरं त्वक्षरं ज्ञेयं ब्रह्म चैव प्रजापतिः ८४
> विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः
> ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीं ८६

ह्मप्राप्तिहेतुत्वमत आह ब्रह्म चैवेति चशब्दो हेतौ यस्मात्प्रजानामधिपतिर्यद्ब्रह्म तद्देवायमों-कारः स्वरूपतो ब्रह्म प्रतिपादकत्वेन चास्य ब्रह्मत्वमुभयथापि ब्रह्मत्वेन ब्रह्मप्रतिपादकत्वेन। वायमुपासितो जपकाले मोक्षहेतुरित्यनेन दर्शितं ८४ विधियज्ञाज्जपयज्ञो विधिविषयो यज्ञो विधियज्ञो दर्शपौर्णमासादिस्तस्मात्प्रकृतानां प्रणवादीनां जपयज्ञो दशगुणाधिकः स उपांशुश्चेत्कृतः शतगुणाधिकः यत्समीपस्थोऽपि परो न शृणोति तदुपांशुः मानस-स्तु जपः सहस्रगुणाधिकः यज्जिह्वोष्ठमनागपि न चलति स मानसः ८५ ये पाकय-ज्ञाश्चत्वारो ब्रह्मयज्ञादन्ये पञ्चमहायज्ञान्तर्गता वैश्वदेवहोमबलिकर्मनित्यश्राद्धाति-थिभोजनात्मकाश्चत्वारः पाकयज्ञा विधियज्ञा दर्शपौर्णमासादयस्तैः सहिता जपयज्ञ-स्य षोडशीं कलामपि न प्राप्नुवन्ति जपयज्ञस्य षोडशभागेनातुल्याः ८६

जितेंद्रियस्य लक्षणमाह श्रुत्वा स्पृष्ट्वा च स्तुतिवाक्यं निंदावाक्यं च श्रुत्वा सुखस्पर्शं च मेघकंबलादि स्पृष्ट्वा सुरूपं कुरूपं च दृष्ट्वा स्वाद्वस्वादु च भुक्त्वा सुरभ्यसुरभि च घ्रात्वा यस्य न हर्षविषादौ स जितेंद्रियो ज्ञातव्यः एकेंद्रियासंयमोपि निवार्यत इत्याह ९९ इंद्रियाणां तु सर्वेषां सर्वेषामिंद्रियाणां मध्ये यद्येकमपींद्रियं विषयप्रवणं भवति तेनास्य विषयपरस्य इंद्रियांतरैरपि तत्त्वज्ञानं क्षरति न अवतिष्ठते चर्मनिर्मितोदकपात्रादिवैकेनापि छिद्रेण सर्वस्मात्स्थितमेवोदकं न व्यवतिष्ठते ९९ इंद्रियसंयमस्य सर्वपुरुषार्थहेतुतां दर्शयति वशे कृत्वेति बहिरिंद्रियग्राममायत्तं कृत्वा मनश्च संयम्य सर्वान्पुरुषार्थान्सम्यक्साधयेद्योगात् उपायेन स्वदेहमपीडयन्यः सहजसुखी सुकुमारादिकं भु। नो सक्रमेणासेवेत १०० पूर्वां संध्यां पूर्वां संध्यां पश्चिमामिति च कालाध्वनोरत्यंतसंयोगे द्वि

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः न हृष्यति ग्लायति वा विज्ञेयो विजितेंद्रियः ९८ इंद्रियाणां तु सर्वेषां यद्येकं क्षरतींद्रियं ततोस्य क्षरति प्रज्ञा दृतेः पादादिवोदकं ९९ वशे कृत्वेंद्रियग्रामं संयम्य च मनस्तथा सर्वान्संसाधयेदर्थानक्षिण्वन् योगतः १०० पूर्वां संध्यां जपंस्तिष्ठेत्सावित्रीमर्कदर्शनात् पश्चिमां तु समासीनो सम्यगृक्षविभावनात् १०१ पूर्वां संध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति पश्चिमां तु समासीनो मलं हंति दिवाकृतं २

27

या प्रथमां संध्यां सूर्यदर्शनपर्यंतं सावित्रीं जपंस्तिष्ठेत् अत्र स्थानाद्यासननिवृत्तिरेकत्र देशे। स्यात् पश्चिमां तु संध्यां सावित्रीं जपन्सम्यङ्नक्षत्रदर्शनपर्यंतमुपविष्टः स्यात् अत्र च फलतो जपः प्रधानं स्थानासने त्वंगे फलवत्संनिधावफलं तदंगमिति न्यायात्संध्यासु वेदविहितो वेद एव न जप्यत इति सहस्र ... इति च पूर्वजपात्फलमुक्तं मेधातिथिस्तु स्थानासनयोरेव प्राधान्यमाह संध्याकालश्च मुहूर्तमात्रं तथाह योगियाज्ञवल्क्यः ह्रासवृद्धी तु सततं दिवसानां यथाक्रमं संध्या मुहूर्तमात्रं तु ह्रासे वृद्धौ च सा स्मृता १०१ पूर्वां संध्यां पूर्वसंध्यायां तिष्ठञ्जपं कुर्वाणो निशासंचितपापं नाशयति पश्चिमसंध्यायामुपविष्टो जपं कुर्वन्दिनार्जितं पापं हंति अबुद्धिपूर्वजपात्फलमेतत्र बुद्धिज्ञानादिकृतपापविषयं अत एव याज्ञवल्क्यः दिवा वा यदि वा रात्रौ य

मनोधर्मसंकल्पमूलत्वादिंद्रियाणां प्राधान्येन प्रवृत्तेः किमर्थमिंद्रियनिग्रहः कर्तव्य इत्यत आह इंद्रिया
णां प्रसंगेन यस्मादिंद्रियाणां विषयेषु प्रसंगात् दृष्टमदृष्टं च दोषमसंप्राप्नोति तान्येव पुनरिंद्रियाणि
सम्यङ्नियम्य सिद्धिं मोक्षादिपुरुषार्थयोग्यतारूपां लभते तस्मादिंद्रियसंयमं कुर्यादिति शेषः ५३
किमिंद्रियसंयमेन विषयोपभोगादेव लब्धकामो निवर्त्स्यतीत्यत आह न जात्विति कामानामुप
भोगेन न कदाचित्कामोऽभिलाषः काम्यन्त इति कामा विषयास्तेषामुपभोगेन निवर्तते किं तु घृतेनाग्नि
रिवाधिकाधिकमेव वर्द्धते प्राप्तभोगस्यापि प्रतिदिनं तदधिकभोगवाञ्छादर्शनात् अत एव वि
ष्णुपुराणे ययातिवाक्यं यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः एकस्यापि न पर्याप्तं तदित्यतितृ
षं त्यजेत् तथा पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः तथाप्यनुदिनं तृष्णा ममैतेष्वभिजायते ५४ य

इंद्रियाणां प्रसंगेन दोषमृच्छत्यसंशयः संनियम्य तु तान्येव ततः सिद्धिं नियच्छति ५३ न
जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ५४ यश्चै
तान्प्राप्नुयात्सर्वान् यश्चैतान्केवलांस्त्यजेत् प्रापणात्सर्वकामानां परित्यागो विशिष्यते ५५
[2]वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित् ५७
[1]न तथैतानि शक्यन्ते संनियन्तुमसेवया विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः ५६

यश्चैतान्प्राप्नुयात्सर्वान् यश्चैतान्सर्वान्विषयान्प्राप्नोति यश्चैतान्कामानुपेक्षते तयोर्विषयोपेक्षकः
श्रेयान् यस्मात्सर्वकामप्राप्तेरुपेक्षा प्रशस्ता तथा हि विषयलोलुपस्य तत्साधनधनाद्युपादाने
कष्टसंभवो विपत्तौ च क्लेशाशान्तिश्च न तु विषयविरतस्य इदानीमिंद्रियसंयमोपायमाह ५५
न तथैतानि शक्यन्ते एतानींद्रियाणि विषयेषु प्रसक्तानि तथा नासेवया विषयसन्निधिवर्जनेन नि
यन्तुं शक्यन्ते दुर्निवारत्वात् यथा सर्वदा विषयाणां क्षयित्वादिदोषज्ञानेन यथा शरीरस्य चास्थिस्थूण
मित्यादिवक्ष्यमाणदोषचिन्तनेन तस्माद्विषयदोषज्ञानादिना बहिरिंद्रियाणि मनश्च नियच्छे
त् यस्मादनियतं मनो विकारस्य हेतुः स्यात् ५६ वेदास्त्यागश्च यज्ञाश्च वेदाध्ययनदानयमनियमत
पांसि स्त्र्यादिविषयसेवासंकल्पशीलिनो न कदाचित्फलसिद्धये प्रभवन्ति ५७

म॰ स्मृ॰ टी॰ २८

आचार्यपुत्रः आर्यपुत्रपरिचारकज्ञानान्तरदाताधर्मज्ञोमृद्वार्यादिशुचिर्बान्धवग्रहणधारणसमर्थध
नदाहितेच्छुर्ज्ञातिरेतेदशधर्मेणाध्याप्याः ९ नापृष्टः कस्य यदल्पेनाल्पाक्षरं विस्वरं वाधीतं तस्य
तत्त्वेन वदेत् शिष्यस्य न पृच्छतोपि वक्तव्यं भक्तिश्रद्धादिप्रश्नधर्मोल्लंघनमन्यायप्रश्नेन पृच्छतो न ब्रू
यात् जानन्नपि प्राज्ञः मूकवल्लोके व्यवहरेत् उक्तप्रतिषेधद्वयातिक्रमणे दोषमाह १० अध
र्मेण अधर्मेण पृष्टोपि यो यस्य वदति यश्चान्यायेन संपृच्छति तयोरन्यतरो व्यतिक्रमकारी म्रियते
विद्वेषं वा तेन सह गच्छति ११ धर्मार्थौ यत्र यस्मिन्शिष्ये अध्यापिते धर्मार्थौ न भवतः परिचर्या
वाध्ययनानुरूपा न तत्र विद्या नार्पणीया श्रेष्ठव्रीह्यादिबीजमिवोषरे यथा बीजं नष्टं न प्ररोहति स
अध्यापकः न चार्थग्रहणे भृतकाध्यापकत्वमाशंकनीयं यथेतावद्दीयते तदेवत्वामध्यापयामी
ति नियमाभावात् १२ विद्ययैव सह वेदाध्यापकेन वरं मर्तव्यं न तु सर्वथाऽध्यापनयोग्यपात्रा ।
विद्ययैव

आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्मतः ९
नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः जानन्नपि हि मेधावी जडवल्लोक आचरेत् १० अ
धर्मेण च यः प्राह यश्चाधर्मेण पृच्छति तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति ११ धर्मा।
र्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे १२ विद्ययैव।
समं कामं मर्तव्यं ब्रह्मवादिना आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत् १३ विद्या ब्राह्मणमे
त्याह शेवधिस्तेऽस्मि रक्ष मां असूयकाय मां मादास्तथा स्यां वीर्यवत्तमा १४ यमेव तु शुचिं विद्या
न्नियतब्रह्मचारिणं तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने १५

व्याभावेपि अपात्रायैनां प्रतिपादयेत् तथा च छान्दोग्यब्राह्मणं विद्यया सार्द्धं म्रियेत न विद्यामूषरे व
पेत् १३ अस्यापवादमाह विद्याब्राह्मणं विद्याधिष्ठात्री देवता केचिदध्यापकं ब्राह्मणमागम्य एवम
वदत् तवाहं निधिः रक्ष मां त्वसूयकादिदोषवते मा न वदेः तथा सत्यतिशयेन वीर्यवती भूयासं तथा
च छान्दोग्यब्राह्मणं विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेहमस्मि [illegible] नेवमा
दायोऽध्यापयमाप्रयसी तेहमस्मीति १४ यमेव तु यमेव तु पुनः शिष्यं शुचिं [illegible] यतेन्द्रियं ब्रह्मचा
रिणं जानासि तस्मै विद्यारूपनिधिरक्षकाय प्रमादरहिताय मां वद १५

उ॰ २८

28

नानुतिष्ठ यः पुनः पूर्वां संध्यां नानुतिष्ठेत् पश्चिमां चनोपास्ते तत्कालविहितं जपादि न करोति स शूद्रवत् सर्वस्माद्द्विजकर्मणोऽतिथिसत्कारादेरपि बाह्यः कार्यः अनेन प्रत्यवायेन नित्यता संध्योपासनस्याकरणे निमित्तेपि सर्वदा तेजितपापक्षयफलत्वमविरुद्धं ३ अपां समीपे ब्रह्मयज्ञरूपमिदं बहुवेदाध्ययनाशक्तो सावित्रीमात्राध्ययनमपि विधीयते अरण्यादिनिर्जनदेशं गत्वा नद्यादिजलसमीपे नियतेन्द्रियः समाहितोऽनन्यमना नैत्यकं विधिं ब्रह्मयज्ञरूपमास्थितोऽनुतिष्ठन् सावित्रीमपि प्रणवव्याहृतित्रयसमस्तां यथाकालमधीयीत ४ वेदोपकारे वेदोपकरणे वेदाङ्गे शिक्षादौ नैत्यके नित्यानुष्ठेये च स्वाध्याये ब्रह्मयज्ञरूपे होममन्त्रेषु चानध्यायादरो नास्ति ५ नैत्यके इति पूर्वोक्ते नैत्यके स्वाध्यायमन्त्र।

नानुतिष्ठति यः पूर्वां नोपास्ते नच पश्चिमां स शूद्रवद्बहिः कार्यः सर्वस्माद्द्विजकर्मणः ३ अपां समीपे नियतो नैत्यकं विधिमास्थितः सावित्रीमप्यधीयीत गत्वारण्यं समाहितः ४ वेदोपकरणे चैव स्वाध्याये चैव नैत्यके नानुरोधोस्त्यनध्याये होममंत्रेषु चैव हि ५ नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतं ब्रह्माहुतिहुतं पुण्यमनध्यायवषट्कृतं ६ यः स्वाध्यायमधीतेब्दं विधिना नियतो द्विजः तस्य नित्यं क्षरत्येष पयो दधि घृतं मधु ७ अग्नीन्धनं भैक्षचर्यामधःशय्यां गुरोर्हितं आसमावर्तनात्कुर्यात्कृतोपनयनो द्विजः ८

वादः नैत्यके जपयज्ञे ऽनध्यायो नास्ति यतः सततभवत्वाद्ब्रह्मसत्रं मन्वादिभिः स्मृतं ब्रह्मैवाहुतिहुतिर्हविस्तस्माहुतमनध्यायाध्ययनरूपमनध्याये वषट्कृतमपि पुण्यमेव भवति ६ यः स्वाध्याय श्रद्धान्वितः संयतो द्विजो यथा वर्षमेकं स्वाध्यायमहरहर्विहितांगयुक्तो नियतेन्द्रियः शुचिः जपति तस्य स्वाध्यायो जपयज्ञः क्षीरादीनि क्षरति क्षीरादिभिर्देवान्पितॄंश्च प्रीणाति ते च प्रीताः सर्वकामैः जपयज्ञकारिणं प्रीणयंतीत्यर्थः अत एव याज्ञवल्क्यः मधुना पयसा चैव स देवांस्तर्पयेद्द्विजः पितॄन्मधुघृताभ्यां च ऋचोधीते तु योन्वहं इत्युपक्रम्य च तत्त्वामेव वेदानां प्रवणादीनां च जपस्य देवपितृतृप्तिफलमुक्ता यो पठेत् प्राप्तयं यमेनं सर्वकामफलैः शुभैरित्युक्तवान् ७ अग्नीन्धनं सायं प्रातः समिद्धोमं भिक्षासमूहाहरणमसत्त्वाद्यायनरूपामधः शय्यां न तु खट्वां डिलशायित्वमवगुरोरुदकुम्भाद्याहरणरूपं हितं कृतोपनयनो ब्रह्मचारी समावर्त्तन

म॰ स्मृ॰
टी॰
३५

संप्रत्यभिवादविधिमाह अभिवादात् वृद्धमभिवादयन् विप्रादिरभिवादनात्परं अभिवादये इ
ति शब्दोच्चारणानंतरममुकोऽहमस्मीति स्वकीयं नाम विशेषमुच्चारयेत् अतो नामपदस्य विशे
षपरत्वात् स्वनामविशेषोच्चारणानंतरमभिवादनवाक्ये नामशब्दोपि प्रयोज्य इति मेधाति
थिगोविंदराजयोरभिधानमप्रमाणं अत एव गौतमः स्वनाम प्रोच्याहमभिवादय इति
संबंध्य मनोपि आमावहं भो उ आत्मनो नामादिशेदित्युक्तवान् यदि च नामशब्दश्रवणात्तस्य
प्रयोगः तदा आवाक्यस्यापनाम्नोंते उत्तमभिधानात्स्वनाम अभिवादनवाक्येपि नामशब्दोच्चार

23

अभिवादात्परं विप्रो ज्यायांसमभिवादयन् असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत्
नामधेयस्य ये केचिदभिवादं न जानते तान्प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैव च २३
भोःशब्दं कीर्तयेदंते स्वस्य नाम्नोऽभिवादने नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः स्मृतः

णं स्यात् न च तत्कस्यचित्संमतं २२ नामधेय॰ नामधेयस्य उच्चारितस्य सतो ये केचिदभिवा
द्याः संस्कृतानभिज्ञतया अभिवादमभिवादार्थं तान् जानंति तान् प्रत्यभिवादनेप्यसमर्थत्वा
त्प्राज्ञोऽभिवाद्यशक्तिविज्ञोऽभिवादयिताभिवादयेऽहमित्येव ब्रूयात् सर्वाः स्त्रियस्तथैव ब्रूया
त् २३ भोःशब्दं अभिवादने यन्नाम प्रयुक्तं तस्यांते भोःशब्दं कीर्तयेदभिवाद्यसंबोधनार्थं
अत एवाहं नाम्नामिति भो उत्तमस्य भोभावः सत्ता सोऽभिवाद्यनाम्नां स्वरूपभाव ऋषिभिः स्मृ
तः तस्मादेवं अभिवादनवाक्यं अभिवादये भोः शर्माहमस्मि भोः २४

मं॰
३५

ननुज्ञातस्य यः पुनरभ्यासार्थमधीयानादन्यं वा कंचिदध्यापयन्तं तदनुमतिं विना वेदं गृह्णा-
ति स वेदस्तेयसंयुक्तो नरकं गच्छति तस्मादेतन्न कर्तव्यम् ११६ लौकिकं वै लौकिकं अर्थज्ञानादि ।
ज्ञानं वैदिकं वेदार्थज्ञानं आध्यात्मिकं ब्रह्मज्ञानं यस्मात् गृह्णाति बहुमान्यसद्भावे तं प्रथममभि ।
वादयेत् लौकिकादिज्ञानदातॄणामेव यथाक्रमं बहुमान्यत्वे पूर्वात्परं मान्यतरं ११७ सावित्रीमा
सावित्रीमात्रवेदितापि वरं सुयन्त्रितो यथाशास्त्रं नियतो विप्रादिर्मान्यः न त्वयन्त्रितो वेदत्रयवेदिता-
पि निषिद्धभोजनशीलः प्रतिषिद्धविक्रेतापि च एतच्च प्रदर्शनमात्रं सुयन्त्रितत्वेन विधिनि-
षेधादिनियमस्याविवक्षितत्वात् ११८ शय्यासने शय्या चासनं च शय्यासने नोत्कृष्टा ।

ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात् स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते ११६
लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ११७
सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी ११८
शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत् शय्यासनस्थश्चैवैनं प्रत्युत्थायाभिवादयेत्
ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः चत्वारि तस्य वर्धन्ते आयुः प्रज्ञा यशो बलम् १२१

ण्नाभिमतेऽध्युषिते एकवद्भावः तस्मिन् श्रेयसा विद्यातपोधिकेन गुरुणा चाध्याचरिते साधारण्ये-
नस्वीकृते उत्तरकालमपि नासीत स्वयं च शय्यासनस्थो गुरावागते उत्थायाभिवादनं कुर्यात् ११९
अस्यार्थवादमाह ऊर्ध्वं प्राणा यस्मात् यूनोऽल्पवयसो वयोविद्यादिनाधिके स्थविरे आयाति आगच्छ-
ति सति प्राणा ऊर्ध्वमुत्क्रामन्ति देहाद्बहिर्निर्गन्तुमिच्छन्ति तान्स वृद्धप्रत्युत्थानाभिवादनाभ्यां पु-
नः स्वस्थान्करोति तस्माद्वृद्धस्य प्रत्युत्थानाभिवादनं कुर्यात् १२० इतस्य फलमाह अभिवाद-
उत्थाय सर्वदा वृद्धाभिवादनशीलस्य वृद्धसेविनश्चायुः प्रज्ञा यशो बलानि चत्वारि सम्यक्प्रव

ब्राह्मणं कु॰ समागम्य समागमे वृत्ते अभिवादकमवरवयसं समानवयसमनभिवादकमपि
ब्राह्मणं कुशलं क्षत्रियमनामयं वैश्यं क्षेमं शूद्रमारोग्यं पृच्छेत् अतएवापस्तम्बः कुशल
मवरवयसं समानं विप्रं वा विप्रं पृच्छेदनामयं क्षत्रियं क्षेमं वैश्यं आरोग्यं शूद्रं अवरवयस
मभिवादकं वयस्यमनभिवादकमपीति मन्वर्थमेवापस्तम्बः स्फुटयति स्म गोविन्दराजस्तु प्र
करणात् प्रत्यभिवादकस्यैव कुशलादिप्रश्नमाह तन्न अभिवादकेन सह समागमस्यापि
प्राप्तत्वात्समागम्येति निःप्रयोजनानुवादप्रसङ्गात् तच्च कुशलक्षेमयोरनामयारो
ग्यपदयोश्च समानार्थत्वात् शब्दविशेषोच्चारणमेव विवक्षितं २७ अवाच्यो दीक्षित इत्यभि
वादनकालेऽन्यस्मिन्नपि दीक्षणीयातः प्रभृति अवभृथस्नानान्तं निष्ठापि दीक्षितो नाम्ना न

ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयं वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च २७
अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् भोभवत्पूर्वकं त्वेनमभिभाषेत धर्मवित्
परपत्नी तु या स्त्री स्यादसंबन्धा च योनितः तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति वा २९
मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः ३०

वाच्यः किंतु भो भवच्छब्दपूर्वकं दीक्षितादिशब्दैरुत्कर्षाभिधायिभिरेव धार्मिकोऽभिभाषेत भो
दीक्षितेदं कुरु भवता यजमानेनेदं क्रियतामिति २८ परपत्नी या स्त्री परपत्नी भवति
असंबद्धा च योनित इति स्वस्रादिर्न भवति तामवयस्य प्रसङ्गसंभाषणकाले भवति सुभगे
भगिनीति वा वदेत् परपत्नीग्रहणात्कन्यायां नैष विधिः स्मृतः कन्यादेव्यायुष्मत्यादि
देरभिभाषणात् २९ मातुलांश्च मातुलादीनागतान्कनिष्ठान्प्रत्युत्थाय असाव
हमिति वदेन्नाभिवादयेत् असाविति स्वनामनिर्देशः भूयिष्ठाः खलु गुरवस्तेषु क्रम
त्वानष्टद्ध तयोरपि हारीतेन गुरुत्वकीर्तनात् तयोश्च कनिष्ठयोरपि संभवात्तद्विषयो
ऽयं गुरुग्रहः ३०

आयुष्मान् अभिवादने कृते प्रत्यभिवादयित्राभिवादको विप्रादिरायुष्मान्भव सौम्येति वा
च्यः तस्याभिवादकस्य यन्नाम तस्यांते योऽकारादिः स्वरो नाम्नामकारांतत्वनियमाभावात्स
प्लुतः कार्यः स्वरांते तच्चेदकारांतत्वं व्यंजनांते पि नाम्नि संभवति पूर्वेनाम गतमक्षरं सं
प्लुतः कार्यः स्वरांते तच्चेद् वा व्यंजनांते ॥
यस्य सः पूर्वोक्षरः तेनाकारादिः स्वरः प्लुतः कार्यः यत्तद्वाक्याद्
प्लुतत्वं तदुच्यते यज्ञो प्रत्यभिवादे शूद्रे इति प्लुतं स्मरन्पाणिनिः स्त्रीष्वपि तु वाक्यात्
ते च क्षत्रिये तु नात्र मनेन दृष्टेति किं व्यंजनांतस्यापि टेः प्लुतो यथा स्यात् स्मादीह यां प्रत्यभि
वादनवाक्य आयुष्मान्भव सौम्य शुभशर्मन् ३ एवं क्षत्रियस्य बलवर्मन् ३ वैश्यस्य वसुभूते
३ प्लुतो राजन्यविशां वेति कात्यायनवचनात् क्षत्रियवैश्ययोः पक्षे प्लुतो न भवति शूद्रस्य तु

आयुष्मान्भव सौम्येति वाच्यो विप्रो भिवादने अकारश्चास्य नाम्नोंते वाच्यः पूर्वाक्षरः प्लुतः
यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनं नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः २६

तो न कार्यः अशूद्र इति पाणिनिवचनात् स्त्रियामपि निषेध इति कात्यायनवचनात् स्त्रि
यामपि प्रत्यभिवादनवाक्ये न प्लुतः गोविंदराजस्तु ब्राह्मणस्य नाम्नि शर्मोपपदं ब्राह्मणा
य प्रत्यभिवादनवाक्ये आयुष्मान्भव सौम्य भद्र इति निरुपपदो दाहरणे उपपदो दाह
रणं भिन्नत्वमेव मिति जं ज्ञापयति यद्यपि आयुष्मान्भव सौम्येति संबुद्धिविभ
क्त्यंतमेकवचनं पूर्वमनुष्यसंबुद्धिप्रयोगमेकवचनांतममुकशर्मा उदाहरणं च विच
क्षणैरण्यपेक्षणीय एव २७ यो न वेत्ति यो विप्रो भिवादनस्यानुरूपं प्रत्यभिवाद
नं न जानाति असावभिवादनविदुषा पि स्वनामोच्चारणपूर्वकविधिना शूद्र इव ना
भिवाद्यः अभिवादयेहमिति पाद्योच्चारणमात्रं तु कर्तव्यं शूद्रं प्रति यदाहुरणादिशूद्रस्यमनिषिद्धं

म॰स्मृ॰ टी॰ ३२

वित्तं बंधुर्व॰ वित्तं न्यायार्जितं धनं बंधुः पितृव्यादि वयोऽधिकवयस्त्वं कर्म श्रौतं स्मार्तं च विद्या वेदार्थतत्त्वज्ञानं एतानि पंच मान्यत्वकारणानि एषां मध्ये यद्यदुत्तरं तत्तत्पूर्वस्माज्ज्येष्ठमिति वृद्ध मान्यमेव लोके मान्यामान्यमत्तं ३६ पंचानां त्रि॰ त्रिषु वर्णेषु ब्राह्मणादिषु पंचानां वित्तादी नां मध्ये यत्र पूर्वमप्यनेकं भवति स एवोत्तरस्मादपि मान्यः तेन वित्तबंधुयुक्तो वयोधिकान्मा न्यः एवं वित्तादित्रययुक्तः कर्मवतो मान्यः वित्तादिचतुष्टययुक्तो विदुषो मान्यः गुणवंति च प्र कर्षवंति तेन द्वयोरेव वित्तादिमतोः प्रकर्षो मानहेतुः शूद्रोपि दशमीमवस्थानवत्यधिकां गतो द्विजन्मनामपि मानार्हः शतवर्षाणां दशधा विभागे दशम्यवस्थानवत्यधिका भवति ३७ च क्रिणो द॰ अयमपि पूजाप्रकारः प्रसंगादुच्यते चक्रयुक्तरथादियानारूढस्य नवत्यधिकवयसो रोगार्तस्य भारपीडितस्य स्त्रियाः अचिरनिवृत्तसमावर्तनस्य राज्ञश्च विवाहोपस्थितस्य पंथास्

वित्तंबंधुर्वयः कर्म विद्या भवति पंचमी एतानि मान्यस्थानानि गरीयो यद्यदुत्तरं ३६ पंचा नां त्रिषु वर्णेषु भूयांसि गुणवंति च यत्र स्युः सोत्र मानार्हः शूद्रोपि दशमीं गतः ३७ चक्रि णो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः स्नातकस्य च राज्ञश्च पंथा देयो वरस्य च ३८ ते षां तु समवेतानां मान्यौ स्नातकपार्थिवौ राजस्नातकयोश्चैव स्नातको नृपमानभाक् ३९ उपनीय गुरुः शिष्यं वेदमध्यापयेत्तु यः सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ४० एकदे शं तु वेदस्य वेदांगान्यपि वा पुनः योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ४१

तव्यः मार्गार्पणात् दद्यात् इत्यर्थः ३८ तेषां तु एतेषामेकत्र मिलितानां देशाधिपस्नातकौ मान्यौ राजस्नातकयोः पुनः स्नातक एव राज्ञा पूज्यो मान्यः अत एव राजशब्दो न पूर्वश्लोके च न क्षत्रियजातिवचनः किंत्वभिषिक्तक्षत्रियजनपदाधिपवचनः क्षत्रियजात्यपेक्षया ब्राह्मणादेश्वर्ये स्थितेनैव ब्राह्मणेनाति मान्यस्य मान्यताभिधानात् स्नातकग्रहणवैयर्थ्याच्च ३९ उपनीय गु दानीमाचार्यादिशब्दार्थमाह तेः शास्त्रे हि व्यवहारात् यो ब्राह्मणः शिष्यमुप नीय कल्परहस्यसहितां वेदशाखां सर्वामध्यापयति तमाचार्यं पूर्वे मुनयो वदंति कल्पसूत्रं विद्यारहस्यमुपनिषत् वेदत्वेप्युपनिषदां प्राधान्यविवक्षया पृथङ्निर्देशः ४० एकदेशं वेदस्यैकदेशं मंत्रब्राह्मणं वा वेदांगानि वा व्याकरणादीनि यो वृत्त्यर्थमध्याप

म॰ ३२

32

मातृष्वसा मातृस्वस्राद्यो गुरुपत्नीवत् प्रत्युत्थानाभिवादनादिभिः संपूज्याः अभिवादनप्रक
रणादभिवादनमेव संपूजनं विज्ञायत इति समास्ता गुरुभार्यया समानत्वात्प्रत्युत्थानादि
कमपि कार्यमित्यर्थः ३१ भ्रातृभार्या भ्रातुः सजातीया भार्या ज्येष्ठा पूज्या प्रकरणात् उपसंग्राह्या
पादयोरभिवाद्या अहन्यहनि प्रत्यहमेव अपि त्वेवार्थे ज्ञातयः पितृपक्षाः पितृव्यादयः संबंधिनो
मातृपक्षाः श्वशुरादयश्च तेषां पत्न्यः पुनः विप्रोष्य प्रवासात्प्रत्यागतेनैवाभिवाद्या न तु प्रत्यहमिति
यमः ३२ पितुर्भगिन्याः पितृमातुश्च भगिन्या ज्येष्ठायामात्मभगिन्यां मातृवद्वृत्तिमातिष्ठेत्
माता पुनस्ताभ्यो गुरुः ननु मातृष्वसा मातुलानीत्यनेनैव गुरुपत्नीवत्पूज्यत्वमुक्तं किमधिकम
नेनवोच्यते उच्यते इदमेव माता ताभ्यो गरीयसीति तेन पितृष्वस्रानुज्ञायां मातुश्च विरोधे मा

मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा। संपूज्या गुरुपत्नीवत्समस्ता गुरुभार्यया ३१
भ्रातुर्भार्योपसंग्राह्या सवर्णाहन्यहन्यपि विप्रोष्य तूपसंग्राह्या ज्ञातिसंबंधियोषितः ३२
पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी ३३
दशाब्दाख्यं पौरसख्यं पंचाब्दाख्यं कलाभृतां त्र्यब्दपूर्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु
ब्राह्मणं दशवर्षं च शतवर्षं च भूमिपं पितापुत्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता ३५

तुराज्ञानुष्ठेयेति अथवा पूर्वं मातृष्वस्रादेः पूज्यत्वमुक्तं मातृवदनेन स्नेहादिवृत्तिरप्यतिदिश्य
त इत्यपुनरुक्तिः ३३ दशाब्दाख्यं दशाब्दाख्यमित्याख्यायमर्थः एकपुरनि
वासिनो वक्ष्यमाणविद्यादिगुणरहितस्य दशभिर्वर्षैर्ज्येष्ठत्वे सत्यपि सख्यमाख्यायते पुरस्म
रणं श्रद्धा नापैति तेनैकग्रामनिवासिनामपि स्यात् गीतादिकलाभिज्ञानां पंचवर्षपर्यंतं सख्यं
श्रोत्रियाणां त्र्यब्दपूर्वं त्र्यब्दपर्यंतं सपिंडेषु तु अल्पकालेनैव सख्यं अपि त्वेवार्थे सर्वत्रोक्तका
लादूर्ध्वं ज्येष्ठव्यवहारः ३४ ब्राह्मणंद ब्राह्मणं दशवर्षं शतवर्षं पुनः क्षत्रियं पितापु
त्रौ विजानीयात् तयोर्मध्ये दशवर्षो यो ब्राह्मणः क्षत्रियस्य शतवर्षस्यापि पिता तस्मादसौ
पितृवत्तस्य मान्यः ३५

म॰स्मृ॰
टी॰
३२

अल्पं वा श्रुतस्य तेन तन्मध्ये: यत्र पाध्यायो यस्य विशिष्याल्पं बहु वा श्रुतेनोपकरोति तमपीह शास्त्रे गुरुं
जानीयात् श्रुतमेवोपक्रिया श्रुतोपक्रिया तया १४९ ब्राह्मस्य ब्रह्मग्रहणार्थं जन्म ब्राह्मं उपनयनं
तस्य कर्ता स्वधर्मस्य शासिता वेदार्थव्याख्यानेन तादृशो बालोऽपि वृद्धस्यापि स पिता भवति ध
र्मत इति पितृधर्मास्तस्मिन् अनुष्ठातव्याः अत्र प्रकृतानुरूपमर्थवादमाह १५० अध्यापयामास
पितॄन् आङ्गिरसः पुत्रो बालः कविः वृद्धान्पितॄन्पितृतुल्यान्पितृव्यतत्पुत्रादीनधिकवयसो ।
ध्यापितवान् तान् ज्ञानेन परिगृह्य शिष्यान्कृत्वा पुत्रका इत्याजुहावेति हेमन्त्यर्थं पुत्रानाहूय च
नाय १५१ ते तमर्थं पितरस्तस्मात् पुत्रका इत्याह्वानेन जातरोषाः पुत्रकशब्दार्थं देवान्पृष्टव
न्तः देवाश्च एतान्मिलितानेवोचुर्न्याय्यमस्मिन्शिशुः पुत्रकशब्देनोक्तवानयमुक्तः १५२ यस्मा

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया १४९ ब्रा
ह्मस्य जन्मनः कर्ता स्वधर्मस्य च शासिता बालोऽपि विप्रो वृद्धस्य पिता भवति धर्मतः १५० अ
ध्यापयामास पितॄन् शिशुराङ्गिरसः कविः पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् १५१ ते त
मर्थमपृच्छन्त देवानागतमन्यवः देवाश्चैतान्समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् १५२ अज्ञो
भवति वै बालः पिता भवति मन्त्रदः अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदं १५३ न हाय
नैर्न पलितैर्न वित्तेन न च बन्धुभिः ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् १५४ विप्राणां
ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः १५५

३२

त् अज्ञो भवति वै शास्त्रावधारणार्थः अज्ञ एव बालो भवति न तु अल्पवयाः मन्त्रदः पिता भवति मन्त्र
ग्रहणं वेदोपलक्षणार्थं यो वेदमध्यापयति व्याचष्टे स पिता अत्रैव हेतुमाह यस्मात्पूर्वेऽपि मुनयो
ऽज्ञं बालमित्याहुः मन्त्रदं च पितेत्यब्रुवन् १५३ न हायनैः न बहुभिर्वर्षैः न केशश्मश्रुरोमभिः पलितै
न बहुना धनेन न पितृव्यादिभिर्बन्धुभिः सम्बन्धितैः महत्त्वं न भवति किं तु ऋषयः इदं धर्मं कृ
तवन्तः यः साङ्गवेदाध्येता सोऽस्माकं महानिति १५४ विप्राणां ज्ञानेन ब्राह्मणानां विद्यया क्षत्रिया
णां पुनर्वीर्येण वैश्यानां धान्यसुवर्णादिधनेन शूद्राणामेव पूर्वजन्मना ज्यैष्ठ्यं सर्वत्र तत्री
यार्थेतस्मिः १५५

टी॰
३२

निषेकादीनीति निषेको गर्भाधानं तेन पितुरयं गुरुत्वोपदेशः गर्भाधानादीनि संस्कारकर्माणि पि-
तापदिष्टानि यथाशास्त्रं यो विप्रः करोति अन्नेन च यो वर्द्धयति स विप्रो गुरुरभिधीयते ५२ अ-
ग्न्याधेयं आहवनीयाद्यग्न्युत्पादकं कर्माग्न्याधेयं अष्टकादीन्पाकयज्ञानग्निष्टोमादींश्च यज्ञा-
न्यः कृतवरणो यस्य करोति स तस्यर्त्विगिह शास्त्रेऽभिधीयते स ब्रह्मचारिधर्मेष्वप्य-
युक्तमपि ऋत्विक्प्रभृतीनामाचार्यादिवद्वृत्तिज्ञोपिमान्यत्वं दर्शयितुं प्रसंगादुक्तं ५३ य आवृ-
णोति य उभौ कर्णौ वितथमिति वर्णस्वरवैगुण्यरहितेन सत्येन रूपेण वेदेन पूरयति स माता स
पिता ज्ञेयः महोपकारकत्वगुणयोगाद् अध्यापकेऽयं मातापितृशब्दः तं नापकुर्यात्कदाचन

निषेकादीनि कर्माणि यः करोति यथाविधि । संभावयति चान्नेन स विप्रो गुरुरुच्यते ५२ अ-
ग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान् । यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते ५३
य आवृणोत्यवितथं ब्रह्मणा श्रवणावुभौ । स माता स पिता ज्ञेयस्तं न द्रुह्येत्कदाचन ५४ उपा-
ध्यायान्दशाचार्य आचार्याणां शतं पिता । सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते ५५ उ-
त्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता । ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् ५६ ।
कामान्माता पिता चैनं यदुत्पादयतो मिथः । संभूतिं तस्य तां विद्याद्यद्योनावभिजायते ५७
आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः । उत्पादयति सावित्र्या सा सत्या साऽजराऽमरा ५८

गृहीते च वेदे ५४ उपाध्यायात् दशोपाध्यायानपेक्ष्याचार्यः आचार्यशतमपेक्ष्य पिता सह-
स्रं पितॄनपेक्ष्य माता गौरवेणातिरिक्ता भवति अत्रोपनयनपूर्वकसावित्रीमात्रमध्यापयिता ।
आचार्योऽभिप्रेतः तदपेक्षया पितुरुत्कर्षः उत्पादकब्रह्मदात्रोस्तुल्ये न त्वाचार्यस्यापि अपेक्ष्योत्क-
र्षं वक्ष्यतीत्यदोषः ५५ उत्पादक जनकाचार्यौ द्वावपि पितरौ जन्मदातृत्वात् तयोराचार्यः पि-
ता गुरुतरः यस्माद्विप्रस्य ब्रह्मग्रहणार्थं जन्म उपनयनजन्मसंस्काररूपं परलोके चेहापि शा-
श्वतं नित्यं ब्रह्मप्राप्तिफलत्वात् ५६ कामान्माता मातापितरौ यदेनं बालकं कामवशेना-
न्योन्यं उत्पादयतः संभवमात्रं तत्तस्य पश्वादिसाधारणं तद्योनौ मातृकुक्षावभिजायते अंगप्र-
त्यंगानि लभते ५७ आचार्यस्त्वित्यादि आचार्यः पुनर्वेदज्ञोऽस्य माणवकस्य यां जातिं यज्ञ्यमवि-

म-स्मृ-
टी-
३३

सम्मानाद्ब्रा० सम्मानाद्विषादिव सर्वदोद्विजेत सम्माने प्रीतिं न कुर्यात् अमृतस्येव सर्वस्माल्लोकादवमा-
नमाकांक्षेत् अवमाने परेण कृतेपि त्तमावां तत्र भवेन खेदं न कुर्यात् मानापमानद्वंद्वसहिष्णुत्वमनेन
विधीयते १६२ सुखंह्य० अवमानसहिष्णुत्वे हेतुमाह यस्मादवमाने परेण कृते तत्र खेदमकुर्वा-
णः सुखं निद्राति अन्यथा अवमानदुःखेन दंदह्यमानः कथं निद्रां लभते कथं च सुखं प्रतिबुध्यते
प्रतिबुद्धश्च कथं सुखं कार्येषु चरेत् अवमानकर्ता तु तेन पापेन विनश्यति १६३ अनेन क्र० अनेन
क्रमकथितेनोपायेन जातकर्मादिनोपनयनपर्यंतेन संस्कृतो द्विजो गुरुकुले वसन् शनैरत्वरया
वेदग्रहणार्थं तपोभिहिताभिधास्यमाननियमकलापरूपमनुतिष्ठेत् विध्यंतरसिद्धस्याप्ययं
मंत्रवादोध्ययनांगत्वबोधनाय १६४ अध्ययनांगत्वमेव स्पष्टयति तपोविशे० तपोविशेषै-

सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव अमृतस्येव चाकांक्षेदवमानस्य सर्वदा १६२
सुखं ह्यवमतः शेते सुखं च प्रतिबुध्यते सुखं चरति लोकेस्मिन्नवमंता विनश्यति १६३
अनेन क्रमयोगेन संस्कृतात्मा द्विजः शनैः गुरौ वसन्संचिनुयाद्ब्रह्माधिगमिकं तपः १६४
तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः वेदः कृत्स्नोधिगंतव्यः सरहस्यो द्विजन्मना
वेदमेव सदाभ्यस्येत्तपस्तप्स्यन्द्विजोत्तमः वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते १६६
आहैव स नखाग्रेभ्यः परमं तप्यते तपः यः स्रग्व्यपि द्विजोधीते स्वाध्यायं शक्तितोन्वहं

नियमकलापैर्विविधैर्वक्ष्यमाणप्रकारैरपेक्ष्यमाणस्नानादिनोक्तैः सेवेतयमांस्तु नियमानित्यादि-
भिर्वक्ष्यमाणैर्व्रतैश्चोपनिषद्महानाम्निकादिभिर्विधिचोदितैः स्वगृह्यविहितैः समग्रो वेदो
मंत्रब्राह्मणात्मकः सोपनिषत्कोऽधीतव्यः रहस्यमुपनिषत्तत्प्राधान्यबोधनाय पृथङ्निर्देशः १६५
वेदमेव यद्यन्नियमानामंगत्वमुक्तं तत्र कृत्स्नमध्यापाध्ययनमनेनैव विधीयते तपस्तप्स्यन्द्विजो वेद-
मेव ग्रहणार्थमावर्तयेद्यस्माद्वेदाभ्यास एव विप्रादेरिहलोके प्रकृष्टं तपो मुनिभिरभिधीयते १६६
आहैव स० स्वाध्यायाध्ययनस्तुतिरियं रूपार्थः पुरस्तादभिहितस्यापि प्रकर्षस्यातिशयसूचकः
स द्विज आनखाग्रेभ्य एव चरणेनाखपर्यंतसर्वदेहव्यापकमेव प्रकृष्टतमं तपस्तप्यते यः स्र-

ग्व्यपि कुसुममालाधार्यपि प्रत्यहं यथाशक्ति स्वाध्याय-
मधीते स्रग्व्यपीत्यनेन वेदाध्ययनाय ब्रह्मचारिनि-

यमत्यागमपि स्वसामर्थ्यं दर्शयति तप्यते तप इत्यनेन तपःक-
र्मकस्येवेति यथात्मनेपदे भवतः १६७

33

नैतेनेत्यादि: न तेन वृद्धो भवति येनास्य शुक्लकेशं शिरं किंतु यो युवापि सन् विद्वान् तं देवाः स्थविरं जा
नंति १५६ यथा काष्ठकृतो हस्ती यथा चर्मनिर्मितो मृगः यश्च ब्राह्मणोऽनधीते त्रयः एते नाम
मात्रं दधति न तु हस्त्यादिकार्यं शत्रुवधादिकं कर्तुं क्षमते १५७ यथा षंढो यथा नपुंसकं स्त्रिषु
निःफलं यथा च स्त्रीगव्यामेव निःफला यथा चाज्ञे दानमफलं तथा ब्राह्मणोऽप्यनधीयानो निः
फलः श्रौतस्मार्तकर्माचरहेतया तत्फलरहितत्वात् १५८ अहिंसयैव भूतानां शिष्याणां श्रेयस्कर।
णम् श्रेयोऽनुशासनमनतिहिंसकार्यं रज्जुवेणुदलेन तु ममल्पहिंसया श्रेयोऽनुशासनार्हं ताडनं च
मधुरा प्रीतिजननी श्लक्ष्णा प्रयोक्तव्या शिष्यशिक्षार्थे धर्मवृद्धिमिच्छता प्रयोक्तव्या

न तेन वृद्धो भवति येनास्य पलितं शिरः। यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः १५६ य
था काष्ठमयो हस्ती यथा चर्ममयो मृगः। यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः १५७ यथा
षंढोऽफलः स्त्रीषु यथा गौर्गवि चाफला। यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः १५८ अहिं
सयैव भूतानां कार्यं श्रेयोऽनुशासनं वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता १५९ यस्य वा
ङ्मनसी शुद्धे सम्यग्गुप्ते च सर्वदा। स वै सर्वमवाप्नोति वेदान्तोपगतं फलं १६० नारुंतुदः स्यादा
र्तोऽपि न परद्रोहकर्मधीः। ययास्योद्विजते वाचा नालोक्यां तामुदीरयेत् १६१

१५९ यस्य वाङ्मनसी इत्यनयोः शुद्धरूपमात्रस्य धर्मे वाङ्मनसयोः संयममाह नाध्यापयित्वैव यस्य वा
ङ्मनसी आभ्यंतरशुद्धे भवतः मिथ्यानृतादिभिरस्पृष्टा मनश्च रागद्वेषदूषितं न भवति एते च वाङ्म
नसी निषिद्धविषयप्रवर्तनेऽप्यसर्वदा यस्य गुप्ते सुरक्षिते भवतः स वेदान्तोपगतं फलं सर्वं वेदन
सर्वं प्राप्तव्यं दिव्यं मोक्षलाभादवाप्नोति १६० नारुंतुदः आर्तमपि मुरूपमात्रस्य धर्मो नाध्या
पकस्यैवार्तः पीडितोऽपि नारुंतुदः स्यात् परमर्मपीडाकरं तन्न दुःखेन मुह्यते परद्रोहो
पकारक तदर्थकर्मबुद्धिश्च न कर्तव्या तथा ययाऽपि वाचाऽस्य परो व्यथते तां ममर्मस्पर्शामलोक्यां
स्वर्गादिलोकप्राप्तिविरोधिनीं न वदेत् १६१

यद्यस्येति यस्य ब्रह्मचारिणो यानि चर्मसूत्रमेखलादंडवस्त्राण्युपनयनकाले गृह्येण विहितानि गोदानादिव्रतेष्वपि नवानि कर्तव्यानि ७३ सेवेतेमान् ब्रह्मचारी गुरुसमीपे वसन्निंद्रियसंयमं कृत्वा स्वतपोवृद्ध्यर्थमिमान्वक्ष्यमाणान्नियमाननुतिष्ठेत् ७४ नित्यं स्नात्वा प्रत्यहं स्नात्वा देवर्षिपितृभ्य उदकदानं प्रतिमादिषु हरिहरादिदेवतापूजनं सायंप्रातः समिद्धोमं कुर्यात् यत्तु गौतमीये स्नाननिषेधो ब्रह्मचारिणः स मलस्नानविषयः अत एव बौधायनः नाप्सु श्लाघमानः स्नायात् विस्तुना कालद्वयमभिषेकाग्निकर्मकरणमप्सु दंडवन्मज्जनमिति ब्रुवाणेन वारद्वयं स्नानमुपदिष्टं ७५ वर्जयेन्मधु क्षौद्रं मांसं च न खादेत् गंधं च कर्पूरचंदनकस्तूरिकादि वर्जयेत् एषां गंधादीनां यथासंभवं भक्षणमनुलेपनं च निषिद्धं माल्यं च न धारयेत् उद्रि

यद्यस्य विहितं चर्म यत्सूत्रं या च मेखला यो दंडो यच्च वसनं तत्तदस्य व्रतेष्वपि ७४
सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन् सन्नियम्येंद्रियग्रामं तपोवृद्ध्यर्थमात्मनः ७५
नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणं देवताभ्यर्चनं चैव समिधाधानमेव च ७६
वर्जयेन्मधु मांसं च गंधं माल्यं रसान्स्त्रियः शुक्तानि चैव सर्वाणि प्राणिनां चैव हिंसनं
अभ्यंगमंजनं चाक्ष्णोरुपानच्छत्रधारणं कामं क्रोधं च लोभं च नर्तनं गीतवादनं ७७
द्यूतं च जनवादं च परिवादं तथानृतं स्त्रीणां च प्रेक्षणालंभमुपघातं परस्य च ७८

क्तरसान् अम्ललवणादीन्न खादेत् स्त्रियश्च नोपेयात् यानि स्वभावतो मधुरादिरसानि कालवशेनोदकवासादिना वाम्लतां यांति तानि शुक्तानि न खादेत् प्राणिनां हिंसां न कुर्यात् ७६ अभ्यंगमं तैलादिना शिरःसहितदेहमर्दनं कज्जलादिभिश्चक्षुषोरंजनं पादुकायाः छत्रस्य च धारणं कामं मैथुनातिरिक्तविषयाभिलाषातिशयं मैथुनस्य स्त्रीप्रेक्षणालंभनेनैव निषिद्धत्वात् क्रोधं लोभं नृत्यगीतवीणापणवादिवादनादि वर्जयेत् ७७ द्यूतं च अक्षादिक्रीडां जनैः सह निरर्थकं वाक्कलहं परस्य दोषकथनं मृषाभिधानं स्त्रीणां च मैथुनेच्छया सानुरागप्रेक्षणालिंगने परस्य चापकारं वर्जयेत् ७८

योऽनधीत्य यो द्विजो वेदमनधीत्य अन्यत्रार्थशास्त्रादौ श्रमं यत्नातिशयं करोति स जीवन्नेव पुत्रपौत्रा
दिसहितः शीघ्रं शूद्रत्वं गच्छति वेदमनधीत्यापि स्मृतिवेदाङ्गाध्ययने विरोधाभावः अत एव यो व
त्तिवितो न वेदमनधीत्यान्यां विद्यामधीयीत अन्यत्र वेदाङ्गस्मृतिभ्यः ६८ मातुरग्रे द्विजानां त
त्राधिकारस्तुत्यर्थं द्विजत्वनिरूपणार्थमाह मातुः सकाशादादौ पुरुषस्य जन्म द्वितीयं मौञ्जिबन्धने
उपनयने ज्ञापोसंज्ञाछन्दसोरिति ह्रस्वः तृतीयमग्निष्टोमादियज्ञदीक्षायां वेदश्रवणात्तथा
च श्रुतिः पुनर्जायते ज्ञातिजन एनं गर्भं कुर्वन्ती यद्दीक्षयन्तीति प्रथमे द्वितीयजन्मकथनं चेदं तृती
यजन्मस्तुत्यर्थं द्विजस्यैव यज्ञदीक्षायामधिकारात् ६९ तत्र यद्ब्र तत्रेति तेषु त्रिषु जन्मसु मे।
ध्ये यदेतद्ब्रह्मग्रहणार्थं जन्मोपनयनसंस्काररूपं मेखलाबन्धनेनोपलक्षितं तत्रास्य माणवकस्य

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमं स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ६८ मा
तुरग्रे द्विजननं द्वितीयं मौञ्जिबन्धने तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात् ६९ तत्र
यद्ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितं तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ७१ वे
दप्रदानादाचार्यं पितरं परिचक्षते न ह्यस्मिन्युज्यते कर्म किंचिदामौञ्जिबन्धनात् ७०
नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते शूद्रेण हि समस्तावद्यावद्वेदे न जायते ७१ कृ
तोपनयनस्यास्य व्रतादेशनमिष्यते ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वकं ७२

सावित्री माता पिता त्वाचार्यः माता पितृसंपाद्यत्वाज्जन्मनः ७० वेदप्रदा वेदाध्यापनादाचार्यं
पितरं मन्वादय ऊचुः पितृवन्महोपकारकत्वात् ज्ञौणं पितृत्वं महोपकारकत्वमेव दर्शयति
न ह्यस्मिन्निति यस्मादस्मिन्माणवके उपनयनात्प्राक् किंचित्कर्म श्रौतं स्मार्तं च न संबध्यते तेन तत्रा
धिक्रियत इत्यर्थः ७० नाभिव्याहा आमौञ्जीबन्धनादित्यनुवर्तते प्रागुपनयनाद्वेदं नोच्चारये
त्स्वधा श्राद्धेन श्राद्धमुच्यते तन्निनीयते निष्पाद्यते येन मन्त्रजातेन तदृते पितृमृतपितृकोऽनव
श्राद्धादौ मन्त्रानुच्चारयेत् तस्मात्तिरिक्तं वेदं नोदाहरेत् यस्माद्यावद्वेदे सावित्र्यां न जायते ताव
च्छूद्रेण समस्तुल्यः ७१ कृतोपन यस्मादस्य माणवकस्य समिधमाधेहि मा दिवा स्वाप्सी
रित्यादिव्रतादेशनं वेदस्य चाध्ययनं मन्त्रब्राह्मणक्रमेण अध्येष्यमाणस्याचार्य इत्यादि विधि

अकृत्वा भैक्षचरणं भिक्षाहरणं सायंप्रातः समिद्धोमम् अरोगी नैरन्तर्येण सप्ताहमकृत्वा लुप्तव्रतो भव
तीति तस्मादवकीर्णिप्रायश्चित्तं कुर्यात् ८७ भैक्षेण वर्तयेन्नित्यं ब्रह्मचारी नैकस्यान्नमद्यात् किं तु बहुगृ
हाद्दाहृतभिक्षासमूहेन ब्रह्मचारी वर्तयेत् भिक्षासमूहेन ब्रह्मचारिणो वृत्तिरुपवाससमा मुनि।
भिः स्मृता ८८ व्रतवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत् काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते
पूर्वेण निषिद्धमेकस्यान्नभोजनं तस्यापवादमाह अयं च ब्रह्मचारी देवदैवत्ये कर्मणि देवतोद्देशेन श्राद्धे प्रार्थितो ब्र
ह्मचारी व्रतविरुद्धमधुमांसविवर्जितमेकस्यान्नमपि यथेप्सितं भुञ्जीत पित्र्येऽप्युद्देशेन श्राद्धे प्रार्थितो
भवति तदापि ऋषिवत् ऋषयः यतयः सम्यग्दर्शनसंपन्नास्तद्वन्मधुमांसवर्जितमेकस्याप्यन्नं भुञ्जी
तेति सम्यग्वा मोवेदयः अमनस्कः तथापि भैक्षवृत्तिनियमरूपव्रतमस्य लुप्तं न भवति याज्ञवल्क्यः।

अकृत्वा भैक्षचरणमसमिध्य च पावकम् अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ८७ भैक्षे
ण वर्तयेन्नित्यं नैकान्नादी भवेद्व्रती भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ८८ व्रतवद्देव
दैवत्ये पित्र्ये कर्मण्यथर्षिवत् काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते ८९ ब्राह्मण
स्यैव कर्मैतदुपदिष्टं मनीषिभिः राजन्यवैश्ययोस्त्वेवं नैतत्कर्म प्रवर्तते ९० चोदितो गु
रुणा नित्यमप्रचोदित एव वा कुर्यादध्ययने यत्नमाचार्यस्य हितेषु च ९१ शरीरं चैव
वाचं च बुद्धीन्द्रियमनांसि च नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखं ९२

पित्र्ये श्राद्धेऽभ्यर्थितस्यैकान्नभोजनमाह ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि ब्राह्मणः काममश्नीया
त् श्राद्धे व्रतमपीडयन् विश्वरूपेण तु व्रतमस्य लुप्यत इति पठितो ब्रह्मचारिणो मांसभक्षणम
नेन मनुवचनेन विहितमिति व्याख्यातं ८९ ब्राह्मणस्यैव कर्मैतत् ब्राह्मणक्षत्रियवैश्यानां ब्राह्म
णमेव भैक्षाचरणविधानाद्भुतवदिति अनेन तदपवादरूपमेकान्नभोजनमुपदिष्टं क्षत्रियवैश्य
योरिति मनेन पूर्वदृष्टे तदेकान्नभोजनरूपं कर्म तद्ब्राह्मणस्यैव वेदविद्भिर्विहितं।
क्षत्रियवैश्ययोः पुनर्नैतत्कर्म भवति ९० चोदितो गुरुणा नित्यं आचार्येण प्रेरितः स्वयमे
व वा प्रमत्तः अध्ययने गुरोर्हितेषु चोद्योगं कुर्यात् ९१ शरीरं चैव वाचं च देहवाक्बुद्धीन्द्रिय
मनांसि नियम्य प्राञ्जलिर्गुरुमुखं पश्यन् तिष्ठेन्नोपविशेत् ९२

एकः शायी सर्वत्र नीचशय्यादौ एकाकी शयनं कुर्यात् इच्छया न शुक्रं पातयेत् यस्मादिच्छया स्वमेहनात् शुक्रं पातयन् स्वकीयव्रतं नाशयति व्रतलोपे चावकीर्णिप्रायश्चित्तं कुर्यात् ७९ स्वप्ने सिक्त्वा ब्रह्मचारी स्वप्नादावनिच्छया रेतः सिक्त्वा कृतस्नानः चन्दनाद्यनुलेपनपुष्पधूपादिभिः सूर्यमभ्यर्च्य पुनर्मामैत्विन्द्रियमित्येतामृचं वारत्रयं पठेत् इदमत्र प्रायश्चित्तं ८० उदकुम्भं जलकलशं पुष्पगोमयमृत्तिकाकुशान्यावदर्थानि यावद्भिः प्रयोजनमाचार्यस्य तावत आचार्यार्थमाहरेत् अत एवोदकुम्भमित्येकत्वमप्यविवक्षितं। प्रदर्शनार्थं चैतदन्यदप्याचार्यस्योपयुक्तमाहरेत् भैक्षं प्रत्यहमुपार्जयेत् ८१ वेदयज्ञैरहीनानां वेदैः पञ्चमहायज्ञैश्च परित्यक्तानां स्वकर्मदक्षाणां गृहेभ्यः प्रयतं ब्रह्मचारी सिद्धान्नभिक्षां प्रत्यहमाहरेत् ८२

एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् कामाद्धि स्कन्दयन्रेतो हिनस्ति व्रतमात्मनः ७९
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् ८०
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् आहरेद्यावदर्थानि भैक्षं चाहरहश्चरेत् ८१
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहं ८२
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत् ८३
सर्वं वापि चरेद्ग्रामं पूर्वोक्तानामसंभवे नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत् ८४
दूरादाहृत्य समिधः संनिदध्याद्विहायसि सायंप्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः ८५

गुरोः कुले न भिक्षेत आचार्यस्य सपिण्डेषु आत्मसपिण्डेषु च बन्धुषु च मातुलादिषु न भिक्षेत तद्व्यतिरिक्तभिक्षायोग्यगेहाभावे चोक्तेष्वेव पूर्वं पूर्वं त्यजेत् तत्र प्रथमं बन्धून् भिक्षेत तत्रालाभे ज्ञातीन् तत्रालाभे गुरोरपि ज्ञातीन् भिक्षेत ८३ सर्वं चेति वेदयज्ञैरहीनानामित्यनेनोक्तानामसंभवे सर्वं वा ग्राममुक्तगुणरहितमपि शुचिर्मौनी भिक्षेत् महापातकाद्यभिशस्तांस्तु वर्जयेत् ८४ दूरादाहृत्य परिगृहीतवृक्षेभ्यः समिधः आनीय आकाशे धारणयोग्ये पटलादौ स्थापयेत् ताभिश्च समिद्भिः सायंप्रातरनलसोऽग्नौ होमं कुर्यात् ८५

म॰ स्मृ॰
टी॰
२१

गुरोर्यत्र परीवादो विद्यमानदोषाभिधानं परीवादः अविद्यमानदोषाभिधानं निन्दा यत्र देशे गुरोः परीवादो निन्दा वा प्रवर्तते तत्र शिष्येण कर्णौ हस्तादिना तिरोधातव्यौ तस्माद्देशाद्देशान्तरं गन्तव्यं ॥ २०० ॥ परिवादात्खरो भवति इदानीं निषिद्धकर्तृकपरीवादादिफलमाह गुरोः परीवादाच्छिष्यो मृतः खरो भवति गुरोर्निन्दकः कुक्कुरो भवति परिभोक्ता अयुक्तवृत्तिना गुरुधनोपजीवकः कृमिर्भवति कीटः कृमिभ्यः किंचित्स्थूलः ॥ २०१ ॥ दूरस्थो नार्चयेदेनं दूरस्थः शिष्यः अन्यनियुक्तमाल्यवस्त्रादिना गुरुं नार्चयेत् स्वयं गमनाशक्तौ न दोषः क्रुद्धः कामिनीसमीपे चावस्थितं स्वयमपि नार्चयेत् यानासनस्थश्च शिष्यो यानासनादवतीर्य गुरुमभिवादयेत् शय्यासनस्थश्चैवैनं प्रत्युत्थायाभिवादयेदित्यनेनासनादुत्थानं विहितं अनेन तु यानासनत्यागः इत्यपुनरुक्तिः

गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥ २०० ॥
परीवादात्खरो भवति श्वा वै भवति निन्दकः । परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥ १ ॥
दूरस्थो नार्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः । यानासनस्थश्चैवैनमवरुह्याभिवादयेत् ॥ २ ॥
प्रतिवातेऽनुवाते च नासीत गुरुणा सह । असंश्रवे चैव गुरोर्न किंचिदपि कीर्तयेत् ॥ ३ ॥
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च । आसीत गुरुणा सार्धं शिलाफलकनौषु च ॥ ४ ॥
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् । न चानिसृष्टो गुरुणा स्वान्गुरूनभिवादयेत् ॥ ५ ॥

३६

३ प्रतिवातेऽनुवाते च प्रतिवातोऽभिमुखीभूतः शिष्यस्य यो गुरुदेशाच्छिष्यदेशमागच्छति स प्रतिवातः यः शिष्यदेशाद्गुरुदेशमागच्छति सोऽनुवातः तत्र गुरुणा सह नासीत तथाविद्यमानः संश्रवो यत्र तस्मिन्नसंश्रवे गुरुर्यत्र न शृणोतीत्यर्थः तत्र गुरुगतमन्यगतं वा किंचिदपि न कथयेत् ॥ ३ ॥ गोऽश्वोष्ट्रयानप्रासाद यानशब्दः प्रत्येकमभिसंबध्यते बलीवर्दयानोऽश्वोष्ट्रयुक्तयानं उष्ट्रयुक्तयानं प्रस्तरः तृणकटादौ प्रासादो परिष्कृतस्तम्भादिकः कटेवीरणादिनिर्मिते शिलायां फलके दारुघटिते नदीतीर्णमनेनौकायां च गुरुणा सहासीत ॥ ४ ॥ गुरोर्गुरौ सन्निहिते आचार्यस्याचार्ये सन्निहिते आत्माचार्य इव तस्मिन्नप्यभिवादनादिकां वृत्तिमनुतिष्ठेत् गुरुगृहे वसञ्शिष्यश्चाचार्येणाऽनियुक्तो न स्वान्गुरून्मातापितृभ्रात्रादीनभिवादयेत् ॥ ५ ॥

टी॰
२१

नित्यमुद्धृतपाणिःस्यात् सततंउत्तरीयाद्बहिःकृतदक्षिणबाहुःशोभनाचारोवस्त्राच्छन्नदेहःआसनामि।तिगुरुणोक्तःसन्गुर्वभिमुखंयथाभवतितथासीत १९२ हीनान्नवस्त्रवेषःस्यात् सर्वदागुरुसमीपेगुर्वपेक्षयाअपकृष्टान्नवस्त्रप्रसाधनोभवेत् गुरोश्चप्रथमंरात्रिशेषेशयनादुत्तिष्ठेत्प्रदोषेचगुरौशयाने पश्चाच्छयीत १९३ प्रतिश्रवणसंभाषे प्रतिश्रवणमाज्ञायाअङ्गीकरणंसंभाषणंचगुरोःशय्यायांशयानःआसनोपविष्टोभुञ्जानस्तिष्ठन्विमुखोनकुर्यात् १९४ आसीनस्याज्ञापयतःकुर्यात् आसनोपविष्टस्यगुरोराज्ञांददतःस्वयमासनादुत्थितःतिष्ठतोगुरोराज्ञांदिशतस्तदभिमुखंकतिचित्पदानिगत्वायदागुरुरागच्छतितदापितदभिमुखंगत्वायदागुरुर्धावन्नादिशतितदातस्यपश्चाद्धावन्प्रतिश्रवणसंभाषणेकुर्यात्तथा १९५ पराङ्मुखस्याभिमुखो पराङ्मुखस्यगुरो

नित्यमुद्धृतपाणिःस्यात्साध्वाचारःसुसंवृतः आस्यतामितिचोक्तःसन्नासीताभिमुखंगुरोः
हीनान्नवस्त्रवेषःस्यात्सर्वदागुरुसन्निधौ उत्तिष्ठेत्प्रथमंचास्यचरमंचैवसंविशेत् १९३
प्रतिश्रवणसंभाषेशयानोनसमाचरेत् नासीनोनचभुञ्जानोनातिष्ठन्नपराङ्मुखः १९४
आसीनस्यस्थितःकुर्यादभिगच्छंस्तुतिष्ठतः प्रत्युद्गम्यत्वाव्रजतःपश्चाद्धावंस्तुधावतः १९५
पराङ्मुखस्याभिमुखोदूरस्थस्यैत्यचान्तिकं प्रणम्यतुशयानस्यनिदेशेचैवतिष्ठतः १९६ नीचंशय्यासनंचास्यसर्वदागुरुसन्निधौ गुरोस्तुचक्षुर्विषयेनयथेष्टासनोभवेत् १९७ नोदाहरेदस्यनामपरोक्षमपिकेवलं नचैवास्यानुकुर्वीतगतिभाषितचेष्टितं १९८

राज्ञांदिशतःसंमुखस्थोदूरस्थस्यगुरोःसमीपमागत्यशय्यायांशयानस्यप्रह्वोभूत्वानिदेशेनिकटेति।ष्ठतोगुरोराज्ञांदिशतःप्रह्वीभूयैवप्रतिश्रवसंभाषणेकुर्यात् १९६ नीचंशय्यासनंचास्य गुरुसमीपेचास्यगुर्वपेक्षयानीचंशय्यासनंसर्वदास्यात् यत्रदेशेसमासीनंगुरुःपश्यतितत्रनयथेष्टचेष्टाचरणप्रसारणादिकानियंकुर्यात् १९७ नोदाहरेदस्यनाम अस्यगुरोःपरोक्षमपिउपाध्यायाचार्यादिपूजावचनोपपदशून्यंनाममनोच्चारयेत नचगुरोर्गमनंभाषितंचेष्टितंत्वनुकुर्यात्गुरुगमनादिसदृशान्यात्मनोगमनादीन्युपहासबुद्ध्यानकुर्यात् १९८

म-स्मृ-
टी-
३२

स्वभाव एष नारीणां स्त्रीणामयं स्वभावो यदिह शृंगारचेष्टया व्यामोह्य पुरुषाणां दूषणं अतोर्थाद्
हेतोः पंडिताः स्त्रीषु अप्रमत्ता न भवंति २१३ अविद्वांसमलं लोके विद्वानहं जितेंद्रिय इति बुद्ध्या न स्त्रीस-
न्निधौ स्थेयं यस्मादविद्वांसं पुनर्विद्वांसमपि पुरुषं देहधर्मात् कामक्रोधवशानुगामिनं स्त्रिय उत्पथं ने-
तुं समर्थाः २१४ तस्मात् मात्रा स्वस्रा दुहित्रा वा मात्रा भगिन्या दुहित्रा वा निर्जने गृहादौ नासीत यतो
बलवानिंद्रियग्रामः शास्त्रनियमितात्मानमपि परवशं करोति २१५ कामं तु गुरुपत्नीनां युवतीनां
गुरुपत्नीनां स्वयमपि युवा भूमौ यथोक्तविधिनाभिवाद्ये अमुकशर्माहं भो इति वदन् पादग्रहणं विना
नाम्नाहं भूमावभिवादनं गुरुपत्नीषु युवा कुर्यात् शिष्टानामयमाचार इति जानन् २१६ विप्रोष्येति

स्वभाव एष नारीणां नराणामिह दूषणं अतोर्थान्न प्रमाद्यंति प्रमदासु विपश्चितः २१३ अवि-
द्वांसमलं लोके विद्वांसमपि वा पुनः प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगं २१४ मात्रा स्वस्रा
दुहित्रा वा नाविविक्तासनो भवेत् बलवानिंद्रियग्रामो विद्वांसमपि कर्षति २१५ कामं तु गुरु-
पत्नीनां युवतीनां युवा भुवि विधिवद्वंदनं कुर्यादसावहमिति ब्रुवन् २१६ विप्रोष्य पादग्रह-
णमन्वहं चाभिवादनं गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् २१७ यथा खनन् खनित्रेण
नरो वार्यधिगच्छति एवं गुरुगतां विद्यां शुश्रूषुरधिगच्छति २१८ मुंडो वा जटिलो वा स्याद
थवा स्याच्छिखाजटः नैनं ग्रामेभिनिम्लोचेत्सूर्यो नाभ्युदियात्क्वचित् २१९

37

प्रवासादागतमात्रेण यथः दक्षिणेन दक्षिणमित्युक्तविधिना पादग्रहणं अन्वहं च भूमावभिवादनं च गु-
रुपत्नीषु युवा कुर्यात् शिष्टानामयमाचार इति जानन् २१७ यथा खनन् खनित्रेण उक्तस्य शुश्रूषाविधेः फ-
लमाह यथा कश्चिन्मनुष्यः खनित्रेण भूमिं खनन् जलं प्राप्नोति एवं गुरुस्थितां विद्यां गुरुसेवापरः
शिष्यः प्राप्नोति २१८ मुंडो वा जटिलो वा स्यात् ब्रह्मचारिणः प्रकारत्रयमाह मुंडितसमस्तशिराः केशा
वा जटावान् वा स्यात् शिखैव जटाकारा वा यस्य सापरशिरःकेशा मुंडिता यस्य वा भवेदेनं ब्रह्मचारिणं क्वापि
ग्रामे निद्राणं उत्तरत्र शयानमिति दर्शनात् सूर्यो नाभिनिम्लोचेत् नास्तमियात् न वाभ्युदियात् अत्र प्रा-
यश्चित्तमाह २१९

उ-
३२

विद्यागुरुष्वेतदेव आचार्यव्यतिरिक्ता ये उपाध्यायादयो विद्यागुरवः तेष्वप्येतदेवेति सामान्येनोपक्रमः किं तत् गुरुवद्वृत्तिर्नित्या सार्वकालिकी वृत्तिर्विधेया तथा स्वयोनिषु पितृव्यादिषु तद्वृत्तिः तथाऽधर्मान्निषेधत्सु हितं चोपदिशत्सु गुरुवद्वर्तितव्यं २०८ श्रेयःसु गुरुवद्वृत्तिं श्रेयःसु विद्यातपःसमृद्धेषु आर्येष्विति गुरुपुत्रविशेषणं समानजातिषु गुरुपुत्रेषु गुरोश्चैव ज्ञातिषु पितृपितृव्यादिषु सर्वदा गुरुवद्वृत्तिमातिष्ठेत् गुरुपुत्रस्याचार्याच्छिष्योऽधिकवयाश्चेद्वक्ष्यमाणः शिष्यबालसमानवयसामनंतरं विशेषणं वक्ष्यमाणत्वात् ७ बालः समानजन्मा वा कनिष्ठः समानवयो वा समानो वापि वा शिष्यो अध्यापनसमर्थो गृहीतवेदस्तथा: यज्ञकर्मण्येव ऋत्विक्त्वमवाप्य तद्दर्शनार्थमागतो गुरु

विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु प्रतिषेधत्सु चाधर्माद्धितं चोपदिशत्स्वपि ६ श्रेयः सु गुरुवद्वृत्तिं नित्यमेव समाचरेत् गुरुपुत्रेषु चार्येषु गुरोश्चैव स्वबन्धुषु ७ बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि अध्यापयन्गुरुसुतो गुरुवन्मानमर्हति ८ उत्सादनं च गात्राणां स्नापनोच्छिष्टभोजने न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनं ९ गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः १० अभ्यंजनं स्नापनं च गात्रोत्सादनमेव च गुरुपत्न्या न कार्याणि केशानां च प्रसादनं ११ गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः पूर्णविंशतिवर्षेण गुणदोषौ विजानता २१२

वत्पूजामर्हति ८ आचार्यवद्विशेषपूजायां प्राप्तायां विशेषमाह उत्सादनं च गात्राणां गात्राणामुत्सादनमुद्वर्तनं स्नापनमुच्छिष्टस्य भक्षणं पादयोश्च प्रक्षालनं गुरुपुत्रस्य न कुर्यात् ९ गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुपत्न्यो गुरुवदाज्ञाकरणादिना पूजनीया भवेयुः असवर्णाः पुनः केवलैः प्रत्युत्थाना भिवादनैः १० अभ्यंजनं स्नापनं च तैलादिना देहाभ्यंगं स्नापनं गात्राणां चोद्वर्तनं केशानां च माल्या दिना प्रसाधनं एतानि गुरुपत्न्या न कर्तव्यानि केशानामिति प्रदर्शनमात्रं देहस्यापि प्रसाधनं चंदना दिना न कुर्यात् ११ गुरुपत्नी तु युवतिः युवतिर्गुरुपत्नी पादयोरुपसंगृह्याभिवादनं गुणदोषज्ञेन न्यूनेनाभिवाद्या पूर्णविंशतिवर्षेण त्विति यौवनप्रदर्शनार्थं बालस्य पादयोरभिवादनं निषिद्धं भूमौ तु

म॰स्मृ॰
टी॰
३८

आचार्यश्च पिता चैव आचार्यो जनको जननी माता च सहोदर्यो ज्येष्ठः पीडितेनाप्यमी नावमन्तव्याः
विशेषतो ब्राह्मणेन २२५ यस्मादाचार्यो ब्रह्मणो मूर्तिः आचार्यो ब्रह्मणो मूर्तिः आचार्यो वेदान्तोदित
परब्रह्मणः परमात्मनो मूर्तिः पिता हिरण्यगर्भस्य माता च धारणात् पृथिव्या मूर्तिः भ्राता च स्वः सगर्भ्यः
क्षेत्रज्ञस्यात्मनः तस्मादेते नावमन्तव्याः २२६ यं मातापितरौ क्लेशं नृणामपत्यानां संभवे गर्भाधा
नेनात्मनं तरं पुत्रेष्ठयां मातापितरौ सहेते तस्य वर्षशतैरपि मानेन कारपि जन्मभिरानृण्यं कर्तुमशक्यमात् ।
मातुः कुक्षौ धारणदुःखं प्रसववेदनातिशयो जातस्य रक्षणं संवर्द्धनदुःखं च पितुरपि बाल्ये रक्षा
संवर्द्धनदुःखं उपनयनात्प्रभृति वेदतदंगाध्यापनव्याख्यानादिक्लेशातिशयः तत्तेषां संवसिद्धं २२७ त
स्मात् तयोर्नित्यमिति तयोर्मातापित्रोः प्रत्यहमाचार्यस्य च सर्वदा प्रीतिमुत्पादयेत् यस्मात्तेष्वेव त्रिषु प्री

आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः २२६
यं मातापितरौ क्लेशं सहेते संभवे नृणाम् न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि २२७ तयो
र्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते २२८ तेषां त्रया
णां शुश्रूषा परमं तप उच्यते न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् २२९ त एव हि त्रयो लो
कास्त एव त्रय आश्रमाः त एव हि त्रयो वेदास्त एवोक्तास्त्रयोऽग्नयः २३० पिता वै गार्हपत्योऽग्नि।
माताग्निर्दक्षिणः स्मृतः गुरुराहवनीयोऽग्निः साग्निः त्रेता गरीयसी २३१

तेषु सर्वं तपश्चान्द्रायणादिकं फलद्वारेण समस्तं प्राप्यते मातादित्रयतुष्ट्यैव सर्वस्य तपसः फलं प्राप्यत इत्य
र्थः २२८ तेषां त्रयाणां शुश्रूषा तेषां मातापित्राचार्याणां परिचर्या सर्वतपोमध्ये श्रेष्ठं तप उच्यते तत एव स
र्वतपःफलप्राप्तेः यद्यन्यदपि धर्मं कर्मञ्चित् करोति तदपि तदनुज्ञया नानुमतिव्यतिरेकेण न कुर्यात् २२९
त एव हीति यस्मात् एव मातापित्राचार्याः त्रयो लोकाः लोकत्रयप्राप्तिहेतुत्वात् कारणे कार्योपचारः
त एव ब्रह्मचर्यादित्रयस्य आश्रमाः गार्हस्थ्याद्याश्रमत्रयफलदातृत्वात् त एव त्रयो वेदाः वेदत्रयजप
फलोपायत्वात् त एव त्रयोऽग्नयोऽभिहिताः त्रेताग्निसाध्ययज्ञादिफलदातृत्वात् पिता वै गार्हपत्योऽग्निः वै
शब्दोऽवधारणे पितैव गार्हपत्योऽग्निः माता दक्षिणाग्निः आचार्य आहवनीयः सेयमग्नित्रेता श्रेष्ठतरा स्तु
त्यर्थत्वाच्चास्य न वस्तुतो विरोध उद्भाव्यः २३१

टी॰
३८

तं चेदभ्युदियात्सूर्यः तं चेत्कामतो निद्राणं लिङ्गप्रवणात्तेनाज्ञानात्सूर्योऽदियादस्तमियाद्वा तदा सावित्रीं ज
पन्नुभयत्रापि दिनमुपवसेत् रात्रौ भुञ्जीत अभिनिर्मुक्तः सोऽन्तरेऽहन्युपवासजपौ अभिरभावाद्रात्रिकर्मप्रवच
नीयसंज्ञानन्तः कर्मप्रवचनीययुक्ते द्वितीया सावित्रीजपस्तु गौतमवचनात्तदाह गौतमः सूर्याभ्युदितो ब्र।
ह्मचारी तिष्ठेदहरभुञ्जानोऽभ्यस्तमितश्च रात्रिं जपन्सावित्रीमिति तन्नु गौतमवचनात्सूर्याभ्युदितस्येव
दिवाभोजनजपौ प्रोक्तौ सूर्याभिनिर्मुक्तस्य रात्रौ भोजनजपौ नेतदपेक्षापाव्याख्यासंदेहे वास्मंतर
विवृतं मन्वर्थमर्यादायामेतल्लक्षणं [illegible] दर्शनादन्यथा ज्ञमेः अत एव जपस्यापि स्वापायो
तमवचनात्सावित्रीजपोऽभ्युपेय एवं न मनुगौतमोदितोपवासजपावपापाकर्मः [illegible] अस्तमितस्य
गौतमीयप्रायश्चित्तविकल्पः २१९ अस्य प्रायश्चित्तस्यानुवादमाह सूर्येणाभिनिर्मुक्तः पश्चा

तं चेदभ्युदियात्सूर्यः शयानं कामकारतः । निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनं २२० सूर्येण ह्य-
भिनिर्मुक्तः शयानोऽभ्युदितश्च यः । प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतैनसा २१ आचम्य प्रय-
तो नित्यमुभे संध्ये समाहितः । शुचौ देशे जपञ्जप्यमुपासीत यथाविधि २२ यदि स्त्री यद्यवरजः
श्रेयः किंचित्समाचरेत् । तत्सर्वमाचरेद्युक्तो यत्र चास्य रमेन्मनः २३ धर्मार्थावुच्यते श्रेयः
कामार्थौ धर्म एव वा । अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः २४ आचार्यश्च पिता चैव माता भ्रा-
ता च पूर्वजः । नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः २५

सूर्येणाभिनिर्मुक्तोऽभ्युदितश्च निद्राणः प्रायश्चित्तमकुर्वन्महता पापेन युक्तो नरकं गच्छति तस्माद्य
थोक्तं प्रायश्चित्तं कुर्यात् २१ यथा उक्तप्रकारेण संध्यातिक्रमे महत्पापमत आह आचम्येत्यादि ।
आचम्य प्रयतोऽनन्यमनाः शुचिदेशे सावित्रीं जपन्नुभे संध्ये विधिवदुपासीत २२ यदि स्त्री यद्यवरजः
यदि स्त्री शूद्रो वा किंचिच्छ्रेयोऽनुतिष्ठति तत्सर्वमप्युक्तोऽनुतिष्ठेत् यत्र च यस्मिन्शास्त्रानिषिद्धे मनोऽस्य तुष्यति त
दपि कुर्यात् २३ श्रेयः एव किं तन्निरूपणार्थमाह धर्मार्थावुच्यते श्रेयः धर्मार्थौ श्रेयोऽभिधीयते काम
हेतुत्वादिति केचिदाचार्या वर्णयन्ति अन्ये तु कामार्थौ श्रेयो वदन्ति धर्म एवेत्यपरे अर्थ एव कामस्यो
पायत्वादर्थ एवेह लोके श्रेयः स्वान्ये धर्मकामयोरपि साधनत्वात् २४ संप्रति स्वमतमाह धर्मा-
र्थकामात्मकः परस्पराविरुद्धस्त्रिवर्ग एव पुरुषार्थतया श्रेय इति तु निश्चयः अयं च बुभुक्षु-

म॰ स्मृ॰ टी॰ ३९

श्रद्दधानः शुभां विद्यां श्रद्धायुक्तः शुभां दृष्टशक्तिं गारुडादिविद्यामवराच्छूद्रादपि गृह्णीयात् अन्त्यश्चा-
ण्डालः तस्मादपि जातिस्मरणादिविहितयोगप्रकर्षाद्दुष्कृतशेषोपभोगार्थमवाप्तचण्डालजन्मनः प-
रं धर्मं मोक्षोपायमात्मज्ञानमाददीत तथा चोक्तं मोक्षमेवोपक्रम्य मोक्षधर्मे ज्ञानं प्राप्य ब्राह्मणात् क्ष-
त्रियाद्वा वैश्याच्छूद्रादपि नीचादभीक्ष्णं श्रद्धातव्यं श्रद्दधानेन नित्यं न श्रद्धिनं जन्ममृत्यू विशेषतः
मेधातिथिस्तु श्रुतिस्मृत्यपेक्षया परो धर्मो लौकिको धर्मस्तद्व्यवस्थायामपि प्रयुज्यते यदि चण्डा-
लादिरप्यत्र नाविरथ्यामाजा अस्मिन्न भक्षितव्यापादिति वदति तमपि धर्ममन्त्यादपि गृह्णीयात् लौ-
किकवस्तु परं धर्ममिति ब्रुवन्न चित्रं तथापि सर्वज्ञस्य ज्ञो मेधातिथिः स्मृतौ स्त्रीरत्नमात्मापेक्षया ।
निकृष्टकुलादपि परिणयेदेवं कुर्यात् ३८ विषादप्यमृतं ग्राह्यं विषं यद्यमृतसंयुक्तं भवति त-

श्रद्दधानः शुभां विद्यामाददीतावरादपि अन्त्यादपि परं धर्मं स्त्रीरत्नं दुःकुलादपि ३८
विषादप्यमृतं ग्राह्यं बालादपि सुभाषितं अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनं ३९
स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितं शिल्पानि चापि दृष्टानि समादेयानि सर्वतः ४०
अब्राह्मणादध्ययनमापत्काले विधीयते अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः २४१

दा विषमपसार्य तस्मादमृतं ग्राह्यं बालादपि हितवचनं शत्रुतोपि सच्चरितं अमेध्यादपि सुवर्णं गृह्णी-
यात् ३९ स्त्रियो रत्नान्यथो विद्याः अत्र स्त्र्यादीनां दृष्टान्तत्वमपि दृष्टान्ततेनोपपादनं यथा स्त्र्यादयो
निकृष्टकुलादिभ्यो गृह्यन्ते तथा शिल्पान्यप्यगर्हितानि चित्रलेखनादीनि सर्वस्माद्गृहीतव्यानि ४० उ॰
अब्राह्मणादध्ययनं ब्राह्मणादन्यो यो द्विजातिः क्षत्रियः तदभावे वैश्यो वा तस्मादध्ययनमापत्का- ३९
ले ब्राह्मणाध्यापकासंभवे ब्रह्मचारिणो विधीयते अनुव्रज्यादिरूपा गुरोः शुश्रूषा यावदध्ययनमस्य
नं कार्या गुरुत्वेन पादप्रक्षालनोच्छिष्टभोजनप्रक्षालनादिरूपा शुश्रूषा प्रशस्ता स्नानकार्ये तदपि
मनुव्रज्या चेति विशेषितं गुरुत्वमपि यावदध्ययनमेव क्षत्रियस्याह व्यासः मन्त्रदः क्षत्रियो
विप्रैः शुश्रूष्योनुगमादिना प्राप्तविद्यो ब्राह्मणस्तु पुनस्तस्य गुरुः स्मृतः २४१

त्रिष्वप्रमाद्यन्नेतेषु एतेषु त्रिषु प्रमादमकुर्वंश्च ब्रह्मचारी तावत्तत्परत्वेन गृहस्थोपि त्रिलोकान्विजयेत् मंत्राष्ट्
वेकस्यात्मने पदद्धिकायामात् त्रिभिरनित्यतत्तायना द्विपरार्ध्यांत्ते विनिलात्मने पदे त्रीन् लोकान्विजयेदिति
त्रिष्वपि लोके घाधि पत्यं प्राप्नोति तथा स्ववपुषा प्रकाशमानः सूर्यादिदेववद्दिवि हृष्टो भवति ३२
इमं लोकं मातृभक्त्या इमं लोकं मातृभक्त्या मध्यमं तरिक्षं पितृभक्त्या आचार्यभक्त्या हिरण्यगर्भलो
कमेव प्राप्नोति ३३ सर्वे तस्यादृता धर्माः यस्यैते त्रयो मातृपित्राचार्या आदृताः स्युः तस्य सर्वे ध
र्माः फलदा भवंति यस्यैते त्रयो नादृतास्तस्य श्रौतस्मार्तकर्माणि निःफलानि जायंते ३४ यावत्त्रयस्ते
जीवेयुः तेत्रयो यावज्जीवंति तावदन्यं धर्मं स्वातंत्र्येण नानुतिष्ठेत् तदनुज्ञात धर्मानुष्ठानं प्राप्य

त्रिष्वप्रमाद्यन्नेतेषु त्रीन् लोकान्विजयेद्गृही दीप्यमानः स्ववपुषा देववद्दिवि मोदते ३२
इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते ३३
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ३४
यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत् तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः ३५
तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत् तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः ३६ त्रि
ष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते एष धर्मः परः साक्षादुपधर्मोन्य उच्यते ३७

हितमेव किं तत्तेष्वेव नित्यं प्रियं हितकरं शुश्रूषां कुर्यात् तदार्थे प्रीतिसाधनं प्रियं भेषजपाना
दिवदायत्यामिष्टसाधनं हि ३५ तेषामनुपरोधेन तेषां शुश्रूषायामविरोधेन तदनुज्ञातो
यद्यस्मान्मनोवचनकर्मभिः परलोकफलकमानुतिष्ठेत् तन्मयेदमनुष्ठितमिति पश्चात्तेभ्यो
निवेदयेत् ३६ त्रिष्वेतेष्वितिकृत्यं हि इतिशब्दः कात्स्न्यवचनः हि शब्दो हेतौ यस्मादेतेषु शुश्रू
षितेषु पुरुषस्य सर्वं श्रौतस्मार्तकर्तव्यं संपूर्णमनुष्ठितं भवति तत्फलावाप्तेः तस्मादेष शुश्रू
षाधर्मः साक्षात्पुरुषार्थसाधनं अन्यस्त्वग्निहोत्रादिः प्रतिनियतस्वर्गादिहेतुरुपधर्मो
यथान्यधर्महेतिशुश्रूषात्तुतिः ३७

म॰ स्मृ॰
टी॰
४०

एतेष्वविद्यमानेषु एतेषु त्रिष्वविद्यमानेषु सत्सु तमाचार्यस्यैवाग्नेः समीपे स्थानासनविहारैः सायंप्रात
र्होमसमिद्धोमादिनाग्नेः शुश्रूषां कुर्वन्नात्मनो देहं देहावच्छिन्नं जीवं ब्रह्मप्राप्तियोग्यं साधयेत् ॥ ४८
एवं चरति यो विप्रः आसमाप्तेः शरीरस्येत्यनेन यावज्जीवमाचार्यशुश्रूषायां मोक्षलक्षणं फल
मुक्तं। आचार्यमृतेऽपि एवं मृतेऽपि एवमित्यनन्तरोक्तविधिनाचार्यपुत्रादीनामग्निपर्यन्तानां शुश्रू
षको यो नैष्ठिकब्रह्मचर्यमाविच्छिन्नव्रतोऽनुतिष्ठति स उत्तमं स्थानं ब्रह्मण्यात्यन्तिकलक्षणं प्राप्नोति
न चेह संसारे कर्मवशाज्जन्म लभते ॥ ४९ ॥ २४९ ॥ इति वारेन्द्रनन्दनवासीयभट्टश्रीकुल्लूकवि
रचितायां मन्वर्थमुक्तावल्यां द्वितीयोऽध्यायः ॥ २ ॥ गौडे नन्दनवासिनाम्नि सुजनैर्वन्द्ये वरेन्द्र्यां कु
ले विप्रो भट्टदिवाकरस्य तनयः कुल्लूकभट्टोऽभवत्। वृत्तिलेन मनुस्मृतौ शिववरेऽध्याये
ऽधुनारम्यं क्रियते हिताय विदुषां मन्वर्थमुक्तावली ॥ द्विजस्यासमाप्तेः शरीरस्येत्यनेन नैष्ठिक

40

एतेष्वविद्यमानेषु स्थानासनविहारवान्। प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः ॥ ४८
एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः। स गच्छत्युत्तमं स्थानं न चेहाजायते पुनः ॥ ४९
॥ २४९ ॥ इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां द्वितीयोऽध्यायः ॥ २ ॥ षट्त्रिंशदा
ब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतं। तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥ १

ब्रह्मचर्यमुक्तं तत्र तावत्पर्येत्य आसमावर्तनादित्यनेन चोपकुर्वाणस्य सावधिब्रह्मचर्यमुक्तं प्र
तत्रसेव गार्हस्थ्याधिकारः तत्र कियदवधि तत्तच्चर्यं तस्य गार्हस्थ्यमित्यपेक्षायामाह ष
ड्त्रिंशदाब्दिकं चर्यं त्रयो वेदा ऋग्यजुःसामाख्याः त्रिवेदी तद्विषयं व्रतं गृह्योक्तनियमसमू
हरूपं षट्त्रिंशदब्दं यावत् गुरुकुले चरितव्यं षट्त्रिंशदाब्दिकं षट्त्रिंशदब्दाः कालात्
...अपदस्मर्यादस्तत्तदादिति प्रतिवेदं द्वादश वर्षाणि व्रताचरणं तद
र्धिकं अष्टादश वर्षाणि तत्र प्रतिवेदं षट्वर्षाणि पादिकं नव वर्षाणि तत्र प्रतिवेदं त्री
णि यावता कालेनो तावद्धेक मध्यो वा वेदान्गृह्णाति तावत्कालं वा व्रतचरणं विषमशि
ष्टत्वेऽपि पक्षाणामेकादेयानि त्वीदेया इति वन्नियमफलभूतापेक्षो विकल्पः तथा च श्रु
तिः नियमेनाधीतं वीर्यवत्तरं भवतीति ग्रहणान्तिकमेवेति पक्षदर्शनात्पूर्वोक्तपक्ष

मे॰
४०

ब्रह्मचारिणो नैष्ठिकस्याप्यब्राह्मणादध्ययनं प्रसक्तं प्रतिषेधयति नाब्राह्मणे गुरौ शिष्य आ-
त्यन्तिकं वासं ब्रह्मचर्यं यावज्जीवं क्षत्रियादिगुरौ न वसेत् ब्राह्मणे च साङ्गवेदानध्येतरि उत्तमां
गतिं मोक्षलक्षणामिच्छन् शिष्यो नानुतिष्ठेत् ॥४२॥ यदि त्वात्यन्तिकं वासं यदि गुरोः कुले ।
नैष्ठिकब्रह्मचर्यार्थमात्यन्तिकवासमिच्छेत्तदा यावज्जीवमुद्युक्तो गुरुं शुश्रूषेत ॥४३॥ अस्य
फलमाह आसमाप्तेः शरीरस्य समाप्तिः शरीरस्य जीवनत्यागं यावत् यो गुरुं परिचरति स
तत्त्वतो ब्राह्मणः सद्रूपमविनाशि प्राप्नोति ब्रह्मणि लीयत इत्यर्थः ॥४४॥ न पूर्वं गुरवे किंचि इ उप-
कुर्वाणकस्यायं विधिः नैष्ठिकस्य स्नानासंभवात् गुरुदक्षिणाधर्मज्ञो ब्रह्मचारी स्नानात्पूर्वं किं-
चिद्वस्त्रादिधनं गुरवे नावश्यं दद्यात् यदि तु यदृच्छातो लभते तदा गुरवे दद्यादेव अत एव स्नाना-

नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत् । ब्राह्मणे चाननूचाने काङ्क्षन्गतिमनुत्तमाम् ॥४२॥
यदि त्वात्यन्तिकं वासं रोचयेत गुरोः कुले । युक्तः परिचरेदेनमाशरीरविमोक्षणात् ॥४३॥
आसमाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुम् । स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतम् ॥४४॥
न पूर्वं गुरवे किंचिदुपकुर्वीत धर्मवित् । स्नास्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेत् ॥४५॥
क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमन्ततः । धान्यं वासांसि शाकं वा गुरवे प्रीतिमाहरेत् ॥४६॥
आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते । गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥४७॥

त्पूर्वमपि गुरवे दानमाहापस्तम्बः यदस्मानि द्रव्याणि यथालाभमुपहरति दक्षिणा एव ताः स एष ब्रह्म-
चारिणो यज्ञो नित्यव्रत इति स्नानस्य तु पुनर्गुरुणाज्ञप्तो यथाशक्ति धनिनं याचित्वा विहितप्र-
तिग्रहादिना गुरवे धनमाहृत्यावश्यं दद्यात् ॥४५॥ किं तद्दाह । क्षेत्रं हिरण्यं गामश्वं गुरु-
वर्थमाहरेदित्यनुषङ्गात् क्षेत्रहिरण्यादिकं यथासामर्थ्यं विकल्पितं समुदितं वा गुरवे दद्यान्नातो-
तिमर्जयेत् विकल्पपक्षे चान्ततोऽन्यासंभवे छत्रोपानहमपि दद्यात् इह निर्देशात्समुचितं
दानप्रदर्शनार्थं च एतत्संभवे अन्यदपि दद्यात् अत एव हारीतः एकमप्यक्षरं यस्तु गुरुः शि-
ष्ये निवेदयेत् पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा त्वनृणी भवेत् अन्यासंभवे शाकमपि दद्यात् ॥४६॥
आचार्ये तु खलु प्रेते नैष्ठिकस्यायमुपदेशः आचार्ये तु मृते तत्पुत्रे विद्यागुणयुक्ते तदभावे

म॰स्मृ॰
टी॰
५२

गुरुणानुमतः स्नातः गुरुणा दत्तानुज्ञः स्वगृह्योक्तविधिना कृतस्नानसमावर्त्तनः समानवर्णां शुभ-
लक्षणां कन्यां विवहेत् ४ असपिण्डा च या मातुः मातुर्या न सपिण्डा भवति सप्तपुरुषपर्यन्तं सपिण्डतां
वक्ष्यति सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तत इति तेन मातामहादिवंशजा या न भवतीत्यर्थः च शब्दा-
न्मातृसगोत्रापि मातृवंशजन्मपरंपरानाम्नोः प्रत्यभिज्ञाने सति न विवाह्यात् तदितरा तु मातृसगो-
त्रापि विवाह्येति संगृहीतं तथा च व्यासः सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणि जन्मनाम्नोरविज्ञा-
ने उद्वहेदविशङ्कितः यत्तु मेधातिथिना वसिष्ठनाम्ना मातृसगोत्रानिषेधवचनं लिखितं परि-
णीय सगोत्रां तु समानप्रवरां तथा तस्याः कृत्वा समुत्सर्गं द्विजश्चान्द्रायणं चरेत् मातुलस्य सु-
तां चैव मातृगोत्रां तथैव च इति तदपि भ्रातृवंशजन्मनामपरिज्ञानविषयमेव असगोत्रा च या पितुः
पितृसगोत्रा न भवति चकारात् पितृसपिण्डादि पितृस्वस्रादिसन्ततिप्रभवा या न भवतीत्यर्थः सा द्वि-

गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्वितां ४
असपिण्डा च या मातुरसगोत्रा च या पितुः सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ५
महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः स्त्रीसंबन्धे दशैतानि कुलानि परिवर्जयेत् ६
हीनक्रियं निःपुरुषं निःछंदो रोमशार्शसं क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ७

जातीनां दारकर्मणि दारत्वसंपादके विवाहे प्रशस्ता मैथुनसाध्ये अग्न्याधानकर्मणि पुत्रोत्पादनादौ चे-
ति ५ महान्त्यपि समृद्धानि उत्कृष्टान्यपि गवादिभिः समृद्धान्यपि इमानि दश कुलानि विवा-
हे त्यजेत् ६ कानि तान्याह हीनक्रियं जातकर्मादिक्रियाविहीनं स्त्रीजनकं वेदाध्ययन-
शून्यं बहुदीर्घलोमान्वितं अर्शोनामव्याधियुक्तं राजयक्ष्ममंदानलापस्मारश्वित्रिकुष्ठयुक्तानां च कु-
लानि वर्जयेदिति पूर्वक्रियया संबन्धः दृष्टमूलता चास्य प्रतिषेधस्य मातृकुलादिवदपत्येष्वनुहरं ते तेनहि-
नक्रियादिकुलानामविरोधिताप्यसंततिरपि तादृशी स्यात् व्याधयः संचारिण इति वैद्यकाः एवं तर्हि
वैसंचारिरोगावर्जयितान्न वाहिकामिति अवेदमूलात्कथमेतत्प्रमाणमिति चेत् दृष्टार्थतया
वेदप्रामाण्यसंभवात् तदुक्तं भविष्यपुराणे सर्वाण्येतानि वेदमूलानि दृष्टार्थाः परिहृत्य कर्मीमांसाभा-
ष्यकारेणापि स्मृत्यधिकारे अभिहितं यत्र दृष्टार्थता तत्र एव प्रमाणं येन दृष्टार्थमपि वैदिक

५२

त्रयो ग्रहणं तद्दर्शं समाप्तिव्रतानुष्ठानमवगम्यते अथर्ववेदस्य ऋग्वेदांशत्वेपि ऋग्वेदं यजुर्वेदं सामवे
दं अथर्ववेदं चतुर्थमिति ब्राह्मणोपि निषिद्धं चतुर्वेदत्वेन कीर्तनात् अंगानि वेदाश्चत्वार इति विष्णुपु
राणात् दिवाकोश्च चतुःषष्टि हि एषां चतुर्थवेदत्वेपि त्रयो वेदा अभिचारार्थत्वेन यज्ञविद्यायामनुपयोगा
त्तानिर्देशः तथा हि ऋग्वेदेनैव होत्रं कुर्वन्ति यजुर्वेदेनाध्वर्यवं सामवेदेनोद्गात्रं यदेव त्रय्यै विद्यायै शु
क्लं तेन ब्रह्मत्वमिति श्रुतेः त्रयीरूपायां तु यज्ञानां ज्ञायते अयं च मानववेदैर्वैदिकव्रतचर्याविधिर्नो
पर्ववेदे व्रतचर्यानिषेधार्थो हि करत्वेन वाक्यभेदप्रसंगात् श्रुत्यंतरे वेदमात्रे व्रतश्रवणाच्च
यदाह योगियाज्ञवल्क्यः प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पंच वा १ वेदानधीत्य वेदौ वा वेद
शाखात्रयमिति वेदशाखात्रयपरः स्वशाखाध्ययनपूर्वकं वेदशाखात्रयं द्वयं एकां वा शाखां मंत्रब्राह्मण
क्रमेणाधीत्य गृहस्थाश्रमं गृहस्थविहितकर्मकलापरूपं अनुतिष्ठेत् तत्कृतदारपरिग्रहो गृहस्थः
गृहशब्दस्य दारवचनत्वात् अविप्लुतब्रह्मचर्य इति पूर्वविहितस्त्रीसंयोगमधुमांसभक्षणवर्जे

वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् । अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत् २
तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः । स्रग्विणं तल्प आसीनमर्हयेत्प्रथमं गवा ३

नरूपब्रह्मचर्यो नत्ववादोयं प्रकृष्टाध्ययनांगत्वख्यापनार्थः पुरुषशक्त्यपेक्षया अयमेकद्वित्रिशा
खाध्ययनविकल्पः यद्यपि व्रतानि वेदाध्ययनं च निमित्तवदुपदिष्टानां मध्ये नोभयस्नातक एव श्रे
ष्ठत्वादभिहितस्तथापि स्मृत्यंतरादन्यतरस्नातकोपि विवोढव्यः तदाह हारीतः त्रयः स्नात
का भवंति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकश्चेति यः समाप्य वेदमसमाप्य व्र
तानि समावर्तते स विद्यास्नातकः यः समाप्य व्रतान्यसमाप्य वेदं समावर्तते स व्रतस्नात
कः उभयं समाप्य यः समावर्तते स विद्याव्रतस्नातकः याज्ञवल्क्योप्याह वेदं व्रतानि वा पा
रं नीत्वा ह्युभयमेव चेति २ तं प्रतीतं स्वधर्मेण तं ब्रह्मचारिधर्मानुष्ठानेन ख्यातं दीपतर
निशयो ब्रह्म वेदः स एव दायः ब्रह्मदायः तं हरतीति ब्रह्मदायहरं पितुः पितृतो गृहीतवेदमित्यर्थः पि
तृतोध्ययनं मुख्यमतः पितुरभावे आचार्यादेरप्यधीतवेदं माल्यालंकृतं उत्कृष्टशयने उप
विष्टं गोसाधनमधुपर्केण पिता आचार्यो वा विवाहात्प्रथमं पूजयेत् ३

श्रवणाच्च तत्र तत्समभिव्याहृते मातृसपिण्डापरिणयनादौ च भार्यात्वमेव न भवति भार्यापदस्य वोढ
व्यादिवत् संस्कारवचनत्वात् येषां पुनर्हेमगुणदोषमूलके विधिनिषेधाभिधाने यथा हीनक्रियमिति
न तदतिक्रमे भार्यात्वाभावः अत एव मनुना महान्त्यपि समृद्धानीत्यादि पृथक्प्रकरणं कृतं एतन्मध्ये
पठितस्यापि लोमशादीनां स्त्रीत्यादिप्रतिषेधोऽपि न भार्यात्वाभावफलकः किंतु शास्त्रातिक्रमात् प्राय
श्चित्तमात्रं ११ सवर्णाग्रे द्विजातीनां ब्राह्मणक्षत्रियवैश्यानां प्रथमे विवाहे कर्त्तव्ये सवर्णा श्रेष्ठा ।
भवति कामतः पुनः विवाहप्रवृत्तानामेता वक्ष्यमाणा आनुलोम्येन श्रेष्ठा भवेयुः १२ शूद्रैव भा
र्या शूद्रस्य शूद्रस्य शूद्रैव भार्या भवति न तदुत्कृष्टा वैश्यादयः स्त्रियः वैश्यस्य शूद्रा च मन्वादिभिः
स्मृते क्षत्रियस्य वैश्या शूद्रा क्षत्रिया च ब्राह्मणस्य क्षत्रिया वैश्या शूद्रा ब्राह्मणी च वसिष्ठेनापि शू ।

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि । कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः १२
शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते । ते च स्वा चैव राज्ञः स्युस्ताश्च स्वा चाग्रजन्मनः १३
न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः । कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते १४
हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः । कुलान्येव नयन्त्याशु ससंतानानि शूद्रतां १५

42

द्वामध्ये के मंत्रवर्जमिति द्विजातीनां मंत्रवर्जितं शूद्राविवाहं कृत्वा १३ न ब्राह्मणक्षत्रिययोः ब्राह्म
णक्षत्रिययोः गार्हस्थ्यमिच्छतोः सवर्णासवर्णालाभे कस्मिंश्चिदपि वृत्तान्ते इतिहासाख्यानेऽपि शूद्रा
भार्या नाभिधीयते पूर्वं सवर्णानुक्रमेणानुलोम्येन विवाहानुज्ञानादयं निषेधः प्रतिलोम्येन वि
वाहविषयो बोद्धव्यः ब्राह्मणक्षत्रियग्रहणं चात्र दोषभूयस्त्वार्थं अनन्तरं द्विजातय इति बहुवच
नात् वैश्यगोचरनिषेधस्यापि वक्ष्यमाणत्वात् १४ हीनजातिस्त्रियं मोहात् सवर्णां न परिणीय
हीनजातिं शूद्रां धनस्त्रार्थविवेकात् परिणयन्तो ब्राह्मणक्षत्रियवैश्यास्त्रयो सन्तत्यादिक्रमेण कु
लान्येव ससंततिकानि शूद्रतां गमयन्ति अत्र द्विजातय इति बहुवचननिर्देशात् त्रिंदया वैश्यस्या
पि निषेधः कल्प्यते ब्राह्मणक्षत्रिययोस्तु पूर्वं चैव निषेधकल्पनात् त्रिंदमात्रार्थं तैव १५

क्त्वा अयं प्रतिषेधमभिधाय कन्यास्वरूपाश्रयं प्रतिषेधमाह नोद्वहेत्कपिलां कन्यां कपिलां केशादिषु
उक्तं त्वादिकां नित्यव्याधितां अविद्यमानलोमां प्रचुरलोमां वक्रं परुषभाषिणीं कपिलाङ्गीं कन्यां
नोपयच्छेत ८ नर्क्षवृक्षनदीनाम्नीं आर्द्रेन च चैत्रनामिकां आर्द्रा रेवती मादि नक्षत्र नदी प्रेष्य पर्व
तपक्षिसर्पदासभयानकनामिकां कन्यां नोद्वहेत् ९ अव्यङ्गाङ्गीं सौम्यनाम्नीं अव्यङ्गाङ्गीं अवि
कलाङ्गीं मधुरस्पष्टोच्चनाम्नीं हंसगजवद्विलासगमनां अनतिस्थूललोमकेशदशनां कोमलाङ्गीं कन्या
मुद्वहेत् १० अत्र विधिनिषेधयोरभिधानमनिषिद्धविहितकन्यापरिणयनमभ्युदयाय इति दर्
शितं यस्यास्तु न भवेद्भ्राता नास्तितां पुत्रिकाशङ्कया नोद्वहेद्यदप्यसौ भवेदस्याः तन्मम स्यादपत्य
कं यमित्यभिसंधानमात्रादपि पुत्रिका भवति अभिसंधिमात्रात्पुत्रिकेत्येक इति गौतमस्मरणात् ।
यस्या वा विशेषेण पिता न ज्ञायते अनेनेयमुत्पन्नेति तामपि नोद्वहेत् अत्र च पुत्रिकाधर्मशङ्कयेति

नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् । नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम् ।
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् । न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम् ९
नातिस्थूलां नातिकृशां नातिदीर्घां न वामनाम् । वयोऽधिकां नाङ्गहीनां वा नोद्वहेत्सहस्त्रियाम् अ
व्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् । तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियम् १० य
स्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता । नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया ११

न योजनीयमिति केचित् गोविन्दराजस्त्वाह भिन्नपितृकयोरप्येकमातृकयोर्भ्रातृत्वप्रसिद्धेः स
भ्रातृकत्वेऽपि यस्या विशेषेण पिता न ज्ञायते तामपि पुत्रिकाशङ्कयैव नोद्वहेदिति मेधातिथिस्तु
एकमेवेमं पक्षमाह यस्यास्तु भ्राता नास्ति तां पुत्रिकाशङ्कया नोपयच्छेत पिता चेन्न ज्ञायते प्रोषितो
मृतो वा वा शब्दश्चेदर्थे पितरि तु विद्यमाने तदीयवाक्यादेव पुत्रिकात्वाभावमवगम्य अभ्रातृका
पि वोढव्येति अस्माकं तु विकल्पस्वरसादिदं प्रतिभाति यस्या विशेषेण पिता न ज्ञायते तामपि ।
जारजत्वेनाधर्मशङ्कया नोद्वहेत् अत्र च पक्षे पुत्रिकाधर्मशङ्कयेति पुत्रिकाधर्मश्च तत्पौः श्रा
कालतया पुत्रिकाशङ्केति यथासंभवं योजनीयं अत्र च प्रकरणे सगोत्रादिपरिणयने सगोत्रां च
द्धमत्या प्रयच्छेन्मातृवदेनां बिभृयादिति परित्यागश्रवणान्न विवाहः असगोत्रेति ... स्मृतिः

वृषलीफेनपीतस्य वृषल्याः फेनोऽधररसः स पीतो येन स वृषलीफेनपीतः वाहितास्यादिक्षिप्तस्ये
न परिनिपातः अनेन शूद्राया अधररसपानं निषिध्यते निश्वासोपहतस्य चेति तया सहैकशयन
निषेधः तस्यां जातापत्यस्य शुद्धिर्नोपदिश्यत इति अतः तत्कालेगमननिषेधानुवादः १९ च
तुर्णामपि चैतेषां चतुर्णामपि वर्णानां ब्राह्मणादीनां परलोके इहलोके च कांश्चित् हितान्
कांश्चिदहितानिमानभिधास्यमानानष्टौ संक्षेपेण भार्याप्राप्तिहेतून्विवाहान् शृणुत तएव
तेनातो निर्दिश्यन्ते २० ब्राह्मो दैवः तथैवार्षः ब्रह्मादिसंज्ञा चेयं शास्त्रसंव्यवहारार्था स्तु
तिनिंदाप्रदर्शनार्था च ब्रह्मणइवायं ब्राह्मः रक्षस इवायं राक्षसः न तु ब्राह्मादिकदेवताक

वृषलीफेनपीतस्य निःश्वासोपहतस्य च तस्यां चैव प्रसूतस्य निःकृतिर्न विधीयते १९
चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत २०
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः २१
यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ तद्वः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् २२
षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान्

त्वं विवाहानां संभवति पैशाचस्याधमत्वाभिधानं निंदातिशयार्थं २१ यो यस्य धर्म्यो वर्णस्य
धर्मादनपेतो धर्म्यः यो विवाहो यस्य धर्म्यो यस्य विवाहस्य यौ गुणदोषौ इष्टानिष्टफलेन तद्विवाहो
त्पन्नापत्येषु ये गुणागुणास्तत्सर्वं युष्माकं प्रकर्षेण अभिधास्यामि वक्ष्यमाणानुकीर्तनमिदं
शिष्याणामवधानार्थं २२ षडानुपूर्व्या विप्रस्य ब्राह्मणस्य ब्राह्मादिक्रमेण षट् क्षत्रि
यस्यावरानुपरितनानासुरादींश्चतुरः विट्शूद्रयोस्तु तानेव राक्षसवर्जितानासुरगांधर्व
पैशाचान् धर्मादनपेतान् जानीयात् २३

शूद्रावेदी पतत्यत्रे शूद्रां विंदन्निति परिणयन्नीति शूद्रावेदी पततीति पतितइव भवति इदमत्रेर्मतं उतथ्य।
तनयस्य च गौतमस्य च आदिग्रहणमादरार्थं एतद्ब्राह्मणविषयं शूद्रायां सुतोत्पत्त्या पततीति शौन
कमतं एतत् क्षत्रियविषयं शूद्रासुतस्सुतोत्पत्त्या पततीति भृगोर्मतं एतद्वैश्यविषयं एतच्चमहर्षि
त्रयमतस्य व्यवस्थासंभवे विसदृशापत्तनविकल्पनायोगात् मेधातिथिगोविंदराजयोर्मतं शू
द्रावेदी पततीति पूर्वोक्ताशूद्राविवाहनिषेधप्रपंचः सुतोत्पत्त्या पततीति दैवात् ज्ञातशूद्राविवाहे
ऋतौ नोपेयादिति विधानार्थं ऋतुकालगमने सुतोत्पत्तेः तदपत्यतयेति तस्यामेव शूद्रोत्पन्ना
न्यपत्यानि यस्य स तदपत्यस्तस्य भावस्तदपत्यता तया पतति एतेनेदमुक्तं ऋतावुपेयन्निति।
यासु जातापत्यउपेयात् १६ शूद्रां शयनमारोप्य सवर्णामपरिणीय दैवात् शूद्रां परिणीय

शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः १६ शू
द्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिं जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते १७
दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु नाश्नंति पितृदेवास्तन्न च स्वर्गं स गच्छति १८

ब्राह्मणस्य गमननिषेधोयं निंदया निषेधश्रुतमनुमानात् शूद्रां गत्वा ब्राह्मणो नरकं गच्छति जन
यित्वा सुतं तस्यामिति तत्र ऋतुकालगमननिषेधपरं ब्राह्मण्यादेव हीयत इति दोषभूयस्त्वा
र्थं १७ दैवपित्र्यातिथेयानि यदि कथंचित् सवर्णाक्रमेणाक्रमेण वा शूद्रामपि परिणयते
तदा भार्यात्वेन प्रसक्तानि तत्कर्तृकानि दैवादीन्यनेन निषिध्यंते दैवं होमादि पित्र्यं श्राद्धादि
आतिथेयं अतिथिभोजनादि एतानि यस्य शूद्रासंपाद्यानि तद्दत्तं पितृदेवा नाश्नंति न च ते
नातिथ्येन स स्वर्गं याति यस्तु न कारयेन्मोहात्स जात्या स्थितया न्यूनेति स्ववर्णा यास
न्निहिता यां निषेधं वक्ष्यति अयं तु असन्निहितायामपीति मनुरुक्तिः १८

यज्ञे तु वितते सम्यक् ज्योतिष्टोमादियज्ञे आरब्धे यथाविधि ऋत्विजे कर्म कुर्वते अलंकृत्य कन्यादानं दैवं
विवाहं मन्वादयो ब्रुवते २८ एकं गोमिथुनं द्वे वा स्त्रीगवी पुंगवश्च गोमिथुनं तदेकं द्वे वा वराद् धर्मतो धर्मा-
र्थं यागादिसिद्धये कन्यायै वा दातुं न शुल्कबुद्ध्या गृहीत्वा यथाशास्त्रं कन्यादानं स आर्षो विवाहोऽभि-
धीयते २९ सहोभौ चरतां धर्मं सहोभौ वितिष्ठतां युवां धर्मं क्रियतामिति सुतादानकाले वचसाभि-
र्वं नियम्य अर्चयित्वा यत्कन्यादानं स प्राजापत्यो विवाहः स्मृतः ३० ज्ञातिभ्यो द्रविणं दत्त्वा ज्ञातिभ्यः
कन्यायाः ज्ञातिभ्यः पित्रादिभ्यः कन्यायै च यथाशक्ति धनं दत्त्वा कन्याया आप्रदानमादानं स्वीका-
रः स्वाच्छन्द्यात् स्वेच्छातः न त्वार्षवच्छास्त्रीयधनजातिपरिमाणनियमेन स आसुरो विवाह उच्य-

यज्ञे च वितते सम्यगृत्विजे कर्म कुर्वते अलंकृत्य सुतादानं दैवं धर्मं प्रचक्षते २८ एकं गो-
मिथुनं द्वे वा वरादादाय धर्मतः कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते २९ सहोभौ चर-
तां धर्ममिति वाचानुभाष्य च कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः ३० ज्ञातिभ्यो द्र-
विणं दत्त्वा कन्यायै चैव शक्तितः कन्याप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते ३१ इच्छयान्योन्य-
संयोगः कन्यायाश्च वरस्य च गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसंभवः ३२ हत्वा छित्त्वा च भि-
त्त्वा च क्रोशन्तीं रुदतीं गृहात् प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ३३

ते ३१ इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य चान्योन्यरागेण यः परस्परसंयोगः आलिंगनादिरूपः स गा-
न्धर्वो ज्ञातव्यः संभवत्यस्मादिति संभवः यस्मात् कन्यावरयोरभिलाषात् संभवः इति अत एव मै-
थुन्यो मैथुनाय हितः सर्वविवाहानामेव मैथुन्यत्वे पदस्य मैथुन्यत्वाभिधानं तत्समयपि मैथुनेन वि-
वृत्तो धः इति दर्शनार्थः ३२ हत्वा छित्त्वा च भित्त्वा च प्रसह्य बलात्कारेण कन्याया हरणं राक्षसो
विवाहः इत्येवं लक्षणं यदा कन्याहर्तुः शक्त्या पित्रादिभिरुपेक्षते तदभावं प्रकल्प्य हन-
नादिः यदि कन्यापक्षः प्रतिपन्नतां याति तदा हननादिकमपि कर्तव्यमिति मन्यस्य स प्रसह्य तेन क-
न्याप्रदाने विनाश्यतेषामङ्गच्छेदनं कृत्वा प्राकारादीन् भित्त्वा हा पितर्भ्रातरित्यनाथवद्रुदतीं इति रु-
दतीमश्रूणि मुञ्चन्तीं यः कन्यां गृहादपहरति अनेन कन्याया अनिच्छायामपि भोगो गान्धर्वाद्विवेकार्थः ३३

चतुरो ब्राह्मणस्याद्यान् ब्राह्मणस्य प्रथमं पठितान् ब्राह्मादीन् चतुरः क्षत्रियस्य राक्षसमेकमेव वैश्यशू-
द्रयोरासुरमेतान् श्रेष्ठान् ज्ञानिनो जानन्ति अत एव ब्राह्मणस्य दैवासुरादीनां पूर्वं विहितानामप्य-
लाभे उपादानं जघन्यत्वज्ञापनार्पितेन प्रशस्तविवाहासंभवे जघन्यस्यापि परिग्रह इति दर्शितं ए-
वमुत्तरत्र विगर्हितपरित्यागो बोद्धव्यः २३ पञ्चानां तु त्रयो धर्म्या इह पैशाचश्चेति षाउ-
परितनानां पञ्चानां प्राजापत्यादीनां ग्रहणं तेषु मध्ये प्राजापत्यगान्धर्वराक्षसास्त्रयो धर्मा-
दनपेताः तत्र प्राजापत्यः क्षत्रियादीनामप्राप्तो विधीयते ब्राह्मणस्यैव विहितत्वादनूद्य-
ते गान्धर्वस्य च चतुर्णामेव प्राप्तत्वादनुवादः राक्षसोऽपि वैश्यशूद्रयोर्विधीयते ब्राह्मण-
स्य क्षत्रियस्य च व्यवस्थितस्यापि आसुरपैशाचौ न कर्तव्यौ कदाचनेत्यविशेषात् चतुर्णामे-

चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः । राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः २३
पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह । पैशाचश्चासुरश्चैव न कर्तव्यौ कदाचन २४
पृथक्पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ । गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ ।
आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयं । आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः २६

वनिषिध्यते अत्र यथावर्णप्रतिनियमस्य विवाहस्य विधिनिषेधौ तस्मात् इति विकल्पः स च विहिता-
संभवे बोद्धव्यः २४ पृथक्पृथग्वा मिश्रौ वा पृथक्पृथगिति प्राप्तत्वादनूद्यते मिश्रावि ।
ति विधीयते पृथक्पृथक् मिश्रौ वा पूर्वविहितौ गान्धर्वराक्षसौ क्षत्रियस्य धर्म्यौ मन्वादिभिः
स्मृतौ यदा स्त्रीपुंसयोरन्योन्यानुरागपूर्वकसंवादेन परिणेता युद्धादिना विजित्य तामुद्वहे-
त्तदा गान्धर्वराक्षसौ मिश्रौ भवतः २५ आच्छाद्य चार्चयित्वा च आच्छादनमात्रस्यैवौ-
चित्यप्राप्तत्वात् सविशेषवाससा कन्यां वरं च यथालंकारादिना च पूजयित्वा विद्याचारवत
स्वयमेव वरमानीय तस्मै कन्यादानं ब्राह्मो विवाहो मन्वादिभिः स्मृतः २६

ब्राह्मादिषु विवाहेषु अस्मिन्नेव गुणागुणानिति यदुक्तं तदुच्यते ब्राह्मादिचतुर्षु विवाहेषु क्रमावस्थि
तेषु श्रुताध्ययनादिसंपत्तिकृततेजोयुक्ताः पुत्राः शिष्टप्रिया जायन्ते प्रियार्थे तात्वसंमत तथाह स्नेनेन च पू
जायामिति षष्ठीसमासप्रतिषेधः संबन्धसामान्यविवक्षायां षष्ठी समस्यते ३७ रूपसत्त्वगुणोपेता।
रूपं मनोहराकृतिः सत्त्वं ह्रादृष्णा आयवक्ष्यमाणो गुणा दयादयस्तैर्युक्ताः धनिनः ख्यातिमंतः यथे
प्सितवस्त्रस्रग्गन्धलेपनादिभोगशालिनः प्रजापत इति पूर्वमनुवर्तते शतं वर्षाणि जीवन्ति ३८।
इतरेष्ववशिष्टेषु ब्राह्मादिचतुष्टयः अन्येष्वासुरादिषु चतुर्षु क्रूरकर्माणो मृषावादिनो वेदविद्वेषि

ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसंमताः ३८
रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ३९
इतरेष्ववशिष्टेषु नृशंसानृतवादिनः जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ४०
अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान्विवर्जयेत्
पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि ४२
शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने ४३

णो यागादिधर्मद्वेषिणश्च पुत्रा जायन्ते ४० अनिन्दितैः स्त्रीविवाहैः संक्षेपेण फलकथनमिदं
अगर्हितैर्भार्याप्राप्तिहेतुविवाहैरगर्हिता संततिर्मनुष्याणां भवति गर्हितैस्तु गर्हिता तस्माद्गर्हित
विवाहान्न कुर्यात् ४२ पाणिग्रहणसंस्कारः समानजातीयासु पाणिग्रहणलक्षणसंस्कारो गृ।
ह्यादिशास्त्रेणाभिधीयते विजातीयासु पुनरसमानासु विवाहकर्मणि पाणिग्रहणस्थाने अयमन
न्तरश्लोके वक्ष्यमाणो विधिर्ज्ञेयः ४२ शरः क्षत्रियया ग्राह्यः क्षत्रियया पाणिग्रहणाव
स्थाने ब्राह्मणविवाहे ब्राह्मणहस्तपरिगृहीतशरैकदेशो ग्राह्यः वैश्यया ब्राह्मणक्षत्रियविवाहे
ब्राह्मणक्षत्रियविधृतप्रतोदैकदेशो ग्राह्यः शूद्रया पुनः द्विजातिसवर्णविवाहे प्रावृतवस्त्रदशा

सुप्तां मत्तां प्रमत्तां वा निद्राभिभूतां मद्यमदविह्वलां शीलसंरक्षणेन रहितां विजने देशे यो मैथुनधर्मे
प्रवर्तते स पापहेतुः विवाहानां मध्ये अधमः पैशाचः ख्यातः ३३ अद्भिरेव द्विजाग्र्याणां उदकदा
नपूर्वकमेव ब्राह्मणानां कन्यादानं प्रशस्तं क्षत्रियादीनां पुनरुदकं विनापि परस्परेच्छयैव वाङ्मात्रे
णापि कन्यादानं भवति उदकपूर्वकमपीत्यनियमः ३४ यो यस्यैषां विवाहानां यद्यपि गुणदो ।
षौ च यस्य यो विहितगुणाभिधानं प्रतिज्ञातमेव तथापि बहूनामप्येनाम नवकव्यक्ततया प्रतिपादि
तत्वाद्विशेषज्ञानार्थं पुनरुपन्यासः एषां विवाहानामिति निर्धारणे षष्ठी एषां मध्ये यस्य विवाह
स्य यो गुणो मनुना कथितः तत्सर्वं हे विप्राः मम कथयतः शृणुत ३५ दश पूर्वान् परान् वं
श्यान् दश पूर्वान् पित्रादीन् वंश्यान् परान् पुत्रादीन् आत्मानं च एकविंशं ब्राह्मविवाहोढापुत्रः यदि

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति स पापिष्ठो विवाहानां पैशाचः प्रथितोऽधमः ३३
अद्भिरेव द्विजाग्र्याणां कन्यादानं प्रशस्यते इतरेषां तु वर्णानामितरेतरकाम्यया ३४
यो यस्यैषां विवाहानां मनुना कीर्तितो गुणः सर्वं शृणुत तं विप्राः सम्यक्कीर्तयतो मम ३५
दश पूर्वान्परान्वंश्यानात्मानं चैकविंशकं ब्राह्मीपुत्रः सुकृतकृन्मोचयत्येनसः पितॄन् ३६
दैवोढजः सुतश्चैव सप्त सप्त परावरान् आर्षोढजः सुतस्त्रींस्त्रीन्षट्षट्कायोढजः सुतः ३७

सुकृतकृद्भवति तदा पापान्मोचयति पित्रादीन्नरकादुद्धरति पुत्रादयश्च तत्सुकुले निःपापा जा
यन्त इति विमोचनार्थः तेषामनुत्पत्तेः पापप्रध्वंसस्याशक्यत्वात् ३६ दैवोढजः सुतश्चैव
दैवोढायाः पुत्रः सप्त परान् सप्तावरान् पुत्रादीन् पित्रादींश्च आर्षविवाहोढायाः पुत्रास्त्रीन् पित्रादींस्त्रींश्च
पुत्रादीन् प्राजापत्यविवाहोढायाः पुत्रः षट् पित्रादीन् आत्मानं चैनसो मोचयतीति पूर्वश्लोकेनैव सर्व
त्रानुषङ्गः कायोढज इति कः प्रजापतिः संज्ञा दक्षो वंशकुलमिति हृस्वत्वं ब्रह्मा यद्यपि विवाहोद्देश
क्रमानुसारेण मन्दफलत्वादार्षस्य उद्वहे कृ फलप्राजापत्यात्पूर्वमभिधानं ब्राह्मादिविवाहो
द्देशश्लोक एवं कथमयं क्रम इति चेत् तच्चानामन्तरपाठः प्रयोजनाय प्राजापत्यग्रहणेऽपि अ
ल्पत्वात् आर्षस्येव ग्रहणं स्यात् ३७

म॰स्मृ॰
टी॰
५६

तासामाद्याश्चतस्रस्तु। तासां पुनः षोडशानां रात्रीणामृतुदर्शनात्प्रभृति आद्याश्चतस्रो रात्रयः एका
दशी त्रयोदशी च रात्रिर्गमने निंदिता अवशिष्टा दश रात्रयः प्रशस्ता भवेयुः ४७ युग्मासु पुत्रा जायंते
पूर्वोक्तासु दशस्वपि मध्ये युग्मासु षष्ठ्यष्टम्यादिषु पुत्रा उत्पद्यंते अयुग्मासु पंचमी सप्तम्यादिषु दुहित
रः अतः पुत्रार्थी युग्मासु ऋतुकाले भार्यां गच्छेत् ४८ पुमान्पुंसोऽधिके शुक्रे पुंसो बीजेऽधिकेऽयुग्मा
स्वपि पुत्रो जायते स्त्रीबीजेऽधिके युग्मास्वपि दुहितैव अतो वृष्याहारादिना निजबीजाधिक्यं भार्यायाश्चा
हारलाघवादिना बीजाल्पत्वमवगम्य युग्मास्वपि पुत्रार्थिना गंतव्यमिति दर्शितं स्त्रीपुंसयोस्तु बीज
साम्येऽपुमान्नपुंसकं जायते स्त्रीपुंसौ वा यमौ वा निःसारेऽल्पे वा उभयोरेव बीजे गर्भस्यासंभवः ४९
निंद्यास्वष्टासु चान्यासु। निंद्यासु पूर्वोक्तासु षट्सु रात्रिषु अन्यास्वपि वा निंद्यासु यासु कासुचिदष्टासु स्त्रि

46.

तासामाद्याश्चतस्रस्तु निंदितैकादशी च या। त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः ४७
युग्मासु पुत्रा जायंते स्त्रियोऽयुग्मासु रात्रिषु तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियं ४८
पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः समेऽपुमान्पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्ययः ४९
निंद्यास्वष्टासु चान्यासु स्त्रियो रात्रिषु वर्जयन् ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन् ५०

यो वर्जयेद्द्वे रात्री अवशिष्टे पर्ववर्जिते कन्यान्युत्पादितब्रह्मचर्य एव भवति यत्र तत्राश्रमे वसन्निति वा।
न प्रकृष्यापेक्षया तस्य हि भार्यया सह वानप्रस्थेऽपि गमनं प्रसक्तं न वानप्रस्थभार्यायां गमनं संभव
तीति वाच्यं वनं पंचाशतो व्रजेत वर्षे एकगुणं भार्यया सह इत्येतन्निर्गुणः पुमानिति या त्वपर्यालोच
नतया तत्संभवात् मेधातिथिस्तु यत्र तत्राश्रमे वसन्निति अनुवादमात्रं गृहस्थेतराश्रमे त्वयं जितें
द्रियत्वविधानात् तत्र रात्रिद्वयाभ्यनुज्ञाना संभवादित्याह। गोविंदराजस्तु उत्पन्नविनष्टपुत्रस्याश्रमां
तरस्थस्यापीह या पुत्रार्थे रात्रिद्वयगमने दोषाभावप्रतिपादनार्थं यत्र तत्राश्रमे वसन्निति
वचनात्तत्रास्य विशेषादिति प्रशस्तत्वात्तु पुत्रस्य महोपकारकत्वादित्याह तन्न गोविंदराजेन वि।
शेषमविविक्तता अयुक्तमंगीकृतं तस्मात् स्वदाररतिमतेः ५०

मू॰
५६

ऋतुकालाभिगामी स्यात् ऋतुर्नाम शोणितदर्शनोपलक्षितो गर्भाधानयोग्यः स्त्रीणामवस्था । विशेषः तत्कालाभिगामी स्यादित्ययं नियमो विधिः न तु परिसंख्या स्वार्थहानिपरार्थकल्पनाप्राप्तबाधरूपदोषत्रयदुष्टत्वात् ऋतुकालेपि परागतः पक्षे गमनप्राप्तौ यस्मिन्पक्षेऽप्राप्तिस्तत्र विधिः समे यजेतेतिवत् अत एव ऋतावगमने दोषश्रवणं तथा च पराशरः ऋतुस्नातां तु या भार्यां संनिधौ नोपगच्छति घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः अनुत्पन्नपुत्रस्यायं नियमः ब्राह्मणो ह वै जायमानः त्रिभिर्ऋणैः ऋणवान्जायते यज्ञेन देवेभ्यः प्रजया पितृभ्यः स्वा । ध्यायेन ऋषिभ्यः इत्येतन्मनुवत्श्रुतिमूलत्वे संभवति मूलांतरकल्पनायाः प्रमाणांतरस्यायुग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियमिति च वक्ष्यति अतोप्येतत् श्रुतिमूलत्वमवगम्यते पुत्रोत्पादनपर्यंतस्य चैकपुत्रोत्पादनेनैव चरितार्थत्वात्कामजानितरान्विदुरिति दर्शनात् जातपुत्रस्यैव नियमः दशास्यां पुत्रानाधेहीति मंत्रस्तु बहुपुत्रप्रशंसापरः जातपुत्रस्यापि ऋतुकालगम

ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा । पर्ववर्ज्यं व्रजेच्चैनां तद्व्रतो रतिकाम्यया ॥७९॥
ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः । चतसृभिरितरैः सार्धमहोभिः सद्विगर्हितैः ॥८०॥

न नियमे कथं दशास्येवावतिष्ठते स्वदारनिरतः सदेति नियमः स्वदारसंतुष्टः स्यात् नान्यभार्यामुपगच्छे । दिति विधानात्परिसंख्यैव वाक्यानर्थक्यात्स्वदारगमने प्राप्तत्वात् ऋतावनृतावगमने दोषश्रवणा च नियमविधिः पर्ववर्ज्यं व्रजेच्चैनामिति पर्वाण्यमावास्यादीनि वक्ष्यते तानि वर्जयित्वा भार्या । प्रीतिर्व्रतं यस्य स तद्व्रतोऽनृतावप्युपेयात् अत एव रतिकाम्यया न तु पुत्रोत्पादनया स्त्रबुद्ध्या तस्माद्विद्विवयमिदं ऋतावुपेयादेव अन्यभार्यां नोपगच्छेदनृतावपि भार्याप्रीतिये गच्छेत् इति अत एव गौतमः ऋतावुपेयादनृतावपि पर्ववर्ज्यं यावत्स्त्रीसिध्याह यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन् पर्ववर्ज्यमिति ऋतावनृतौ चोभयत्र संबध्यते ॥७९॥ ऋतुः स्वाभाविकः स्त्रीणां ऋतुराह षोडशाहोरात्रपरो शोणितदर्शनात्प्रभृति स्त्रीसंपर्कगमनादौ शिष्टनिंदितैश्चतुर्भिरन्यैरहोरात्रैः षोडशाहोरात्रा मासि स्त्रीणां ऋतुः स्वभावे भवः स्वाभाविकः व्याध्यादिना तन्न्यूनाधिककालोपि भवति ॥८०॥

आर्षे गोमिथुनं न शुल्कमित्युक्तं इदानीं कन्यार्थमपि धनस्य दानं न शुल्कमित्याह यासां नाददते शुल्कं
कन्यानां प्रीत्या वरेण दीयमानं धनं पित्रादयो न गृह्णन्ति किं तु कन्यायै एव समर्पयन्ति सो न विक्रयः यस्मा
त् कुमारीणां पूजनं तदानृशंस्यमहिंस्रकत्वं केवलं तदनुकम्पार्थं ५४ पितृभिर्भ्रातृभिश्चैव न केव
लं विवाहकाले वरेण दत्तं धनं समर्पणीयं किं तु तदुत्तरकालमपि पित्रादिभिरप्येता भोजनादि
ना पूज्या वस्त्रालंकारादिभिर्भूषयितव्याश्च बहुधनादिसंपदं प्राप्तुकामैः ५५ यत्र नार्यस्तु पूज्यन्ते
यत्र कुले पित्रादिभिः स्त्रियः पूज्यन्ते तत्र देवताः प्रसीदन्ति यत्र पुनरेता न पूज्यन्ते तत्र देवताप्रसादा
भावाद्यागादिक्रियाः निःफला भवन्ति इति निंदार्थवादोयं ५६ शोचन्ति जामयो यत्र यामिः स्व

यासां नाददते शुल्कं ज्ञातयो न स विक्रयः अर्हणं तत्कुमारीणामानृशंस्यं च केवलं ५४
पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ५५
यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ५६
शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलं न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा ५७
जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः तानि कृत्याहतानीव विनश्यन्ति समन्ततः ५८
तस्मादेताः सदाभ्यर्च्या भूषणाच्छादनाशनैः भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ५९

सृकुलस्त्रियो इत्याभिधानिकाः यस्मिन्कुले भगिनी गृहपतिसंबंधिनी यस सन्निहितसपिंडस्त्रि
यः स्वपत्नीदुहितृस्नुषाद्याः परिभवादिना दुःखिन्यो भवंति तत्कुलं शीघ्रं निर्धनी भवति दै
वराजादिना च यत्र पुनरेता न शोचंति तद्धनादिना नित्यं वृद्धिमेति मेधातिथिगोविंदराजौ कन्ये
वेनादुहितृस्नुषाद्या जामय इत्याहतुः ५७ जामयो यानि गेहानि यानि गृहाणि पत्नीस्नुषाद्या
अपूजिताः सत्यो नियायंति इदमनिष्टमेषामस्त्विति तानि अभिचारहतानि धनपश्वादिसहिता
नि नश्यंति ५८ यस्मादेवं तस्मादेताः सदाभ्यर्च्या तस्मात्कारणादेता भूषणाच्छादनाश
नैर्नित्यं सत्कारेषु कौमुद्यादिषु उत्सवेषु च उपनयनादिषु आभ्युदयिकेषु समृद्धिकामैर्नरैः
पूजनीयाः ५९

न कन्यायाः पिता विद्वान् कन्यायाः पिता धनग्रहणदोषज्ञः स्वल्पमपि धनं कन्यादाननिमित्तकं न गृ
ह्णीयात् यस्माल्लोभेन तद्गृह्णन्नपत्यविक्रयी भवति ॥ स्त्रीधनानि तु ये मोहात् कन्यादाननिमि
त्तकशुल्कग्रहणशुल्कग्रहणनिषेधप्रसंगात् एवमाध्यायाभिधे स्त्रीधनग्रहणनिषेधोऽयं ये बांध
वाः पतिपित्रादयः कलत्रदुहित्रादिधनं गृह्णन्ति यानान्यश्वादीनि वस्त्रं वेति प्रदर्शनार्थं सर्वमेव
धनं नयास्संगृह्णानाः पापकारिणो नरकं गच्छन्ति ॥ आर्षे गोमिथुनं शुल्कं आर्षे विवाहे
गोमिथुनं शुल्कं वराद्ग्राह्यमिति केचिदाचार्या वदन्ति तन्न यस्मादल्पमूल्यमहार्घ्यत्वाद
ल्पो वा भवतु बहुमूल्यमहार्घत्वान्महान्वा भवतु सर्वथा विक्रयो भवत्येव यत्तु नरक गोमिथुनमि
ति पूर्वमुक्तं तत्परमतमिति गोविन्दराजः तदयुक्तं मनुमतेलक्षणमार्षस्य तत्स्यादेव वराद्गोमि
थुनग्रहणपूर्वककन्यादानस्यैवार्षविवाहलक्षणत्वात् मन्वभिमतमन्यदेवार्षलक्षणं पर्के

> न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि । गृह्णन्हि शुल्कं लोभेन स्यान्नरोऽपत्यविक्रयी ॥
> स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः । नारीयानानि वस्त्रं वा ते पापा यान्त्यधोगतिम् ॥
> आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् । अल्पोप्येवं महान्वापि तावदेव स विक्रयः ॥

गोमिथुनमिति तत्परमतमिति चेत् एकं गोमिथुनं द्वे वेति तत्परमतं यदि तथा च मनुमतेनार्षल
क्षणं किं तदुच्यतां अष्टौ विवाहान् कथयन्नार्षोदाहरणं तेनैव कथयन् मनुः किं स्वमतेनार्ष
लक्षणं वक्तुमक्षमः मेधातिथिस्तु पूर्वापरविरोधोपन्यासनिरासमेवमकृतवान् तस्मादस्मा
भिरित्थं व्याख्यायते आर्षे विवाहे गोमिथुनं शुल्कमुक्तं च रूपमिति केचिदाचार्या वदन्ति मनो
स्तु मतं शास्त्रनियमितजातिसंख्याकं ग्रहणं न शुल्करूपं शुल्कत्वे मूल्याल्पत्वबहुत्वेऽनुप्र
योगिनो विक्रय एव तदा स्यात् किं त्वार्षविवाहसंपत्त्यै अवश्यकर्तव्ययागादिसिद्ध्यै कन्याप
वादातृणां स्त्रीयधर्मस्य धर्ममतं तु सतेश्च तत एवार्षलक्षणश्लोके वरादादाय धर्मतः इति धर्मतो
धर्मार्थमिति तस्यार्थः योगालोभेन तद्धनग्रहणं शुल्करूपमृषा स्त्रीयं इति च्छलमेवं गृह्णन्ति
शुल्कलाभेनेति निन्दामृतावान्नस्मात्तौ दीर्घपर्यालोचनादार्षधर्मार्थं गोमिथुनग्रहणं तु भोग्या

म. स्मृ.
टी.
५८

गृह्यांनीत्रियालोपादिकुलप्रासंगिककुलनिंदानुप्रसक्तयाकुलोत्कर्षमाह मंत्रतस्तुसमृद्धानि यद्यपि
धनेनकुलमितिलोकप्रसिद्धंतथाप्यल्पधनान्यपिकुलानिवेदाध्ययनतदर्थज्ञानानुष्ठानयुक्तानि
उत्कृष्टगुणगणनायांगण्यंतेमहतींचख्यातिमर्जयंति ६६ वैवाहिकेग्नौकुर्वीत विवाहप्रकरण
मतिक्रांतंइदानींवैवाहिकाग्नौसंपाद्यंमहायज्ञविधानंचेतिवक्तव्यतयाप्रतिज्ञातंमहायज्ञानुष्ठा
नमाह विवाहेभवोवैवाहिकः अग्न्याधानादित्वात्तद्वत्तस्मिन्नग्नौगृह्योक्तंकर्मसायंप्रातर्होमाष्टका
दियथाशास्त्रमग्निसंपाद्यंचपंचयज्ञांतर्गतवैश्वदेवाद्यनुष्ठानंनिःपाद्यंचपाकंगृहस्थःकुर्यात् ६७
पंचसूनागृहस्थस्य पश्वादिवधस्थानंसूनेवसूनाहिंसास्थानत्वगुणयोगाच्चुल्ल्यादयःपंचगृहस्थ
स्यजीवादिहिंसास्थानानिपेषणीदृषदमुपलास्मिकाउपस्करःगृहोपस्करणंकुंडसंमार्जन्यादिः

मंत्रतस्तुसमृद्धानिकुलान्यल्पधनान्यपि कुलसंख्यांचगच्छंतिकर्षंतिचमहद्यशः ६६ वै
वाहिकेग्नौकुर्वीतगार्ह्यंकर्मयथाविधि पंचयज्ञविधानंचपक्तिंचान्वाहिकींगृही ६७ पं
चसूनागृहस्थस्यचुल्लीपेषण्युपस्करः कंडनीचोदकुंभश्चबध्यतेयास्तुवाहयन् ६८
तासांक्रमेणसर्वासांनिःकृत्यर्थंमहर्षिभिः पंचक्लृप्तामहायज्ञाःप्रत्यहंगृहमेधिनां ६९
अध्यापनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणं होमोदैवोबलिर्भौतोनृयज्ञोऽतिथिपूजनं ७०

कंडनीउलूखलमुसलेउदकुंभोजलाधारःकलशःताःस्वकार्येप्रयोजयन्पापेनसंबध्यते ६८ ता
सांक्रमेणसर्वासां तासांचुल्ल्यादिसूनानांयथाक्रमंनिःकृत्यर्थंतदुत्पन्नपापप्रणाशनार्थंगृहस्थानां
पंचमहायज्ञाःप्रतिदिनंमन्वादिभिःअनुष्ठेयतयास्मृताःएवंचनिःकृत्यर्थमित्यभिधानाद्धिंसास्था
नत्वेनचकीर्त्तनात्सूनादोषैर्नलिप्यतइतिवक्ष्यमाणत्वात्सूनानांपापदहनत्वंपंचयज्ञानांच
तत्पापनाशकत्वमवगम्यतेप्रत्यहमित्यभिधानात्प्रतिदिनंचतत्पापक्षयस्यापेक्षितत्वात्संध्यावंदना
दिवन्नित्यत्वमपिप्रतीयते ६९ अध्यापनंब्रह्मयज्ञः अध्यापनशब्देनाध्ययनमपिगृह्यतेजपाहुत
इतिवक्ष्यमाणत्वात् अध्यापनमध्ययनंचब्रह्मयज्ञः अन्नाद्येनोदकेनवेतिपितृतर्पणंवक्ष्यतिसपितृ
यज्ञःअग्नौहोमोवक्ष्यमाणोदेवयज्ञःभूतबलिःभूतयज्ञःअध्यापनादिषुयज्ञशब्दःमहच्छब्द

अतिथिपूजनंमनुष्ययज्ञः २

३.
५८

48

संतुष्टो भार्यया भर्त्ता भार्यया भर्त्रेति च हेतौ तृतीया यत्र कुले भार्यया भर्त्ता प्रीतो भवति स्त्र्यंतराभिलाषं न करोति भार्या च स्वामिना प्रीता भवति तस्मिन् कुले चिरं श्रेयो भवति कुलग्रहणात् केवलं भार्यापती एव पुत्रादिसंततिरपि श्रेयोभागिनी भवति ६० यदि हि स्त्री न रोचेत दीप्यमाना न स्यात् यदि हि स्त्री न रोचेत दीप्यमाना न स्यात्) स्वाभरणादिना शोभाजनकेन दीप्तिमती न स्यात् तदा स्वामिनं पुनर्न प्रमोदयेत् एवं हि रवधारणाश्रयपुरुषोत्तेजनः स्वामिनः प्रजननं गर्भधारणं न संपद्यते ६२ स्त्रियां तु रोचमानायां स्त्रियां मंडनादिकांतिमत्यां भर्त्रे हेतविषयतया परपुरुषसंपर्कविरहात् तत्कुलमुज्ज्वलं भवति तस्यां पुनररोचमानायां भर्तृद्वेषितया नरांतरसंपर्कात् सकलमेव कुलं मलिनं भवति ।

संतुष्टो भार्यया भर्त्ता भर्त्रा भार्या तथैव च । यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवं ६० य

दि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् अप्रमोदात्पुनः पुंसः प्रजननं न प्रवर्त्तते ६१ स्त्रि ।

यां तु रोचमानायां सर्वं तद्रोचते कुलं तस्यां त्वरोचमानायां सर्वमेव न रोचते ६२ कु ।

विवाहैः क्रियालोपैः वेदानध्ययनेन च कुलान्यकुलतां यांति ब्राह्मणातिक्रमेण च ६३ ।

शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ६४ अ

याज्ययाजनैश्चैव नास्तिक्येन च कर्मणां कुलान्याशु विनश्यंति यानि हीनानि मंत्रतः ६५

६२ कुविवाहैः क्रियालोपैः आसुरादिविवाहैः येषां वर्णानां निषिद्धैः जातकर्मादिक्रियालोपैः वेदपठने ब्राह्मणापूजनेन प्रख्यातकुलान्यपकर्षं गच्छंति ६३ शिल्पेन व्यवहारेण चित्रकर्मादिशिल्पेन कलया धनप्रयोगात्मकव्यवहारेण केवलशूद्रापत्येन गवाश्वरथक्रयविक्रयादिना कृषिराजसेवाभ्यां च कुलानि विनश्यंति उत्तरेण संबंधः ६४ अयाज्ययाजनैश्चैव अयाज्यव्रात्यादियाजनैः कर्मणां श्रौतस्मार्तानां नास्तिक्येन यागहोमफलं वक्तमेव फलाभावबुद्धिः नास्ति वेदाध्ययनशून्यानि द्विप्रमपकर्षं गच्छंति अत्र विवाहप्रकरणे विवाहनिंदाप्रसंगेन क्रियालोपादयोपि निंदिताः निंदया चैतन्न कर्तव्यमिति प्रसंगप्रतिषेधः

गृहस्थः प्राणत्वात् सर्वाश्रमिणामाश्रयः एतदेवोपपादयति यस्मात्त्रयोऽप्याश्रमिणो यस्माद्गृहस्थ
व्यतिरिक्ताः त्रयोऽप्याश्रमिणो वेदार्थव्याख्यानान्नदानाभ्यां गृहस्थेनैवोपक्रियन्ते तस्माज्ज्येष्ठाश्र
मो गृहस्थः सततं पोलिज्ञेहि ७८ यत एवमतो आह स सन्धार्यः प्रयत्नेन स गृहस्थाश्रमः
स्वर्गमक्षयमिच्छता अनन्तमिच्छता इह लोके च सर्वसम्भोगलाभादि इच्छतादिभोजनेन स
तं सुखमिच्छता प्रयत्नेनानुष्ठेयः योऽपि गृहस्थाश्रमो दुर्बलेन्द्रियैर्धारयितुमशक्यः ७९ ऋषयः पितरो दे
वा एते गृहस्थेभ्यः सकाशात्प्रार्थयन्ते अतः शास्त्रज्ञेन तेभ्यः कार्यम् ८० किं तदाह स्वाध्याये
नार्चयेतर्षीन् नानाप्रकारत्वाद्देवेन स्वाध्यायादेरर्चनार्थत्वमुचितं महायज्ञान्तर्भूतैः स्वा

यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहं गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही ७८ स संधा
र्यः प्रयत्नेन स्वर्गमक्षयमिच्छता सुखं चेहेच्छता नित्यं योऽधार्यो दुर्बलेन्द्रियैः ७९ ऋषयः पितरो
देवा भूतान्यतिथयस्तथा आशासते कुटुम्बिभ्यस्तेभ्यः कार्यं विजानता ८० स्वाध्यायेनार्चयेतर्षी
न्होमैर्देवान्यथाविधि पितॄन्श्राद्धेन नॄनन्नैर्भूतानि बलिकर्मणा ८१ दद्यादहरहः श्राद्धम
न्नाद्येनोदकेन वा पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ८२ एकमप्याशयेद्विप्रं पित्रर्थं पाञ्च
यज्ञिके न चैवात्राशयेत्किंचिद्वैश्वदेवं प्रति द्विजं ८३ वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकं
आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहं ८४

ध्यायादिभिः ऋषिदेवपितृअतिथिभूतानि यथाशास्त्रं पूजयेत् ८१ तत्र पितृयज्ञं तावदाह दद्यात् प्रत्य
हं यथासंभवं श्राद्धं कुर्यात् श्राद्धशब्दोऽयं कर्मविधिवाक्यगतत्वेनौपचारिकं नाम पञ्चयज्ञान्तर्गतस्य
अन्नानामवक्ष्यमाणपार्वणश्राद्धधर्माणां देयार्थः अन्नाद्येनेति तिलव्रीहिभिर्यवैर्माषादिकं पानीयं पयः
क्षीरं ८२ एकमप्याशयेद्विप्रं पितृप्रयोजनके पञ्चयज्ञान्तर्गते एकमपि ब्राह्मणं भोजयेद्यथाशक्ति
संभवे बहूनपि पार्वणधर्मरहितं वैश्वदेवब्राह्मणभोजनं प्राप्तं आह न कंचिद्वैश्वदेवार्थं ब्राह्मणं
भोजयेत् ८३ वैश्वदेवस्य सिद्धस्य विश्वदेवार्थः वैश्वदेवः तस्य पक्वस्यान्नस्य गृह्येऽग्नौ वि
हितपर्युक्षणादीनि कर्माणि कृत्वा पूर्वकमाभ्यो वक्ष्यमाणदेवताभ्यः ब्राह्मणः प्रत्यहं होमं कुर्यात्
ब्राह्मणग्रहणं द्विजातिप्रदर्शनार्थं ... प्रकृतत्वात् ८४

पंचैतान्यो महायज्ञान् शक्तितः इत्थं विधानार्थोऽयमनुवादः अन्नकाले नापि यथासंभवमेते कर्तव्याः हाप
यतीति स्वार्थे णिजन्तत्वादणिच न जहातीत्यर्थः ७१ देवतातिथिभृत्यानां देवशब्देन भूतानामपि ग्रहणं
तेषामपि बलिग्रहणदेवतारूपत्वात् भृत्या वृद्धमातापित्रादयोऽवश्यं पोष्याः संवर्द्धनीयाः सर्वे नः एवात्मानं गोप
येदिति श्रुत्यात्मपोषणमप्यवश्यंकर्तव्यं देवतादीनां पंचानां योऽन्नं न ददाति स श्वसन्नपि जीवत्कार्याभा
वान्न जीवतीति निंद्यापावश्यं कर्तव्यता बोध्यते ७२ अहुतं च हुतं चैव नामभेदेपि वाक्यभेदस्त्विति द
र्शयितुं पंचमहायज्ञानां मन्वन्तरकृतान्यहुतादीनि संज्ञान्तराण्येतान्यभिधेयानि तानि स्वयं व्याचष्टे ७३
जपोऽहुतो हुतो होमः अहुतशब्देन ब्रह्मयज्ञाख्यो जप उच्यते हुतशब्देन देवयज्ञाख्यो होमः प्रहुतशब्दे

पंचैतान्यो महायज्ञान्न हापयति शक्तितः सगृहेपि वसन्नित्यं सूनादोषैर्न लिप्यते ७१ देवता
तिथिभृत्यानां पितॄणामात्मनश्च यः न निर्वपति पंचानामुच्छ्वसन्न स जीवति ७२ अहुतं चहु
तं चैव तथा प्रहुतमेव च ब्राह्म्यं हुतं प्राशितं च पंचयज्ञान्प्रचक्षते ७३ जपोऽहुतो हुतो होमः
प्रहुतो भौतिको बलिः ब्राह्म्यं हुतं द्विजाग्र्यार्चा प्राशितं पितृतर्पणं ७४ स्वाध्याये नित्ययुक्तः
स्याद्दैवे चैवेह कर्मणि दैवकर्मणि युक्तो हि बिभर्तीदं चराचरं ७५ अग्नौ प्रास्ताहुतिः सम्य
गादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ७६ यथा वायुं समाश्रित्य सर
्वे जीवन्ति जन्तवः तथा गृहस्थमाश्रित्य वर्तन्त इतराश्रमाः ७७

न भूतयज्ञाख्यो भूतबलिः ब्राह्म्यहुतशब्देन मनुष्ययज्ञाख्यः ब्राह्मणस्यार्चा प्राशितशब्देन पितृयज्ञाख्यं नित्य
श्राद्धं ७४ स्वाध्याये नित्ययुक्तः यदि दारिद्र्यादिदोषेणातिथिभोजनादिकं कर्तुं न शक्नोति तदा ब्रह्म
यज्ञे नित्ययुक्तो भवेद्दैवे कर्मणि अग्नौ होमे होमस्य स्तुतिमाह यतो दैवकर्मपर इदं स्थावरजंगमं धार
यति ७५ कृतमेतदित्याह अग्नौ प्रास्ताहुतिः सम्यक् यजमानेनाग्नावाहुतिः सम्यक् प्रक्षिप्ता रसाहरण
कारित्वादादित्यस्यादित्यं प्राप्नोति सादित्यादित्याह वृष्टिरूपेण जायते ततोऽन्नं तदुपभोगेन जायन्ते प्र
जाः ७६ यथा यथा प्राणाख्यवाय्वाश्रयणं सर्वे प्राणिनो जीवन्ति तथा गृहस्थाश्रयणं सर्वाश्रमि

उच्छीर्षके श्रियै कुर्यात्। वास्तुपुरुषस्य शिरःप्रदेशे उत्तरपूर्वस्यां दिशि श्रियै बलिं दद्यात् तस्यैव पादप्रदेशे दक्षिणपश्चिमायां दिशि भद्रकाल्यै अन्ये तु उच्छीर्षकं गृहस्य शयनस्य शिरःस्थानं भूभागं पादत इति तस्यैव चरणभूप्रदेशमाहुः। ब्रह्मणे वास्तोष्पतये इति गृहमध्ये द्वंद्वनिर्देशोपि ब्रह्मवास्तोष्पतिभ्यामेकप्रयोगेव देवतात्वं यत्र द्वंद्वे मिलितस्य देवतात्वमपेक्षितं तत्र सहादिशत्वं करोति यथा सहद्यावापृथिवीभ्यां स्वाहेति ८९ विश्वेभ्यश्चैव देवेभ्यो विश्वेभ्यश्चैव देवेभ्य इति यथाश्रुतदेवकेयमाकृतिर्विश्वेभ्यो देवेभ्यो नम इति गृहाकाशे बलिं दद्यात् दिवाचरेभ्यो भूतेभ्य इति दिवा नक्तंचरेभ्य इति नक्तं च गृहस्य दर्शनादियं व्यवस्था ९० पृष्ठवास्तुनि कुर्वीत गृहस्योपरि यद्गृहं तत्पृष्ठवास्तु बलिदातुः पृष्ठदेशभूभागो वा तत्र सर्वात्मभूतये नम इति बलिं दद्यात् उक्तबलिदानावशिष्टं सर्वमन्नं दक्षिणस्यां दिशि दक्षिणामुखः स्वधा पितृभ्य इति बलिं दद्यात् प्राचीनावी

उच्छीर्षके श्रियै कुर्याद्भद्रकाल्यै च पादतः। ब्रह्मवास्तोष्पतिभ्यां तु वास्तुमध्ये बलिं हरेत् ८९।
विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत्। दिवाचरेभ्यो भूतेभ्यो नक्तंचारिभ्य एव च ९०
पृष्ठवास्तुनि कुर्वीत बलिं सर्वात्मभूतये। पितृभ्यो बलिशेषं तु सर्वं दक्षिणतो हरेत् ९१ शु
नां च पतितानां च श्वपचां पापरोगिणाम्। वायसानां कृमीणां च शनकैर्निर्वपेद्भुवि ९२
एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति। स गच्छति परं स्थानं तेजोमूर्तिः पथर्जुना ९३।
कृत्वैतद्बलिकर्मैवमतिथिं पूर्वमाशयेत्। भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ९४

तिना चायं बलिर्देयः स्वधा पितृभ्य इति प्राचीनावीती शेषं दक्षिणाभिमुखो निनयेदिति बह्वृचगृह्यवचना
त् ९१ शुनां च पतितानां च अल्पमन्नं पात्रे समुद्धृत्य श्वपतितादिभ्यः शनकैः यथा रजसा न संसृज्यते तथा
भुवि दद्यात् पापरोगी कुष्ठी क्षयरोगी वा ९२ एवं यः सर्वभूतानि एवमुक्तप्रकारेण यः सर्वभूतान्य
न्नदानादिना नित्यं पूजयति स परं स्थानं ब्रह्मात्मकं तेजोमूर्तिः स्वप्रकाशरूपवत्त्वेन अर्चिरादिमार्गे
ण प्राप्नोति ब्रह्मणि लीयत इत्यर्थः ज्ञानकर्मभ्यां मोक्षप्राप्तेः तेजोमूर्तिः सविग्रहो यथोक्तं ब्रह्मसायुज्य
भावो भूत्वा इति व्याख्या ९३ कृत्वैतद्बलिकर्मैव एतद्बलिकर्म कृत्वा गृहस्थोन्येभ्यः पूर्वमतिथिं भो
जयेत् भिक्षवे परिव्राजकाय ब्रह्मचारिणे विधिवत्स्वस्तिवाच्य भिक्षादानमप्पूर्वमिति गौतमाद्युक्त
विधिना भिक्षां दद्यात् ग्रासप्रमाणं च भिक्षा भवति ग्रासमात्रा भवेद्भिक्षेति शातातपवचनात् भवे

अग्नेः सोमस्य चैवादौ वचनद्वयं स्वाहाकारप्रदानान्ता होममन्त्रा इति कात्यायनस्मरणाद्द्वावग्नये स्वाहा सोमा-
य स्वाहेति निरूपेत्तद्देवताकं होमद्वयं कृत्वा अग्नीषोमाभ्यां स्वाहेति समस्तदेवताकं होमं कुर्यात् ततो वि-
श्वेभ्यो देवेभ्यो धन्वन्तरये ८५ कुह्वै चैवानुमत्यैव कुह्वै प्रजापतये द्यावापृथिवीभ्यामग्नये
स्विष्टकृत इत्येवं स्वाहाकारप्रदानान्ता होमान्कुर्यात् सुमन्तरेणाग्निविशेषणत्वेन स्विष्टकृतो विधा-
नात् केवलस्विष्टकृदित्युपपि अग्निविशेषणत्वेन प्रयोगः प्राग्देवात्तेसिद्धे स्विष्टिकृतेऽग्नये ततस्तु
निरभिधानं स्मृत्यन्तरीयहोमस्वरूपेऽपि ग्रन्थत्वज्ञापनार्थं ८६ एवं सम्यग्घविर्हुत्वा एवमन्त्र-
प्रकारेण सम्यक् इति देवताध्यानपर एव होमान्कृत्वा सर्वासु प्राच्यादिषु दिक्षु प्रदक्षिणमिन्द्रादि-

अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः विश्वेषां चैव देवानां धन्वंतरय एव च ८५
कुह्वै चैवानुमत्यै च प्रजापतय एव च सह द्यावापृथिव्योश्च तथा स्विष्टकृतेन्ततः ८६ एवं।
सम्यग्घविर्हुत्वा सर्वदिक्षु प्रदक्षिणं इंद्रांतकाप्पतींदुभ्यः सानुगेभ्यो बलिं हरेत् ८७
मरुद्भ्य इति तु द्वारि हरेदप्स्वद्भ्य इत्यपि वनस्पतिभ्य इत्येवं मुषलोलूखले हरेत् ८८

भ्यः पुरुषेभ्यो बलिं हरेत् यथा प्राच्यामिन्द्राय नमः इंद्रपुरुषेभ्यो नम इति दक्षिणस्यां यमाय नमः य-
मपुरुषेभ्यो नमः पश्चिमायां वरुणाय नमः वरुणपुरुषेभ्यो नमः उत्तरस्यां सोमाय नमः सोमपुरु-
षेभ्यः नमः यद्यपि शब्दावगम्यत्वाद्देवताभावस्यान्तकाप्पतीन्दुशब्दैर्देवोद्देशो युक्तः तथापि ब-
हुस्मृत्यनुष्ठानदर्शनाद्गृह्ये च यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यः सोमाय सोमपुरु-
षेभ्यः इति प्रतिदिशमिति पाठाद्यथोक्त एव प्रयोगः ८७ मरुद्भ्य इति तु द्वारि हरेदिति करणस्याद्ध-
स्वरूपविवक्षार्थं मरुद्भ्यो नम इति द्वारे च बलिं दद्यात् जलेऽद्भ्य इति मुसलोलूखले इति हुहुनिर्दे-
शात् संयुक्तयोरन्यतरत्र वनस्पतिभ्य इति बलिं दद्यात् करणमन्त्रपरिग्रहेण प्रधानबलिकर्मार्थत्वेऽस्या

८

अथातिथ्युक्तत्वादतिथेर्लक्षणमाह एकरात्रं तु निवसन् एकरात्रमेव परगृहे निवसन् ब्राह्मणोऽतिथिर्भवति अ
नित्यावस्थानान्न विद्यते द्वितीया तिथिरस्येति अतिथिरुच्यते ३ नैकग्रामीणमतिथिं एकग्रामनिवासि
नं लोके विचित्रकथादिभिः संगमात्सांगतिकं भार्याग्नियुक्ते गृहे वैश्वदेवकाले उपस्थितमपि नाति
थिं विद्यात् एतेन भार्याग्निरहितस्य प्रवासिनो नातिथिरिति बोधितं ३ उपासते ये गृहस्थाः
अतिथिप्रकरणोक्तदातिथ्यलोभेन ये गृहस्था ग्रामान्तराणि गत्वा परान्नमेव सेवन्ते ते निषिद्धप
रान्नदोषानभिज्ञास्तेन परान्नभोजनेन जन्मान्तरेऽन्नदायिनां पशुतां यान्ति तस्मादिदं न कु
र्यादिति निषेधः कल्प्यते ४ अप्रणोद्योऽतिथिः सायं सूर्येऽस्तमिते गृहस्थेनातिथिर्न प्र

एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते
नैकग्रामीणमतिथिं विप्रं सांगतिकं तथा उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोऽपि वा ३
उपासते ये गृहस्थाः परपाकमबुद्धयः तेन ते प्रेत्य पशुतां व्रजन्त्यन्नाद्यदायिनां ४ अ
प्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना काले प्राप्तस्त्वकाले वा नास्यानश्नन्गृहे वसेत्
न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् धन्यं यशस्यमायुष्यं स्वर्ग्यं वातिथिभोजनं ६

णोद्यः सूर्येणोढः प्रापितः रात्रौ स्वगृहगमनाशक्तो द्वितीयवैश्वदेवकाले प्राप्तोऽप्यका
ले वा सायंभोजने निवृत्तेऽपि नास्य गृहेऽनश्नन्वसेदवश्यमस्मै भोजनं देयं प्रत्याख्याने प्राय
श्चित्तगौरवार्थोऽयमारम्भः अत एव विष्णुपुराणे दिवातिथौ विमुखे गते यत्पातकं नृप तदे
वाष्टगुणं पुंसां सूर्योढे विमुखे गते गोविंदराजस्तु अतिथिधातिथिप्रतिप्रसवार्थमस्या
ह न वै स्वयं तदश्नीयात् यत्तदद्याद्भक्तं अतिथिर्न भुक्ता च यत्तत्स्मै दत्वा स्वयं न भोक्तव्यं
नायं हितं धनमिति निमित्तं वा धन्यं एवं यशस्यमायुष्यं स्वर्ग्यं वातिथिभोजनफलकथनमि
दं न चान्यावश्यकतोपत्तिः सर्वं सकृत्तमादनुमादि

51

यत्पुण्यफलमाप्नोति गुरवे गां दत्वा विधिवत्स्वर्णशृंगित्वादिविधानेन यत्पुण्यफलं प्राप्नोति तत् गृहस्थो भिक्षादानात्प्राप्नोति ९५ भिक्षामप्युदपात्रं प्रचुरान्नाभावे ग्रासप्रमाणां भिक्षामपि व्यंजनादिना। सत्कृत्य तदभावे जलपूर्णपात्रमपि फलपुष्पादिना सत्कृत्य तत्त्वतो वेदतत्त्वज्ञाय ब्राह्मणाय स्वस्तिवाच्यमादिविधिपूर्वकं दद्यात् ९६ नश्यन्ति हव्यकव्यानि मोहाद्यमात्रानभिज्ञतया देवपित्र्योद्देशे दानानि दत्तानि वेदाध्ययनतदर्थज्ञानानुष्ठानतेजःशून्यतया भस्मरूपेषु ब्राह्मणपात्रेषु दत्तानि दातृभिः निष्फलानि भवन्ति ९७ विद्यातपःसमृद्धेषु विद्यातपस्तेजःसंपन्नब्राह्मणानां मुखानि होमाधिकरणत्वेनाग्निभावगतानि तेषु हव्यकव्यादि हुतं निम्नमिह लोके दुस्तराद्व्याधिराजपीडादिभयान्महतश्च पापादमुत्र नरकफलात्त्रायते ९८ संप्राप्तायातिथये स्वयमागतायातिथये आसनं पाद

यत्पुण्यफलमाप्नोति गां दत्वा विधिवद्गुरोः। तत्पुण्यफलमाप्नोति भिक्षां दत्वा द्विजो गृही ९५
भिक्षामप्युदपात्रं वा सत्कृत्य विधिपूर्वकं। वेदतत्त्वार्थविदुषे ब्राह्मणायोपपादयेत् ९६
नश्यन्ति हव्यकव्यानि नराणामविजानतां। भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः ९७
विद्यातपःसमृद्धेषु हुतं विप्रमुखाग्निषु। निस्तारयति दुर्गाच्च महतश्चैव किल्बिषात् ९८
संप्राप्ताय त्वतिथये प्रदद्यादासनोदके। अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकं ९९
शिलानप्युञ्छतो नित्यं पंचाग्नीनपि जुह्वतः। सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन् १००
तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता। एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन १०१

प्रक्षालनाय जलं च यथासंभवं व्यंजनादिभिः सत्कृत्य चान्नं प्राशनाय यथाविभवादिवत्सम्मान विधिपूर्वकं दद्यात् ९९ शिलानप्युञ्छतो नित्यं लूनकेदारशेषधान्यानि शिलाः तानप्युञ्छतो वृत्तिसंपादनार्थं त्रेताग्नयः सभ्यश्चेति पंचाग्नयः सभ्यो नामाग्निः शीतापनोदनार्थं यस्त्वाधीयते पंचस्वप्यग्निषु होमं कुर्वाणस्य सर्वं सुकृतं पंचाग्निहोमार्जितं पुण्यमनर्चितोऽतिथिर्गृह्णाति अन्नपानादिदानं पूजनमतिथ्यर्चनस्य नित्यतावगम्यते १०० तृणानि भूमिरुदकं प्रज्ञासंभवे पुनः तृणविश्रामभूमिपादप्रक्षालनाद्यर्थं जलं प्रियवचनान्यपि धार्मिकगृहे सुष्ठुतिथ्यर्थं न कदाचिदुच्छिद्यन्ते अवश्यं देयानीति विधीयते तृणग्रहणं शाकनीपोपलक्षणार्थं १०१

इत उक्तभोजनकालेत्वतिथ्यादिभ्योतिरिक्तान्सखिसहाध्यायिप्रभृतीन्संप्रीत्या गृहमागतान्न
नातिथिभावेन तत्सम्प्रतिबोध्य यथाशक्ति प्रकृष्टमन्नं दत्त्वा भार्याभोजनकाले भोजयेद्गृहस्थः सा
यं स एव भोजनकालः अवशिष्टं तु दम्पती इति वक्ष्यमाणत्वादात्मना सहेति वक्तव्ये वचनवैचि
त्र्यमाचार्यस्य गतोक्तभोजनकालानभिधानं प्रभुत्वेन स्वाधीनकालत्वात् १३ सुवा स
वासिन्यो नवोढाः स्त्रियः स्नुषादुहितरश्च ताः कुमारान् रोगिणः गर्भिणीश्च अतिथिभ्यो
ऽग्रे भोजयेत्तथातिथिविप्रभोजितेषु भोजनमेषामिति विचारमकुर्वन्मेधातिथिस्त्वग्रतो
वैतानिति पठित्वा नागतानेवैतान्भोजयेदतिथिसमकालमिति व्याख्यातवानन्येन यद्इति।
पठतीति उक्तवान् १४ अदत्त्वेतेभ्योऽतिथिप्रभृतिभृत्यपर्यन्तेभ्यो अन्नमदत्त्वा व्यतिक्रमाद्भो

इतरानपि सख्यादीन्संप्रीत्या गृहमागतान् सत्कृत्यान्नं यथाशक्ति भोजयेत्सह भार्यया
सुवासिनीः कुमारांश्च रोगिणो गर्भिणीस्तथा अतिथिभ्योऽग्र एवैतान्भोजयेदविचारयन्
अदत्त्वा तु य एतेभ्यः पूर्वं भुङ्क्ते विचक्षणः स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः
भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि भुञ्जीयातां ततः पश्चाद्गृहस्थः शेषभुग्भवेत्
अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् यज्ञशिष्टाशनं ह्येतत्सतामन्नं विधीयते

जनदोषमजानन्यः पूर्वं भुङ्क्ते स मरणानन्तरं श्वगृध्रैरात्मनो भक्षणं न जानाति व्यतिक्रमभो
जनस्यैतन्निषेधवचनं वेदव्यथेनोक्तवान् १५ भुक्त विप्रेष्वतिथिषु स्वेषु ज्ञातिषु भृत्येषु
दासादिषु कृतभोजनेषु ततोऽन्नादवशिष्टं भार्यापती पश्चादश्नीयाताम् १६ अघं स केवलं भु
ङ्क्ते यस्त्वात्मार्थमेवान्नं पक्त्वा भुङ्क्ते देवातिथिभ्यो न ददाति स पापहेतुत्वात्पापमेव केवलं
भुङ्क्ते नान्नं तथा च श्रुतिः केवलाघो भवति केवलादी पापी भवति केवलाशी यस्माद्देवं
पाकयज्ञावशिष्टमन्नं प्रधानमन्नं मंसत इति तदेव साधूनामन्नमुपदिश्यते १७

आसनावसथौ आसनं पीठं आवसथो विश्रामस्थानं शय्या खट्वादि अनुव्रज्या पृष्ठतः अनुगमनं
उपासनं परिचर्या तत्सर्वं कुर्यात् अतिथिषु युगपदुपस्थितेषु उत्तरोत्तरापेक्षया उत्कृष्टापकृष्ट
मध्यमेषु उत्कृष्टापकृष्टमध्यमं कुर्यात् समेषु पुनः सर्वेषां समं ७ वैश्वदेवे तु निर्वृत्ते अन्यथादेति
देशादतिथिभोजनपर्यन्ते वैश्वदेवे कृते यद्यपरोऽतिथिरागच्छति तदा तदर्थं पुनः पाकं कृत्वा
तस्मा अन्नं दद्यात् बलिहरणं तु ततोऽन्नात् न कुर्यात् इति निषेधात् अन्नसंस्कारताभावो वैश्वदेवस्याव
गम्यते अन्नसंस्काररूपत्वे कथमसंस्कृतान्नभोजनमनुजानीयात् ८ न भोजनार्थं स्वे विप्रः
भोजनलाभार्थं ब्राह्मणः स्वे कुलगोत्रे न कथयेत् यस्माद्भोजनार्थं ते कथयन् वान्ताशी पण्डितैः कथ्य

आसनावसथौ शय्यामनुव्रज्यामुपासनं उत्तमेषूत्तमं कुर्याद्धीने हीनं समे समं ७ वैश्वदे
वे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् तस्याप्यन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत् ८ न भो
जनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत् भोजनार्थं हि ते शंसन् वान्ताशीत्युच्यते बुधैः ९
ब्राह्मणस्य त्वनतिथिर्गृहे राजन्य उच्यते वैश्यशूद्रौ सखा चैव ज्ञातयो गुरुरेव च १० ।
यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् भुक्तवत्सु च विप्रेषु कामं तमपि भोजयेत् ११
वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ भोजयेत्सह भृत्यैस्तावानृशंस्यं प्रयोजयेत्

ते ९ ब्राह्मणस्य त्वनतिथिः ब्राह्मणस्य क्षत्रियादयोऽतिथयो न भवन्ति क्षत्रियादीनां ब्राह्मणाद
पि उत्कृष्टजातित्वात् मित्रज्ञातीनामात्मसमत्वात् गुरोश्च प्रभुत्वात् अनेनैव न्यायेन क्षत्रियस्य उ
त्कृष्टो ब्राह्मणः सजातीयश्च क्षत्रियो अतिथिः स्यात् अपकृष्टौ वैश्यशूद्रौ एवं वैश्यस्यापि द्विजात
योऽतिथयः न शूद्रः १० यदि यदि ग्रामान्तरादागतोऽतिथिकालोपस्थितत्वाद् यद्यतिथिधर्मेण
क्षत्रियो विप्रगृहमागच्छेत् तदा विप्रगृहमुपस्थितविप्रेषु भुक्तवत्सु भोजनेच्छुश्चेत् तमपि भोजयेत्
१२ वैश्य यदि वैश्यशूद्रावपि ब्राह्मणस्य कुटुम्बे गृहे प्राप्तौ ग्रामान्तरागतत्वादतिथिधर्मशालिनौ
तावपि क्षत्रियभोजनकालात् परतो दयातिभोजनात्पूर्वं वा सभोजनकाले अनुकम्पामाश्रयन् भोज

म.स्मृ.
टी.
प३

कुर्यादित्यमानिर्वचनेनउक्तमेवपितृयज्ञानंतरंपेहदयति पितृणांमासिकंश्राद्धं कुर्दमासिकंप्र
तिमासभवंश्राद्धंयस्मात्पितृयज्ञपिंडानामनुपश्चाद्दाह्रियतेतेनपिंडान्वाहार्यकमितिपिंडितानु
ज्ञानंतिततस्त्रयुक्तंपितृयज्ञानंतरंयेमत्पलं त्रामिषेणवस्यमाणमांसेनप्रशस्तेनपूतिगंधादि
रहितेनप्रयत्नतःकर्तव्यंपिंडानांमासिकंश्राद्धमितिवापाठःपिंडानांपितृयज्ञपिंडानांशेषत्व
त्वं २३ तत्रयेभोजनीयाःस्युः तस्मिन्श्राद्धेयेभोजनीयायेचवर्ज्यायावंतोयैःकाम्यैश्चान्नैस्तत्सर्वं
प्रवक्ष्यामि २४ द्वौदैवेपितृकार्येत्री अत्रयद्यप्युद्देशक्रमेणयेभोजनीयाइतिवक्तव्यं तथा
प्यल्पवक्तव्यत्वाद्ब्राह्मणसंख्यामाह दैवश्राद्धेद्वौब्राह्मणौपितृपितामहप्रपितामहानांत्रीन्ब्रा
ह्मणान्अथवादैवएकंपित्रादित्रयस्यचैकंब्राह्मणंभोजयेदुक्तातिरिक्तभोजनसमर्थोपि
नाधिकभोजनेषुप्रवर्तेत मेधातिथिस्त्वाहपितृकार्येत्रीनितिपितुःत्रीन्ब्राह्मणान्पितामह

53

पितृणांमासिकंश्राद्धमन्वाहार्यंविदुर्बुधाः तच्चामिषेणकर्तव्यंप्रशस्तेनप्रयत्नतः २३
तत्रयेभोजनीयास्युःयेचवर्ज्याद्विजोत्तमाः यावंतश्चैवयैश्चान्नैस्तान्प्रवक्ष्याम्यशेषतः २४
द्वौदैवेपितृकार्येत्रीनेकैकमुभयत्रवा भोजयेत्सुसमृद्धोपिनप्रसज्येतविस्तरे २५

णत्रीन्प्रपितामहस्यापित्रीन्भोजयेद्दैवेकमुभयत्रवेतिदैवएकंपित्रादित्रयस्यचैकैकमेकै
केनतेपित्रादित्रयस्यैवएकेनतेवएकंसर्वेषांपिंडैक्याद्वात्वमितिश्राद्धकल्पनगृह्यविरोधा
द्यथाएकःपिंडःपित्रादित्रयस्यनिरूपितेतथाएकब्राह्मणेनभोजयितव्यइत्यर्थः तथा
त्रपित्रादित्रयस्यैवैकब्राह्मणभोजनंतदस्तगृह्यकारेणोक्तंनतैवैकंसर्वेषांपिंडैक्यात्वा
त्वमितिप्रतिज्ञाकामनायेनउक्तमभिहितं अस्यार्थः वह्वृचपित्रादिदेवताकश्राद्धानामांगस्यापि
त्रीकरणमग्नामिमतंतद्भावनिरिक्तश्राद्धकाममेकःपित्रादीनांब्राह्मणइत्यर्थः अथवाय्य
नायंग्रहणीयद्वयाभावेएकोपिभोजयितव्यः उभयत्रापिवाक्येनमात्रार्णोपित्रादित्र
यस्यएकब्राह्मणभोजनंगृह्यकृतेवोक्तंवसिष्ठोपिप्रथमकंभोजयेत् श्राद्धेदैवंतत्रकथंम
वेदन्नंपात्रेसमुद्धृत्यसर्वस्यप्रकृतस्यतुदेवतायतनेकृत्वायथाविधिप्रवर्तयेत् प्रास्येद
ग्नौतदन्नंतुदद्याद्वाब्रह्मचारिणेइतिसर्वथाप्येकब्राह्मणभोजनमाह तस्माद्यथोक्तेवैवा

उ.
५३

अतिथिपूजाप्रसंगेन राजादीनामपि गृहागतानां पूजाविशेषमाह राजा राजाभिषिक्तः क्षत्रियो रा।
जा ऋत्विक् येन यस्यार्त्विज्यं कृतं स्नातको विद्याव्रताभ्यां प्रियो जामाता राजादीनेतान् गृहागतान् पु
नः स्वगृह्योक्तेन मधुपर्काख्येन कर्मणा पूजयेत् परिसंवत्सरादिति संवत्सरं वर्जयित्वा तानूर्ध्वं
गृहागतानेतान्पुनर्मधुपर्केण पूजयेत् पंचमी अपाङ्परिभिरिति वर्जनार्थपरियोगे पंचमी
अयमेवैतत्सूत्रव्याख्यानेन यादिदमेनो नञ्पेन साहचर्यात्परेर्वर्जनार्थस्य ग्रहणं मेधातिथि
स्तु परिसंवत्सराणि पर्यवितानि परिगतानीति क्रान्तः संवत्सरो येषां तान्पूजयेदिति व्याख्यातवांस्तु भ
यत्रापि पाठे संवत्सरमध्यागमेन मधुपर्कार्हता ११९ राजस्नातकयोः पूजासंकोचार्थमाह
राजा च श्रोत्रियश्चैव राजस्नातकौ संवत्सरादूर्ध्वमपि यज्ञकर्मण्येव प्राप्तौ मधुपर्कार्हौ संवत्स
रमध्ये तु सर्वेषां यज्ञविवाहयोरेव मधुपर्कः तदाह गौतमः ऋत्विगाचार्यश्वशुरपितृव्यमातुला

राजर्त्विक्स्नातकगुरुप्रियश्वशुरमातुलान् । अर्हयेन्मधुपर्केण परिसंवत्सरात्पुनः ११९
राजा च श्रोत्रियश्चैव यज्ञकर्मण्युपस्थितौ । मधुपर्केण संपूज्यौ न त्वयज्ञ इति स्थितिः १२०
सायं त्वन्नस्य सिद्धस्य पत्न्यमंत्रं बलिं हरेत् । वैश्वदेवं हि नामैतत्सायं प्रातर्विधीयते १२१
पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् । पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकं

दीनामुपस्थाने मधुपर्कः संवत्सरे पुनः यज्ञविवाहयोरर्वाक् राज्ञः श्रोत्रियस्य च १२० सायंतु
अन्नस्य सिद्धस्य दिनान्ते सिद्धस्यान्नस्य पत्नी अमंत्रं बलिहरणं कुर्यात् इन्द्राय नम इति मंत्रपाठवर्ज
मानस्तु देवतोद्देशेन न निषिध्यते यतो यदेतद्वैश्वदेवं नामान्नसाध्यं होमबलिदानातिथिभोज
नात्मकं तत्सायंप्रातर्गृहस्थस्योपदिश्यते १२१ पितृयज्ञं तु निर्वर्त्य श्राद्धकल्पं वक्ष्यमाणमिम
न्त्रकमग्निकार्यं प्रतिज्ञातं श्राद्धकल्पमपकृष्य मते साग्निरमावास्यायां पिण्डपितृयज्ञाख्यं कर्म कृ
त्वा श्राद्धं कुर्यात् पितृयज्ञपिण्डानामनुपश्चात्क्रियत इति पिण्डान्वाहार्यकं मासानुमासिकं मास
श्चानुमासश्च तयोर्भवं प्रतिमासं कार्यमनेनास्य नित्यत्वमुक्तं विप्रग्रहणं द्विजातिपरं त्रया।
णां प्रकृतत्वात् १२२

एकैकमपि विद्वांसं दैवे पित्र्ये चेत्येकैकमपि वेदतत्त्वविदं ब्राह्मणं भोजयेत्तदापि विशिष्टं श्राद्धफलं प्राप्नोति
न तत्त्वविदो बहूनपि । एवं च फलश्रवणाद् ब्राह्मणभोजनमेव प्रधानं पिण्डदानादिकं त्वङ्गमिति गोविन्दरा
जः । वयं तु पितृनुद्दिश्य द्रव्यत्यागो ब्राह्मणस्वीकारपर्यन्तं श्राद्धशब्दवाच्यं प्रधानं ब्रूमः । तदेवमनुनापि
उक्तमाहार्यकं श्राद्धं कुर्यादिति इति आपस्तम्बेन मन्त्रपर्यन्तेऽवयवव्याख्यातत्वान्नदाहृत्य आपस्तम्बः । अथैतन्म
नुः श्राद्धशब्दं कर्म प्रोवाच प्रजानिःश्रेयसार्थं तत्र पितरो देवता ब्राह्मणास्त्वाहवनीयार्थे मासि मासि
कार्यं अपरपक्षस्यापराह्णः श्रेयानिति श्राद्धं श्राद्धमिति याज्ञवल्क्यो वा चकोयमस्तत्र पात्रं ब्राह्मणस्याहव
नीयार्थे आहवनीयवचनमतद्वय प्रतिष्ठापनत्वात् पितरो देवता इति निषत्तपितृदेवताकत्वाच्च श्राद्धसदेवता
आद्यादौ श्राद्धशब्दः । तत्रैव पात्रप्रयोगो गुणः कोऽपि पायनामवनेहोमेरत्याग्निहोत्रवच्छब्दः । पुष्कलं फलं प्र
भूतोतिलपुष्टतरफलार्थिनो गुणफलविधिः सभोजनस्यांगत्वेपि तदाश्रयोन विरुद्धः आपस्तंब

54

एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत् । पुष्कलं फलमाप्नोति नामन्त्रज्ञान्बहूनपि ॥ १२९ ॥
दूरादेव परीक्षेत ब्राह्मणं वेदपारगम् । तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः ॥ १३० ॥ सह
स्रं हि सहस्राणामनृचां यत्र भुञ्जते । एकस्तान्मन्त्रवित्प्रीतः सर्वानर्हति धर्मतः ॥ १३१ ॥ ज्ञानो
त्कृष्टाय देयानि कव्यानि च हवींषि च । न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः ॥ १३२ ॥

स्वप्रधानं श्राद्धकर्मैतन्मित्रदैवतं मन्त्रपर्यंकपर्यन्तस्मान्नेदं ब्राह्मणभोजनं ॥ १२९ ॥ दूरादेव परीक्षे
त दूरादेव पितृपितामहाद्यभिजनशुद्धिरूपेण कृत्स्नशाखाध्यायिनं ब्राह्मणं परीक्षेत यस्मात्तथा
विधो ब्राह्मणो हव्यादीनां तीर्थं पात्रं दाने सोऽतिथिरिव महाफलसाधनत्वात् ॥ १३० ॥ सहस्रं हि स
हस्रं यत्र श्राद्धे ब्राह्मणानाममवेदविदां दशलक्षाणि भुञ्जते तत्रैको वेदविद्भोजनेन तान्सर्वानर्ह
ति स्वीकर्तुं योग्यो भवति तद्भोजनजन्यं फलं जनयतीत्यर्थः ॥ १३१ ॥ ज्ञानोत्कृष्टाय देयानि विद्यो
त्कृष्टेभ्यो हव्यानि कव्यानि देयानि न मूर्खेभ्यो यतस्तत्पात्रतोनामालंकारः । नहि रक्ताक्तौ ह
स्तौ रक्तेनैव विशुद्धौ भवतः किंतु विमलजलेन एवं मूर्खभोजनेन जनितदोषस्तावदहितो
न भोजितोपहन्ति किं तु विद्वानिति अविद्वान्निंदया विद्वज्ज्ञानमेवोक्तं वक्तोपमास्तीति ॥ १३२ ॥

सत्क्रियां देशकालौ च सत्क्रियां ब्राह्मणस्य पूजां देशं दक्षिणाप्रवणादि विहितमाणं कालं अपरा
ह्णं शौचं श्राद्धकर्तुः ब्राह्मणसंपदं गुणवद्ब्राह्मणलाभः ब्राह्मणविस्तरो नाशयति तस्मान्न ब्रा
ह्मणविस्तारं कुर्यात् सत्क्रियादिविरोधितो ब्राह्मणविस्तारनिषेधात् सत्क्रियादिसंभवे पित्रादेरे
कैकस्यापि ब्राह्मणत्रयाभ्यनुज्ञातं अत एव गौतमः नवावरान्भोजयेदयुजो वा यथोत्साहं वृ
चृ सकारं प्रपातः पार्वणश्राद्धे काम्ये आभ्युदयिके एकोद्दिष्टे ब्राह्मणानियुपक्रमं एके कर्म
कस्मद्वौ द्वौ त्रीन्त्रीन्वा हृद्वौ फलभूयस्त्वं इत्याह द्वौ द्वाविति आभ्युदयिकविषयं तस्मात्तरे तथा
विधानादत्राप्याभ्युदयिक इति उपक्रमाच्च २६ प्रथिता प्रेतकृत्यैषा यदेतत्पित्र्यं कर्म अ

सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदः पंचैतान्विस्तरो हंति तस्मान्नेहेत विस्तरं २६
प्रथिता प्रेतकृत्यैषा पित्र्यं नाम विधुक्षये तस्मिन्युक्तस्यैति ‥ प्रेतकृत्यैव लौकिकी २७
श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः अर्हत्तमाय विप्राय तस्मै दत्तं महाफलं २८

ह्यपमित्यं प्रख्याता प्रेतकृत्या पित्रुपकारार्था क्रिया प्रकर्षेण उपनतः प्रेतः पितृलोकस्य एवो
च्यते विधुक्षये अमावास्यायां तस्मिन्नियोक्तर्मणि युक्तस्य नित्यं लौकिकी स्मार्ता प्रेतकृत्या
पित्रुपकारार्था क्रिया गुणवत्त्वं पुत्रपौत्रधनादि प्रवृद्धिरूपेण कर्तारमुपतिष्ठते तस्मादिदं
कर्त्तव्यं गोविंदराजेन तु विधुक्षयपदं पतितं व्याख्यातं च पोयंपित्र्यो नाम विधिः पित्र्यं कर्म
तिलयैः च दत्ते गृहे वा तदसांप्रतिकं मेधातिथिप्रभृतिभिर्गोविंदराजादपि वृद्धतरैस्तु अ
पेमात्तत्पद इति संबंधस्त्वेमा च २७ श्रोत्रियायैव देयानि छंदो मात्राध्यायी श्रोत्रियस्तस्मै
दैवपित्र्यान्नादीनि यत्नेन देयानि अर्हत्तमाय श्रुताचाराभिजनादिभिः पूज्यतमाय तस्मै दत्तं

म·स्मृ·
टी·
५५

यस्य मित्रप्रधानानि मित्रश्राद्धोपभावप्रधानः यस्य मैत्रीप्रधानानि कव्यहव्यानि तस्य पारलौकिकं
फलं न भवतीति फलाभावकथनपरमिदं प्रेत्येति परलोक इत्यर्थे श्राद्धान्तरमध्ययनत्वकान्तं तेनास
मानकर्तृत्वेकर्णत्वात् इति नाशंकनीयं ३९ यः संगतानि कुरुते स्वर्गफलत्वं श्राद्धस्य दर्शयितुं
पूर्वोक्तफलाभावमेव विशेषेण प्रकल्पयति यो मनुष्यः संगतानि मित्रभावं श्राद्धेनाभिगतया
श्राद्धेन कुरुते श्राद्धमेव मित्रलाभहेतुत्वात् मित्रं यस्य स श्राद्धमित्रो द्विजापसदः स्वर्गलोकाच्च्यव
ते तत्र प्राप्नोतीत्यर्थः श्राद्धस्यापि स्वर्गफलमाह याज्ञवल्क्यः आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं
सुखानि च प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहाः ४० संभोजनी साभिहिता सा दक्षिणा।
दानक्रिया संभोजनी सहभुज्यते यया सा संभोजनी गोष्ठीवत्प्रकृतभोजनात्मिका पिशाचधर्मं

यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविःषु च ३९
यः संगतानि कुरुते मोहाच्छ्राद्धेन मानवः स स्वर्गाच्च्यवते लोकाच्छ्राद्धमित्रो द्विजाधमः ४०
संभोजनी साभिहिता पैशाची दक्षिणा द्विजैः इहैवास्ते तु सा लोके गौरंधेवैकवेश्मनि ४१
यथेरिणे बीजमुप्त्वा न वप्ता लभते फलं तथानृचे हविर्दत्त्वा न दाता लभते फलं ४२ दा
तॄन्प्रतिगृहीतॄंश्च कुरुते फलभागिनः विदुषे दक्षिणां दत्त्वा विधिवत्प्रेत्य चेह च ४३

त्वात्पैशाची मन्वादिभिः कथिता सा च मैत्रीप्रयोजकत्वान्न परलोकफला इहलोक एवास्ते यथांधा गौ
रेकस्मिन्नेव गृहे तिष्ठति न गृहांतरगमनाय क्षमा ४१ यथेरिणे बीजमुप्त्वा इरिणमूषरदेशो य
त्र बीजमुप्तं न प्ररोहति तत्र यथा बीजमुप्त्वा कर्षकः फलं न प्राप्नोति एवमविदुषे श्राद्धदानात् न
फलं प्राप्नोति ४२ दातॄन्प्रतिगृहीतॄंश्च वेदतत्त्वविदे यथाशास्त्रं दत्त्वा ऐहिकामुष्मिकफलभा
गिनो दातॄन्करोति ऐहिकं फलं यथाशास्त्रानुष्ठानेन लोके ख्यातिरूपमामुष्मिकमिति मेधाति
थिः गोविंदराजो व्याख्याता पुत्रादिकमैहिकं ब्रूमः आयुः प्रजामित्यादिफलत्वेनापि श्राद्धस्य याज्ञव
ल्क्यादिभिः कथितत्वात् प्रतिगृहीतॄंश्च श्राद्धलब्धधनानुष्ठितयागादिफलेन परलोके सफलान्कु
रुते ४३

उ·
५५

यावतो ग्रसतो ग्रासान् यत्संख्याकान् ग्रासान् हव्यकव्येष्ववेदविद्भुंक्ते तत्संख्याकानेव प्रस्तुतः श्राद्धदा
तो ज्वलितान् शूलर्ष्टि आख्यायुधलोहपिंडान् ग्रसते श्राद्धकर्त्तेरेवेदमविद्वद्दानफलकथनं तथा व्यासः
ग्रसते यावतः पिंडान् यस्य वै हविषोन्नृचः ग्रसते तावतः शूलान् गत्वा वैवस्वतं स्वयं ३३ ज्ञाननिष्ठा
द्विजाः केचित् केचिदात्मज्ञानपराः ब्राह्मणा भवन्ति अन्ये प्राजापत्यादितपः प्रधानाः अपरे तपोऽध्य
यननिरताः इतरे यागादिपराः ततः किमत आह ३४ ज्ञाननिष्ठेषु कव्यानि ज्ञानप्रधानेभ्यः पि
त्र्याणि यत्नाद्दातव्यानि दैवानि पुनः न्यायावगतानि यथाशास्त्रानुसारेण चतुर्भ्योऽपि ३५ अश्रो
त्रियः पिता यस्य योऽश्रोत्रियपितृकः स्वयं श्रोत्रियो यः तथा कः श्रेष्ठ इति प्रश्नस्य विशेषमाह ३६

यावतो ग्रसते ग्रासान् हव्यकव्येष्वमंत्रवित् तावतो ग्रसते प्रेत्य दीप्तान्शूलर्ष्ट्ययोगुडान् ३३
ज्ञाननिष्ठा द्विजाः केचित्तपोनिष्ठास्तथापरे तपःस्वाध्यायनिष्ठाश्च कर्मनिष्ठास्तथैव च ३४ ज्ञाने
निष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः हव्यानि च यथान्यायं सर्वेष्वेव चतुर्ष्वपि ३५ अश्रोत्रियः
पिता यस्य पुत्रः स्याद्वेदपारगः अश्रोत्रियो वा पुत्रः स्यात्पिता स्याद्वेदपारगः ३६ ज्यायांसमन
योर्विद्याद्यस्य स्याच्छ्रोत्रियः पिता मंत्रसंपूजनार्थं तु सत्कारमितरोऽर्हति ३७ न श्राद्धे भो
जयेन्मित्रं धनैः कार्योऽस्य संग्रहः नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजयेद्द्विज ३८

ज्यायांसमनयोर्विद्यात् अनयोः पूर्वश्लोकनिर्दिष्टयोर्मध्ये श्रोत्रियपुत्रमश्रोत्रियमपि श्रेष्ठं जानी
यात् इतरं विद्यादरं परमिदं यः पुनरश्रोत्रियस्य पुत्रः स्वयं च श्रोत्रियः स तदधीतवेदपूजार्थं पूजा
मर्हति वेद एव तद्द्वारेण पूज्यत इति पुत्रं विद्यादरं परमिदं तस्माद्वचनभंग्या श्रोत्रियपुत्रः स्वयं च
श्रोत्रियः श्राद्धे भोजयितव्य इत्युक्तं भवति न तु श्रोत्रियपुत्रस्य स्वयमश्रोत्रियस्यैवाभ्यनुज्ञानं श्रो
त्रियस्यैव देयानीति विरोधादेवं च हरादेव परीक्षेतेति विद्याव्यतिरिक्ता वाचादि परीक्षार्थत्वेना
वतिष्ठते ३७ न श्राद्धे भोजयेन्मित्रं श्राद्धे मित्रं न भोजयेत् धनैरितरैरस्य मैत्री संपादनीया न
शत्रुं न वामित्रं यं जानीयात्तं ब्राह्मणं श्राद्धे भोजयेत् ३८

म. स्मृ.
टी.
प५६

नब्राह्मणंपरीक्षेत धर्मज्ञोदैवश्राद्धेभोजनार्थंनब्राह्मणंप्रयत्नतःपरीक्षेतलोकप्रसिद्धिमात्रेण
सोसाधुतयाभोजनीयः पित्र्येपुनःकर्मणिउपस्थितेपितृपितामहाद्यभिजनपरीक्षाकर्तव्यादु
तिपरीक्षाब्राह्मणस्वार्थः ४९ येस्तेनापतिताःक्लीबा स्तेनःचोरः सचसुवर्णचौरादन्यःतस्यपृथ
गभिधानेनब्रह्महणस्मतितोमहापातकीक्लीबोनपुंसकः नास्तिकवृत्तिर्नास्तिपरलोकइत्येवंदृ
ष्टिर्वर्तनंयेषांएतान्दैवपित्र्यकर्मणोरुभयोरयोग्यान्मनुरब्रवीदितिमनुग्रहणंप्रतिषेधादरा
र्थंसर्वेकर्मणामेवमनुनोक्तत्वात् ५० जटिलंचानधीयानं जटिलोब्रह्मचारीमुंडोवाजटिलो
वाप्यादित्यनेनब्रह्मचार्युपलक्षणंतातुजटिलस्यमुंडोपिनिषिध्यतेनधीतवेदाध्ययनरहितम
स्योपनयमात्रकृतेनवेदादेशाः तेनाकृतवेदस्यापिब्रह्मचारिणोवेदाध्ययनकर्त्तुःश्रम्भतु

नब्राह्मणंपरीक्षेतदैवेकर्मणिधर्मवित् पित्र्येकर्मणितुप्राप्तेपरीक्षेतप्रयत्नतः ४९
येस्तेनाःपतिताःक्लीबायेचनास्तिकवृत्तयः तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्
जटिलंचानधीयानंदुर्बलंकितवंतथा याजयंतिचयेपूगांस्तांश्चश्राद्धेनभोजयेत् ५१
चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा विपणेनचजीवंतोवर्ज्याःस्युर्हव्यकव्ययोः

56

त्वानाचार्यंनिषेधः अतःश्रोत्रियायैवदेयानीतिब्रह्मचारीतरविषयंदुर्बलंकुष्ठरोगेणमेधाति
थिस्तुदुर्बलमितिपठित्वाबलरहितोहीनवाक्याचारचेमर्षविषयमुक्तवान्कितवोद्यूतकृत्पूगयाजकः
वक्रयाजकाः पूगःसंघः अमुकहृदयोविमाभिधानकाः अनत्वब्रसिष्टः यच्चापिवक्रुमाज्यःसाय्यश्री
पनयनेवहूनुतानश्राद्धेनभोजयेदितिनदैवेनिषेधः यत्रोभयप्रतिषेधोमनोरभिमतस्तत्रहव्यकव्य
ग्रहणंउभयत्रेतिवाग्रहणंकरोति ५१ चिकित्सकान्देवलकान् चिकित्सकोभिषक् देवलः प्र
तिमापरिचारकः वर्तनार्थेनएतत्कुर्वतोरयंनिषेधः नतुधर्मार्थंदेवकोषोपजीवीचनाम्नादेव
लकोभवेदितिदेवलवचनात्मांसविक्रयिणःसकृदपिमयःपततिमांसेनेतिलिप्यात् विपणि
नवाणिज्यकृषिमयाजीवंतोहव्यकव्ययोरिमाभिधानादेवपित्र्येचएतेताज्याः ५२

ॐ.
प५६

कामं श्राद्धेऽर्चयेन्मित्रं वरं विद्वद्ब्राह्मणमभिगुणवन्मित्रं भोजयेत् न तु विद्वांसमपि शत्रुं यतः शत्रुणा ।
श्राद्धं भुक्तं परलोके निःफलं भवति यथोक्तपात्रसंभवे मित्रप्रतिप्रसवार्थमिदं ४४ यत्नेन भोजये
च्छ्राद्धे श्रोत्रियार्थे वेदमात्रीमनेन च्छन्दोमात्राध्यायिश्रोत्रीयस्य प्रयोगात् तदाश्रयणमावश्यक
मन्त्रं रुद्राणीत अधिकफलार्थं मन्त्रब्राह्मणात्मककृत्स्नशाखाध्यायिनि श्रोत्रिये दानमाह ऋग्वेदमं
त्रब्राह्मणात्मकशाखाध्यायिनं यत्नाद्भोजयेत् तथाविधमेव यजुर्वेदिनं वेदस्य पारं गच्छतीति वेद
पारगः शाखान्तं गच्छतीति शाखान्तगः समाप्तिरस्यास्तीति समाप्तिकः सर्वे वेदशाखे मन्त्रब्राह्म ।
णात्मककृत्स्नशाखाध्येता अभिहितः तद्भोजने अधिकफलमाह ४५ एषामन्यतमो यस्य

कामं श्राद्धेऽर्चयेन्मित्रं नाभिरूपमपि त्वरिं द्विषता हि हविर्भुक्तं भवति प्रेत्य निःफलं ४४ य
त्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगं शाखान्तगमथाध्वर्युं छन्दोगं वा समाप्तिगं ४५ ए
षामन्यतमो यस्य भुञ्जीत श्राद्धमर्चितः पितॄणां तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी ४६
एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः ४७
मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुं दौहित्रं विट्पतिं बंधुमृत्विग्याज्यौ च भोजयेत्

एषां संपूर्णशाखाध्यायिनां बह्वृचादीनां मध्यादन्यतमो यस्य सम्यक्पूजितः सन् श्राद्धे भुङ्क्ते त
स्य पित्रादिसप्तपुरुषाणां शाश्वतमनवच्छिन्ना पितॄणां तृप्तिः स्यात् साप्तपौरुषीति अनुपातिकादि
नात्तदुभयपदवृद्धिः ४६ एष वै प्रथमः कल्पः हव्यकव्ययोरुभयोरेव प्रदानपदसंबंधि श्रोत्रि
यादिभ्यो दीयत इति मुख्यः तुल्यं उक्तः अयं तु मुख्याभावे वक्ष्यमाणोऽनुकल्पः सदा साधुभिर
नुष्ठितः ४७ मातामहं मातुलं च स्वस्रीयो भागिनेयः गुरुर्विद्यागुरुराचार्यादिः विट्दुहि
ता तस्याः पतिः विट्पतिर्जामाता बंधुः मातृष्वसृपुत्रादिः एतान् मातामहादीन्मुख्यश्रो
त्रियाद्यसंभवे भोजयेत् ४८

म·स्मृ·
टी·
५७

पित्रा विवदमानश्च पित्रा सह शास्त्रीयार्थे लौकिके वा तन्निमित्तं यो विवदते कितवो यः स्वयं देवितुम
नभिज्ञः स्वार्थं परान्देवयति न स्वयं देविता तस्यो नान्यत्र च सभिकः तस्य द्यूतवृत्तिपदेन वक्ष्यमाणत्वात्
केवल इति पाठे तिर्यग्दृष्टिः सुराव्यतिरिक्तमद्यपानासक्तो अनिषिद्धे तेपि तस्मिन्महापातकादौ ज्ञाताभिशा
पः स्वयमनाधर्मकारी उत्तरसादिविक्रयी ५९ धनुःशराणां कर्त्ता च धनुर्बाणादीनि यः करोति ज्येष्ठा
यां सोदरभगिन्यां अनूढायां पाकनिष्ठा विवाहे दीयते साग्रेदिधिषूः तस्याः पतिः तथा च लौकिका द्विज्येष्ठा
यां यदानूढायां कन्यायां वसते अनुजा साग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृता गोविंदराजस्तु भ्रातृमृ
तस्य भार्यायामिमननेनाग्रेदिधिषूपतिरेवं वृत्तिवशादग्रेपदलोपेन दिधिषूपतिरिति मन्तावक्ष्यते
स इह गृह्यते मित्रध्रुग्यो मित्रस्यापकारे वर्त्तते द्यूतवृत्तिः सभिकः पुत्रेणाध्यापितः पिता सुतस्य पुत्रा

पित्रा विवदमानश्च कितवो मद्यपस्तथा पापरोग्यभिशस्तश्च दांभिको रसविक्रयी ५९
धनुःशराणां कर्त्ता च यश्चाग्रेदिधिषूपतिः मित्रध्रुग्द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च ६० भ्रा
मरी गंडमाली च श्वित्र्यथो पिशुनस्तथा उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिंदक एव च ६१ हस्ति
गोश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ६२ स्रोतसां
भेदकश्चैव तेषां चावरणे रतः गृहसंवेशको दूतो वृक्षारोपक एव च ६३ श्वक्रीडी श्येन
जीवी च कन्यादूषक एव च हिंस्रो वृषलवृत्तिश्च गणानां चैव याजकः ६४

57

चार्यत्वासंभवात् ६० भ्रामरी गंडमाली च अपस्मारी गंडमाली व्याध्युपेतः श्वेतकुष्ठयुक्तः उन्म
उन्मादवानन्धश्चक्षुर्विकलो वेदनिंदाकरः ६१ हस्तिगोश्वोष्ट्रदमकः हस्तिगोश्वोष्ट्राणां विनेता नक्षत्रै
र्ज्योतिःशास्त्रमुपलक्ष्यते तेन वर्त्तते पक्षिणां पंजरसंजातानां क्रीडार्थं पोषको युद्धार्थं शास्त्र
धनुर्वेदोपदेशकः ६२ स्रोतसां भेदकश्च प्रवाहजलानां भेदको देशान्तरनेता तेषामेवावरणकर्त्ता
निजपानिप्रतिबंधकः गृहसन्निवेशोपदेशको वास्तुविद्योपजीवी दूतो ग्रामराजप्रेष्यः वानिति रिक्तोऽह
त्वारोपयिता वेतनग्रहणेनेतद्धर्मार्थं पंचाम्रवानपि नरकं न याति इत्यभिधानात् ६३ श्वक्रीडी श्येन
नजीविन क्रीडार्थं श्वानः पोषयति श्येनेन जीवति क्रयविक्रयादिना कन्याभिगन्ता हिंस्रभूतः सृद्रशा
वृत्तिः वृषलपुत्र इति वा पाठान्तरं तदा वृषलाः एव केवलाः पुत्रा यस्येति विनायकादिगणया

कु·
५७

प्रेष्यो ग्रामस्य राज्ञश्च भृतिग्रहणपूर्वकं ग्रामस्य राज्ञो वा आज्ञाकारी उत्सिन्नवृत्तिः कुनखी श्यावदन्तः गुरुप्रतिकूलाचरणशीलः त्यक्तश्रौतस्मार्ताग्निः कलोपजीविनः इत्यवक्तव्ये वर्ज्याः इति पूर्वेणान्वयः उत्तरत्र च ॥५३॥ यक्ष्मी च पशुपालश्च यक्ष्मी क्षयरोगी पशुपालः इत्यार्थं तपा छागमहिष्यादिपोषकः परिवेत्ता परिवित्तिश्च वक्ष्यमाणलक्षणौ निराकृतिः पंचयज्ञानुष्ठानरहितः तथा ब्रह्मद्वेष्टा परिवित्ति निराकर्त्ता ब्राह्मणादीनां सवित्ते यो निराकृतिः ब्रह्मद्विट् ब्राह्मणानां द्वेष्टा गणाभ्यन्तरो गणानां पौत्रादि मठधनोपजीवी ॥५४॥ कुशीलवोऽवकीर्णी च कुशीलवो नर्तनवृत्तिः अवकीर्णी स्त्रीसंपर्काद्विलुप्तब्रह्मचर्यः प्रथमाश्रमी वृषलीपतिः सवर्णामपरिणीय कृतशूद्राविवाहः पौनर्भवः पुनर्भूपुत्रो वक्ष्यमाणो यस्य च जायाजारो गृहे तिष्ठति स उपपतिः ॥५५॥ भृतकाध्यापको यश्च भृतिर्वेतनं तद्ग्राही भृतकः सन्योऽध्या

प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदंतकः। प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा ॥५३॥
यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः। ब्रह्मद्विट् परिवित्तिश्च गणाभ्यंतर एव च ॥५४॥
कुशीलवोऽवकीर्णी च वृषलीपतिरेव च। पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥५५॥
भृतकाध्यापको यश्च भृतकाध्यापितस्तथा। शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुंडगोलकौ ॥५६॥
अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा। ब्राह्मैर्यौनैश्च संबंधैः संयोगं पतितैर्गतः ॥५७॥
अगारदाही गरदः कुंडाशी सोमविक्रयी। समुद्रयायी बंदी च तैलिकः कूटकारकः ॥५८॥

पकः स तथा एवं भृतकाध्यापितः शूद्रशिष्यो आचार्यत्वे गुरुश्च तस्यैव वाग्दुष्टः परुषभाषी अभिशस्तो वा कुंडगोलकौ वक्ष्यमाणौ ॥५६॥ अकारणपरित्यक्ता मातुः पितुः गुरूणां परित्यागकारणं विना त्यक्ता गुरुशुश्रूषादेः कर्त्ता पतितैश्चाध्यापनकन्यादानादिभिः संबंधैः संपर्कं गतः पतितत्वादेवास्य निषेधे प्राप्ते इति चेन्न संवत्सरात्प्रागिदं भविष्यति संवत्सरेण पततीति वक्ष्यमाणत्वात् ॥५७॥ अगारदाही गरदः गृहदाहकः गरदः मरणहेतुद्रव्यस्य दाता कुंडस्यैव वक्ष्यमाणस्य योऽन्नमश्नाति। कुंडस्येत्यनेन गोलकस्यापि ग्रहणं अत एव देवलः यस्तयोरन्नमश्नाति स कुंडाशीति कथ्यते सोमलतादिविक्रेता समुद्रे यो वहित्रादिना द्वीपान्तरं याति बंदी स्तुतीनां पाठकः तैलार्थं तिलादिबीजानां पेष्टा साक्षित्वाभावे कूटस्य मृषावादस्य कर्त्ता ॥५८॥

प॰ स्मृ॰
टी॰
५८

दाराग्निहोत्रसंयोगं अग्निहोत्रशब्दोऽयं अग्निहोत्रार्थाभिधानपरः तेन सोदरे ज्येष्ठे भ्रातर्यनूढे अनग्निके च दारपरिग्रहणं श्रौतस्मार्ताग्निग्रहणं च कुरुते स परिवेत्ता ज्येष्ठश्च परिवित्तिर्भवति २१ अस्य परिवेदनसंबन्धिनां पञ्चानामप्यनिष्टफलमाह परिवित्तिः परिवेत्ता परिवित्तिः परिवेत्ता च यया च परिविद्यते कन्याप्रदाता याजकश्च तद्विवाहहोमकारयिता पञ्चमो येषां ते सर्वे नरकं यान्ति २२ भ्रातुर्मृतस्य भार्यायां मृतस्य भ्रातुः वक्ष्यमाणनियोगधर्मेणापि नियुक्तायां सकृत्सकृदृतुकाले घृताभ्यक्तादिविधिं हित्वा कामेनानुरागं भावयेत् आश्लेषचुम्बनादिकं यावत् अस्य कृताप्रवर्तितस्य दिधिषूपतित्वं अतः श्राद्धनिषेधः पात्रमध्ये पातादस्यापि हव्यकव्यपात्रतया निषेधः कल्पनीयः २३ परदारेषु जायेते परदारेषु कुण्डगोलकाख्यौ द्वौ सुतौ जायेते तत्र जीव-

> दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ २१
> परिवित्तिः परिवेत्ता यया च परिविद्यते । सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥ २२ भ्रा-
> तुर्मृतस्य भार्यायां योऽनुरज्येत कामतः । धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ॥ २३
> परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ । पत्यौ जीवति कुण्डः स्यान्मृते भर्तरि गोलकः ॥
> तौ तु जातौ परक्षेत्रे प्राणिनः प्रेत्य चेह च । दत्तानि हव्यकव्यानि नाशयन्ति प्रदायिनाम् ॥ २५
> अपांक्त्यो यावतः पांक्त्यान् भुञ्जानाननुपश्यति । तावतां न फलं तस्य दाता प्राप्नोति बालिशः ॥
> वीक्ष्यान्धो नवतेः काणः षष्टेः श्वित्री शतस्य तु । पापरोगी सहस्रस्य दातुर्नाशयते फलम् ॥ २७

त्पतिकायामुत्पन्नः कुण्डो मृतपतिकायां गोलकः २४ तौ तु जातौ परक्षेत्रे परभार्यायां जातौ कुण्डगोलकौ श्राद्धे तथा यज्ञे प्राणिनामविलुप्तदृष्टौ प्राणिनौ ब्राह्मणत्वेऽपि तत्कार्याभावात् प्रेत्य फलाभावादिह कीर्त्यभावान्नाशयतः प्रदायिभिः दत्तानि हव्यकव्यानि निष्फलानि कुरुतः २५ अपांक्त्यो यावतः पांक्त्यान् सद्भिः सहैकपङ्क्त्या भोजनानर्हस्तेनादिः पश्यत्यपांक्ति भोजनार्हान् पश्यति तावतां ब्राह्मणानां भोजनफलं तच्छ्राद्धादिदाता न प्राप्नोति बालिशः मूर्खः अतस्तेनादिर्यथा न पश्यति तथा कर्तव्यं २६ वीक्ष्यान्धो नवतेः काणः अन्धः सन्वीक्षणासंभवात् वीक्षणयोग्यदेशसन्निहितोऽसौ पांक्त्यानां नवतेः भोजनसंबन्धिफलं नाशयति एवं काणः षष्टेः श्वेतकुष्ठी शतस्य रोगराजोपहतः कुष्ठी सहस्रस्य तथादिसंनिधानमार्षवचनेन लघुगुरुत्वं

58

आचारहीनः क्लीवश्च गुर्वेतिपि प्रत्यस्यानाद्याचारवर्जितः क्लीवो धर्मकर्मादौ निरुत्साहः नपुं
सकः सो नित्यं नित्यं याचनकस्तेन परोद्वेजकः स्वयंकृतया कृष्या यो जीवति स्वयं तु तरेपि वा संभवति अ
स्वयंकृतयापि श्लीपदी व्याधिना स्थूलचरणः केनापि निमित्तेन साधुभिर्निन्दितश्च १६५ और
भ्रिको माहिषिकः मेषमहिषजीवनः परपूर्वा पुनर्भूः तस्याः पतिः प्रेतानां निर्हारको धनग्रह
णेन तथ मोर्धं एतद्द परमतपो योपयेत मृत्युसंपदाशौचीति श्रुत्याविहितं १६६ एतान्विगर्हिता
चारा एतान्क्लीबादीन्निन्दिताचारान् काणादीश्च पूर्वकं न मार्जितनिंदकमेणानलवधं काणादि
भावान्पङ्क्तिभिः सह भोजनानर्हान्च ब्राह्मणाधमान् ब्राह्मणश्रेष्ठः शास्त्रज्ञो दैवे पित्र्ये च वर्जये
त् १६७ ब्राह्मणस्त्वनधीयानः तृणाग्निर्यथा न हविर्दहनसमर्थो हि विधिप्रदत्तं तथा शाम्यति तेनेः फल

आचारहीनः क्लीबश्च नित्यं याचनकस्तथा । कृषिजीवी श्लीपदी च सद्भिर्निन्दित एव च १६५
औरभ्रिको माहिषिकः परपूर्वापतिस्तथा । प्रेतनिर्यातकश्चैव वर्जनीयाः प्रयत्नतः १६६
एतान्विगर्हिताचारानपाङ्क्तेयान्द्विजाधमान् । द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् १६७
ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति । तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते १६८
अपाङ्क्तदाने यो दातुर्भवत्यूर्ध्वं फलोदयः । दैवे हविषि पित्र्ये वा तं प्रवक्ष्याम्यशेषतः १६९
अव्रतैर्यद्द्विजैर्भुक्तं परिवेत्रादिभिस्तथा । अपाङ्क्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते ७

स्तत्र होमः एवं वेदाध्ययनशून्यो ब्राह्मणस्तृणाग्निसमः तस्मै दैवोद्देशेन हव्यं हविर्न दातव्यं य
तो भस्मनि न हूयते श्रोत्रियायैव देयानीत्यनेनैवानधीयानस्य प्रतिषेधसिद्धौ स्तेनादिवत्पंक्तिदू।
षकत्वज्ञापनार्थं पुनर्वचनं अस्मात् दैवे अनधीयानस्तु काणादिरपि शारीरदोषयुक्तोऽग्राह्य इति
एतदर्थं पुनर्वचनं अत एव वसिष्ठः अथ चेन्मन्त्रविद्युक्तः शारीरैः पङ्क्तिदूषणैः अदूष्यं तं यमः
प्राह पङ्क्तिपावन एव सः शारीरैः काणत्वादिभिः न तु स्तेयममात्यैः स्तेनत्वादिभिः १६८ अ।
पाङ्क्तदाने यो दातुः पङ्क्तिभोजनानर्हब्राह्मणप्रदैव हविषि पित्र्ये वा दत्ते यो दातुर्दानादूर्ध्वं फ
लोदयः तमशेषमभिधास्यामि १६९ अव्रतैर्यत्तर्पितं द्विजैर्भुक्तं वेदव्रतरहितैस्त
था परिवेत्रादिभिरन्यैश्चापाङ्क्तेयैः स्तेनादिभिर्यद्धव्यं कव्यं च भुक्तं तद्रक्षांसि भुञ्जते निः फल

अग्र्याः सर्वेषु वेदेषु सर्वेषु वेदेषु चतुर्ष्वपि अग्र्याः श्रेष्ठाः सम्यग्गृहीतवेदा ब्राह्मणाः पंक्तिपावनाः अत एव यमः पंक्तिपावनगणनायां चतुर्वेदविदं वेति पठितवान् तथा प्रकर्षेणोच्यते वेदार्थ एभि रिति प्रवचनान्यंगानि तेषु अग्र्याः षडंगविदः तेषां च तद्वेदिनां च पंक्तिपावनाः स्यात् यदि ब्रह्म षडंग विदिति पंक्तिपावनमध्ये यमेन पृथक् पठितत्वात् ... दशपुरुषपरम्पराप्रतिष्ठितवचना द्दशपुरुषपर्यंतमविच्छिन्नवेदसंप्रदायवंशजाः पंक्तिपावनाः ८४ त्रिणाचिकेतः पंचाग्निः त्रिणा चिकेतः ध्वर्युर्वेदभागः तद्व्रतं च तद्योगात्पुरुषोपि त्रिणाचिकेतः पंचाग्निहोत्रीत्यपाच्य हारीतः प चनः पावनस्त्रितापपंचाग्न्यग्न्यो गृहे साग्नय आनः प्रदीप्तानि सविप्रः पंक्तिपावनः यच्च नश्रावस थ्याग्निः पावनः सभ्योग्निः सः शीतातपनोदनार्थं बृहदेशेषु विधीयते त्रिसुपर्णः बह्वृचानां वे दभागः तद्व्रतं च तद्योगात्पुरुषोपि त्रिसुपर्णः शिक्षादीनि षडंगानि यो व्याचष्टे स षडंगवि।

अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च । श्रोत्रियान्वयजाश्चैव विज्ञेयाः पंक्तिपावनाः ८३
त्रिणाचिकेतः पंचाग्निस्त्रिसुपर्णः षडंगवित् । ब्रह्मदेयात्मसंतानो ज्येष्ठसामग एव च ८४
वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः । शतायुश्चैव विज्ञेया ब्राह्मणाः पंक्तिपावनाः ८५
पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते । निमंत्रयेत त्र्यवरान्सम्यग्विप्रान्यथोदितान् ८६
निमंत्रितो द्विजः पित्र्ये नियतात्मा भवेत्सदा । न च छंदांस्यधीयीत यस्य श्राद्धं च तद्भवेत् ८७

त्सर्वप्रवचने स्थितमनेन षडंगाध्येता उक्तः ब्रह्मदेयाब्राह्मविवाहोढा तस्या आत्मसंतानः पुत्रः ज्येष्ठ सामानि आरण्यके गीयंते तेषां गाता एते षट्टाविज्ञेयाः पंक्तिपावनाः इत्यनुवर्तनीयं केन संबंधः ८५ वेदार्थ अनधीत्यापि वेदांगानि गुरूपदेशादधिगतवेदार्थः प्रवक्ता वेदार्थस्यैव ब्रह्मचारी प्रथमाश्रमी सहस्रद इति देयविशेषानुपादानेपि गावो हि वेयत्तस्य मातरः स्मविशेषप्रवृत्तश्रुतिदर्शनात्तगो सहस्रवृत्तप्रदो वा शतायुः शतवर्षाः श्रोत्रियाद्येव देयानीति नियमात्सति श्राद्धीयत्वे उत्कृष्टगुण योगात्पंक्तिपावनत्वं ८६ पूर्वेद्युर्वा श्राद्धकर्म श्राद्धकर्मणि प्राप्ते श्राद्धाहात्पूर्वेद्युस्तदसंभ वे श्राद्धदिन एवोक्तलक्षणान्सम्यगिति सत्कृत्य निमंत्रयेत् त्र्यवरान् येषां ते त्र्यवराः न्यूनतानेव व एकैकभोजनस्याप्युक्तत्वात् ८६ निमंत्रितो द्विजः पित्र्ये श्राद्धे निमंत्रितो ब्राह्मणो निमंत्रणा दारभ्य श्राद्धाहोरात्रं यावदत्यंत पुनरितरैः यमनियमवान्स्यादवश्यकर्तव्यजपादिवर्जं वेदाध्य

यावतः संस्पृशेदंगै शूद्रस्य यष्टा शूद्रयाजकः पंक्त्यां ब्राह्मणान्स्पृशति ग्रासनेषूपविष्टेषु तिष्ठन्
मेदस्य वस्य माणस्य तावतां ब्राह्मणानां संभवे यावतां श्राद्धभोजिनां पंक्तावुपविष्टानां तावतां संबंधि पौर्तिकं
श्राद्धीयं फलं दातुर्न भवति तावतां पौर्तिकं फलं बहिर्वेदि दानाच्च यत्फलं तत्र भवतीति मेधातिथिगोविंदरा
जौ ग्रंथ एवं निषिद्धाः गणपंक्तिः शूद्रयाजकभोजननिषेधः कल्प्यते १७८ वेदविच्चापि विप्रोऽस्य प्रस
गाच्छूद्रयाजकप्रतिग्रहं निषेधयति ताच्चवा पंथेऽन्यत्र निषेधकरणं शूद्रयाजकग्रहणमपि कर्तव्यस्मा
देदज्ञोऽपि ब्राह्मणः शूद्रयाजकस्य लोभात्प्रतिग्रहं कृत्वा शीघ्रं शरीरादिनाशं गच्छति तन्तरामवेदवि
द पक्वं मृन्मयमाराधादिकमिवोदके १७९ सोमविक्रयिणे विष्ठा सोमविक्रयिणे यद्दत्तं तद्दातुर्भो
जनार्थं विष्ठा संपद्यते जन्मांतरे विष्ठाभोजिनं जनयतीत्यर्थः एवं पूयशोणितमपि व्याख्या।

यावतः संस्पृशेदंगैर्ब्राह्मणान् शूद्रयाजकः तावतां न भवेद्दातुः फलं दानस्य पौर्तिकं १७८
वेदविच्चापि विप्रोऽस्य लोभात्कृत्वा प्रतिग्रहं विनाशं व्रजति क्षिप्रमामपात्रमिवांभसा १७९
सोमविक्रयिणे विष्ठा भिषजे पूयशोणितं नष्टं देवलके दत्तमप्रतिष्ठं तु वार्द्धुषौ १८० यत्तु
वाणिजके दत्तं नेह नामुत्र तद्भवेत् भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे १८१ इतरेषु
त्वपांक्त्येषु यथोद्दिष्टेष्वसाधुषु मेदोऽसृङ्मांसमज्जास्थि वदंत्यन्नं मनीषिणः १८२ अ
पांक्त्योपहता पंक्तिः पाव्यते यैर्द्विजोत्तमैः तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान्पंक्तिपावनान्

पंनष्टं नाशाभावितयानिः फलं विवक्षितं अप्रतिष्ठमनाश्रयतया निःफलमेव १८० यत्तु वाणिजके द
त्तं श्राद्धं तन्नेहानुषंगिकफलाय भवति नापि पारलौकिकफलाय भवति पुनर्भूपुत्राय यद्दत्तं तद्भ।
स्मनि हुतहविः सन्निष्फलमित्यर्थः १८१ इतरेषु त्वपांक्त्येषु इतरेभ्योऽपि विशेषाभावान्नतफलेभ्यः पं
क्तिभोजनानर्हेभ्यः स्तेनादिभ्यो यथाकीर्तितेभ्यो यद्दत्तमन्नं तद्दातुर्भोजनार्थं मेदोऽसृक्रुधिरमांस
मज्जास्थि भवतीति पंडिता वदंति अत्रापि जन्मांतरे मेदोरुधिरमांसादिभुजं जनयति पुत्राप
नद्रूप्यर्थः १८२ अपांक्त्योपहता पंक्तिः एकपंक्त्युपविष्टस्तेनादिदूषिता पंक्तिः यैर्ब्राह्मणैः
पाव्यते शोध्यते तान्निखिलान्वारकान्ब्राह्मणान् शृणुत निःशेषेण शृणुतेति निषेधादेकपंक्तिभो
जनासंभवेऽपि स्तेनादीनां रहस्यकृतानां ज्ञानदोषविषयार्थं तेन साधकतायस्य वचनस १८३

म. स्मृ.
टी.
६०

विराट्सुताः सोमसदः विराट्सुताः सोमसदो नाम साध्यानां पितरः अग्निष्वात्ता मरीचेः सुताः लोकवि।
श्रुता देवानां पितरः १९५ दैत्यदानवयक्षाणां दैत्यादीनां प्रथमाध्यायोक्तभेदानां अत्रिपुत्रा बर्हि।
षदो नाम पितरः स्मृताः १९६ सोमपा नाम विप्राणां ब्राह्मणप्रभृतीनां चतुर्णां वर्णानां सोमपाद्
यश्चत्वारः पितरः स्मृताः १९७ सोमपास्तु कवेः पुत्राः कवेर्भृगोः सोमपाः पुत्राः हविर्भुज एव ह
विष्मन्तः अङ्गिरसः पुत्राः आज्यपाः पुलस्त्यसुताः सुकालिनो वशिष्ठसुताः १९८ अग्निदग्धानग्नि
दग्धान् अग्निदग्धाननग्निदग्धान् काव्यबर्हिषदग्निष्वात्तसौम्याख्यान् पर्यायान् पितॄन् विप्राणामेव ज्ञा।
नीयात् १९९ य एते तु गणा मुख्याः य एते प्रधानभूताः पितृगणा उक्ताः तेषामपीह जगति पि।

60

विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः अग्निष्वात्ताश्च देवानां मरीच्या लोकविश्रुताः
दैत्यदानवयक्षाणां गंधर्वोरगराक्षसां सुपर्णकिन्नराणां च स्मृता बर्हिषदोऽत्रिजाः १९६
सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः वैश्यानामाज्यपा नाम शूद्राणां तु सुकालिनः १९७
सोमपास्तु कवेः पुत्राः हविष्मन्तोऽङ्गिरःसुताः पुलस्त्यस्याज्यपाः पुत्राः वशिष्ठस्य सुकालिनः
अग्निदग्धानग्निदग्धान्काव्यान्बर्हिषदो बहून् अग्निष्वात्तांश्च सौम्यांश्च विप्राणामेव निर्दिशेत्
य एते तु गणा मुख्याः पितॄणां परिकीर्तिताः तेषामपीह विज्ञेयं पुत्रपौत्रमनंतकं २०० ऋ
षिभ्यः पितरो जाताः पितृभ्यो देवदानवाः देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः २०१

तत्र एव पुत्रपौत्रमिति गवाश्वप्रभृतीनि चैतेषां कवङ्गावः एतत्सर्वं कस्मृचित् एव वरो वरेण्या वरद
इत्यादयोऽन्येऽपि पितृगणा मार्कंडेयपुराणे श्रूयंते २०० ऋषि ऋषिभ्यो मरीच्यादिभ्यो यथोक्तक्र
मेण पितरो जाताः पितृभ्यो देवदानवा जाता देवेभ्यस्तु जंगमस्थावरं जगत्क्रमेण जातं तस्मात् सोम
पादिप्रभवत्वात् पितृपितामहप्रपितामहानां तेषां श्राद्धे पूजनीयाः सोमपादयोऽपि पूजिताः
संतः श्राद्धफलदाना यकल्पन्त इति प्रकृतपित्रादिश्राद्धस्तुत्यर्थोऽयं सोमपादिपितृगणोपन्या
सः अथवा आवाहनकाले निजपित्रादयो ब्राह्मणादिभिः सोमपादिरूपेण ध्येयाः एवं व्यवस्था
ज्ञानेन मनुष्ठानफलता स्यात् २०२

उ.
६०

निमंत्रितान्हि पितर पूर्वे विधेरयमनुवादः यस्मात्तान्ब्राह्मणान्निमंत्रितानदृश्यरूपेण पितरोऽधिति
ष्ठंति प्राणवायुवच्चानुगच्छंति उपविष्टेषु समीपउपविशंति तस्मान्नियमवान्भवेत् ८९ के
तितस्तु यथान्यायं हव्यकव्येषु यथाशास्त्रं निमंत्रितो ब्राह्मणः स्वीकृतमपि केनापि प्रकारेण भोजनमकु
र्वाणः तेन पापेन जन्मांतरे शूकरतां यातीति ९० निमंत्रितस्तु यः श्राद्धे निमंत्रणमभवेत्तदेहु।
नेन मैथुननिषेधे कृते वृषलीगमनस्याधिकदोषख्यापनार्थमिदं वृषली शूद्रा न तु मूढता श्राद्धे।
निमंत्रितः सन्यो वृषल्या सार्द्धं स्त्रीपुंधर्मेण सुरतकारी स दातुर्यत्पापं तत्प्राप्नोति पापानि मा
त्विति अस्मत्पादात्पर्यायेणापि न जायते न चेदं दातुः प्रायश्चित्तं तु यावि हितं येन नाशोपापान्न च पतेम।
मातिथिर्गोविंदराजो तु सामान्येन ब्रह्मचर्यस्य विधानाद्ब्रूष्यंती च तत्पति भर्तारमिति योगाश्रयेण

निमंत्रितान्हि पितर उपतिष्ठंति तान्द्विजान्। वायुवच्चानुगच्छंति तथासीनानुपासते ८९ के
तितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः। कथंचिदप्यतिक्रामन्पापः सूकरतां व्रजेत् ९० आमं
त्रितस्तु यः श्राद्धे वृषल्या सह मोदते। दातुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते ९१ अक्रोध
नाः शौचपराः सततं ब्रह्मचारिणः। न्यस्तशस्त्रा महाभागाः पितरः पूर्वदेवताः ९२ य।
स्मादुत्पत्तिरेतेषां सर्वेषामप्यशेषतः। ये च यैरुपचर्याः स्युर्नियमैस्तान्निबोधत ९३ म
नोर्हैरण्यगर्भस्य ये मरीच्यादयः सुताः। तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः ९४

नवोढावाहान्यपि वृषल्यत्राभिहितेत्याहुः ९१ अक्रोधनाः शौचपराः क्रोधरहिताः बहिः
शौचं मृद्वारिभ्यामंतः शौचं रागद्वेषादित्यागः तत्परास्सर्वदा स्त्रीसंयोगादिशून्याः त्यक्तयुद्धाः
दयायुक्तगुणयोगो महाभागा नातद्दृत अनादिदेवताः पितरः तस्मात्क्रोधादिरहितेन भोक्त्रा कर्त्रा
च भवितव्यं ९२ यस्मादुत्पत्तिरेतेषां येषां पितॄणां यस्मात्काश्यादुत्पत्तिर्ये च पितरो यैर्ब्राह्मणा
दिभिः यैर्नियमैः शास्त्रोक्तकर्मभिः उपचरणीयाः स्युः तान्साकल्येन शृणुत ९३ मनोर्हैरण्य
गर्भस्य हिरण्यगर्भापत्यस्य मनोर्ये मरीच्यादयः पुत्राः पूर्वमुक्ताः मरीचिमत्र्यंगिरसावित्याद्विना
तेषां सर्वेषां ऋषीणां सोमसद्वदादयः पितृगणाः पुत्रा मन्वादिभिः स्मृताः ९४

म-श्रा- टी- ६१

आसनेषूपक्लृप्तेषु आसनेषु पृथक्पृथक्कल्पितेषु तान्ब्राह्मणान् उपवेशयेदत्र प्रथमं तावद्दैवासने
उदङ्मुखौ द्वौ पित्र्यासने च प्रत्येकं दक्षिणाग्रैकः कुशः देयः तदाह देवलः द्वे चात्र विश्वदेवानां विप्राः
पूर्वं निमंत्रिताः प्राङ्मुखान्यासनान्येषां हि दर्भोपहितानि च ६ उपवेश्य ततस्तान् तान्विप्रा
दक्षिणामुखेषु स्पृक्तानि पितॄणामासनानि च दक्षिणाग्रैकदर्भाणि प्रोक्षितानि तिलोदकैः ॥
अङ्कुशमूलापेत्यपा ७ उपवेश्य ततस्तान् तान्विप्राणामंत्रितासनेषूपवेश्य कुंकुमादिगंध।
माल्यधूपादिभिरामोदार्घ्यैर्दैवपूर्वकमर्चयेत् ८ तेषामुदकमानीय तेषां ब्राह्मणानामग्र
र्घोदकपवित्रतिलान् संमिश्रान्दत्त्वा तैर्ब्राह्मणैः सहानुज्ञातोऽग्नौ वक्ष्यमाणहोमं कुर्यात् अत्र

आसनेषूपक्लृप्तेषु बर्हिष्मत्सु पृथक्पृथक् उपस्पृष्टोदकान्सम्यग्विप्रांस्तानुपवेश-
येत् ७ उपवेश्य ततस्तान्विप्रानासनेषु जगुप्सितान् गंधमाल्यैश्च सुरभिरर्चयेद्दैव।
पूर्वकं ८ तेषामुदकमानीय सपवित्रांस्तिलानपि अग्नौ कुर्यादनुज्ञातो ब्राह्मणो ब्रा-
ह्मणैः सह ९ अग्नेः सोमयमाभ्यां च कृत्वाप्यायनमादितः हविर्दानेन विधिवत्प-
श्चात्संतर्पयेत्पितॄन् १० अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् यो ह्यग्निः स
द्विजो विप्रैर्मंत्रदर्शिभिरुच्यते ११

ताश्च मध्ये च प्रार्थना कर्तव्या सा च स्वगृह्यसूत्रानुसारेणाकरवाणि करिष्ये इत्यादिका अनुज्ञा-
नमित्येवं कृपया कुरुष्वेति वा ९ अग्नेः सोमयमा अग्नेः सोमयमयोः स्वविधिवत्स्वगृह्योक्तविधि-
धिपूर्वकं हविर्दानेन प्रीणनमादौ कृत्वा पश्चादन्नादिना पितॄंस्तर्पयेत् सोमयमयोः इष्टानि देव-
पि पृथगेव देवतात्वं सहादिपाठप्रयोगाभावात् यत्र साहित्यं विवक्षितं तत्र सहादिशब्दं करोती-
ति उक्तं प्राक् १० अग्न्यभावे तु विप्रस्य अग्न्यभावे पुनः ब्राह्मणहस्त एव कार्या आहुतित्रयं यथा
यस्याग्न्यभावः स एव ब्राह्मण इति विद्वद्भिः ब्राह्मणैः उक्तः अग्न्यभावश्चानुपनीतस्य स-
मावृत्तस्य च पाणिग्रहणात्पूर्वं मृतभार्यस्य वा ११

उ- ६२

यानि तैर्भोजनैरेषां एषां पितॄणां रूप्यमयपात्रैः रूप्ययुक्तैर्वा ताम्रादिपात्रैः जलमपि श्रद्धया दत्तमक्षय
साय हेतुः संपद्यते किं पुनः पायसादीनि २ देवकार्याद्द्विजातीनां देवार्थमुद्दिश्य यत्क्रियते तत्
दैवकार्यं ततः पितृकार्यं द्विजातीनां विशेषेण कर्तव्यमुपदिश्यते अनेन पितृश्राद्धस्य प्राधान्यं दैव
तत्राङ्गमित्याह तद्देवस्य हि यत्क्रियते दैवकर्म पितृकर्मणः पूर्वं सदाप्यायनं परिपूरकं स्मृतं ३
तेषामारक्षभूतं तु आरक्षो रक्षा तेषां पितृगणानां रक्षाभूतं दैवं वैश्वदेवब्राह्मणं पूर्वं निमन्त्रयेद्य
स्मात् रक्षावर्जितं श्राद्धं राक्षसा आच्छिन्दन्ति अत एवमतः ४ दैवाद्यन्तं तदीहेत तत् श्राद्धं दैवाद्यन्तं दे
वा

यानि तैर्भोजनैरेषामपवारजलान्वितैः। वार्यपि श्रद्धया दत्तमक्षय्यायोपकल्पते २ देव
कार्याद्द्विजातीनां पितृकार्यं विशिष्यते दैवं हि पितृकार्यस्य पूर्वमाप्यायनं स्मृतं ३ ते।
षामारक्षभूतं तु पूर्वं दैवं नियोजयेत् रक्षांसि विप्रलुम्पन्ति श्राद्धमारक्षवर्जितं ४ दैवाद्य।
न्तं तदीहेत पित्राद्यन्तं न तद्भवेत् पित्राद्यन्तं त्वीहमानः क्षिप्रं नश्यति सान्वयः ५ शु।
चिं देशं विविक्तं च गोमयेनोपलेपयेत् दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् ६ ।
अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा ६ ।

वकर्मणि श्राद्धं नावाह्य भावसाने यस्मात्तथा प्रतनैतद्भवति निमन्त्रणादि सर्वं पूर्वं विसर्जनं तु देवानां सर्व
शेषे अत एव देवलः यदत्र क्रियते कर्म पितृके ब्राह्मणान् प्रति तत्सर्वं तत्र कर्तव्यं वैश्वदेवस्य पूर्वकं न तु त
तश्चाद्यपि श्राद्धोपक्रमावसाने पित्राद्यन्तं तत्र तु निष्पन्नु समन्तानः शीघ्रं विनश्यति ५ शुचिं देशं विविक्तं
च अस्पृश्यजनासंचरहितं देशं निर्जनं गोमयेनोपलेपयेत् दक्षिणादिगवनतं च प्रयत्नेन संपा
दयेत् ६ अवकाशेषु चोक्षेषु स्वभावशुचिषु अरण्यादिप्रदेशादिषु तथा निर्जनेषु देशेषु
दत्तेन श्राद्धादिना पितरः सर्वदा तुष्यन्तीति तात्पर्यार्थः ६

पिंडेभ्यस्त्वल्पिकामात्रां आल्पिकेत्यल्पान्नमात्रा वृथग्भागान्पिंडेभ्य उपन्यासात्स्वभागं गवेंपूर्वपिंडक्रमेणै
व गृहीत्वा तानेव पित्रादिब्राह्मणान्भोजनकाले भोजनात्पूर्वं भोजयेद्विधिवत्पिंडानुष्ठानवदितरप्र
दिष्टपथः पिंडोदकस्थलदेवयथैव पितृब्राह्मणं भोजयेदेवं पितामहप्रपितामहपिंडयोरपि १८ ध्रिय
माणे तु पितरि जीवति पितरि मृतानां च पितामहादीनां त्रयाणां श्राद्धं कुर्याद्यद्वा पितुर्विप्रस्था
नेन तमेव स्वकं पितरं श्राद्धे भोजयेत्पितामहप्रपितामहयोश्च ब्राह्मणौ भोजयेत्पिंडद्वयं च दद्यात् १९
पितामहो वा तच्छ्राद्धं नामकीर्तनमत्र श्राद्धोपलक्षणं पितृजीवना पेत्नोपंचाशाद्ः यस्य पुनः पिता
मृतः स्यात् पितामहश्च जीवति स पितृप्रपितामहयोः श्राद्धं कुर्यात् गोविंदराजस्तु यस्य पिता प्रमि

पिंडेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्वशः तानेव विप्रानासीनान्विधिवत्पूर्वमाशयेत् १८
ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् विप्रवद्वापि तं श्राद्धे स्वकं पितरमाशयेत् १९ पि
तामहो वा तच्छ्राद्धं भुंजीतेत्यब्रवीन्मनुः कामं वा समनुज्ञातः स्वयमेव समाचरेत् २० पि
ता यस्य तु वृत्तः स्याज्जीवेद्वापि पितामहः पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहं २१ ते
षां दत्वा तु हस्तेषु सपवित्रं तिलोदकं तत्पिंडाग्रं प्रयच्छेत स्वधैषामस्त्विति ब्रुवन् २२

62

तामहोप्रेतो स्यात्तां सपित्रे पिंडं निधाय पितामहात्परं द्वाभ्यां कुर्यादिति विष्णुवचनात् प्रपितामहत
त्पितृभ्यां दद्यादिति व्याख्यातवान् २० पिता यस्या जीवत्पिता भोज्यः तस्यापि पितामहोपि पितामह
ब्राह्मणस्थाने भोजयितव्यः पितृप्रपितामहयोश्च ब्राह्मणभोजनं पिंडदानं च कुर्याद्यद्वा जीव
तापितामहेन त्वमेव यथारुचि कुर्विति दत्तानुज्ञः स्वयं चापि पितामहं वा भोजयेत् पितृपितामह
हयोर्वा श्राद्धद्वयं कुर्यादिति विष्णुवचनात् पितामहप्रपितामहवृद्धप्रपितामहानां वा श्राद्धत्रयं कुर्या
त् २२ तेषां दत्वा तु हस्तेषु पिंडेभ्यस्त्वल्पिकां मात्रामिति यदुक्तं तस्यायं कालविधिरयं देशेते
षां ब्राह्मणानां हस्तेषु दर्भतिलोदकं दत्वा दद्यादिति पूर्वं निर्दिष्टं पिंडाग्रं पित्रे स्वधास्त्वित्येवमादि
त्रून्पित्रादिब्राह्मणेभ्यः क्रमेण दद्यात् २२

अक्रोधनान्सुप्रसादा क्रोधशून्यान्सुप्रसादान्सततम्प्रवाहानादितया पुरातनांश्च प्रभोआ
ह्लादुतितिन्याये लोकवृद्धये उद्युक्तान् श्राद्धपात्रभूतान्मन्वादयो वदंति तस्मादेव बलत्वात्
आद्धाग्नासग्गास्तद्धस्ते दातव्यमिति पूर्वविध्यपवादः १२ अपसव्यमग्नौकृत्वा अग्नौपर्यु
क्षणाच्च सर्वं यद्युक्तमग्नौकरणहोमान्तमनुक्रमं अपसव्यं दक्षिणसंस्थं कृत्वा ततो पसव्येन
दक्षिणहस्तेन पिंडाधारभूतायां भुवि उदकं क्षिपेत् १३ त्रींस्तु तस्माद्धविःशेषात् तस्माद
न्नादिहोमोद्धृतादन्नात्कृत्वावशिष्टान् त्रीन् पिंडान्कृत्वा उदकेन विधिना दक्षिणहस्तेन समा
हितोनन्यमनाः दक्षिणामुखः तेषु दर्भेष्विति वक्ष्यमाणत्वात् १४ न्यस्यपिंडांस्ततस्ता

अक्रोधनान्सुप्रसादान्वदेदेतान्पुरातनान् लोकस्याप्यायने युक्तान्श्राद्धदेवान्द्विजोत्तमान्
अपसव्यमग्नौकृत्वा सर्वमावृत्य विक्रमं अपसव्येन हस्तेन निर्वपेदुदकं भुवि १३ त्रींस्तु त
स्माद्धविःशेषात्पिंडान्कृत्वा समाहितः औदकेनैव विधिना निर्वपेद्दक्षिणामुखः १४ न्य
स्य पिंडांस्ततस्तांस्तु प्रयतो विधिपूर्वकं तेषु दर्भेषु तं हस्तं निमृज्याल्लेपभागिनां १५ आ
चम्योदक्परावृत्य त्रिराचम्य शनैरसून् षड्ऋतूंश्च नमस्कुर्यात्पितॄनेव च मंत्रवित् १६ उ
दकं निनयेच्छेषं शनैः पिंडांतिके पुनः अवजिघ्रेच्च तान्पिंडान्यथान्युप्तान्समाहितः १७

विधिपूर्वकं गृह्योक्तविधिना तान्पिंडान्दत्वा दर्भमूलेषु करावमर्षणमिति विस्पष्टवचनात्तेषु
दर्भेषु मूलदेशे हस्तं निर्लेपं कुर्यात् प्रपितामहपित्रादीनां त्रयाणां लेपभुजां तृप्तये १५ आच
म्योदक्परावृत्य अनंतरमुपस्पृश्योदङ्मुखो भूत्वा यथाशक्ति प्राणायामत्रयं कृत्वा वसंताय
नम इत्यादिना षड्ऋतून्नमस्कुर्यात् पितॄंश्च नमो वः पितर इत्यादिमंत्रप्रकाशितैः पर्यावृत्येति
गृह्यदर्शनाद्दक्षिणामुखो नमस्कुर्यात् १६ उदकं निनयेच्छेषं पिंडादानात्पूर्वं पिंडाधारदेश
दत्तयोयोदकं पात्रस्थं प्रतिपिंडसमीपदेशे क्रमेण पुनरुत्सृजेत् तांश्च पिंडान्यथान्युप्तान्येनैव
क्रमेण दत्तानेनैव क्रमेण जिघ्रेत् समाहितोनन्यमनाः १७

यद्यद्रोचेत यत्तद्विप्राणामभीप्सितमन्नव्यञ्जनादि तत्तद्दद्यादमत्सरो ब्रह्मोद्याः परमात्मनिरूपणरूपाः कथाः कुर्यात् पितॄणामेतदपेक्षितं ३१ स्वाध्यायं श्रावयेत्पित्र्ये स्वाध्यायं वेदं मानवादीनि धर्मशास्त्राणि आख्यानानि सौपर्णमैत्रावरुणादीनि इतिहासान्महाभारतादीनि पुराणानि ब्राह्म्यादीनि खिलानि श्रीसूक्तशिवसंकल्पादीनि श्राद्धे ब्राह्मणाञ्छ्रावयेत् ३२ हर्षयेद्ब्राह्मणांस्तु स्वयं तुष्टो भूत्वा प्रियवचनादिभिर्ब्राह्मणान्परितोषयेदन्नं च श्रद्धया भोजयेन्मिष्टान्नैः पायसादिभिः पायसमिदं स्वादु मोदकोऽयं हृद्यो गृह्यतामित्यादिगुणाभिधानेन ब्राह्मणान्प्रेरयेत् ३३ व्रतस्थमपि दौहित्रं ब्रह्मचारिणमपि दौहित्रं श्राद्धे प्रयत्नतो भोजयेत् प्र

यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः ब्रह्मोद्याश्च कथाः कुर्यात्पितॄणामेतदीप्सितं ३१
स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि आख्यानानीतिहासांश्च पुराणानि खिलानि च
हर्षयेद्ब्राह्मणांस्तुष्टो भोजयेच्चाशनैः शनैः अन्नाद्येनासकृच्चैतान्गुणैश्च परिचोदयेत् ३३
व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् कुतपं चासनं दद्यात्तिलैश्च विकिरेन्महीं ३४
श्राद्धे त्रीणि पवित्राणि दौहित्रः कुतपस्तिलाः त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वरं
अत्युष्णं सर्वमन्नं स्याद्भुञ्जीरंस्ते च वाग्यताः न च द्विजातयो ब्रूयुर्दात्रा पृष्टा हविर्गुणान् ३६
यावदूष्मा भवत्यन्ने यावदश्नन्ति वाग्यताः तावदश्नन्ति पितरो यावन्नोक्ता हविर्गुणाः ३७

पि श्राद्धादब्रह्मचारिणमपि श्राद्धान्नकल्पिकमुख्यपठितस्यापि ब्रह्मचारिणो यत्नवचनात् छेदितार्थकमध्याह्नतिनेपालकम्बलं चासने दद्यात् दौहित्रं मन्तव्याणाविति तांश्च श्राद्धभूमौ विकिरेत् ३४ त्रीणि श्राद्धे पवित्राणि पूर्वोक्तान्येव त्रीणि दौहित्रादीनि श्राद्धे पवित्राणीति तान्पुनस्त्रीणि चात्र शौचादीनि प्रशंसन्ति ३५ अत्युष्णं सर्वमन्नं स्यात् उष्णमेवान्नं स्यात् दत्त्वादेरुष्णस्य भोजनमुचितं तद्यथा दद्यात् तत्फलाद्यपि अत्रोष्णं स्यात् द्विजातिभ्यः श्रद्धया विनिवेदयेत् अन्यत्र फलमूलेभ्यः पानकेभ्यश्च यद्द्विजः संयतो वाचं ब्राह्मणा ब्रूयुः किमिदं स्वादु वा नेति दात्रान्नादिगुणान्पृष्टा वक्तारः यभिनयेनापि न ब्रूयुः वाग्यमस्यार्थवद्विधानात् ३६ यावदूष्मा भवेदन्ने यावदन्ने उष्णता भवति यावच्च मौनिनो भुञ्जते यावच्च हविर्गुणा नोच्यन्ते ताव

पाणिभ्यांतूपसंगृह्य अन्नस्येति तृतीयार्थे षष्ठी वर्द्धितं पूर्णं पिठरादिपात्रं स्वयं पाणिभ्यां गृहीत्वा पितॄ
न्ध्यात्वा पितॄन्स्मरन्ब्राह्मणसमीपे परिवेषणार्थं प्रयतः स्थापयेत् २३ उभयोर्ह
स्तयोर्मुक्तं अधिकरणे सप्तमी पुरुभयोर्हस्तयोर्मुक्तं त्यक्तं यदन्नं ब्राह्मणं निकटमानीयते तदसु
रा दुष्टबुद्धयो बलाद्विलुम्पन्ति तस्मादेकेन हस्तेनानीयापरिवेष्टव्यं २४ गुणांश्च सूपशाकादीन्यपयु
णव्यञ्जनानि अन्नाद्युपकारकाणि पयोदधिघृतमधूनि च प्रयतः शुचिः समाहितोनन्य
मनाः सम्यक् प्रयत्नेन विपर्यस्तपात्रं भूमावेव न स्थापयेन्न दारुफलकादौ २५
भक्ष्यंभोज्यं च विविधं भक्ष्यं खरविशदमभ्यवहार्यं मोदकादि भोज्यं पायसादि नानाप्रकारं फ

पाणिभ्यां तूपसंगृह्य स्वयमन्नस्य वर्द्धितं विप्रान्तिके पितॄन्ध्यायन् शनकैरुपनिःक्षिपेत् २३
उभयोर्हस्तयोर्मुक्तं यदन्नमुपनीयते तद्विप्रलुम्पन्त्यसुराः सहसा दुष्टचेतसः २४ गुणांश्च
सूपशाकाद्यान्पयो दधि घृतं मधु विन्यसेत् प्रयतः सम्यक् भूमावेव समाहितः २५ भक्ष्यंभो
ज्यं च विविधं मूलानि च फलानि च हृद्यानि चैव मांसानि पानानि सुरभीणि च २६ उपा
नीय सर्वमेतच्छनकैस्तु समाहितः परिवेषयेत् प्रयतो गुणान्सर्वान्प्रचोदयन् २७ ना
स्रमापातयेज्जातु न कुप्येन्नानृतं वदेत् न पादेन स्पृशेदन्नं न चैतदवधूनयेत् २८ अस्रं
गमयति प्रेतान्कोपोरीननृतं शुनः न पादस्पर्शस्तु रक्षांसि दुष्कृतीनवधूननम् २९

लमूलादीनि हृद्यस्य प्रियाणि मांसानि पानानि सुरभीणि भूमावेव विन्यसेदिति पूर्वेण संबं
धः २६ उपनीय सर्वमेतत् एतत्सर्वमन्नादिकं ब्राह्मणसमीपमानीय प्रयतः शुचिरनन्यम
नाः क्रमेण परिवेषयेत् इदं मधुरमिदमम्लमित्येवं माधुर्यादिगुणान्प्रकथयन् २७
नचाश्रुपातयेज्जातु रोदनं क्रोधं स्वभाषणादिनं कुर्यात् पादेन चान्नं न स्पृशेन्न चोत्क्षिप्य
उत्क्षिप्यान्नपात्रे क्षिपेत् प्रकर्षार्थं न पात्रं तिर्यक् कुर्यात् क्रोधानृतयोः श्राद्धांगत्वात् प्रत्यायो
गनिषेधः २८ अस्रं गमयति प्रेतान् अश्रु क्रियमाणं प्रेतान्नेतव्यान् श्राद्धान्नादि प्राप
यति न पितॄणामुपकारकं भवति क्रोधः शत्रून् मृषावादः कुक्कुरान् पादस्पर्शो रक्षांसि

म-स्मृ-
टी-
५५

असंस्कृतप्रमीतानाम् नास्यकार्योऽग्निसंस्कारइतिनिषेधात् संस्काररहितबालानां तथाकुल
स्त्रीणां अदुष्टदोषाणां येत्यक्तारस्तेषां पात्रस्थमुच्छिष्टंदर्भेषु यो विकिरस्तद्भागः स्यादन्ये तु
त्यागिनामिति गुर्वादित्यागिनां कुलयोषितामिति सामान्योपक्रममिदं अनूढकन्यानामिति ।
व्याचक्षते गोविंदराजस्तु त्यागिनां कुलयोषितामिति सामान्योपक्रमादिदं विशेषाभिधानं
संस्कृतभर्त्रादिवत् ततः स्वकुलमत्यागतानां कुलस्त्रीणामित्याह ४४ उच्छेषणं भू
मिगतं उच्छिष्टं यद्भूमिगतं तद्दासस्यानृजुस्वभावस्याकुटिलस्य च पित्र्ये श्राद्धकर्मणि भागधे
यं मन्वादयो वदंति ४५ असपिंडक्रियाकर्म मर्यादायामाङ् आभिविधौ सपिंडीकरणप

64

असंस्कृतप्रमीतानां त्यागिनां कुलयोषितां उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः ४४
उच्छेषणं भूमिगतमजिह्मस्याशठस्य च अदैवं भोजयेच्छ्राद्धं पिंडमेकं च निर्वपेत् ४५.
असपिंडक्रियाकर्म-- ४६
सहपिंडक्रियायां तु कृतायामस्य धर्मतः अनयैवावृता कार्यं पिंडनिर्वपनं सुतैः ४७

र्यंतं अचिरमृतस्य द्विजातेः वैश्वदेवब्राह्मणभोजनरहितं श्राद्धार्थमन्नं ब्राह्मणं भोजयेत् एकं च
पिंडं दद्यादस्य च श्राद्धानुष्ठानमेकोद्दिष्टं देवहीनं एकार्घ्यैकपवित्रं आवाहनाग्नौकरणरहितं सपस
व्यवदिति याज्ञवल्क्यादिस्मृतिष्ववगंतव्यं ४६ सहपिंडक्रियायां असंस्थितस्यैकोद्दिष्टविहि
तं तस्य धर्मतः स्वगृह्यादिविधिना सपिंडीकरणश्राद्धे कर्तव्ये अनयैवावृता उक्तामावास्याश्राद्ध
तिकर्तव्यतया पिंडनिर्वपणं पार्वणविधिना श्राद्धपुत्रैः सर्वत्र मृताहादौ कर्तव्यम् अनयैवा
वृता उक्तेनेन प्रकृतमेकोद्दिष्टमेवाहिकमिति न परामृश्यते उच्यते तर्हि सपिंडीकरणात्पूर्व
मेकोद्दिष्टं सपिंडीकरणोत्तरं तु पुनः अनयैवावृता इति भेदनिर्देशो न स्यात् तस्यामावास्येतिक

कु.
५५

यदुच्छिष्टमिताभुङ्क्ते वस्त्रादिवेष्टितमल्लकोपदर्त्तं ब्राह्मणेभुङ्क्तेतथा दक्षिणामुखस्तपादुकश्चजतारा त्मा भुङ्क्ते तेन पितरः तस्मादेतन्नकर्त्तव्यं ३७ चण्डालश्च चण्डालग्रामसूकरकुक्कुरादयस्तानश्रुत का यथा यते ब्राह्मणान्नभोजनकालेनपश्येयुस्तथा कार्यं ३७ यस्मात् होमे प्रदाने भोज्ये च होमे अग्निहोत्रादौ प्रदाने गोहिरण्यादौ भोज्ये अमृतदुपायं ब्राह्मणभोजने दैवे हविषि पित्र्ये पौर्णमासा दौ पित्र्ये श्राद्धे यदेभिरभिवीक्ष्यते क्रियमाणं कर्म तद्यदपि क्रियते तन्न साधयति ३८ घ्राणेन शू करो हन्ति शूकरस्तदष्ट्यादे गोधं घ्रात्वा कर्म निःफलं करोतीति तस्मात् गन्धघ्राणाद्दोनस्थापनीयः कुक्कुटः पक्षपवनेन तेन सोपि पवनयोग्यदेशादपासारणीयः श्वादर्शनेनश्वनोत्रादिदर्शनेनैव

यदेच्छिष्टमशिभाभुङ्क्ते यो भुङ्क्ते दक्षिणामुखः सोपानत्कश्च यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते ३७ चण्डा लश्च वराहश्च कुक्कुटः श्वा तथैव च रजस्वला च षण्ढश्च नेक्षेरन्नश्नतो द्विजान् ३८ होमे प्रदा ने भोज्ये च यदेभिरभिवीक्ष्यते दैवे हविषि पित्र्ये वा तद्गच्छत्ययथातथं ३९ घ्राणेन शूकरो हन्ति पक्षवातेन कुक्कुटः श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्णजः ४० खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत् हीनातिरिक्तगात्रो वा तमप्यपनयेत्ततः ४१ ब्राह्मणं भिक्षु कं वापि भोजनार्थमुपस्थितं ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ४२ सार्ववर्- णिकमन्नाद्यं सन्नीयाप्लाव्य वारिणा समुत्सृजेद्भुक्तवतामग्रतो विकिरन्भुवि ४३

दुमपि दोषभूयस्त्वज्ञानार्थं पुनरिहाभिधानमथवाहष्टिपातेनेति श्राद्धकर्मणि दृष्टिपातविषयत्वे न अवरवर्णः शूद्रः तस्माज्जातोऽवरवर्णजः शूद्र एव सोत्रादिस्पर्शेन द्विजातिश्राद्धं निःफलय तिनात्मीयमावश्यकत्वात् ४० खञ्जो वा यदि वा काण इति यद्गतिविकलः काणो वा यदा तद्वा दा सः शूद्रस्तस्यैव प्रेष्यत्वाभिधानाद्दाहिष्यादन्योपि शूद्रः स्वनाधिकाङ्गुल्यादिर्वा स्यात्तदा त मपि श्राद्धदेशादपसारयेत् ४१ ब्राह्मणं भिक्षुकं वापि ब्राह्मणमतिथिरूपमन्यं वा भक्षण याचनं भोजनार्थं तत्कालोपस्थितं श्राद्धब्राह्मणैरनुज्ञातो यथाशक्त्या भोजनेन वाहयेत् ४२ सार्ववर्णिकमन्नाद्यं वर्णशब्दः प्रकारवाची सर्वप्रकारमन्नादिकं व्यञ्जनादिभिरेकीकृत्य उदके न प्लावयित्वा कृतभोजनानां ब्राह्मणानामग्रतो भूमौ दर्भेषु विकिरेदुत्सृजेदिति वचनमानाह

[illegible] ४४

म॰ स्मृ॰ टी॰ ८५

इदानीं प्रसंगात् श्राद्धानंतरं प्रश्नविशेषविधिमाह पित्र्ये स्वदितमित्येवं पित्र्ये निरपेक्षपितृमातृदेव
ताकएकोद्दिष्टश्राद्धे तृप्तिप्रश्नार्थे स्वदितमिति वाच्यं तथा गोभिलपर्यायवचनो स्वदितमिति तृप्तिप्रश्नः
मेधातिथिगोविंदराजौ श्राद्धकालागतेनान्येनापि स्वदितमित्येव वक्तव्यमिति व्याचक्षते श्राद्धे
स्वदितमित्येतद्वाच्यं अन्येन केनचित् नान्यदिद ---- नं अहं सुधीमहि गोष्ठे गोष्ठीश्राद्धे सुश्रुत
मिति वाच्यं गोष्ठ्यां सिद्धपर्यंत्र ... मिति द्वादशविध श्राद्धगणनायां गोष्ठीश्राद्धमपि विश्वामित्रे
ण पठितं अभ्युदये वृद्धिश्राद्धे संपन्नमिति वक्तव्यं देवे देवतोद्देशेन श्राद्धे रोचितमिति वक्तव्यं देव
श्राद्धं च भविष्यपुराणोक्तं देवानुद्दिश्य यच्छ्राद्धं तद्दैविकमुच्यते हविष्येन विशिष्टेन सप्तम्या

65

पित्र्ये स्वदितमित्येवं वाच्यं गोष्ठे तु सुश्रुतं संपन्नमित्यभ्युदये दैवे रोचितमित्यपि २५४
अपराह्णस्तथा दर्भा वास्तुसंपादनं तिलाः सृष्टिर्मृष्टिर्द्विजाश्चाग्र्याः श्राद्धकर्मसु संपदः
दर्भाः पवित्रं पूर्वाह्णो हविष्याणि च सर्वशः पवित्रं यच्च पूर्वोक्तं विज्ञेया हव्यसंपदः २५६

दिव्रुपलनः २५४ अपराह्णस्तथा दर्भा अमावास्याश्राद्धस्य प्रकृतत्वात्तद्विषयोऽयमपरा
ह्णः कालः अतः वृद्धिनिमित्तकमित्यादिना वृद्धिश्राद्धादौ पूर्वाह्णेऽभिधानात् कालादिविधा
नाद्विष्टरायपर्या दर्भाः गोमयादिना श्राद्धदेशसंपादनं तिला अविकरणार्थाः सृष्टिरेकाय
णेनान्नविसर्गः मृष्टिरन्नादेः संस्कारविशेषः पंक्तिपावनादयश्च ब्राह्मणाः एताः श्राद्धे सं
पत्तयः अभिधानाद्गानराय...प्रकृष्टत्वमेषां बोध्यते २५५ दर्भाः पवित्रमंत्राः पूर्वाह्णः
कालः हविष्याणि मुन्यन्नादीनि सर्वाणि यच्च पवित्रं पावनं वस्तु संपादनादि पूर्वमुक्तमे
तद्देवार्थस्य कर्मणः समृद्धयः हव्यशब्दो दैवकर्मणोपलक्षणार्थः २५६

उ॰ ८५

श्राद्धं भुक्त्वा तदुच्छिष्टं आश्रितशूद्रायोच्छिष्टदानप्रसक्तौ अयं निषेधः श्राद्धभोजनोच्छिष्टं यः शू
द्राय ददाति स मूढः कालसूत्रं नाम नरकं अधोमुखो गच्छति ४७ श्राद्धभुग्वृषलीतल्पं वृष
लशब्दोत्र स्त्रीपरः स्मार्त्तः निरन्तं वक्रवेति वृषसंतीचलयतिमतोरमिति वृषली ब्राह्मणस
परिणीता ब्राह्मणस्य वृषलीति श्राद्धं भुक्त्वा तदहोरात्रं यः स्त्रीसंयोगं करोति तस्य पितरः तस्याः
पुरीषे मासं शेरते तदुतिनिहृतमर्थात्रिंशदा ४८ पृष्ट्वा स्वदितमित्येवं तृप्तान् ब्राह्मणान् तु।
स्वदितमिति पृष्ट्वा तेषामाचमनं कारयेत् आचमनाश्च भोरति संबोध्य अभिरम्यतामि

श्राद्धं भुक्त्वा तदुच्छिष्टं वृषलाय प्रयच्छति स मूढो नरकं याति कालसूत्रमवाक्शिराः
श्राद्धभुग्वृषलीतल्पं तदहर्योऽधिगच्छति तस्याः पुरीषे तं मासं पितरस्तस्य शेरते ४८ पृ
ष्ट्वा स्वदितमित्येवं तृप्तानाचामयेत्ततः आचान्तांश्चानुजानीयादभितो रम्यतामिति ४९
स्वधास्त्वित्येवं तं ब्रूयुर्ब्राह्मणास्तदनन्तरं स्वधाकारः पराह्याशीः सर्वेषु पितृकर्मसु ५० त
तो भुक्तवतां तेषामन्नशेषं निवेदयेत् यथा ब्रूयुस्तथा कुर्यादनुज्ञातस्ततो द्विजैः ५१

तिब्रूयादभितो रम्यतामिति पाठे अभितउभयत इह वा स्वगृहे वा आस्यतामित्यर्थः ४९ स्व
धास्त्वित्येव अनुज्ञानानन्तरं ब्राह्मणाः श्राद्धकर्त्तारं स्वधास्त्विति ब्रूयुः यस्मात् सर्वेषु श्राद्धत
र्पणादिपितृकर्मसु स्वधाशब्दोच्चारणं प्रकृष्टाशीः ५० ततो स्वधाशब्दोच्चारणानन्तरं कृ
तभोजनानां ब्राह्मणानां शेषमन्नमस्तीत्यवशिष्टमन्नं निवेदयेत् ते ब्राह्मणा इदमन्नमनेन
त्रियतामित्यनुज्ञातो यथा ते ब्रूयुस्तथा पि विशेषानियोगं कुर्यात् ५१

म॰स्मृ॰
टी॰
९९

आयु तेन पिंडभक्षणेन दीर्घायुः कीर्तिधारणात्मकबुद्धियुक्तो धनपुत्रादिसंततिधर्मानुष्ठानसत्वा
(गु)गुणान्वितं पुत्रं जनयति ॥ २६३ ॥ प्रक्षा तदनु हस्तौ प्रक्षाल्य ज्ञातिप्रायमन्नं कुर्यात् ज्ञातीन्नेतिगाह
तीति ज्ञातिप्रायं कर्म एवं निमंत्रणं ज्ञातीन्भोजयेदित्यर्थः तेभ्यः पूजापूर्वकमन्नं दत्वा मातृपक्षानपि
साहेणां भोजयेत् ॥ २६४ ॥ उच्छि तद्ब्राह्मणोच्छिष्टं तावत्कालं तिष्ठेत् यावद्विप्राणां विसर्जनं ब्राह्मण
भुनिर्गतेषु मार्ष्टव्यमित्यर्थः ततः संपन्ने श्राद्धे वैश्वदेवहोमबलिकर्मनित्यश्राद्धातिथिभोजनानि
कर्तव्यानि बलिशब्दस्य प्रदर्शनार्थत्वादत एव मत्स्यपुराणे नित्यमप्राणिपत्यार्थं पर्युक्त्याग्निं च मंत्र

66

आयुष्मंतं सुतं सूते यशोमेधासमन्वितं धनवंतं प्रजावंतं धार्मिकं सात्त्विकं तथा ॥ २६३ ॥ प्र
क्षाल्य हस्तावाचम्य ज्ञातिप्रायं विकल्पयेत् ज्ञातिभ्यः सत्कृतं दत्वा बांधवानपि पूजयेत् ॥ २६४ ॥
उच्छेषणं च तत्तिष्ठेद्यावद्विप्रा विसर्जिताः ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितः ॥ २६५ ॥
हविर्यच्चिररात्राय तच्चानंत्याय कल्पते पितृभ्यो विधिवद्दत्तं तत्प्रवक्ष्याम्यशेषतः ॥ २६६ ॥
तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा दत्तेन मासं प्रीयंते विधिवत्पितरो नृणां ॥ २६७ ॥

वित् वैश्वदेवं प्रकुर्वीत नैत्यकं बलिमेव च ॥ २६५ ॥ ये श्राद्धे विहिते पूर्वेणान्न ... पियवधानात्प्र
बुद्धिस्थाणिप्यस्त एव प्रतिपन्नये पुनर्वक्ष्यमाणतया प्रतिजानीते हवि चिररात्राय पदमव्ययपि
रकालं वा चिरायचिररात्राय चिरस्थायापिराप्यकाः आनंत्याभिधानिकाः मद्दविर्यपावि
धिपितृभ्यो दत्तं चिरकालतृप्तये च संपद्यते तद्विशेषेण पिधास्यामि ॥ २६६ ॥ तिलै तिलधा
न्यमवमाषफलमूलानामन्यतमेनापि यथाशास्त्रं श्रद्धया दत्तेन मनुष्याणां मासं हृष्टमा माषा ।
तिलाश्चैव मुद्गाः सर्षपेव शालय इति वायुपुराणवचनान्माषविकृतिकासमाषा वोद्धव्याः ॥ २६७ ॥

उ॰
९९

उत्स मुनेर्वानप्रस्थस्याज्ञानिनीवारादीनि पयः सोमं सोमलतारसः अनुपस्कृतमविकृतं प्रकृतिगंधादि
रहितं मांसमक्षारलवणं प्रकृतिमिसैंधवादि एतत्स्वभावतो हविः मन्वादिभिरभिधीयते ५७ विसृ
तान्ब्राह्मणान्विसृज्य अनन्यमना मौनी पवित्रो दक्षिणां दिशं वीक्षमाणः एतान्वक्ष्यमाणान्नभिलषि
तान्याचेत पितॄन्प्रार्थयेत् ५८ दाता अस्मत्कुले दातारः पुरुषा वर्द्धंतां वेदस्वाध्यायाध्यापनाध्य
यनं तदर्थे वो धनं तदर्थे यागयाजनं ऐश्वर्यं श्रद्धिमाप्नुवंतु पुत्रपौत्रादिकं च वर्द्धतां देवतार्थं श्रद्धा चास्मत्कु
लेनापैतु दातव्यं च धनादिकं च बहु भवतु ५९ एवं पर्वत्तीस्तु तस्माद्धविःशेषादिमादिपक्षि

उत्सन्नानि पयः सोमो मांसं यच्चानुपस्कृतं अक्षारलवणं चैव प्रकृत्या हविरुच्यते ५७ वि
सृज्य ब्राह्मणांस्तांस्तु प्रयतो वाग्यतः शुचिः दक्षिणां दिशमाकांक्षन्याचेतेमान्वरान्पितॄन् ५८
दातारो नोऽभिवर्द्धंतां वेदाः संततिरेव च श्रद्धा च नो माव्यगमद्बहु देयं च नोस्त्विति ५९ ए
वं निर्वपणं कृत्वा पिंडांस्तांस्तदनंतरं गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत् ६० पिं
डनिर्वपणं केचित्परस्तादेव कुर्वते वयोभिः खादयंत्यन्ये प्रक्षिपंत्यनलेऽप्सु वा ६१ प
तिव्रता धर्मपत्नी पितृपूजनतत्परा मध्यमं च ततः पिंडमद्यात्सम्यक्सुतार्थिनी ६२

यापिंडनिर्वपणं कृत्वा तान्पिंडान् गोविप्राजानानग्नीन्वा प्राशयेत् अप्स्वा उदके वा क्षिपेत् ६०
पिंड पिंडप्रदानं केचिदाचार्या ब्राह्मणभोजनानंतरं कुर्वते अन्ये पक्षिभिः पिंडान्खादयंति द्वयं
च पक्षिभोजनरूपा प्रतिपत्तिरप्सुदकप्रक्षेपयोः वैकल्पिकीति दर्शयितुमुक्तयोरप्यभिधा
नं ६१ पति धर्मार्थकामेषु मनोवाक्कर्मभिः पतिरेव मया परिचरणीय इति व्रतं यस्याः
सा पतिव्रता धर्मपत्नी सवर्णा प्रथमोढा श्राद्धक्रियायां श्रद्धालिनी तेषां पिंडानां मध्यमं पिता
महपिंडं भक्षयेत् सम्यगादाय पितरो गर्भमित्यादिशक्सोक्तमंत्रेण ६२

अपि वर्षासु मघायुक्तां त्रयोदशीं पूर्वोक्तामविवक्षित्वा तत्रापि श्रेष्ठ्यप्रयामतीतायां मघायुक्तां त्रयोदशीं श्राद्धकर्त्तव्यं मधुना पायसेन वेति यां विवचना। श्राद्धकृत्स त्रयोदशी पूर्वं त्रेह च गृह्यते पितरः किलैवमाशासते अपि नाम तथाविधः कश्चिदस्माकं कुले भूयाद्योऽस्मभ्यं प्रकृतायां त्रयोदश्यामपकृतायां तथा तिथ्यन्तरेपि हस्तिनः पूर्वां दिशं गतायां छायायां मधुघृतसंयुक्तं पायसं दद्यात् न च त्रयोदशीहस्तिच्छाययोः समुच्चय तथा च विष्णुः अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः प्रावृट्काले सिते पक्षे त्रयोदश्यां समाहितः मधुप्लुतेन यतः श्राद्धं पायसेन समाचरेत् कार्त्तिके सफलं वापि शाकच्छाये कुंजरस्य वा ॥ २७४ ॥ यद्य यद्ददातीति वीप्सया सर्वमन्नं प्रतिषिद्धं यथाश्रा

67

अपि नः स कुले भूयाद्यो नो दद्यात्त्रयोदशीं पायसं मधुसर्पिर्भ्यां प्राक्छाये कुंजरस्य तु ॥ २७४ ॥
यद्यद्ददाति विधिवत्सम्यक्छ्रद्धासमन्वितः तत्तत्पितॄणां भवति परत्रानन्तमक्षयं ॥ २७५ ॥ कृ
ष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीं श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः ॥ २७६ ॥ यु
क्षु कुर्वन्दिनर्क्षेषु सर्वान्कामान्समश्नुते अयुक्षु तु पितॄन्सर्वान्प्रजां प्राप्नोति पुष्कलां ॥ २७७ ॥

द्धं सम्यक्प्रयत्नेन श्रद्धायुक्तः पितृभ्यः ददाति तदनन्तमक्षय्यं सर्वकालं अनपचितं परलोके तृप्तिप्रायं भवति अत एव फलानि श्रद्धयादेयानीति विधीयते ॥ २७५ ॥ कृष्ण कृष्णपक्षे दशमीमारभ्य चतुर्दशीं मुक्त्वा श्राद्धे यथा तिथयः श्रेष्ठा महाफला न तथा एवान्याः प्रतिपदादयः ॥ २७६ ॥ युक्षु दिनर्क्षेषु तिथिषु परः युक्षु युग्मासु तिथिषु द्वितीयाचतुर्थ्यादिषु नक्षत्रेषु भरणीरोहिण्यादिषु श्राद्धं कुर्वन् सर्वानभिलषितान्प्राप्नोति अयुग्मासु तिथिषु प्रतिपत्तृतीयाप्रभृतिषु अयुग्मेषु नक्षत्रेषु अश्विन्यादिषु श्राद्धेन पितॄन्पूजयन्पुत्रादिसंततिं लभते पुष्कलां

द्वौमा पाठीनादिमत्स्यानांमांसेनद्वौमासौपितरः प्रीयंतइतिपूर्वेणसंबंधः त्रीन्मासान्हरिणमांसेन
चतुरोमेषमांसेनपंचद्विजातिभक्ष्यपक्षिमांसेन ६९ षण्मा षण्मासांश्छागमांसेनप्रीयंतेपृष
तश्चित्रमृगः एणरुरुहरिणजातिविशेषौ ७० दश दशमासानारण्यकशूकरमहिषमांसे
स्तृप्यंति एकादशशशकच्छपमांसेन ७१ संव वत्सरंतुगव्येनपयसाक्षीरेणतत्साधितौदनेनतृप्यं
तितत्रैवपायसशब्दःप्रसिद्धः वार्ध्रीणसमांसेनद्वादशवर्षपर्यंतपितृतृप्तिर्भवति वार्ध्रीणसस्वरूपंवि
गमेव्याख्यातः त्रिःपिबंत्विंद्रियक्षीणंश्वेतंवृद्धमजापतिं वार्ध्रीणसंतुतंप्राहुर्याज्ञिकाःपितृकर्मणि

द्वौमासौमत्स्यमांसेनत्रीन्मासान्हारिणेनतु औरभ्रेणचतुर्मांसंशाकुनेनचपंचवै ६९
षण्मासांश्छागमांसेनपार्षतेनेहसप्तवै अष्टावेणस्यमांसेनरौरवेणनवैवतु ७० दश
मासांस्तुतृप्यंतिवराहमहिषामिषैः शशकूर्मयोस्तुमांसेनमासानेकादशैवतु ७१ सं
वत्सरंतुगव्येनपयसापायसेनतु वार्ध्रीणसस्यमांसेनतृप्तिर्द्वादशवार्षिकी ७२ का
लशाकंमहाशल्काःखड्गलोहामिषंमधु आनंत्यायैवकल्प्यंतेमुन्यन्नानिचसर्वशः ७३
यत्किंचिन्मधुसंमिश्रंप्रदद्यात्तुत्रयोदशीं तदप्यक्षयमेवस्याद्वर्षासुचमघासुच ७४

नद्यादौजलंपिबतोयस्यत्रीणिजलानिस्पृशंतिकर्णौजिह्वाचसत्रिभिःपिबतीतित्रिपिबः ७२
काल कालशाकाख्यंशाकंमहाशल्काः शल्काइतिमेधातिथिः मत्स्यविशेषइतिगुरुस्पतेमहा
शल्कानाममत्स्याइतिनिगमवचनात् खड्गोगंडकः लोहोलोहितवर्णः छागः सर्वलोहेनछागो
नान्नंसामिषमितियोगीनप्रवचनात् तयोरामिषंमांसंमधुमाक्षिकं अन्नहारादीनिअरण्यजानिसर्वाणिएव
तान्यनंततृप्तयेसंपद्यंते ७३ यत्किंचित् अन्नंतत्त्रयोदश्यांनाममघासुत्रयः यत्किंचिदन्नंप्रति
सिद्धंमधुसंपर्केणवर्षाकालेमघात्रयोदश्यांदीयतेतदप्यक्षयतृप्तयेभवतित्रयोदशीश्वेधिकर

अन्ने कुर्यान्मासानुमासिकमिति श्रुतिमासं श्राद्धं विहितं तदभावे विधिरयं चतुर्भिर्मासैर्ऋतुरेकः ऋतुः संवत्सरस्तृतीयपक्षमाश्रित्य उच्यते अनेनक्रमेण संवत्सरमध्ये त्रीन्वारान् हेमन्तग्रीष्मवर्षासु श्राद्धं कर्तव्यं तच्च समाचारात् कन्याकुंभवृषभस्थेऽर्के पंचमहायज्ञान्तर्गतं च एकमप्याशयेद्विप्रमित्यनेन विहितं प्रत्यहं श्राद्धं कुर्यादिति पूर्वोक्तदार्ढ्यार्थं ॥ ८२ ॥ न यै अग्नेः सोमाय

कुर्वन्प्रतिपदि श्राद्धं सुरूपां लभते प्रजां कन्यकां तु द्वितीयायां तृतीयायां तु वाजिनः पशून्क्षुद्रांश्चतुर्थ्यां च पंचम्यां शोभनान्सुतान् षष्ठ्यां द्यूतमवाप्नोति सप्तम्यां लभते कृषिं अष्टम्यामपि वाणिज्यं लभते श्राद्धदो नरः नवम्यामेकखुरान् दशम्यां द्विशफान्बहून् एकादश्यां तथा रूप्यं ब्रह्मवर्चस्विनः सुतान् द्वादश्यां जातरूपं च रजतं कुप्यमेव च ज्ञातिश्रैष्ठ्यं त्रयोदश्यां चतुर्दश्यां तु क्रूरजाः प्रीयन्ते पितरश्चास्य ये शस्त्रेण रणे हताः पक्षवत्या विनिर्दिष्टानि पुनानि मनःप्रिया श्राद्धदः पंचदश्यां तु सर्वान्कामान्समश्नुते अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् हेमंतग्रीष्मवर्षासु पंचयज्ञकमन्वहं ॥ ८२ ॥ न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः ॥ ८२ ॥

श्यां चेति विहितः पितृयज्ञादिभूतो होमः न लौकिके श्रौतस्मार्तव्यतिरिक्ताग्नौ शास्त्रेण विधीयते तस्माल्लौकिकेऽग्नौ करणहोमः कर्तव्यः निरग्निना च अग्न्यभावे तु विप्रपाण्यादिविहितविधानाद्विप्रपाण्यादौ कर्तव्यः आहिताग्नेर्द्विजन्मनः नामावास्याव्यतिरेकेण कृष्णपक्षदशम्यादौ श्राद्धं विधीयते मृताहश्राद्धं तु निमित्तत्वात् कृष्णपक्षे पितृक्षयं तदेपि न निषिध्यते ॥ ८२ ॥

यथा चैत्रसितामासादितिज्योतिःशास्त्रविधानात् शुक्लपक्षो मलमासमासानां अपरः पक्षः
श्राद्धस्य यथा शुक्लपक्षात् श्राद्धस्य संबन्धी विशिष्टफलो भवति एवं पूर्वाह्णे दिवसादुत्तराह्णे दिवसः श्र
द्धस्य फलः विशिष्यत इति वचनात् पूर्वाह्णेऽपि श्राद्धकर्तव्यतां दर्शयति ननु शुक्लपक्षाद् कृष्ण
कथमस्यापरपक्षस्य कथं हि ह्रासता प्रसिद्धो हि ह्रासो भवति उच्यते कृष्णपक्षे दर्शाद्यादिविशे
षे विशिष्टविधायकवाक्याभिधानात् ७९ प्राची दक्षिणांसस्थितयज्ञोपवीतिना अनलसेन द
र्भहस्तेन अपसव्यं पितृतीर्थेन यथाशास्त्रं सर्वं पित्र्यं कर्म आनिधनात् यावज्जीवमिति मेधातिथिः।
गोविन्दराजो ८० रात्रौ रात्रौ श्राद्धं न कर्तव्यं यस्मात् श्राद्धविनाशकारणं राक्षसी मन्वादि

यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते तथा श्राद्धस्य पूर्वाह्णादपराह्णो
विशिष्यते ७९ प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा पित्र्यमानि।
धनात्कार्यं विधिवद्दर्भपाणिना ८० रात्रौ श्राद्धं न कुर्वीत राक्षसी हि सा
कीर्तिता संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते ८१

भिरुक्तो कथिता संध्ययोश्च न कुर्याद् आदित्ये चाचिरोदिते अचिरोदितादित्यकालश्चापेक्षायां प्रा
तः त्रिमुहूर्तो प्रातः यथोक्तं विष्णुपुराणे रेखाप्रभृत्यथादित्ये त्रिमुहूर्तगते रवौ प्रातस्तत
स्मृतः कालो भागः साह्नस्तु पञ्चमः अपराह्णस्य श्राद्धाङ्गतया विधानात् कथमयमप्रसक्तप्रतिषे
ध इति चेन्नायं प्रतिषेधः सहितागतपरिप्राप्तस्य वास्याद्विधिप्राप्तस्य वानाद्यः नात्र रागतो नित्यस्य
श्राद्धस्य प्राप्तत्वाद्विधिप्राप्तस्य प्रतिषेधो षोडशिग्रहणाग्रहणवद्विकल्पः स्यात्तस्मात्पूर्वदा
सोमग्रहणादिपर्वश्रद्धकाले श्राद्धं कुर्याद् अनुयाजेनवयजन्ति येयजामह इति मन्त्रवदपर
विधिप्राप्तस्यार्थः अत एवोक्तं यथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यत इति ८२

म॰स्मृ॰
टी॰
९९

गौडे नन्दनवासिनाम्नि सुजनैर्वन्द्ये वरेन्द्र्यां कुले श्रीमद्भट्टदिवाकरस्य तनयः कुल्लूकभट्टोऽभव
त् ॥ श्रीं तेन मनुस्मृतौ विरचिते ध्याये चतुर्थे भुना धर्मे यं क्रियते हिताय विदुषां मन्वर्थमु
क्तावली ॥ २ ॥ मानवद्वृत्तावस्मान्तेयाख्याख्यानवानमुयोद्विजाः प्राचीना अपि रुचिरा व्याख्या न
णामस्ये याणं श्रद्धकल्पानन्तरं वृत्तीनां लक्षणेवेव इति वृत्तिमुख्यात्ता तयापतिज्ञातास्तद्व
दधीनत्वाद्गार्हस्थ्यस्यानन्तरं वक्तव्यास्तब्रह्मचर्यपूर्वकमेव गार्हस्थ्यं तत्रैव वक्तव्यमासीत् ।
वृत्तयइति दर्शयितुं ब्रह्मचर्यकालं गृहस्थकालं वा चानुवदति चतुर्थमित्यादि चतुर्थमा
युषो भागं उक्तो ब्रह्मचर्यकालोपलक्षणार्थं अनियतपरिमाणत्वादायुषश्चतुर्थभागस्य
दुर्ज्ञानत्वात् नचयतोपूर्वैरूपइति श्रुतेः पंचविंशतिवर्षपर्यन्तं षट्त्रिंशदाब्दिकं ब्रह्मचर्यमि

69

चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥ १ ॥
अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥ २ ॥

त्यादिविरोधात् आश्रमसमुच्चयपक्षमाश्रितो ब्राह्मणोऽत्र ब्रह्मचर्यकालं जन्मापेक्षया द्यं यथा ।
शक्ति गुरुकुले स्थित्वा द्वितीयमायुश्चतुर्थभागं गृहस्थाश्रममनुतिष्ठेत् गृहस्थस्तु यदाप
श्येदित्यनियतत्वात् द्वितीयमायुषो भागमित्यपि गार्हस्थ्यकालमेव ॥ १ ॥ अद्रोहेण परस्या
पीडाभिलोलाञ्छाचिनादि द्रोहः नतु हिंसयैव द्रोहः तस्या निषिद्धत्वात् अद्रोहेण तदसंभ
वे अल्पद्रोहेण या वृत्तिर्जीवनोपायः तदाश्रयणेन भार्यादिभृत्यपंचयज्ञानुष्ठानयुक्तो ब्रा
ह्मणो न तु क्षत्रियादिरनापदि जीवेत् आपदि तु यामे विधिर्भविष्यति अयं च सामान्योप
देशो याजनाध्यापनविशुद्धप्रतिग्रहादि संग्रहार्थः वक्ष्यमाणऋतादिविशेषमात्रनिष्ठत्वे
संकुचितस्य स्मृत्यहानिरनधिकार्थत्वं याजनादेर्नित्यं कारणानि वेशश्चास्यान्न यापि तो

अ॰ ४ पृ॰ ६९

यदे पांचयज्ञिकश्राद्धासंभवे विधिरयं यत्स्नात्वानंतरमुदकसेकं तर्पयति द्विजः वारोज्जितेनैव निमग्ना
र्घ्य सर्वं प्राप्नोति द्विजोत्तमपदं द्विजपरं २८३ वसून्यस्मात्पित्रादयो वस्वादयरूपेणादिभूतश्रुति
रस्य: पितॄन्वस्वाख्यदेवतान्पितामहान्रुद्रांश्च प्रपितामहानादित्यान्मन्वादयो वदंति तत्र श्रुति
द्वबोधनं वेदपर्यनश्राद्धे पित्रादयो वस्वादिरूपेणाध्येया इति विधिः अत एव कल्पतरौ अत एव पि
तॄन्सि: यएवं विद्वान्पितॄन्यजते वस्वादिरूपानादित्यांश्च प्रीतास्तस्य भवंति मुधातिपिगोवि
द्वानोत्पित्रैद्ध्यानाभिव्याद्वायः कर्मणि न प्रवर्तते तत्प्रसेतद्वे वनाहारेणापितॄणां तृप्तिव
चनं २८४ विघ सर्वदा विघसभोजनः स्यादमृतभोजनश्चेति विघसामृतभोजनशब्दयोरप्र
सिद्धार्थत्वादर्थान्तरप्रसिद्धार्थत्वादर्थमाह भुक्तेति विप्रभुक्तशेषं विघसं दर्शपौर्णमासादियज्ञाव

यदेव तर्पयत्यद्भिः पितॄन्स्नात्वा द्विजोत्तमः तेनैव सर्वमाप्नोति पितृयज्ञक्रियाफलं २८३ व
सून्वदंति हि पितॄन्रुद्रांश्चैव पितामहान् प्रपितामहांस्तथादित्यानित्येषा वैदिकी श्रु
तिः विघसाशी भवेन्नित्यं नित्यं वामृतभोजनः विघसं भुक्तशेषं तु यज्ञशेषं तथामृतं
२८५ एतद्वोभिहितं सर्वं विधानं पांचयज्ञिकं द्विजातिमुख्यवृत्तीनां विधानं श्रूयतामिति
२८६ ९६० इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां तृतीयोऽध्यायः ३

शिष्टं पुरोडाशादिकममृतं सामान्याभिधानेपि प्रकृतत्वात् श्राद्धे विप्रभुक्ताविप्रभोजनशेषार्थोयं
विधिः अत एव भुंजीतातिथिसंयुक्तः सर्वं पितृनिवेदितं इति स्मृत्यंतरमातिथ्यादिविशेषभो
जनं प्रदर्शितं तद्यपत्नीउक्तमनेनैव विहितं तस्यैव यज्ञ: शेषतत्त्वमापादनेन समर्पणवंच
नमिति गोविंदराजव्याख्यानं मनुष्ठानविशेषानर्हं प्राकयाज्ञिकं च २८६ एतदुदं पंचयज्ञ
भवमनुष्ठानं सर्वं युष्माकमुक्तं पांचयज्ञमवहितैरपि पंचयज्ञैः उपसंहारस्तेषामभ्य
र्हितत्वज्ञापनार्थः मंगलार्थ इति गोविंदराजः इदानीं द्विजातिमुख्यो विप्रस्तत्वृत्तीनामृता
दीनामनुष्ठानं श्रूयतामिति वक्ष्यमाणाध्यायेकदेशस्योपन्यासः २८७ इति वारेंद्रनंदना
वासीयभट्टश्रीदिवाकरात्मजभट्टश्रीकुल्लूकविरचितायां मन्वर्थमुक्तावल्यां मनुवृत्तौ
हस्तिभाष्ये मनुवृत्तौ तृतीयोऽध्यायः ३

कुशूलधान्यको वा स्यात् कुशूलं कुस्त्यागारं स्यादित्यभिधानिकाः उष्ट्रकादिनिर्मितागारधान्यसं
चयो भवेत् अत्र कालविशेषापेक्षायां यस्त्रैवार्षिकं भक्तं पर्याप्तं स्याद् इत्यपेक्षयाधिकं वापि वि
द्यते स सोमं पातुमर्हतीति मनुनैव कालो ग्राह्यः तेन नित्यनैमित्तिकधर्मकृत्यपोष्यवर्ग
सहितस्य गृहिणो यावता धान्यादिधनेन वर्षत्रयं समधिकं वा निर्वाहो भवति तावद्धनः कु
शूलधान्यक उच्यते वर्षनिर्वाहोचितधान्यादिधनः कुम्भीधान्यः श्राद्धसौमिकीः क्रियाः
कुर्यात्स्यान्नैवार्षिकं भवेदिति याज्ञवल्क्येन गृहस्थस्य वार्षिकसंचयाभ्यनुज्ञानात् अनुदि
यदा वा ग्रहस्थस्यैव समानि च य एव वेत्मनेन समानि च पंच स्याति तदा तदपेक्षया वक्तव्य
पोष्यवर्गस्य गृहिणः सम्पचितः संवत्सरसंचयः मेधातिथिस्तु यावता धान्यादिधनेन च भृ
त्यदारादिमतः त्रिसंवत्सरस्थितिर्भवति तावत्सुवर्णादिधनवानपि कुशूलधान्य इत्य

70

कुशूलधान्यको वा स्यात्कुम्भीधान्यक एव वा त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा
चतुर्णामपि चैतेषां द्विजानां गृहमेधिनां ज्यायान्परः परो ज्ञेयो धर्मतो लोकजित्तमः

भिधाय कुम्भी उष्ट्रिका षाण्मासिकधान्यनिचयः कुम्भीधान्यक इति व्याख्यातवान् गोविं
दराजस्तु कुशूलधान्यक इत्येतद्व्याचष्टे कोष्ठप्रमाणधान्यसंचयो वा स्याद् द्वादशाहमा
त्रपर्याप्तधनः कुम्भीधान्यक इति व्याचष्टे उष्ट्रिकाप्रमाणधान्यादिसंचयो वा षडहमा
त्रपर्याप्तधनः द्वादशाहं कुशूलेन वृत्तिः कुम्भ्यादिनानिषट्टु मांसमनूनां गोविंदराजोक्तिं ।
नानु कुध्महे ईहा चष्टा तस्माभवमैहिकं त्र्यहपर्याप्तमैहिकं धनं यस्य स त्र्यैहिकः तथा ।
स्याद्दिनत्रयनिर्वाहोचितधनः इत्यर्थः श्वोभवं श्वस्तनं भक्तं तदस्यास्तीति मत्वर्थीयष्ठनिकृ
ताल्लोपसमासः तथा वा भवेत् ७ चतुर्णामपि चैतेषां एषां चतुर्णामपि कुशूलधान्यका
दीनां मध्ये यो यः श्रेयः पठितः स स श्रेष्ठो ज्ञातव्यः यतो सोऽल्पसंकोचधर्मेण स्वर्गादिलो
कजित्तमो भवति ८

यात्रेति यात्रा प्राणस्थितिः यावत्री यत्कुटुम्बवर्द्धनं नित्यकर्मानुष्ठानपूर्वकस्थितिमात्रार्थेन भो
गार्थं स्वसंबन्धिनं यथाशास्त्रविहितानि जनासूरैः कर्मभिर्ज्ञातादिवक्ष्यमाणैः कायक्लेशं विनाप्यसं
ग्रहं कुर्यात् ३ कैः कर्मभिरित्यत आह ऋतामृताभ्यामिति अनापदीमन्तु वर्त्तते ऋतादिभिर्वा
पद्विर्जीवेत् सेवया त्वनापदि कदाचिन्न वर्त्तेत प्रसिद्धत्वादृतादीनि व्याचष्टे ४ ऋतमुञ्छशि
लमिति अवारितस्थाने पतितधान्यप्रतिहतावकाशो यत्र यत्रौषधयो विस्तृतं ततं तत्र
तत्रांगुलीभ्यामेकैकं कणं समुच्चयितेति बौधायनदर्शनात् एकैकधान्यादिगुडकोच्चयनमु
ञ्छः मंजर्यात्मकानेकधान्योच्चयनं शिलः उंछशिलयोरप्येकवद्भावः ऋतं सत्यमस्मात्फलत्वा
दृतमिवोच्यते अयाचितोपस्थितममृतमिव सुखहेतुत्वात् अमृतं प्रार्थितं पुनर्भैक्ष्यमित्या

यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः अक्लेशेन शरीरस्य कुर्वीत धनसंचयं ३
ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ४
ऋतमुंछशिलं ज्ञेयममृतं स्यादयाचितं मृतं तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतं ५
सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ६

मृतमृद्धरूपं मरणसमपीडाजनकत्वात् प्रमृतं एतच्च माये शृहस्य स्वभैक्ष्यमपक्वं तंडुलादिरू
पं न तु सिद्धान्नं परान्नपक्वेन स्वाग्नौ होमायोगात् कर्षणं च भूमिगतप्रचुरप्राणिमरणनिमित्त
त्वाद्बहुदुःखफलकं प्रकर्षेण मृतमिव प्रमृतं ५ सत्यानृतमित्यादि प्रायेण सत्यासत्यव्य
वहारसाध्यत्वात् सत्यानृतं तु वाणिज्यं न तु वाणिज्ये शास्त्रेण सत्यानृतस्याभ्यनुज्ञातं तेन चै
वापि जीव्यत इति चशब्देन वाणिज्यसममपि कुसीदमपि गृह्यते पूर्वश्लोकोक्तत्कृषि
एतच्छ्लोके च वाणिज्ये कुसीदे अनापदीम तु वृत्ते रक्षपंक्तान्येतानि बोद्धव्यानि यथाह।
गौतमः कृषिवाणिज्ये स्वयं चाकृते कुसीदं च सेवा तु दीनदशासंदर्शनत्वात् दर्शने च
यादिधर्मपात्रश्वनुवृत्तिरतः श्ववृत्तिरुक्ता तस्मात्तां प्रकृतो ब्राह्मणस्त्यजेत् ६

म॰ स्मृ॰ टी॰ ७१

संतोषपरमाश्रय यथासंभवमात्मादिप्राणयात्राव्ययपंचयज्ञाद्यनुष्ठानमात्रोचितधनादिस्पृहासं तोषः तमाश्रित्यापि तन्मात्रं प्रवृत्य धनार्जने संयमं कुर्यात् यतः संतोषहेतुकमिह सुखं परत्र चाव्यग्रस्य विहितानुष्ठानात्स्वर्गादिसुखं विपर्ययस्तु असंतोषः दुःखमूलं तत्र धनार्जनप्रयासेन प्रचुरदुःखोदयात् संपत्तौ च लोभात् १२ अतोन्यतमया वृत्त्या अवकृत्तमैककृत्त्यानिर्वाहसंभवे सत्यन्यतमयेति यद्यपि तेवकृत्तमसत्संभवे षट्कर्मको भवत्येषामिति विहितत्वाद्यथैकत्वावगमात् वृत्तविधायकत्वाच्च न्यतमया वृत्त्येत्यनुवादकत्वादेकत्वमविवक्षितं उक्तवृत्तीनामन्यतमया वृत्त्या जीवन्स्नातको ब्राह्मण इमानि वक्ष्यमाणानि यथासंभवं स्वर्गायुर्यशोहितानि व्रतानि कुर्यादिदं मया कर्तव्यमिदं मया कर्त व्यमित्येवं विधिसंकल्पविषयो व्रतं १३ वेदोदितं स्वकं कर्म वेदोदितं वेदोक्तं स्मार्तमपि वेदमूलत्वा

संतोषं परमास्थाय सुखार्थी संयतो भवेत् संतोषमूलं हि सुखं दुःखमूलं विपर्ययः १२ अतोन्यतमया वृत्त्या जीवंस्तु स्नातको द्विजः स्वर्गायुष्ययशस्यानि व्रतानीमानि धारयेत् १३ वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिं १४ नेहेतार्थान्प्रसंगेन न विरुद्धेन कर्मणा न विद्यमानेष्वर्थेषु नार्त्यामपि यतस्ततः १५ इंद्रि येष्वर्थेषु सर्वेषु न प्रसज्येत कामतः अतिप्रसक्तिं चैतेषां मनसा संनिवर्तयेत् १६

द्वेदोक्तमेव स्वकं स्वाश्रमोक्तं नित्यं यावज्जीवमतंद्रितोऽनलसः कुर्यात् हि हेतौ यस्मात्तत्कुर्वन्यथाशक्ति। यथाशक्ति परमां गतिं मोक्षलक्षणां प्राप्नोति नित्यकर्मानुष्ठानाद्यपचये सति निःपापान्तःकरणेन ब्रह्म साक्षात्कारान्मोक्षावाप्तेः तदुक्तं मोक्षधर्मे ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः तथादर्शतलप्र ख्ये पश्यत्यात्मानमात्मनि आत्मन्येवान्तःकरणे १४ नेहेतार्थान्प्रसंगेन प्रसज्यते यत्र पुरुषः स प्रसं गो गीतवादित्रादिः तेनार्थान्नार्जयेन्नापि शास्त्रनिषिद्धेन अयाज्ययाजनादिना न च विद्यमाने धने। अपि प्रकारान्तरासंभवे यतस्ततः पतितादिनो न च विद्यमाने धने वृत्तिपक्षकारान्तरासंभवे यतस्ततः पतितादिभ्योपि १५ इंद्रियार्थेषु सर्वेषु इंद्रियाणामर्थाः रूपरसगन्धस्पर्शादयः तेषु शिष्टनि षि द्धेष्वपि स्वदारसुरतादिषु न प्रसज्येत अतिप्रसक्तिः सततसेवनात्मिका न कुर्यात् कामतः उपभोगार्थं अतिप्रसक्तिनिवृत्त्युपायमाह अतिप्रसक्तिं चैतेषां विषयाणामस्थिरत्वस्वर्गापवर्गात्मकश्रेयोवि

71

षट्कर्मैको भवत्येषां एषां गृहस्थानां मध्ये कश्चिद्गृहस्थो यो बहुपोष्यवर्गः स ऋतामृतेनायाचितभै-
क्ष्येण कृषिवाणिज्यैः पंचभिस्तेन चैवेत्यत्र चशब्दसमुच्चितेन कुसीदेन सह षड्भिः कर्मभिः षट्कर्मा भ-
वति षड्भिर्वर्तते जीवति कृषिवाणिज्यकुसीदानामेतान्यस्वयंकृतानीति गौतमीयानीत्युक्तेः अन्यः पुन-
रल्पपरिकरः त्रिभिर्याजनाध्यापनप्रतिग्रहैर्ब्राह्मणैरेतैर्लोकसंगृहीतैः प्रवर्तते अपरो
न्यूनोऽल्पतर्षः अपरः पुनः प्रतिग्रहः प्रतिग्रहइति वक्ष्यमाणत्वात्परित्यागेन द्वाभ्यां याजना-
ध्यापनाभ्यां वर्ततेऽत्र त्र्यहैकत्वाच्चतुर्थः पुनः ब्रह्मसत्रेणाध्यापनेन जीवति मेधातिथिस्तु
एषां कुशूलधान्यकादीनां मध्यादेकः कुशूलधान्यकः ऋतामृतेनोञ्छशिलायाचितायाचितकृषिवा-
णिज्यैः षट्कर्मा भवति षड्भिर्जीवति अन्यो द्वितीयः कुम्भीधान्यकः कृषिवाणिज्यपरित्यागेन तत-
त्यागेन याचितोञ्छशिलायाचितानां मध्यादिच्छया त्रिभिर्वर्तते चतुर्थः एकस्त्र्यहैहिको याचित

षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते । द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ॥ ९ ॥ व-
र्तयंस्तु शिलोञ्छाभ्यामग्निहोत्रपरायणः । इष्टीः पार्वायणान्तीयाः केवला निर्वपेत्सदा ॥ १० ॥
न लोकवृत्तिं वर्तेत वृत्तिहेतोः कथंचन । अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकां ॥ ११ ॥

त्यागेन विहायोञ्छशिलायाचितानां मध्यादिच्छया द्वाभ्यां वर्तते चतुर्थः पुनरश्वस्तनिको ब्रह्मसत्रेण
जीवति ब्रह्मसत्रं शिलोञ्छयोः अन्यतरा वृत्तिः ब्राह्मणे ब्राह्मणस्य सततभवत्वात्सत्रमिव ब्रह्मसत्र-
मित्याह ९ वर्तयंस्तु शिलोञ्छाभ्यां शिलोञ्छाभ्यां जीवन्पुनस्त्र्यधिककर्मत्यागानुष्ठानासामर्थ्यादे
अग्निहोत्रनिष्ठ एव स्यात् दर्शपौर्णमासीयास्त्विष्टीः केवला अवतिष्ठेत पर्वचायनं च पर्वायने तयोः र-
तः तत्र भवा दर्शपौर्णमासाग्रयणेष्टिकाः १० न लोकवृत्तं वर्तेत लोकवृत्तमसत्प्रियाख्या-
नं विचित्रपरिहासकथाख्यानं जीविकार्थं न कुर्यात् अजिह्मां मयायुक्ताम् अभिधानादिपापरहितां
अशठां दम्भादिव्याजशून्यां शुद्धां वैश्यादिवृत्तेरसंकीर्णां ब्राह्मणस्य जीविकामनुतिष्ठेदनेका
पत्यानुग्रह नामनुष्ठायोपजीवतीति कर्मता ११

म-स्मृ- टी- ७२

वाच्येके जुह्वति प्राणं एके गृहस्थाश्रमविदो वाचि प्राणं वायौ च यज्ञनिर्वृत्तिमक्षयफलां जानं
तः एततं वाचि प्राणं जुह्वति वाचं च प्राणे आयमनेन वाचि प्राणं जुहोमीति अभ्यासमात्रेणो ऽन्य
ता प्राणे वाचं जुहोमीति ध्यानमात्रमिति विधीयते न तावत् कौषीतकिरहस्यब्राह्मणं यद्वै पुरुषो भा
षते न तावत् प्राणितुं शक्नोति प्राणं तदा वाचि जुहोति यावद्धि पुरुषः प्राणिति न तावद्भाषितुं
शक्नोति वाचं तदा प्राणे जुहोति एते पुनरनन्ते अमृते आहुती जाग्रच्च स्वपंश्च सततं जुहोतीत्यप
या अथ या अन्या आहुतयः कर्ममय्यो हि भवन्त्येके तस्मै तन्मूर्वे विद्वांसो ऽग्निहोत्रं जुहवाञ्चक्रुरिति २३ ज्ञानेनै
वापरे विप्राः अपरे ब्राह्मणा ब्रह्मनिष्ठाः सर्वदा ब्रह्मज्ञानेनैव एतैर्मखैर्यजन्ति एतान् पञ्चयज्ञान्
नतिष्ठन्ति कथमेतदित्याह ज्ञानं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतिषु प्रसिद्धं एतन्मूला मे नेषां यज्ञा

72

वाच्येके जुह्वति प्राणं प्राणे वाचं च सर्वदा । वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिमक्षयां ॥ २३ ॥
ज्ञानेनैवापरे विप्राः यजन्त्येतैर्मखैः सदा । ज्ञानमूलां क्रियामेषां पश्यन्तो ज्ञानचक्षुषा ॥
अग्निहोत्रं च जुहुयादाद्यन्ते द्युनिशोः सदा । दर्शेन चार्द्धमासान्ते पौर्णमासेन चैव हि ॥ २५ ॥

नां क्रियामनुतिष्ठन्ति ज्ञानं तत्त्वमतेनेनेति ज्ञानं च चक्षुरिव चक्षुः ज्ञानचक्षुषा उपनिषदां सर्वं खे
ल्विदं ब्रह्म तज्जलानिति आदिकया पंचयज्ञानपि ब्रह्मोपनिषत्कान् ब्रह्मात्मकान् पश्यन्तः संपादयन्
ति पंचयज्ञफलमश्नुवन्त इत्यर्थः श्लोकत्रयेण ब्रह्मनिष्ठानां वेदसंन्यासिनां गृहस्थानामयं
विधयः २४ अग्निहोत्रं च जुहुयात् उदितहोमपक्षे दिनस्यादौ निशायाश्चादौ अनुदितहो
मपक्षे दिनस्यान्ते निशायाश्चान्ते यद्वा उदितहोमपक्षे दिनस्यादौ दिनान्ते अनुदित
होमपक्षे निशायादौ निशान्ते वाग्निहोत्रं कुर्यात् अर्द्धमासान्ते कृष्णप
क्षान्ते दर्शाख्येन कर्मणा शुक्लपक्षान्ते च पौर्णमासाख्येन यजेत [illegible] २५

म. ७२

सर्वान्परित्यजेदर्थान् स्वाध्यायस्य विरोधिनोऽर्थान् यानि तानि गृहोपकरणानि कृषि लोकयात्रादयः तान्स
र्वान्परित्यजेत् कथं तर्हि भृत्यानां पोषणमित्यत आह यथा तथा येन केनाप्युपायेन स्वाध्यायावि
रोधिनाऽध्यापयन् यस्मात्सा स्नातकस्य कृतकृत्यता यत्स्वाध्यायाध्ययनतत्परः १७ व
यसः कर्मणोऽर्थस्य वयसः क्रियाया धनस्य श्रुतस्य कुलस्य चानुरूपेण वेषवाग्बुद्धीः
आचरन् लोके प्रवर्तेत यथा यौवने वस्त्रगन्धानुलेपनादिकरणं वार्द्धके पवर्गानुसारि।
णां वाग्बुद्धिश्च एवं कर्मादिष्वप्यूह्यं १८ बुद्धिवृद्धिकराण्याशु वेदार्थविज्ञानविशेषं बुद्धिवृद्धि
जनकानि व्याकरणमीमांसास्मृतिपुराणन्यायादिशास्त्राणि तथा धन्यानि धनाय हितानि अर्थ
शास्त्राणि बार्हस्पत्यौशनसादीनि तथा हितानि दृष्टोपकारकाणि वैद्यकज्योतिषादीनि तथा

सर्वान्परित्यजेदर्थान्स्वाध्यायस्य विरोधिनः यथा तथाध्यापयंस्तु सा ह्यस्य कृतकृत्यता
वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च वेषवाग्बुद्धिसारूप्यमाचरन्विचरेदिह १८
बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान्
यथा यथा हि पुरुषः शास्त्रं समधिगच्छति तथा तथा विजानाति विज्ञानं चास्य रोचते २०
ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा नृयज्ञं पितृयज्ञं च यथाशक्ति न हापयेत् २१ ए
तानेके महायज्ञान्यज्ञशास्त्रविदो जनाः अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति २२

पर्यायकथनेन वेदार्थावबोधकान्निगमाख्यांश्च ग्रन्थान्नित्यं पर्यालोचयेत् १९ यथा यथा हि
पुरुषः यस्माद्यथा पुरुषः शास्त्रमभ्यस्यति तथा तथा विशेषेण जानाति तथास्य ज्ञानं विषय
मप्यस्य विज्ञानं रोचते उज्ज्वलं भवतीति दीप्यते वा उत्तरेऽभिलाषविषयत्वाभावात् रुच्यर्थानां प्रीय
माण इति न संप्रदानसंज्ञा २० ऋषियज्ञं देवयज्ञं स्वाध्यायादीन्पञ्च यज्ञान्यथाशक्ति न त्यजेत्
नतो याध्यायविहितानामपि पञ्चयज्ञानामिह निर्देश उत्तरत्र विशेषविधानार्थं स्नातकव्रत
त्वबोधनार्थं च २१ एतानेके महायज्ञान् एके गृहस्था ब्राह्मपरयज्ञानुष्ठानशास्त्रज्ञा एता
न्पञ्च महायज्ञान्बाह्यान्यज्ञानुष्ठानकर्माणि बहिरचेष्टमानाः पञ्चसु बुद्धीन्द्रियेष्वेव पञ्चरूपज्ञा
नादिसंयमं कुर्वन्तः संपादयन्ति पञ्च यज्ञानां होमत्वानुपपत्तेः संपादनार्थो जुहोतिः २२

व

वेदविद्याव्रतस्नातान् वेदविद्याव्रतस्नातकव्रतस्नातकोभयस्नातकास्त्रयो गृह्यंते यथाह हारीतः
यः समाप्य वेदं समावर्त्तते स व्रतस्नातकः उभयं समाप्य यः समावर्त्तते स विद्याव्रतस्नातकः
यद्यपि स्नातकधर्मतेनैव स्नातकमात्रप्राप्तिस्तथापि सातिशयत्वं विवक्षितं तान्स्नातका
न् श्रोत्रियान् हव्यकव्येन पूजयेद्विपरीतान् पुनर्वर्जयेत् ॥ शक्तितोऽपचमानेभ्यो अपचमा
ना ब्रह्मचारिपरिव्राजकाः पाषंडादयश्च ब्रह्मचारिपरिव्राजकानामप्यन्नदानं पचमानापेक्ष
यातिशयार्थं स्नातकव्रतत्वार्थं च पुनरुच्यते मेधातिथिस्तु गोविंदराजो तु भिक्षां च भिक्षवे दद्या
दतिथिवद्ब्रह्मचारिणे इति ब्रह्मचारिपरिव्राजकयोरुक्तत्वात् पाषंड्यादिविषयत्वमेवास्य
वचनस्योक्तवान् तुः स्वकुटुंबानुरोधेन च वृक्षादिपर्यंतेभ्यः प्राणिभ्योपि जलादिना संविभागः कर्त्त
व्यः ॥ राजतो धनमन्विच्छेत् न याचेः प्रतिगृह्णीयादराजन्यप्रसूतित इति निषेधाद्राजश

वेदविद्याव्रतस्नातान् श्रोत्रियान् गृहमेधिनः पूजयेद्धव्यकव्येन विपरीतांश्च वर्जयेत् ॥
शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना संविभागश्च भूतेभ्यः कर्त्तव्योऽनुपरोधतः ॥
राजतो धनमन्विच्छेत् संसीदन् स्नातकः क्षुधा याज्यान्तेवासिनोर्वापि न त्वन्यत इति स्थितिः

क्षत्रियान्नृपतिपरः स्नातकः क्षुधावसीदति द्विजातिप्रतिग्रहसंभवेपि यथाशास्त्रप्रव
र्त्तितः क्षत्रियाद्राज्ञो याज्यशिष्याभ्यां च प्रथमं धनमभिलषेत् राज्ञो महाधनत्वे पीडाविरहात्
याज्यशिष्ययोश्च कृतोपकारतया प्रत्युपकारप्रवणत्वात् तदसंभवे त्वन्यस्मादपि द्विजाद्ध
नमाददीत तदभावे तु सर्वतः प्रतिगृह्णीयात् द्वितीयपदमेव त्वपि एवं चानापदि प्रथमं क्षत्रि
यान्नृपयाज्यशिष्येभ्यः प्रतिग्रहनियमार्थमिदं वचनं अत एवाह न त्वन्यत इति स्थितिः धा
न्यसमर्पादानं च संसीदन्नित्यभिधानादापद्विषयत्वमस्य वाच्यं अन्नाप्रत्यकरणत्वात् संसीद
न्नित्यस्य च उपात्तधनाभावपरत्वात् क्षुधनाभावमात्रमापादितं तस्मिन् सति विहितोपायासं
भवः अन्यथास्य च प्रत्यवायोप्यापद्यते स्यात् यदि चापद्विषयत्वमस्य भवेत् तदा न त्वन्यत
इत्यनेन न सर्वतः प्रतिगृह्णीयादिति विरुध्यते यच्चापत्स्वकारणे सीदद्भिः कुप्यमिच्छद्भिर्द
नं वा पृथिवीपतिः याच्यः स्यादिति नानर्हन्नृपविषयमेवं च राजादिप्रतिग्रहसंभवे ॥

सस्यान्तेनवसस्येष्ट्या। पूर्वार्जितधान्यादिसस्ये समाप्तेऽपूर्वार्जितनवान्नमितिहृत्वकारवचनात्समाप्ते
पि पूर्वसस्ये नवसस्येष्ट्यान्नाग्रयणेन यजेत सस्यत्वयस्यानियतत्वात् धनिनां बहुहायनजीवनोचित
धान्यसंभवाच्च सस्यान्तग्रहणेन नवसस्यान्निरपि प्रेतानियतत्वात्सः अन्तहेतुनिमित्तस्योमन्त्रैः
ऋतुः संवत्सर इति मता अयणेन चत्वारो मासा ऋतवस्तदन्तेऽध्वरैश्चातुर्मास्यैर्यागैर्यजेत्
अयनयोरुत्तरदक्षिणयोरादौ पशुनायजेत् यथासंभवं पशुयागमनुतिष्ठेत् ज्योतिः शास्त्रे
नक्षत्रानुप्रतिपदादिवर्षगणनात् शिशिरेणवर्षणा समाप्ते वसन्ते सोमसाध्यैरग्निष्टोमा
दियागैर्यजेत २६ नानिष्ट्वा नवसस्येष्ट्या आहिताग्निर्द्विजो दीर्घमायुर्जीवितुमिच्छुर्नाग्रय
णमकृत्वा नवान्नं भक्षयेत् नच पशुयागमकृत्वा मांसमश्नीयात् नवेनानर्चिता ह्यस्य दोघ

सस्यान्तेनवसस्येष्ट्या पशुनाग्निश्चामान्द्विजः नवान्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः
नवेनानर्चिता ह्यस्य पशुहव्येन चाग्नयः प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्धिनः २८
आसनाशनशय्याभिरद्भिर्मूलफलेन वा नास्य कश्चिद्वसेद्गेहे शक्तितोऽनर्चितोऽतिथिः २९
पाषंडिनो विकर्मस्थान्बैडालव्रतिकाञ्छठान् हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्

कथनानिष्ट्वामनयोराह यस्मान्नवहव्येन पशुहव्येनानेन चानर्चिता अकृताग्रयणेन वान्नमांसा
भिलाषिणोऽस्याहिताग्नेः प्राणानेवात्तुमिच्छन्ति गर्द्धोऽभिलाषातिशयः गृध्रपर्जन्तस्य गृध्येसो
ऽनितिगर्द्धी मत्वर्थोऽयन् २८ आसनाशनशय्याभिः यथाशक्त्यासनभोजनशय्यादिभिर
नर्चितोऽतिथिरस्य गृहस्थस्य गृहे नवसेत् अनेन यथाशक्तितोऽतिथिमर्चयेदित्युक्तमप्युत्तरार्थम
नूद्यते २९ पाषंडिनो विकर्मस्थान् पाषंडिनो वेदबाह्यव्रतलिंगधारिणः तेच भिक्षुक्ष
पणकादयः प्रतिषिद्धवृत्तिजीवनाः वैडालव्रतिकवकवृत्तीवक्ष्यमाणलक्षणौ शठाः वे
दार्थे अश्रद्दधानाः हैतुका वेदविरोधितर्कव्यवहारिणः एतानतिथिकाले उपस्थितान्वा
ङ्मात्रेणापि न पूजयेत् पूजार्हितान्नदानमात्रं तथाऽतिथौ पचने अस्य त्वनुज्ञातमेव ३०

म॰स्मृ॰
टी॰
७४

रजसाभिप्लुतांनारीं यस्माद्रजस्वलांस्त्रियंपुरुषस्योपगच्छतः प्रज्ञावीर्यबलचक्षूंषिविनश्यंति
तस्मात्तांनोपगच्छेत् ४१ तांविवर्जयतस्तस्य तांरजस्वलामनुपगच्छतः तस्यप्रज्ञादयोवर्द्धंते तस्मा
त्तांनोपगच्छेत् ४२ नाश्नीयाद्भार्ययासार्द्धं भार्ययासहैकपात्रेनाश्नीयादेनांचभुंजानांक्षुवतींजृं
भमाणांकुर्वतींयथासुखंनिर्यंत्रणादेशावस्थितांचनेक्षेत ४३ नांजयंतींस्वकेनेत्रे नेत्रयोरंजनं
कुर्वतींतैलाभ्यक्तांअनावृतांस्तनावरणरहितांनग्नांनेक्षेत चद्विजमितिवक्ष्यमाणत्वाद
पत्यंप्रसवंतींब्राह्मणोनेक्षेत ४४ नान्नमद्यादेकवासाः एकवस्त्रोनान्नंभुंजीत यस्माच्छ्राद्

रजसाभिप्लुतांनारींनरस्यह्युपगच्छतः प्रज्ञातेजोबलंचक्षुरायुश्चैवप्रहीयते ४१ तां।
विवर्जयतस्तस्यरजसासमभिप्लुतां प्रज्ञातेजोबलंचक्षुरायुश्चैवविवर्द्धते ४२ नाश्नी
याद्भार्ययासार्द्धंनैनामीक्षेतचाश्नतीं क्षुवतींचैवनेक्षेततेजस्कामोद्विजोत्तमः ४३ उ
येत्स्नातकोविद्वान्नेक्षेतनग्नांपरस्त्रियं सरहस्यंचसंवादंपरस्त्रीचविवर्जयेत् ४४ ना
न्नमद्यादेकवासाननग्नःस्नानमाचरेत् नमूत्रंपथिकुर्वीतनभस्मनिनगोव्रजे ४५।
नफालकृष्टेनजलेनचित्यांनचपर्वते नजीर्णदेवायतनेनवल्मीकेकदाचन ४६ नस
सत्त्वेषुगर्तेषुनगच्छन्नापिचस्थितः ननदीतीरमासाद्यनचपर्वतमस्तके ४७

नवासोरहितोनस्नायात् मूत्रग्रहणमधःकायमलविसर्गोपलक्षणार्थंतेनमूत्रपुरीषवर्त्म
निभस्मनिगोष्ठेचनकुर्यात् ४५ नफालकृष्टेनजले तथाफालकृष्टेक्षेत्रादौउदकेअग्न्यर्थे
कृतेष्टकाचयेपर्वतेचिरंतनदेवतागारेकृमिकृतमृत्तिकाचयेचवल्मीकेमूत्रोत्सर्गंनकदाचित्कु
र्यात् ४६ नससत्त्वेषुगर्तेषु तथासप्राणिषुबिलेषुनव्रजन्नचास्थितोननदीतटमाश्रित्य
नापिपर्वतशृंगेमूत्रपुरीषेकुर्यात् पर्वतनिषेधादेवतच्छृंगनिषेधसिद्धेःपुनःपर्वतशृंगनि
षेधस्तदितरपर्वतविकल्पार्थः तत्रैवाविकल्पस्यासम्भवान्नप्राप्तोसामान्यनिषेधेवैयर्थ्या
त्तथावस्थितोत्रविकल्पः अतोनात्यंतस्पर्वतेनदोषः ४७

नसीदेत्स्नातकोविप्रः विप्रादिप्रोगात्प्रतिग्रहणात्कोपिस्नातकोब्राह्मणउक्तोराजादिप्रतिग्रहला
भेसतिनचक्षुधावसन्नोभवेत् नचधनसंभवतिजीर्णमलिनेचवाससीबिभृयात् ३४ क्लृप्तके
शनखश्मश्रुः वापनेनछेदनेनवाकेशनखश्मश्रुतपःक्लेशसहःशुक्लवासाअपितथाचस्वा
ध्यायेवेदाभ्यासउद्युक्तः औषधोपयोगादिनाआत्महितपरःस्यात् ३५ वैणवींधारयेद्यष्टिं
वैणवंदण्डमुदकसहितंकमण्डलुंयज्ञोपवीतंकुशमुष्टिंशोभनेचसौवर्णेकुण्डलेधारयेत् ३६
नेक्षेतोद्यन्तमादित्यं उद्यन्तमस्तमयन्तंचसर्पविविवंसंपूर्णनेत्रेणउपसृष्टंग्रहोपरक्तंवस्त्रा
द्युपसर्गग्रस्तंवाजलप्रतिबिम्बितंनभसोमध्यंगतंमध्यंदिनसमये ३७ नल

नसीदेत्स्नातकोविप्रः क्षुधाशक्तः कथंचन नजीर्णमलवद्वासाभवेच्चविभवेसति ३४
क्लृप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः स्वाध्यायेचैवयुक्तः स्यान्नित्यमात्महितेषुच
वैणवींधारयेद्यष्टिंसोदकंचकमण्डलुं यज्ञोपवीतंवेदंचशुभेरौक्मेचकुण्डले ३६ ने
क्षेतोद्यन्तमादित्यंनास्तंयान्तंकदाचन नोपसृष्टंनवारिस्थंनमध्यंनभसोगतं ३७
नलङ्घयेद्वत्सतन्त्रींनप्रधावेच्चवर्षति नचोदकेनिरीक्षेतस्वरूपमितिधारणा ३८
मृदंगांदैवतंविप्रंघृतंमधुचतुष्पथं प्रदक्षिणानिकुर्वीतप्रज्ञातांश्चवनस्पतीन् ३९
नोपगच्छेत्प्रमत्तोपिस्त्रियमार्त्तवदर्शने समानशयनेचैवनशयीततयासह ४०

ङ्घयेद्वत्सतन्त्रीं वत्सबन्धनरज्जुंनलङ्घयेत् वर्षतिमेघेनप्रधावयेत् नचजलेदेहप्रतिबिम्बंनिरी
क्षेतइतिशास्त्रनिश्चयः ३८ मृदंगांदैवतंविप्रं पुरस्थितःसन्संमुखावस्थितान्मृत्ति
कागोपाषाणादिदेवताब्राह्मणघृतक्षौद्रचतुष्पथमहाप्रमाणाख्यातवृक्षान्प्रदक्षिणानि
कुर्वीत प्रदक्षिणानीतिनपुंसकमनपुंसकेनेकवद्भावस्यान्यतरस्यामितिनपुंसकत्वं ३९ नो
पगच्छेत्प्रमत्तोपि प्रमत्तःकामार्त्तोपिरजोदर्शनेनिषिद्धस्पर्शादिनत्रुस्पेतस्त्रियंनोपगच्छेत्स
मानेशयनेचैवतामासायाः चतस्रोरात्रीर्निवर्जितः इतिद्वाभ्यांपङ्क्तिर्गतावाचंयमनारायणः

75

अधस्तान्नोपदध्यात् खट्वादिस्थोऽधस्तादंगारस्थाल्यादिकंनकुर्यात् नचाग्निमतिलंघ्यगच्छेत्
चरणतः पाददेशेऽग्निंस्थापयेत् नप्राणपीडाकरंकर्मकुर्यात् ५४ नाश्नीयात्संधिवेलायां
संध्याकालेभोजनंग्रामांतरगमनंनिद्रांनकुर्यात् नचरेखादिनाभूमिमुल्लिखेत् नचमाल्यं
मूर्ध्नःस्वदेहात्स्वयमपनयेत् अर्थादन्येनापनयेदित्युक्तं ५५ नाप्सुमूत्रंपुरीषंवा मूत्र
पुरीषश्लेष्माणंमूत्राद्यमेध्यलिप्तंचवस्त्रमन्यद्वाभक्तादि छिद्राद्यमेध्यरुधिरंविषाणिकृत्रि
माकृत्रिमाणिजलेनप्रक्षिपेत् ५६ नैकःशून्यगृहेस्वप्यात् उत्कृष्टजनंनवागृ
हेनैकःशयीत विद्यादिभिःविभूत्यादिअधिकंचसुप्तंनप्रबोधयेत् रजस्वलया

अधस्तान्नोपदध्याच्चनचैनमभिलंघयेत् नचैनंपादतःकुर्यान्नप्राणाबाधमाचरेत् ५४
नाश्नीयात्संधिवेलायांनगच्छेन्नापिसंविशेत् नचैवविलिखेद्भूमिंनात्मनोपहरेत्स्रजं
नाप्सुमूत्रंपुरीषंवाष्ठीवनंवासमुत्सृजेत् अमेध्यलिप्तमन्यद्वालोहितंवाविषाणिवा ५६
नैकःसुप्याच्छून्यगेहेश्रेयांसंप्रबोधयेत् नोदक्ययाभिभाषेतयज्ञंगच्छेन्नचावृतः ५७
अग्न्यगारेगवांगोष्ठेब्राह्मणानांचसन्निधौ स्वाध्यायेभोजनेचैवदक्षिणंपाणिमुद्धरेत् ५८
नवारयेद्गांधयंतींनवाचक्षीतकस्यचित् नदिवींद्रायुधंदृष्ट्वाकस्यचिद्दर्शयेद्बुधः ५९
नाधार्मिकेवसेद्ग्रामेनव्याधिबहुलेभृशं नैकःप्रपद्येताध्वानंनचिरंपर्वतेवसेत् ६०

सहभाषणंकुर्यात् यज्ञंचावृतवरणोनृत्विक्नगच्छेत् दर्शनापेक्षया गच्छेत् दर्शनार्थं
काममितिगौतमवचनात् ५७ अग्न्यगारेगवांगोष्ठे अग्निगृहेगवांनिवासस्थानेब्राह्मणानां
बहूनांसमीपेस्वाध्यायभोजनकालयोश्चदक्षिणपाणिंवस्त्राद्बहिःकुर्यात् ५८
नवारयेद्गांधयंतीं गांजलंक्षीरंवापिबंतींननिवारयेत् दोहनार्थवारणादन्यत्रायंनिषेधः
नापिपरस्मैपयःपिबंतींतस्यकथयेत् नचेंद्रधनुराकाशेदृष्ट्वादर्शनंनिषेधदोष
नःकस्यचिद्दर्शयेत् ५९ नाधार्मिकेवसेद्ग्रामे अधार्मिकजनबहुलेग्रामेनवसेत्

७५

वाय्वग्निविप्रमादित्यं वायुमग्निं विप्रं सूर्यं जलं गां च पश्यन् तदापि मूत्रपुरीषोत्सर्गं न कुर्यात् वा-
योररूपद्रव्यत्वेन दर्शनासंभवे वायुप्रेरितपत्रतृणकाष्ठादिदर्शनं निषेधार्थं ४८ प्रत्यग्निं प्र-
तिसूर्यं च वाय्वग्निविप्रमित्यनेन मेहतो वाय्वादीनां दर्शनं निषिद्धं अनेन तत्पश्यतोपि संमुखतो
न तन्निषिध्यते अग्निसूर्यचंद्रजलब्राह्मणगोवाताभिमुखत्वे मूत्रपुरीषे कुर्वतः प्रज्ञा नश्यतीति त-
स्मादेतन्न कर्तव्यं प्रतिवातमित्यस्य स्थाने प्रतिसंध्यमित्यन्ये पठंति ४९ तिरस्कृत्योच्चरेत्का-
ष्ठं अंतर्धाय काष्ठादीनि भूमौ मौनी प्रावृतशरीरोवगुंठितशिरा मूत्रपुरीषोत्सर्गं कुर्यात्
शुष्कतृणादिकाष्ठग्रहणं पर्णादीनां दलेन वा मृन्मयैर्भाजनैर्वापि अंतर्धायैव संध्यामिति वायुपु-
राणवचनात् शुष्काणि काष्ठपत्रतृणानि ज्ञेयानि ५० मूत्रोच्चारसमुत्सर्गं मूत्रपुरीषोत्स-

प्रत्यग्निं प्रतिसूर्यं च प्रतिसोमोदकद्विजं । प्रतिगं प्रतिवातं च प्रज्ञा नश्यति मेहतः ४९
तिरस्कृत्योच्चरेत्काष्ठलोष्ठपत्रतृणादिना । नियम्य प्रयतो वाचं संवीतांगोवगुंठितः ५०
मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः । दक्षिणाभिमुखो रात्रौ संध्ययोश्च यथा दिवा
छायायामंधकारे वा रात्रावहनि वा द्विजः । यथासुखमुखः कुर्यात्प्राणबाधाभयेषु च
नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियं । नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् ५२

र्गमहनि संध्ययोश्च उत्तराभिमुखो रात्रौ च दक्षिणाभिमुखः कुर्यात् धरणीधरस्तु समस्योना-
म्नायमेतत्स्मृतिवर्तमानं पदं पठित्वा चेतसो बुद्धेरनायासोत्तिव्याख्यातवान् पारंपरीणमाम्ना-
यं हित्वा विद्वद्भिः पाठांतरं व्याचक्षाणस्तद्वेदनधरणीधरः ५१ छायायामंधकारे वा रा-
त्रौ छायायामंधकारे वा दिवि विशेषात्स्थाने सति चोरव्याघ्रादिकृतप्राणविनाशभयेषु च यथे-
प्सितमुखो मूत्रपुरीषे कुर्यात् ५२ नाग्निं मुखेनोपधमेत् नाग्निं मुखेन ध्मातव्यः किंतु व्यज-
नादिना नग्नां स्त्रियं मैथुनादन्यत्रेति मेधातिथिव्याख्यानं गृहस्य दर्शनं मैथुनव्यतिरेकेण ग्रा-
ह्यं न पश्येत् अमेध्यं मूत्रपुरीषादिकं नाग्नौ क्षिपेत् प्रतापयेदिति अग्नावेवास्य पादयो-
र्निषेधः साक्षान्न तापयेत् वस्त्रादिनापि पित्वा वेदनेन विरोधः ५३

म॰ स्मृ॰
टी॰
७९

उपानहौ च वासश्च उपानद्वस्त्रयज्ञोपवीतालंकारपुष्पमालाकमंडलून्परोपभुक्तान्न धारये
त् ॥६६॥ नाविनीतैर्भजेद्धुर्यैः अश्वगजादिभिर्वाहनैरदमितैः तथा व्याधिना च पीडितैर्न भिन्न
शृंगाक्षिखुरैः छिन्नवालधिभिश्च न यायात् ॥६७॥ विनीतैस्तु व्रजेन्नित्यं दमितैः शीघ्रगा
मिभिः शुभलक्षणलक्षणोपेतैः शोभनवर्णैर्मनोज्ञाकृतिभिः प्रतोदेनात्यर्थमपीडयन्ग
च्छेत् ॥६८॥ बालातपः प्रेतधूमो प्रथमोदितादित्यातपो बालातपः स च मुहूर्तत्रयं याव
दिति मेधातिथिः कन्यार्कातप इत्यन्ये प्रेतधूमो दह्यमानशवधूमः भग्नासनं च एतानि व

उपानहौ च वासश्च धृतमन्यैर्न धारयेत् उपवीतमलंकारं स्रजं करकमेव च ॥६६॥
नाविनीतैर्भजेद्धुर्यैर्न च क्षुद्व्याधिपीडितैः न भिन्नशृंगाक्षिखुरैर्न वालधिविरूपितैः ॥६७॥
विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः वर्णरूपोपसंपन्नैः प्रतोदेनातुदन्भृशं ॥६८॥
बालातपः प्रेतधूमो वर्ज्यं भिन्नं तथासनं न छिंद्यान्नखलोमानि दंतैर्नोत्पाटयेन्नखान् ॥६९॥
न मृल्लोष्टं च मृद्नीयान्न छिंद्यात्करजैस्तृणं न कर्म निष्फलं कुर्यान्नायत्यामसुखोदयं ॥७०॥

र्जनीयानि नखानि लोमानि च करजैर्नतानि न छिंद्यात् [illegible] दन्तैश्च नखान्नोत्पाटयेत् ॥६९॥ न मृ
ल्लोष्टं विमृद्नीयात् नाकारणं मृल्लोष्टं मृद्नीयात् [illegible] नखैर्न छिंद्यात् [illegible] वचना
त्तिः प्रयोजनं मृल्लोष्टमर्दनं तृणच्छेदनं [illegible] कुर्यात् न कुर्वीत वृथाचेष्टामित्यनेन
निषेधसिद्धावपि दोषभूयस्त्वं प्रायश्चित्तगौरवं च दर्शयितुं विशेषेण निषेधः अतएवा
नंतरं लोष्टमर्दनं निर्दिष्टमिति दृष्टादृष्टफलशून्यं च कर्म न कुर्यात् ननु न कुर्वीत वृथा
चेष्टामित्यनेन पुनरुक्तिः उच्यते चेष्टा देहव्यापारः वृथाचेष्टाशब्देन निषिद्धः अनेन
संकल्पात्मकं मानसं निषिध्यते यच्चायत्यामागामिकाले कर्म असुखोदयं यथाजीर्णा

न शूद्रराज्ये निवसेत् यत्र देशे शूद्रो राजा न तत्र वसेत् अधार्मिकजनैश्चावासितः परिवृते ग्रामादौ न
वसेत् नाधार्मिकावृत्तमनेन यत्राधार्मिकाः वसंति तत्र वासो निषिद्धः अनेन वासितः परिवृत इत्य
पुनरुक्तिः पाषंडिभिश्च वेदवाह्यलिंगधारिभिर्व्याप्ते [illegible] चंडालादिभिश्चांत्यजैरुपद्रुते न व
सेत् ६१ न भुंजीतोद्धृतस्नेहं उद्धृतस्नेहं पिण्याकादि न भुंजीत अतितृप्तिं च वारद्वयमपि न कु
र्वीत् जठरं पूरयेदर्द्धमन्नैर्भागं जलेन तु वायोः संचरणार्थं तु चतुर्थमवशेषयेदिति पुरा
णवचनात् अतः प्रातः सूर्यास्तमये च भोजनं न कुर्यात् प्रातराशितो नितृप्तः सायं न भुंजी
त ६२ न कुर्वीत वृथा चेष्टां [illegible] पारं न कुर्यात् अंजलिना च जलं न पि

न शूद्रराज्ये निवसेन्नाधार्मिकजनावृते न पाषंडिजनाक्रांते नोपसृष्टेंत्यजैर्नृभिः ६१
न भुंजीतोद्धृतस्नेहं नातिसौहित्यमाचरेत् नातिप्रगे नातिसायं न सायं प्रातराशितः ६२
न कुर्वीत वृथा चेष्टां न वार्यंजलिना पिबेत् नोत्संगे भक्षयेद्भक्ष्यान्न जातु स्यात्कुतूहली ६३
न नृत्येदथवा गायेन्न वादित्राणि वादयेत् नास्फोटयेन्न च क्ष्वेडेन्न च रक्तो विरावयेत् ६४
न पादौ धावयेत्कांस्ये कदाचिदपि भाजने न भिन्नभांडे भुंजीत न भावप्रतिदूषिते ६५

वेत् उत्संगधारितमपूपमोदकादीन्न भक्षयेत् असति प्रयोजने किमेतदिति जिज्ञासाकुतूह
लं तन्न कदाचित्कुर्यात् ६३ न नृत्येन्न च गायेत अशास्त्रीयनृत्यगीतवाद्यानि नाचरेत्
न च सानुरागश्चो गर्दभादिविरावं कुर्यात् ६४ न पादौ धावयेत् कांस्ये कांस्यपात्रे पादौ कदा
चिन्न प्रक्षालयेत् [illegible] भिन्नमभिन्नं चेति तद्दोषप्रतिपेठीनसिवचना
देतद्व्यतिरिक्तभिन्नभांडे भोजनं न कुर्यात् यत्र मनो विचिकित्सति तद्भावदुष्टं न तत्र भुं
जीत ६५ श्रीरामाय नमः

अचक्षुर्विषयं दुर्गं गुल्मतरुलतागहनत्वेनाचक्षुर्गोचरं दुर्गमं सर्पादिदेशं नाक्रामेत् सर्प
चौरादेस्तत्र हि तस्य संभवात् मूत्रपुरीषे च यत्नतो न वीक्षेत दैवात्कदाचिद्दर्शनेन दोषः बाहुभ्यां
नदीं न संतरेत् ॥७७॥ अधितिष्ठेन्न केशांस्तु दीर्घमायुः जीवितुमिच्छन् केशादीन्नाधिरोहेत् भस्म
मृन्मयभाजनशकलानि कपालिकाः ॥७८॥ न संवसेच्च पतितैः पतितादिभिर्ग्रामान्तरवा
सिभिरपि न संवसेत् अतो नाधार्मिके वसेद्ग्राममित्युक्तो भेदः निषादाच्छूद्रकन्यायां जातः पु
क्कसः वक्ष्यति च जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः अवलिप्ता धनादिना गर्विताः
अन्त्या रजकादयः अन्त्यावसायिनो निषादस्त्रियां चाण्डालाज्जाता वक्ष्यति च निषाद

अचक्षुर्विषयं दुर्गं न प्रपद्येत कर्हिचित् न विण्मूत्रमुदीक्षेत न बाहुभ्यां नदीं तरेत् ॥७७॥
अधितिष्ठेन्न केशांस्तु न भस्मास्थिकपालिकाः न कार्पासास्थि न तुषान्दीर्घमायुर्जिजीविषुः
न संवसेच्च पतितैर्न चण्डालैर्न पुक्कसैः न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ॥७९॥
न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविःकृतं न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥८०॥

स्त्री तु चण्डालात्पुत्रमन्त्यावसायिनमिति ॥७९॥ न शूद्राय मतिं दद्यात् शूद्राय मतिं दृष्टार्थ
हितोपदेशं न दद्यात् धर्मोपदेशस्य पृथङ्निर्देशात् अदासशूद्रायोच्छिष्टमन्नं दद्यात्
दासाय तु वक्ष्यमाणत्वाददोषः द्वितोच्छिष्टं च भोजनमिति भोक्तुर्विधिः दातव्योच्छिष्टदान
निषेधोपि यथासंभवलब्धविषयः हविष्कृतमिति यस्यैकदेशो हुतः स हविःशेषो न दात
व्यः धर्मोपदेशश्च शूद्रस्य न कर्तव्यः व्रतं चास्य प्रायश्चित्तादिरूपं साक्षान्नोपदिशेत् किंतु
ब्राह्मणं मध्ये कृत्वा तदुपदेशविधानात् यथाहांगिराः यथा शूद्रं समासाद्य सदा धर्मपुरः
सरः अन्तरा ब्राह्मणं कृत्वा प्रायश्चित्तं समादिशेत् इति प्रायश्चित्तमिति सकलधर्मोपलक्ष

लोष्टमर्दीतृणच्छेदी लोष्टमर्दिता तृणच्छेत्ता नखखादिता च यो मनुष्यः स पापसूचकः खलोऽपः प
रस्य दोषानसतः सतो वा ख्यापयति वा ह्याभ्यन्तरशौचरहितः शीघ्रमेव देहधनादिना विनश्य
ति ७१ न विगृह्य कथां कुर्यात् साभिनिवेशां कथां शास्त्रीयेष्वर्थेषु लौकिकेषु वा न कुर्यात् के
शकलापाद्बहिर्माल्यं न धारयेत् गवां च पृष्ठेन यानं सर्वथैव गोपृष्ठादिव्यवधानेनापि ग्रथ।
मीवह पृष्ठेनेत्यभिधानात् गवा कृष्टशकटादिना न दोषः ७२ अद्वारेण तु नातीयात् प्रावारा।
द्यावृतं ग्रामं गृहं च द्वारव्यतिरिक्तप्रदेशेन प्राकारादिलङ्घनं कृत्वा न प्रविशेत् रात्रौ च वृक्षमू

लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः स विनाशं व्रजत्याशु सूचकोऽशुचिरेव च ७१
न विगृह्य कथां कुर्याद्बहिर्माल्यं न धारयेत् गवां यानं तु पृष्ठेन सर्वथैव विवर्जयेत् ७२
अद्वारेण तु नातीयाद्ग्रामं वा वेश्म वावृतं रात्रौ च वृक्षमूलानि दूरतः परिवर्जयेत् ७३
नाक्षैः क्रीडेत्कदाचित्तु स्वयं नोपानहौ हरेत् शयनस्थो न भुञ्जीत न पाणिस्थं न चासने ७४
सर्वं च तिलसंबद्धं नाद्यादस्तमिते रवौ न च नग्नः शयीतेह न चोच्छिष्टः क्वचिद्व्रजेत् ७५
आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत् आर्द्रपादस्तु भुञ्जानो दीर्घमायुरवाप्नुयात् ७६

लानि दूरतस्त्यजेत् ७३ नाक्षैः क्रीडेत्कदाचित्तु कदाचिदपि परिहासेनापि नाक्षादि
भिः क्रीडेत् स्वयमिति अभिधानादात्मोपानहौ पादव्यतिरेकेण हस्तादिना देशान्तरं न नयेत्
शय्यायां स्थितः न भुञ्जीत हस्ते च प्रभूतमन्नं कृत्वा क्रमेण नाखादयेत् आसने च भोजन।
भाजनं निधाय न भुञ्जीत ७४ सर्वं च तिलसंबद्धं यत्किंचित्तिलमिश्रं कृसरमोदकादि तद।
स्तमितेऽर्के नाद्यात् उपस्थाच्छादनवासोरहितो नेह लोके स्वप्यात् उच्छिष्टश्च नान्यत्र ग
च्छेत् ७५ आर्द्रपादस्तु भुञ्जीत जलार्द्रपादो भोजनमारभेत न जलार्द्रपादः स्वप्यात्

दशसूनासमं चक्रं गोविन्दराजस्तु दशवेशसमो नृप इति पठति मेधातिथिप्रभृतयस्तु ध्वजो
वेशपद्यालिखितं पठन्ति सूनाशब्देन हिंसास्थानमुपलक्ष्यते दशसूनावतो यावान्दोषः तावानेकच
क्रवति तैलिके यावान्दश तैलिकेषु दोषः तावानेकध्वजवति शौण्डिके यावान्दशध्वजिषु दो
षस्तावानेकवेशवति यावान्दशसु वेशवत्सु दोषस्तावानेकराजनि उत्तरोत्तरनिन्दा चेयं पू
र्वपूर्वस्य संभवे सत्युत्तरोत्तरवर्जनार्थमापद्युपपद्यते ८६ दशसूनासहस्राणि सूनया चरति
सौनिकः एवं सकलनपापः सौनिको दशसूनासहस्राणि स्वार्थं वाहयति तेन तुल्यो राजा म
न्वादिभिः स्मृतः तस्मात्तस्य प्रतिग्रहो नरकहेतुत्वाद्भयानकः तत्त्विमस्यापि च ८७ यो राज्ञः

दशसूनासमं चक्रं दशचक्रसमो ध्वजः दशध्वजसमो वेशो दशवेशसमो नृपः ८६
दशसूनासहस्राणि यो वाहयति सौनिकः तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः ८७
यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्तिनः स पर्यायेण यातीमान्नरकानेकविंशति ८८
तामिस्रमंधतामिस्रं महारौरवरौरवौ नरकं कालसूत्रं च महानरकमेव च ८९ सं
जीवनं महावीचिं तपनं संप्रतापनं संघातं च सकाकोलं कुड्मलं प्रतिमूर्तिकं ९० लो
हशंकुमृजीषं च पंथानं शाल्मलीं नदीं असिपत्रवनं चैव लोहांगारकमेव च ९१ एतद्वि
दंतो विद्वांसो ब्राह्मणा ब्रह्मवादिनः न राज्ञः प्रतिगृह्णंति प्रेत्य श्रेयोभिकांक्षिणः ९२

प्रतिगृह्णाति यो राज्ञः कृपणस्य शास्त्रोल्लंघनेन प्रवर्तमानस्य प्रतिग्रहं करोति स क्रमेणैता
न्वक्ष्यमाणानेकविंशतिनरकान्याति ८८ तामिस्रमंधतामिस्र ८९ संजीवनं महावीचिं
९० लोहशंकुमृजीषं च एषां नरकाणां स्वरूपं मार्कण्डेयपुराणादिषु विस्तरेणोक्तं तत्रैवा
वगंतव्यं ९१ एतद्विदंतो विद्वांसो प्रतिग्रहो विविधनरकहेतुरिति जानंतो ब्राह्मणाः धर्म
शास्त्रपुराणादिविदो वेदाध्यायिनो जन्मांतरे श्रेयः कामयंतो न राज्ञः प्रतिगृह्णंति यः पुनः प्रवि
दुषो हि प्रतिग्रहे नास्ति दोषः ततो वक्ष्यति तस्माद्विद्वान्बिभयात् यस्मात्तस्मात्प्रतिग्रहा

78

योऽस्य धर्ममाचष्टे यस्माच्छूद्राय धर्मं ब्रूते यश्च प्रायश्चित्तमुपदिशति स तेनैव शूद्रेण स
ह असंवृतनामाख्यं तमोगहनं नरकं प्रविशति पंच सप्त पूर्वोक्तेषु द्वयोः पुनर्दोषकथनं प्रायश्चित्त
गौरवार्थं ८२ न संहताभ्यां पाणिभ्यां संश्लिष्टाभ्यां पाणिभ्यामात्मनः शिरो न कंडूयेत न चो
च्छिष्टः सन् शिरः स्पृशेत् शिरसा विना उन्मज्जनं व्यतिरेकेण नित्यनैमित्तिकस्नानेन कुर्यात्
दृष्टार्थं तु शिरोव्यतिरिक्तगात्रप्रक्षालनेन दोषः स्नानशब्दस्याप्यनिषेधः अथवा सत्यपि
रसि भवेत्स्नानं स्नानाशक्तौ तु कर्मणा इति जाबालिना विहितमेव ८२ केशग्रहान्प्रहारां
श्च कोपेन केशग्रहणप्रहारान् शिरसि वर्जयेत् कोपनिमित्तत्वाच्चात्मनः परस्य च निषेधः श्रु
तएव स्वरतसमये कामिनीकेशग्रहणस्यानिषेधः सशिरस्कस्नातस्तैलेन किंचिदप्यंग

योऽस्य धर्ममाचष्टे यश्चैवादिशति व्रतं सोऽसंवृतं नाम तमः सह तेनैव मज्जति ८२ न
संहताभ्यां पाणिभ्यां कंडूयेदात्मनः शिरः न स्पृशेच्चैतदुच्छिष्टो न च स्नायाद्विना ततः
केशग्रहान्प्रहारांश्च शिरस्येतान्विवर्जयेत् शिरःस्नातश्च तैलेन नांगं किंचिदपि स्पृशेत्
न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः सूनाचक्रध्वजवतां वेशेनैव च जीवतां ८४

न स्पृशेत् अपवादे तैलेनेति काकाक्षिवत् उभयत्रापि संबध्यते तेन शिरःस्नातः तैलेन पु
नः किंचिदप्यंगं न स्पृशेत् अतो शरीरशोधिनां मतैलशिरस्नातानां तैलेन पादाभ्यंगस
माचरणमविरुद्धं ८३ न राज्ञः प्रतिगृह्णीयात् राजन्यप्रसूतः क्षत्रियवचनः अ
क्षत्रियप्रसूतेः राज्ञो धनेन प्रतिगृह्णीयात् राज्ञो धनमन्विष्टे दिक्षु कतस्यापि विशे
षउक्तः सूनाचक्रध्वजवतां सूनावतां चक्रवतां च सूना वधस्थानं तद्यस्यास्ति स सूना
वान् पशुमारणपूर्वकमांसविक्रयजीवी चक्रवान् बीजवधजीवी तैलिकः ध्वजवान्
मद्यविक्रयजीवी शौंडिकः वेशाः पण्यस्त्रियां वृत्तिः तया यो जीवति स्त्रीप्रमाणत्वात्तेषां

भा. स्मृ. टी. ७५

पुष्ये तु छन्दसां कुर्यात् ततः पञ्चाधिकेषु चतुर्षु मासेष्वध्य[illegible]नक्षत्रे[illegible]हे बहिर्ग्रामात्
स्वगृह्यानुसारेणोत्सर्गाख्यं कर्म कुर्यात् अथवा माघशुक्ल[स्य प्रथ]मेऽहनि पूर्वाह्णे कुर्यात् मा
घशुक्ले विधिः प्रौष्ठपद्यां येनोपाकर्म कृतं तद्विषयः ९७ [यथाशा]स्त्रं तु कृत्वैव एवमुक्तया
गृह्यानुसारेण ग्रामाद्बहिः छन्दसामुत्सर्गाख्यं कर्म कृत्वा पक्षिणीं [रा]त्रिं विरमेत् नाधीयीत तद्दे
दिने पूर्वापरे पक्षाविवास्यामध्यवर्तिन्या रात्रेः सा पक्षिणी [रात्रि]ः आगामिवर्तमानाहर्युक्ता
यो विधिः पक्षिणीति मालाकारः अस्मिन्पक्षे उत्सर्गाहोरा[त्रयुक्ता]ती पक्षिणी च नाध्येतव्या इति
यद्वा तदेव पक्षे अथवा तदेकमुत्सर्गाहोरात्रमनध्यायं कुर्या[दिति] विद्याने पृथगेकाभ्यस्तमृग
होरात्रानध्यायविधिः ९८ अत ऊर्ध्वं तु छन्दांसि उत्सर्गानन्तरं [illegible] छन्दांसि मन्त्रब्राह्मणात्मकं वेदं

79

पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः। माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ९७
यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः। विरमेत्पक्षिणीं रात्रिं तदेवैकमहर्निशम् ९८
अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्। वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेत् ९९
नाविस्पष्टमधीयीत न शूद्रजनसन्निधौ। न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत् १००
यथोदितेन विधिना नित्यं छन्दस्कृतं पठेत्। ब्रह्म छन्दस्कृतं चैव द्विजो युक्तो ह्यनापदि १०१
इमान्नित्यमनध्यायानधीयानो विवर्जयेत्। अध्यापनं च कुर्वाणः शिष्याणां विधिपूर्वकं २

शुक्लपक्षेषु संयतः पठेत् सर्वाणि च वेदाङ्गानि शिक्षाव्याकरणादीनि कृष्णपक्षेषु पठेत् ९९
नाविस्पष्टमधीयीत स्वरवर्णादिस्पष्टं यथा स्यात् शूद्रसन्निधौ च नाधीयीत तथा रात्रेः पश्चिमे सपरिश्रा-
न्तो वेदमधीत्य श्रान्तो न पुनः स्वप्यात् १०० यथोदितेन विधिना यथोक्तविधिना नित्यं छन्द-
स्कृतं गायत्र्यादिछन्दोयुक्तं मन्त्रजातं पठेत् मन्त्राणामेव कर्माङ्गत्वेनात्यन्तोपयोगात् अनाप-
दि सम्यग्धारणादिसामर्थ्ये सति ब्रह्म ब्राह्मणं मन्त्रजातं च यथोक्तविधियुक्तः सन् द्विजः पठे-
त् २ इमान्नित्यमनध्यायान् इमानुक्तानध्यायान्सर्वान् यथोक्तेन विधिनाधीया-
नः शिष्याध्यापनं च कुर्वाणो गुरुर्वर्जयेत् २

कु. ७५

ब्राह्मे मुहूर्ते बुध्येत ब्राह्मो मुहूर्तो रात्रेः पश्चिमो यामः ब्राह्मी भारती तत्त्वबोधहेतुत्वात् मुहूर्तश-
ब्दोऽत्र कालमात्रवचनः तत्र बुध्येत दक्षेणापि प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् या-
मद्वयं शयानो हि ब्रह्मभूयाय कल्पते इति ब्रुवता तत्र प्रबोधोऽभ्यनुज्ञातः गोविन्दराजस्तु रा-
त्रेः पश्चिमे मुहूर्ते बुध्येतेत्याह धर्मार्थौ च परस्पराविरोधेनानुष्ठानमवधारयेत् तदर्थं ध।
र्मार्थार्जनहेतून्कायक्लेशांश्च निरूपयेत् यदि महान्कायक्लेशोऽल्पश्च धर्मोऽर्थो वा तदा तं परि-
हरेत् वेदस्य च तत्त्वार्थं ब्रह्मकर्मात्मकं निश्चिनुयात् तस्मिन्समये बुद्धिप्रकाशात् उत्थायावश्य-
कं कृत्वा उषःकाले शय्याया उत्थाय यथासन्निवेशं विण्मूत्रोत्सर्गं कृत्वा कृतवक्ष्यमाणशौचोऽन-
न्यमनाः पूर्वां संध्यां चिरं गायत्रीं जपंस्तिष्ठेत् आर्कदर्शनादयं विधिः प्रातःसंध्यायाउ

ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत्। कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च॥
उत्थायावश्यकं कृत्वा कृतशौचः समाहितः। पूर्वां संध्यां जपंस्तिष्ठेत्स्वकाले चापरां चिरं॥
ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः। प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव च॥ ९४
श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि। युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपंचमान्॥

त्तोउदयादूर्ध्वमपि जपेद्वा पुरा दिवा मनुरिति विधानार्थोऽयमारंभः अपरामपि संध्यां स्वकाले
आरभ्य तारकोदयादूर्ध्वमपि जपन्नासीत् आयुरादिकामाधिकारोऽयमिति दर्शयन्नाह
९४ ऋषयो दीर्घसंध्यत्वात् संध्याशब्दोऽत्र संध्यानुष्ठेयजपादिपरः यस्मादृषयो दी।
र्घसंध्यानुष्ठानात्ता दीर्घमायुः प्रज्ञां जीवतो यशः मृतस्य कीर्तिं मध्ययनादिसंपन्नं यथा-
श्च प्राप्नुयुः तस्मादायुरादिकामश्चिरं संध्यामुपासीत् ९५ श्रावण्यां प्रौष्ठपद्यां वा
श्रावणस्य पौर्णमास्यां भाद्रपदस्य वा स्वगृह्यानुसारेणोपाकर्म कृत्वा सार्धांश्चतुरो मा-
सान्ब्राह्मण उद्युक्तो वेदानधीयीत ९६

म॰स्मृ॰
टी॰
७१

नित्यानध्याय एव स्यात् नैपुण्यमतिशयो धर्मातिशयार्थिनां ग्रामनगरयोः सर्वदानध्यायः स्यात् उ-
त्थितगंधे च सर्वस्मिन्नवगम्यमाने धर्मनैपुण्यकामग्रहणं नित्यानध्यायोपदेशो विद्यानैपुण्यकाम
स्य कदाचिदध्ययनमनुज्ञानं निषिध्यते किंचिद्गृहीतप्रायवेदाः यमनियमजप्यादिश्रेष्ठाः ते धर्म
नैपुण्यकामाः केचित्प्रथमाध्येतारो विद्यातिशयमार्थिनः ते विद्यानैपुण्यकामाः ८ अंतर्गत
शवे ग्रामे अंतर्गतः शवो यस्मिन् ग्रामे तावत्तत्र वृषलो अधार्मिकः तस्य सन्निधौ न तस्य दृष्ट
स्य शूद्रजनसन्निधावितिनिषेधात् रुद्यमाने रोदनध्वनौ भावे लकारः कार्यांतरार्थं बहुजनसमे
लके च सदानध्यायः ९ उदके मध्यरात्रे च उदकमध्ये मध्यरात्रे च मूत्रपुरीषोत्सर्गे च तथोच्छिष्टे श्राद्धं च

नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च धर्मनैपुण्यकामानां पूतिगंधे च सर्वदा ८ अंतर्ग
४०
तशवे ग्रामे वृषलस्य च सन्निधौ अनध्यायो रुद्यमाने समवाये जनस्य च ९ उदके मध्यरा
त्रे च विण्मूत्रस्य विसर्जने उच्छिष्टः श्राद्धभुक्चैव मनसापि न चिंतयेत् १० प्रतिगृह्य द्विजो
विद्वानेकोद्दिष्टस्य केतनं त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ११ यावदेकानुदिष्टस्य
लेपो गंधश्च तिष्ठति विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेत् १२ शयानः प्रौढपादश्च
कृत्वा चैवावसक्थिकां नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च १३

न स्मृहृतेपि चिंतितो न स्मरणात् गोविंदराजस्तु रात्रिमध्यप्रहरद्वयेत्युक्तवान् तथा मूत्रपुरीषोत्स
र्गकाले श्राद्धभोजनादिना चोच्छिष्टो निमंत्रणादारभ्य श्राद्धेन देकोद्दिष्टनवश्राद्धे तस्य केतनं निमं
त्रणं गृहीत्वा तथा क्षत्रियस्य जनपदेश्वरस्य पुत्रजन्मादि सूतके राहोश्च सूतके चंद्रसूर्योपरागः तत्र
त्रिरात्रं वेदं नाधीयीत १० यावदेकानुदिष्टस्य यावदेकमुद्दिश्यानुदिष्टस्य श्राद्धस्य संबंधी कुंकुमा
दिगंधो लेपश्च ब्राह्मणस्य शास्त्रविदो देहे तिष्ठति तावत् ब्राह्मणो वेदमपि वेदं नाधीयीत ११
शयानः प्रौढपादश्च शय्यापतितासनारूढपादः कृत्वावसक्थिकां वेष्टः जग्ध्वा मां
संजननमरणाशौचवतां चान्नं भुक्त्वा नाधीयीत १२

उ॰
६०

कर्णश्रवेऽनिले रात्रौ रात्रौ कर्णश्रवणयोग्यपवने वा यो वाति गोविंदराजस्तु कर्णाभ्यामेव श्रवणीय पवने शब्दातिशयविवक्षया कर्णश्रव इत्युक्तं तेनातिशयशब्दवति वायौ इत्यभिहितवान् दिवा च धूलीपट लोत्सारणसमर्थो वायो वहति एतौ वर्षाकाले अनध्यायौ तावकालिकौ अध्ययनविधिज्ञा मन्वाद यः कथयंति ३ विद्युत्स्तनितवर्षेषु विद्युद्गर्जितवर्षेषु द्वंद्वनिर्देशाद्युगपत्प्रसिद्धेषु महतीनां चोल्कानां संप्लवे उत्पातः पाते सति आकालिकमिति निमित्तकालादारभ्य अपरेद्युर्या वत्स एव कालः तावन्मात्रमनध्यायमेतेषु मनुरब्रवीत् ४ एतांस्त्वभ्युदितान्विद्यात् एता न्विद्युदादीन्यदा होमार्थं प्रकटीकृताग्निकालेषु संध्यास्वागतेषु समुत्पन्नाञ्जानीयात् तदानध्ययनं ऋ

कर्णश्रवेऽनिले रात्रौ दिवा पांसुसमूहने। एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ३ विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे। आकालिकमनध्यायमेतेषु मनुरब्रवीत् ४ एतांस्त्वभ्युदितान्विद्याद्यदा प्रादुःकृताग्निषु। तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ५ निर्घाते भूमिचलने ज्योतिषां चोपसर्जने। एतानाकालिकान्विद्यादनध्यायानृतावपि ६ प्रादुःकृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने। सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा ७

यात् तथानृतौ प्रादुष्कृताग्निकालेषु मेघदर्शनमात्रे सत्यनध्यायो न वर्षास्तु ५ निर्घाते भूमिचल ने अंतरीक्षभवोत्पातध्वनौ भूकंपे सूर्यतारागणानां चोपसर्गे सति उक्तानध्यायानिमानाकालिकान् जानीयात् आकालिकपदो व्याकृतः ऋतावपि वर्षास्वपि वर्षाकाले किं तु भूकंपादयो न दोषावहा इत्यभिप्रायेण ऋतावपीत्युक्तं अपिशब्दादन्यत्रापि ६ प्रादुःकृतेष्वग्निषु तु होमार्थं प्रकाशि तेष्वग्निषु संध्यायां यदा विद्युद्गर्जितशब्दो नैव भवति न तु वर्षं तदा सज्योतिरनध्यायः स्यात् आकालि कः तत्र यदि प्रातः संध्यायां तोयालोकितदा न रात्रौ यदि सायं तदा न दिवा विद्युत्स्तनिते वर्षे त्रिनया णां पूर्वोक्तानां शेषे वर्षाद्येतत्रितये जाते यथा दिवानध्यायः तथा रात्रावपि अहोरात्रमेवेत्यर्थः ७

म॰ स्मृ॰ टी॰ ८२

नाधीयीताश्वमारूढो अश्वमारूढ हस्तिनो खरोष्ट्रारूढः तथोखरदेशस्थः प्राकारादियानेन गच्छ
न्नाधीयीत १९ न विवादे न कलहे वाक्पारुष्ये दंडपारुष्ये सेनायां युद्धे भुक्तमात्रे भोजनानंतरं ।
यावदार्द्रपाणिरिति वसिष्ठस्मरणादजीर्णे समये वमनं च कृत्वा आशौचे सूतके च नाधीयीत २० अ
तिथिं चाननुज्ञाप्य अध्ययनं करोमीति यावदतिथिरनुज्ञापितो न भवति मारुते चात्यर्थं वाति रुधि
रे च गात्रात्स्रुते रुधिरस्रावे विनापि शस्त्रेण क्षते गात्रे च नाधीयीत २१ सामध्वनावृग्यजुषी सा
मध्वनौ च श्रूयमाणे ऋग्यजुषोः कदाचिदध्ययनं न कुर्यात् वेदं च समाप्यारण्यकं वेदैकदेशा
मितमहोरात्रं वेदांतरं नाधीयीत २२ ऋग्वेदो देवदैवत्यो सामगानमृगादृग्यजुषोरनध्याय
उक्तः तस्यायमनुवादः ऋग्वेदो देवता यस्येति देवदैवत्यो यजुर्वेदो मानुषो मानुषदेवताकत्वात्

नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनं न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः २० न वि
वादे न कलहे न सेनायां न संगरे न भुक्तमात्रे नाजीर्णे न वमित्वा न सूतके २१ अतिथिं चान
नुज्ञाप्य मारुते वाति वा भृशं रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते २२ सामध्वनावृ
ग्यजुषी नाधीयीत कदाचन वेदस्याधीत्य वाप्यंतमारण्यकमधीत्य च २३ ऋग्वेदो दे
वदैवत्यो यजुर्वेदस्तु मानुषः सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः २४ एत
द्विदंतो विद्वांसस्त्रयीनिष्कर्षमन्वहं क्रमशः पूर्वमभ्यस्य पश्चाद्वेदमधीयते २५

योग्यमनुष्यकर्मोपदेशाद्यजुर्मानुषः सामवेदस्तु पितृदेवताकत्वात्पित्र्यः पितृकर्मत्वाज्जलोपस्पर्शनं
स्मरंति तस्मात्तस्याशुचिरिव ध्वनिर्न तु शुचिरेव अतस्तस्मिन् श्रूयमाणे ऋग्यजुषी नाधीयीत
२३ एतद्विदंतो विद्वांसो एतद्वेदत्रयस्य देवमनुष्यपितृदेवताकत्वं जानंतः शाखांतराः त्र
य्या निष्कर्षं सारभूतं प्रणवव्याहृतिसावित्र्यात्मकं प्रणवव्याहृतिसावित्रीक्रमेण सर्वम ।
धीत्य पश्चाद्वेदाध्ययनं कुर्युः द्वितीयाध्याये उक्तोयमर्थः पुनरनध्यायप्रकरणे अभिहितः प
ठ्येत यथोक्तानध्यायाप्येवं प्रणवव्याहृतिसावित्रीरपठित्वानध्यायवदतिदर्शयितुं शाखास्या
ध्ययनमेवं कर्तव्यमिति स्नातकव्रतप्रकरणमार्गो २४

मं॰ ८२

81

नीहारे बाणशब्दे च नीहारे भूमिकायां बाणस्याह्वेयारध्वनौ वा गोवीणाविशेषध्वन्यन्ते प्रतिषेधः
त्पौर्णमास्यादिसाहचर्याच्चाष्टकाशब्दोऽष्टमीतिथिपरः विशेषदोषमाह अमावास्या गुरुं हन्ति
यस्मादमावास्या गुरुं हन्ति शिष्यं चतुर्दशी वेदं चाष्टमीपौर्णमास्यौ विस्मारयतस्तस्मात्ता अध्ययना
ध्यापनयोः परित्यजेत् १४ पांसुवर्षे दिग्दाहे धूलीवर्षे दिग्दाहे शृगालक्रन्दे कुक्कुरगर्दभोष्ट्रे च
रुवति पंक्तौ चोपविश्य शब्दं कुर्वतां तस्य श्वखरादीनामेवं ब्राह्मणो न पठेत् १५ नाधीयीत श्मशा
नसमीपे ग्रामसमीपे च गोष्ठे मैथुनसमये धृतं च वस्त्रं परिधाय श्राद्धीयं च निमन्त्रणादि गृहीत्वा
नाधीयीत १६ प्राणि वा यदि वाप्राणि श्राद्धिकमन्नादि गृहीत्वा तावदनध्यायो भवतीत्युक्तं

नीहारे बाणशब्दे च संध्ययोरेव चोभयोः अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च १३
अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्जयेत् १४
पांसुवर्षे दिशां दाहे गोमायुविरुते तथा श्वखरोष्ट्रे च रुवति पंक्तौ च न पठेद्द्विजः १५ ना
धीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च १६
प्राणि वा यदि वाप्राणि यत्किंचिच्छ्राद्धिकं भवेत् तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः
स्मृतः चौरैरुपप्लुते ग्रामे संभ्रमे चाग्निकारिते आकालिकमनध्यायं विद्यात्सर्वाद्भुतेषु च १८
उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतं अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु १९

प्राणि वा गवाश्वादि अप्राणि वा वस्त्रमाल्यादि श्राद्धनिमन्त्रणकाले हस्तादिनालभ्यानध्यायो भवतीति य
स्मात्पाणिरेवास्यमस्येति पाण्यास्यो ब्राह्मणः स्मृतः चौरैरुपप्लुते ग्रामे चौरैरुपप्लुते ग्रामे गृहदा
हादिकृते च संभ्रमे विद्यातरित्तेभ्यो मेषु चाद्भुतेषु उत्पातेषु आकालिकमनध्यायं जानीयात् १८
उपाकर्मणि चोत्सर्गे वेदस्योपाकर्माख्ये श्रावण्यां प्रौष्ठपद्यां वा कृते गृह्येन तत्तेनोक्ते माघसमये पौषमासे
वा वेदोत्सर्गे कृते त्रिरात्रमनध्यायः उत्सर्गे पक्षिणीमहोरात्रं वानध्यायावुक्तौ तत्र प्रथममनेन ।
अष्टकासु प्रतित्रिरात्रोपदेशः तथा ग्रहायण्याः ऊर्ध्वं कृष्णपक्षाष्टमीषु तिसृषु च तत्र एवाहो
रात्रमनध्यायो द्विवाक्यात्मात्रं स्कन्दादि पिण्डौ माध्यमष्टकासु चैतमनेन यावदष्टम्यध्यानध्याय ऋ
तन्त्यष्टमीषु उत्सन्नरात्रिः ऋतौ तासु त्रिरात्रिषु वा अहोरात्रं नाधीयीत १९

म॰स्मृ॰ टी॰ ८२

देवतानां गुरो राज्ञः देवतानां पाषाणादिमयीनां गुरोः पित्रादेः राज्ञो नृपतेः स्नातकस्य च आचार्यस्य प्रधानस्य विवक्षया पृथग्ग्रहणं बभ्रुणः कपिलस्य यज्ञे दीक्षितस्य चावभृ तस्नानात्पूर्वं छायां नातिक्रामेत् कामतः अभिधानाद् अबुद्धिपूर्वके न दोषः ३१ मध्यंदिने ऽर्धरा त्रे च दिवारात्रेर्मध्ये संपूर्णे श्राद्धं भुक्त्वा प्रातः सायं संध्ययोश्चैव चतुष्पथं ना धितिष्ठेत् ३० उद्वर्तनमपस्नानं उद्वर्तनम् अभ्यंगमलापकर्षणं पिष्टकादि अपस्नानं स्नानोद कं मूत्रपुरीषे रुधिरं च श्लेष्माणं निष्ठ्यूतं श्लेष्मरूपमपि चर्वितपरित्यक्तं ताम्बूलादि वान्तं भु क्तोद्गीर्णं भुक्तादि एतानि कामतो नाधितिष्ठेत् अधिष्ठानं तत्रावस्थानं ३२ वैरिणं नो

देवतानां गुरो राज्ञः स्नातकाचार्ययोस्तथा नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य च ३१ मध्यंदिनेऽर्धरात्रे च श्राद्धं भुक्त्वा च सामिषं संध्ययोरुभयोश्चैव न सेवेत चतुष्पथं ३० उद्व र्तनमपस्नानं विण्मूत्रे रक्तमेव च श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामतः ३२ वै रिणं नोपसेवेत सहायं चैव वैरिणः अधार्मिकं तस्करं चैव परस्यैव च योषितं ३२ न हीदृ शमनायुष्यं लोके किंचन विद्यते यादृशं पुरुषस्येह परदारोपसेवनं ३३ क्षत्रियं चैव स र्पं च ब्राह्मणं च बहुश्रुतं नावमन्येत वै भूष्णुः कृशानपि कदाचन ३४ एतत्त्रयं हि पुरु षं निर्दहेदवमानितं तस्मादेतत्त्रयं नित्यं नावमन्येत बुद्धिमान् ३५

पसेवेत शत्रुं तन्मित्रं अधर्मशीलं चौरं परदारांश्च न सेवेत चौरस्याधार्मिकत्वेपि स्पष्टं तदगर्हित त्वात्पृथग्ग्रहणं ३२ न हीदृशमनायुष्यं यस्मादीदृशमनायुष्यं इह लोके पुरुषस्य न किंचि दस्ति यादृशं परदारगमनं तस्मादेतन्न कुर्यात् ३३ क्षत्रियं चैव सर्पं च वृद्धिमिच्छुः भूष्णुः भू त्याप्तादिना वर्धनशीलः क्षत्रियं सर्पं बहुश्रुतं च ब्राह्मणं नावजानीयात् कृशानपि तत्कालेऽप्र तीकारासमर्थान् ३४ एतत्त्रयं हि पुरुषं एतत्त्रयमवमानितं सदवमंतारं विनाशयति क्षत्रि यसर्पौ दृष्ट्या क्रोधाद्ब्राह्मणोऽभिचारादिना दृष्टेन तस्मात्कल्याणार्थी एतत्त्रयं सर्वदा नावजा

के ८२

पशुमंडूकमार्जार० गवादिपशुमंडूकविडालकुक्कुरसर्पनकुलमूषकैः शिष्योपाध्याययोर्मध्ये गम
नेसत्यनध्यायमहोरात्रंजानीयात् २५ संप्रतिविद्यानिपुणकामंप्रतिपूर्वोक्तानध्यायविकल्पा
यमाह द्वावेववर्जयेन्नित्यं अध्ययनभूमिंचउच्छिष्टाद्यमेध्योपहतांआत्मानंयथोक्तशौचरहि
तमितिद्वावेवानध्यायौनित्यंप्रयत्नतोवर्जयेत् नतुपूर्वोक्तान्येषामपियत्रनित्यग्रहणमनुवा
दोवायत्रनिमित्तव्यापकोस्तितानपिनित्यमेववर्जयेदन्यत्रविकल्पः २६ अमावास्यामष्ट
मींच अमावास्यादिषुऋतावपिस्नातकोद्विजोनस्त्रियमुपगच्छेत्सर्वंवर्जयेद्ब्रह्मचर्येणाङ्गत्यनेने
वनिषेधसिद्धौस्नातकग्रहणंतत्प्रायश्चित्तार्थमिदंपुनर्वचनं २७ नस्नानमाचरेद्भुक्त्वा।

पशुमंडूकमार्जारश्वसर्पनकुलाखुभिः अंतरागमनेविद्यादनध्यायमहर्निशं २६ ।
द्वावेववर्जयेन्नित्यमनध्यायौप्रयत्नतः स्वाध्यायभूमिंचाशुद्धामात्मानंचाशुचिंद्विजः २७
अमावास्यामष्टमींचपौर्णमासींचतुर्दशीं ब्रह्मचारीभवेन्नित्यमप्यृतौस्नातकोद्विजः २८
नस्नानमाचरेद्भुक्त्वानातुरोनमहानिशि नवासोभिःसहाजस्रंनाविज्ञातेजलाशये २९

नित्यस्नानस्यभोजनानंतरमप्रसक्तेश्चांडालादिस्पर्शनिमित्तकस्नानंभुक्तेमपिशक्तिविषयेना
श्यतःस्यादित्यापस्तंबवचनान्निषेद्धुमयोग्यत्वादृष्टस्नानमिदंनिषिध्यतेतथारोगीनै
मित्तकमपिस्नानंनकुर्यात्किंतुयथासामर्थ्यमशिरस्कंभवेत्स्नानंस्नानाशक्तौतुकर्मिणांश्चा
र्द्रेणवाससाचापिमार्जनंदेहिकंविदुरित्यादिजाबालाद्युक्तमनुसंधेयं तथामहानिशायांवि
ज्ञेयामध्यमस्थंप्रहरद्वयंतस्यांस्नानंनकुर्वीतकाम्यनैमित्तिकादृतइतिदेवलवचनान्नवस्त्रेणस्ना
यात् नवकृत्वासमस्तंनित्यस्नायान्नैमित्तिकंतुचांडालादिस्पर्शमात्रस्नानंनैकवस्त्रेणैववकृत्वास
स्नोयानिषिद्धंनचयज्ञहायांकांततयाताशूपतयाचातिशेषगाज्ञातेपुष्करिण्यादौ २९

म-स्मृ-
टी-
८३

स्पृष्ट्वैतानशुचिर्नित्यं एतान्गवादीनशुचिः सन्स्पृष्ट्वा पाणिगृहीताभिरद्भिः प्राणांश्चक्षुरादीन्द्रि
याणि च सर्वाणि शिरस्कंधजानुपादाङ्गाभिं च स्पृशेदत्र प्रकरणे प्राणशब्दितानाभिधानेलाघवार्थं
तत्र प्रकरणे गवादिग्रहणमपि कर्तव्यं स्यात् ४३ अनातुरः स्वानि खानि अरोगी सन्स्वानि खा
नीन्द्रियाणि रोमाणि च गोप्यान्युपस्थकक्षादिगतानि निर्निमित्तं न स्पृशेत् ४३ मंगलाचारयुक्तः
स्यात् अभिमतार्थसिद्धिर्मंगलं तद्धेतुत्वेन गोरोचनादिधारणमपि मंगलं गुरुसेवादिकमा
चारः तद्युक्तः स्याद्बाह्याभ्यंतरशौचोपेतो जितेन्द्रियश्च भवेत् गायत्र्यादिजपं विहितहोमं

स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत् गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु
अनातुरः स्वानि खानि न स्पृशेदनिमित्ततः रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेत् ४३
मंगलाचारयुक्तः स्यात्प्रयतात्मा जितेंद्रियः जपेच्च जुहुयाच्चैव नित्यमग्निमतंद्रितः ४४
मंगलाचारयुक्तानां नित्यं च प्रयतात्मनां जपतां जुह्वतां चैव विनिपातो न विद्यते ४५
वेदमेव जपेन्नित्यं निमकालमतंद्रितः तं ह्यस्याहुः परं धर्ममुपधर्मोऽन्य उच्यते ४६
वेदाभ्यासेन सततं शौचेन तपसैव च अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीं ४७

च नित्यं कुर्यात् अतंद्रितोनलसः ४५ मंगलाचारयुक्तानां पूर्वोक्तानामेतेषां देवमा
नुषोपद्रवो न जायते भूताचारादीनामुक्तानामपि विनिपातनिपाताभावस्तु नरभिधानं
४६ वेदमेकं जपेन्नित्यं निमकालावसरे श्रेयो हेतुतया प्रणवगायत्र्यादिकं वेदमेवानल
सो जपेत् यस्मात्तद्ब्राह्मणस्य धर्मं श्रेष्ठं मन्वादयो वदंति अन्यः पुनस्ततोपकृष्टो धर्मो मुनिभि
रुच्यते अस्यैव वेदाभ्यासादेः पूर्वजातिस्मरणद्वारेण मोक्षहेतुत्वं वक्तुं पुनरभिधानं ४६
वेदाभ्यासेन सततं सततवेदाभ्यासशौचतपोहिंसादिभिः पूर्वभवस्य जातिं स्मरति ४७

83

कु.
८३

नात्मानमवमन्येत अपगतधनार्थमुद्यमे कृते न च धनानामसंपत्तिभिर्मंदभाग्योऽहमिति नात्मा
नमवजानीयात् किं तु मरणपर्यंतं श्रियमर्थमुद्यमं कुर्यात् न श्रियं दुर्लभां मन्येत ३७ सत्यं
ब्रूयात्प्रियं ब्रूयात् यथा दृष्टं श्रुतं तत्तं ब्रूयात् तथा प्रीतिसाधनं ब्रूयात् तत्तेनात दुःखितं सत्यमप्रि
यं प्रियमपि मिथ्या न वदेत् एष नित्यवेदमूलत्वात् सनातनो धर्मः ३८ भद्रं भद्रमिति ब्रूयात् अ
प्यभद्रं भद्रमभद्रपदं प्रद्वितीयं भद्रपदमुपयोग परं अभद्रं यत्तद् द्रष्टव्यं पर्याय प्रशस्तादि
शब्देन ब्रूयात् तथा चापरे तु नाम द्रव्यं भद्रं ब्रूयात् एवं प्रशस्तमिति ब्रूयात् भद्रमित्येवेति भद्रपद
मेव वा तत्र प्रयोज्यं शुष्कं निःप्रयोजनं वैरं विवादं च केनचित्सह न कुर्यात् ३९ नातिकल्यं

नात्मानमवमन्येत पूर्वाभिरसमृद्धिभिः आमृत्योः श्रियमन्विच्छेन्नैनां मन्येत दुर्लभां ३७
सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियं प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ३८
भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत् शुष्कवैरं विवादं च न कुर्यात्केनचित्सह ३९
२ हीनांगानतिरिक्तांगान्विद्याहीनान्वयोऽतिगान् रूपद्रविणहीनांश्च जातिहीनांश्च नाक्षिपेत्
१ नातिकल्यं नातिसायं नातिमध्यंदिने स्थिते नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह ४०
न स्पृशेत्पाणिनोच्छिष्टो विप्रो गोब्राह्मणानलान् न चापि पश्येदशुचिः सुस्थो ज्योतिर्गणान्दिवि ४२

नातिसायं उषःसमये प्रदोषसमये च दिवा संपूर्णे प्रहरद्वये च अज्ञातेन शीलेन युक्तेन शूद्रे
श्च सह एकाकी न गच्छेन्नैकः प्रपद्येताध्वानमिति तस्मादपि निषेधे पुनर्नैक इति प्रतिषेधः स्ना
न कर्तुं तिष्ठतो नापि प्राप्तेन गोरक्षार्थः ४१ हीनांगानतिरिक्तांगान् हीनांगानधिकांगान्
विद्याहीनान् रूपार्थहीनजातिहीनांश्च काणादिशब्दादिना न निंदेत् ४० न स्पृशेत्पाणिनोच्छिष्टो
कृतभोजनः कृतमूत्रपुरीषादिः शुद्धः तथा वा च मनो ब्राह्मणौ हस्तादिना गोब्राह्मणाग्नी
न स्पृशेत् न चाशुचिः सन्नातुरो दिवि स्थितान् सूर्यचंद्रग्रहादिज्योतिर्गणान् ४२

अभिवादयेद्वृद्धांश्च गृहागतान्गुरूनभिवादयेत् तेषां च स्वीयमासनमुपवेष्टुं दद्यात् बद्धाञ्जलिश्च गुरुसमीपमासीत गच्छतश्च पृष्ठदेशेनानुगच्छेत् उक्तोप्ययमभिवादनाद्याचारः फलाभिधानाय पुनरुच्यते ५४ श्रुतिस्मृत्युदितं सम्यक् वेदस्मृतिभ्यां सम्यगुक्तं स्वेषु कर्मसु प्रयोज्यत्वेनाङ्गत्वेन संबद्धं धर्मस्य हेतुं साधूनामाचारमनलसः सन्सेवेत सामान्येनाचारस्य हि धर्मोपदेशः फलकल्पनाय ५६ आचाराल्लभते ह्यायुः वेदोक्तमाचारादायुर्लभते अभिमताश्च प्रजाः पुत्रपौत्रदुहित्रात्मिकाः अक्षय्यं धनं अशुभफलसूचनं च देहस्थमलक्षणमाचारो निःफलयति आचाराद्धर्मेणालक्षणसूचितदुरितनाशात् ५७ दुराचारस्तु पुमा

अभिवादयेद्वृद्धांश्च दद्याच्चैवासनं स्वकं कृताञ्जलिरुपासीत गच्छतः पृष्ठतोन्वियात् ५४
श्रुतिस्मृत्युदितं सम्यङ्निबद्धं स्वेषु कर्मसु धर्ममूलं निषेवेत सदाचारमतन्द्रितः ५५
आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणं
दुराचारो हि पुरुषो लोके भवति निन्दितः दुःखभागी च सततं व्याधितोल्पायुरेव च ५७
सर्वलक्षणहीनोपि यः सदाचारवान्नरः श्रद्दधानोनसूयश्च शतं वर्षाणि जीवति ५८
यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत् यद्यदात्मवशं तु स्यात्तत्तत्सेवेत यत्नतः ६० स
र्वं परवशं दुःखं सर्वमात्मवशं सुखं एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः ६१

दि यस्माद्दुराचारः पुरुषो लोके गर्हितः सततं दुःखव्याधितो रोगवानल्पायुर्भवति तस्मात्सदाचारयुक्तः स्यात् ५८ सर्वलक्षणहीनोपि यः सदाचारवान् श्रद्धान्वितः परदोषान
भिधाता सन् शुभसूचकलक्षणशून्योपि शतायुर्भवति ५९ यद्यत्परवशं कर्म यद्यत्कर्म पराधीनं परप्रार्थनादिसाध्यं तत्तद्यत्नतो वर्जयेत् यद्यत्स्वाधीनं धनदेहव्यापारसाध्यं परमार्थपरिग्रहादि तत्तद्यत्नतोनुतिष्ठेत् ६० यस्मात् सर्वं परवशं दुःखं सर्वं परप्रार्थनादिसाध्यं दुःखहेतुः सर्वमात्माधीनं सुखहेतुरेतत्सुखदुःखयोः कारणं जानीयात् ६१

अतः किमत आह पौर्विकीं संस्मरञ्जातिं पूर्वजातिं स्मरञ्जातिमिमेवां त्वं वक्तृत्वा कांदितत्वाद
विवदितत्वाद्विवदितं बहूनि जन्मानि स्मरंस्तेषु चयाभेजन्मजरामरणदुःखान्यपि स्मरन्सं
सारे विरक्तः पन्न्ब्रह्मैवाजस्रमभ्यस्यति श्रवणमननध्यानैः साक्षात्करोति तेन चानंतमविनाशि
परमानंदाविर्भावलक्षणं मोक्षसुखं प्राप्नोति ४९ सावित्रान्शांतिहोमांश्च सवितृदेवता
कान्होमान्निष्ठनिवृत्तये च शांतिहोमान् पौर्णमास्यमावास्ययोः सर्वदा कुर्यात् तथाष्टम्यां हाय
णाऊर्ध्वं कृष्णाष्टमीष्विति स्मृत्यष्टकाख्येन श्राद्धेन च तदनंतरं दिने कृष्णनवमीषु चान्वष्ट
काख्येन परलोकगतान्पितॄन्पूजयेत् ५० दूरादावसथान्मूत्रं नैरृत्यामिषुविक्षेप

पौर्विकीं संस्मरञ्जातिं ब्रह्मैवाभ्यस्यते द्विजः ब्रह्माभ्यासेन चाजस्रमनंतं सुखमश्नुते
सावित्रान्शांतिहोमांश्च कुर्यात्पर्वसु नित्यशः पितॄंश्चैवाष्टकास्वर्चेन्नित्यमन्वष्टकासु च
दूरादावसथान्मूत्रं दूरात्पादावसेचनं उच्छिष्टान्ननिषेकं च दूरादेव समाचरेत् ५१
मैत्रं प्रसाधनं स्नानं दंतधावनमंजनं पूर्वाह्ण एव कुर्वीत देवतानां च पूजनं ५२
दैवतान्यभिगच्छेत्तु धार्मिकांश्च द्विजोत्तमान् ईश्वरं चैव रक्षार्थं गुरूनेव च पर्वसु

मनीत्यायधिकं भवतीति विज्ञानेश्वराणां वचनाद्देवं विधादग्निगृहस्य दूरान्मूत्रपुरीषे पादप्र ।
क्षालनजलोच्छिष्टान्नानि निःसिंच्यादिति निषेकं रेतश्च दूरत उत्सृजेत् ५१ मैत्रं प्रसाद
नं स्नानं मित्रदेवताकत्वान्मैत्रः पायुः तदुद्भवत्वान्मैत्रं पुरीषोत्सर्गं तथा देहप्रसाध
नं प्रातः स्नानं दंतधावनांजनं देवतार्चनादि पूर्वाह्ण एव कुर्यात् पूर्वाह्णशब्देन रात्रिशेष
दिनपूर्वभागावि हविवक्षितौ पदार्थमात्रविधिपरत्वाच्चास्य पाठक्रमो नादरणीयः न
हि स्नानानंतरं दंतधावनं ५२ देवतान्यभिगच्छेत् देवतानि पाषाणादिमयानि धर्मप्र
धानांश्च ब्राह्मणान् रक्षार्थं राजादिकं गुरूंश्चापि आढ्यान् अमावास्यादिपर्वसु द्रष्टुं गच्छे

अयुध्यमानस्योत्पाद्य अयुध्यमानस्य ब्राह्मणस्यांगेभ्यस्त्वनभिज्ञतया शोणितमुत्पाद्य परलो-
केति महद्दुःखमाप्नोति ६८ शोणितं यावतः पांसून् खङ्गादिहतब्राह्मणस्यांगान्निर्गतं रुधिरं
भूमिं पतितं यावतो धूल्यणूनेकात्मीकरोति तावन्त्यब्दानि परलोके शोणितोत्पा-
दकः श्वशृगालादिभिर्भक्ष्यते ६९ न कदाचिद्द्विजे तस्मात् तस्मादवगूरणादि-
दोषाभिज्ञो ब्राह्मणे दण्डोद्यमनं निपातनं रुधिरस्रावणं तृणेनापि न कुर्यादिति पूर्वोक्तक्रि-
यात्रयस्योपसंहारः ७० अधार्मिको नरो यो हि अधर्मेण व्यवहरतीत्यधार्मिकः शास्त्रप्रतिषि-
द्धागम्यागमनाद्यधर्मानुष्ठाता यो मानुषो यस्य च साक्ष्ये व्यवहारनिर्णयादौ च मिथ्याभिधानमेव
धनोपायः असत्यमभिधायोत्पादकस्य धनं गृह्णाति यश्च परहिंसारतो नासाविह लोके सुखवृ

अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगङ्गतः। दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः ६८
शोणितं यावतः पांसून् संगृह्णाति महीतलात्। तावतोऽब्दानमुत्रान्यैः शोणितोत्पादकोऽद्यते
न कदाचिद्द्विजे तस्माद्विद्वानवगुरेदपि। न ताडयेत्तृणेनापि न गात्रात्स्रावयेदसृक् ७०
अधार्मिको नरो यो हि यस्य चाप्यनृतं धनं। हिंसारतिश्च यो नित्यं नेहासौ विंदते सुखं ७१
न सीदन्नपि धर्मेण मनोऽधर्मे निवेशयेत्। अधार्मिकानां पापानामाशु पश्यन् विपर्ययं
नाधर्मश्चरितो लोके सद्यः फलति गौरिव। शनैरावर्त्तमानस्तु कर्त्तुर्मूलानि कृन्तति ७३

त्तो वर्द्धते तस्मादेतत्त्रयकर्त्तृत्वमिति निंदया निषेधः कल्प्यते ७१ न सीदन्नपि धर्मेण शास्त्रवि-
हितधर्ममनुतिष्ठन् धनाद्यभावेनावसादमपि गच्छन्नाधर्मे बुद्धिं कुर्यात् यस्मादधर्मव्यवहा-
रिणो ये यथा ततो धनादिसंपद्भागिनोऽपि दृश्यन्ते तथापि तेषामधार्मिकाणामधर्मचौरिका-
दिव्यवहारिणां पापानां तज्जनितदुरितपाकिनां शीघ्रं धनादिविपर्ययोऽपि दृश्यते तं पश्यन्नध-
र्मे धियं न दद्यादिति शिष्यहितायादृष्टमर्थं प्रदर्शितवान् ७२ नाधर्मश्चरितो लोके शास्त्र-
ज्ञानियतकालपरिपाकत्वात् शुभाशुभकर्मणां नाधर्मोऽनुतिष्ठतः तत्काल एव फलति गौ-
रिव भूमिरप्यत्रैवाधर्मदृष्टान्तः यथा भूमिः कालेन फलति न बीजवपनमात्रेण गौरप्यत्रैव यथा
गौः पयसा वा हदोहाभ्यां सद्यः फलति नैवं धर्मः व्यतिरेके दृष्टान्तः किं तत्क्रमेणावर्त्तमानः

85

यत्कर्मकुर्वतोस्यस्यात् यत्कर्मकुर्वतोस्यान्तरात्मनः पुरुषस्यांतरात्मनस्तुष्टिः सा तत्प्रयत्नेनानु
ष्ठेदतुष्टिकरं पुनर्वर्जयेत् एतच्चाविहितानिषिद्धविषयं वैकल्पिकगोचरं च ६२ आचार्यं तु प्र
वक्तारं आचार्यमुपनयनपूर्वकं वेदाध्यापकं प्रवक्तारं वेदार्थव्याख्यातारं गुरुमल्पमपि वा वक्तृ।
धायुपदेष्टृत्वं आचार्यादींस्तु न हिंसेत् प्रतिकूलाचरणेन हिंसायाद्यः गोविंदराजस्तु सामान्ये
न हिंसानिषेधात् आततायिनोप्येतान्न हिंस्यादिति व्याख्यातवान् तदयुक्तं गुरुं वा बालवृ
द्धौ वेत्यनेन विरोधात् ६३ नास्तिक्यं वेदनिंदां च नास्ति परलोक इति बुद्धिं वेदस्य देवता
नां च निंदामात्सर्यं धर्मार्थं मोहाभिमानं कोपं तैक्ष्ण्यं च वर्जयेत् ६४ परस्य दंडं नोद्य

यत्कर्म कुर्वतोस्य स्यात्परितोषोन्तरात्मनः तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत् ६२
आचार्यं च प्रवक्तारं पितरं मातरं गुरुं न हिंस्याद्ब्राह्मणान्गाश्च सर्वांश्चैव तपस्विनः
नास्तिक्यं वेदनिंदां च देवतानां च कुत्सनं द्वेषं दंभं च मानं च क्रोधं तैक्ष्ण्यं च वर्जयेत् ६४
परस्य दंडं नोद्यच्छेत् क्रुद्धो नैनं निपातयेत् अन्यत्र पुत्राच्छिष्याद्वा शिष्ट्यर्थं ताडयेत्तु तौ
ब्राह्मणायावगूर्यैव द्विजातिर्वधकाम्यया शतं वर्षाणि तामिस्रे नरके परिवर्तते ६६
ताडयित्वा तृणेनापि संरंभान्मतिपूर्वकं एकविंशतिमाजातीः पापयोनिषु जायते ६७

च्छेत् परस्य हननार्थं क्रुद्धः सन् दंडादिकं नोत्क्षिपेत् तच्च परगात्रे न निपातयेत् पुत्रशिष्यभार्यादासा
देरन्यत्र कृतापराधानेतानन्वशासनार्थं रज्ज्वा वेणुदलेन वेत्यादि वक्ष्यमाणप्रकारेण ता
डयेत् ६५ ब्राह्मणायावगूर्यैव द्विजातिरपि ब्राह्मणस्य हननार्थं दंडाद्युद्यम्यैव न
तु निपात्य वर्षशतं तामिस्राख्ये नरके परिभ्रमति ६६ ताडयित्वा तृणेनापि क्रोधाद्बु
द्धिपूर्वकं तृणेनापि ताडयित्वा एकविंशति जन्मानि पापहेतुषु कुक्कुरादियोनिषु जा
यते ६७

ऋत्विक्पुरोहिताचार्यैः ऋत्विगादिभिर्वाक्कलहं न कुर्यात् शान्त्यादिकर्त्ता पुरोहितः संश्रिता
अनुजीविनः ज्ञातयः पितृपक्षाः संबंधिनो जामातृश्यालकादयः बांधवा मातृपक्षाः जामयो
भगिनीस्नुषाद्याः ८० ८१ एतैर्विवादान्संत्यज्य एतैरृत्विगादिभिः सह विवादान्संत्यज्य
अज्ञातकृतपापैः प्रमुच्यते यथा एतैर्विवादे कृपेऽपि जितैरिमान्वक्ष्यमाणाँल्लोकान्गृहस्थो
जयति स्वीकरोति ८२ आचार्यो ब्रह्मलोकेशः आचार्यो ब्रह्मलोकस्य प्रभुः तेन सह वि
वादत्यागेन तस्मै तुष्टात् ब्रह्मलोकावाप्तेर्गौणं ब्रह्मलोकेशत्वं एवं प्राजापत्यलोके पिता प्रभु
रतिथिरिन्द्रलोके देवलोकस्य च ऋत्विजः प्रभवंति वैश्वदेवलोके बांधवाः वरुणलोके संबं

ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः बालवृद्धातुरैर्वैद्यैर्ज्ञातिसंबंधिबांधवैः
मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया दुहित्रा दासवर्गेण विवादं न समाचरेत् ८१
एतैर्विवादान्संत्यज्य सर्वपापैः प्रमुच्यते एतैर्जितैश्च जयति सर्वाँल्लोकानिमान्गृही
आचार्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः
जामयोऽप्सरसां लोके वैश्वदेवस्य बांधवाः संबंधिनो ह्यपां लोके पृथिव्यां मातृमातुलौ ८३
आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्वका तनुः
छाया स्वो दासवर्गश्च दुहिता कृपणं परं तस्मादेतैरधिक्षिप्तः सहेतासंज्वरः सदा ८५
प्रतिग्रहसमर्थोऽपि प्रसंगं तत्र वर्जयेत् प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्रशाम्यति ८६

धिनो भूलोके मातृमातुलौ ८३ आकाशेशास्तु विज्ञेयाः कृशाः कृशधनः संश्रितो विवादिनः
बालवृद्धसंश्रितातुराश्चांतरिक्षलोके प्रभवंति भ्राता ज्येष्ठः पितृतुल्यः तस्मात्सोऽपि प्रजापति
लोके प्रभुः भार्यापुत्रौ च स्वशरीरं अतः कृपमात्मनैव सह विवादः संभवति ८४ छाया स्वदा
सवर्गस्तु स्वदासवर्गस्तु निमानुगतत्वात् छायेव न विवादार्हो दुहिता च परं कृपापात्रं तस्मा
देतैराक्षिप्तः सन् असंतापः सहेत न तु विवदेत ८५ प्रतिग्रहसमर्थोऽपि विद्यातपोव्रतसंपन्न
तया प्रतिग्रहेऽधिकार्यपि तत्र पुनः प्रवृत्तिं त्यजेत् यस्मात्प्रतिग्रहेण अस्याऽध्ययनादिनिमित्तः
प्रभावः शीघ्रमेव नश्यति याज्ञामात्र प्रसिद्धं अयं मित्रतोऽपि सामान्येनाऽजस्रं कोऽचेति शेषे ...

८४

यदि नात्मनि पुत्रेषु यद्यधर्मं कर्तुर्देहधनादिनाशं फलं न जनयति तदा पुत्रेषु नो चेत्पौत्रेषु न
प्तृभिः फलमेव भवति न त्वसत्कृतस्य कर्मणः कथमन्यत्र फलजनकत्वमुच्यते पुत्रादिनाशस्या
पि पितुः शोकाधिकाय हेतुत्वात् शास्त्रीयफलार्थास्यापि सत्यविश्वासः १७४ अधर्मेणैधते ताव
अधर्मेण परद्रोहादिना तावदादौ वर्धते ततो भद्राणि धनवाहनादीनि लभ
ते ततः शत्रूञ्जयति पश्चात्किंचित्कालेनाधर्मविपाकवशाद्देहधनपुत्रादिसहितो विनश्यति
१७५ सत्यधर्मार्यवृत्तेषु सत्यधर्मे सदाचारे शौचे च सर्वदा रतिं कुर्यात् शिष्यांश्चानुशासनी
यान्धर्मेण ताडनादिना दण्डेन वेणुदलेन वेति प्रकारेण शासयेत् उक्तानामप्यभिधानमनुष्ठा
नार्थं वाग्बाहूदरसंयतः स्यात् वाक्संयमो हितमितभाषिता बाहुसंयमो बाहुबलेनाक

यदि नात्मनि पुत्रेषु न चेत्पौत्रेषु नप्तृषु ॥ न त्वेव तु कृतोऽधर्मः कर्तुर्भवति निष्फलः ॥ १७४ ॥
अधर्मेणैधते तावत्ततो भद्राणि पश्यति ॥ ततः सपत्नाञ्जयति समूलस्तु विनश्यति ॥ १७५ ॥
सत्यधर्मार्यवृत्तेषु शौचे चैवारमेत्सदा ॥ शिष्यांश्च शिष्याद्धर्मेण वाग्बाहूदरसंयतः ॥
परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ ॥ धर्मं चाप्यसुखोदर्कं लोकसंक्रुष्टमेव च ॥ १७६ ॥
न पाणिपादचपलो न नेत्रचपलोऽनृजुः ॥ न स्याद्वाक्चपलश्चैव न परद्रोहकर्मधीः ॥ १७७ ॥
येनास्य पितरो याता येन याताः पितामहाः ॥ तेन यायात्सतां मार्गं तेन गच्छन्न रिष्यते ॥ १७८ ॥

यावर्थकामौ
रणं परपीडनं उदरसंयमो यथाकालमल्पभोजित्वं १७५ परित्यजेदर्थकामौ धर्मविरोधि ।
नौ भवेतां तौ परिहरेत् यथा चौर्यादिना धनार्जनं दीक्षादिने पत्नीसम्भोगः उद
र्कः उत्तरकालः तत्रासुखं यत्र धर्मे तं धर्ममपि त्यजेत् यथा पुत्रादिवर्गपोष्यजनस्य सर्वस्व
दानं लोकानां विक्रोशो यत्र तल्लोकविक्रुष्टं यथा कलौ मधुपर्कादिषु गोवधादि १७६
न पाणिपादचपलः पाण्यादिचापलं न कुर्यात् अनर्थकतृणच्छेदनलोष्टमर्दनादि पाणिचापलं नि
ष्प्रयोजनभ्रमणादि पादचापलं परस्त्र्यवलोकनादि नेत्रचापलं वक्रमसत्यवादिता वाक्
चापलं न स्यादनृजुः कुटिलो न स्यात् परद्रोहो हिंसा तदर्थं चेष्टादिकं धियं च न कुर्यात् १७७ ये
नास्य पितरो याता वक्ष्यमाणविधिना शास्त्राविरोधे सति पितृपितामहाद्यनुष्ठितमेव शास्त्रापोनुष्ठा

म-स्मृ-
टी-
८१

त्रिष्वप्येतेषु दत्तं हि एतेषु त्रिष्वपि वैडालव्रतिकादिषु न्यायार्जितमपि धनं दत्तं दातुः प्रतिग्रहीतु-
श्च परलोके नरकहेतुत्वादनर्थाय भवति १९३ यथा प्लवेनोपलेन यथा पाषाणमयेनोडुपादि-
ना जले तरंस्तेनैव सहाधो गच्छति एवं दानप्रतिग्रहयोरनभिज्ञौ दातृप्रतिग्राहकौ नरकं गच्छ-
तः अत एवात्र न धीमानिति प्रतिगृहीतृसाधारण्येन निर्दिष्टोऽज्ञ इह दातुः प्राधान्येनेति न पुनरुक्तिः १९४
धर्मध्वजी सदा लुब्धः यो बहुजनसमक्षं धर्ममाचरति स्वतः परतश्च परलोकोऽबाधावृत्तिन सुखं।
र्मध्वजं चिह्नमेवेति धर्मध्वजी लुब्धः परधनाभिलाषुकः छद्मना व्याजेन चरतीति छाद्मिकः
लोकदंभकोनिः ते पापहारादिना जनवंचकः हिंस्रः परहिंसाशीलः सर्वाभिसंधकः परगुणा-

त्रिष्वप्येतेषु दत्तं हि विधिनाप्यर्जितं धनं दातुर्भवत्यनर्थाय परत्रादातुरेव च १९३ यथा
प्लवेनोपलेन निमज्जत्युदके तरन् तथा निमज्जतोऽधस्तादज्ञौ दातृप्रतीच्छकौ १९४ ध-
र्मध्वजी सदा लुब्धः छाद्मिको लोकदंभकः वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसंधकः
अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः १९६
ये बकव्रतिनो विप्रा ये च मार्जारलिंगिनः ते पतन्त्यंधतामिस्रे तेन पापेन कर्मणा १९७
न धर्मस्यापदेशेन पापं कृत्वा व्रतं चरेत् व्रतेन पापं प्रच्छाद्य कुर्वन् स्त्रीशूद्रदंभनं १९८

सहनत्वा सर्वाभिसंधकः विडालव्रतेन चरतीति वैडालव्रतिकः विडालो हि ग्रामेणाखुमूषिकादिमां-
सं स्वचितया ध्यानं निष्ठ एव विनीतः सन्नवतिष्ठत उत्तप्यचारात् विडालव्रतमाह १९५ अधोदृष्टिर्नै-
ष्कृतिकः अधोदृष्टिर्निजविनयख्यापनाय प्रणतनमध एव निरीक्षते नैष्कृतिकः निर्निष्ठुरतया चरती-
ति नैष्कृतिकः स्वार्थसाधनतत्परः यथार्थोऽविडम्बनेन शठो वक्रः मिथ्याविनीतः कपटविनया-
द्बकव्रतं चरतीति बकव्रतचरः बको हि ग्रामेणामीनहननचिंतया मिथ्याविनीतः सन्नेवं यो।
लोभवति सोऽस्माद्बकव्रतमाह १९६ ये बकव्रतिनो विप्राः ये बकव्रतं विडालव्रतं चरंति ब्राह्मणाः
तेषां हेतुना तेन कर्मणाऽन्धतामिस्रे नरकं प्राप्नुवंति १९७ न धर्मस्यापदेशेन पापं कृत्वा तत्प्रायश्चि-
त्तरूपं प्राजापत्यादिव्रतं पापमपनयति तत्रेदं प्रायश्चित्तं न किंतु धर्मार्थमहमेतत्करोमीति स्त्रीशू-

87

न द्रव्याणामविज्ञाय द्रव्याणां प्रतिग्रहे धर्मो यः हितविधानं यथा सदेवताप्रतिग्रहमन्त्रादिकमज्ञात्वा
क्षुधावसादं गतोऽपि प्राज्ञो न प्रतिगृह्णीयात् किं पुनरनापदि ८७ हिरण्यं भूमिमश्वं गामन्नं वा
सांसि तु तस्याध्यायहीनः प्रतिगृह्णन्नग्निसंयोगेन दारुवद्भस्मीभूतो पुनरुत्पत्तिं न लभते ८८
हिरण्यमायुरन्नं च अविदुषः प्रतिगृहीतः भूर्गौश्च शरीरं उषतो दहतः उषदाहे तौ दाहकत्व
स्यैदं रूपं भूर्गावौ द्वित्वविवक्षायां द्विवचनं एवं हिरण्यमन्नं चायुरोषतः अश्वश्चक्षुरित्यादिषु ।
विभक्तिविपरिणामः दोषवती नैकवचनान्तस्यानुषंगः ८९ अतपास्त्वनधीयानः यस्तपोवि
याश्रुत्याः प्रतिग्रहे तु ब्राह्मणो भवति स प्रतिग्रहाधिकाराभावाद्बुद्धिस्थे तेनेति परामृष्टेने

न द्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे । प्राज्ञः प्रतिग्रहं कुर्यादवसीदन्नपि क्षुधा ।
हिरण्यमायुरन्नं च भूर्गौश्चाप्योषतस्तनुं । अश्वश्चक्षुस्त्वचं वासो घृतं तेजस्तिलाः प्रजाः ।
अतपास्त्वनधीयानः प्रतिग्रहरुचिर्द्विजः । अम्भस्यश्मप्लवेनेव सह तेनैव मज्जति ९०
तस्मादविद्वान्बिभियाद्यस्मात्तस्मात्प्रतिग्रहात् । स्वल्पकेनाप्यविद्वान्हि पंके गौरिव सीदति
न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे । न बकव्रतिके विप्रे नावेदविदि धर्मवित् ९२

वत्सात्र प्रतिग्रहान्नर्दाता नापि पापप्रत्ययेन सह नरके मज्जति यथा पाषाणमयोडुपेनाम्भस्तरन्नेव
सहाम्भसि मग्नो भवति ९० तस्मादविद्वान्बिभियात् यस्मादसावल्पद्रव्यप्रतिग्रहेणापि मूर्खः
पंके गौरिव नरकेऽवसन्नो भवति तस्माद्यतः कुतश्चिन्नवर्णाद्विजातिविक्रमीसकाद्यसार
द्रव्यप्रतिग्रहादपि बिभियात् ९१ न वार्यपि प्रतीच्छेत् प्रतिगृहीतधर्ममभिधायाधुनादा
तुराह वक्ष्यमाणादिभ्यो यत्नोपपेतेन तदपि वैडालव्रतिकादिभ्यो धर्मज्ञो न दद्यादिमतिशयार्थत्वया
द्रव्यान्तरदानं निषिध्यते न तु वारिदानं पाषण्डिनो विकर्मस्थान् इति मनेन वैडालव्रतिकायाति
पितेन सकृतान्नदानादि निषिद्धमिह तु धनदानं निषिध्यते न तु वारिदानं पाषण्डिनो अत
एवविधिनार्पितेन प्रमाणमिति वक्ष्यातिना वेदविदि तिवेदाध्ययनाभिज्ञे एतच्च विद्वत्सभवेनावेद

मनुटीका ५६

यमान्सेवेत सततं नियमापेक्षया यमानुष्ठानगौरवज्ञापनार्थमिदं न तु नियमनिषेधार्थं द्वयोरेव
धर्मशास्त्रार्थत्वात् यमनियमविवेकः मुनिभिरेव कृतः यदाह याज्ञवल्क्यः ब्रह्मचर्यं दया क्षान्तिर्ध्या
नं सत्यमकल्कता। अहिंसास्तेयमाधुर्ये दमश्चेति यमाः स्मृताः। स्नानमौनोपवासेज्यास्वाध्यायोप
स्थनिग्रहाः नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादिताः यमनियमस्वरूपतः समस्तस्नानादि
नियमत्यागो वाप्यहिंसादिरूपं यममनुतिष्ठेत् नियमाननुतिष्ठन्नपि यमानुष्ठानरहितः पतती
ति यमस्तत्त्वमर्थं मेधातिथिगोविन्दराजौ तु हिंसादिप्रतिषेधार्थका यमाः वेदमेव जपेन्नित्यमि
त्यादयो नुष्ठेयरूपा नियमा इति व्याचक्षाते ४ नाश्रोत्रियकृते यज्ञे अनधीतवेदेनोपक्रान्ते
यज्ञे अश्लीलामीमांसादृशमपि भोजनयोग्यमसमर्थं ब्राह्मणेन भुञ्जीत तथा बहूनां याजकेन च यज्ञप

यमान्सेवेत सततं न नित्यं नियमान्बुधः। यमान्पतत्यकुर्वाणो नियमान्केवलान्भजन्॥ ४
नाश्रोत्रियकृते यज्ञे ग्रामयाजिकृते तथा। स्त्रिया क्लीबेन च हुते भुञ्जीत ब्राह्मणः क्वचित्॥ ५
अश्लीकमेतत्साधूनां यत्र जुह्वत्यमी हविः। प्रतीपमेतद्देवानां तस्मात्तत्परिवर्जयेत्॥ ६
मत्तक्रुद्धातुराणां च न भुञ्जीत कदाचन। केशकीटावपन्नं च पदा स्पृष्टं च कामतः॥ ७ भ्रूण
घ्नावेक्षितं चैव संस्पृष्टं चाप्युदक्यया। पतत्रिणावलीढं च शुना संस्पृष्टमेव च॥ ८ गवा चा
न्नमुपघ्रातं घुष्टान्नं च विशेषतः। गणान्नं गणिकान्नं च विदुषा च जुगुप्सितम्॥ ९

88

रोहूपतेन च कदाचिद्ब्राह्मणेन भुञ्जीत ५ अश्लीकमेतत्साधूनां पूर्वोक्ता वक्तृयाजकादयो यत्र
होमं कुर्वन्ति तत्कर्म शिष्टानामश्लीकं रेफस्य स्थाने लकारः अश्लीकमित्यर्थः देवानां प्रतिकूलं त
स्मादेतान् होमं न कारयेत् ६ मत्तक्रुद्धातुराणां च चौर्यक्रुद्धव्याधितानामन्नं तथा केशकी
टसंसर्गदुष्टं पादेन च बुद्धिपूर्वं स्पृष्टमन्नं भुञ्जीत ७ भ्रूणघ्नावेक्षितं चैव भ्रूणघ्नो मुख्यब्राह्मणघ्नो
भ्रूणादिपतितावेक्षितं रजस्वलया च स्पृष्टं पक्षिणा च काकादिना स्वादितं कुक्कुरेण च स्पृष्टम
न्नं न भुञ्जीत ८ गवा चान्नमवघ्रातं यदन्नं गवाघ्रातं घुष्टान्नं को भोक्ता इत्याहूय दीयते सत्रादौ
यद्दीयते विशेषत इति भूरिदोषतया प्रायश्चित्तगौरवार्थं गणान्नं शठब्राह्मणं ब्रह्मगणि

यस्मात् अत्रेह चेह च विप्रा परलोके तु इहलोके च ते विप्रा वेदवादिभिर्हिता भवंति व्रतमपि तस्मा
नुष्ठितमभ्यस्तामिश्रा भवंति तस्मान्नेदं कर्तव्यमिति ९९ अलिंगी लिंगिवेषेण ब्रह्मचर्यादियुक्तब्रह्मच
र्यादिलिंगमेव त्वा जिनदंडादि निवेषोपलक्षितं तदुपजीव्य तावन्मात्रादिना जीवति स ब्रह्मचर्यादी
नां यत्पापं तदाहरति कुक्कुरादितिर्यग्योनौ चोत्पद्यते तस्मादेतन्न कर्तव्यमिति निंदया निषेधः कल्प
ते १०० परकीयनिपानेषु निपानं जलाधारः परकृतपुष्करिण्यादिषु न कदाचित्स्नायात् यत्र
स्नातव्यं पुष्करिण्यादिकं तु येनापि तद्दोषवक्ष्यमाणं पुण्यसंबंधात्सकृत्प्रायश्चित्तमनयोरसंभवे
परकृतेऽपि पुष्करिण्यादौ पंच पिंडानुद्धृत्य स्नातव्यं तदाह याज्ञवल्क्यः पंच पिंडाननुद्धृत्य न स्ना

अत्रेह चेह च विप्राणां स्ते ब्रह्मवादिभिः अनाचरितं यच्च व्रतं स्यात्तन्मिथ्या इति ९९ अ
लिंगी लिंगिवेषेण यो वृत्तिमुपजीवति स लिंगिनां हरत्येनस्तिर्यग्योनौ प्रजायते १०० प
रकीयनिपानेषु न स्नायाद्धि कदाचन निपानकर्तुः स्नात्वा हि दुष्कृतांशेन लिप्यते २ या
नशय्यासनान्यस्य कूपोद्यानगृहाणि च अदत्तान्युपभुंजान एनसः स्यात्तुरीयभाक् २ न
दीषु देवखातेषु तडागेषु सरस्सु च स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च ३

यात्स्वयं विधिरिति १०२ यानशय्यासनान्यस्य अस्येति प्रकृतपरः परामृश्यते परस्य यानादीन्यदत्ता
न्युपभुंजानस्तदीयपापस्य चतुर्थभागभाग्भवतीति अदत्तानीति परस्मान्नुमत्या या वस्त्रादिवर्जिताः तेन
सर्वार्थोपस्पृष्टमकृपादौ उपयोगार्थोपमत्तानादौ च न विरोधः २ नदीषु देवखातेषु नद्यादि
षु सर्वदा स्नानमाचरेद्देवखातेष्विति तडागविशेषणमेव संवंधित्वेन प्रसिद्धेषु सरः सर्वदेषु
गर्तेषु धनुः सहस्रेभ्योन्यूनगतिषु तडागेषु गर्तपरिमिताष्टधनुःसहस्राण्यष्टौ वा गतिर्य
स्यां न विद्यते न ता नदीशब्दवाहा गर्त्ताख्ये परिकीर्तिताः चतुर्हस्तप्रमाणं धनुः प्रस्रवणेषु तो
निर्झरेषु अनेनैव परकीयनिपानानां वा वृत्तिरिति द्वौ परामृष्टवचनं तदा ... कीयोन्स्पृष्टेषु निपानेषु

कर्मारस्य निषादस्य कर्मारस्य लोहकारस्य निषादस्य प्रसिद्धस्य नटगायनव्यतिरिक्त
रङ्गावतरणोपजीविनः सुवर्णकारस्य वेणोर्भेदनेन यो जीवति वुरुड इति प्रसिद्धः शस्त्रस्य
विक्रयिणः श्वपालकस्य सुराविक्रयिणः वस्त्ररागकृतः निर्दयस्य यस्य चोपपतिर्गृहे स्थितस्तद्गृहेन्नं ना
द्यात् २१५ मृष्यन्ति ये चोपपतिं गृहे स्थितमनुपश्यन्ते गृहे सन्तं भार्याजारं ये सहन्ते तेषामन्नं न
भुञ्जीत तेन निःसारितापि जारसहने प्यदोषः तथा सर्वकर्मसु स्त्रीपरतन्त्राणाम् अनिर्गतदशा
हं च मृतकान्नम् अतुष्टिकरमेव च भुञ्जीत २१६ राजान्नं तेज आदत्ते राजान्नं तेजो नाशय
ति अत एव दोषदर्शनात् तद्भक्षणे निषेधः कल्प्यते एवमुत्तरत्रापि पूर्वमनिषिद्धस्य दोषद
र्शनादेव निषेधकल्पनं नायास्तु शूद्रस्य पक्वान्नमिति निषेधश्चानिन्दति क्रमफलकथनमिदं

कर्मारस्य निषादस्य रङ्गावतारकस्य च सुवर्णकर्तुर्वेणस्य शस्त्रविक्रयिणस्तथा २१५ श्व
वतां शौण्डिकानां च चैलनिर्णेजकस्य च रञ्जकस्य नृशंसस्य यस्य चोपपतिर्गृहे २१६ मृष्य
न्ति ये चोपपतिं स्त्रीजितानां च सर्वशः अनिर्दशं च प्रेतान्नमतुष्टिकरमेव च २१७ राजा
न्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसं आयुः सुवर्णकारान्नं यशश्चर्मावकर्तिनः २१८ का
रुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति २१९
पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियं विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलं
य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्तिताः तेषां त्वगस्थिरोमाणि वदन्त्यन्नं मनीषिणः

शूद्रस्य पक्वान्नम् आपद्यपनादिनिमित्तं तेजो हन्ति सुवर्णकारान्नमायुः चर्मकारान्नं ख्यातिं हन्ति २१८
कारुकान्नमिति कारुकस्य सूपकारादेरन्नम् अपत्यानि हन्ति चर्मकारादेः कारुकान्नेपि गणबली
वर्दमांसपेनरक्षणाद्रि दृष्टेः निर्णेजकान्नं बलं हन्ति गणान्नगणिकयोरन्नं कर्मान्तरेर्जितेभ्यः स्वर्गा
दिलोकेभ्यश्च्यावयति २१९ पूयं चिकित्सकस्यान्नं चिकित्सकस्यान्नं पूयं पूयभक्षणसमदोष
एवं पुंश्चल्यान्नं इन्द्रियं शुक्रं वार्धुषिकान्नं पुरीषं लोहविक्रयिणो विष्ठाव्यतिरिक्तं श्लेष्मादि
मलं गोविन्दराजस्तु चिकित्सकान्नभोजनेन तथाविधपापजाततो जायते यत्र पूयपूयभक्ष्यमवतीत्या
ह २२० य एतेऽन्ये त्वभोज्यान्नाः प्रतिपदनिर्दिष्टेभ्योऽन्येऽक्रमेणाभोज्यान्ना आस्मिन्प्रकरणे य

स्तेनगायनयोश्चैव चौरगायनजीविनोः तक्षणजीविनो वनस्य वृद्ध्युपजीविनश्चान्नं न भुञ्जीत तथा यद्ये
दीक्षितस्याग्नीषोमीयात् प्राक् कदर्यस्य कृपणस्य निगडस्येति तृतीयार्थे षष्ठी निगडेन बद्धस्य गोविंदराज
स्तु बद्धस्य वधे निर्विण्णस्य यो निगडेन निगडस्य दत्ता यो निगडस्येति व्याख्यातवान् १० अभिश
स्तस्य षण्ढस्य महापातकित्वेन संजातलोकविज्ञानस्य पुंश्चल्याः अभिचारिण्याः अगणिकायाश्चापि
दांभिकस्य छद्मना धर्मचारिणो वैडालव्रतिकादेरन्नं न भुञ्जीत शुक्तं स्वभावतो मधुरादिकं काल
वशेनोदकादीनां संपर्के परिवासादिना चाम्लीभवति पर्युषितं रात्र्यन्तरितं शूद्रस्यान्नं न भुञ्जीत तद
तिसंबंधः उच्छिष्टं च भुक्तावशिष्टान्नं अशिष्यो यात्र कस्यापि न भुञ्जीत गुरूच्छिष्टं च विहितत्वाच्छ्र
न्यो गोविंदराजस्तु शूद्रस्योच्छिष्टं तद्भुक्तावशिष्टं स्थालीस्थमपि न भुञ्जीतेत्याह ११ चिकित्सक ।
स्य मृगयोः चिकित्साजीविनो मृगयोर्मांसविक्रयार्थं मृगादिपशूनां हन्तुः क्रूरस्यान्नं प्रकृतेः नि

स्तेनगायनयोश्चैव तक्ष्णो वार्धुषिकस्य च दीक्षितस्य कदर्यस्य बद्धस्य निगडस्य च १० अभि
शस्तस्य षण्ढस्य पुंश्चल्या दांभिकस्य च शुक्तं पर्युषितं चैव शूद्रस्योच्छिष्टमेव च ११ चिकि ।
त्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः उग्रान्नं सूतिकान्नं च पर्याचान्तमनिर्दशं १२ अ
नर्चितं वृथामांसमवीरायाश्च योषितः द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतं १३ पिशुना
नृतिनोश्चान्नं क्रतुविक्रयिणस्तथा शैलूषतन्तुवायान्नं कृतघ्नस्यान्नमेव च १४

निष्ठोच्छिष्टभोजिनोऽप्यन्नं न भुञ्जीत उग्रो दारुणकर्मा तस्यान्नं गोविंदराजो मंत्रपाणिं राजानमुक्तवा ।
न मन्वादौ च शूद्रायां क्षत्रियोत्पन्नमभ्यधात् भेदोक्तेर्याज्ञवल्कीयेनोग्रो राजेति चावदत् आ ।
शौचमिदमेतस्य स्वकीयकृतदूषणं सूतिकान्नं सूतिकामुद्दिश्य यत्क्रियते तत्सूतककालेऽपि ।
भोक्तव्यं एकपङ्क्तावुपविश्यान्नं भुञ्जमानेकेन विहाय च मध्ये क्रियते तस्य पर्याचान्तं अनिर्दशाहं सूत ।
कान्नं प्रेतान्नं एवं त्वसमाप्तमन्नं न भुञ्जीत १२ अनर्चितमिति अर्चार्हस्य यद्यवज्ञया दीयते वृथा
मांसं देवतादिमुद्दिश्योपाकृतं अवीरायाः पतिपुत्ररहिता याः शत्रुनगरपतितानां च उपरि
कृतं वा तेनान्नं न भुञ्जीत १३ पिशुनानृतिनोश्चान्नं पिशुनः परोक्षे परापराधभाषणपरः
अनृती त्रिशाल्य ऽनृतवादी कूटसाक्ष्यादिः क्रतुविक्रयकः मदीययागफलं तव भवत्विति अभि
धाय पणग्रहणं करोति शैलूषो नटः तन्तुवायः सौचिकः कृतघ्नोपकृतोपकारस्यापकारी

म॰स्मृ॰
टी॰
८०

श्रद्धयेष्टं च पूर्तं च इष्टमन्तर्वेदिपत्यादिकर्म पूर्तं तडागारामकरिणी देवकुलप्रपारामादि तद्
नलसः सन्निवेशात्स्वर्गादिफलरहितं श्रद्धया कुर्यात् यस्मान्नेष्टपूर्ते न्यायार्जितधनेन श्रद्धया
कृते अक्षयमोक्षफले भवतः २६ दानधर्मं निषेवेत सनातनं धर्ममैष्टिकपौर्तिकम् अन्तर्वेदिकं
बहिर्वेदिकं च सर्वदा वियात् ततो युक्ते ब्राह्मणमात्रपरितोषात्स्वेनान्तःकरणधर्मेण युक्तेषु
पात्राणि लब्ध्वा २७ यत्किंचिदपि दातव्यं प्रार्थितेन परगुणमत्सरेण स्वल्पमपि यथाशक्ति
दातव्यं यस्मात्स वेदा दानशीलस्य कदाचिन्नाहं पात्रमागामिष्यति यत्सर्वस्मात्तारकपातकहेतोरु
त्पन्नाम्नोचयिष्यति २८ वारिदस्तृप्तिमाप्नोति जलदः क्षुत्पिपासाभ्यां नाप्नोति अन्नदः अनन्तसुख

९०

श्रद्धयेष्टं च पूर्तं च नित्यं कुर्यादतन्द्रितः श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर्धनैः २६ दान
धर्मं निषेवेत नित्यमैष्टिकपौर्तिकं परितुष्टेन भावेन पात्रमासाद्य शक्तितः २७ यत्किंचिद
पि दातव्यं याचितेनानसूयया उत्पत्स्यते हि तत्पात्रं यत्तारयति सर्वतः २८ वारिदस्तृप्ति
माप्नोति सुखमक्षय्यमन्नदः तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् २९ भूमिदो भूमिमा
प्नोति दीर्घमायुर्हिरण्यदः गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ३॰ वासोदश्चन्द्रसालो
क्यमश्विसालोक्यमश्वदः अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपम् ३१ यानशय्याप्रदो भा
र्यामैश्वर्यमभयप्रदः धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसार्ष्टिताम् ३२

तिलप्रदः ईप्सितामपत्यादीनि दीपदो विशेषेणादोषं चक्षुः प्राप्नोति २९ भूमिदो भूमि
माप्नोति भूमिदो भूमेराधिपत्यं सुवर्णदश्चिरजीवित्वं गृहदः श्रेष्ठानि गृहाणि रूप्यदः सक
लशोभनं रूपं प्रभूतं ३॰ वासोदश्चन्द्रसालोक्यं वस्त्रदः चन्द्रसमानलोकान्प्राप्नोति चन्द्रलो
के चन्द्रसमविभूतिर्भवतीति एवमश्विलोकं घोटकदः बलीवर्ददः प्रचुरां श्रियं पत्नीं गोदः
सूर्यलोकं प्राप्नोति ३१ यानशय्याप्रदो भार्यां रथादियानखट्वाशय्याप्रदानाद्भार्यामभयप्र
दः प्राणिनामहिंसकः प्रभुत्वं धान्यादीनां व्रीहियवमाषमुद्गादिसस्यानां दाता चिरस्थायि
सुखितं ब्रह्म वेदस्तत्प्रदो वेदाध्यापको व्याख्याता च ब्रह्मणः सार्ष्टितां तुल्यतां प्राप्नोति ३२

उ॰
८०

भुक्त्वातोऽन्यतमस्यान्नं एषां मध्ये यदन्यतमस्यैवान्नमज्ञानतो भुक्त्वा त्र्यहमुपवसेत् ज्ञानतो भुक्त्वा
कृच्छ्रं एवं रेतोविण्मूत्रभोजनेऽपि एतच्चान्यतमस्येति षष्ठीनिर्देशान्मत्तादिसंबंधिनः परिग्रहस्तु स्व
स्यैव प्रायश्चित्तं न तु संसर्गदुष्टस्य केशकीटावपन्नादेः नापि कालदुष्टस्य शुक्तपर्युषितादेः नापि लि
ङ्गदुष्टस्य स्पृष्टान्नचित्तदुष्टादेः एतत्प्रकरणोपदेशाच्छेषाणामनुक्तत्वात्प्राप्यनार्षः प्रायश्चित्तं
च पतेष्वेकादशोक्तं यदि तु सर्वेष्वेवं प्रायश्चित्तं स्यात्तदा भुक्त्वातोऽन्यतमं तत्त्वन्नमित्यप्यभास्य
तु नतन्यतमस्य भुक्त्वेति तस्मादेकप्रकरणत्वात् प्रमेयानिति पिरम्यध्यान्यप्रायश्चित्तमिदं चोक्तं भुक्त्वा
दीनदत्तं दरवंश्यप्रकरणे च प्रायश्चित्तमिदं लाघवार्थं तत्तत्प्रमाणेत्तादिषु हृत्तमपि कर्तव्यं
स्यात् २२ नाद्याच्छूद्रस्य पक्वान्नं अविद्योपेतप्रहष्यान्नं इति निषिद्धं तदिदानीं विशिष्टविषयतो

भुक्त्वातोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहं । मत्या भुक्त्वाचरेत्कृच्छ्रं रेतोविण्मूत्रमेव च २२

नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः । आददीताममेवास्मादवृत्तावेकरात्रिकं २३

श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः । मीमांसित्वोभयं देवाः सममन्नमकल्पयन् २४

तान्प्रजापतिराहैत्य मा कृध्वं विषमं समं । श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् २५

च्यते अश्राद्धिनः श्राद्धं पंचमहायज्ञानुष्ठानं तद्रहितस्य शूद्रस्य सकाशाद्विद्वान्द्विजः पक्वान्नं न भुंजीत किं त्वन्नान्तराभावे
सति एकरात्रिनिर्वाहोचितमाममेवान्नं तस्माद्गृह्णीयान्न पक्वं २३ श्रोत्रियस्य कदर्यस्य ।
एकोऽधीतवेदः कृपणः अपरो दाता वृद्धिजीवी च तयोरुभयोरपि गुणदोषतत्त्वं विचार्य देवा
स्तुल्यमन्नमनयोरिति निरूपितवन्तः उभयोरपि गुणदोषसाम्यात् २४ तान्प्रजापतिरा
हैत्य तान्देवान्ब्रह्मा आगत्य प्रोवाच विषमं समं मा कुरुत विषमस्य समीकरणमनुचितं किं
पुनरनयोः श्रेष्ठमित्यपेक्षायामेवाचोक्तं दानशीलवार्धुषिकस्यापि श्रद्धापूतान्नं भवति
कृपणान्नं पुनरश्रद्धया हतं दूषितं अथ उभयप्रतिषेधेऽपि श्रद्धादत्तवार्धुषिकान्न
विषये श्राद्धाधिकारपरमिदं अत एवाह २५

म·स्मृ·
टी·
१६२

नामुत्र हि सहायार्थं यस्मात्परलोके सहायकार्ये मित्रार्थं न पितृमातृपुत्रपत्नीज्ञातयस्तिष्ठन्ति किं
तु धर्म एवैकः द्वितीयभावेनोपकारायार्थं भवति एतेन तस्मात्पित्रादिभ्योपि महोपकारकं धर्ममनुति
ष्ठेत् ३९ एकः प्रजायते जन्तुः एक एव प्राणान्प्रमयते न बान्धवैः सहितः एक एव चाम्रियते सु
कृतमपि स्वर्गादिकं दुरितफलं च नरकादि एक एव भुंक्ते न मात्रादिभिः सह तस्मान्मात्राद्यपेक्ष
यापि धर्मं न त्यजेत् ४० मृतं शरीरमुत्सृज्य मृतशरीरं मनःप्राणादिमत् काष्ठलोष्टवद् चे
तनं भूमौ त्यक्त्वा पराङ्मुखा बान्धवा गच्छन्ति न मृतजीवमनुयान्ति धर्मः पुनस्तमनुगच्छति
४१ तस्माद्धर्मं सहायार्थं यस्माद्धर्मेण सहायेन दुस्तरं तमो नरकादिदुःखं तरति तस्माद्धर्मं स

९१

नामुत्र हि सहायार्थं पिता माता च तिष्ठतः न पुत्रदारं न ज्ञातिर्धर्मस्तिष्ठति केवलः ३९ ए
कः प्रजायते जन्तुरेक एव विलीयते एकोनुभुंक्ते सुकृतमेक एव च दुःकृतं ४० मृतं श
रीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति ४१ तस्मा
द्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः धर्मेण हि सहायेन तमस्तरति दुस्तरं ४२ धर्मप्रधा
नं पुरुषं तपसा हतकिल्बिषं परलोकं नयत्याशु भास्वन्तं खशरीरिणं ४३ उत्तमैरु
त्तमैर्नित्यं संबन्धानाचरेत्सह निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत् ४४

हायभावेन सततं शनैरनुतिष्ठेत् ४२ उतश्च धर्मप्रधानं पुरुषं धर्मप्रधानं पुरुषं दैवादुप
जाते पापे प्राजापत्यादितपोरूपप्रायश्चित्तेन हतपापं दीप्तं प्रकृतो धर्म एव शीघ्रं परलोकं ब्र
ह्मस्वर्गादिरूपं नयति तेजसे मादितु यन्निषत्सु तेषा [illegible] प्रयोगात् खशरीरिणं ब्रह्म
रूपमित्यर्थः यद्यपि लिङ्गशरीरावच्छिन्नो जीव एव गच्छति तथापि ब्रह्मभावात् [illegible] स्वरूपमुप
पन्नं धर्म एव चेत्परलोकं नयति ततो धर्ममनुतिष्ठेत् ४३ उत्तमैरुत्तमैर्नित्यं कुलमुत्कर्षं ने
तुमिच्छन्विद्याचारजन्मादिभिरुत्कृष्टैः सर्वदा कन्यादानादिसंबन्धानाचरेत् अपकृष्टान्सं
बन्धांस्त्यजेत् उत्तमविधानादेवाधमपरित्यागे सिद्धे सति अधमांस्त्यजेदिति वचनं यदुत्तमासं

मे·
१६२

सर्वेषामेव दानानां उदकान्नधेनुभूमिवस्त्रतिलसुवर्णघृतादीनां सर्वेषामेव वा दानानां मध्ये
वेददानं विशिष्यते प्रकृष्टफलं भवति २३३ येन येन तु भावेन यद्यद्धारणेन तत्तत्‌: येन येनैव
भावेनाभिप्रायेण फलाभिलाषकः स्वर्गो मे स्यादिति वा मत्स्वर्गोद्याभिप्रायेण निष्कामो यद्यद्दानं
ददाति तेनैव भावेनोपलक्षितं तद्दानफलद्वारेण जन्मान्तरे पूजितः सन् प्राप्नोति २३४ योर्चि
तं प्रतिगृह्णाति यो चार्चापूर्वकमेव दानं ददाति यश्च गृहीता चार्चापूर्वकमेव प्रतिगृह्णाति तावु
भौ स्वर्गं गच्छतो अनर्चितदानप्रतिग्रहकरणेन तु नरकं पुनः पापेन प्रतिग्रहे नर्चितमेवम
प्रगृहीतं दानं नाम्यधेति नियमात्फललाभो न विरुद्धः २३५ न विस्मयेत तपसा वाङ्नायणा।

सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते वार्यन्नगोमहीवासस्तिलकाञ्चनसर्पिषां २३३ ये
न येन तु भावेन यद्दानं संप्रयच्छति तत्तेनैव भावेन प्राप्नोति प्रतिपूजितः २३४ योर्चितं प्र
तिगृह्णाति ददात्यर्चितमेव तु तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये २३५ न विस्मयेत
तपसा वदेदिष्ट्वा च नानृतं नार्तोप्यपवदेद्विप्रान्न दत्त्वा परिकीर्तयेत् २३६ यज्ञोनृतेन क्ष
रति तपः क्षरति विस्मयात् आयुर्विप्रापवादेन दानं तु परिकीर्तनात् २३७ धर्मं शनैः सं
चिनुयाद्वल्मीकमिव पुत्तिकाः परलोकसहायार्थं सर्वभूतान्यपीडयन् २३८

दितपसा अहं तेन कथं मयेदं दुष्करमनुष्ठितमिति विस्मयं न कुर्यात् यागं च कृत्वा नासत्यं वदेत्
तेपि दुःखार्त्तलयानृतवदननिषेधः क्रत्वर्थोयं पुनर्निषेधः ब्राह्मणैः पीडितोपि न तान्निंदयेत्
गवादिं च दत्त्वा मयेदं दत्तमिति परस्मै न कथयेद्यस्मात् २३६ यज्ञोनृतेन क्षरति अनृतेन हे
तुना यज्ञः क्षरति समेनैव सकलं साधु यति एवं तपसि दाने च योज्यं विप्रनिंदयायुः क्षीयते
२३७ धर्मं शनैः संचिनुयात् सर्वप्राणिपीडां परिहृत्य परलोकसहायार्थं यथाशक्ति यानैः
यानैः धर्मं समनुतिष्ठेत् यथा पुत्तिकाः पिपीलिकाः यानैः [illegible] महान्तं मृत्तिकाकूटं संचिन्वन्ति २३८

शय्यां गृह[illegible]ान्गंधानिति गंधान्गंधवर्त्तिकर्पूरादीनि धाना भृष्टयवतंडुलान्पयः क्षी
रं पूर्वमा[illegible]पनिवर्त्तयेन्नगवादीनामप्रत्याख्यानमुक्तं शय्यादीनि त्वनाहूतान्यपि दात्रा
स्वगृहे स्थितान्ययाचितोपकल्पितानि न प्रत्याचक्षीत ५० गुरून्भृत्यांश्चोज्जिहीर्षन्
मातापित्रादीन्गुरून्भृत्यादीन्भार्यादींश्च दुःखावसन्नानुद्धर्त्तुमिच्छन्पतितादिवर्जं सर्वतः
शूद्रादेरसाधुभ्योपि प्रतिगृह्णीयात् न तु तेन धनेन स्वयं जीवेत् ५१ गुरुषु त्वभ्यतीतेषु
मातापित्रादिषु मृतेषु तैर्वा जीवद्भिरपि सह योगाभावे स्थितैर्विना गृहान्तरे वसन्नात्मनो वृत्तिमि
च्छन्सर्वदा साधुभ्य एव गृह्णीयात् ५२ आर्द्धिकः कुलमित्रं वा आर्द्धिकः कर्षकः स्वं

शय्यां गृहान्कुशान्गंधानपः पुष्पं फलं दधि धाना मत्स्यान्पयो मांसं शाकं चैव न निर्णुदेत्
गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन्देवतातिथीन् सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः ५१
गुरुषु त्वभ्यतीतेषु विना वा तैर्गृहे वसन् आत्मनो वृत्तिमन्विच्छन्गृह्णीयात्साधुतः सदा ५२
आर्द्धिकः कुलमित्रं वा गोपालो दासनापितौ एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्
यादृशोस्य भवेदात्मा यादृशं च चिकीर्षितं यथा चोपचरेदेनं तथात्मानं निवेदयेत् ५४ यो
न्यथा सन्तमात्मानमन्यथा सत्सु भाषते स पापकृत्तमो लोके स्तेन आत्मापहारकः ५५

यि पादत्वा योपस्कृषिं करोति स तस्य भोज्यान्नाः एवं स्वकुलस्य मित्रं तथा यो यस्य नापितः स तस्य क
र्म करोति यो यश्चिन्नात्मानं निवेदयति दुर्गतिरहं त्वदीयसेवां कुर्वं स्वत्वमी पेवं स्वामी
ति स शूद्रस्तस्य भोज्यान्नः ५३ तथात्मनिवेदनं शूद्रेण कर्त्तव्यमित्याह यादृशोस्य भ
वेदात्मा अस्य शूद्रस्य कुलशीलादि यादृशश्चात्मा स्वरूपपच्चास्य कर्म भवेत्सेवितुमिच्छितं यथा
चानेन सेवा कर्त्तव्या तेन प्रकारेणात्मानं कथयेत् यस्मात् ५४ योन्यथा सन्तमात्मानं
यदुतिसामान्यनिर्देशः प्रकृतशूद्रस्यापि यः कश्चित्कुलादिभिरन्यथाभूतमात्मानं
अन्यथा साधुभ्यः कथयति स लोकेऽतिशयेन पापकारी चौरः यस्मादात्मापहारकः

उत्तमानुत्तमानेव उत्तमानुत्तमानाहीनैः सहसंबन्धं कुर्वन् ब्राह्मणः श्रेष्ठतां गच्छति प्रत्यवाये
न विपरीताचरणेन हीनैः सह संबन्धे जाते प्रत्यवायेन शूद्रत्वमेति ॥४५॥ ब्रह्मचारी मृ
दुर्दान्तः आरब्धसंपादयिता ब्रह्मचारी मृदुरनिष्ठुरः दमसहायपापादानाहीतइतिशीतात
पादिदुःखसहिष्णुर्हीनतमः क्रूराचारैः सहवैः संसर्गं परिहरन् परहिंसानिवृत्तः तथा
व्रत एवं नियमो यमश्चित्तिप्रसंयमाख्येन दमेन दानेन च स्वर्गं प्राप्नोति ॥४६॥ एधोदकं मूल
फलं काष्ठजलमूलफलान्नमयाचितोपनीतानि मधुमभ्युद्यतं कुलटाषण्ढपतितेभ्यस्त
स्याद्विषइति याज्ञवल्क्यवचनात् कुलटादिवर्जं सर्वतः शूद्रादिभ्योऽपि प्रतिगृह्णीयात् आम

उत्तमानुत्तमान्गच्छन्हीनान्हीनांश्च वर्जयन् ब्राह्मणः श्रेष्ठतामेति प्रत्यवायेन शूद्रतां ॥४५॥
ब्रह्मचारी मृदुर्दान्तः क्रूराचारैरसंवसन् अहिंस्रो दमदानाभ्यां जयेत्स्वर्गं तथाव्रतः ॥४६॥
एधोदकं मूलफलमन्नमभ्युद्यतं च यत् सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणां ॥४७॥
आहृताभ्युद्यतां भिक्षां पुरस्तादप्रचोदितां मेने प्रजापतिर्ग्राह्यामपि दुष्कृतकर्मणः ॥४८॥
नाश्नन्ति पितरस्तस्य दश वर्षाणि पंच च न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते ॥४९॥

मेवाददीतास्मादिसंकल्पादामात्रमेव शूद्रादपि ग्राह्यं मधु अभयं चात्मत्राणात्मकं प्रीतिहेतु
त्वाद्दक्षिणात्वं च तत्त्वादिभ्योऽपि स्वीकुर्यात् ॥४७॥ आहृताभ्युद्यतां भिक्षां आहृतां संप्रदा
नदेशमानीतां अभ्युद्यतामाभिमुख्येन स्थापितां अप्रचोदितां प्रतिगृहीतास्वयमन्यमुखेन वा
पूर्वमयाचितां दात्रा च तव भ्यमिदं ददामीति पूर्वमकथितां गोहिरण्यादिरूपां भिक्षां पाप
कारिणोऽपि पतितादिवर्जं ग्राह्यां ब्रह्मा विरिंचिर्मन्यत ॥४८॥ नाश्नन्ति पितरस्तस्य तेनोपकल्पि
तं श्राद्धं पंचदश वर्षाणि पितरो न भुंजते न च यत्तेन दत्तं पुरोडाशादि हव्यम
ग्निर्वहति ... यति यस्तां भिक्षां न स्वीकरोति ॥४९॥

म॰स्मृ॰
टी॰
९३

गौडेनंदनवासिनाम्नि सुजनैः वर्ण्यैर्वरेंद्राकुले विप्रो भट्टदिवाकरस्य तनयः कुल्लूकभट्टोभवत्
वृत्तिस्तेन मनुस्मृतौ शिवपुरे व्याख्या पुनः पंचमे स्वे प्रक्रिमता हिता प्रविदुषां मन्वर्थमुक्तावली
श्रुत्वैतानृषयोधर्मान् ऋषयः स्नातकस्यैतान्धर्मान्श्रुत्वा महात्मानं परमात्मानं भृगुमिदं
वचनमब्रुवन्यद्यपि प्रथमाध्याये भृगुंनारदंचेति भृगुसृष्टिरपि मनुत एवोक्ता तथापिक ।
ल्पभेदेनानलप्रभवत्वमुच्यते तथा च श्रुतिः तस्य यद्रेतसः प्रथममुद्दीप्यते तदसावादि
त्योभवद्द्वितीयमासीत्तद्भृगुरिति अत एव भृष्टाद्रेतस उत्पन्नत्वाद्भृगुः २ एवं यथोक्तं विप्रा
णां एवं यथोक्तं स्वधर्ममनुर्वतां ब्राह्मणानां श्रुतिशास्त्रज्ञानां वेदोदितायुषः पूर्वं कथं मृत्यु

९३

श्रुत्वैतानृषयोधर्मान्स्नातकस्य यथोदितान् इदमूचुर्महात्मानमनलप्रभवंविभुं २
एवं यथोक्तं विप्राणां स्वधर्ममनुतिष्ठतां कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो २
स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः श्रूयतां येन दोषेण मृत्युर्विप्राञ्जिघांसति २
अनभ्यासेन वेदानामाचारस्य च वर्जनात् आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसति

र्भवति आयुरल्पत्वहेतोरधर्मस्याचरणाभावात्सकलसंशयोच्छेदनसमर्थत्वाच्च भोइति
संबोधनं २ स तानुवाच धर्मात्मा मनोःपुत्रो धर्मस्वभावो भृगुर्येन दोषेणाल्पकाले मृत्यु
र्विप्रान्हंतुमिच्छति तद्दोषः श्रूयतामित्येवं तान्महर्षीनुजगाद ३ अनभ्यासेन वेदानां
वेदानामनभ्यासात्स्वीयाचारपरित्यागात्सामर्थ्ये सत्यवश्यकर्तव्यकरणाननुष्ठानादालस्य
णादालस्याद्दनीयसदोषाच्च मृत्युर्ब्राह्मणान्हंतुमिच्छति यतेषामधर्मोत्पादनं तत्कारे
णमुः तद्धेतुत्वाद्वेदाभ्यासादेरुक्तत्वादनुक्तामन्नदोषमाह ४

कु॰
९३

वाच्यार्था नियताः सर्वे सर्वेऽर्थाः शब्देष्ववाच्यत्वेन नियता वाङ्मूला वाक्शब्दो मूलं तेषां प्रतिपत्तौ शब्दादेव प्रतीयन्ते प्रतीतिद्वारेण वाङ्मूलत्वं शब्देभ्य एव व्यवहारश्चानुष्ठीयते इति वाग्विनिर्गता इत्युच्यन्ते अत एव वेदशब्देभ्य एवादौ विनिर्ममे इति ब्रह्मणोपि सृष्टिः वेदशब्दमूलैवोक्ता अतो यस्तां वाचं स्तेनयेत् अन्यथार्थवादाभिचारिणीं करोति स नरः सर्वस्तेयकृद्भवति ५६ महर्षिपितृदेवानां गृहस्थस्यैव सन्न्यासप्रकारोऽयमुच्यते महर्षीणां स्वाध्यायेन पितॄणां पुत्रोत्पादनेन देवानां यज्ञैर्यथाशास्त्रमानृण्यं गत्वा योग्ये पुत्रे सर्वं कुटुम्बचिन्तामारोप्य माध्यस्थ्यमाश्रितः पुत्रादिधनादौ ममत्वोपेक्षया ब्रह्मनुध्यानात्सर्वत्र समदर्शनो गृह एव वसेत् ५७ एकाकी चि

वाच्यार्था नियताः सर्वे वाङ्मूला वाग्विनिःसृताः तांस्तु यः स्तेनयेद्वाचं स सर्वस्तेयकृन्नरः ५६

महर्षिपितृदेवानां गत्वानृण्यं यथाविधि पुत्रे सर्वं समासज्य वसेन्माध्यस्थ्यमाश्रितः ५७

एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति ५८

एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती स्नातकव्रतकल्पश्च सत्त्ववृद्धिकरः शुभः ५९

अनेन विप्रो वृत्तेन वर्तयन्वेदशास्त्रवित् व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते ६० ६२०

इति मानवे धर्मशास्त्रे गृहस्थवृत्तिस्नातकव्रतवर्णनं चतुर्थोऽध्यायः ४

न्तयेन्नित्यं काम्यकर्मणां धनार्जनस्य च कृतसन्न्यासः षष्ठाध्याये वक्ष्यमाणः पुत्रोपकल्पितवृत्तिरेकाकी निर्जने देशे आत्महितं जीवस्य ब्रह्मभावं वेदान्तोक्तं सर्वदा ध्यायेत् यस्मात्तद्ध्यायन्ब्रह्मसाक्षात्कारद्वारेण परं श्रेयो मोक्षलक्षणं प्राप्नोति ५८ एषोदिता गृहस्थस्य प्रथमाध्यायार्थोपसंहारः एषा ऋतादिका वृत्तिर्गृहस्थस्य ब्राह्मणस्योक्ता शाश्वती नित्या आपदि त्वनित्येति वक्ष्यते स्नातकव्रतविधिश्च सत्त्वस्य गुणस्य वृद्धिकरः प्रशस्तश्चोक्तः अनेन विप्रो वृत्तेन सर्वस्योक्तस्य फलकथनमिदं अनेन शास्त्रोक्ताचरणेन वेदविद्ब्राह्मणो वर्तमानो नित्यकर्मानुष्ठानात्क्षीणपापः सन्ब्रह्मज्ञानप्रकर्षात् ब्रह्मैव लोकः तस्मिन्नित्यं महिमानं सर्वोत्कर्षरूपं प्राप्नो

अनिर्दशाया गोः क्षीरं प्रसूताया अनिर्दशाया गोर्दशरात्रं गोरिति पयः क्षीरस्य उपलक्षणार्थं तेनाजामहि-
ष्योरपि दशाहमध्ये प्रतिषेधः तथा च यमः अनिर्दशाहं गोक्षीरमाजं माहिषमेव च अयोप्रभवः
अश्वाद्येकखुरसंबन्धिनी यात्र ऋतुमती वृषमिच्छति तस्याः क्षीरं तथा च हारीतः संधिनी वृषं वृषस्य-
ती तस्याः पयो न पिबेदित्यमनुवदति विवत्साया मृतवत्साया असन्निहितवत्सायाश्च क्षीरं वर्ज-
येत् येन्नयथिकरणेन्यायेन वत्सग्रहणादेव गाविलब्धायां पुनर्गोग्रहणं गोरेव न तु अजामाहिष्या-
दिनिवृत्त्यर्थं ८ आरण्यानां च सर्वेषां मृगाणां अत्र महिषपर्युदासात् पशुमात्रपरः माहिषं क्षी-
रं वर्जयित्वा सर्वेषामरण्यभवानां पशूनां हस्त्यादीनां क्षीरं स्त्रीक्षीरं च सर्वाणि शुक्तानि वर्जनी-
यानि स्वभावतो मधुरादिरसानि यानि कालवशेन उदकवासादिना चाम्लीभवंति तानि शुक्तानि

अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा । आविकं संधिनीक्षीरं विवत्सायाश्च गोः पयः ८
आरण्यानां च सर्वेषां मृगाणां माहिषं विना । स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि ९
दधि भक्ष्यं च शुक्तेषु सर्वं च दधिसंभवं । यानि चैवाभिषूयंते पुष्पमूलफलैः शुभैः १०
क्रव्यादांश्शकुनीन्सर्वांस्तथा ग्रामनिवासिनः । अनिर्दिष्टांश्चैकशफांष्टिट्टिभं च विवर्जयेत् ११

शुक्ता यानि शुक्तं पर्युषितं चैवेति च तत्पर्यन्तोपि निषेधो दध्यादिप्रतिषेधार्थं पुनरिहोच्यते ९ दधि
भक्ष्यं च शुक्तेषु शुक्तेषु मध्ये दधि भक्ष्यं सर्वं च दधिसंभवं तक्रादि यानि च पुष्पमूलफलैरु-
दकेन संधीयंते तानि च भक्ष्याणि यानि शुभैरिति विशेषणोपादानात् मोहादिविकारकारिभिः कृ-
तसंधानस्य प्रतिषेधः तथा च बृहस्पतिः कंदमूलफलैः पुष्पैः प्रशस्तैः शुक्तान्न वर्जयेत् अवि-
कारे भवेद्भक्ष्यमभक्ष्यं तद्विकारकृत् १० क्रव्यादान्शकुनीन्सर्वान् आममांसं ये भक्षयंति
तान्सर्वान् गृध्रादीन्पक्षिणो वर्जयेत् तथा ग्रामनिवासिनश्च पारावतादीन्पक्षिणः तथा श्रु-
तौ केचिदेकशफा भक्ष्यत्वेन निर्दिष्टाः तथा च नाश्ववाडवमालभेत तस्य च मांसमश्नीयात्ते-
भ्यो ऽनिर्दिष्टा रासभादयः तेषां मांसं वर्जयेत् यद्यपि यज्ञांगत्वेन विहितास्तेषामपि यज्ञ एव

लशुनं गृञ्जनं चैव लशुनगृञ्जनपलाण्डुकवकानि क्षीणिस्थूलकन्दशाकानि कवकं छत्राकः अ
मेध्यप्रभवानि विष्ठादिजातानि तण्डुलीयादीनि विट्जानीति याज्ञवल्क्यवचनात् एतानि
द्विजातीनाम् अभक्ष्याणि द्विजातिग्रहणं शूद्रस्य पुंदोषाभावार्थं लोहितान्वृक्षनिर्यासान् लो
हितवर्णान् वृक्षनिर्गतरसान् अच्छिन्नताप्रतानवृश्चनच्छेदनं तत्प्रभवान् लोहितानपि त
थान् इति निवृत्तिः अपो वल्लयपल्लोहितायोवाव्रश्चननिर्यासस्तस्य नाश्नीयात् काम
म्यसेति शेलुं बहुवारको गव्यं सनव प्रसूताया गोः क्षीरं पश्चाद्धि सप्ताहात् ठिनं भवति ए
तान् प्रयत्नेन त्यजेत् अनिर्दशाया गोः क्षीरमित्यनेनैव पेयूषस्यापि निषेधसिद्धौ पुनर्ग्रहणं दोष
तात्पर्यग्रहणार्थं गोरवार्थं प्रपद्धि देशाः अत एव प्रयत्नग्रहणं ॥ वृथाकृसरसंयाव देव

लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च ॥ अभक्ष्याणि द्विजातीनाममेध्यप्रभवाणि च ॥
लोहितान्वृक्षनिर्यासान्वृश्चनप्रभवांस्तथा ॥ शेलुं गव्यं च पेयूषं प्रयत्नेन विवर्जयेत् ॥
वृथाकृसरसंयावं पायसापूपमेव च ॥ अननुपाकृतमांसानि देवान्नानि हवींषि च ॥ १

तायन्तुद्देशो नात्मार्थं यत्र च्चनेन तद्वृथा कृसरः तिलेन सह सिद्धओदनः यथाह दीपपरिशि
ष्टे तिलतण्डुलसंपक्वः कृसरः सोऽभिधीयते संयावं घृतक्षीरगुडगोधूमचूर्णसिद्धउत्क
रिकेति प्रसिद्धः क्षीरतण्डुलसिद्धः पायसः अपूपः पिष्टकः प्रसिद्धः एतान्वृथापक्वान्वर्ज
येत् पशुयागादौ मन्त्रेणावलेन पशोः स्पर्शनमुपाकरणं तद्रहितः पुरुषस्त्वनुपाकृतं तत्
मांसानि देवान्नानि नैवेद्यार्थमन्नानि प्राङ्निवेदनात् हवींषि च पुरोडाशादीनि प्राग्होमाद्वर्ज
येत् अननुपाकृतमांसानीति एतद्विशेषनिषेधदर्शनात् अनर्चितं वृथामांसमिति सा
मान्यनिषेधो गोबलीवर्दन्यायेन अननुपाकृतमांसेतरश्राद्धायत्तदेयमांसभक्षणोप
र्यवस्यति १

उक्तानीभक्ष्यमत्स्यानाह पाठीनरोहितावाद्यौ पाठीनरोहितौ मत्स्यभेदौ भक्षणीयौ हव्यकव्ययोर्नियुक्ता
विनिसकालवक्ष्यमाणनिषिद्धभक्षणनिमित्तोपलक्षणार्थं तेन प्राणात्ययादावदोषः तथा राजीवा ।
ख्यान्सिंहतुण्डांश्च सशल्कांश्च सर्वान्वक्ष्यमाणभक्षणलक्षणोपेतानद्यात् मेधातिथिगोविन्दराजौ
तु पाठीनरोहितौ देवपित्र्यकर्मणि नियुक्तावेवादनीयौ न तन्यदा राजीवसिंहतुण्डसशल्कांश्च स
र्वान्हव्यकव्याभ्यामन्यत्रापि सर्वदा भक्षणीयान्व्याचक्षतुः न तन्मनोहरं पाठीनरोहितावाद्याविति
युक्तौ आद्यावित्येव भक्षणीयौ न तु आद्यकत्रापि राजीवादयस्तु सर्वदा हव्यकव्याभ्यामन्यत्रापि भ
क्ष्या इत्यस्य अप्रमाणकत्वात्स्मृत्यन्तरे च रोहितपाठीनराजीवादीनां तुल्यत्वेनाभिधानात् तथा च य
मः राजीवाः सिंहतुण्डाश्च सशल्काश्च तथैव च पाठीनरोहितौ चापि भक्ष्यान्मत्स्येषु कीर्तयेत् याज्ञ
वल्क्यः भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्यकाः शशश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः ।

पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः राजीवान्सिंहतुण्डांश्च सशल्कांश्चैव सर्वशः १५
न भक्षयेदेकचरानज्ञातांश्च मृगद्विजान् भक्ष्येष्वपि समुद्दिष्टान्सर्वान्पञ्चनखांस्तथा १६
श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा भक्ष्यान्पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः १७
छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः १८

ताः तथा पाठीनराजीवसशल्काश्च द्विजातिभिः हारीतः सशल्कान्मत्स्यानुपपन्नान्भक्षयेत् एवं
च भोज्या शौनकतोपि श्राद्धे पाठीनरोहितौ राजीवाद्यास्तथा नेति व्याख्यानमनुसम्मतं १५ न भक्ष
येदेकचरान् ये एकाकिनः प्रायेण चरन्ति सर्पादयस्तानेकचरान् तथा ये अभियुक्तैरपि नामजातिभेदे
नावधार्यविभागतश्च मृगपक्षिणो न ज्ञायन्ते तान्सामान्यविशेषनिषेधाभावेन भक्ष्यानिति निवृत्तिप्रा
नु भक्ष्यत्वेन समुद्दिष्टानि च तथा सर्वान्पञ्चनखान्वानरादीन्न भक्षयेत् १६ अत्र प्रतिप्रसवमाह
श्वाविधं शल्यकं गोधां श्वाविधः सेधाख्यप्राणिभेदकः तत्सदृशः स्थूलरोमा शल्यकस्तथा गोधा खड्ग
कच्छपशशान्पञ्चनखेषु मध्ये भक्ष्यान्मन्वादय आहुः तथोष्ट्रवर्जितानेकतोदन्तपङ्क्तियुक्तान् १७
छत्राकं विड्वराहं च कवकग्राम्यशूकरलशुनादीनामन्यतमं बुद्धिपूर्वकं गुरुप्रायश्चित्तोपदेशाद
भ्यासतो भक्षयित्वा द्विजातिः पतति ततश्च पतितप्रायश्चित्तं कुर्यात् हिताज्ञाद्यपोजरिधः सुरापा

कलविंकं प्लवं हंसं कलविंकं चटकं तस्य च ग्रामारण्योभयवासित्वाद् ग्रामनिवासिन एव निषेधः अरण्यस्याभ्यनुज्ञानार्थं जातिग्रहणेन निषेधः प्लवाख्यं पक्षिणं तथा हंसं चक्रवाकं ग्रामकुक्कुटं सारसं रज्जुवालं दात्यूहं शुकसारिके चारण्ये पक्षिणौ वर्जयेत् वक्ष्यमाणजालपदनिषेधेनैव हंसचक्रवाकयोरपि निषेधसिद्धे पृथङ्निषेधोऽन्येषामापादि जालपदानां विकल्पार्थः स च व्यवस्थितो विज्ञेयः आपदि भक्ष्याणां तत्त्वोपदिष्टानां विकल्पस्सागत एव प्राप्तेः ग्रामकुक्कुटे तु ग्रामग्रहणमारण्यस्याभ्यनुज्ञानार्थं न त्वेतद्व्यतिरिक्तग्रामवासिविकल्पार्थं स्वपदान्वगतप्रयोजनसंभवे सति वाक्यान्तरगतविशेषावधारणपरत्वस्यान्याय्यत्वात् १२ प्रतुदान्जालपादांश्च प्रतुदाः चञ्च्वा ये भक्षयन्ति तान्दार्वाघाटादींश्च जालपादान् जालाकारपादान्श्वा

कलविंकं प्लवं हंसं चक्राह्वं ग्रामकुक्कुटं सारसं रज्जुवालं च दात्यूहं शुकसारिके १२
प्रतुदाञ्जालपादांश्च कोयष्टिनखविष्किरान् निमज्जतश्च मत्स्यादान्सौनं वल्लूरमेव च १३
बकं चैव बलाकां च काकोलं खंजरीटकं मत्स्यादान्विड्वराहांश्च मत्स्यानेव च सर्वशः १४
यो यस्य मांसमश्नाति स तन्मांसाद उच्यते मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान्विवर्जयेत्

दिप्रभृतीन् कोयष्ट्याख्यं पक्षिणं नखविष्किरान् नखैर्विकीर्य ये भक्षयन्ति तान् अभ्यनुज्ञातारण्यकुक्कुटादिव्यतिरिक्तान् सौनं च कोटीरान् तथा निमज्ज्य ये मत्स्यान् खादन्ति तान् मद्गुप्रभृतीन् सूनायां शुमारणस्थाने तत्रस्थितं यन्मांसं भक्ष्यमपि वल्लूरं शुष्कमांसं एतानि वर्जयेत् १३ बकं चैव बलाकां च बकबलाकाद्रोणकाकखंजनान् तथा मत्स्यादान् पक्षिव्यतिरिक्तान् नक्रादीन् विट्सूकरांश्च विडिति विशेषणमारण्यसूकराभ्यनुज्ञानार्थं मत्स्यान्सर्वान्विवर्जयेत् १४ मत्स्यभक्षणनिंदायामाह योयस्य मांसमश्नाति यो यदीयं मांसं भक्षयति स तन्मांसाद एव परं व्यपदिश्यते यथा मार्जारो मूषिकादः पुनः सर्वमांसभक्षकत्वेनैव व्यपदेष्टुं योग्यः तस्मान्मत्स्यान्न खादेत् १५

इदानीं पर्युषितप्रतिप्रसवार्थमाह यत्किंचित्स्नेहसंयुक्तं। यत्किंचित्खरविशदमभ्यवहार्यं भक्ष्यं मोदकादि भोज्यं पायसादि अगर्हितमुपजातान्तररहितं तत्पर्युषितं रात्र्यन्तरितमपि घृततैलदध्यादिसंयुक्तं कृत्वा भक्षणीयं ननु प्रागेव यत्स्नेहसंयुक्तं तत्पर्युषितं भक्षणीयमिति व्याख्येयं तथा सति हविःशेषस्य स्नेहसंयोगावश्यंभावात् यत्किंचित्स्नेहसंयुक्तमित्यनेनैव भक्षणे सिद्धे हविःशेषं च यद्भवेदित्यपार्थकं स्यात् स्मृत्यन्तरेऽपि भक्षणकाले घृताभिधारणमुपदिश्यते तथा च यमः मधुरमांससंयुक्तं तथा पर्युषितं च यत् तच्च घृताक्तं कृत्वा भुञ्जीताज्याभिघारितं हविःशेषं पुरोडाशादि पर्युषितं भोजनकाले स्नेहसंयोगशून्यमेव भक्षणीयं पृथगुपदेशात् २४ चिरस्थितमपि त्वाद्यं अनेकरात्रान्तरिता अपि यवगोधूमजं पयोविकाराः स्नेहसंयोगरहिता अपि द्विजातिभिर्भक्षणीयाः २५ एतदु

यत्किंचित्स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितं तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेत् २४
चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः यवगोधूमजं सर्वं पयसश्चैव विक्रिया २५
एतदुक्तं द्विजातीनां भक्ष्याभक्ष्यमशेषतः मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्जने २६
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया यथाविधि नियुक्तस्तु प्राणानामेव चात्यये २७

क्तं द्विजातीनां एतद्द्विजातीनां भक्ष्याभक्ष्यमुक्तं अत ऊर्ध्वं मांसस्य भक्षणे वर्जने च विधानं निःशेषं वक्ष्यामि २६ प्रोक्षितं भक्षयेन्मांसं प्रोक्षितं भक्षयेदिति परिसंख्या वा स्यान्नियमविधिर्वा तत्र परिसंख्याने प्रोक्षितादन्यत्र भक्षणीयमिति वाक्यार्थः स्यात् स चानुपाकृतमांसानीत्यनेनैव निषेधात् प्राप्तः तस्मान्मन्त्रकृतप्रोक्षणसंस्कारसंयुक्तयज्ञहुतपशुमांसशेषभक्षणमिदं यज्ञाङ्गं विधीयते अत एवासंस्कृतान्पशून्मन्त्रैरित्यस्यानुवादं वक्ष्यति ब्राह्मणानां च यदा कामना भवति तदावश्यं मांसभोक्तव्यमिति तदा नियमत एकवारं भक्षयेत् सकृद्ब्राह्मणकाम्ययेति यमवचनात् तथा श्राद्धे मधुपर्के च समांसो मधुपर्क इति गृह्यवचनान्नियुक्तेन नियमतो मांसं भक्षणीयं अत एव नियुक्तस्तु यथान्यायमित्यभिक्रमदोषं वक्ष्यति प्राणात्यये चाहारान्तराभावहेतुके व्याधिहेतुके वा नियमतो मांसं भक्षयेत् २७

अमत्यैतानि षड् जग्ध्वा। एतानि छत्राकादीनि षड् बुद्धिपूर्वकमेव प्रत्येकं भक्षयित्वा अभिधेयप्रभवत्वात्
एतानि पतनेन साहित्यस्याविवक्षितत्वादेकादशाध्यायवक्ष्यमाणस्वरूपं सत्राह सान्तपनं यतिचा-
न्द्रायणं वा चरेत्। एतद्व्यतिरिक्ते शुक्ललोहितवृक्षनिर्यासादिषु प्रत्येकं भक्षणे दहोरात्रोपवासं कु-
र्यात्। छत्राकादीनां च प्रायश्चित्तप्रकरणे कृच्छ्रोक्तवर्जनादशेषेषु: शेषेषूपवसेदहरिति तल्लाघ-
वार्थं तत्र हि क्रियमाणे लोहितवृक्षनिर्यासादिग्रहणमपि कर्तव्यं स्यात्। २० संवत्सरस्यैकमपि
द्विजोत्तमपदं द्विजातिपरं त्रयाणां प्रकृतत्वात्। द्विजातिः संवत्सरमध्ये एकमपि कृच्छ्रं प्राजापत्यमा-
त्। प्राजापत्यरूपं अज्ञातभक्षणे शेषापयाभक्ष्यार्थं अनुतिष्ठेत् ज्ञातस्य पुनः अभक्ष्यभक्षणदोषस्य वि-
शेषतो यत्र यद्विहितं तदेव प्रायश्चित्तं कुर्यात्। यज्ञार्थं इदेवा पवित्राणि ब्राह्मणानामेकत्वमयन्

अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सान्तपनं चरेत्। यतिचान्द्रायणं वापि शेषेषूपवसेदहः॥ १९
संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः। अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य च विशेषतः॥ २०
यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः। भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत्पुरा॥ २१
बभूवुर्हि पुरोडाशा भक्ष्याणां मृगपक्षिणां। पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च॥ २२

अष्टसु मन्त्रेषु निर्णीतं यच्च वा चाप्रज्ञातस्य तदिति तत् द्रव्यशुद्धिप्रकरणे यदि तत्प्रायश्चित्तव्यतिरिक्त-
द्रव्यशुद्धिविषये वतिष्ठते २१ यज्ञार्थं ब्राह्मणैर्वध्याः। इदानीं भक्षणप्रसंगेन यागाद्यर्थं हिंसा-
मभ्यनुजानाति ब्राह्मणादिभिर्यागार्थं प्रशस्ताः शास्त्रविहिता मृगपक्षिणो वध्याः भृत्यानां चाव-
श्यभरणीयानां वृद्धमातापित्रादीनां च संवर्द्धनार्थं यस्मादगस्त्यो मुनिः पूर्वं तथा कृतवान् परक-
निरूपोपमर्थवादः बभूवुर्हि पुरोडाशाः यस्मात्पुरातनेष्वपि ऋषिकर्तृकयज्ञेषु ब्राह्मणक्ष-
त्रियकर्तृषु च भक्ष्याणां मृगपक्षिणां मांसेन पुरोडाशा अभवन् तस्माद्यज्ञार्थमद्यतनैरपि
मृगपक्षिणो वध्याः २२

नाद्यादविधिना मांसं मांसभक्षणमनुष्ठानतो द्विजातिः कृत्वा देवार्चनविधानं विना मांसं न भक्षयेत्
यस्मादविधानेन येषां मांसं खादति तैस्तैः प्राणिभिः परलोके स्वयं भक्ष्यमाणः खाद्यत इति सर्वशेषोऽनु
वादः ॥ ३३ ॥ न तादृशं भवत्येनो मृगवधजीविनो व्याधादेर्धननिमित्तं मृगाणां हननेन यादृशं
पापं भवति यादृशं देवपितृशेषरहितमांसानि खादतः परलोके भवतीति पूर्वानुवादः ॥ ३४ ॥ नि
युक्तस्तु यथान्यायं श्राद्धे मधुपर्के च यथाशास्त्रं नियुक्तः सन्यो मनुष्यो मांसं न खादति स मृतः सन्ने
कविंशतिजन्मानि पशुर्भवति यथाविधि नियुक्तस्यैतन्नियमव्यतिक्रमफलविधानमिदं
॥ ३५ ॥ असंस्कृतान्पशून्मन्त्रैः वेदविहितमन्त्रवत्प्रोक्षणादिसंस्काररहितान्पशून्विप्रादिः कदाचि
न्नाश्नीयात् शाश्वतं प्रवाहानादितया नित्यं पशुयागादिविधिमास्थितः मन्त्रसंस्कृतानेवाश्नीयादिति

नाद्यादविधिना मांसं विधिज्ञोऽनापदि द्विजः जग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽवशः ॥ ३३ ॥
न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः यादृशं भवति प्रेत्य वृथामांसानि खादतः ॥ ३४ ॥ नि
युक्तस्तु यथान्यायं यो मांसं नात्ति मानवः स प्रेत्य पशुतां याति संभवानेकविंशतिं ॥ ३५ ॥ अ
संस्कृतान्पशून्मन्त्रैर्नाद्याद्विप्रः कथंचन मन्त्रैस्तु संस्कृतानद्याच्छाश्वतं विधिमास्थितः ॥ ३६ ॥
कुर्याद्घृतपशुं संगे कुर्यात्पिष्टपशुं तथा न त्वेव तु वृथा हन्तुं पशुमिच्छेत्कदाचन ॥ ३७ ॥ याव
न्ति पशुरोमाणि तावत्कृत्वो ह मारणं वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥ ३८ ॥ य
ज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा यज्ञोऽस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ॥ ३९ ॥

शेदितं भक्षयेन्मांसमिति मेतस्यानुवादार्थमेतत् ॥ ३६ ॥ कुर्याद्घृतपशुं संगे संगे प्रसक्ते पशुभक्ष
णानुरागे घृतमयं पिष्टमयं वा पशुं प्रतिकृतिं कृत्वा खादेन्न पुनः देवताद्युद्देशं विनैव पशून्क
दाचिदपि हन्तुमिच्छेत् ॥ ३७ ॥ यावन्ति पशुरोमाणि देवताद्युद्देशमन्तरेण यो यः पशुं हन्ति
स वृथापशुघ्नो मृतः सन्यावन्ति तस्य पशोः रोमाणि तावत्कृत्वो भूतं जन्मनि जन्मनि मरणं प्राप्नो
ति तस्माद्वृथा पशून्न हन्यात् तावत्कृत्व इति कृत्वसुच् वचनेऽभ्यावृत्तिगणने कृत्वसुच्प्रत्य
यः ह्रस्वश्च आगमप्रसिद्धिसूचनार्थः ॥ ३८ ॥ यज्ञार्थं तु पशुवधे न दोष इत्याह यज्ञार्थं पशवः
सृष्टाः यज्ञसिद्ध्यर्थं प्रजापतिना आत्मनैवादरेण पशवः सृष्टा यज्ञश्चाग्नौ प्रास्ताहुतिन्यायेन

प्राणात्यये मांसभक्षणमर्थवादमाह प्राणस्यान्नमिदं सर्वं प्राणितीति प्राणो जीवः शरीरान्
गतो भोक्ता तस्यादनीयं सर्वमिदं ब्रह्मा कल्पितवान् किं तदाह जंगमं पश्वादि स्थावरं व्रीहियवादि
सर्वं तस्य भोजनं तस्मात्प्राणधारणार्थं जीवो मांसं भक्षयेत् प्राणस्यान्नमिदं सर्वमित्येवं प्रपंच
यति २८ चराणामन्नमचरा जंगमानां हरिणादीनामजंगमाः तृणादयः दंष्ट्रिणां व्याघ्रा
दीनामदंष्ट्रिणो व्याघ्रादीनामदंष्ट्रिणो हरिणादयः सहस्तानां मनुष्यादीनामहस्ता मत्स्याद
यः शूराणां सिंहादीनां भीरवो हस्त्यादयो दीपाः एतादृशा अत्तारो विधात्रैव सृष्टाः २९
नात्ता दुष्यत्यदन्नाद्यान् भक्षयिता भक्षणीयान् प्राणिनः प्रत्यहमपि भक्षयन् दोषं प्राप्नो
ति यस्माद्विधात्रैव भक्ष्या भक्षयितारश्च निर्मिता इति त्रिभिः श्लोकैः प्राणात्यये मांस
भक्षणस्तुतिरियं ३० अप्रोक्षितभक्षणनियममनुवादमाह यज्ञायेति जग्धिर्मांसस्य यज्ञ

प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत् जंगमं स्थावरं चैव सर्वं प्राणस्य भोजनं २८
चराणामन्नमचरा दंष्ट्रिणां चाप्यदंष्ट्रिणः अहस्ताश्च सहस्तानां शूराणां चैव भीरवः २९
नात्ता दुष्यत्यदन्नाद्यान् प्राणिनोऽहन्यहन्यपि धात्रैव सृष्टा ह्याद्याश्च प्राणिनोऽत्तार एव च ३०
यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते
क्रीत्वा स्वयं वाप्युत्पाद्य परोपहृतमेव वा देवान्पितॄंश्चार्चयित्वा खादन्मांसं न दुष्यति ३२

संपत्त्यर्थं तदंगभूतमांसस्य जग्धिर्भक्षणं यत् दैवमनुष्ठानं उक्तव्यतिरिक्तप्रकारेण पुनरात्मा
संपत्त्यर्थं तदंगभूतमांसस्य जग्धिर्भक्षणं यत् दैवमनुष्ठानं उक्तव्यतिरिक्तप्रकारेण पुनरात्मार्थमे
व पश्वालम्भनाय तन्मांसभक्षणे प्रवृत्ती राक्षसो नाम विधिरनुष्ठानमित्यन्नराहोर्थः कृष्णमांसभ
क्षणनिवृत्त्यनुवादः ३१ क्रीत्वा स्वयं वाप्युत्पाद्य क्रीत्वा आत्मना वोत्पाद्य अन्येन वा केनापि प्र
दत्तं मांसं देवपितृभ्यो दत्त्वा यो भक्षयन् पापं प्राप्नोति अतः प्रोक्षितादि चतुष्टय
भक्षणवन्नेदं नियतं भक्षणं न दुष्यतीत्यभिधानात् वर्षे वर्षेऽश्वमेधेनेत्यादिवत् प्रमाणमांस
वर्जनविधिरप्येतद्विषय एवाविरोधात् ३२

योऽहिंसकानि भूतानि योऽहिंसकान्प्राणिनो हरिणादीनात्मसुखेच्छया मारयति स इह लोके परलोके च न सुखेन वर्त्तते ४५ यो बंधनवधक्लेशान् यो बंधनमारणत्रासादीन्प्राणिनां कर्त्तुं नेच्छति स सर्वस्य हितप्रेप्सुरत्यन्तं सुखं प्राप्नोति ४६ यद्ध्यायति यत्कुरुते यच्चिंतयति धर्म्मादिकमेवं बध्नातीति यच्छ्रेयःसाधनं कर्म्म करोति यत्र च परमात्मध्यानादौ रतिं बध्नाति तत्सर्वमक्लेशेन लभते उपघातनिमित्तं दंशमशकाद्यपि न व्यापादयति ४७ मांसभक्षणप्रसंगेन हिंसागुणदोषावभिधाय पुनः प्रकृतमांसभक्षणमाह नाकृत्वा प्राणिनां हिंसां प्राणिहिंसाव्यतिरेकेण न क्वचिन्मांसमुत्पद्यते प्राणिवधश्च न स्वर्गनिमित्तं नरकहेतुरेव यावत्तस्मादविधिमांसं न भक्षयेत् ४८ समुत्पत्तिं च मांसस्य शुक्रशोणितपरिणामात्मिकां समुत्पत्तिं घृणाकारीं विज्ञाय प्राणिनां वधबंधौ क्रूरकर्म्मरूपौ निरूप्य विहितमांसभक्षणादपि निवर्त्तेत किमुतमविहितमांसभक्षणात्

> योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया। स जीवंश्च मृतश्चैव न क्वचित्सुखमेधते ४५
> यो बंधनवधक्लेशान्प्राणिनां न चिकीर्षति स सर्वस्य हितप्रेप्सुः सुखमत्यंतमश्नुते ४६
> यद्ध्यायति यत्कुरुते रतिं बध्नाति यत्र च तदवाप्नोत्ययत्नेन यो हिनस्ति न किंचन ४७ ना-
> कृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत्
> समुत्पत्तिं च मांसस्य वधबंधौ च देहिनां प्रसमीक्ष्य निवर्त्तेत सर्वमांसस्य भक्षणात् ४९ न भ-
> क्षयति यो मांसं विधिं हित्वा पिशाचवत् स लोके प्रियतां याति व्याधिभिश्च न पीड्यते ५० अनु-
> मंता विशसिता निहंता क्रयविक्रयी संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः ५१

उक्तविहितमांसभक्षणानिंदानुवादः ४९ न भक्षयति यो मांसं उक्तविधिव्यतिरेकेण मांसं न भक्षयति पिशाचवदिति यथा पिशाचो भक्षयति तथा नेति व्यतिरेके दृष्टांतः स लोकस्य प्रियो भवति रोगैश्च न पीड्यते तस्मादविधिमांसभक्षणे व्याधयो भवंतीति दर्शितं ५० अनुमंता विशसिता अनुमंता यदनुमतिव्यतिरेकेण हंतुं न शक्यते सोऽनुमतिदाता विशसिता अंगानि यः कर्त्तयादिना पृथक् पृथक् करोति निहंता प्राणवियोगकर्त्ता क्रयविक्रयी मांसस्य क्रेता च गोविंदराजस्तु यः क्रीत्वा विक्रीणीते स क्रयविक्रयी स एक एवाह तदयुक्तं हननेन तुल्यो हंता धनेन क्रयकस्तथा विक्रयी च धनादानात् संस्कर्त्ता तत्सवर्तनादिति यमवचने पृथक् दर्शनात् संस्कर्त्ता पाचकः उपहर्त्ता परिवेषकः खादको भक्षयिता घातकत्ववचनं चेदं यथा ... अनुमत्यादयोऽपि न कर्त्तव्या

ओषध्यः पशवो वृक्षा ओषध्यो व्रीह्याद्याः पशवश्छागाद्याः वृक्षा यूपाद्याः तिर्यञ्चः कूर्मादयः पक्षिणः कपिञ्जलाद्याः यज्ञार्थं विनाशं गताः पुनरुत्कृष्टजातिं प्राप्नुवंति ४० मधुपर्के च यज्ञे च समांसो मधुपर्क इति विधानान्मधुपर्के च यज्ञे च ज्योतिष्टोमादौ पित्र्ये दैवे च कर्मणि श्राद्धादौ पशवो हिंसनीया नान्यत्रेति मनुरभिहितवान् ४१ एष्वर्थेषु पशून्हिंसन् एषु मधुपर्कादिषु पदार्थेषु पशून्हिंसन्नात्मानं पशूंश्चोत्तमां गतिं स्वर्गाद्युपभोगयोग्यविलक्षणदेहवेषादिसंबंधं प्रापयति वेदतत्त्वार्थविदिति विद्वदधिकारबोधनार्थं नत्वस्याधिकारैकर्माणिकयमनर्थकृत् तस्य पश्वादेरुत्तमगतिप्राप्तिः फलं उच्यते शास्त्रप्रमाणत्वादत्रान्यार्थेपि त्वधिकारिकायां ज्ञातेष्वनधिकारिणोपि पुत्रस्य फलप्राप्तिवत् इहापि पश्वादिगतफलसंभवाद्यजमान एव काह् ।

ओषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा यज्ञार्थं निधनं प्राप्ताः प्राप्नुवंत्युच्छ्रितीः पुनः ४० मधुपर्के च यज्ञे च पितृदैवतकर्मणि अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ४१ एष्वर्थेषु पशून्हिंसन् वेदतत्त्वार्थविद्द्विजः आत्मानं च पशूंश्चैव गमयत्युत्तमां गतिं ४२ गृहे गुरावरण्ये वा निवसन्नात्मवान्द्विजः नावेदविहितां हिंसामापद्यपि समाचरेत् ४३ या वेद। विहिता हिंसा नियतास्मिंश्चराचरे अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ ४४

णः कतया पश्वादिगतफलविशिष्टमेव स्वर्गफलं काममिष्यते अत एव आत्मानं च पशूंश्चै वेत्यभिधानाद्यजमानव्यापारादेरपि पशुगतफलसिद्धिरुक्ता ४२ गृहे गुरावरण्ये वा गृहाश्रमे ब्रह्मचर्याश्रमे वानप्रस्थाश्रमे च यथाशास्त्रमात्मवान्द्विजो निवसन्नापद्यपि न अशास्त्रीयां हिंसां समाचरेत् ४३ कथं तर्ह्यपि हिंसात्वे वैदिकी देवतादिपशुहिंसा नाधर्मायेत्यत आह यावे दविहिता हिंसा या श्रुतिविहिता हिंसा कर्मविशेषदेशकालादिनियता अस्मिन्जगति स्थावरजंगमात्मके अहिंसामेव तां जानीयात् हिंसाजन्याधर्मविरहात् इदं पशुहननमधर्मः प्राणिहननत्वाद्ब्राह्मणहननवदित्यनुमानमुपजीव्यशास्त्रबाधादेव न प्रवर्त्तते इष्टापत्तीतिकृत ब्राह्मणहननस्याप्यधर्मत्वे शास्त्रमेवोपजीव्यं वेदाद्धर्मो हि निर्बभौ यस्मादनन्यप्रमाणकोध

दशाहं शावमाशौचं सप्तपुरुषपर्यंतं सपिंडतां वक्ष्यति सपिंडेषु शावनिमित्तमाशौचं दशाहोरात्रं ब्राह्म
णस्योपदिश्यते शुद्ध्येद्विप्रो दशाहेन भूमिप इति वक्ष्यमाणत्वात् अर्वाक्संचयनादस्थ्नामिति च त्र्यहोप
लक्षणार्थं चतुर्थे दिवसे वास्थिसंचयनं कार्यमिति विष्णुवचनात् त्र्यहमेकाहं वा त्र्यहः षड्वा त्र्यहोऽत्र
यः अयं चाग्निवेदादिगुणापेक्षो व्यवस्थितविकल्पः यथाह दक्षः एकाहाच्छुध्यते विप्रो योऽग्निवेद
समन्वितः हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा श्रौताग्निमंत्रब्राह्मणस्मवाक्षत्वयाध्यायिन एका
हाशौचं तद्रूपयोरेवाग्निवेदाध्ययनगुणयोरेकगुणरहितो हीनः तस्य त्र्यहं उभयगुणहीनो हीनतरः
केवलस्मार्त्ताग्निमान् सर्वगुणरहितो दशभिरहोभिः तदाह पराशरः निर्गुणो दशभिर्दिनैः ५८
सपिंडतात्प्रकर्षे सपिंडलक्षणमाह यं प्रकर्षं प्रतियोगिनं कृत्वा निरूप्यते तस्य पितृपितामहप्रभृतीन्
षट्प्रकर्षानतिक्रम्य सप्तमे सपिंडत्वं निवर्तते पुत्रपौत्रादिषु वर्गतत्वोपिंडसंबंधनिबंधनात्वेयतीषे

दशाहं शावमाशौचं सपिंडेषु विधीयते अर्वाक्संचयनादस्थ्नां त्र्यहमेकाहमेव च ५९ स
पिंडता तु पुरुषे सप्तमे विनिवर्तते समानोदकभावस्तु जन्मनाम्नोरवेदने ६० यथेदं
शावमाशौचं सपिंडेषु विधीयते जननेप्येवमेवं स्यान्निपुणां शुद्धिमिच्छतां ६१

डलात्तथाहि पितृपितामहप्रपितामहेभ्यस्त्रिभ्यः पिंडदानं प्रपितामहस्य च पित्रादयस्त्रयः पिंड
लेपभुजः तत्पूर्वस्य तु सप्तमस्य पिंडसंबंधो नास्तीति सपिंडतापसत्वे ते षट्पुरुषाः सपिंडाः
सोपि तेषां सपिंडः पिंडदातृत्वेन तत्पिंडसंबंधात् अतः साप्तपौरुषी सपिंडता तदुक्तं मत्स्यपु
राणे लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषं ।
सगोत्रत्वे चेयं सपिंडता अत एव शंखलिखितौ सपिंडतात्सर्वेषां गोत्रतः साप्तपौरुषी तेन
मातामहादीनां पिंडसंबंधेपि न सपिंडता समानोदकता पुनरसत्कुलेऽप्रत्तकनामाभूदिति ज ।
न्मनाम्नोर्भावपरिज्ञाने निवर्तते ६० यथेदं शावमाशौचं यथेदं दशाहादिकं शावनिमित्तमा
शौचं वा मातृनर्हत्वलक्षणं सपिंडेषु दशाहं शावमाशौचमित्यनेन विधीयते प्रसवेपि सम्यक्शु
द्धिमिच्छतां सपिंडानां तादृशमेवाशौचं भवेत् ६१

स्वमांसं परमांसेन स्वशरीरमांसं परशरीरमांसेन देवपित्राद्यर्चनं विना यो वर्द्धयितुमिच्छति तस्मादपरो
नास्त्यपुण्यकृन्नास्तीति अविधिमांसभक्षणनिंदानुवाद एव ५२ इदानीमनियमतः प्रतिषिद्धभक्षणस्य मां
सस्य निवृत्तिर्द्धर्मायेत्येतद्दर्शयितुमाह वर्षे वर्षे ऽश्वमेधेन यो वर्षशतं यावत्प्रतिवर्षमश्वमेधेन यजेत य
श्च यावज्जीवं मांसं न खादेत्तयोः पुण्यफलं स्वर्गादितुल्यं ५३ फलमूलाशनैर्मेध्यैः पवित्रफलमूल
भक्षणैर्वा आरण्यभोज्यानां च नीवाराद्यन्नानां भोजनैर्न तत्फलं प्राप्नोति यच्छास्त्रानियमितात्प्रतिषिद्ध
मांसवर्जनाल्लभते ५४ मांसभक्षयितामुत्र इहलोके यस्य मांसमहमद्मि स मां परलोके यस्य मांसं भ
क्षयिष्यतीति यत्तन्मांसस्य मांसत्वं निरुक्तिं पंडिताः प्रवदंतीति मांसशब्दस्य निर्वचनमेवैतत् मांसभक्षण
पापफलकथनार्थं ५५ न मांसभक्षणे दोषो ब्राह्मणादीनां वर्णानां यथाधिकारमविहिताप्रतिषिद्धभ

स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति अनभ्यर्च्य पितॄन्देवांस्ततो ऽन्यो नास्त्यपुण्यकृत् ५२
वर्षे वर्षे ऽश्वमेधेन यो यजेत शतं समाः न खादेत् यश्च मांसानि तयोः पुण्यफलं समं ५३
फलमूलाशनैर्मेध्यैर्मुन्यन्नानां च भोजनैः न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् ५४
मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहं एतन्मांसस्य मांसत्वं प्रवदंति मनीषिणः ५५ न मां
सभक्षणे दोषो न मद्ये न च मैथुने प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ५६ प्रेतशुद्धिं
प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च चतुर्णामपि वर्णानां यथावदनुपूर्वशः ५७ दंतजाते ऽनुजा
ते च कृतचूडे च संस्थिते अशुद्धा बांधवाः सर्वे सूतके च तथोच्यते ५८

क्षणे न कश्चिद्दोषो यस्मात्प्राणिनां भक्षणपानमैथुनादौ प्रवृत्तिः स्वाभाविकोयं धर्मः वर्जनं पुन
र्महाफलं अनियमितात्प्रतिषिद्धमद्यमैथुननिवृत्तिर्महाफलकथनार्थो यमनुवादः स्वैव मांसवर्जनस्यानु
वादः ५६ प्रेतशुद्धिं प्रवक्ष्यामि ब्राह्मणादीनां चतुर्णामपि वर्णानां प्रेतेषु पित्रादिषु पुत्रादीनां शु
द्धिं ब्राह्मणादिक्रमेण यथावयस्था इति यावद्व्याख्यं तैजसादीनां च शुद्धिमभिधास्यामि तत्र शुद्धेरशुद्धि
सापेक्षत्वात्तन्निरूपणार्थमाह ५७ दंतजाते ऽनुजाते च दंतजाते जातदंतस्तु तत्पर्यः वाहिताग्न्यादि
त्वान्नेन जातशब्दस्य परनिपातः अनुजाते जातदंतानंतरे कृतचूडाकरणे च चकारात्कृतोपनयने सं
स्थिते मृते सति बांधवाः सपिंडाः समानोदकाश्चाशुद्धा भवंति प्रसवे च तथैवाशुद्धा भवंतीति उभयो

म.स्मृ.
टी.
२००

रात्रिभिर्मासतुल्याभिः अत्र रात्रिभिरिति विधेयगामिनो बहुत्वस्य विवक्षितत्वात्तृतीयमासात्प्रभृति
गर्भस्रावे गर्भमासतुल्याहोरात्रैर्विशेषानभिधानात्सर्ववर्णेषु स्त्री विशुद्ध्यतीत्युक्तं तत्र षण्मासप
र्यन्तं यथोक्तं मार्कण्डेयपुराणे षण्मासाभ्यन्तरं यावद्गर्भस्रावो भवेद्यदि तदा माससमैस्तासां दिव
सैः शुद्धिरिष्यते अत ऊर्ध्वं स्वजात्युक्तमशौचं तासां विद्यते मेधातिथिगोविन्दराजादयस्त्वादिम
मासत्रयं यावत्सप्तमासादेर्गर्भस्रावे मासतुल्याहोरात्रैः स्त्रीणां शुद्धिमभ्यवदन् तथा च द्वितीय
मासे गर्भस्रावे तु स्त्रीणां त्रिरात्रं यथाह हारीतः गर्भपतने स्त्रीणां त्रिरात्रं साध्वी यो रजोविशोध
नाभिस्नानादि सपिण्डानां तत्र सद्यः शौचं यथाह संवर्तः गर्भमाससतुल्यादिवसा गर्भस्रावे सद्यः
शौचं भवति गर्भमाससतुल्यमिति स्त्रीविषयं सद्यः शौचं वेति पित्रादिसपिण्डविषयमिति व्यवस्थि
तविषयः विकल्पः रजस्वला च स्त्री रजसि निवृत्ते सति पञ्चमदिने स्नानेनाह षट्त्रिंशन्मते यथा

रात्रिभिर्माससतुल्याभिर्गर्भस्रावे विशुध्यति रजसि परते साध्वी स्नानेन स्त्री रजस्वला ६६
नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते ६७ ऊ
नद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः अलंकृत्य शुचौ भूमावस्थिसंचयनादृते ६८ ना
स्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेव तु ६९

भवति सर्पिर्घोषयोस्त्रिरात्रमपपरमेव चतुर्थेऽहनि कृतस्नानैव भवति ६६ नृणामकृतचूडानां अकृत
चूडानां बालानां मरणे सपिण्डानामहोरात्रेणाशुद्धिर्भवति कृतचूडानां तु मरणे आगुपनयनका
त् त्रिरात्रेणाशुद्धिः ६७ ऊनद्विवार्षिकं प्रेतं असंपूर्णद्विवर्षं बालमकृतचूडं मातापित्रादिभिरलंकृ
त्य ग्रामाद्बहिः शुचौ विशुद्धायां भूमौ कालान्तरे शीर्णदेहतयाऽस्थिक्याऽस्थिसंचयनवर्जं बान्धवाः प्र
क्षिपेयुः विशुद्धप्रदेशस्थायां भूमौ अस्थिसंचयनं कृत्वा निदध्युरिति व्याख्येयं ६८ नास्य बा
लस्याग्निसंस्कारो असंपूर्णद्विवर्षस्याग्निसंस्कारो न कर्तव्यः नाप्युदकादिक्रिया कर्तव्या उदकदाननिषे
धोपपन्नश्राद्धादिसकलप्रेतकृत्यनिषेधार्थः किंतु अरण्ये काष्ठवत्परित्यक्तव्यः काष्ठवदिति शोकाभावविव
क्षार्थं यथारण्ये काष्ठं परित्यज्य शोको भवति एवमस्मिन्नपि त्यक्तव्ये त्र्यहमशौचं कार्यं अयं च
अकृतचूडस्य त्र्यहाशौचविधिः पूर्वोक्तैकाहाशौचविकल्पार्थः स च व्यवस्थितो ज्ञातव्यः यथा प्राप्ता
दिगुणसैकाहः तद्धीनस्य त्र्यहः यद्यपि मनुना परित्यागमात्रं विहितं तथापि ऊनद्विवार्षिकेति

200

मं.
२००

सर्वेषां शावमाशौचं (सपिंडलक्षणमाह) मरणनिमित्तमस्पृश्यत्वलक्षणमाशौचं सर्वेषामेव सपिंड
ज्ञातीनां समानं जननिमित्तं त्वस्पृश्यत्वं मातापित्रोरेव भवति तत्राप्ययं विधिः जनननिमित्तमस्पृश्य
त्वं मातुरेव दशरात्रं भवति पितुस्तु स्नानात्स्पृश्यता भवति अयमेव संबंधः संवर्तेन व्यक्तीकृतः जा
ते पुत्रे पितुः स्नानं सचैलं तु विधीयते माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः ११ निरस्य तु पु
मान् शुक्रं स्नानं मैथुनिनः स्मृतमिति मैथुने स्नानविधानात्तन्मैथुनं विनापि कामतो रेतःस्खल
ने स्नात्वा पुमान् शुद्धो भवति अकामतस्तु स्वप्नादौ रेतःपाते मूत्रवत् रेतउत्सर्गोपस्पर्शनवोक्तेः
स्नानं विनापि गृहस्थस्य शुद्धिः ब्रह्मचारिणस्तु कामतोपि स्वप्ने सिक्त्वा ब्रह्मचारी मनेन स्नानादि
दिना शुद्धिरुक्ता बैजिकेत्संबंधे परपूर्वभार्यायां अपत्योत्पन्नो पुमान् स्तनंधय हमशौचं भवति न
पाचविस्तुः परपूर्वभार्यास्तु त्रिरात्रे रेतःपातिनोऽशौचमपकृतमपि जननप्रकरणे प्रसंगान्नद

सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकं । सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः १२
निरस्य तु पुमान् शुक्रमुपस्पृश्यैव शुध्यति । बैजिकादभिसंबंधादनुरुध्यादघं त्र्यहं १३
अह्ना चैकेन रात्र्या च त्रिरात्रैरेव च त्रिभिः । शवस्पृशो विशुध्यंति त्र्यहादुदकदायिनः १४
गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन् । प्रेताहारैः समं तत्र दशरात्रेण शुध्यति १५

न गुणतयोक्तं परत्रे रेतःपातमात्रेणास्नानं तत्रापत्योत्पन्नो त्रिरात्रमुचितं १३ अह्ना चैकेन रा
त्र्या च एकेनाह्ना एकया रात्र्या च अहोरात्रेण त्रिरात्रैस्त्रिभिरिति नवाहोरात्रैः मिलितादशा
हेनेति वेदितव्ये नोक्तं न तु दशाहेनेति वक्तव्ये किमर्थोयं वाग्विस्तारः उच्यते वक्ष्यमाणा
नचिह्नागो वारिनिमित्तावाग्मिनः न चावश्यत्वमतेषां लघूनैव विधीयते श्रुतस्वाध्या
यादिगुणयोगेन ये सपिंडा एकाहादिस्वल्पाशौचयोग्यास्तेपि यदि स्नेहादिना शवस्पर्शो भ
वति तदा दशाहेनैव शुद्ध्यंति उदकदायिनः समानोदकास्त्र्यहेन गोविंदराजस्तु ध
नग्रहणपूर्वकं शवनिर्हारकासंबंधिब्राह्मणविषयमिदं दशाहाशौचमाह १४ गुरोः
प्रेतस्य शिष्यस्य गुरोराचार्यादेरसपिंडस्य मृतस्य शिष्यः ऊर्ध्वदैहिकं कृत्वा प्रेतनिर्हारकैस्तु
कृतसाहाय्यैस्तुल्यो दशरात्रेण शुद्ध्यति १५

म-स्मृ-
टी-
२०२

सन्निधा[illegible]षे वैकल्पः मृतस्य सन्निधावर्वस्यानां मरणे परिज्ञाने या वाशौचस्य विधिरयमुक्तः देशा
न्तरस्थस्य [illegible] ज्ञाने समयमवक्ष्यमाणो विधिः संबंधिबांधवैर्ज्ञातव्यः संबंधिनः सपिंडाः समानोद ।
काश्च [illegible]: २४ विगतं तु विदेशस्थं विगतं मृतं विदेशस्थं विप्रकृष्टदेशस्थं अनिर्दशमनिर्गतद
शाहं [illegible] च कालं यः शृणोति स यद्वर्षाशिष्टं दशरात्राशौचस्य तावत्कालमविशुद्धो भवति विग
तमित्युपलक्षणं जननेप्येतद्द्रष्टव्यं तथा च बृहस्पतिः अन्यदेशमृतं ज्ञातिं श्रुत्वा पुत्रस्य जन्म च
अनिर्गते दशाहे तु शेषाहोभिर्विशुध्यति २५ अतिक्रांते दशाहे तु नाशौचं प्रसवस्यापि अतीते तु
त्रिरात्रमिति देवलवचनात् मरणविषयमिदं सपिंडमरणे दशाहाशौचे अतिक्रांते त्रिरात्रं सपिंडानाम
शौचं भवति संवत्सरे त्वतीते स्नात्वैव शुध्यति एतच्चाविशेषेणाभिधानाच्चातुर्वर्ण्यविषयं २५

२०१

सन्निधावेष वै कल्पः शावाशौचस्य कीर्तितः असन्निधावयं ज्ञेयो विधिः संबंधिबांधवैः २४
विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् २५ अ
तिक्रांते दशाहे तु त्रिरात्रमशुचिर्भवेत् संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति २६ नि
र्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च सवासा जलमाप्लुत्य शुद्धो भवति मानवः २७ बा
ले देशांतरस्थे च पृथक्पिंडे च संस्थिते सवासा जलमाप्लुत्य सद्य एव विशुध्यति २८
अंतर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशं २९

निर्दशं ज्ञातिमरणं दशाहाशौचस्यापगमे कर्म नाहं तत्त्वणं अहाशौचस्योक्तत्वात् दंगाष्यो विष
यनिर्गतदशाहे सपिंडमरणं श्रुत्वा पुत्रस्य च जन्म सचैलस्नानात्सद्यः शौचं भवति २६ बाले देशांतर
स्थे च बाले जातदंते मृते जातदंतेन नृणामकृतचूडानामिति एकाहोरात्रविधानात् देशांतरस्थे
च सपिंडे मृते दूरे एकाहाशौचविषयं पूर्वतरश्लोके दशाहाशौचेन तत्र त्रिरात्रविधानात् पृथ
क्पिंडे समानोदके त्रिरात्रमतीते त्रिरात्रमपगमे सर्वोपि सचैलस्नानात्सद्यो विशुद्धो भवति २७
अंतर्दशाहे स्यातां चेत् दशाहादिमध्ये यदि पुनर्मरणं जननं च स्यातां तु नः [illegible] यावदशा
तुदा तावत्कालमेव विप्रादिरशुद्धः स्यात् यावत् पूर्वजातदशाहाद्यशौचेनापगतं तावत् पूर्वा
शौचव्यपगमे नैव द्वितीयमृतके सूतके च शुद्धिरित्यर्थः २८

उ-
२०२

नात्रिवर्षस्य कर्त्तव्या अत्रापि तृतीयवर्षस्य पूर्वादेः सपिंडैरुदकक्रिया न कर्तव्येति पूर्ववन्निषिद्धमप्यु
त्तरार्धमनूद्यते जातदंतस्य वा उदकदानं कर्तव्यं नामकरणे वा कृते उदकादिक्रियासाहचर्यादग्नि
संस्कारोप्यनुज्ञायते प्रेतपिंडश्राद्धादिकं च यद्यप्यकरणसंभवे करणं तोस्यादहं तथापि कर
णकरणयोरुभयोराम्नाज्जातदंतकृतनाम्नोः करणे पूतोपकारो भवति अकरणे पुनर्दोषाभा
वइत्यवगम्यते ७० स ब्रह्मचारिण्येकाहं सहाध्यायिनि वृत्ते एकरात्रमशौचं कार्यं समा
नोदकानां पुनः पुत्रजनने सति त्रिरात्रेण शुद्धिर्भवति अहानूदकदानं न इति मरणविषयम
तं ७२ स्त्रीणाममिति स्त्रीणामसंस्कृतानामनूढानां वाग्दत्तानां मरणे बांधवा भर्त्रादयस्त्र्यहे ।
णशुद्ध्यंति वाग्दानं विना भर्तृपक्षे संबंधाभावात् स्वसुतमपि वाग्दानानंतरं यमत्रवोद्धव्यस्तनामयः पितृ
पक्षाः वाग्दत्तानां विवाहादर्वाक् मरणे यथोक्तेनैव कल्पेन इमे तद्बांधवा पूर्वोदितेन त्रिरात्रेण शु

नात्रिवर्षस्य कर्त्तव्या बांधवैरुदकक्रिया । जातदंतस्य वा कुर्युर्नाम्नि वापि कृते सति ॥ ७० ॥ स
ब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतं । जन्मन्येकोदकानां त्रिरात्राच्छुद्धिरिष्यते ॥ ७१ ॥
स्त्रीणामसंस्कृतानां च त्र्यहाच्छुद्ध्यंति बांधवाः । यथोक्तेनैव कल्पेन शुद्ध्यंति तु सनाभयः ॥
अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहं । मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ ॥ ७३ ॥

शुद्ध्यंतीत्यर्थः तदुक्तमादिपुराणे आजन्मनस्तु चूडांतं यत्र कन्या विपद्यते सद्यः शौचं भवेत्तत्र
सर्ववर्णेषु नित्यशः ततो वाग्दानपर्यंतं यावदेकाहमेव तत् अतः परं प्रवृद्धानां त्रिरात्रमिति निश्च
यः वाग्दाने तु कृते तत्र ज्ञेयं चोभयतः त्र्यहं पितुर्वरस्य च ततो दत्तानां भर्तुरेव हि स्वजात्युक्तम
शौचं स्यात् सूतके मृतके पि वा मेधातिथिर्गोविंदराजौ तु यथोक्तेनैव कल्पेनेति नृणामकृतचूडा
नामिति तदुक्तेन विधिना शुद्ध्यंतीति व्याचक्षते अत्र च व्याख्याने पुत्रवत्कन्यानामपि चूडाकर
णादूर्ध्वं मरणे त्र्यहाशौचं स्यात् तथा चादिपुराणाद्यनेकमुनिवचनविरुद्धं ७२ अक्षारलव
णान्नाः स्युः क्षारलवणं कृत्रिमलवणं तद्रहितमन्नमश्नीयुः त्रिरात्रं नद्यादौ स्नानमाचरेयुः
मांसं च न भक्षयेयुः भूमौ च केवलं शयनं कुर्युः ७३

म० स्मृ० टी० १०२

छ्रमोऽथ स्मृतकेऽकर्मणां त्यागः संध्यादीनां विधीयते होमः श्रौते तु कर्तव्यः शुष्कान्नेनापि वा फलैः तस्मा
देवाऽऽशौचे श्रौतसंबंधे संध्यादीनां परित्यागो न तु श्रौतस्य होमस्य एकाहस्याहीनसत्राणामेव संध्यापंचम
हायज्ञादिस्मार्तमेवानुष्ठेयं श्रौतमेधातिथिप्रयोगो विद्यारण्यभाष्यमस्याप्यधापि एकाहस्याहीनाशौचे संबो
धो यह श्रुत्वाध्यायमात्रविषयः संध्योपासनादिकं तु तेनापि दशाहमेव न कर्त्तव्यमिति तन्निष्प्रमाण
कं यत्तु गौतमेन राज्ञां च कर्माविरोधात् ब्राह्मणस्य स्वाध्यायानिवृत्त्यर्थमित्युक्तं न च त्रिजादीदि
तानां हेत्वादिना सत्यः सोऽपि च सत्कर्मतत्सर्वेषामेव दशाहाशौचे विना समपितत्कर्मविषयं यानि तु भयत्र
दशाहानि कुलस्यान्नं न भुज्यं तत्त्वादीनि दशाहं तत्कर्मनिषेधकानि वचनानि दशाहाशौचविषया
णीति न कश्चिद्विरोधः तस्माद्धोमस्वाध्यायार्थं समगुणोऽप्यशौचवतां च न संध्योपासनादर्पमिति दंतिः
प्रमाणकं ॥२९॥ दिवाकीर्तिमुदक्यां च चंडालं रजस्वलां ब्रह्महादिकं पतितं प्रसूतां दशाहाभ्यंतरे शाव

102 दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुद्ध्यति ॥३०॥ आ
चम्य प्रयतो नित्यं जपेदशुचिदर्शने सौरान्मंत्रान्यथोत्साहं पावमानीश्च शक्तितः ॥३१॥
नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुद्ध्यति आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा

शवस्पृष्टिनं च स्पृष्ट्वा स्नानेन शुद्धो भवति केचित्तु स्पृष्टिनमिति चंडालोदक्यादिभिः सर्वैः संबध्यंति
गोविंदराजस्तु याज्ञवल्क्यवचनानुशावस्पृष्टिनमेव तत्स्पृष्टिनमाह नोदक्यादिस्पृष्टिनं तत्राच
मनविधानात् यदाह याज्ञवल्क्यः उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत् उदक्याशु
चिभिः स्पृष्टः स्नानं कुर्यात् उदक्याशुचिभिः स्पृष्टैः स्पृष्टस्तूपस्पृशेदाचामेत् ॥३०॥ आचम्य प्र
यतो नित्यं श्राद्धदेवपूजादिकं चिकीर्षुः स्नानाचमनाभ्यां प्रयतः सन् कृतचंडालाद्यशुचिदर्श
ने सति सौरानुदित्यं जातवेदसमित्यादीन् सदैवतमंत्रान्यथोत्साहं पावमानीश्च यथाशक्त्या जपेत्
॥३१॥ नारं स्पृष्ट्वास्थि सस्नेहं मनुष्यास्थि सस्नेहं स्पृष्ट्वा ब्राह्मणादिः स्नानेन शुद्ध्यति स्ने
हशून्यं पुनः स्पृष्ट्वा आचम्य गोस्पर्शादित्येकतरेण परं तरं कृत्वा शुद्धो भवति ॥३२॥

उ० १०२

त्रिरात्रमाहुराशौचं आचार्ये मृते सति शिष्यस्य त्रिरात्रमाशौचं वदंति तत्पुत्रपत्न्योश्च मृतयोरहोरा
त्रमिति एषा शास्त्रस्य मर्यादा ॥८॥ श्रोत्रिये रूपसंपन्ने वेदशास्त्राध्यायिन्युपसंपन्ने मैत्र्यादिना समीपवर्ति।
नि तद्गृहवासिनी सपि वा तस्मिन्मृते त्रिरात्रमविशुद्धो भवति मातुलशिष्यर्त्विकादिषु मृतेषु पक्षिणीं
त्रिरात्रं व्याख्यातं पूर्वोत्तरेऽहनी यस्या वित्रयसाः सा रात्रिः पक्षिणी ॥८॥ प्रेते राजनि सज्योतिः
यस्य देशे राज्ञा शासनादिः स्थितः तस्मिंश्च राजनि मृते ताभिषेके क्षत्रिये मृते सज्योतिः शौचं स्यात् अहर्ज्योति
यावर्न्न तद्दति सज्योतिः यदि दिवा तदा यावत्सूर्यज्योतिस्तावदशौचं यदि रात्रौ मृतस्तदा यावन्नारक
ज्योतिस्तावदशौचं श्रोत्रिये त्रिरात्रमनूक्तं श्रोत्रिये पुनस्तद्गृहमृते कृत्स्नं दिवारात्रमशौचं स्यात् गवे
दाध्यापिनि असंबंधे वा वक्तृ वा पस्पृहेलेनन्निर्दिष्टं एशवप्यहर्मात्रमेव ॥८॥ शुद्ध्येद्विप्रो दशाहेन उप
नीतसपिंडमरणे संपूर्णकालीनजनने च द्वादशास्त्राध्यायरहितो ब्राह्मणो दशाहेन शुद्धो भवति क्ष

त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति । तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः ॥०॥
श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत् । मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च ॥८॥
प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितिः । अश्रोत्रिये त्वहः कृत्स्नमनूचाने तथा गुरौ ॥८॥
शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः । वैश्यः पंचदशाहेन शूद्रो मासेन शुद्ध्यति ॥८॥
न वर्द्धयेदघाहानि प्रत्यूहेन्नाग्निषु क्रियाः । न च तत्कर्म कुर्वाणः सनाभ्योप्यशुचिर्भवेत् ॥८॥

त्रियो द्वादशाहेन वैश्यः पंचदशाहेन शूद्रो मासेन तस्य चोपनयनस्थाने विवाहः ॥८॥ न वर्द्धयेदघा
हानि यस्य कृत्स्नाध्याय पेत्र या पूर्वमावास्य च पनादास्थामित्याशौचसंकोच उक्तः सानिः कर्म।
स्वाधमास्य पिच्छ इति वृद्धानामाशौचदिनानि दशाहादिरूपतया वर्द्धये संकुचितमाशौचदिनेष्वपि
अग्निहोत्रादिवत्कुवचनात् श्रौताग्निषु अग्निहोत्रहोमात्र विच्छेदमेत्यर्थ पंक्तयो दशाकोवा दोत्कारयेत्
अर्थ [illegible] माह यस्मात्तत्कर्माग्निहोत्ररूपं कुर्वाणः पुत्रादिः सपिंडोनाप्यशुचिर्भवति यदाह पारस्क
रः नित्यानि निवर्त्तेरन् वैतानवर्जं शालाग्नौ होमः [illegible] इत्यान [illegible] हवनी [illegible]
[illegible] तृप्ता [illegible] अग्निहोत्रार्पस्नाना [illegible] चिः [illegible] न
[illegible] कर्मत्यागो न विद्यते शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः [illegible]

नराज्ञामघदोषोऽस्ति राज्ञामभिषिक्तक्षत्रियाणां सपिण्डमरणजाशौचदोषो नास्ति यतो राजानः ऐन्द्र
स्थानमभिषेकाख्यमाधिपत्यकारणं प्राप्ताः व्रतिनो ब्रह्मचारिणश्चान्द्रायणादिव्रतकारिणश्च सत्रि
णो यागप्रवृत्ताः सन्तो ब्रह्मभूतास्ते ब्रह्मैवनिष्ठा यासां अशौचाभावश्चायं कर्मविशेषेषु यथा ह विस्तृः
अशौचेन दानराजकर्माणि व्रतिनां व्रतकर्माणि सत्रिणां सत्रे राजकर्म च यथावद्दानयोगादि होमादि ।
९३ राज्ञो माहात्मिके स्थाने महात्मन इन्द्रस्य स्थानं माहात्मिकं राज्यपदाख्यं सर्वाधिपत्यलक्षणं तस्मि
न्महात्मैव प्राचीनपुण्येन तत्सम्भासादयति तस्मिन्वर्तमानस्य सद्यः शौचमुपदिष्टं तेन च राज्यमनुच
लक्षत्रियजातेः पिकृत्यानि रविवर्द्धिते वेमनेन स्ल्लोकेन दर्शितं मतो न्यायनिरूपणोऽत्र भित्ते
ऽत्र दानेन च उपसर्गे प्रशान्तिहोमादिना प्रजापरिरक्षणार्थं राज्यासनेष्वानमशौचाभावे कारणं ।

नराज्ञामघदोषोऽस्ति व्रतिनां न च सत्रिणां ऐन्द्रं स्थानमुपासीना ब्रह्मभूता हि ते सदा ९३
राज्ञो माहात्मिके स्थाने सद्यः शौचं विधीयते प्रजानां परिरक्षार्थमासनं चात्र कारणं ९४
डिम्बाहवहतानां च विद्युता पार्थिवेन च गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ९५
सोमाग्न्यर्कानिलेन्द्राणां वित्ताप्पत्योर्यमस्य च अष्टानां लोकपालानां वपुर्धारयते नृपः ९६

चाक्षत्रियाणामपि तत्कारणं विप्रवैश्यशूद्राणां अविषये अतएव सोमकार्यकार्येषु फलं च मसेसो
मधर्माः अतएव श्रीह्रिसंबंधितयास्तु तमवश्यात्तदितकार्यकावित्वस्य विवद्धितताम्नकृतो यदेवप्रविकृ
तो च नीवारादिषु संबध्नतश्चैतिकर्ममीमांसा यान्तन्दधिकरणो अनिरयणापि ९४ डिम्बाहवहतानां च
डिम्बाहवो नृपतिशून्यः युद्धं तत्र हतानां विद्युता वज्रेण पार्थिवेन च यथाऽऽह पराधे गोब्राह्मणरक्षणार्थं ।
विनापि युद्धं जलाग्निव्याघ्रातादिभिर्हतानां यस्य पुरोहितादेः स्वकार्याभिधानार्थं नृपतिरशौचा
भावमिच्छति तस्यापि सद्यः शौचं ९५ सोमाग्न्यर्कानिलेन्द्राणां चन्द्राग्निसूर्यवायुप्रधानयमा
णां नां वित्तस्यापां च पत्योः कुबेरवरुणयोरष्टानां लोकपालानां सर्वाधिदेहराजा धारयति ९६

आदिष्टीनोदकंकुर्यात् व्रतादेशमादिष्टं तदस्यास्तीत्यादिष्टी ब्रह्मचारी स प्रेतोदकमाव्रतसमापना
न्न कुर्यात् उदकमिति पूरकपिण्डषोडशश्राद्धादिसकलप्रेतकृत्योपलक्षणं समाप्ते पुनर्ब्रह्मचर्ये प्रेतोद
कं कृत्वा त्रिरात्राशौचं कृत्वा शुद्धो भवति एतच्च मातापित्राचार्यव्यतिरिक्तविषयं तदाह वसिष्ठः ब्र
ह्मचारिणः शवकर्मणा व्रतनिवृत्तिरन्यत्र मातापित्रोर्गुरोर्वा शवकर्मणेति शवनिमित्तके न निर्हर
णादहनोदकदानपूरकपिण्डषोडशश्राद्धादिकर्मणा वक्ष्यति चाचार्यं स्वमुपाध्यायमिति ८८
वृथासंकरजातानां जातशब्दः प्रत्येकमभिसंबध्यते वृथाजातानां बाहुल्येन स्वकर्मत्यागिनां संकर
जातानां हीनवर्णेभ्य उत्कृष्टस्त्रीषूत्पन्नानां वेदबाह्यरक्तपटादिप्रव्रज्यासु वर्तमानानां अशास्त्रीयवि
षोद्बन्धनादिकामतः कृतजीवत्यागानां च उदकादिक्रिया न कर्तव्येति ८९ पाषण्डमाश्रितानां च
वेदबाह्यरक्तपटनग्नादिव्रतचर्या पाषण्डं तदाश्रितानां स्वच्छन्दमनेकानेकपुरुषगामिनीनां गर्भ

आदिष्टीनोदकंकुर्यादाव्रतस्यसमापनात् समाप्ते तूदकंकृत्वा त्रिरात्रेणैव शुध्यति ८८
वृथासंकरजातानां प्रव्रज्यासु च तिष्ठतां आत्मनस्त्यागिनां चैव निवर्तेतोदकक्रिया ८९
पाषण्डमाश्रितानां च चरन्तीनां च कामतः गर्भभर्तृद्रुहां चैव सुरापीनां च योषितां ९०
आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुं निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ९१
दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजन्मनः ९२

पातनभर्तृवधकारिणीनां द्विजातिस्त्रीणां च सुरापायिनीनां उदकक्रियायोर्ध्वदैहिकं निवर्तेतेति
पूर्वेण संबन्धः ९० आचार्यं स्वमुपाध्यायं आचार्यमुपनयनपूर्वकं सकृत्शाखाध्यापयितारं उपाध्या
यं वेदैकदेशस्याङ्गानां अध्यापकं वा वेदस्य वेदाङ्गानां चैकदेशस्यापि व्याख्यातारं गुरुः निर्हरणपूर्वकं तान्
तत्कृत्यं निर्हरणमिति दाहदनाहषोडशश्राद्धादिसकलप्रेतकृत्यप्रदर्शनार्थं आचार्यादीन्मृतान्
निर्हृत्य ब्रह्मचारी तु न व्रतलोपो भवति एवं चान्यान्निर्हृत्य व्रतलोपो भवतीति गम्यते आचार्यं स्वमु
पाध्यायमित्यपि वा गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेदिति स्मृत्या मातामहाचार्याचार्यादावपि ज्ञातसम्प्रति
पत्यः स्वामित्येवं व्याख्यातेनोपाध्यायोपाध्यायपितृनिर्हृत्य व्रतलोप एव ९१ दक्षिणेन मृतं
शूद्रं अमाङ्गलिकत्वादनया प्रत्यासत्त्या शूद्रकर्मणाभिधानं शूद्रं मृतं दक्षिणपुरद्वारेण निर्हरेत् द्वि

म॰ स्मृ॰ टी॰ २०४

704

अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिं वा मृतमिच्छातोऽनुगम्य सचैलः स्नानं कृत्वा ततोऽग्निं स्पृष्ट्वा घृतं प्राश्य मानुष्यास्थ्नामनुगमननिमित्ताशौचाद्विशुद्ध्यति ३॥ न विप्रं स्वेषु तिष्ठत्सु ब्राह्मणादिं मृतं समानजातीयेषु स्थितेषु न शूद्रेणाद्यादिनिर्हारयेत् यस्मात्सा शरीराहुतिः शूद्रस्पर्शदुष्टा सती मृतस्य स्वर्गाय हिता न भवति मृतं स्वर्गेण न प्रापयतीत्यर्थः। स्वेषु तिष्ठत्स्विति अभिधानाद्ब्राह्मणाभावे क्षत्रियेण तदभावे वैश्येन शूद्रेणापि निर्हारयेदित्युक्तं यथापूर्वं श्रेष्ठत्वात् अनयोर्दोषस्तु ब्राह्मणादिसद्भावे शूद्रेण निर्हृते तस्य निर्दोषत्वात्। गोविन्दराजस्तु दोषनिर्देशात् स्वेषु तिष्ठत्स्विति एतदविवक्षितमित्याह तदयुक्तं सम्भवत्सु तद्दृश्ये गृहणे वैयर्थ्यप्रसङ्गात् उपक्रमावगते श्रुवेदो देति न्यायेनानुरोधतां कृणभूतस्य अनुरोधेन प्रधानभूतायामाहुतेरुपेक्षायां गुणलोपेन मुख्यस्य समर्पितत्वायोग्यत्वेन तस्मात् स्वेषु तिष्ठत्स्विति यदहृदयं न विवक्षितं तदस्माकं गोविन्दराजस्याज्ञानाद्विद्यामहे ४॥ ज्ञानं तपोऽग्निराहारो ज्ञाना-

अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ३

न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत्। अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता ४

ज्ञानं तपोऽग्निराहारो मृन्मनो वार्युपाञ्जनं। वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनां ५

सर्वेषामेव शौचानामर्थशौचं परं स्मृतं। योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः ६

दीनि शुद्धेः साधनानि भवन्ति तत्र ज्ञानं बुद्धिरूपान्तःकरणशुद्धेः कारणं तथा च वक्ष्यति बुद्धिर्ज्ञानेन शुद्ध्यति तपो यथा तपसा वेदवित्तमाः अग्निर्यथा पुनः पाकेन मृण्मयं आहारो यथा पयोभिर्विप्रुषाः पयो वा गवां वेति मृद्वारिणी मृद्वार्यादेयमर्थवदिति मनो यथा मनःपूतं समाचरेदिति संकल्पविकल्पात्मकं मनः निश्चयात्मिका बुद्धिरिति मनोबुद्ध्योर्भेदः उपाञ्जनमुपलेपनं यथा मार्जनोपाञ्जनैर्वेश्म वायुः कर्म यथा यजेत वाश्वमेधेनेत्यादि अर्को यथा गोमारुतवाक्यमोत्पवाकालो यथा शुद्ध्यति दशाहेन वायोस्तु शुद्धिहेतुत्वं मनुनानुक्तमपि यथान्यत्र विशुद्ध्यति सोमसूर्यांशुमारुतैरिति विस्पष्टमुक्तत्वात् ५॥ सर्वेषामेव शौचानां सर्वेषां मृद्वारिनिमित्तदेहशौचमनःशौचादीनां मध्ये अर्थशौचं मन्यायेन परधनग्रहणपरिहारेण यच्छौचं तदुत्कृष्टं मन्वादिभिः स्मृतं यस्माद्योऽर्थे शुद्धः स शुद्धो भवति यः पुनर्मृद्वारिशुचिरर्थे वाशुद्धः सोऽशुद्ध एव ६॥ क्षान्त्या

पृ॰ २०५

तत्र किं मन्त्रमाह लोकेशाधिष्ठितो राजा यतो लोकेशांशारब्धोतो नृपतिरतो नास्याशौचमुपदिश्यते य
स्मान्मनुष्याणां यच्छौचमशौचं वा तल्लोकेश्वरेभ्यः प्रभवति विनश्यति च अप्ययो विनाशः एतेनाप्येतदीय।
शौचाशौचोत्पादनविनाशशक्तस्य लोकेश्वररूपस्य नृपतेः कुतः स्वकार्याशौचमिति पूर्वोक्ताशौचाभाव
स्तुतिः ९७ उद्यतैराहवे शस्त्रैः उद्यतैः शस्त्रैः खड्गादिभिः न तु लगुडपाषाणादिभिर्वैरपराङ्मुखत्वा
दिक्षत्रियधर्मेण हतस्य सद्य एव तस्य तत्क्षणादेव ज्योतिष्टोमादियज्ञः संतिष्ठते समाप्तिमेति तत्फलं प्रा
प्नोतीत्यर्थः तथाशौचं च तत्क्षणादेव समाप्तिमेति इयं शास्त्रमर्यादा ९८ विप्रः शुध्यत्यपः
स्पृष्ट्वा अशौचान्ते कृतश्राद्धादिकर्मा ब्राह्मणः अपः स्पृष्ट्वा इति जलस्पर्शमात्रं दक्षिणहस्तेन स्पृ।
ष्ट्वा शुद्धो भवति न तु संवत्सरे व्यतीते तु स्पृष्टे वा यो विशुध्यतीति वत्सानं वाहनादिस्पर्शसाहचर्यात्स्पृष्ट्वा

लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते शौचाशौचं हि मर्त्यानां लोकेशप्रभवाप्ययं ९७
उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः ९८ वि
प्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधं वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः ९९
एतद्वोभिहितं शौचं सपिण्डेषु द्विजोत्तमाः असपिण्डेषु सर्वेषु प्रेतशुद्धिं निबोधत १०० अस
पिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् १०१ य
द्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति अनदन्नन्नमह्नैव न चेत्तस्मिन्गृहे वसेत् १०२

मप्यन्त स्पृष्ट्वा इत्युक्तत्वात्मार्थमेवान्मायत्वात् क्षत्रियो हस्त्यादिवाहनं खड्गायुधं च वैश्यो बलीवर्दादि
नोदनं तोत्रं प्रतोदं रश्मीन्वा शूद्रो यष्टिं वंशदण्डिकां ९९ एतद्वोभिहितं शौचं भो द्विजश्रेष्ठा युष्म
भ्यं सपिण्डेषु प्रेतेषु युष्माकमुक्तं इदानीमसपिण्डेषु प्रेतशुद्धिं शृणुत १०० असपिण्डं द्विज
प्रेतं असपिण्डं ब्राह्मणं मृतं ब्राह्मणो बन्धुवत्स्नेहानुबन्धेन न तु धनलोभात्तु तं मातुश्चाप्ता
न्सन्निकृष्टसहोदरभ्रातृभगिन्यादीन्बान्धवान्बान्धवान्निर्हृत्य त्रिरात्रेण शुद्धो भवति १०१ यद्य
न्नमत्ति तेषां तु स निर्हारको यदि तेषामन्नमत्ति तदा दशाहेनैव शुध्यति न त्रिरात्रेण अथ तेषाम
न्नं नाश्नाति गृहे च तेषां न वसति निर्हरति च तदा अह्ना रात्रेण शुध्यति एवं चातद्गृहवासे सति तद
न्नाभोजिनो निर्हारकस्य पूर्वोक्तं त्रिरात्रमुपतिष्ठते १०२

म॰स्मृ॰ टी॰ २०५

अग्नेरपां च संयोगात् अग्निर्वै वरुणानीं कामयतेत्यादि श्रुत्यन्तरप्रसिद्धात् संयोगात्सुवर्णरजतं। जातं तस्मात्तयोः स्वकारणेनैव जलेनाग्निना वा निर्णेकः शुद्धिहेतुः गुणवत्तरः श्रेष्ठतरः १२ ताम्रायःकांस्यरैत्यानां अयो लोहं रीतिः पित्तलं त्रपुणा सीसेन च पूरयतेषां भस्माम्लरसजलैः शोधनं कर्त्तव्यं यथार्हं यस्य यदर्हमिति अभस्माहेमरूप्ययोः कांस्यशुद्धाविति भस्मना अम्लोदकेन ताम्ररैत्ययोः पुनः पाकेन मृण्मयमिति हस्त्यादिवचनाद्विशेषोऽवबोद्धव्यः १३ द्रवाणां चैव सर्वेषां द्रवाणां घृततैलादीनां काकादिकीटाद्युपहतानां बोधायनवचनात् स्पृश्यमात्रपरिमाणानां प्रादेशपरिमाणकुशपत्रद्वयाग्राभ्यामुत्प्लवनेन शुद्धिः संहतानां च शय्या आदीनां उच्छिष्टाद्युपघाते तद्रूपंप्रक्षाल्य प्रोक्षणं स्पर्शने तु प्रोक्षणमेव दारवाणां चात्यन्तोपघा

अग्नेरपां च संयोगाद्धेमं रौप्यं च निर्बभौ तस्मात्तयोः स्वयोन्यैव निर्णेको गुणवत्तरः १२
ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च शौचं यथार्हं कर्त्तव्यं क्षाराम्लोदकवारिभिः
द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतं प्रोक्षणं संहतानां च दारवाणां च तक्षणं १४
मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन च १५
चरूणां स्रुक्स्रुवाणां च शुद्धिरुष्णेन वारिणा स्फ्यशूर्पशकटानां च मुसलोलूखलस्य च
अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससां प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते १७
चैलवच्चर्मणां शुद्धिर्वैदलानां तथैव च शाकमूलफलानां च धान्यवच्छुद्धिरिष्यते १८

205

ते तक्षणेन १४ मार्जनं यज्ञपात्राणां चमसानां ग्रहाणां चान्येषां च यज्ञपात्राणां पूर्वं पाणिना मार्जनं कार्यं पश्चात्प्रक्षालने यज्ञकर्मणि शुद्धिर्भवति १५ चरूणां स्रुक्स्रुवाणां च स्नेहाक्तानां चरुस्रुवादीनामुष्णजलेन शुद्धिः स्नेहासक्तानां जलमात्रेणैव यज्ञार्थे शुद्धिः १६ अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यानां वस्त्राणां च चण्डालस्पर्शाद्युपघाते जलेन प्रोक्षणात् शुद्धिः बहुत्वं च पुरुषाभारहार्याधिकत्वमिति व्याचष्टे तदल्पकानां प्रक्षालनेन शुद्धिर्मन्वादिभिरुपदिश्यते १७ चैलवच्चर्मणां शुद्धिः स्पृश्यपशुचर्मणां वंशादिदलनिर्मितानां च वस्त्रवच्छुद्धिर्भवति शाकमूलफलानां च धान्यवत् १८

उं॰ २०५

क्षान्त्या शुध्यन्ति विद्वांसो मरणापकारे कृते तस्मिन्नपकारबुद्ध्यानुत्पत्तिरूपया क्षान्त्या पण्डिताः शुध्य-
न्ति यथावद्दानेन नाशं यान्ति पापानि महापातकक्रियावन्तः अकार्यकारिणो दानेन यथावच्छुध्यन्ति
सर्वस्वं च वेदविदे ब्राह्मणायेति अप्रख्यातपापा जप्येन यथावच्छुध्यन्ति जप्यं तु प्रवक्ष्ये हि नमिति वेदार्थ
चान्द्रायणादि तपः तपोविदस्तपसा तपो हततपापमेकादशाध्याये वक्ष्यमाणं ७ मृत्तोयैः शुध्य-
ते शोध्यं मलायुपहतं शोधनीयं मृज्जलैः शुध्यते नदीप्रवाहः श्लेष्माद्यशुचिदूषितो वेगेन शुध्यति
स्त्री च परपुरुषमैथुनसंकल्पादिदूषितमनस्का प्रतिमासार्तवेन तस्मात्पापाच्छुद्धा भवति ब्राह्म-
णाः संन्यासेन षष्ठाध्यायाभिधास्यमानेन पापाच्छुध्यन्ति ८ अद्भिर्गात्राणि शुध्यन्ति स्वेदाद्युपह-
तानि गात्राणि जलेन क्षालितानि शुध्यन्ति मनश्च निषिद्धचिन्तनादिना दूषितं सत्याभिधानेन शुध्यति भूत

क्षान्त्या शुध्यन्ति विद्वांसो दानेनाकार्यकारिणः । प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः ७
मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति । रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमाः ८
अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति । विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ९
एष शौचस्य वः प्रोक्तः शरीरस्य विनिर्णयः । नानाविधानां द्रव्याणां शुद्धेः शृणुत निर्णयम् १०
तैजसानां मणीनां च सर्वस्याश्ममयस्य च । भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः ११ नि-
र्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति । अब्जमश्ममयं चैव राजतं चानुपस्कृतम् १२

सत्त्वादिलिंगशरीरावच्छिन्नो जीवात्मा ब्रह्मविद्यया पापक्षयहेतुतपसा शुद्धो भवति शुद्धपरमा-
त्मरूपेणावतिष्ठते बुद्धिश्च विपर्ययज्ञानोपहता यथार्थविषयज्ञानेन शुध्यति ९ एष शौचस्य
वः प्रोक्तः अयं शरीरसंबन्धिनः शौचस्य पूर्वार्कं निर्णय उक्तः इदानीं नानाप्रकारद्रव्याणां येन प्र-
कारेण शुद्धिर्निर्णयं शृणुत १० तैजसानां मणीनां वा तैजसानां सुवर्णादीनां मरकतादिमणी-
नां पाषाणमयस्य च सर्वस्य भस्मना जलेन मृत्तिकया च मन्वादिभिः शुद्धिरुक्ता निर्लेपस्य जलेनैव
शुद्धेर्वक्ष्यमाणत्वात् इदमुच्छिष्टघृतादिलिप्तविषयं तत्र मृद्भस्मनोर्लेपगन्धक्षयापेक्षकार्यत्वा-
द्विकल्पः आपत्त्यपेक्षया समुच्चीयते ११ निर्लेपं काञ्चनं भाण्डं उच्छिष्टादिलेपरहितं सौव-
र्णं भाण्डं जलेन शुध्यति एवं शङ्खाद्यपि पाषाणमयं च राजतं चानुपस्कृतं उत्कीर्णरेखादिरहितं पात्रं वि

यावन्नापैत्यमेध्यक्तात् विष्ठादिलिप्तद्रव्याद्यावन्नसंबंधिनौ गंधलेपौ तिष्ठतः तावद्द्रव्यशुद्धि
र्मृद्वारिग्रहीतव्यं यत्रवमामज्ञादौ मृदाशुद्धिः तत्र मृत्सहितजलग्रहणं कर्तव्यं यत्र कांस्यमला
दौ जलेनैव शुद्धिस्तत्र जलमात्रमित्यवगंतव्यं २५ त्रीणि देवाः पवित्राणि केनापि प्रकारे
णनाद्दष्टोपघातहेतुसंसर्गमद्दष्टं संजातोपघातशंकायां जलेन प्रक्षालितं तद्गृहग्रहा
दीतः पद्यमीमांसितं स्यात्तदद्भिः स्पृष्टाच्छुद्धिंभवति उपघातशंकायामेव पवित्रभव
त्विति ब्राह्मणे वाचाप्रशस्यते एतानि त्रीणि पवित्राणि देवा ब्राह्मणानां कल्पितवंतः
२६ आपः शुद्धा भूमिगता यत्परिमाणास्वप्सु गोः पिपासाविच्छेदो भवति ता आपो भ

यावन्नापैत्यमेध्यक्ताद्गंधो लेपश्च तत्कृतः तावन्मृद्वारिचादेयं सर्वासु द्रव्यशुद्धिषु
त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रश।
स्यते २६ आपः शुद्धा भूमिगताः वैतृष्ण्यं यासु गोर्भवेत् अव्याप्ताश्चेदमेध्येन गंध
वर्णरसान्विता २७ नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितं ब्रह्मचारिगतं भै
क्ष्यं नित्यं मेध्यमिति स्थितिः २७

यवर्णरसान्विताः सत्यः यद्यमेध्याप्लिताश्च न भवंति तदा विशुद्धिभूमिगताः इति विशुद्ध
भूमिप्रदर्शनायानन्तरितगतानां निरूपणं २८ नित्यं शुद्धः कारुहस्तः कारो मालाका
रादेर्देवब्राह्मणयर्थमपि माल्यादिग्रथने द्रव्यप्रयोजनाद्यपेक्षायां शुद्धिविशेषकरणेपि
स्वभावादेव हस्तः सर्वदा शुद्धः तथा जननमरणयोरपि स्वव्यापारे शुद्धिः न तथा चैकारु
णां कारुकर्मणीति वचनात् तथा पद्धिकेतव्यपण्यवीथिकायामप्रसारितं विक्रेतुं नापण्य
यमनन्तमस्पृश्यादिति शाखवचनाल्लिद्धान्तव्यतिरिक्तं तदनेक केतृस्पर्शेपि शुद्धमेव तथा
ब्रह्मचर्यादिगतं भैक्ष्यं मनाचां न स्त्रीदत्तमपि रथ्यां याक्रमणेपि सर्वदा शुद्धमिति शास्त्र

कौशेयाविकयोरूषैः कृमिकोशोद्भवस्य वस्त्रस्य मेषादिलोमभवस्य च कंबलादेः ऊषैः क्षारमृत्ति।
काभिः कुतपानां नेपालकंबलानामरिष्टचूर्णैः अंशुपट्टानां पट्टशाटकानां बिल्वफलैः क्षौमा
णां तु कूलकानां क्षुमावल्कलभवानां च वस्त्राणां पिष्टश्वेतसर्षपैः प्रक्षालनाच्छुद्धिः १८ ।
क्षौमवच्छंखशृंगाणां शंखस्य शृंगाणां अस्थिमयस्य गजादिदंतकृत
स्य क्षौमवन्निष्टसर्षपकल्केन गोमूत्रजलयोरन्यतरयुक्तेन शास्त्रविदा शुद्धिः कर्तव्या १९
प्रोक्षणात्तृणकाष्ठानि तृणकाष्ठपलालानां चांडालादिस्पर्शदूषितानां प्रोक्षणाच्छुद्धिः
तृणपलालसाहचर्यादिदमिंधनकाष्ठविषयं दारवाणां च तक्षणमिति दारुमयपात्रवि

कौशेयाविकयोरूषैः कुतपानामरिष्टकैः श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः १९
क्षौमवच्छंखशृंगाणामस्थिदंतमयस्य च शुद्धिर्विजानता कार्या गोमूत्रेणोदकेन वा २०
प्रोक्षणात्तृणकाष्ठं च पलालं चैव शुध्यति मार्जनोपांजनैर्वेश्म पुनःपाकेन मृन्मयं २१
मद्यैर्मूत्रपुरीषैर्वा ष्ठीवनैः पूयशोणितैः संस्पृष्टं नैव शुध्येत पुनःपाकेन मृन्मयं २२
संमार्जनोपांजनेन सेकेनोल्लेखनेन च गवां च परिवासेन भूमिः शुध्यति पंचभिः २३
पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतं दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति २४

मयं गृहं तदुदक्यादिवासदूषितं मार्जनेन गोमयाद्युपलेपनेन च मृण्मयं भांडमुच्छिष्टादिस्पर्श
दूषितं पुनःपाकेन २१ मद्यैर्मूत्रपुरीषैर्वा मद्यादिभिस्तु संस्पृष्टं मृण्मयपात्रं पुनःपाकेनापि।
न शुद्ध्यति ष्ठीवनं श्लेष्मा पूयः शोणितविकारः २२ संमार्जनेनांजनेन अवकरशोधनेन गोम
याद्युपलेपनेन गोमूत्रोदकादिसेकेन खात्वा कतिचिन्मृदपनयनेन गवामहोरात्रनिवासेन
पंचभिरेतैर्भूमिः शुद्ध्यति एषां चोच्छिष्टमूत्रपुरीषचंडालनिवासाद्युपघातगौरवलाघवा।
भांसमस्तव्यस्तविकल्पावगंतव्यो २३ पक्षिजग्धं गवाघ्रातं पक्षिणा काकादिना कश्चिद्भागो यस्य भक्षि
तः गवा यस्य घ्राणं कृतं पादावधूतं यस्य उपरि क्षुतं कृतं केशकृमिभिश्च यत्संसृष्टं तत्समस्त

वसा शुक्रमसृङ्मज्जा वसा कायस्नेहः शुक्रं रेतः असृग्रक्तं मज्जा अस्थिमध्ये पिण्डितस्नेहः दूषिकाक्षिम
लः वसादयो द्वादश नराणां दैहिका मला भवन्ति १३५ एका लिङ्गे गुदे तिस्रः अत्र पुरीषोत्सर्गे सति
शुद्धिमभीप्सता मृद्धार्या देयमर्थवदित्युक्ता तां जलसहितां मृदमेकां लिङ्गे दातव्या गुदे तिस्रो मृदः त
थैकस्मिन्करे वामे शौचविधिनिर्णीतस्तेनाधःशौचे नियोजयेत् तथैव वामहस्तेन नाभेरूर्ध्वं न शोधये
दिति देवलवचनात् तथैवाधःशौचसाधुत्वान्नैव दश मृदो दातव्याः ततश्चोभयोः करयोः सप्त दा
तव्याः यदा तु त्रमशौचेनापि यथा लेपव्यपगमो न भवति तदा यावन्नापैत्यमेध्याक्तादिति वचनादधिक
संख्यापि मृद्दातव्या एतद्विषयाण्येव मुनीनामधिकमृत्संख्यावचनानि यदा तु त्रसंख्ययाप्यस्य

वसा शुक्रमसृङ्मज्जा मूत्रविट्कर्णविण्नखाः श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः १३५
एका लिङ्गे गुदे तिस्रस्तथैका वामकरे दश उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता १३६
एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां त्रिगुणं स्याद्वनस्थानां यतीनां च चतुर्गुणं १३७
कृत्वा मूत्रं पुरीषं वा खान्याचान्त उपस्पृशेत् वेदमध्येष्यमाणश्च अन्नमश्नंश्च सर्वदा १३८
त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखं शारीरं शौचमिच्छन्हि स्त्री शूद्रस्तु सकृत्सकृत्

पार्थिवगन्धलेपक्षयो भवति तदा संख्यावाक्यारम्भसामर्थ्यात्संख्यापूरणमपि तथैव १३६ एतच्छौ
चं गृहस्थानां एका लिङ्गे इत्यादि यच्छौचमुक्तं तद्गृहस्थानामेव ब्रह्मचारिणां द्विगुणं वानप्र
स्थानां त्रिगुणं यतीनां पुनश्चतुर्गुणं १३७ कृत्वा मूत्रं पुरीषं वा मूत्रपुरीषं कृत्वा कृतशौचो
शौचवित्त्रिराचान्तः उक्तानि इन्द्रियाणि शीर्षण्यानि स्पृशेत् वेदाध्ययनं चिकीर्षन् अन्नं चाश्नन् भक्षयन् द्विरा
माध्यायमध्येष्यमाणस्त्वाचान्तो निवेदयेद्गुरवे स्त्रीपादौ च मेतस्थमपुमक्तेन तदुक्तागतार्थं इहतु
पुनरर्थं शौचाय मेत्युक्त सक्तिः १३८ आचान्त इति यदुक्तं तत्र विधिमाह त्रिराचामेदपः पू
र्वं देहस्य शौचमिच्छन्नपमेवारत्रयं अपो भक्षयेत् ततऊर्ध्वं मुखं द्विः परिमृज्यात् स्त्री शूद्रश्च
सकृत्सकृदाचमनार्थमुदकं भक्षयेत् १३९

107

नित्यमास्यं शुचि स्त्रीणां सर्वदा स्त्रीणां मुखं शुचि तथा काकादिपक्षिचञ्चुपाताच्च पतितं फलं शुचि व
त्समुखं च दोहसमये दोहप्रस्रवणे शुचि श्वा च यथा मृगादीन् गृह्णाति तदा तद्व्यापारे शुचिः त
स्मात् २९ श्वभिर्हतस्य यन्मांसं कुक्कुरैर्हतस्य मृगादेर्यन्मांसं तच्छुचि मनुरवोचत् तथा चा
न्यैरपि भोजनादावदुष्टम् अन्यैश्चामांसादिभिर्व्याघ्रश्येनादिभिश्चण्डालव्याधादिभिश्च मृगाद्यव
ध्यभिर्हतस्य ३० ऊर्ध्वं नाभेर्यानि खानि नाभेरुपरि यानीन्द्रियच्छिद्राणि तानि सर्वाणि पवित्रा
णि भवन्ति अतस्तेषां स्पर्शनेनाचमनं यानि नाभेरधस्तान्यशुचीनि भवन्ति अतः छिद्रेषु करव
र्णत्यक्तिः वरुणापेक्षया वद्यमाणाश्च वसादयो देहमला देहान्निःसृता अशुद्धा भवन्ति ३१।
मक्षिका विप्रुषश्छाया मक्षिकाश्च मेध्यस्पर्शिन्योऽपि विप्रुषो मुखान्निःसृता अल्पा जलकणाः छा

नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने। प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः ॥ २९ ॥
श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत्। क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः ॥ ३० ॥
ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः। यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः ॥ ३१ ॥
मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः। रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत् ॥ ३२ ॥
विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थवत्। दैहिकानां मलानां च शुद्धिषु द्वादशस्वपि ॥ ३३ ॥

या पतिता देहस्पृश्यपस्यापि गवादीनि चाग्निपर्यन्तानि चण्डालादिस्पृष्टानि स्पर्शे शुचीनि जानीयात् ३२
विण्मूत्रोत्सर्गशुद्ध्यर्थं विण्मूत्रमलत्यागे येन स विण्मूत्रोत्सर्गः पाय्वादिस्तस्य शुद्ध्यर्थं मृद्वारि गृही
तव्यमर्थवत् यावता गन्धलेपक्षयो भवति तथा शरीराणां वसादिमलानां संबन्धिनो द्व
द्वादशस्वपि शुद्धिषु गन्धलेपक्षयार्थं मृद्वारि ग्राह्यं तत्र प्रथमेषु षट्सु जलमात्रग्रहणं तदाह
बौधायनः आददीत मृदोऽपश्च षट्सु पूर्वेषु शुद्धये उत्तरेषु च षट्स्वद्भिः केवलाभिर्विशुद्ध्यति त
न्न द्वादशस्वपीति मानवं मृद्वारिग्रहणवचनं व्यवस्थया मृद्वारिणोर्ग्रहणमिति न विकल्पते गो
विन्दराजस्तु मनुबौधायनयोर्नानार्थत्वे षट्के विकल्पमाह स च व्यवस्थितो देवपित्र्यादिकर्मसु

॥ मृज्जलग्रहणं उत्तरषट्के ॥

सुप्त्वा क्षुत्वा च ॥ भुक्त्वा निद्रां क्षुतं भोजनं श्लेष्मनिरसनं मृषावादं जलपानादिकं कृत्वा अध्ययनं चि
कीर्षुः शुचिरपि सन्नाचामेत् यत्तु भुक्त्वा चोपस्पृशेत्सम्यगिति तत्प्राप्ते ष्यमाणस्याचामनं इति द्वि
तीयाध्यायोक्तं तदुक्तानां तेन उहतभुक्त्वाचामनविधानं पुरुषार्थं अध्ययनांगतया चामन
विधानं गृहस्थादीनामपि ॥ ४४ एष शौचविधिः कृत्स्नो ॥ एषो वर्णानां जननमरणादौ द्रव्य
शावादिरूपो च विधिः समस्तो द्रव्याणां तैजसानां च जलादिना शुचिविधिर्युष्माकं उक्तः
इदानीं स्त्रीणां धर्मं तु पश्य धर्मं शृणुत ॥ ४५ बालया वा युवत्या वा ॥ बाल्ये यौवने वार्द्धके च वर्त्तमा
नया स्त्रिया किंचित्स्वल्पमपि कार्यं भर्त्राद्यननुमतेन स्वातंत्र्येण कर्तव्यमिति किं तु ॥ ४६ बाल्ये

सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतानि च पीत्वापोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि
सन् ॥ ४४ एषः शौचविधिः कृत्स्नो द्रव्यशुद्धिस्तथैव च उक्तो वः सर्ववर्णानां स्त्रीणां धर्मान्निबोधत
बालया वा युवत्या वा वृद्धया वापि योषिता न स्वातंत्र्येण कर्तव्यं किंचित्कार्यं गृहेष्वपि ॥ ४७
बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने पुत्राणां भर्तरि प्रेते न भजेत्स्त्री स्वतंत्रतां ॥ ४८
पित्रा भर्त्रा सुतैर्वापि नेच्छेद्विरहमात्मनः एषां हि विरहेण स्त्री गर्ह्ये कुर्यादुभे कुले ॥ ४९ स
दा प्रहृष्टया भाव्यं गृहकार्ये च दक्षया सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया ॥ ५०

पितुर्वशे तिष्ठेत् ॥ बाल्ये पितुर्वशे तिष्ठेत् यौवने भर्तुः भर्तरि मृते पुत्राणां तदभावे तत्सपिंडेषु तदस
त्वे पितृपक्षः प्रभुः स्त्रियः पक्षद्वयाभावे तु राजा भर्ता स्त्रियां मत इति नारदवचनात् तत्रापि
राजादीनामपेक्षा स्यात् कदाचित्स्वतंत्रा भवेत् ॥ ४७ पित्रा भर्त्रा सुतैर्वापि ॥ पित्रा प्रमापुत्रैर्वा ना
त्मनो विरहं कुर्यात् यस्मादेषां वियोगेन स्त्री बंधकीभावं गता अपि पतिपितृकुले निंदिते करो
ति ॥ ४८ सदा प्रहृष्टया भाव्यं ॥ सदा भर्त्रादिरुष्टेऽपि प्रसन्नवदनया गृहकर्मणि च चतुरया शोधि
तकांडकटाहादिगृहभांडया व्यये चाबहुप्रदया स्त्रिया भवितव्यं ॥ ४९

शूद्राणां मासिकं कार्यं शूद्राणां कार्यमिति कृत्यानां कर्तरि वेति कर्तरि षष्ठी यथायथान्यवहारि
भिः द्विजशुश्रूषकैः शूद्रैर्मासि मासि मुण्डनं कार्यं वैश्यवच्च मृतसूतकादौ शौचकल्पोऽनुष्ठातव्यः
द्विजान्नमुच्छिष्टं च भुञ्जीतेति भोजनं कार्यं १४० नोच्छिष्टं कुर्वते मुख्याः निष्ठीव्योक्ता अनृतानि वे
तानि एतद्वता आचमनविधानाद् विप्रुषामपि मुखान्निःसृतानां निष्ठीवनमेवेति प्रसक्तो प्रतिषेधः।
यमाह मुखभवा विप्रुषो या अङ्गे निपतन्ति ता उच्छिष्टं न कुर्वन्ति तथा श्मश्रूणि मानि मुखे प्र
विष्टानि नोच्छिष्टतां जनयन्ति दन्तावकाशे स्थितं चान्नावयवादि नोच्छिष्टं कुरुते अत्र गौतमी
यो विशेषः दन्तश्लिष्टेषु दन्तवदन्यत्र जिह्वाभिमर्षणात् प्राक् च्युतेरित्याहार्यवद्विद्यान्निगलन्ने

शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनां वैश्यवच्छौचकल्पं च द्विजोच्छिष्टं च भोजनं
नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गं पतन्ति याः न श्मश्रूणि गतान्यास्यं न दन्तान्तरधिष्ठितं ४१
स्पृशन्ति बिन्दवः पादौ य आचामयतः परान् भौमिकास्ते समा ज्ञेया न तैरप्रयतो भवेत् ४२
उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् ४३
वान्तो विरक्तः स्नात्वा तु घृतप्राशनमाचरेत् आचामेदेव भुक्त्वान्नं स्नानं मैथुनिनः स्मृतं ४४

वत् शुचिः ४० स्पृशन्ति बिन्दवः पादौ अन्येषामाचमनार्थं जलं ददतो जलबिन्दवः पादौ स्पृश
न्ति न जंघादि ते विशुद्धभूमिष्ठोदककल्पास्तेन नाचमनार्हो भवति ४२ उच्छिष्टेन च संस्पृष्ट
द्रव्यहस्त पदेन शरीरसंबंधमात्रं द्रव्यस्य व्यवहितं ग्रामणीर्वं धान्यादीनिं प्रज्ञास्येति द्रव्यहस्त
स्याचमनासंभवात् कथं आदिस्पृद्द्रव्योपयुच्छिष्टेन संस्पृष्टो भवति तदा तद्द्रव्यमनवस्थाप्यैव
कृत्वाचमनः शुद्धोऽपि द्रव्यं च शुद्ध्यति ४३ वान्तो विरिक्तः स्नात्वा च कृतवमनः संजातवि
रेकः स्नात्वा घृतप्राशनं कुर्यात् प्रथमाविरेकाद्विरिक्त इति गोविंदराजः यदि भुक्त्वान्नमेव
वमति तदा [illegible]नमेव कुर्यान्न स्नानघृतप्राशने मैथुनं च कृत्वा स्नायात् ४४

म·स्मृ·
टी·
१·२५

कामं तु क्षपयेद्देहं पुष्पमूलफलैः पवित्रैः स्वदेहं पद्मयेदल्पाहारेण क्षीणं कुर्यात् न च भर्तरि मृते व्यभिचारधिया परपुरुषस्य नामापि गृह्णीयादेवं सति ५५ आसीतामरणात्क्षान्ता क्षमायुक्ता नियमवती एकभर्तृकाणां यो धर्मः प्रकृष्टतमस्तमिच्छन्ती मधुमांसमैथुनवर्जनात्मकब्रह्मचर्यशालिनी मरणपर्यन्तं तिष्ठेत् प्रकृष्टसेवेत यस्मात् ५६ अनेकानि सहस्राणि बाल्यात्प्रभृति ब्रह्मचारिणामकृतदाराणां सनकबालखिल्यादीनां ब्राह्मणानां बहूनि सहस्राणि कुलवृद्ध्यर्थं संततिमनुत्पाद्यापि स्वर्गं गतानि ५७ मृते भर्तरि साध्वी स्त्री साध्वी स्त्री मृते भर्तरि मुक्तपुरुषान्तरमैथुना पुत्ररहितापि स्वर्गं गच्छति यथा ते सनकबालखिल्यादयः पुत्ररहिताः स्वर्गं गताः ५८ अपत्यलो भात्पुत्रो मे जायतां तेन स्वर्गं प्राप्स्यामीति लोभेन या स्त्री भर्तारमतिक्रम्य वर्तते व्यभिचारमाचरति स्त्री

कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु ५५ आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् ५६ अनेकानि सहस्राणि कुमारब्रह्मचारिणः दिवं गतानि विप्राणामकृत्वा कुलसंततिं ५७ मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ५८ अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते सेह निन्दामवाप्नोति पतिलोकाच्च हीयते ५९ नान्योत्पन्ना प्रजास्तीह न चाप्यन्यपरिग्रहे न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते ६० पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते निन्द्यैव सा लोके भवति परः पूर्वेति चोच्यते ६२

तीत्यर्थः सेह लोके गर्हां प्राप्नोति परलोकं च स्वर्गं तेन पुत्रेण न लभते ५९ अत्रैव हेतुमाह नान्यो त्पन्ना प्रजास्तीह यस्मादुत्पादयितुरेव तेन पुरुषेणोत्पन्ना प्रजा न तस्याः शास्त्रीया न भवति न चान्य पत्न्यामुत्पादिता उत्पादकस्य प्रजा भवति एतच्च नियोगोपादित विषयं वक्ष्यते नैकमिति लोकप्र सिद्धं द्वितीयोपि भर्ता वत्तस्मादन्योत्पादितमपि सिद्धमित्यर्थं कथाह न च लोके गर्हं प्रसिद्धावपि साध्वी नां क्वचिद्भर्तरि द्वितीयो भर्तोपदिश्यते एवं सति पुनर्भूत्वमपि प्रसिद्धं ६० पतिं हित्वापकृ ष्टं स्वं अपकृष्टं जातिगुणादिभिः स्वकीयं पतिं त्यक्त्वा उत्कृष्टं ब्राह्मणादिकं या प्राप्यते सा लोके गर्हणी यैव भवति परोस्याः पूर्वो भर्ता यस्याः भूदिति च लोके विख्यात ६२

709

मू·
१·२५

यस्मै दद्यात्पिता त्वेनां। यस्मै पिता एनां दद्यात् पितुरनुमत्या भ्राता वा तं जीवंतं परिचरेत् मृतं च नातिक्रामेत् व्यभिचारेण तदीयश्राद्धतर्पणादिविहितपारलौकिककृत्याखंडनेन च ५० मंगलार्थं स्वस्त्ययनं यदासां स्वस्त्ययनं शांत्यर्थं मंत्रवचनादिरूपं यज्ञश्चासां प्रजापतियागः प्रजापत्युद्देशे। नायं होमात्मको विवाहेषु क्रियते तन्मंगलार्थमभीष्टसंपत्त्यर्थं कर्म यत्पुनः प्रथमं दानं वाग्दानात्मकं तदेव भर्तुः स्वाम्यजनकं तत एव वाग्दानादारभ्य स्त्री भर्तृपरतंत्रा तस्मात्तं शुश्रूषेतेति पूर्वोक्तस्यैव शेषः यत्तु नवमे वक्ष्यते तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे इति तद्भार्यात्वसंस्कारार्थमविरोधः यतः अनृतावृतुकाले च मंत्रसंस्कारो विवाहः तत्कर्ता भर्त्ता स्त्रीणां सर्वदा तु पेया

यस्मै दद्यात्पिता त्वेनां भ्राता वानुमते पितुः तं शुश्रूषेत जीवंतं संस्थितं न च लंघयेत् ५० मंगलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारकं ५२ अनृतावृतुकाले च मंत्रसंस्कारकृत्पतिः सुखस्य नित्यं दातेह परलोके च योषितः ५३ विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः उपचार्यः स्त्रिया साध्व्या सततं देववत्पतिः नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं पतिं शुश्रूषते येन तेन स्वर्गे महीयते ५५ पत्यौ जीवति या नारी उपोष्य व्रतचारिणी आयुः सा हरते पत्युः स्वयं च नरकं व्रजेत् ५५

पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा पतिलोकमभीप्सन्ती नाचरेत्किंचिदप्रियं ५६

सर्वत्र वा ऋतौ निषेधवर्जमिति गौतमवचनात् ऋतुकालेऽन्यदा च नित्यमिह लोके परलोके च सुखस्य दातेति यस्मात् ५३ विशीलः कामवृत्तो वा सदाचारशून्यः स्त्र्यन्तरानुरक्तो वा विद्यादिगुणहीनो वा तथापि साध्व्याः स्त्रिया देववत्पतिराधनीयः यस्माच्च ५४ नास्ति स्त्रीणां पृथग्यज्ञो यथा भर्तुः कस्याश्चिदप्यधिकारो यागादिनानुपस्थितावपि पत्न्यन्तरेण यज्ञनिष्पत्तिः तथा न स्त्रीणां भर्त्रा विना यज्ञसिद्धिः नापि भर्तुरनुमतिव्यतिरेकेण व्रतोपवासौ किं तु भर्तृपरिचर्ययैव स्वर्गलोके पूज्यते ५५ पाणिग्राहस्य साध्वी स्त्री पत्या सह धर्माचरणेन योऽर्जितः स्वर्गादिलोकः तमिच्छन्ती साध्वी स्त्री जीवतो वा मृतस्य वा भर्तुर्न किंचिदप्रियमर्जयेत्तस्मात्तस्याप्रियं व्यभिचारेण विहितश्राद्धाखंडनेन चाहतिसंभवोऽपि. ५६

गृहस्थस्तु यदा पश्येत् गृहस्थो यदात्मदेहस्य त्वक्शैथिल्यं रोमधावल्यं पुत्रं च पश्यति तदा तपोवि
वृद्धये वयसा वा विगतविषयरागत्वाद्वानप्रस्थाश्रमं वनमाश्रयेत् २ संत्यज्य ग्राम्यमाहारं ग्राम्यं
व्रीहियवादिकं भक्ष्यं सर्वं गवाश्वशय्यासनादिपरिच्छदं परित्यज्य विद्यमानभार्यः स्वयं वनवासम
निच्छन्तीं भार्यां पुत्रेषु समर्प्यानुगच्छन्त्या सहैव वा वनं गच्छेत् ३ अग्निहोत्रं समादाय श्रौताग्निमा
वसथ्याग्निमप्युपकरणं च स्रुक्स्रुवादि गृहीत्वा ग्रामादरण्यं गत्वा संयतेन्द्रियः सन्निवसेत् ४ मु
न्यन्नैर्विविधैर्मेध्यैः मुन्यन्नैर्नीवारादिभिर्नानाप्रकारैः पवित्रैः शाकमूलफलैर्वाऽप्युपायो द्रु
वैरेतानेवेति गृहस्थस्य पूर्वोक्तान्महायज्ञान्यथाशास्त्रमनुतिष्ठेत् ५ वसीत चर्म चीरं वा मृ
गादिचर्म वृक्षवल्कलं वाच्छादयेत् हारीतेन त्वग्वल्कलशालीचर्मचीरकुशमुञ्जफलकवासांसि

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् २
संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदं पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ३ अ
ग्निहोत्रं समादाय गृह्यं चाग्निपरिच्छदं ग्रामादरण्यं निःसृत्य निवसेन्नियतेन्द्रियः ४
मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा एतानेव महायज्ञान्निर्वपेद्विधिपूर्वकं ५
वसीत चर्म चीरं वा सायं स्नायात्प्रगे तथा जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ६
यद्भक्ष्यं स्यात्ततो दद्याद्बलिं भिक्षां च शक्तितः अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् ७
स्वाध्याये नित्ययुक्तः स्याद्दांतो मैत्रः समाहितः दाता नित्यमनादाता सर्वभूतानुकंपकः ८

तिविदधुलावल्कलादिकमप्यनुज्ञातं सायं प्रातश्च स्नायात् जटाश्मश्रुलोमनखानि च नित्यं धा
रयेत् ६ यद्भक्ष्यं स्यात्ततो दद्यात् यद्भुञ्जीत ततो यथाशक्ति बलिं भिक्षां च दद्यात् बलिमिति वैश्व
देवनित्यश्राद्धयोरुपलक्षणं एतानेव महायज्ञानिति विहितत्वात् आश्रमागतांश्च जलमूलफलभि।
क्षादानेन पूजयेत् ७ स्वाध्यायेन नित्ययुक्तः स्यात् वेदाभ्यासे नियोगयुक्तः स्यात् शीतातपादि
दुःखसहिष्णुः मैत्रो हितेप्सुः सर्वोपकारपरः संयतमनाः सततं दाता प्रतिग्रहरहितः सर्वभूते
ष्वनुकम्पावान्भवेत् ८

व्यभिचारफलमाह व्यभिचाराच्च भर्तुः स्त्री परपुरुषोपयोगेन स्त्री इहलोके गर्हणीयतां लभते मृ
लानां च शृगाली भवति कुष्ठादिरोगैश्च पीड्यते ६४ पतिं या नाभिचरति मनोवाग्देहसंयतेति विशे
षणोपादानाद्या मनोवाग्देहैरेव न व्यभिचरति सा भर्तृमात्रनिष्ठमनोवाग्देहव्यापारत्वात् इन्द्रो स
हार्जितान् लोकान्प्राप्नोति इह च शिष्टैः साध्वीत्युच्यते वा इत्तान सायाभ्यपि पतिं न व्यभिचरेदिति वि
धानार्थो ऐहिकव्यभिचारनिवृत्तेरुक्तापायप्रत्यनुवादः ६३ अनेन नारी वृत्तेन अनेन स्त्रीधर्मप्र
कारेणोक्तेनाचरणेन पतिशुश्रूषा भर्तृव्यभिचारादिना मनोवाक्कायसंयता स्त्री इहलोके प्रकृष्टां
कीर्तिं परत्र पत्या सहार्जितं च स्वर्गादिलोकं प्राप्नोतीति प्रकरणार्थोपसंहारः ६४ एवंवृत्तां सव

व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम् । शृगालयोनिं चाप्नोति पापरोगैश्च पीड्यते ६२
पतिं या नाभिचरति मनोवाक्कायसंयता । सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते ६३
अनेन नारी वृत्तेन मनोवाग्देहसंयता । इहाग्र्यां कीर्तिमाप्नोति पतिलोकं परत्र च ६४ ए
वंवृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीम् । दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ६५
भार्यायै पूर्वमारिण्यै दत्त्वाग्नीनन्त्यकर्मणि । पुनर्दारक्रियां कुर्यात्पुनराधानमेव च ६६ अ
नेन विधिना नित्यं पञ्चयज्ञान्न हापयेत् । द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ६७ इ
ति श्रीमानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां भाष्याभट्टस्य पञ्चमोऽध्यायः एवं गृहाश्रमे स्थि
त्वा विधिवत्स्नातको द्विजः । वने वसेत्तु नियतो यथावद्विजितेन्द्रियः १

र्णां स्त्रीं द्विजातिः समानवर्णां यथोक्ताचारयुक्तां पूर्वमृतां श्रौतस्मार्ताग्निभिर्यज्ञपात्रैश्च दाहयेद्धर्म
ज्ञो दाहयेत् ६५ भार्यायै पूर्वमारिण्यै पूर्वमृतायै अन्त्यकर्मणि दाहनिमित्तमग्नीन्दत्त्वा गृहस्था
श्रमाभिलाषुकः पुनर्विवाहं कुर्यात् स्मार्तमग्निं श्रौताग्नीनादध्यात् ६६ अनेन विधि
ना नित्यं अनेन तृतीयाध्यायाद्युक्तविधिना प्रत्यहं पञ्चयज्ञान्न त्यजेत् द्वितीयमायुर्भागं कृतदारपरिग्र
हो अनेनैव यथोक्तविधिना गृहस्थविहितानि अनुतिष्ठन् गृहस्थधर्मेऽपि च धर्मपत्न्या नाश्रुत
धर्मत्यापनार्थ एष एककृनिर्देशः ६७ इति मन्वर्थमुक्तावल्यां पञ्चमोऽध्यायः ५ एवं गृहाश्रमे स्थित्वा
आश्रमसमुच्चयपक्षाश्रितो द्विजातिः कृतसमावर्तनः उक्तप्रकारेण यथाशास्त्रं गृहस्थाश्रम
मनुष्ठाय नियतः कृतनिश्चयो यथावत्तस्मात् धर्मे यथार्हं इति विशेषणजितेन्द्रियः परि

मनुस्मृ· टी· २२१

वर्जयेन्मधुमांसानि माक्षिकं मधु मांसं भौमानीति प्रतिषिद्धप्रदर्शनार्थं भौमादीनि कवका
नि छत्राकानि भूस्तृणं मालवदेशे प्रसिद्धं शाकं शिग्रुकं वाहीकेषु प्रसिद्धं शाकं श्लेष्मातक:
फलानि च वर्जयेत् गोविंदराजस्तु भौमानि कवकानीत्यस्य व्यवच्छेदकं विशेषणं मन्विह
न्भौमानीति कवकाणां निषेधः वार्क्षाणां भक्षणमाह तदयुक्तं मनुनैव पंचमे द्विजाते
रेव कवकमात्रनिषेधात् वनस्पतिगोचरतया नियमातिशायसोचितत्वात् प्रथमस्तु भूमि
जं वृक्षजं वापि छत्राकं भक्षयंति ये ब्रह्मघ्नांस्तान्विजानीयाद्ब्रह्मवादिषु गर्हितान् इत्यवि
शेषेण वृक्षजस्यापि निषेधमाह मेधातिथिस्तु भौमानि निस्वतं च पदं योनिद्धिकाक।
श्चित्पदार्थो वनेचराणां प्रसिद्धः तद्विषयं निषेधमाह तदपि वक्तृषभिधानकोषादिषु

वर्जयेन्मधुमांसानि भौमानि कवकानि च भूस्तृणं शिग्रुकं चैव श्लेष्मातकफलानि च
त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसंचितं जीर्णानि चैव वासांसि शाकमूलफलानि च १५
न फालकृष्टमश्नीयादुत्सृष्टमपि केनचित् न ग्रामजातान्यार्तोऽपि मूलानि च फलानि च
अग्निपक्वाशनो वा स्यात्कालपक्वभुगेव च अश्मकुट्टो भवेद्वापि दंतोलूखलिकोऽपि वा १७

२२१

प्रसिद्धं न प्रसिद्धी महिकवकानां द्विजातिविषये पंचमिके निषेधे सत्यपि पुनर्निषेधो भूत्।
णादीनां तत्समप्राप्यश्चित्तार्थं १४ त्यजेदाश्वयुजे मासि संवत्सरसंचयनियमपक्षे पूर्वसं
चितनीवाराद्यन्नं शाकमूलफलानि जीर्णानि वासांसि च अश्विने मासि त्यजेत् १५ न फा
लकृष्टमश्नीयात् अरण्येऽपि फालकृष्टप्रदेशजातं स्वामिना परित्यक्तमपि व्रीह्यादि नाद्या
त् तथा ग्राममजातानि अफालकृष्टभूभागजातानि लताद्युद्भवमूलफलानि क्षुत्पीडितोऽपि
न भक्षयेत् १६ अग्निपक्वाशनो वा स्यात् अग्निपक्वं मुन्यन्नं भुंजीत कालपक्वं वा फलादि प
क्वान्न उलूखलमुसलाभ्यां किंतु पाषाणेन वनीवारादि चूर्णीकृत्य पक्वमेवाद्यात् दंता एव
लूखलस्थाने यस्य तथाविधो वा भवेत् १७

मु· २२१

वैतानिकं च जुहुयात् गार्हपत्यमुद्धृत्याहवनीयेनाग्नीमथाहवनीयदक्षिणाग्निमुद्धृत्य योर्विहारो
वितानं तत्र भवं वैतानिकमग्निहोत्रं यथाशास्त्रमनुतिष्ठेत् दर्शपौर्णमासं च पर्वणि श्रौतस्मार्त
दर्शपौर्णमासौ योगतः स्वकाले स्कंदयन् परित्यजन् भार्यानिक्षेपपक्षेपि रजस्वलायामिव
भार्यायामेतेषामनुष्ठानमुचितं विशेषाश्रवणात् ९ ऋक्षेष्ट्याग्रयणं चैव ऋक्षेष्टिर्न
क्षत्रेष्टिः आग्रयणं नवसस्येष्टिः ऋक्षेष्टिश्चाग्रयणं चेति समाहारद्वंद्वः तथा चातुर्मास्यानि तुरा
यणदाक्षायणाख्ये श्रौतकर्मणी क्रमेणानुयात् अत्र केचित्सर्वमेतत् श्रौतं दर्शपौर्णमासा
दिकर्म वानप्रस्थस्य तु सर्वमुच्यते न तत्समानुष्ठेयं ग्राम्यव्रीह्यादिसाध्यत्वात् तेषां न च स्मृतेः
श्रौतानां बाधनं प्रयुक्तं तदसत् वासंतशारदैरित्यनन्तरश्लोके मुन्यन्नैर्नीवारादिभिर्वानप्र

वैतानिकं च जुहुयादग्निहोत्रं यथाविधि । दर्शमस्कंदयन्पर्व पौर्णमासं च योगतः ९
ऋक्षेष्ट्याग्रयणं चैव चातुर्मास्यानि चाहरेत् । तुरायणं च क्रमशः दक्षस्यायनमेव च १०
वासंतशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः । पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत्पृथक् ११
देवताभ्यश्च तद्धुत्वा वन्यं मेध्यतरं हविः । शेषमात्मनि युञ्जीत लवणं च स्वयंकृतं १२ ।
स्थलजौदकशाकानि पुष्पमूलफलानि च । मेध्यवृक्षोद्भवान्यद्यात्स्नेहांश्च फलसंभवान् ।

स्थविषयतया स्पष्टस्य च पुरोडाशादिविधेर्बाध्यमानाप्यत्वात् गोविंदराजस्तु व्रीह्यादि
भिरेव कश्चिद् इत्येतानि विनिवर्तयितुमित्याह १० वासंतशारदैर्मेध्यैः वसं
तोद्भवैः शरदुद्भवैश्च मेध्यैर्मेधायोग्यैस्तदर्हैर्मुन्यन्नैर्नीवारादिभिः स्वयमानीतैः पुरोडा
शांश्चरूंश्च यथाशास्त्रं तत्पात्रादिभिः पृथक्संपादयेत् ११ देवताभ्यश्च तद्धुत्वा तद
नोद्भवं नीवारादिसाधितं मेध्यतरं शेषेण पात्रार्हं हविर्देवताभ्य उपकल्प्य शेषमात्मार्थमु
पयुञ्जीत आत्मनाकृतं यत्तल्लवणं तदुपयुंजीत १२ स्थलजौदकशाकानि स्थलज
तोद्भवशाकानि जलप्रभवाणि मेध्यवृक्षोद्भवानि पुष्पमूलफलानि गुडादि फलोद्भवांश्च स्ने

ग्रीष्मे पंचतपास्तु स्यात् आत्मतपोवृद्ध्यर्थं च ग्रीष्मे चतुर्दिगवस्थितैरग्निभिरूर्ध्वं चादित्यतेजसात्मा
नं तापयेत् वर्षास्वभ्राण्येवावकाशमाश्रयेत् यत्र देशे देवो वर्षति तत्र छायावरणरहितस्ति
ष्ठेदित्यर्थः हेमंते चार्द्रवस्त्रो भवेत् क्रमसंवत्सरवर्द्धनेन चास्य सांवत्सरिनियमः २३ उप
स्पृशंस्त्रिषवणं विहितमपि त्रिषवणस्नानं देवपितृतर्पणविधानार्थमनूद्यते प्रातर्मध्यंदि
नं सायं सवनेषु त्रिष्वपि स्नात्वा देवपितृतर्पणं कुर्वन् तदपि पक्षमासोपवासादिकं तीव्रतरं
तपोनुतिष्ठन् यथोक्तं यमेन पक्षोपवासिनः केचित्केचिन्मासोपवासिन इति शरीरं शोषयेत्
२४ अग्नीनात्मनि वैतानानात् श्रौताग्नीन्वैतानसंज्ञान्शास्त्रविधानेन भस्मपानादिनात्मनि समा

ग्रीष्मे पंचतपास्तु स्याद्वर्षास्वभ्रावकाशकः आर्द्रवासास्तु हेमंते क्रमशो वर्द्धयंस्तपः २३
उपस्पृशंस्त्रिषवणं पितॄन्देवांश्च तर्पयन् तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः २४ अ
ग्नीनात्मनि वैतानान्समारोप्य यथाविधि अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः २५
अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः शरणेष्वममश्चैव वृक्षमूलनिकेतनः २६ ता
पसेष्वेव विप्रेषु यात्रिकं भैक्षमाचरेत् गृहमेधिषु चान्येषु द्विजेषु वनवासिषु २७ ग्रा
मादाहृत्य चाश्नीयादष्टौ ग्रासान्वने वसन् विविधाश्चोपनिषदीरात्मसंसिद्धये श्रुतीः २८

रोप्य लौकिकाग्निमान्गृहशून्यो यथावत्स्याति वृक्षमूलनिकेतन इति मुनिर्मौनव्रतचारी मूल
फलाशन एव स्यात् जीवनायापि नाश्नीयादेतच्चोर्द्धं षण्मासेभ्योऽनग्निरनिकेत इति वसिष्ठवच
नात् षण्मासोपर्यनग्निरनिकेतनत्वं २५ अप्रयत्नः सुखार्थेषु सुखार्थेषु स्वादुफलादि
भक्षणशीतातपादिपरिहारेष्वप्रयत्नशून्यः अस्त्रीसंभोगी भूमिशायी निवासस्थानेषु मम
त्वरहितो वृक्षमूलवासी स्यात् फलमूलासंभवे च २६ तापसेष्वेव विप्रेषु वानप्रस्थे
ष्वेव विप्रेभ्यः प्राणधारणोचितं भैक्षमाहरेत् तदलाभे चान्येभ्यश्च वनवासिभ्यो गृहस्थे
भ्यो द्विजेभ्यस्तदसंभवे २७ ग्रामादाहृत्य वाश्नीयात् ग्रामादानीय ग्राम्यस्याप्यन्नस्या

229

सद्यः प्रक्षालको वा स्यात् एकाहमात्रजीवनोचितं मासवृत्त्युचितं षण्मासजीवनोचितं संवत्सर।
निर्वाहसमर्थं वा नीवारादिकं संचिनुयात् यथापूर्वं नियमातिशयः मासहविर्योग्यसंचयो मास
संचयः सोऽस्यास्तीति अत इनिठनाविति ठन्प्रत्ययः तेन मासिसंचयिक इति रूपं १८ नक्तं चान्नं
समश्नीयात् यथासामर्थ्यमन्नमाहृत्य प्रदोषे भुञ्जीत दिवसे वा चतुर्थकालाशनो वा स्यात् सा
यं प्रातर्भुक्त्वा सायमश्नानं देवनिर्मितमिति विहितं न एकस्मिन्नहोरात्रे उपोष्य परेद्यू रात्रौ भुञ्जी
त अष्टमकालिको वा भवेत् त्रिरात्रमुपोष्य चतुर्थाहोरात्रे रात्रौ भुञ्जीत १९ चान्द्रायणविधाने
र्वा शुक्लकृष्णयोरेकैकं ग्रासमपचयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेदित्यादिनैकादशाध्याये वक्ष्यमा
णैश्चान्द्रायणैर्वा वर्तेत पक्षान्तौ पौर्णमास्यमावास्ये तत्र शृतां यवागूं वाश्नीयात् सकृदिति सा

सद्यः प्रक्षालको वा स्यान्माससंचयिकोऽपि वा षण्मासनिचयो वा स्यात्समानिचय एव च १८
नक्तं चान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः चतुर्थकालिको वा स्यादथवाष्टमकालिकः १९
चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्तयेत् पक्षान्तयोर्वाप्यश्नीयाद्यवागूं क्वथितां सकृत् २०
पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा कालपक्वैः स्वयं शीर्णैर्वैखानसमते स्थितः २१
भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनं स्थानासनाभ्यां विहरेत्सवनेषूपयन्नपः २२

यं प्रातर्वा २० पुष्पमूलफलैर्वापि पुष्पमूलफलैरेव वा कालपक्वैर्वा शीर्णैः स्वयं पति
तैर्जीवेत् वैखानसो वानप्रस्थस्तद्धर्मप्रतिपादकशास्त्रदर्शने स्थितः तेन तदुक्तमप्यद
पि वैखानसशास्त्रोक्तं धर्ममनुतिष्ठेत् २१ भूमौ विपरिवर्तेत केवलायां भूमौ लुठनात्मना
लानि कुर्यात् स्थानासनाभ्यां दावुपविशन्नुत्तिष्ठन्नपर्यटेदित्यर्थः आवश्यकस्नानभोजनादि
कालं विहाय चायं नियमः एवमुत्तरत्रापि पादाग्राभ्यां वा दिनं तिष्ठेत् किंचित्कालं स्थि
त एव स्यात्कंचित्कालमुपविष्ट एव न तु तेरापर्यटेत् सवनेषु सायं प्रातर्मध्यंदिनेषु स्नायाच्च
सायं स्नानं यामायो तथोत्पन्नं तेन महास्नानियमातिशयायपन्नो विकल्पः २२

आश्रमादाश्रमंगत्वा पूर्वपूर्वस्मादाश्रमादुत्तरोत्तराश्रमं गत्वा ब्रह्मचर्यगृहस्थाश्रमं ततो वानप्रस्थाश्रम
मनुष्ठायेत्यर्थः यथाशक्ति कृतहोमो जितेन्द्रियो भिक्षाबलिदानविरमेव यथाश्रान्तः प्रव्रज्याश्र
ममनुतिष्ठन्परलोके मोक्षलाभाद्वृद्धिरूपतामाप्नोतीति ३४ ऋणानि त्रीण्यपाकृत्य आश्रम
समुच्चयपक्षमाश्रित्यैतदुत्तरश्लोकोक्तानि त्रीणि ऋणानि निःशोध्य पश्चान्मोक्षो मोक्षार्थं तदंगो
परिव्रज्याश्रमे मनो योजयेत् ऋणानि त्रीण्यनिःशोध्य मोक्षं च चतुर्थाश्रमम् अनुतिष्ठन्नरकं प्राप्नो
ति ३५ तान्येव ऋणानि दर्शयति अधीत्य विधिवद्वेदान् जायमानो हि ब्राह्मणस्त्रिभिर्ऋणैर्ऋ
णवान् जायते यज्ञेन देवेभ्यः प्रजया पितृभ्यः स्वाध्यायेन ऋषिभ्य इति श्रुतेः अतो यथाशास्त्रं वेदा
नधीत्य पर्वसमागमनवर्जनादिधर्मेण च पुत्रानुत्पाद्य यथासामर्थ्यं ज्योतिष्टोमादियज्ञैरनुष्ठाय मो

आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः भिक्षाबलिपरिश्रान्तः प्रव्रजन्प्रेत्य वर्द्धते ३४ ऋ
णानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ३५ अ
धीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ३६
अनधीत्य द्विजो वेदाननुत्पाद्य तथा प्रजां अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः ३७
प्राजापत्यां निरुप्येष्टिं सार्ववेदसदक्षिणां आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ३८
यो दत्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ३९

क्षाख्ये चतुर्थाश्रमे मनो योजयेत् ३६ अनधीत्य द्विजो वेदान् वेदाध्ययनमकृत्वा पुत्रानुत्पाद्य यज्ञा
ननुष्ठाय मोक्षमिच्छन्नरकं गच्छति ३७ प्राजापत्यां निरूप्येष्टिं यजुर्वेदे पाठानुरूपां तां सर्वस्वदक्षिणां
प्रजापतिदेवताकामिष्टिं कृत्वा तदुक्तविधिना आत्मन्यग्नीनारोप्य गृहाद्दिनमभिधानाद्वानप्रस्थाश्रम
मननुष्ठायैव चतुर्थमाश्रमम् अनुतिष्ठेत् एतेन मनुना चातुराश्रम्यस्य समुच्चयोपि दर्शितः श्रुतिर्हि ब्रह्म
एकद्वित्रिचतुराश्रमाणामसमुच्चयो विकल्पस्तथा च जाबालश्रुतिः ब्रह्मचर्यं समाप्य गृही भवेद् गृही
भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेत् यदि वा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा ३८ यो दत्वा सर्व
भूतेभ्यः यः सर्वभूतेभ्यो भूतारक्षेभ्यः स्थावरजंगमेभ्योऽभयं दत्वा गृहादाश्रमात्प्रव्रजति तस्य ब्र
ह्मप्रतिपादकोपनिषन्निष्ठस्य सूर्यलोकरहिता हिरण्यगर्भादिदेवलोका ज्ञानतेजसैव निष्प्रकाशा

एताश्चान्याश्च सेवेत वानप्रस्थो विप्र एता दीक्षा उक्ता नियमानन्यांश्च वानप्रस्थशास्त्रोक्तानभ्यसेत् औपनिषदीश्च श्रुतीरुपनिषत्पठितानि ब्रह्मप्रतिपादकवाक्यानि विविधान्यात्मनो ब्रह्मत्वसिद्धये ग्रंथतोऽर्थतश्चाभ्यसेत् २८ ऋषिभिर्ब्राह्मणैश्चैव यस्मादृषिभिः परमार्थदर्शिभिः परिव्राजकैर्गृहस्थैर्वानप्रस्थैश्च ब्रह्मसाद्वैततत्त्वज्ञानधर्मयोर्वृद्ध्यर्थमुपनिषच्छ्रुतयः सेविताः तस्मादेताः सेवेतेति पूर्वस्यानुवादः २९ अपराजितां वास्थाय अचिकित्स्यव्याध्याद्युपद्रवे अपराजितामैशानीं दिशमाश्रित्याजिह्मगतिर्युक्तो योगनिष्ठो जलानिलाशनः स च आशरीरपाताद्गच्छेत् महाप्रस्थानाख्यशास्त्रविहितं चेदं मरणं तेन न पुरायुषः स्वःकामी न प्रेयादिति श्रुत्यापि न विरोधः यतः स्वःकामिशास्त्रप्रयोगाद्यवैधमरणमनया निषिध्यते न शास्त्री ३० आसां महर्षिचर्याणां एषां

ऋषिभिर्ब्राह्मणैर्वापि गृहस्थैश्चोपसेविताः। विद्यातपोविवृद्ध्यर्थं शरीरस्य विशुद्धये २९
अपराजितां वास्थाय व्रजेद्दिशमजिह्मगः। आनिपाताच्छरीरस्य युक्तो वार्यनिलाशनः ३०
आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुम्। वीतशोकभयो विप्रो ब्रह्मलोके महीयते ३१
वनेषु तु विहृत्यैवं तृतीयं भागमायुषः। चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत् ३२

पूर्वोक्तानामनुष्ठानानामन्यतमेनानुष्ठानेन शरीरं त्यक्त्वा अपगतदुःखभयो ब्रह्मैव लोकस्तत्र पूजां लभते मोक्षं प्राप्नोतीत्यर्थः केवलकर्मणा वानप्रस्थस्य कथं मोक्ष इति चेन्न विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीरित्यनेनास्यात्मज्ञानसंभवात् ३१ यस्मात्तु मरणकारणाभावस्तस्याह वनेषु तु विहृत्यैवं अनियतपरिमाणत्वादायुषस्तृतीयभागस्य तुर्यं यत्नात्तृतीयमायुषो भागमिति रागाद्यभाववृद्धिर्वानप्रस्थकालोपलक्षणार्थं अत एव अत एव याव । लिङ्गितो वनवासाद्धीदृशां तस्य परिणतवयसः परिव्राजमित्याचक्षते एवं वनेषु विहृ । त्य सत्यविधिवृद्धितपोनुष्ठानप्रकारेण वानप्रस्थाश्रमविषयरागो यथा मनागपि कंचित्कालमनुष्ठाय चतुर्थमायुषो भागमिति शेषायुःकालं सर्वविषयसंगान्त्यक्त्वा परिव्रज्या

दृष्टिपूतं न्यसेत्पादं केशास्थ्यादिपरिहारार्थं दृष्टिशोधितं पादं भूमौ प्रक्षिपेत् जलस्थसूक्ष्मजन्त्वादि वारणार्थं वस्त्रशोधितं जलं पिबेत् सत्यपवित्रितां वाचं वदेत् ततश्च मौनेन सह सत्यस्य विकल्पः प्रतिषिद्धसंकल्पशून्यमनस्कः सर्वदा पवित्रतया स्यात् ॥ ४६ ॥ अतिवादांस्तितिक्षेत अतिक्रमवादान् परोक्तान् सहेत न चेमं देहं मास्थिरं व्याध्यायतनं चाश्रित्य तदर्थं केनचित्सह वैरं न कुर्यात् ॥ ४७ ॥ क्रुध्यन्तं न प्रतिक्रुध्येत् सन्तं कोपायक्रुष्टे चित्तं लोपक्रोधे न कुर्यात् निंदितश्चान्येन निंदि नवाचं भद्रं वदेन्न तु निंदेत् सप्तद्वारावकीर्णामिति चक्षुरादीनि पञ्च बुद्धीन्द्रियाणि मनो बुद्धिश्च एतैः कारणैर्ह्यवेद्यानर्थानेतैर्गृहीतेर्थे प्रवाक्प्रवृत्तेरेतानि सप्त वाग्द्वाराणि उच्यन्ते तैरवकीर्णां विवाक्षिप्तां एतद्गृहीतार्थविषयां वाचं न वदेत् किं तु ब्रह्मविषयां वाचं वदेत् न तु मनसैव ब्रह्मोपास ते ब्रह्मादिभिः सर्वार्थस्याग्रहणेपि मनसो व्यापारः तत्कथं सप्तद्वारावकीर्णा विशेषणेपि ब्रह्मविषया वा

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् । सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥ ४६ ॥ अतिवा दांस्तितिक्षेत नावमन्येत कंचन । न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ४७ ॥ क्रुध्यन्तं न प्र तिक्रुध्येदाक्रुष्टः कुशलं वदेत् । सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥ ४८ ॥ अध्यात्म रतिरासीनो निरपेक्षो निरामिषः । आत्मनैव सहायेन सुखार्थी विचरेदिह ॥ ४९ ॥

२२४

चं वदेदिति न विषयान्वदेदिति लभ्यते उच्यते अत एवानृतामिति विशेषणपतिसत्यमनृतमसत्यं वि नाशित्वात् विवर्तविषयां वागप्यनृतेत्युच्यते विनाशिविषयां वाचं नोच्चारयेत् अविनाशिब्रह्मवि षयां तु श्रवणादिरूपां वदेत् गोविंदराजस्तु धर्मार्थः कामो धर्मार्थौ धर्मो धर्मार्थकामाश्च तेनानि सप्त वाग्विषयतया वाक्प्रवृत्तिद्वाराणि तैः प्रकीर्णां विवक्षित्वा सर्वस्य भेदस्यासत्यत्वात् तद्वि षयामसत्यरूपां वाचं न वदेत् अन्ये तु सप्त भुवनानि वाग्विषयत्वात् सप्तद्वाराणि तेषां भेदात् भिन्नाभि ता असत्यतया तद्विषयां वाचमनृतां न वदेत् अन्ये तु सप्त विभक्तय एव वाक्प्रवृत्तेर्द्वाराणि ता भिर्विना वाक्यानिष्पत्तेः तां च प्रायः सत्यकार्यविषयां न वदेत् नोच्चारयेत् किं तु सत्यब्रह्मविषयां वदेत् ॥ ४८ ॥ अध्यात्मरतिरासीनः आत्मानं ब्रह्माधिकृत्य रतिर्यस्यासावध्यात्मरतिः सर्वदा ब्रह्म ध्यानपरः आसीनः इति स्वस्तिकादियोगासनोपविष्टः निरपेक्षो दण्डकमण्डल्वादिष्वपि विशेषापेक्षा

यस्मादण्वपि भूतानां यस्माद्द्विजात्स्वल्पमपि भयं भूतानां न भवति तस्य वर्तमानदेहनाशे कस्माद
पि भयं न भवति ४० अगारादभिनिःक्रान्तः गृहान्निर्गतः पवित्रैः कुशाक्षमंडल्वादिभिर्युक्तः
स्वनिर्मोनी समुपोढेषु केनचित्समक्षसमीपं प्रापितेषु स्वाद्वन्नादिषु विगतस्पृहः परिव्रजेत्
मेधातिथिस्तु पवित्रैर्मंत्रजपैरप्युपचितैः पावनैः कृच्छ्रैः पुन इति व्याख्यातवान् ४१ एक
एव चरेन्नित्यं एकस्य सर्वसंगरहितस्य मोक्षावाप्तिर्भवतीति जानन्नेक एव सर्वदा मोक्षार्थं चरेत्
एकस्यैव मनेन पूर्वपरिचितपुत्रादित्यागदुःखं जायते असहायवानित्युत्तरस्यापि एकाकी यदि चरति
स किंचिन्न परित्यजति न कस्यापि वियोगदुःखमनुभवति नाप्यसौ केनचित्त्यज्यमानोऽपि अन्येन वि
योगदुःखमनुभवति ततश्च सर्वत्र निर्ममत्वेन मुक्तिमाप्नोति ४२ अनग्निरनिकेतः स्या

यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयं तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ४० ।
अगारादभिनिःक्रान्तः पवित्रोपचितो मुनिः समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ४१
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ४२ अ
नग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् उपेक्षकोऽसंकुसुको मुनिर्भावसमाहितः ४३
कपालं वृक्षमूलानि कुचेलमसहायता समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणं ४४ ना
भिनंदेत मरणं नाभिनंदेत जीवितं कालमेव प्रतीक्षेत निर्देशं भृतको यथा ४५

त् अनग्निरिति लौकिकाग्निरहितः शास्त्रीयाग्निसमारोपस्य पूर्वमुक्तत्वादनिकेतो गृहशून्यः उ
पेक्षक इति शरीरस्यापि व्याध्युत्पादे तत्प्रतीकाररहितः असंकुसुकः स्थिरमतिः असंचयिक
इत्यन्ये पठन्ति मुनिर्ब्रह्ममननान्मौनस्य पूर्वमुक्तत्वाद्ब्रह्मणि समाहितः तदेकतानमनाः प्रा
णधारणार्थं न तु रसनाभिलाषार्थं भिक्षार्थमेव ग्रामं प्रविशेत् ४३ कपालं वृक्षमूलानि मृन्मयं कर्परं
भिक्षापात्रं वासार्थं वृक्षमूलानि स्थूलजीर्णवस्त्रकौपीनप्रावरणार्थं एकाकिता सर्वत्र
शत्रुमित्रादिषु समभावः एतन्मुक्तिसाधनतया मुक्तस्य लक्षणं चिह्नं ४४ नाभिनंदेत मर
णं मरणं जीवितं च द्वयमपि न कामयेत किं तु स्वकर्माधीनमरणकालमेव प्रतीक्षेत नि
र्दिष्टपन इति निर्देशो भृतिः तस्याः परिशोधनकालमिव भृतकः ४५

गोचरते हसंवंधादिभिः॥

अलाभेन विषादी स्यात् भिक्षादेरलाभेन विषादी स्याल्लाभे च हर्षं न कुर्यात् प्राणस्थितिमात्रोचितान्न भोजनपरः स्यात् दंडकमंडल्वादिमात्रास्वपि उत्तमशोभनत्वकामी दंडविरक्तो मोक्षादिनकु र्यात् ५६ अभिपूजितलाभांस्तु पूजादिपूर्वकभिक्षादिलाभान्सर्वकालं निंदेत् स्वीकुर्यादिमपः यस्मात्पूजापूर्वकलाभस्वीकारेण मुक्तोऽपि संसारी यतिर्मुक्तोऽपि पतितो भवत्येवं बध्यते ५७ अल्पान्नाभ्य वहारेण आहाराल्पत्वेन निर्जनदेशस्थानादिना च रूपादिविषयैराकृष्यमाणानीन्द्रियाणि निवर्त येद्यस्मात् ५८ इंद्रियाणां निरोधेन इंद्रियाणां निग्रहेण रागद्वेषाभावेन च प्राणिहिंसाविरहे ण च मोक्षयोग्यो भवति ५९ इदानीमिंद्रियविषयप्राप्तिवैराग्याय संसारतत्त्वं चिंतयन्नुपदिशति

अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् प्राणयात्रिकमात्रः स्यान्मात्रासंगाद्विनिर्गतः ५६
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशः अभिपूजितलाभैस्तु यतिर्मुक्तोऽपि बध्यते ५७
अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ह्रियमाणानि विषयैरिंद्रियाणि निवर्तयेत् ५८
इंद्रियाणां निरोधेन रागद्वेषक्षयेण च अहिंसया च भूतानाममृतत्वाय कल्पते ५९ अवे
क्षेत गतीर्नृणां कर्मदोषसमुद्भवाः निरये चैव पतनं यातनाश्च यमक्षये ६० विप्रयोगं
प्रियैश्चैव संयोगं च तथाप्रियैः जरया चाभिभवनं व्याधिभिश्चोपपीडनं ६१ देहादुत्क्रम
णं चास्मात्पुनर्गर्भे च संभवं योनिकोटिसहस्रेषु सृतीश्चास्यांतरात्मनः ६२ अधर्मप्रभ
वं चैव दुःखयोगं शरीरिणां धर्मार्थप्रभवं चैव सुखसंयोगमक्षयं ६३

अवेक्षेत गतीर्नृणां विहिताकरणनिषिद्धाचरणदोषोत्पन्ना मानुषाणां गतीः पश्वादिजन्मप्राप्ती र्नरके च पतनं यमलोके च नरकस्थस्य निग्रहनिरोधताडनादिभवास्तीव्रवेदनाः सृतिपुराणा दिप्रसिद्धा दिदोषैश्चिंतयेत् ६० विप्रयोगमित्यादि इष्टपुत्रादिवियोगमनिष्टैर्हिंसकादिसंयोगं जरयाभि भवनं व्याध्यादिभिश्च पीडनं कर्मदोषसमुद्भवं अनुचिंतयेत् ६१ देहादित्यादि अस्माद्देहादस्यान्त रात्मनः उत्क्रमणं तथा च गर्भे संभवं महारोगैः पतितस्य द्वेष्यादिदोषजनितदुःखं तस्य महतीं वेदनां गर्भेषु चोत्पत्तिं दुःखबहुलां श्वशृगालादिनिकृष्टजातियोनिसहस्रगमनानि च स्वकर्मनिबंधना न्यनुचिंतयेत् ६२ अधर्मप्रभवं चैव शरीरवतां जीवानामधर्महेतुकं दुःखसंबंधं धर्महेतुको

225

उ॰ २२५

नचोत्पातनिमित्ताभ्यां भूकंपाद्युत्पातचक्षुःस्पंदनादिनिमित्तफलकथनेन नक्षत्रयाम्विचीहस्तरेखादेरीदृ
शं फलमिति न चांगविद्यया ईदृशोभावीति मार्गः इत्यं वर्जितव्यमित्यनुशासनेन शास्त्रार्थकथनेन न च
कदाचिद्भिक्षां लब्धुमिच्छेत् ४९ न तापसैर्ब्राह्मणैर्वा वानप्रस्थैरन्यैर्वा ब्राह्मणैरपरैर्वा भिक्षा
शीलैः पक्षिभिः श्वभिर्वा व्याप्तं गृहं भिक्षार्थं न प्रविशेत् ५० क्लृप्तकेशनखश्मश्रुः लूनकेशन
खश्मश्रुर्भिक्षापात्रवान् त्रिदंडी कुसुंभः कमंडलुः रक्तः सर्वप्राणिनो न पीडयन्सर्वदा परिभ्र
मेत् ५१ अतैजसानि पात्राणि सौवर्णादिवर्जितानि अच्छिद्राणि भिक्षोर्भिक्षापात्राणि भ
वेयुः न चाचयमः स्ववर्णं कृष्णपात्रेषु ताम्रकांस्यादिमयेषु च भिक्षां दत्त्वा न धर्मो लिप्यते गृहीत्वा

नचोत्पातनिमित्ताभ्यां न नक्षत्रांगविद्यया नानुशासनविद्याभ्यां भिक्षां लिप्सेत कर्हिचित् ४९
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः आकीर्णं भिक्षुकैर्वान्यैरगारमुपसंव्रजेत् ५०
क्लृप्तकेशनखश्मश्रुः पात्री दंडी कुसुंभवान् विचरेन्नियतो नित्यं सर्वभूतान्यपीडयन् ५१
अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ५२
अलाबुं दारुपात्रं च मृण्मयं वैदलं तथा एतानि यतिपात्राणि मनुः स्वायंभुवोऽब्रवीत् ५३
एककालं चरेद्भैक्षं न प्रसज्जेत विस्तरे भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ५४ विधू
मे सन्नमुसले व्यंगारे भुक्तवज्जने वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ५५

नयकं व्रजेत् तेषां च यतिपात्राणां जलेनैव शुद्धिः यज्ञे चमसानामिव तान्येवदर्शयति ५२ अलाबु
दारुपात्रं च अलाबुदारुमृत्तिकादिवंशादिदलनिर्मितानि यतीनां भिक्षान्नपात्राणि स्वायंभुवो मनुर
वदत् वैदलं तत्त्वांकुर्मितमिति गोविंदराजः ५३ एककालं चरेद्भैक्षं एकवारमेव प्राणरक्षार्थं
भैक्षं चरेत् तत्रापि प्रचुरभिक्षाप्रसंगं न कुर्यात् यतो बहुभिक्षाभक्षणे प्रसक्तो यतिः प्रधानधातुवृ
द्ध्यास्त्र्यादिविषयेष्वपि प्रसज्जते ५४ विधूमे सन्नमुशले विगतपाकधूमे निवृत्तावहननमुशले
निर्वाणपावकांगारे गृहस्थपर्यंतभुक्तवज्जने भोजनोच्छिष्टशरावे प्रसन्ने एषु सर्वदा यतिर्भिक्षार्थं
चरेत् एतत्तु दिनेशापस्मृतेनयसाप्राह्नोपलक्षकं यदाह याज्ञवल्क्यः अप्रमत्तश्चरेद्भैक्षं सा

म॰स्मृ॰
टी॰
२२६

दह्यन्ते ध्मायमानानां धातूनां सुवर्णरजतादीनां यथा मूषिकायामग्निना ध्मायमानानां मलद्रव्यादयो
दह्यन्ते एवं मनसो रागादयश्चक्षुरादेश्च विषयप्रवणत्वादयो दोषाः प्राणायामेन दह्यन्ते एवं सति
७० प्राणायामैर्दहेद्दोषान् एतैरनन्तरोक्तप्रकारैः प्राणायामैः रागादिदोषान्दहेत् अपेक्षितदे
शे परं ब्रह्मादौ मनसो धारणा साधारणेन तत्पापं नाशयेत् प्रत्याहारेण विषयेभ्य इन्द्रिया
णामाकर्षणेन विषयसंपर्कान्वारयेत् ब्रह्मध्यानेन च सोऽहमस्मीति सजातीयप्रत्ययप्रवाहरूपे
णानीश्वरानात्मगुणान् ईश्वरस्य परमात्मनो ये गुणा न भवन्ति क्रोधलोभादयस्तान्निवारयेत् ७१
उच्चावचेषु भूतेषु अस्मज्जीवस्योत्कृष्टापकृष्टेषु देवपश्वादिषु जन्मप्राप्तिमकृतात्मभिः शास्त्रैर
संस्कृतान्तःकरणैर्दुर्ज्ञेयां ध्यानाभ्यासेन सम्यक्कारणिकां जानीयात् ततश्चाविद्याकाम्यनि
षिद्धकर्मनिर्मितेयं गतिरिति ज्ञात्वा ब्रह्मज्ञाने निष्ठो भवेदिति तात्पर्यं ७२ यस्मात् सम्य

226

दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ७०
प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषं प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणा
न् ७१ उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः ध्यानयोगेन संपश्येद्गतिमस्यान्तरात्मनः
सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ७३
अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः

ग्दर्शनसंपन्नः ब्रह्मसाक्षात्कारवान्कर्मभिर्न निबध्यते कर्माणि तस्य उत्तरजन्मने न भवन्तीत्यु
पार्जितपापपुण्यसंबंधस्य ब्रह्मज्ञानेन नाशात् तथा च श्रुतिः तद्यथाइषीकातूलमग्नौ प्रोतं
प्रदूयत एवं हास्य सर्वे पाप्मानः प्रदूयन्त इति श्रुतेस्तथा क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे
इति विधेयश्रुतेः पुण्यसंबंधोपि बाध्यते उत्तरकाले च वेदान्तसूत्रे कर्मणि कृतेपि न पापसंश्ले
षः तथा च श्रुतिः तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापकर्म न श्लिष्यत इति
देहान्तरारंभकपापपुण्यसंबंधः परंन पश्यति एवमेवार्थो ब्रह्ममीमांसायां तदधिगम उत्तरपू
र्वाघयोरश्लेषविनाशौ तद्व्यपदेशादित्यादिसूत्रैर्वादरायणेनाभिहितोपि ब्रह्मसाक्षात्कारस्य

ॐ
२२६

सूक्ष्मतां चान्ववेक्षेत योगेन विषयान्तरव्यावृत्तचित्तवृत्तिनिरोधेन परमात्मनः स्थूलशरीराद्यपेक्षया स्थूलत्वमितिन सूक्ष्मतां निरवयवतां तथोत्कृष्टेषु देवपश्वादिशरीरेषु जीवानां शुभाशुभफलोपभोगार्थमुपपत्तिमधिष्ठातृतामनुचिन्तयेत् ॥६५॥ दूषितोऽपि चरेद्धर्मं यस्मिन्कस्मिंश्चिदाश्रमे स्थितः तत्राश्रमविरुद्धालंकारभूषितोऽप्याश्रमलिङ्गरहितोऽपि सर्वभूतेषु ब्रह्मबुद्ध्या समदृष्टिः स्वधर्ममनुतिष्ठेत् यस्मान्न त्रिदण्डादिलिङ्गधारणमात्रं धर्मकारणं विहितानुष्ठानं तत्र प्रधानं बोध्यं तेन न लिङ्गपरित्यागार्थं ॥६६॥ अत्र दृष्टान्तमाह फलं कतकवृक्षस्य यद्यपि कतकवृक्षस्य फलं जलस्य स्वच्छतासंपादकं तथापि तन्नामोच्चारणमात्रान्न जलं प्रसीदति किंतु फलप्रक्षेपेणैवं न लिङ्गधारणमात्रं धर्मकारणं किंतु विहितानुष्ठानं ॥६७॥ संरक्षणार्थं ज-

सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः। देहेषु चैवोपपत्तिमुत्तमेष्वधमेषु च ॥६५॥
दूषितोऽपि चरेद्धर्मं यत्र तत्राश्रमे स्थितः। समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणं ॥६६॥
फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकं। न नामग्रहणादेव तस्य वारि प्रसीदति ॥६७॥
संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा। शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥६८॥
अह्ना रात्र्या च याञ्जन्तून्हिनस्त्यज्ञानतो यतिः। तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान्षडाचरेत् ॥
प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः। व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥७०॥

न्तूनां शरीरस्यापि पीडायां सूक्ष्मपिपीलिकादिप्राणिरक्षार्थं रात्रौ दिवसे वा सर्वां भूमिं निरीक्ष्य पर्यटेत् शरीरकिं पात्यादिपरिहारार्थं दृष्टिपूतं न्यसेत्पादमित्युक्तेः इदं तु हिंसापरिहारार्थमिति न पुनरुक्तिः ॥६८॥ अज्ञानप्रायश्चित्तमाह अह्ना रात्र्या च यान्जन्तून् यतिरज्ञानतो दिवसे रात्रौ वा प्राणिनो हिनस्ति तद्धननजनितपापनाशार्थं स्नात्वा षट् प्राणायामान्कुर्यात् प्राणायामस्वरूपं च सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह त्रिः पठेदायतप्राणः प्राणायामः स उच्यत इति वसिष्ठवचनं ॥६९॥ प्राणायामा ब्राह्मणस्य ब्राह्मणस्येति यतेर्निर्देशाद्ब्राह्मणजातेरयमुपदेशो न यतेरेव त्रयोऽपि प्राणायामाः सप्तभिर्व्याहृतिभिर्दशभिः प्रणवैर्युक्ता विधिवदिमनेन सावित्र्या शिरसा च युक्ताः पूरककुम्भकरेचकविधिना च कृता ब्राह्मणस्य श्रेष्ठं तपो ज्ञातव्यं पूरकादिस्वरूपं च स्मृत्यन्तरे तदाह योगियाज्ञवल्क्यः नासिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते

प्रियेषु स्वेषु सुकृतं ब्रह्मविदात्मीयेषु प्रियेषु हितकारिषु सुकृतं अप्रियेषु अहितकारिषु दुःकृ
तं निक्षिप्य ध्यानयोगेन निःसंगं ब्रह्माप्नोति ब्रह्मणि लीयते तथा च श्रुतिः तस्य पुत्रा दायमुपयंति सुहृ
दः साधुकृत्यां द्विषंतः पापकृत्यमिति अपरा श्रुतिः तत्सुकृत दुःकृते धुनुते तस्य प्रिया ज्ञातयः सु
कृतमुपयंत्यप्रिया दुःकृतमिति एवमादीन्येव वाक्यान्युदाहृत्य सुकृत दुःकृत योरन्यत्र
संक्रमणे ऽनुपायनं प्रतिज्ञातवद् ब्रह्ममीमांसायां हानौ तूपायनशब्दशेषत्वात्कुशाछंदःस्तुत्यु
पगानवत्तदुक्तमिति आदि सूत्रे बादरायणो मुनिरपि परकीयसुकृत दुःकृतयोः क
थं परत्र संक्रांतिरुच्यते धर्माधर्मव्यवस्था यां शास्त्रमेव प्रमाणं संक्रमोपि तयोः शास्त्रप्रमा
णक एव अतः शास्त्रात्संक्रमणं योग्य एवेति अतः तत्र श्रुत्या स्वेन वा ध्यानं भवति यत्नात्तु मानो

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुःकृतं विसृज्य ध्यानयोगेन ब्रह्माप्नोति सनातनं ७७
यदा भावेन भवति सर्वभावेषु निःस्पृहः तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतं ७८

227

दयः श्रुचिर्नरशिरःकपालं ब्राह्मणस्य गात्रात्कर्षाबवदिति वत् मेध्यातिथिर्गोविंदराजौ तु स्वेषु प्रिये
षु वेतनचित्तत्वेषु ध्यानाभ्यासेनात्मीयं सुकृतं कारणत्वेनारोप्य एवमप्रियेष्वपि वेतनचित्तत्वेष्वात्मी
यमेव दुःकृतं जन्मार्जितं दुःकृतं कारणत्वेन प्रकल्प्योत्तरोत्पन्नं संपादयितारौ धुर्योग प्रीतिरागद्वेषा
भावान्निःसंगब्रह्माप्नोति ब्रह्मभावमुपगच्छतीति व्याचक्षाते तन्नाविसृज्येति क्रियापदं दुःकृतं सुकृत
मिति श्रुत कर्मप्रयोगेन तत्संपादयितारौ विसृज्य तत्कर्माध्याहारात् कर्मद्वये च श्रुतक्रियायोगेन
कारणत्वेन प्रकल्प्य श्रुतक्रियाध्याहारात् किं च आसवाध्यानुवेदाप्यमेव मस्साम्नु श्रुतेः स
म्येन कल्पितं गर्वादर्वाचीनं विवरणं ७७ यदा भावेन भवति यदा परमार्थतो विषयदो
भावनेन सर्वविषयेषु निरभिलाषो भवति तदेहलोके संतोषजन्यं सुखं परलोके च मोक्षसु

अहिंसयेंद्रियासंगैः निषिद्धहिंसावर्जनेनेंद्रियाणां च विषयप्रसंगपरिहारेण वैदिकैश्च नि
त्यैः कर्मभिः काम्यकर्मणां बंधहेतुत्वात्तु तांश्च काम्यांस्त्यक्त्वा न प्रशस्तेन तपसो यथासंभवमु
पवासकृच्छ्रचान्द्रायणादेरनुष्ठानैरिहलोके तत्पदं ब्रह्मसायुज्यापत्तिकालपलक्षणं प्राप्नु
वंति पूर्वश्लोकेन ब्रह्मदर्शनस्य मोक्षहेतुत्वमुक्तमनेन तत्सहकारिकर्मण उक्तमभिहितं
७४ इदानीं मोक्षांतरोपायसंसारवैराग्याय देहस्वरूपमाह जराशोकसमाविष्टं आवासो
गृहं पृथिव्यादिभूतनिर्मितमावासं देहमेव जीवस्य गृहत्वेन निरूपितं त्यजेत् यथा पुनर्देह
संबंधो न भवति तथा कुर्यात् गृहसाम्यमेवाह अस्थीन्येव स्थूणा ऊर्ध्वस्तंभास्तमस्थिस्थू

अहिंसयेंद्रियासंगैर्वैदिकैश्चैव कर्मभिः तपसश्चरणैश्चोग्रैः साधयंतीह तत्पदं ७४
अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनं चर्मावनद्धं दुर्गंधि पूर्णं मूत्रपुरीषयोः ७६
जराशोकसमाविष्टं रोगायतनमातुरं रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ७७
नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा तथा त्यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्यते ७८

णं स्नायुरज्जुभिराबद्धं मांसरुधिराभ्यामुपलिप्तं चर्मच्छादितं मूत्रपुरीषाभ्यां पूर्णमत एव दुर्गं
धि जराशोकाभ्यामाक्रांतं विविधव्याधीनामाश्रयं क्षुत्पिपासापीडितोऽस्मादिकातरं पापे
ण रजोगुणयुक्तं विनश्वरस्वभावं च ७७ नदीकूलं यथा वृक्षं वृक्षो पासकस्सदेहनाशासम
ये मोक्षार्थ्यद्देहस्य कर्मणां भोगेनैव नाशात् तद्देहमक्त्वा द्वैविध्यमाह यः कर्माधी
नं देहपातमपेक्षते स नदीकूलं यथा वृक्षस्त्यजति स्वपातमजानन्निव नदीरयेन पात
लेन तथा देहं त्यजति अन्यः पुनर्ज्ञानकर्मप्रकर्षान्नीषादिवत्स्वाधीनमृत्युः स यथा पक्षी
वृक्षं स्वेच्छया त्यजति तथा देहमिमं त्यजन्संसारकष्टाद्ग्राहादिवज्जलचरप्राणिभेदाद्विमुच्य

मॅ १
१८

अनेनक्रमयोगेन अनेनपूर्वोक्तानुष्ठानक्रमेण यः परिव्रज्यां समाश्रयति स इहलोके पापं विधूय
परं ब्रह्म प्राप्नोति ब्रह्मसाक्षात्कारेण उपाधिलिङ्गशरीरनाशाद् ब्रह्मणैकतां गच्छति ॥८५॥ एषध
र्मोनुशिष्टो वो एष यतीनां संयतात्मनां चतुर्णामपि कुटीचक बहूदक हंस परमहंसानां साधा
रणो धर्मो युष्माकमुक्तः इदानीं तु यतिविशेषाणां कुटीचकाख्यानां वेदविहिताग्निहोत्रा
दिकर्मयोगसाधारणं वक्ष्यमाणं त्रैस्वर्यसद्भावं वसेदिति कर्मसंबंधं शृणुत भारते च च
तुर्धा भिक्षव उक्ताः चतुर्था भिक्षवस्तु सर्वे बहूदककुटीचकौ हंसः परमहंसश्च यो यः प
श्चात्स उत्तम इति कुटीचकस्यायं पुत्रभिक्षाचरणरूपसाधारणकर्मोपदेशः गोविंदराज
स्तु गृहस्थविशेषमेव वेदविहिताग्निहोत्रादिकर्मत्यागेन ज्ञानमात्रसंपादितवैदिकक

अनेनक्रमयोगेनपरिव्रजति योद्विजः । स विधूयेह पापानि परं ब्रह्माधिगच्छति ॥८५॥
एष धर्मोनुशिष्टो वो यतीनां नियतात्मनां । वेदसंन्यासिकानां तु कर्मयोगं निबोधत ॥८६॥
ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतिस्तथा । एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥८७॥

र्माणं वेदसंन्यासिकमाह तत्र गृहस्थस्याहिताग्नेरयं संन्यासविनियोगः चतुर्थाश्रमसमाश्रयणे
न चात्मनि समारोपः शास्त्रेणोच्यते तदुभयाभावे सत्येवमेवाहिताग्नीनां त्यागः स्यात् गो
विंदराजो गृहस्थं वेदसंन्यासिकं ब्रुवन् एवमेवाहिताग्नीनां त्यागमर्थादुपेतवान् वेदसंन्या
सिकं मेधातिथिः प्राह निराश्रमं तन्मते चतुराश्रमनियमोक्तिः कथं भवेत् ॥८६॥ इदानीं वे
दसंन्यासिकस्य प्रतिज्ञातकर्मयोगेनतरं वक्तुमुचितेपि वेदसंन्यासिकः पंचमाश्रमी निरा
श्रमी वा मा त्वापि यतश्चत्वार एवाश्रमा नियता इति दर्शयितुमुक्ताश्रमाननुवदति ब्र
ह्मचारी गृहस्थश्च ब्रह्मचर्यादयो यथा ते पृथगाश्रमा उक्ता ते चत्वार एव गृहस्थज
न्या भवंति ॥८७॥

118

अनेन विधिना सर्वान् पुत्रकलत्रादिषु ममत्वरूपान् सर्वान् संगान् क्रमेण त्यक्त्वा सर्वद्वंद्वैर्मानादिभि र्मुक्तोऽनेन ज्ञानकर्माभ्यासेन ब्रह्मण्येवामेति लयमाप्नोति ८१ ध्यानिकं सर्वमेवैतत् यदेतदिममेत सन्निधानात्सर्वं लोकोऽन्तःपरामृश्यते यदेतदुक्तं पुत्रादिममत्वत्यागो मानापमा नहानिर्ब्रह्मण्येवावस्थानं सर्वमेवैतद्ध्यानिकमात्मनः परमात्मत्वेन ध्याने सति भवति यदा ध्यानेन परमात्मेति जानाति तदा सर्वात्मना न विशिष्यते न तु चैतन्ममत्वं वा मानापमानादिकं वा भवति तथाविधं ज्ञानाद्ब्रह्मात्मत्वं च नाप्नोति ध्यानिकविशेषात् ध्येयविशेषलाभे परमा त्मनैनात्मध्यानार्थमाह नह्यनध्यात्मवित्कश्चिदिति यस्मादात्मानं जीवमधिकृत्य यदुक्तं तस्य परमात्मत्वं तद्योऽन जानाति न ध्यायति स अकृतध्यानः क्रियाफलं ममत्वत्यागमानाप

> अनेन विधिना सर्वांस्त्यक्त्वा संगान् शनैः शनैः । सर्वद्वंद्वैर्विनिर्मुक्तो ब्रह्मण्येवावतिष्ठते
> ध्यानिकं सर्वमेवैतद्यदेतदभिशब्दितं । न ह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते ८२
> अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च । आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ८३
> इदं शरणमज्ञानामिदमेव विजानतां । इदमन्विच्छतां स्वर्गमिदमानन्त्यमिच्छतां ८४

मानहानिमोक्षं च प्राप्नोति ८२ अधियज्ञं ब्रह्म जपेत् पूर्वं ब्रह्मध्यानरूपमुपासनमुक्तं इदानीं तदंगतया वेदजपं विधत्ते तथा च श्रुतिः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती ति अत्राविद्यमानं यज्ञतया वेदजपमनुपदिशति यज्ञमधिकृत्य स यत्कर्मकं ब्रह्म वेदं तथा देवा नामधिकृत्य प्रवृत्तं तथा जीवमधिकृत्य तथा वेदान्तेषूक्तं सत्यं ज्ञानमनन्तं ब्रह्म इत्यादि ब्र ह्मप्रतिपादकं सर्वदा जपेत् ८३ यस्मात् इदं शरणमज्ञानां इदं वेदाख्यं ब्रह्म तदर्था नभिज्ञानामपि शरणं गतिः पापक्षयहेतुत्वात् वेदार्थाभिज्ञानां स्वर्ग मपवर्गं वेच्छतामिदमेव शरणं तदुपायोपदेशकत्वेन तत्सन्निहितत्वात् ८४

म-स्मृ-
टी-
११५

दशलक्षणानि धर्मस्य ये ब्राह्मणा एतानि दश धर्मस्वरूपाणि पठन्ति पठित्वा चार्थज्ञानसहायेनानु।
तिष्ठन्ति ते ब्रह्मज्ञानप्रकर्षात्परमां गतिं मोक्षलक्षणां प्राप्नुवन्ति ॥ ९२ ॥ दशलक्षणकं धर्ममिति। दशल।
क्षणकं धर्ममनुतिष्ठन्समाहितः वेदान्तं विधिवत् श्रुत्वा संन्यसेदनृणो द्विज उक्तं दशलक्षण
कं धर्मं संयतमनाः सन्ननुतिष्ठन्नुपनिषदर्थं गृहस्थावस्थायां यथोक्ताध्ययनधर्मानृणकः।
माता दैवपित्र्यपरिशोधनदेवादिऋणत्रयः संन्यासमनुतिष्ठेत् ॥ ९३ ॥ संन्यस्य सर्वकर्माणि
सर्वाणि गृहस्थानुष्ठेयान्यग्निहोत्रादिकर्माणि परित्यज्याज्ञानकृतवधादिकर्मजनितपापानि च प्रा
णायामादिना विनाशयन्नियतेन्द्रिय उपनिषदो ग्रन्थतोऽर्थतश्चाभ्यस्य पुत्रैश्वर्ये इति पुत्रगृहे पुत्रोप

दशलक्षणानि धर्मस्य ये विप्राः समधीयते । अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ॥ ९२ ॥ द
शलक्षणकं धर्ममनुतिष्ठन्समाहितः । वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ॥ ९३ ॥
संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन् । नियतो वेदमभ्यस्य पुत्रैश्वर्ये सुखं वसेत् ॥ ९४ ॥
एवं संन्यस्य कर्माणि स्वकार्यपरमोऽस्पृहः । संन्यासेनापहत्यैनः प्राप्नोति परमां गतिम् ॥
एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः । पुण्योऽक्षयफलः प्रेत्य राज्ञां धर्मं निबोधत ॥ ९५ ॥

इति मानवे धर्मशास्त्रे षष्ठोऽध्यायः ॥ ६ ॥

कल्पितभोजनाच्छादनत्वेन वृत्तिचिन्तारहितः सुखं वसेत् अयमेवासाधारणो धर्मः कुटी
चकस्योक्तः इदमेव वेदसंन्यासिनामिति पूर्वमुक्तं ॥ ९३ ॥ एवं संन्यस्य कर्माणि एवमुक्तप्रकारे
ण वर्तमानोऽग्निहोत्रादीनि परित्यज्य आत्ममात्रसाक्षात्कारस्वकार्यप्रधानः स्वर्गादावपि वैतृष्ण्यहे
तया निस्पृहः संन्यासेन पापविनाशपूर्वकब्रह्मसाक्षात्कारेण परमां गतिं मोक्षलक्षणां प्राप्नोति ॥ ९४ ॥
एष वोऽभिहितो धर्मः ऋषीन्संबोध्योच्यते एष युष्माकं ब्राह्मणसंबन्धिक्रियाकलापरूपो ध
र्मस्तस्यैव ब्रह्मचारिगृहस्थवानप्रस्थयतिभेदेन चतुर्विधः परत्राक्षयफलपुण्यप्रदश्च इ
दानीं राजसंबन्धिनं धर्मं शृणुतेत्यत्र श्लोके ब्राह्मणस्य चातुराश्रम्योपदेशाद्ब्राह्मणः प्रव्रजेद्गृहा
दिति पूर्वमभिधानाद्ब्राह्मणस्यैव प्रव्रज्येति श्रुतिर्ब्राह्मणस्यैव संन्यासेऽधिकारः ॥ ९५ ॥ इति मनु

टी-
११५

सर्वेऽपि क्रमशस्त्वेते एते सर्वेऽपि चत्वारोऽप्याश्रमाः शास्त्रानुक्रमेणानुष्ठिता अपि शास्त्रोक्तमोक्षदा वे-
दोऽपि यथोक्तानुष्ठातारं विप्रं मोक्षलक्षणां गतिं प्रापयंति ८८ प्रकृतवेदसंन्यासिकस्य गृ-
हस्थस्य त्रैवर्णिकस्य तदर्थं गृहस्थोत्कर्षमाह सर्वेषामेव चैतेषां सर्वेषामेतेषां ब्रह्मच-
र्यादीनां मध्ये गृहस्थस्य स्वरूपमाणवेदेन प्रायशोऽग्निहोत्रादिकर्मविधानाद्गृहस्थो मन्वादि-
भिः श्रेष्ठ उच्यते तथा यस्माद्ब्रह्मचारिवनस्थयतीन् भिक्षादानेन पोषयति तेनाप्यसौ श्रे-
ष्ठः यथोक्तं यस्मात्त्रीनप्याश्रमिणोऽन्नादानेन बिभर्ति अर्हति ८९ यथा नदीनदाः सर्वे यथा सर्वे
नदीनदाः गाङ्गशोणाद्याः समुद्रे स्थितिं लभंते एवं गृहस्थादितरे सर्वाश्रमिणः तदधीन-
त्वाद्गृहस्थसमीपे संस्थितिं लभंते ९० चतुर्भिरपि चैवैतैः एतैर्ब्रह्मचर्यादिभिराश्रमि-

सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रं निषेविताः यथोक्तकारिणं विप्रं नयंति परमां गतिं
सर्वेषामपि चैतेषां वेदस्मृतिविधानतः गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्ति हि ८९
यथा नदीनदाः सर्वे सागरे यांति संस्थितिं तथैवाश्रमिणः सर्वे गृहस्थे यांति संस्थितिं ९०
चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ९१
धृतिः क्षमा दमोऽस्तेयं शौचमिंद्रियनिग्रहः धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणं

भिश्चतुर्भिरपि द्विजातिभिर्वक्ष्यमाणो दशविधस्वरूपो धर्मः प्रयत्नतः सततमनुष्ठेयः ९१
तमेव स्वरूपतः संख्यातश्च दर्शयति धृतिः क्षमा दमोऽस्तेयं संतोषो धृतिः परेणापकारे कृ-
तेऽतस्य प्रत्यपकारानाचरणं क्षमा विषादहेतुविषयसन्निधानेऽपि अविक्रियत्वं मनःस्थिरं दमः
मनसो दमनं दमनं वचनात् शीतातपद्वंद्वसहिष्णुता दम इति गोविंदराजः अन्यायेन परध-
नग्रहणं स्तेयं तदभावः यथाशास्त्रं मृज्जलाभ्यां देहशोधनं शौचं बाह्यविषयेभ्यश्च-
क्षुरादीनां वारणमिंद्रियनिग्रहः शास्त्रार्थतत्त्वज्ञानं विद्या यथार्थाभिधानं सत्यं क्रोधहेतौ स-
त्यपि क्रोधानुत्पत्तिरक्रोधः एतद्दशविधं धर्मस्वरूपं ९२

म॰ स्मृ॰ टी॰ १२०

यस्मादेषां सुरेन्द्राणां यस्मादिन्द्रादीनां देवश्रेष्ठानामंशेभ्यो नृपतिः सृष्टः तस्मादेष सर्वप्राणि। नो वीर्येणाभिभवति ५ तपत्यादित्यवच्चैषः अयं च राजा स्वतेजसा सूर्य इव पश्यतां चक्षूंषि मनां सि च संतापयति न चैनं राजानं पृथिव्यां कश्चिदप्यभिमुखेन वीक्षितुं शक्नोति ६ सोऽग्निर्भव। तिवायुश्च एवं चाग्न्यादीनां पूर्वोक्तानामंशभवत्वात् तत्कार्यकारित्वात् तत्तायं पुनः स्तेजस्वी मादिनान वमाध्याये वक्ष्यमाणत्वात् राज्ञा घातनातिशयेनाग्न्यादिस्वरूपो भवति ७ ततश्च बालोऽपि ना वमन्तव्यो मनुष्य इति बुद्ध्या बालोऽपि राजा नावमन्तव्यः यस्मान्महतीयं काचिद्देवता मानु। षरूपेणावतिष्ठते एतेन देवतावज्ञायामधर्मोदयाद्दृष्टदोष उक्तः ८ सम्प्रति दृष्टदो

यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः तस्मादभिभवत्येष सर्वभूतानि तेजसा ५
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुं ६ सोऽग्नि
र्भवति वायुश्च सोऽर्कः सोमः स धर्मराट् स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ७
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः महती देवता ह्येषा नररूपेण तिष्ठति ८
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणं कुलं दहति राजाग्निः सपशुद्रव्यसंचयं ९ कार्यं सो
ऽवेक्ष्य शक्तिं च देशकालौ च तत्त्वतः कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः १०

यस्मात् एकमेव दहत्यग्निः अग्नेरतिसमीपमनवहितः सन्नुपसर्पति स दुरुपसर्पी तमेवाग्निर्दह ति तस्मादधिकं क्रुद्धोऽग्निरिव राजाग्निः पुत्रदारभ्रात्रादिरूपं कुलमेव गवाश्वादिपशुसुवर्णादिध नसंचयसहितमपराधस्पृहं ९ कार्यं सोऽवेक्ष्य शक्तिं च स राजा प्रयोजनमपेक्ष्य स्वशक्तिं देश कालौ चावेक्ष्य कार्यसिद्ध्यर्थं तत्तत्तो विश्वरूपं बहूनि रूपाणि करोति ज्ञातिविवक्षया वच नं अशक्तिदशायां क्षमते शक्तिप्राप्तावुन्मूलयति एवं कस्मिन्नपि देशे काले प्रयोजनानुरोधेन शत्रुर्वा मित्रं वा उदासीनो वा भवति अतो राजवत्सुभो ह स्मि इति बुद्ध्या नावज्ञेयः १०

120

मु॰ १२०

राजधर्मान्प्रवक्ष्यामि धर्मशब्दोयमिह शास्त्रोपदेशनपरः षाड्गुण्यादेरपि वक्ष्यमाणत्वात् राजशब्दोपि नात्र क्षत्रियजातिवचनः किं त्वभिषिक्तजनपदपुरपालनकर्तृपुरुषवचनः अत एवाह यथा वृत्तो भवेन्नृप इति यथाचारो नृपतिर्भवेत्तथा तत्सर्वं वक्ष्यामि यथा येन प्रकारेण राज्ञा न मन्त्रजन्मशरीरादिना तस्योत्पत्तिः यथा च तस्य दृष्टादृष्टसंपत्तिस्तथा वक्ष्यामि १ ब्राह्मं प्राप्ते न संस्कारं ब्रह्मवेदस्तस्याध्ययनमुपनयनसंस्कारं यथाशास्त्रं प्राप्तवता क्षत्रियेण सर्वस्य विषयावस्थितस्य यथाशास्त्रानुसारेण नियमतो रक्षणं कर्तव्यं तेन क्षत्रिय एव मुख्यो राज्याधिकारीति दर्शितं अत एव शास्त्रान्तरभूतं क्षत्रियस्य जीवनार्थं तथा क्षत्रियस्य रक्षणं स्वकर्म श्रेष्ठं वक्ष्यति ब्राह्मणस्यापदि जीवेत्क्षत्रियधर्मेणेत्यभिधास्यति क्षत्रियस्य वैश्यधर्मेणापि क्ष

राजधर्मान्प्रवक्ष्यामि यथावृत्तो भवेन्नृपः संभवश्च यथा तस्य सिद्धिश्च परमा यथा १
ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणं २ अ
राजके हि लोकेस्मिन्सर्वतो विद्रुते भयात् रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ३
इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ४

त्रियधर्मस्मृतस्य च क्षत्रियवैश्यकर्मणा जीवेदित्यापदि जीवनार्थं नारदः न कथंचन कुर्वीत ब्राह्मणः कर्म वार्षलं वृषलः कर्म वा ब्राह्मं पतनीये हि ते तयोः उत्कृष्टं चापकृष्टं च तयोः कर्म न विद्यते मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते रक्षणं वेदधर्माणां तपः क्षत्रस्य रक्षणं सर्वतो धर्मषड्भागो राज्ञो भवति रक्षितः इति वक्ष्यमाणत्वात् रक्षन्बलिषड्भागप्रदर्शी नादृष्टार्थमपि यो रक्षन्बलिमादत्त इति नरकपातं वक्ष्यति २ अराजके हि लोकेस्मिन् यस्माद्राजके जगति बलवद्भयात्सर्वतः प्रचलिते सर्वस्यास्य चराचरस्य रक्षायै ब्रह्मा राजानं सृष्टवान् तस्मात्तेन रक्षणं कार्यं ३ कथं सृष्टवानित्याह इन्द्रानिलयमार्काणां इन्द्रवातयमसूर्याग्निवरुणचन्द्रकुबेराणां मात्राः अंशाः सारभूताः समाहृत्य राजानम

म. स्मृ. टी. २२२

स राजा पुरुषो दंडः स एव दंडो वस्तुतो राजा न तस्मिन्सति राजपुमान् नियोगात्सः एवं पुरुषः अतोन्ये स्त्रि
यश्च तत्स्वविधेयत्वात्स एव नेता तेन कार्याणि नीयंते प्राप्यंते निर्णीयंते इति यावत् स एव शासिता याथा
स्तनमतान्ज्ञात्वा स एव चतुर्णामाश्रमाणां यो धर्मस्तस्य संपादने प्रतिभूर्विप्रतिभूर्मुनिभिः स्मृतः
१७. दंडः शास्ति प्रजाः सर्वाः यस्माद्दंडः सर्वाः प्रजाः आज्ञाकारयति तस्मात्स एव प्रजा रक्षति तस्मा
च्छक्तः सुप्तो राजेति निद्राणोऽपि रक्षितेषु दंड एव जागर्ति तद्भयेन चोरादीनामप्रवृत्तेः दंडमेव
धर्महेतुत्वाद्धर्मं जानंति कारणे कार्योपचारः ऐहिकपारत्रिकदंडभयादेव धर्मानुष्ठाना

स राजा पुरुषो दंडः स नेता शासिता च सः चतुर्णां चाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः १७
दंडः शास्ति प्रजाः सर्वाः दंड एवाभिरक्षति दंडः सुप्तेषु जागर्ति दंडं धर्मं विदुर्बुधाः १८
समीक्ष्य स धृतः सम्यक् सर्वा रंजयति प्रजाः असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः १९
यदि न प्रणयेद्राजा दंडं दंड्येष्वतंद्रितः शूले मत्स्यानिव पक्ष्यन्दुर्बलान्बलवत्तराः २०

१

त् १८ समीक्ष्य स धृतः सम्यक् स दंडः शास्त्रतः सम्यक् रूप्यापराधानुसारेण देहधनादिषु कृ
तः सर्वाः प्रजाः सानुरागाः करोति अविचार्य तत्तु लोभादिना प्रयुक्तः सर्वाणि राज्यांगप्रजादीनि
नाशयति सर्वतः इति द्वितीयार्धे तात्पर्यः १९ यदि न प्रणयेद्राजा यदि राजाऽनलसो भूत्वा दंडप्र
णयनं न कुर्यात्तदा शूले कृत्वा मत्स्यानिव बलवत्तरो दुर्बलान् पचेरन् दुर्बलस्य विधातो रूपमिदं
बलिनो मदबलानां हिंसात्मकं करिष्यंतीति भावः शूलेन मत्स्यानिवापक्ष्यन्निति मेधातिथिगोविंदरा
जलिखितपाठः जले मत्स्यानिवाहिंस्युरिति पाठांतरं तत्र बलवंतो दुर्बलान्हिंस्युरिति मत्स्यन्याय

उ. २२२

221

यस्य प्रसादे पद्माश्रीः पद्मा शब्दः श्रीपर्यायोपि महत्त्वविवक्षया त्र प्रयुक्तः यस्य प्रसादे सति महती। श्रीर्भवति अतः श्रीकामेन सेव्यः यस्य शत्रवः संति तान्पराक्रमेण हंति ततश्च शत्रुवधकामेनाप्या राधनीयः यस्मै क्रुध्यति तस्य मृत्युं करोति तस्माज्जीवनार्थिनाऽनक्रोधनीयः यस्मात्सर्वेषां सोमय मसूर्यादीनां तेजो बिभर्ति ११ तं यस्तु द्वेष्टि संमोहात् तं राजानमज्ञानाद्यो यो द्वेष्टि तस्यासौ प्रीति मृत्यादयति स निश्चितं राजक्रोधान्नश्यति तस्मान्नस्य विनाशाय यथोक्तं राजा मनो नियुंक्ते १२ तस्मादिमादि यतः सर्वतेजो नृपतिस्तस्मादयं हितेषु यमिष्टं शास्त्रानुष्टेयं शास्त्राविरुद्धं निश्चित्य व्यवस्थापयति अनयेष्वितेष्वनिष्टं तं नियमं नातिक्रामेत् १३ तस्यार्थे सर्वभूता

यस्य प्रसादे पद्माश्रीर्विजयश्च पराक्रमे मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ११।
तं यस्तु द्वेष्टि संमोहात्स विनश्यत्यसंशयं तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः १२।
तस्माद्धर्मं यमिष्टेषु स व्यवस्येन्नराधिपः अनिष्टं चाप्यनिष्टेषु तं धर्मं न विचारयेत् १३।
तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजं ब्रह्मतेजोमयं दंडमसृजत्पूर्वमीश्वरः १४।
तस्य सर्वाणि भूतानि स्थावराणि चराणि च भयाद्भोगाय कल्पंते स्वधर्मान्न चलंति च १५
तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्त्वतः यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु १६

नां तस्य राज्ञः प्रयोजनसिद्धये सर्वप्राणिनां रक्षितारं धर्मं तत्स्वरूपं पुत्रं ब्रह्मणो यः केवलं तेजस्ते नानिर्मितं न पांचभौतिकदेहं ब्रह्मा पूर्वं सृष्टवान् १४ तस्य सर्वाणि भूतानि तस्य दंडस्य भयेन चराचराः सर्वप्राणिनः भोगं कर्तुं समर्था भवंति अन्यथा बलवता दुर्बलस्य धनदारादिग्र हणे तस्यापि तदपेक्षया बलिनेति कस्यापि भोगो न सिध्येत् वृक्षादीनामपि स्थावराणां छेदने भोगासिद्धिः तथा सतामपि नित्यनैमित्तिकस्वधर्मानुष्ठानप्रकर्षो यान्यथा तेन भयाच्चलंति १५ तं देशकालौ शक्तिं च तं दंडं देशकालौ च दंड्यस्य शक्तिं विद्यादिकं यस्मिन्नपराधे योऽर्ह तीत्यादिकं शास्त्रानुसारेण तत्त्वतो निरूप्यापराधिषु प्रवर्तयेत् १६

न-स्मृ- टी- १२२

तस्याहुः संप्रणेतारं तस्य दण्डस्य प्रवर्तयितारं अभिषेकादिगुणयुक्तं नृपतिमवितथवादिनं विमृश्य
कारिणं तत्कालतद्विचारोचितप्रज्ञायुक्तं धर्मार्थकामानां ज्ञातारं मन्वादयः आहुः २६ तं रा
जा प्रणयन्सम्यक् तं दण्डं राजा सम्यक् प्रवर्तयन् धर्मार्थकामैर्वृद्धिं गच्छति यः पुनर्विषयाभि
लाषी विषमः कोपनः क्षुद्रः छिद्रान्वेषी नृपतिः स प्रकृतेनैव दण्डेन आत्मादिना कोपादधु
र्माद्वा विनश्यति २७ दण्डो हि सुमहत्तेजो यतो दण्डः प्रकृष्टतेजः स्वरूपस्तेन शास्त्रैरसंस्कृ
तात्मभिर्दुःखेन ध्रियते राजधर्मरहितं नृपमेव पुत्रदारादिबन्धुसहितं नाशयति २८ ततो

तस्याहुः संप्रणेतारं राजानं सत्यवादिनं समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदं २६
तं राजा प्रणयन्सम्यक् त्रिवर्गेणाभिवर्द्धते कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते २७
दण्डो हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः धर्माद्विचलितं हन्ति नृपमेव सबान्धवं २८
ततो दुर्गं च राष्ट्रं च लोकं च सचराचरं अन्तरिक्षगतांश्चैव मुनीन्देवांश्च पीडयेत् २९
सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च ३०
शुचिना सत्यसंधेन यथाशास्त्रानुसारिणा प्रणेतुं शक्यते दण्डः सुसहायेन धीमता ३१

दुर्गं च राष्ट्रं च दोषाय नयपेक्षया यो दण्डः क्रियते स सर्वं भुवं नृपनाशानन्तरं धन्वादि दुर्गं राष्ट्रं
देशं पृथिवीलोकं जंगमस्थावरसहितं हविःप्रदानजीवका देवा ऋषिप्रभृतयस्तस्य दानाभा
वेऽन्तरीक्षगतांश्च देवान्ऋषीनपि पीडयति २९ सोऽसहायेन मूढेन स दण्डो मन्त्रिपुरोहित
सेनापत्यादिसहायरहितेन मूर्खेण लोभवता शास्त्रासंस्कृतबुद्धिना विषयपरेण नृप
तिना शास्त्रतो न प्रणेतुं शक्यते ३० शुचिना सत्यसंधेन अर्थादिशौचयुक्तेन सत्यप्रति
ज्ञेन यथाशास्त्रव्यवहारिणा शोभनसहायेन तत्त्वज्ञेन दण्डः कर्तुं शक्यत इति पूर्वोक्तं।
दोषप्रतिपत्तिगुणाश्च नेतृत्वेन उक्ताः ३१

दं- १२२

122

अद्यात्काकः पुरोडाशं यदि राजा दंडं न कारयिष्यत्तदा यज्ञे पुरोडाशं यवाद्विरचिते हविः काकः पुरोडा
शमत्स्यादिष्यत् तथा कुक्कुरः पायसादि हविरवलेक्ष्यत् न कस्यचित् स्वाम्यमभविष्यत् तो बलिना
ततः स्वामित्वं ब्राह्मणादिवर्णानां च मध्ये प्रवर्धनं अशूद्रादि नेर्दैवात्तरं प्रधानं प्रावर्तिष्यत
२१ सर्वो दंडजितो लोके सर्वोपि लोको दंडेनैव नियमितः सन्मार्गे वर्तते स्वभावविशुद्धो हि मानुषः कष्टेनैव लभ्यते तथा सर्वमिदं जगद्दंडस्यैव भयाद्भवपक्षभोजनादि
रूपोपि भोगः समर्थो भवति २२ देवदानवगंधर्व रक्षमपि दंडस्य भोगसंपादकत्वेदा
न्तार्पणेनोच्यते इंद्राग्निसूर्यादयो देवता तथा दानवगंधर्वराक्षसपक्षिसर्पाश्च पिजगा

अद्यात्काकः पुरोडाशं श्वावलिह्याद्धविस्तथा स्वाम्यं च न स्यात्कस्मिंश्चित्प्रवर्तेताधरोत्तरं
सर्वो दंडजितो लोको दुर्लभो हि शुचिर्नरः दंडस्य हि भयात्सर्वं जगद्भोगाय कल्पते २२
देवदानवगंधर्वा रक्षांसि पतगोरगाः तेपि भोगाय कल्पंते दंडेनैव निपीडिताः २३
दुष्येयुः सर्ववर्णाश्च भिद्येरन्सर्वसेतवः सर्वलोकप्रकोपश्च भवेद्दंडस्य विभ्रमात् २४
यत्र श्यामो लोहिताक्षो दंडश्चरति पापहा प्रजास्तत्र न मुह्यंति नेता चेत्साधु पश्यति २५

दीश्वरपरमात्मभयपीडिताः एवं वर्षदानादिपुरुषकारापश्यं तं तथा च श्रुतिः भयादस्याग्नि
स्तपति भयात्तपति सूर्यः भयादिन्द्रश्च वायुश्च मृत्युर्धावति पंचमः २३ दुष्येयुः सर्ववर्
णाश्च दंडस्याचरणे स्वचित्तेनवाप्रवर्तेनात्सर्वे ब्राह्मणादिवर्णा इतरेतरस्त्रीसं
गमनेन संकीर्णेरन् सर्वे सेतवः शास्त्रीयनियमाश्च तद्वर्णफलाद्युत्तीर्णेयुः चौरसाहसिकाद्युप
द्रवापकारात्सर्वलोकसंक्षोभश्च जायते २४ यत्र श्यामो लोहिताक्षो यत्र देशे श्यामः
सुश्यामाण्यगात्रः श्यामवर्णो लोहिताक्षः पिंगाक्षो देवताको दंडो विचरति तत्र प्रजा
न व्याकुली भवंति दंडप्रणेता यदि विषयानुरूपं सम्यग्दंडं करोति २५

तेभ्योऽधिगच्छेद्विनयं सहजप्रज्ञया पूर्णशास्त्रादिज्ञानेन च विनीतोऽपि शास्त्रार्थे तेभ्यो विनयमभ्यस्येद्यस्मा
द्विनीतिप्रधानो राजा न कदाचिन्नश्यति ३९ बहवोऽविनयान्नष्टा करितुरगकोषादिपरिच्छदयुक्ता
अपि बहवो राजानोऽविनयाद्विनाशं गताः बहवश्च वनस्थानिः परिच्छदा अपि विनयेन राज्यानि प्राप्नु
वन् ४० उभयत्रैव श्लोकद्वयेन दृष्टान्तमाह वेनो विनष्टोऽविनयात् वेनो नहुषश्च राजापि यवन
पुत्रः सुदासनामा सुमुखो निमिश्चाविनयाद्विनष्टः ४१ पृथुस्तु विनयाद्राज्यं पृथुर्मनुश्च
विनयाद्राज्यं प्राप्तवान् कुबेरश्च धनाधिपत्यं लेभे गाधिपुत्रश्च विश्वामित्रः क्षत्रियः सन्नतेनैव
देहेन ब्राह्मण्यं प्राप्तवान् राज्यत्वाभावेऽपि ब्राह्मण्यप्राप्तिः प्रस्तुतापि नयोत्कर्षार्थमुक्ता इह
शार्यं शास्त्रानुष्ठाननिषिद्धवर्जनरूपो विनयोपपादनेन क्षत्रियेणापि दुर्लभं ब्राह्मण्यं लेभे ४२

तेभ्योऽधिगच्छेद्विनयं विनयात्मापि नित्यशः। विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित्॥
बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः। वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे॥ ४०
वेनो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः। सुदाः पैजवनश्चैव सुमुखो निमिरेव च॥ ४१
पृथुस्तु विनयाद्राज्यं प्राप्तवान्मनुरेव च। कुबेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः॥ ४२
त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्। आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः॥ ४३
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्। जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः॥ ४४

त्रैविद्येभ्यस्त्रयीं विद्यात् त्रिवेदी त्रैविद्या विप्राः त्रिवेदीमर्थतोऽर्थपाठतश्चाभ्यसेत् ब्रह्मचर्यदशा
यामेव वेदग्रहणात् समावृत्तस्य राज्याधिकारादभ्यासार्थोऽयमुपदेशः दण्डनीतिं चार्थशास्त्रविद्यो
पयोगात्तदुपदेशनीतिशास्त्रनीतिपारंपर्यागततेन नित्यां तद्विभ्योऽधिगच्छेत् तथान्वीक्षिकीं तर्कविद्यां भू
ताद्युक्तिउपयोगिनीं ब्रह्मविद्यां चाभ्युदयप्रशमनयोर्हर्षविषादप्रशमहेतुं शिक्षेत कृषिवाणिज्यपशु
पालनादिवार्तारम्भांश्च धनोपायार्थांस्तदभिज्ञकर्षकादिभ्यः शिक्षेत ४३ इन्द्रियाणां जये
योगं चक्षुरादीन्द्रियाणां विषयासक्तिनिवारणे सर्वकालं यत्नं कुर्याद्यस्माज्जितेन्द्रियः प्रजा नियन्तुं
शक्नोति न तु विषयोपभोगव्यग्रतया ब्रह्मचारिधर्मेषु सर्वत्र रूपाद्यर्थापायतयाभिहितोऽपीन्द्रि

स्वराष्ट्रे न्यायवृत्तः स्यात् आत्मदेशे यथाशास्त्रव्यवहारी स्यात् शत्रुविषयेषु समर्थतीव्रदंडो।
भवेत् निसर्गस्निग्धविषयेषु मित्रेषु अकुटिलः स्यात् कार्यमित्रेषु ब्राह्मणेषु क्षमतास्यापरा।
धेषु क्षमावान्भवेत् ३२ एवंवृत्तस्य नृपतेः शिलोञ्छेन क्षीणकोषत्वं विवर्त्तितं क्षीण
कोषस्यापि नृपतेरुक्ताचारवतो जले तैलविंदुरिव कीर्त्तिर्लोके विस्तरयति ३३ अतस्तु
विपरीतस्य उक्ताचाराविपरीताचारवतो नृपतेरर्जितं द्रविणं जले घृतविंदुरिव कीर्त्ति
र्लोके संकोचमेति ३४ स्वेस्वे धर्मे निविष्टानां क्रमेण स्वधर्मानुष्ठातॄणां ब्राह्मणादिव।
र्णानां ब्रह्मचर्याद्याश्रमिणां च विश्वस्य जगतो राजा रक्षिता सृष्टः तस्मात्तेषां रक्षणमकुर्वतः

स्वराष्ट्रे न्यायवृत्तिः स्याद्भृशदंडश्च शत्रुषु सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः
एवंवृत्तस्य नृपतेः शिलोञ्छेनापि जीवतः विस्तीर्यते यशो लोके तैलबिंदुरिवांभसि ३३
स्वेस्वे धर्मे निविष्टानां सर्वेषामनुपूर्वशः वर्णानामाश्रमाणां च राजा सृष्टोऽभिरक्षिता ३४
तेन यद्यत्सभृत्येन कर्त्तव्यं रक्षता प्रजाः तत्तद्वोऽहं प्रवक्ष्यामि यथावदनुपूर्वशः ३५ वृ
द्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन् वृद्धसेवी हि सततं रक्षोभिरभिपूज्यते ३६

प्रत्यवायो राज्ञः धर्मविरहितानां रक्षणेपि न दोष इति तात्पर्यं ३५ तेन यद्यत्सभृत्येन व
क्ष्यमाणविधानार्थं श्लोकः तेन राज्ञा प्रजा रक्षणं कुर्वता सामात्येन यद्यत्कार्यं तत्सर्वं यु
ष्माकमभिधास्यामि ३६ ब्राह्मणान्पर्युपासीत प्रातरुत्थाय यद्ब्राह्मणान्त्रय
न्तुः सामाख्यविद्यात्रयं ये जानंति तान्विद्वत्तमानिति शास्त्राभिज्ञान्सेवेत तदाज्ञां कुर्यात्
३७ वृद्धांश्च नित्यं सेवेत तान्ब्राह्मणान्तपस्तपसादिवृद्धान् धर्म्मतो यं पूतश्च वेदज्ञा।
न्विहितं तत्प्रयोजनं दानाच्च शीघ्रं संसेवेत यस्माद्यो वृद्धसेवी सोऽत्यंतं हि रक्षोभिरपि राक्षसैः
पूज्यते रपि तत्सहितं क्रियते सततं मनुष्यैः ३८

मनु· टी· २२५

सप्तकस्यास्य वर्गस्य अक्षपानादेः कामक्रोधजव्यसनपरिमाणस्य सर्वस्मिन्नेव राजमण्डले प्राप्येणाव । स्थित इत्यर्थः पूर्वं व्यसनमुत्तरोत्तरात्कष्टतरं प्रशस्तात्मा राजा जानीयात् तथाहि द्यूताक्षानां कष्टतरं मद्यपानेन मत्तस्य संज्ञानाशाद् यथेष्टचेष्टया देहधनादिविरोधरूपमादपो दोषाः द्यूते तु पाक्षयुग्मतिः स्त्रीव्यसने पुनरपत्योत्पादनादिगुणयोगोऽपि मृगयायां स्त्रीव्यसनयोरपि स्त्रीव्यसनं कष्टतरं मृगयायां तु व्यायामेनारोग्यादिगुणा । त्रादर्शनं काले कालातिपातेन धर्मलोपादयो दोषाः मृगयायां तु व्यायामेनारोग्यादिगुणाः कोपाद्यपि एवं कामजव्यसनस्य पूर्वं पूर्वं गुरुतरं दोषं क्रोधजेष्वपि त्रिषु वाक्पारुष्याद्दण्डपारुष्यं कोपादिसमाधानं लाभाकाङ्क्षया कोपानलोदानमानपानीयसेकेन शाम्यः पूर्वं गोभेदादेरशाक्यसमाधानत्वात् तत्कालाकाङ्क्षादोषवन्मम पीडाकरवाक्प्रहारस्य दुःखस्य किमुत नाशमपि वै अर्थदूषणाद्वाक्पारुष्याद्दोषवन्नम अतः शाक्यसमाधानेन एवं क्रोधजनिकस्यापि पूर्वं यत्न इति वाक्पारुष्यपारुष्यात् पदत्वरूपं दानात् शाक्यसमाधानेन एवं क्रोधजनिकस्यापि पूर्वं यत्न

सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषङ्गिणः । पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मवान् ॥ ५२ ॥ व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते । व्यसन्यधोऽधो व्रजति स्वर्यात्यव्यसनी मृतः ॥ ५३ ॥ मौलाञ्छास्त्रविदः शूराँल्लब्धलक्षान्कुलोद्गतान् । सचिवान्सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान् ॥ ५४ ॥ अपि यत्सुकरं कर्म तदप्येकेन दुष्करं । विशेषतोऽसहायेन किम्नु ॥

तोऽदुष्करं त्यजेत् ॥ ५३ ॥ व्यसनस्य च मृत्योश्च मध्ये व्यसनं मृत्युव्यसने द्वे अपीह लोके संज्ञाप्रणाशादिदुःखहेतुतया शास्त्रानुष्ठानविरोधितया च तत्स्येतयापि व्यसनं कष्टतरं परत्रापि नरकहेतुत्वात् व्यसन्यधोऽधो व्रजति बहून् नरकान् गच्छतीत्यर्थः अव्यसनी तु मृतः शास्त्रानुष्ठानप्रतिपत्त्या व्यसनाभावात्स्वर्गं गच्छति एतेन सततं व्यसनेषु निषिध्यते न तु कादाचित्सेवनमपि ॥ ५४ ॥ मौलाञ्छास्त्रविदः शूरान् मौलान्पितृपितामहक्रमेण सेवकान् तेषामपि द्रोहादिनाव्यभिचार वारणार्थं शास्त्रविदः दृष्टादृष्टार्थशास्त्रज्ञान् विक्रान्तान् लब्धलक्षान् अस्त्रादिप्रयोगे अच्युतशरत्वादीन् अभिजातान् सुविदग्धान् तदर्थम् शुद्धकुलभवान् दैवतास्पर्शादिना निर्णीतान् मन्त्रिणः सप्ताष्टौ वा मन्त्रादि कुर्वीत यस्मात् ॥ ५५ ॥ अपि यत्सुकरं कर्म सहायेन विक्रियते यत्कर्म तदप्येकेन दुष्करं भवति विशेषतो यत्महाफलं तत्कथमसहायेन क्रियं

224

मु· २२५

दश कामसमुत्थानि दश कामसंभवानि तथाष्टौ क्रोधजानि च वक्ष्यमाणानि व्यसनानि प्रयत्नेन त्यजेत्
दुरंतानि दुःखावसानानि श्रेयसो व्यसयंति भ्रंशयंति दुःखानि कुर्वंति यद्वा दुर्लभोंतो येषां तानि दुरंतानि न
हि व्यसनिनस्तानि निवर्तयितुं शक्यं ४५ वर्जने प्रयोजनमाह कामजेषु प्रसक्तो हि यस्मात्कामज
नितेषु व्यसनेषु प्रसक्तो राजा धर्मार्थाभ्यां हीयते क्रोधजेषु प्रसक्तः प्रकृतिकोपाद्देहनाशं प्राप्नोति
४६ तानि व्यसनानि नामतो दर्शयति मृगयाक्षा दिवास्वापः आखेटकाद्यो मृगवधो मृगया
अक्षादिक्रीडाश्च द्यूतं सकलकार्यविघातिनी दिवानिद्रा परदोषकथनं स्त्रीसंभोगः मद्यपानज
नितो मदः तौर्यत्रिकं नृत्यगीतवादित्राणि वृथाभ्रमणं एष दशपरिमाणो दशकः सुखेच्छाभ्रम
णो गणः ४७ पैशुन्यं साहसं द्रोहः पैशुन्यमविज्ञातदोषस्य दोषाविष्करणं साहसं साधोर्बंधनादि

दश कामसमुत्थानि तथाष्टौ क्रोधजानि च व्यसनानि दुरंतानि प्रयत्नेन विवर्जयेत् ४५
कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः वियुज्यतेर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ४६
मृगयाक्षा दिवास्वापः परिवादः स्त्रियो मदः तौर्यत्रिकं वृथाट्या च कामजो दशको गणः
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणं वाग्दंडजं च पारुष्यं क्रोधजोपि गणोष्टकः ४८
द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ४९
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमं एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ५०
दंडस्य पातनं चैव वाक्पारुष्यार्थदूषणे क्रोधजेपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ५१

निग्रहः द्रोहः छद्मवधः ईर्ष्या अन्यगुणासहिष्णुता परगुणेषु दोषाविष्करणं असूया अर्थदूष
णमर्थानामपहरणं देयानामदानं च वाक्पारुष्यमाक्रोशादि दंडपारुष्यं ताडनादि एषोष्टप
रिमाणो व्यसनगणः क्रोधाद्भवति ४८ द्वयोरप्येतयोर्मूलं एतयोर्द्वयोरपि कामक्रोधजव्य
सनवर्गयोः कारणं स्मृतिकारा जानंति तं लोभं प्रयत्नेन त्यजेत् यस्मादेतद्गणद्वयं लोभाज्जा
यते कांचिद्धनलोभतः कश्चित्कामांतराद्विलोभेन प्रवर्तते ४९ पानमक्षाः स्त्रियश्चैव
मद्यपानमक्षैः क्रीडा स्त्रीसंभोगो मृगया च यथाक्रमपठितमेतच्चतुष्कं कामजव्यसनमध्ये
बहुदोषत्वादतिशयेन दुःखहेतुं जानीयात् ५० दंडस्य पातनं चैव दंडपातनं वाक्पारु
ष्यमर्थदूषणं चेति क्रोधजव्यसनगणे दोषबहुत्वादतिशयदुःखसाधनं मन्येत ५१

का॰ सू॰
टी॰
१२५

तेषां मध्ये नियुञ्जीत तेषां सचिवानां मध्ये विक्रान्तान् शूरान् कुलोद्गतान् प्राणियमितान् शुचीनर्थे । प्र-
निःस्पृहान् धनोत्पत्तिस्थानेषु नियोजयेत् अर्थे वोदाहरणं माकरकर्मान्त इति आकरेषु सुवर्णा-
द्युत्पत्तिस्थानेषु कर्मान्तेषु उद्धान्यादिसंग्रहस्थानेषु अन्तर्निवेशने भोजनशयनगृहान्तः-
पुरादौ भीरून् नियुञ्जीत शूरा हि तु राजानं प्रायेणैकाकिनं दृष्ट्वा तं वा कदाचिदुपचारकुपि-
ता हन्युरपि ५३ इत्थमेव प्रकुर्वीत इत्थं चैव दृष्टादृष्टार्थकुशलं शास्त्रज्ञं इङ्गितमभिप्रायसूच-
कं वचनस्वरादि आकारो देहधर्मो मुखप्रसादवैवर्ण्यादिरूपः श्रीमत्प्रीतिसूचकः चेष्टाक-
रास्फालनादिक्रिया कोपादिसूचिका तदीयतत्त्वज्ञं अर्थादानशीलं व्यसनाभावात्मकयौ-
वनयुक्तं चलं कुलीनं कुर्वीत यस्मात् ५४ अनुरक्तः शुचिर्दक्षः जनेषु अनुरागवान् तेन प्र-

तेषां मध्ये नियुञ्जीत शूरान् दान्तान् कुलोद्गतान् । शुचीनाकरकर्मान्ते भीरूनन्तर्निवेशने ॥ ५३ ॥
इत्थमेव प्रकुर्वीत सर्वशास्त्रविशारदं । इङ्गिताकारचेष्टाज्ञं शुचिं दक्षं कुलोद्गतं ॥ ५४ ॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित् । वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च । नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्पुरं ॥ ५८ ॥ स-
र्वेणात्र प्रयत्नेन गिरिदुर्गं समाश्रयेत् । एषां हि बहुगुण्येन गिरिदुर्गं विशिष्यते ॥ ५७ ॥

तिराजादेः पक्षे विषयः अर्थस्त्रीशौचयुक्तः तेन धनस्त्रीदम्भादिनाऽभेद्यः दक्षश्चतुरः
तेन कार्यकालं नातिक्रामति स्मृतिमान् तेन संदेशं न विस्मरति देशकालज्ञस्तेन देशकाल-
ज्ञो न्यूनमपि संदिष्टं देशकालोचितमन्यथाकरोति वपुष्मान् तेनादेयवचनः वीतभयस्तेना-
प्रियमपि संदेशं अपि वक्ता वाग्मी तेन संस्कृतप्राकृतादियुक्तिप्रयुक्तिक्षमः एवंविधो दूतो राज्ञः
प्रशस्तो भवति ५६ अमात्ये दण्डआयत्तो अमात्ये सेनापत्यो हस्त्यश्वरथपदातात्मको दण्ड
आयत्तः तदिच्छयानुकार्यं प्रवृत्तेः विनयो योग्यताहेतुर्नयक्रियाया विनयः स दण्डआयत्तः नृप-
तावर्थं संचयस्थानं देशावासयन्तो राजा पराधीनो न कर्तव्यः स्वयमेव चिन्तनीयं धनं ग्राममश्व-
इत्येते संधिविग्रहाविति तदिच्छयानुवर्तते ५८ इत एव हि संधत्ते यस्मादित एव भिन्नानां
संधिसंपादने क्षमः संहतानां च भेदेन तथा परदेशादितस्ततो गं करोति येन संहतानामभि-

३.
१२५

125

तैः सार्द्धं चिंतयेन्नित्यं तैः सचिवैः सह सामान्यं यत्तेषूपनीयं संधिविग्रहादि तन्निरूपयेत् तथा तिष्ठत्यनेनेति स्थानं दंडकोशपुरराष्ट्रात्मकं चतुर्विधं तच्चिंतयेत् दंड्यतेऽनेनेति दंडो हस्त्यश्वरथपदातयः तेषां पोषणरक्षणादि तच्चिंतयेत् कोशो धननिचयः तस्यापव्ययादिपरिरक्षणादि राष्ट्रं देशस्तद्धानिमनुष्यपश्वादिधारणक्षमत्वादि चिंतयेत् तथा समुदयं समुदेत्यस्मादिति समुदयो धान्यहिरण्याद्युत्पत्तिस्थानं तन्निरूपयेत् तथा गुप्तिं रक्षामात्मनो राष्ट्रगतां च सुपरीक्षितमंत्राद्यमात्यपरीक्षितान्तःपुरपरिजनादिना स्वरक्षणं राष्ट्रसंग्रहे नित्यमिमादिना राष्ट्ररक्षणं च लब्धस्य धनस्य प्रशमनानि सत्पात्रप्रतिपादनानीत्यादि च चिंतयेद्दत्तानि च जितानां संपूजयेद्देवानिति ५७ तेषां स्वं स्वमभिप्रायं तेषां सचिवानां रहसि

> तैः सार्द्धं चिंतयेन्नित्यं सामान्यं संधिविग्रहं । स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च
> तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक्पृथक् । समस्तानां च कार्येषु विदध्याद्धितमात्मनः
> सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता । मंत्रयेत्परमं मंत्रं राजा षाड्गुण्यसंयुतं ५९ नित्यं तस्मिन्समाश्वस्तः सर्वकार्याणि निक्षिपेत् । तेन सार्द्धं विनिश्चित्य ततः कर्म समारभेत्
> अन्यानपि प्रकुर्वीत शुचीन्प्राज्ञानवस्थितान् । सम्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान्
> निर्वर्तेतास्य यावद्भिरितिकर्तव्यता नृभिः । तावतोऽतंद्रितान्दक्षान्प्रकुर्वीत विचक्षणान्

निष्पत्तिर्यत्तत्रयाहृदयगतभावज्ञानसंभवात्तत्प्रत्येकमभिप्रायं ह्युपास्य भार्यां समस्तानामपि युगपदभिप्रायं बुद्ध्वा कार्येषु यदात्मनि हितं तत्कुर्यात् ५८ सर्वेषां तु विशिष्टेन एषामेव सर्वेषां सचिवानां मध्यादुत्तमेन धार्मिकत्वादिना विशिष्टेन विदुषा ब्राह्मणेन सह संधिविग्रहादिवक्ष्यमाणगुणषट्कोपेतं प्रकृष्टं मंत्रं चिंतयेत् ५९ नित्यं तस्मिन्समाश्वस्तः सर्वदा तस्मिन्ब्राह्मणे संजातविश्वासो भूत्वा यानि नाममनाकुर्यात्तानि सर्वकार्याणि समर्पयेत्तेन सह विनिश्चित्य सर्वं कर्मारभेत् ६० अन्यानपि प्रकुर्वीत अन्यानप्यर्थादानादिषु शुचीन्प्रज्ञाशालिनः स्थिरान्सम्यग्धनार्जनशीलान्धर्माद्युपधापरीक्षितानमात्यान्कुर्यात् ६१ निर्वर्तेतास्य यावद्भिः अस्य राज्ञो यावत्संख्याकैर्मनुष्यैः कर्मजातं संपद्यते तत्संख्याकानतंद्रितानालस्य

त्रीण्याद्यानीत्यादि एतेषां दुर्गाणां मध्यात्प्रथमोक्तानि त्रीणि दुर्गाणि मृगादयश्चाश्रिताः तत्र धन्वदुर्गं मृगैराश्रितं महीदुर्गं गर्ताश्रितैर्मूषिकादिभिः अब्दुर्गं जलचरैर्नक्रादिभिः उत्तराणि त्रीणि वृक्षदुर्गादीनि वानरादयश्चाश्रिताः तत्र वृक्षदुर्गं वानरैराश्रितं नृदुर्गं मनुष्यैः गिरिदुर्गं देवैः ७२ यथेत्यादि यथैतान्दुर्गवासिनो मृगादीन्व्याधादयः शत्रवो न हिंसन्ति एवं दुर्गाश्रितं राजानं शत्रवः ७३ एक इत्यादि यस्मादेको धनुर्धरः प्राकारस्थः शत्रूणां शतं योधयति शतं च प्राकारस्थधानुष्काणां शत्रूणां दशसहस्राणि तस्माद्दुर्गकरणमुपदिश्यते ७४ तत्स्यादायुधेत्यादि तद्दुर्गं खड्गाद्यायुधसुवर्णादिधनधान्यादिकवद्वगादिवाहनब्राह्मणभक्ष्यादिशिल्पयन्त्रयवसो-

त्रीण्याद्यान्याश्रितास्त्वेषां मृगगर्ताश्रयाप्चराः । त्रीण्युत्तराणि क्रमशः प्लवंगमनरामराः ।
यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः । तथारयो न हिंसन्ति नृपं दुर्गसमाश्रितं ७५
एकः शतं योधयति प्राकारस्थो धनुर्धरः । शतं दशसहस्राणि तस्माद्दुर्गं विधीयते ७४
तत्स्यादायुधसंपन्नं धनधान्येन वाहनैः । ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ७६
तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः । गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितं ७७
तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्वितां । कुले महति संभूतां हृद्यां रूपगुणान्वितां ७८
पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजः । तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च ७९
यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः । धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च ८०

दकसंपूर्णं स्यात् ७५ तस्येत्यादि तस्य दुर्गस्य मध्ये सुपर्याप्तं पृथक्पृथक्स्त्रीगृहदेवागाराद्युक्शालादियुक्तं परितो प्राकारादिगुप्तं सर्वर्तुकं फलपुष्पादियोगेन सर्वत्र सुधाधवलितं वाप्यादिजलयुक्तं वृक्षान्वितमात्मनो गृहं कारयेत् ७६ तदित्यादि तद्गृहमाश्रित्य समानवर्णां शुभलक्षणां महाकुलप्रसूतां मनोहारिणीं रूपगुणवतीं भार्यामुद्वहेत् ७७ पुरोहितं चेत्यादि पुरोहितं चाथर्ववेदविदं कुर्वीत ऋत्विजं च वृणुयात् ते चास्य राज्ञो गृह्योक्तानि जैवातपायानि कर्माणि कुर्युः ७८ यजेतेत्यादि राजा बहुप्रकारान्क्रतून्दक्षिणान् अश्वमेधादियज्ञान्कुर्यात् ब्राह्मणेभ्यश्च स्त्रीगृहशय्यादीन्भोगान्सुवर्णादीनि धनानि धर्मार्थं दद्यात् ८०

126

कृतस्य कार्यान्तरमाह सविद्यादिति सकृत्यो परराजस्य कर्तव्यो य आकारमिङ्गितं चेष्टां जानीयात् निगू
ढानुचराः प्रतिपक्षनृपस्यैव परिजनाः तस्मिन्नियुक्तास्तत्सन्निधावर्पिते तेषामिङ्गितचेष्टितैः भृत्येषु तु
च्य कृत्यं क्रियमाणेषु परराजस्य कर्तुमीप्सितं जानीयात् ६८ वृद्धांश्चेत्यादि उक्तलक्षणवृद्धद्वारे
ण प्रतिपक्षराजस्य कर्तुमिष्टं सर्वतस्तत्त्वतो ज्ञात्वा तथा प्रयत्नं कुर्यात् यथात्मनः पीडा न भवेत् ६९
जाङ्गलमित्यादिना अल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः स ज्ञेयो जाङ्गलो देश इति देशविदो विदुः
इदं यद्यपि तथाप्यत्र समोदकतृणादिदेशो जाङ्गलशब्देनाभिधीयते तं देशं वक्ष्यमाणादिसंपन्नं प्रचु
रधार्मिकजनं रोगोपसर्गादिरहितं कुलफलपुष्पतरुलतादिमनोहरं प्रणतसमीपवासिराजकं विका
दिजनैस्तु लभ्यकृषिवाणिज्यादिजीवनमाश्रितमावासं कुर्यात् ७० धन्वदुर्गमित्यादि धन्वदुर्गमहीं

सविद्यादस्य कृत्येषु निगूढेङ्गितचेष्टितैः आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितं ६८
तथा प्रयत्नमातिष्ठेद्यथात्मानं न पीडयेत् वृद्धांश्च सर्वतस्तेन परराजचिकीर्षितं ६९
जाङ्गलं सस्यसंपूर्णमार्यप्रायमनाविलं रम्यमानतसामन्तं स्वाश्रितं देशमाचरेत् ७०
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्सुखं ७१ स
र्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् एषां हि वाक्यगुण्येन गिरिदुर्गं विशिष्यते ७२

ये चतुर्दिशं पंचयोजनमनुदकं महीदुर्गं पाषाणेन इष्टकेन वा विस्तारादुच्छ्रायेण द्वादशहस्त
स्त्रायुक्तेन युद्धार्थमपरिभ्रमणयोग्येन प्राकारेण गवाक्षादियुक्तेन युद्धार्थमुपप्राकारेण वे
ष्टितमब्दुर्गमगाधस्वोदकेन सर्वतः परिवृतं वार्क्षदुर्गं वहिः सर्वतो योजनमात्रव्याप्तिष्टम्महा
वृक्षकण्टकिगुल्मलताव्याचितं नृदुर्गं चतुर्दिगवस्थापितहस्त्यश्वरथयुक्तबहुपदातिरक्षितं गिरि
दुर्गं पर्वतपृष्ठमतिदुरारोहं सकटेकमार्गोपेतं मतनेद्दीप्रस्रवणाद्युदकयुक्तं वहुसस्योत्पत्तिक्षे
त्रवृक्षान्वितं एतेषु मध्यादन्यतमं दुर्गमाश्रित्य सुखं निवसेत् ७१ सर्वेणेत्यादि यस्मादेषां
दुर्गाणां मध्याद्दुर्गगुणैव तेन गिरिदुर्गमतिरिच्यते तस्मात्सर्वप्रयत्नेन तमाश्रयेत् दुर्गं द
तदुरारोधात्मत्र्व देशादल्पप्रयत्नेन प्रेतशिलादिना वहुविपक्षसैन्यव्यापादनमिमादयो

म॰ स्मृ॰
टी॰
१२२

227

पात्रस्यहीत्यादि विद्यातपोयुक्तपात्रापात्रस्यतारतम्यमवेक्ष्यसात्त्विकयेतिश्रद्धया यथाः श्रद्धा
यालोरतम्यपात्रमासाद्य दानस्याल्पं वा बहु वा फलं लभ्यते ८६ समोत्तमेत्यादि समबलेनाधि
धिकबलेन च राज्ञा युद्धार्थमाहूतः राजा प्रजारक्षणं कुर्वन् युद्धान्न निवर्तेत क्षत्रियेण युद्धार्थ
माहूतस्तेनावश्यं योद्धव्यमिति क्षात्रधर्मं स्मरन् ८७ यस्मात् संग्रामेष्वित्यादि युद्धे परा
ङ्मुखत्वं प्रजानां रक्षणं ब्राह्मणपरिचर्या चेत्यादिकमेतद्राज्ञामतिशयितं श्रेय इत्यादि श्रेयस्या
नेश्रय एव ८८ आहवेष्विति राजानो मिथः स्पर्द्धमाना युद्धेऽन्योन्यं हन्तुमिच्छन्तः प्रकृ
ष्टया शक्त्या संमुखीभूय युध्यमानाः स्वर्गं गच्छन्ति यद्यपि युद्धस्य शत्रुजयप्रधानलाभो

पात्रस्य हि विशेषेण श्रद्दधानतयैव च । अल्पं वा बहु वा प्रेत्य दानस्यावाप्यते फलं ८६
समोत्तमाधमै राजा त्वाहूतः पालयन् प्रजाः । न निवर्तेत संग्रामात् क्षात्रं धर्ममनुस्मरन् ८७
संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनं । शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परं ८८
आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः । युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ८९
न कूटैरायुधैर्हन्यात् युध्यमानो रणे रिपून् । न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ९०
न च हन्यात् स्थलारूढं न क्लीबं न कृताञ्जलिं । न मुक्तकेशं नासीनं न तवास्मीति वादिनं ९१
न सुप्तं न विसन्नाहं न नग्नं न निरायुधं । नायुध्यमानं पश्यन्तं न परेण समागतं ९२
नायुधव्यसनप्राप्तं नार्त्तं नातिपरिक्षितं । न भीतं न परावृत्तं सतां धर्ममनुस्मरन् ९३

दिष्टं दृष्टफलं न स्वर्गः तथापि युद्धाश्रितापराङ्मुखत्वनियमस्य स्वर्गः फलमित्यदोषः ८९
न कूटैरित्यादि कूटान्यायुधानि यानि बहिः काष्ठादिमयानि अन्तर्गूढनिशितशस्त्राणि तैः
समरे युध्यमानः शत्रून् हन्यात् नापि कर्णाकारफलकैर्बाणैर्नापि विषाक्तैः नाप्यग्निप्रदीप्तफल
कैः ९० न चेति स्वयं रथस्थो रथत्यक्तं स्थलारूढं न हन्यात् न पण्डं न पुंसकं बद्धाञ्जलिं मुक्त
केशं समुपविष्टं तवाहमस्मीति एवं वादिनं न हन्यात् ९१ न सुप्तमित्यादि सुप्तं त्यक्तसन्नाहं
विवस्त्रमनायुधं अयुध्यमानं प्रेक्षकमन्येन सह युध्यमानं न हन्यात् ९२ नायुधेत्या
दि भग्नखड्गाद्यायुधं पुत्रशोकादिभिरार्त्तं बहुप्रकाराक्षतं भीतं युद्धपराङ्मुखं विशिष्टं न।

उ॰
१२२

सांवत्सरिकमित्यादि राजा सम्यैरमात्यैर्वर्षग्रासं धान्यादिभागमानयेत् लोके च करादिग्रहणे शास्त्रनिष्ठः स्यात् स्वदेशवासिनरेषु पितृवत्स्नेहादिना वर्तेत ८१ अध्यक्षानित्यादि तत्र तत्र हस्त्यश्वरथपदात्यादि स्थानेष्वध्यक्षाननेकान्विविधान्पृथक्पृथक् विपश्चितः कर्मकुशलान्कुर्यात् ते चास्य राज्ञस्ते षु हस्त्यश्वादिस्थानेषु मनुष्याणां कुर्वतां सर्वाणि कार्याणि सम्यक्कारणार्थमवेक्षेरन् ८२ आवृत्ता नामित्यादि गुरुकुलान्निवृत्तानामधीतवेदानां गार्हस्थ्यार्थिनां नियमेन भोजनधनधान्यादिना पूजां कुर्यात् यस्माद्योयं ब्राह्मणेषु स्थापितो धनादिर्निधिरिव निधिः सोऽक्षयो मोक्षफलवा हवि नाशी राज्ञां शास्त्रेण प्रतिपाद्यते ८३ अत एव न तमित्यादि तं ब्राह्मणस्थापितं निधिं न चौरा ना पि शत्रवो हरन्ति अन्यनिधिवत् भूम्यादिस्थापितस्य स्थानभ्रंशाददर्शनमपैति तस्माद्योयमक्षयो

सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिं स्याच्चाम्नायपरो लोके वर्तेत पितृवन्नृषु ८१ अ
ध्यक्षान्विविधान्कुर्यात्तत्र तत्र विपश्चितः तेऽस्य सर्वाण्यवेक्षेरन्नृणां कार्याणि कुर्वतां ८२
आवृत्तानां गुरुकुलाद्विप्राणां पूजको भवेत् नृपाणामक्षयो ह्येष निधिर्ब्राह्मो विधीयते
न तं स्तेना न चामित्रा हरन्ति न च नश्यति तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ८४
न स्कन्दते न व्यथते न विनश्यति कर्हिचित् वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतं ८५
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे अधीते शतसाहस्रमनन्तं वेदपारगे ८६

अनन्तफलो निधिरिव निधिरक्षयो राज्ञा ब्राह्मणेषु निधातव्यः तेभ्यो देय इत्यर्थः किंच ८४ न स्कन्दत इत्यादि अग्निहोत्रहविर्यद्धूयते तत्स्कन्धतेः धः स्रवति पतति वा व्यथते शुष्यति वा विह हादिना नश्यति ब्राह्मणमुखे यद्धुतं पाण्यास्यो हि द्विजः स्मृत इति ब्राह्मणहस्त एव मुखत्वेन दत्त मित्यर्थः तस्य नोक्तदोषास्तस्मादग्निहोत्रादिभ्यः श्रेष्ठं ब्राह्मणसंप्रदानमित्यर्थः ८५ सममित्यादि ब्रा ह्मणेतरे क्षत्रियादिविषये यद्दानं तत्समफलं यस्य देयद्रव्यस्य यत्फलं ततो नाधिकं न च न्यूनं तद्भव ति यो ब्राह्मणः क्रियारहितः आत्मानं ब्राह्मणमिति ब्रवीति स ब्राह्मणब्रुवः तद्विषयं दानं पू र्वापेक्षया द्विगुणफलं प्राधीते ब्राह्मणाध्यायेन लक्षगुणफलं समस्तशाखाध्यायिन्यनन्तफ लं सहस्रगुणमाचार्य इति वा तत्तो पपाठः ८६

म-स्मृ-
टी-
२२७

अलब्धमिति अजितं भूहिरण्यादि दण्डेन लब्धुमिच्छेत् जितं प्रयत्नतो रक्षेत् रक्षितं वाणिज्यादिना वर्द्धयेत्
वृद्धं च पात्रे प्रमोदयात् १९९ एतदिति एतच्चतुर्विधं चतुःप्रकारं पुरुषार्थः स्वर्गादि तत्प्रयोजनं
यस्य तदेवं रूपं विजानीयात् ततो नलसः सन् सर्वदास्यानुष्ठानं सम्यक्कुर्यात् २०० अलब्धमित्यादि
अलब्धं यत्तद् दण्डस्वरूपं यदात्मा तत्वेन दण्डेन जेतुमिच्छेत् जितं च प्रत्यवेक्षणेन रक्षेत् रक्षितं च
वृद्ध्युपायेन स्थलजलपथवाणिज्यादिना वर्द्धयेत् वृद्धं यथोचितविभागेन पात्रे प्रमोदयात्
२०१ नित्यमिति नित्यं दण्डो हस्त्यश्वादि उद्यतो यस्य स तथा स्यात् नित्यं प्रका-
शीकृतं पौरुषादिगोचरं मत्रं विद्याप्रकाशादिना पौरुषं यस्य स तथा स्यात् नित्यं संवृतं संवरणी-
यं मत्रं चारचेष्टितं यस्य स तथा स्यात् नित्यं च परेषाममात्यादिरूपछिद्रानुसंधानपरः स्यात् २०२।

अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत् ९९
एतच्चतुर्विधं विद्यात्पुरुषार्थप्रयोजनं अस्य नित्यमनुष्ठानं सम्यक्कुर्यादतन्द्रितः १००
अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया रक्षितं वर्द्धयेद्वृद्ध्या वृद्धं दानेन निःक्षिपेत्
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः नित्यं संवृतसंवार्यो नित्यं छिद्रानुसार्यरेः
नित्यमुद्यतदण्डस्य कृत्स्नमुद्विजते जगत् तस्मात्सर्वाणि भूतानि दण्डेनैव प्रसाधयेत् ३
अमाययैव वर्त्तेत न कथंचन मायया बुध्येतारिप्रयुक्तां च मायां नित्यं स्वसंवृतः ४
नास्य छिद्रं परो विद्याद्विद्याच्छिद्रं परस्य तु गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ५

128

नित्यमिति यस्य नित्यमुद्यतो दण्डस्तस्य जगदुद्विजते इति तस्मात्सर्वप्राणिनो दण्डेनैवात्मसात्कु-
र्यात् ३ अमाययेति मायया छद्मना अमात्यादिषु न प्रवर्त्तेत यस्मात्तु सर्वेषामविश्वस-
नीयः स्यात् किंतु धर्मरक्षार्थं मायया तथ्यैव न वञ्चयेत् परप्रयुक्तां मायां प्रकृति-
भेदादिरूपां मायां चारद्वारेण जानीयात् ४ नास्येति तथा यतेत यथास्य परः प्रकृतिभे-
दादिरूपं छिद्रं शत्रुर्न जानाति परस्य तु प्रकृतिभेदादिरूपं चारैर्जानीयात् यथा कूर्मो नि-
जान्यङ्गानि गोपायति एवं राज्याङ्गान्यमात्यादीनि दानसन्मानादि-
नात्मसात्कुर्यात् दैवाच्च प्रकृतिभेदादिरूपे छिद्रे जाते यत्नतः प्रतीकारं

म
३ं-
११५

मस्त्विमादि यस्तु योधो भीतः पराङ्मुखः सन्युद्धे शत्रुभिर्हन्यते स योधस्यैकर्तुः प्रभोर्दुष्कृतं तत्सर्वं प्राप्नोति शास्त्रप्रमाणकेयं ह्येतदुःकृतेच यथा शास्त्रं संक्रमणे योग्य एव सिध्यतः अतएव उपजीव्य शास्त्रेणैवाबाधात् न प्रतिपत्ताव्यमानाद्योपिय एतच्च युद्धेऽप्रियेऽहतं तमिमत्राविष्णुतमस्मा भिः पराङ्मुखे हतस्य सामार्थमेतद्धि वचिति न तस्य प्रभुपापं स्यादिति गोविन्दराजकः मेधाति थिस्त्वर्थवादमात्रमेतत्र त्वरूपपत्रमन्येनेतद्युपपन्नं व्यक्रमनर्थवर्जनात् अन्यदीयपुण्यपा पेऽप्रविष्टस्यात्र संक्रामत इति शास्त्रप्रामाण्यादेवं तद्वत्कृतावादायणेन निर्णीतो सुमर्थ इति यथोक्तमेवास्मर्णीयम् ९४ यच्चेति पराङ्मुखे हतस्य यत्किंचित्तत्परलोकार्थमने नार्जितं सुकृतं तत्सर्वं भर्तृर्लभते ९५ रथाश्वेति राज्ञः स्वामितां सर्वधनग्रहणे प्राप्ते तद पवादार्थमाह रथाश्वहस्तिच्छत्रवस्त्रादिधनधान्यगवादिस्त्रियः सर्वाणि द्रव्याणि गुडलव

यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः यत्किंचिद्दुःकृतं भर्तुस्तत्सर्वं प्रतिपद्यते ९४
यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितं भर्तातत्सर्वमादत्ते परावृत्तहतस्य च ९५
रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून्स्त्रियः सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तत् ९६
राज्ञे च दद्युरुद्धारमित्येषा वैदिकी श्रुतिः राज्ञा च सर्वयोधेभ्यो दातव्यमपृथग्जितं ९७
एषोऽनुपस्कृतः धर्मः योधधर्मः सनातनः अस्माद्धर्मान्न च्यवेत क्षत्रियो घ्नन्रणे रिपून्

लवणादीनि कुप्यं च सुवर्णरजतव्यतिरिक्तं ताम्रादिधनं यः पृथग्जितवान् तस्य तदेव भ वति सुवर्णरजतभूमिरत्नादिपुस्तकधनं तु राज्ञ एव समर्पणीयमिति तदर्थमेव परिगणितं ९६ अतए व चाह राज्ञ इति उद्धारं योद्धारो राज्ञे दद्युः धनाद्युद्धृत्य उद्धारः जितधनादुत्कृष्टोत्कृष्टं धनं सुवर्ण रजतभूम्यादि राज्ञे समर्पणीयं कवितरथादिवाहनमपि राज्ञे देयं वाहनं राज्ञे उद्धारं चेति गौत म वचनात् उद्धारदाने च श्रुतिः इन्द्रो वै वृत्रं हत्वा सापुपकम्य समहान्भूत्वा देवता अब्रवीदुद्धारं म उद्धरतेति राज्ञा चापृथग्जितं सहजितं सर्वयोधेभ्यो यथापौरुषं विभजनीयं ९७ एष इ ति अविकारहितं योधानादिसर्वगुणवाहसंभवतयानितोयोधधर्म उक्तः युद्धे शत्रून्हिंसन्क्षत्रिय एतं धर्मं न त्यजेत् युद्धाधिकारित्वात् क्षत्रियग्रहणं अन्योऽपि तं त्यो न त्यजेत् ९८

म॰ स्मृ॰ टी॰ १२६

शरीरेत्यादि यथा प्राणिनां भूतानामाहारविनिरोधादिना शरीरशोषणात्प्राणाः क्षीयन्ते एवं राज्ञा-
मपि राष्ट्रपीडनात्प्रकृतिकोपादिना प्राणा विनश्यन्तीति तस्मात्शरीरवद्राज्ञा राष्ट्रं रक्षणीयमित्य-
र्थः ॥ १२ ॥ राष्ट्रस्येति राष्ट्रस्य रक्षणे वक्ष्यमाणमिममुपायमनुतिष्ठेत् यस्मात्संरक्षितराष्ट्रो राजा अना-
यासेन वर्द्धते ॥ १३ ॥ द्वयोरिति द्वयोर्ग्रामयोर्मध्ये त्रयाणां ग्रामाणां पञ्चानां वा ग्रामशतानां वा यु-
क्तं रक्षेत् पुरुषसमूहं सप्रधानपुरुषाधिष्ठितं राष्ट्रस्य संग्रहं रक्षास्थानं कुर्याद्देशस्य ला-
घवगौरवापेक्षयैवायं विकल्पः ॥ १४ ॥ ग्रामस्येति एकग्रामदशग्रामाणामधिपतीन्कुर्या-

शरीरकर्षणात्प्राणाः क्षीयन्ते प्राणिनां यथा । तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात् ॥
राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत् । सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते ॥ १३ ॥
द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितं । तथा ग्रामशतानां च कुर्याद्राष्ट्रस्य संग्रहं ॥
ग्रामस्याधिपतिं कुर्याद्दशग्रामपतिं तथा । विंशतीशं शतेशं च सहस्रपतिमेव च ॥ १५ ॥
ग्रामदोषान्समुत्पन्नान्ग्रामिकः शनकैः स्वयं । शंसेद्ग्रामदशेशाय दशेशो विंशतीशिने ॥
विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत् । शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयं ॥ १७ ॥
यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः । अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात् ॥ १८ ॥
दशी कुलं तु भुञ्जीत विंशी पञ्च कुलानि च । ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरं ॥

त् ॥ १५ ॥ ग्रामदोषेति ॥ १६ ॥ विंशतीशस्त्वित्यादि विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत् ग्रामा-
धिपतिश्चौर्यादिदोषान्ग्रामे संजातानात्मनाप्रतिकर्तुमसमर्थोऽनुकूलतया स्वयं दशग्रामपतये ।
कथयेदेवं दशग्रामपत्यादयो विंशतिपत्यादिभ्यः कथयेयुः तथा च सति सम्यक् चौरादिकंटको-
द्धारो भवति ॥ १७ ॥ यानीति एकग्रामाधिकृतस्य वृत्तिमाह यानि अन्नपानेन्धनादीनि ग्रामवासि-
भिः प्रत्यहं राज्ञे देयानि न त्वहकरं धान्यानामष्टमो भाग इत्यादिकं तानि ग्रामाधिपतिर्भृत्यर्थं
गृह्णीयात् ॥ १८ ॥ दशीति अष्टागवं धर्महलं षड्गवं जीवितार्थिनां चतुर्गवं गृहस्थानां द्विग-
वं ब्रह्मघातिनामिति हारीतस्मरणात् षड्गवं मध्यमं हलं तथाविधहलद्वयेन यावती

ग्रामं सहस्राधिपतिर्मध्यमं पुरं १९

229

पृ॰ १२६

बकवदित्यादि यथा बको जलनिलीनमतिचपलस्वभावमपि मत्स्यमाग्रहणादेकतानांतःकरणः चिंतयति एवं रहसि विहितरक्षणस्यापि विपक्षस्य देशग्रहणादीननुचिंतयेत् यथा च सिंहः प्रबलमतिस्थूलमपि दन्तावलं हंतुमाक्रामति एवमल्पबलोपि बलवतोपक्रांतः संश्रयाद्युपायांतरासंभवे सर्वप्राणाशांतं हंतुमाक्रामेत् यथा च वृकः पालकृतरक्षमपि पशुं दैवात्पालानवधानमासाद्य व्यापादयेत् यथा शशो व्याधोद्धृतविविधव्याधमध्येन्नतोपि कुटिलगतितया निष्पलायते एवं स्वयमबलो बलवद्वैरिपरिवृतोपि कथंचिद्वैरिव्यामोहमाधाय गुणवत्पार्थिवांतरं संश्रयितमुपसर्पेत् ६ एवमिति एवमुक्तप्रकारेण विजयप्रवृत्तस्य नृपतेर्ये विजयविरोधिनो भवंति । तान्सर्वान्सामदानभेददंडैरुपायैर्वशमानयेत् ७ यदीति ते च विजयविरोधिनो यद्याद्यैरुपायैस्त्रि

बकवच्चिंतयेदर्थान्पराक्रामेच्च सिंहवत् वृकवच्चावलुंपेत शशवच्च विनिःपतेत् ६
एवं विजयमानस्य येस्य स्युः परिपंथिनः तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः ७
यदि ते तु न तिष्ठेयुरुपायैः प्रथमैस्त्रिभिः दंडेनैव प्रसह्यैताञ्छनकैर्वशमानयेत् ८
सामादीनामुपायानां चतुर्णामपि पंडिताः सामदंडौ प्रशंसंति नित्यं राष्ट्राभिवृद्धये ९
यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपंथिनः १०
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया सोचिराद्भ्रश्यते राज्याज्जीविताच्च सबांधवः ११

भिर्न निवर्तंते तदा बलादेवोपसर्गान्स्नापयुद्धेन च शनकैर्लघुगुरुदंडक्रमेण दंडेनैव वशीकुर्यात् सामादीनामित्यादि चतुर्णामपि सामादीनामुपायानां मध्यात्साम दंडावेव राष्ट्रवृद्ध्यै पंडिताः प्रशंसंति साम्नि प्रयासधनव्ययसैन्यक्षयादिदोषाभावात् दंडे तत्संभवेपि कार्यसिद्धिनिश्चयात् ९ यथेत्यादि यथा क्षेत्रे धान्यतृणादिकयोः सहोत्पन्नयोरपि धान्यनिरायनकर्ता धान्यं रक्षति तृणादिकं चोद्धरति एवं नृपतिरपि राष्ट्रं दुष्टान्स्यात्तदुष्टानां पालकीयसहजान्यांतनीपि निर्हतिरदुष्टोनादवसीयते विशिष्टसहितं च राष्ट्रं रक्षेत् १० मोहादित्यादि यो राजा अनवेक्षया दुष्टशिष्टाज्ञानेन स्वराष्ट्रं प्रजानां नृणां पीडनग्रहणमारणादिदंडेन पीडयति स शीघ्रमेव जनपदवैराग्यप्रकृतिकोपाधर्मेण राज्याज्जीविताच्च पुत्रादिसहितो नश्यति ११

पण इति अपकृष्टस्य संमार्जकोदकवाहादि गृहकर्मकरस्य वक्ष्यमाणलक्षणः पणो भृतिरूपः प्रत्यहं दातव्यः षाण्मासिकश्चाच्छादनवस्त्रयुगं दातव्यं अष्टमुष्टिर्भवेत्किंचित् किंचिदष्टौ तु पुष्कलं पुष्कलानि च चत्वारि आढकः परिकीर्तितः चतुराढको भवेद्द्रोण इति गणनया धान्यद्रोणश्च प्रतिमासं देयः उत्कृष्टस्य तु भृतिरूपाः षट् पणा देयाः अनयैव कल्पनया षाण्मासिकानि षड्वस्त्रयुगानि देयानि प्रतिमासि षड् द्रोणा देयाः अनयैव दिशा मध्यमस्य त्रयं मध्यमस्य पणत्रयं भृतिरूपं दातव्यं षाण्मासिकं च वस्त्रयुगत्रयं मासि च धान्यद्रोणत्रयं दातव्यं १२६ क्रयेति कियता मूल्येन क्रीतमिदं वस्त्रलवणादि द्रव्यं विक्रीयमाणं वा कियल्ल

पणो देयोऽपकृष्टस्य षडुत्कृष्टस्य वेतनं षाण्मासिकस्तथाच्छादो धान्यद्रोणस्तु मासिकः
क्रयविक्रयमध्वानं भक्तं च सपरिव्ययं योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत्करान् १२७
यथा फलेन युज्येत राजा कर्ता च कर्मणां तथावेक्ष्य नृपो राष्ट्रे कल्पयेत्सततं करान् १२८
यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः
पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः धान्यानामष्टमो भागः षष्ठो द्वादश एव वा १३०

भ्यते कियद्दूरादानीतं किमस्य वणिजो भक्तव्ययेन शाकसूपादिना परिव्ययेन लब्धं किमस्यारण्यादौ चौरादिभ्यो रक्षानुरूपेण क्षेमप्रतिविधानेन गतं कोऽस्येदानीं लाभो योगक्षेमं च पर्यालोच्य वणिजः करान्दापयेत् १२७ यथेत्यादि यथा राजा रक्षणादिकर्मणः फलेन यथा च वार्षिकवणिजादयः कृषिवाणिज्यादीनां कर्मणां फलेन संबध्यन्ते तथा निरूप्य राजा सर्वदा राष्ट्रे करान्गृह्णीयात् १२८ अत्र दृष्टान्तमाह यथेत्यादि जलौकावत्सभ्रमरा अल्पाल्पं भक्ष्यमाददते तथा राजा राष्ट्रादाब्दिकः करो ग्राह्यः १२९ तमाह पञ्चाशद्भाग इति मूलादधिकयोः पशुहिरण्ययोः पञ्चाशद्भागो राज्ञा गृहीतव्यः एवं

तेषामिति तेषां ग्रामवासिप्रभृतीनां परस्परविप्रतिपत्तौ यानि ग्रामभवानि कार्याणि कुलाकृतादीनि पृथक्कार्याणि तान्यन्यो राज्ञो हितकृत्तन्निपुणोऽनलसः कुर्यात् २० नगरइति प्रतिनगरमेकं कमुच्चैःस्थानं कुलादिना महान्तं प्रधानभूतं घोररूपं हस्त्यश्वादिसामग्र्या भयजनकं नक्षत्राणां मध्ये भार्गवादिग्रहमिव तेजस्विनं कार्यद्रष्टारं कुर्यान्नगराधिपतिं २१ स ताननिति स नगराधिकृतस्तान्सर्वान्ग्रामाधिपत्यादीन्स्वतिप्रयोजने सदा स्वयं सबलेनानुगच्छेत्तेषां नगराधिकृतपर्यन्तानां सर्वेषामेव राष्ट्रेषु चेष्टितं तत्तद्विषयनिर्मितैश्चारैः सम्यग्राज्ञा परिज्ञेयं

तेषां ग्राम्याणि कार्याणि पृथक्कार्याणि चैव हि राज्ञोऽन्यः सचिवः स्निग्धस्तानि पश्येदतन्द्रितः २०
नगरे नगरे चैकं कुर्यात्सर्वार्थचिन्तकं उच्चैःस्थानं घोररूपं नक्षत्राणामिव ग्रहं २१ स
ताननुपरिक्रामेत सर्वानेव सदा स्वयं तेषां वृत्तं परिणयेत्सम्यग्राष्ट्रेषु तच्चरैः २२ ।
राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः
ये कार्यिकेभ्योऽर्थमेव गृह्णीयुः पापचेतसः तेषां सर्वस्वमादाय राजा कुर्यात्प्रवासनं २४
राजकर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च प्रत्यहं कल्पयेद्वृत्तिं स्थानकर्मानुरूपतः २५

तत्र वगच्छेत् राज्ञो हीति यस्माद्राज्ञो रक्षाधिकृता ये ते बाहुल्येन परस्वग्रहणशीला वं।चकाश्च भवन्ति तस्मात्तेभ्य इमा आत्मीयाः प्रजा राजा रक्षेत् २३ ये इति ये रक्षाधिकृताः कार्यार्थिभ्य एवं वा कृत्स्नादिकमद्रव्यलोभादशास्त्रीयधनग्रहणं पापबुद्धयः कुर्वन्ति तेषां सर्वस्वं गृहीत्वा राजा देशान्निःसारणं कुर्यात् २४ राजकर्मस्विति राज्ञोपकर्मनियु।क्तानां स्त्रीणां दास्यादीनां कर्मकरजनस्य चोत्कृष्टमध्यमापकृष्टस्थाननियोगानुरूपेण प्रत्यहं कर्मानुरूपेण वृत्तिं दद्यादित्यामेव दर्शयति २५

तीक्ष्णश्चैवेति कार्यविशेषमवगम्य कश्चित्कार्ये तीक्ष्णः स्यात्कश्चिच्च मृदुर्नृपो भवेत् न त्वेकरूप एव स्यात् यस्मात्तादृग्रूपो राजा सर्वलोकानामभिमतो भवति ४१ अमात्य इति स्वयं कार्यदर्शने खिन्नः सन्श्रेष्ठामात्यं धर्मविदं प्राज्ञं दान्तं कुलीनं तस्मिन्कार्यदर्शनस्थाने नियुञ्जीत ४२ एवमिति एवमुक्तप्रकारेण सर्वमात्मनः कर्मजातं संपाद्य युक्तः प्रमादरहितश्चात्मीयाः प्रजा रक्षेत् ४३ विक्रोशन्त्य इति यस्य राज्ञोऽमात्यादिसहितस्य पश्यत एव राष्ट्रात्क्रोशन्त्यः प्रजास्तस्करादिभिरपह्रियन्ते स मृत एव न तु जीवति जीवनकार्याभावाज्जीवनमपि तस्य मरणमेव तत्र्यर्थः । तस्मादप्रमत्तः प्रजा रक्षेदिति पूर्वोक्तशेषः ४३ तदेव द्रढयति क्षत्रियस्येति धर्मान्तरेभ्यः श्रे

तीक्ष्णश्चैव मृदुश्च स्यात्कार्यं वीक्ष्य महीपतिः तीक्ष्णश्चैव मृदुश्चैव राजा भवति संमतः ४०

अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतं स्थापयेदासने तस्मिन्खिन्नः कार्येक्षणे नृणां

एवं सर्वं विधायेदमितिकर्तव्यमात्मनः युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः ४२

विक्रोशन्त्यो यस्य राष्ट्राद्ध्रियन्ते दस्युभिः प्रजाः संपश्यतः सभृत्यस्य मृतः स न तु जीवति ४३

क्षत्रियस्य परो धर्मः प्रजानामेव पालनं निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते ४४

उत्थाय पश्चिमे यामे कृतशौचः समाहितः हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत्स सभां शुभां ४५

तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत् विसृज्य च प्रजाः सर्वा मन्त्रयेत्सह मन्त्रिभिः ४६

गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः अरण्ये निःशलाके वा मन्त्रयेदविभावितः ४७

ष्ठं क्षत्रियस्य प्रजारक्षणमेव प्रकृष्टो धर्मः यस्माद्यथोक्तरक्षणे दृष्टफलकरादिभोक्ता राजा धर्मेण युज्यते ४४ उत्थायेति स नृपो रात्रेः पश्चिमे यामे उत्थाय प्रकृतमूत्रपुरीषोत्सर्गादिशौचोऽनन्यमनाः कृताग्निहोत्रो ब्रह्याहोमो ब्राह्मणान्पूजयित्वा स्तुवालक्षणादिभिः अभिनन्द्य प्रस्थाप्य तत्रामात्यैश्च प्रस्थाप्य मन्त्रिभिः सह संधिविग्रहादिभिः सह संधिविग्रहादि चिन्तयेत् ४६ गिरीति पर्वतपृष्ठमारुह्य निर्जनधवलगृहस्थितो वा अरण्ये विविक्ते देशे मन्त्रभेदकारिभिरनुपलक्षितः कर्मारम्भोपायः पुरुषद्रव्यसंपद्देशकालादिविभागविनिपातप्रतीकारश्च कार्यसिद्धिरित्येवं पञ्चाङ्गमन्त्रं चिन्तयेत् ४७

प एणां शुभेतां सभाममात्यादिदर्शनगृहं प्रविशेत् ४५ तत्रस्थ इति तस्यां सभायां स्थितो दर्शनार्थमागताः प्रजाः संभा

आददीतेति १३१ पत्रशाकतृणानां द्रुमपत्रादीनां च वैदलस्य वंशादीनां मृन्मयानां अश्ममयानां च षड्भागो ग्रहीतव्यः १३२ म्रियमाणोऽपीति क्षीणधनोऽपि राजा श्रोत्रियाद्ब्राह्मणात्करं न गृह्णीयात् न च तदीयदेशे वसन् श्रोत्रियो बुभुक्षयावसादं गच्छेत् १३३ यस्मात् यस्येति यस्य राज्ञो देशे श्रोत्रियः क्षुधावसन्नो भवति तस्य राष्ट्रमपि दुर्भिक्षादिभिः क्षुधाक्रान्तमवसादं गच्छति १३४ यत एवमतः श्रुतेति शास्त्रज्ञानानुष्ठाने ज्ञात्वास्य तदनुरूपां धर्मादनपेतां जीविकां प्रकल्पयेत् स्तेनचौरादिभ्यश्चैनं औरसं पुत्रमिव रक्षेद्यस्मात् १३५ संरक्ष्येति

आददीताथ षड्भागं द्रुमांसमधुसर्पिषां । गंधौषधिरसानां च पुष्पमूलफलस्य च १३१
पत्रशाकतृणानां च चर्मणां वैदलस्य च । मृन्मयानां च भांडानां सर्वस्याश्ममयस्य च १३२
म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करं । न च क्षुधास्य संसीदेत् श्रोत्रियो विषये वसन् १३३
यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा । तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति १३४
श्रुतवृत्ते विदित्वास्य वृत्तिं धर्म्यां प्रकल्पयेत् । संरक्षेत्सर्वतश्चैनं पिता पुत्रमिवौरसं १३५
संरक्ष्यमाणो राज्ञायं कुरुते धर्ममन्वहं । तेनायुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च १३६ य-
त्किंचिदपि वर्षस्य दापयेत्करसंज्ञितं । व्यवहारेण जीवंतं राजा राष्ट्रे पृथग्जनं १३७ कारु-
काञ्छिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः । एकैकं कारयेत्कर्म मासि मासि महीपतिः १३८ ।
नोच्छिंद्यादात्मनो मूलं परेषां चातितृष्णया । उच्छिंदन्ह्यात्मनो मूलमात्मानं तांश्च पीडयेत् १३९

स च श्रोत्रियो राज्ञा संरक्ष्यमाणो यं धर्ममन्वहं करोति तेन राज्ञः आयुर्द्रव्यराष्ट्राणि वर्द्धन्ते १३६ यदिति राजा स्वदेशे शाकपर्णादिस्वल्पवस्तुक्रयविक्रयादिना जीवंतं निकृष्टजनं स्वल्पमपि करार्थं वर्षेण दापयेत् १३७ कारुकेति कारुकान्सूपकारादीन् शिल्पिनः पट्टकारान् शिल्पिनश्च लोहकारादीन् शूद्रांश्च देहक्लेशोपजीविनो भारवाहिकादीन्मासि मासि एकं दिनं कर्म कारयेत् १३८ नोच्छिद्यादिति प्रजास्नेहात्करशुल्कादेरग्रहणमात्मनो मूलच्छेदः अतिलोभेन प्रचुरकरादिग्रहणं परेषां मूलच्छेदः एतदुभयं राजा न कुर्यात् यस्मादात्मनो मूलमुच्छिन्दन् परेषां च मूलमात्मानं पीडयेत्

कृत्स्नमिति । अष्टविधं कर्म सम्यक् चिन्तयेत् तच्चोशनसोक्तं आदाने च विसर्गे च तथा प्रैषनिषेधयोः पञ्चमे चार्थवचने व्यवहारस्य चेक्षणे दण्डशुद्ध्योः सदा युक्तस्तेनाष्टगतिको नृपः अष्टकर्मा दिवं याति राजा शक्राभिपूजितः तत्रादानं करादीनां विसर्गो भृत्यादिभ्यो धनदानं प्रैषोऽमात्यादीनां दृष्टादृष्टविषये नियोगः अर्थवचनं कार्यसंदेहे राजाज्ञैव तदेव तत्र नियामकम् व्यवहारेक्षणं प्रजानां ऋणादानादिविवादनिर्णयः दण्डः पराजितानां यथाशास्त्रं धनग्रहणं शुद्धिः स्वपरगोचरे पापके प्रायश्चित्तेन तदपनयनम् मेधातिथिस्तु अकृतारम्भः कृतानुष्ठानमनुष्ठितविशेषणं कर्मफलसंग्रहः तथा सामदानभेददण्डा एतदष्टविधं कर्म अथवा वणिक्पथ उदकसेतुबन्धनं दुर्गकरणं कृतस्य संस्कारनिर्णयः हस्तिबन्धनं खनिखननं शून्यनिवेशनं दारुवनच्छेदनं चेत्याह तथा कापटिकोदास्थितगृहपतिवैदेहकतापसव्यञ्जनात्मकं पञ्चविधं चारवर्गं पञ्चवर्गं चिन्तयेत् तत्र परमर्मज्ञः प्रगल्भश्छात्रः कपटव्यवहारित्वात्कापटिकः तं धनमानाभ्यामनुगृह्य रहसि राजा ब्रूयात् यस्य दुष्टं पश्यसि तत्तदानीमेव मयि वक्तव्यमिति प्रव्रज्याप्रत्यवसितो दाम्भिकः तं

कृत्स्नं चाष्टविधं कर्म पञ्चवर्गं च तत्त्वतः । अनुरागापरागौ च प्रचारं मण्डलस्य च ॥ ५४ ॥

लोके सुविदितदोषं प्रज्ञाशौचयुक्तं वृत्त्यर्थिनं तथा पूर्ववद्रहसि राजा ब्रूयात् इह स्थानिकमठे वा संपेत शुश्रूषस्वोपात्तिकं भूमिं तत्र च तत्र कृत्यं स्वकल्पयेत् स चान्येषामपि प्रव्रजितानां राज्ञा चारकर्मका रयेत् ग्रासाच्छादनादिकं दद्यात् कर्षकः क्षीणवृत्तिः प्रज्ञाशौचयुक्तो गृहपतिव्यञ्जनमपि पूर्ववदुक्त्वा स्वभूमौ कृषिकर्मकारयेत् वाणिजकः क्षीणवृत्तिर्वैदेहकव्यञ्जनः तं पूर्ववदुक्त्वा धनमानाभ्यां सत्कृत्य स्वभूमौ वाणिज्यकर्म कारयेत् मुण्डो जटिलो वा वृत्तिकामः तापसव्यञ्जनः सोऽपि कश्चिदाश्रमे वसन् मुण्डजटिलान्तरकपटशिष्यगणेनोपगम्यमानो राजोपकल्पितवृत्तिः स्वल्पमासद्विमासान्तरितं प्रकाशं बदरादिमुष्टिमश्नीयात् रहसि च राजोपकल्पितं यथेष्टमाहारं कुर्यात् शिष्याश्चास्यातीतानागतज्ञानादिकं ख्यापयेयुः तेन च लोकाचेष्टनमस्मासु सर्वेषां विश्वस्तनीयता सर्वेषां कार्यमकार्यं च पृष्ट्वा तिरस्यसम्यक्चिकित्सादिकं कथयेदिति एवमेवं पञ्चवर्गप्रकल्पनेनैव पञ्चवर्गद्वारेण प्रतिराजस्य प्रतिराजगणानामपि स्वानामामात्यादीनामनुरागापरागौ ज्ञात्वा तदनुरूपं चिन्तयेत् वक्ष्यमाणस्य राजमण्डलस्य प्रचारकः सन्धिविग्रहादौ मित्रादिकं चिन्तयेत् न चरान्तानेतदनुगुणं चे

मध्येति यत्नवान्मंत्रिभिः सह यस्मान्मंत्रज्ञानेपि सामर्थ्यं पक्षिणां ततो सकलां पृथिवीं भुंक्ते
४८ जडेति बुद्धिवर्जितांधबधिरविकलान्तिर्यग्योनिभवांश्च शुकसारिकादीन्वयोतिगान् वृद्धान् स्त्रीम्लेच्छव्या
धितव्यंगहीनांश्च मंत्रसमये अपसारयेत् ४९ यस्मात् भिंदंतीति एते जडादयो प्राचीनत्वा
त्तवशेन प्राज्ञत्वाद्विभावाच्च धार्मिकत्वात् पैवावमानिता मंत्रभेदं कुर्वंति तथा शुकसारिकाद
योतिर्यग्योनयः स्त्रियश्च विशेषेण स्थिरबुद्धित्वात् मंत्रं भिंदंति तस्मात्तत्र प्रसारणे यत्नवान्स्यात्
५० मध्यमिति दिनमध्ये रात्रिमध्ये वा विगतचित्तखेदः शरीरक्लमरहितः स्वमंत्रिभिः स
ह एकाकी वा राजा धर्मकामार्थान्तत्रस्थाश्चिंतयेत् ५१ परस्परविरोधानामिति तेषां

यस्मान्मंत्रज्ञानेपि सामर्थ्यं पक्षिणां ततः सकलां पृथिवीं भुंक्ते कोपाहीनोपि पार्थिवः ४८
जडमूकांधबधिरांस्तिर्यग्योनीन्वयोतिगान् स्त्रीम्लेच्छव्याधितव्यंगान्मंत्रकालेपसारयेत्
भिंदंत्यवमता मंत्रं तैर्यग्योनास्तथैव च स्त्रियश्चैव विशेषेण तस्मात्तत्राहृतो भवेत् ५०
मध्यंदिनेर्द्धरात्रे वा विश्रांतो विगतक्लमः चिंतयेद्धर्मकामार्थान्सार्द्धं तैरेक एव च ५१
परस्परविरुद्धानां तेषां च समुपार्जनं कन्यानां संप्रदानं च कुमाराणां च रक्षणं ५२
दूतसंप्रेषणं चैव कार्यशेषं तथैव च अंतःपुरप्रचारं च प्रणिधीनां च चेष्टितं ५३

धर्मार्थकामानां प्रायिकविरोधवतां विरोधपरिहारेणार्जनोपायं चिंतयेत् दुहितॄणां च दा
नं स्वकार्यसिद्ध्यर्थं निरूपयेत् कुमाराणां पुत्राणां विनयाधानमिति पित्रार्थं रक्षणं च चिं
तयेत् ५२ दूतेति दूतानां संधिविग्रहार्थं वहारितादिना परराष्ट्रप्रस्थापनं चिंतयेत्तथा
प्रारब्धकार्यशेषसमापनमपि च चिंतयेत् [illegible] विषमचेष्टितत्वात् तथा हि शास्त्रेण
वेणीविनिवेशितेन विष्टरपं स्वामहिषी जघान विषाक्तदिग्धेन नूपुरेण देवी विरक्ता
किल काशिराजं इत्यगम्यात्मनो रक्षार्थं धर्मरक्षार्थं च अंतःपुरस्त्रीणां चेष्टितं सर्वादा
स्यादिना निरूपयेत् चराणां च प्रतिराजादिषु नियुक्तानां चरांतरैश्चेष्टितमवधारयेत् ५३

नानीति तान्सर्वान्नृपतीन्सामभेददानदंडाख्यैरुपायैर्यथासंभवं व्यस्तैः समस्तैश्च वशीकुर्याद्
युक्त्या पौरुषेण दंडेनैव केवलेन नयेन साम्ना वा केवलेनात्मवशान्कुर्यात्तथा चोक्तं सामदंडौ प्र
शंसंति नित्यं राष्ट्राभिवृद्धये इति ५९ संधिमिति तत्रोभयानुग्रहार्थं हस्त्यश्वहिरण्यादिनिबंध
नेन वाचा परस्परमन्योन्यस्योपकर्तव्यमिति नियमबंधः संधिः वैरं विग्रहो बलाधिक्येन शत्रुगम
नं यानमुपेक्षणमासनं स्वार्थसिद्धये स्वबलस्य द्विधाकरणं द्वैधीभावः शत्रुपीडितस्य बलवद्
राजांतराश्रयणं संश्रयः एतान्गुणान्षट्प्रकारान्सर्वदा चिंतयेत् यस्मिन्गुणे आश्रयणे ऽस्मात्मन उपच
यः परस्याऽपचयस्तं गुणमाश्रयेत् ६० आसनमिति संध्यादिगुणानां निरपेक्षेणानुष्ठानमनंत
रं मत्तेः समनुचिंत्याऽपि समारंभः आत्मसमृद्धिपरहान्यादिकं कार्यं वीक्ष्य यथा संध्याप्यासनं विग्रहसंचाया
नं वलानां द्वैधीभावसंश्रयौ च केन चित्संधिना च विग्रहमित्यादिकमनुतिष्ठेत् ६१ संधिमि।

तान्सर्वानभिसंदध्यात्सामादिभिरुपक्रमैः। व्यस्तैश्चैव समस्तैश्च पौरुषेण नयेन च ५९
संधिं च विग्रहं चैव यानमासनमेव च। द्वैधीभावं संश्रयं च षड्गुणांश्चिंतयेत्सदा ६० आस
नं चैव यानं च संधिं विग्रहमेव च। कार्यं वीक्ष्य प्रयुंजीत द्वैधं संश्रयमेव च ६१ संधिं च
द्विविधं विद्याद्द्वैधं विग्रहमेव च। उभे यानासने चैव द्वैधं संश्रयमेव च ६२ समानया
नकर्मा च विपरीतस्तथैव च। तदा त्वायतिसंयुक्तः संधिर्ज्ञेयो द्विलक्षणः ६३ स्वयंकृ
तश्च कार्यार्थमकाले काल एव च। मित्रस्य चैवापकृते द्विविधो विग्रहः स्मृतः ६४

ति संध्यादीन्षडेव च गुणान्द्विः प्रकारान्जानीयात् इति विवक्षार्थं ६२ समानेति तात्कालि
कफललाभार्थं उत्तरकालीनफललाभार्थं वा परराजा नरेण सहान्यं प्रति यानादिकर्मणि
यत्र समानयानकर्मा संधिर्यत्र पुनस्त्वमत्र याहि अहमन्यत्र यास्यामीति संप्रतिको त्तरकाल
कालीनफलार्थिनयेवाक्रियते सोऽसमानयानकर्मेति द्विः प्रकारकः संधिर्ज्ञातव्यः ६३ स्व
यमिति शत्रुजयरूपप्रयोजनार्थं शत्रोर्व्यसनादिमाकलय्य वक्ष्यमाणमार्गशीर्षादिकालादन्य
त्र यद्वा तत्कालएव वा स्वयं कृतस्त एको विग्रहः मित्रस्यापकारे राज्ञांतरेण कृते मित्ररक्षार्थं
यस्त्वपरो विग्रहः एवं द्विविधो विग्रहः गोविंदराजेन तु मित्रेण चैवापकृतेन इति पठितं व्याख्या
तं स्वयमपकृतस्य शत्रुः विजिगीषोर्मित्रेणापकारे क्रियमाणे वा यमनिनयनात्तांच्चितिमुक्ति

अथोति अरिविजिगीषोर्भूम्यनंतरः संहतयोरन्यग्रहसमर्थो निग्रहे चासंहतयोः समर्थः स मध्यमः तस्य प्रचारं चिंतयेत् तथा प्रवृत्तोऽसौ हं गुण प्रकृतिसंपन्नो विजिगीषुस्तस्य चेष्टितं चिंतयेत् तथा विजिगीषुर्मध्यमानां च यः संहतासंहतानां अनुग्रहे समर्थो निग्रहे चासंहतानां समर्थः स उदासीनः तस्य प्रचारं चिंतयेत् तथा ज्ञात्वा त्रिविधश्चापि सहजः सकृत्रिमः सभूम्यनंतरः स च पूर्वोपेक्षया प्रयत्नतः प्रचारं चिंतयेत् एताउ ति एता मध्यमाद्याश्चतस्रः प्रकृतयः संक्षेपेण मंडलमूलं अपराणामभिधास्यमानप्रकृतीनां माधाः प्रस्तुतास्ताः मूलमित्युच्यते अन्याश्चाष्टौ समाख्याताः तासां पार्श्वेतो विभूमीनां अनंतरं मित्रमरिमित्रं मित्रमित्रं अरिमित्रमित्रं चेति च तस्रः प्रकृतयो भवंति पश्चात् पार्ष्णिग्राहश्च आक्रंदः पार्ष्णिग्राहासारश्चाक्रंदासारः इति च तस्रः एवमष्टावन्याः प्रकृतयो भवंति पूर्वोक्ताभि

मध्यमस्य प्रचारं च विजिगीषोश्च चेष्टितं उदासीनप्रचारं च यात्नेनैव प्रयत्नतः ४४
एताः प्रकृतयो मूलं मंडलस्य समासतः अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः
अमात्यराष्ट्रदुर्गार्थदंडाख्याः पंच चापराः प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः ४६
अनंतरमरिं विद्यादरिसेविनमेव च अरेरनंतरं मित्रमुदासीनं तयोः परं ४७

अमध्यमविजिगीषूदासीनशत्रुरूपाभिर्मूलप्रकृतिभिः सह द्वादशैवं ताः प्रकृतयः स्मृताः ४६ अमात्येति आसां चतसृणां मूलप्रकृतीनामष्टानां च शाखाप्रकृतीनां एकैकस्याः प्रकृतेरमात्यदेशदुर्गकोषदंडाख्याः पंच द्रव्यप्रकृतयो भवंति ताश्च पंच द्वादशानां प्रत्येकं भवंत्यो द्वादशपंचगुणिताः षष्टिरेव द्रव्यप्रकृतयो भवंति तथा मूलप्रकृतिभिश्चतसृभिः सह संक्षेपतो द्विसप्ततिः प्रकृतयो मुनिभिः कथिताः ४६ अनंतरमिति विजिगीषोर्भूम्यनंतरं स्थितं च नरेंद्रं शास्मपि अरिप्रकृतिं जानीयात् तथा तत्सेविनमप्यरिमेव विद्यात् अरेरनंतरं विजिगीषोर्भूम्येकांतरं मित्रप्रकृतिं विद्यात् तयोश्चारिमित्रयोः परं विजिगीषोरुदासीनप्रकृतिं विद्यात् तस्मादेव प्रकृतीनाम् अग्रपश्चाद्भावादिभेदेन व्यपदेशभेदः तत्राग्रवर्तिनोऽरिव्यपदेश एवं पश्चाद् इति

म-स्मृ-
टी-
२३५

मन्येतेति यदा राजा सर्वप्रकारेण बलीयांसमसाध्यं शत्रुं मन्येत तदा कतिचिद्बलसहितः स्वयं दुर्गाश्रितः स्यादन्यैकदेशेन च शत्रुविरोधमाचरेदेवं द्विधा बलं कृत्वा मित्रसंग्रहादिकं स्वकार्यं साधयेत् ७३ यदेति यदा तु शत्रुसैन्यानाममात्यादिप्रकृतिदोषादिना तिरस्कृतेन ग्राह्यो भवति तदा बलद्वैधविधायी दुर्गाश्रयणेनापि नाशसम्भावनायां तदा शीघ्रमेव धार्मिकं बलवन्तं च राजानमाश्रयेत् ७४ कीदृशं तत्सेवनमित्याह निग्रहमिति यः स्वदोषेण गमनीयतमो जातः तासां प्रकृतीनां यस्माच्छत्रुबलाद्भयमुत्पन्नं तयोर्द्वयोरपि यः संश्रितो निग्रहक्षमः तं नृपं सर्वयत्नै र्गुरुमिव नित्यं सेवेत ७५ यदीति आगामिकाले संश्रयेणात्मनस्तत्रापि यदि संश्रयकृतं दोषं पश्येत् तदा तेः संश्रयाभूतस्य शोभनमेव युद्धं तस्मिन्काले समाचरेत् दुर्बलेनापि बलवतो जयदर्शनान्निहत

मन्येतारिं यदा राजा सर्वथा बलवत्तरं तदा द्विधा बलं कृत्वा साधयेत्कार्यमात्मनः ७३ यदा परबलानां तु गमनीयतमो भवेत् तदा तु संश्रयेत्क्षिप्रं धार्मिकं बलिनं नृपं ७४ निग्रहं प्रकृतीनां च कुर्याद्योऽरिबलस्य च उपसेवेत तं नित्यं सर्वयत्नैर्गुरुं यथा ७५ यदि तत्रापि संपश्येद्दोषं संश्रयकारितं सुयुद्धमेव तत्रापि निर्विशङ्कः समाचरेत् ७६ सर्वोपायैस्तथा कुर्यान्नीतिज्ञः पृथिवीपतिः यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः ७७ आयतिं सर्वकार्याणां तदात्वं च विचारयेत् अतीतानां च सर्वेषां गुणदोषौ च तत्त्वतः ७८ आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः अतीते कार्यशेषज्ञः शत्रुभिर्नाभिभूयते ७९

234

स्य स्वर्गप्राप्तिः ७६ सर्वोपायैरिति सर्वैः सामादिभिरुपायैर्नीतिज्ञो राजा तथा यतेत यथास्य मित्रोदासीनशत्रवोऽधिका न भवन्ति अधिका न हि तेषामसाध्या हीनो भवति धनलोभेन मित्रस्यापि शत्रुत्वापत्तेः ७७ आयतिमिति सर्वेषां कार्याणामारब्धानामपि आयतिमुत्तरकाले गुणदोषौ विचारयेत् वर्तमानकाले च शीघ्रं संपादनाय गुणविचारं कुर्यात् अतीतानां च सर्वेषां कार्याणां गुणदोषौ किमेषां कृतं विघटितं किं वा अवशिष्टमित्येवं यथार्थं विचारयेत् ७८ आयत्यामिति यः कार्याणामागामिकं गुणदोषज्ञः स एव गुणवत्कार्यमारभते दोषवत्परित्यजति यश्च वर्तमानकाले क्षिप्रमेव यथार्थं कार्यं करोति अतीते कार्यशेषज्ञः कार्यशेषज्ञो भवति तत्कार्यं समाप्नोति तत्फलं लभते यस्मादेवंविधः कालत्रयसावधानस्तान्न कदाचिदपि शत्रुभिरभिभूयते किं तु जेता ७९

उ-
२३५

एकाकिन इति आत्ययिके कार्ये प्राप्तेर्थसन्नादिके तस्मिन्नकस्मात् जाते शक्तस्यैकाकिनो यानमशक्तस्य मित्र
सहितस्य इत्येवं यानं द्विविधमभिधीयते १६५ क्षीणस्येति प्राग्जन्मार्जितेन दृष्टेन दैवेन वा पू
र्वकृतेन क्रमशः क्षीणहस्त्यश्वकोषादिकस्य समृद्ध्यापि वा मित्रानुरोधेन तत्कार्यवशात्पमिन्वे
द्विविधमासनं मन्वादिभिः स्मृतमिति १६६ बलस्येति साध्यस्य प्रयोजनसिद्ध्यर्थं बलस्य हस्त्यश्वादेः
सेनापत्याद्यधिष्ठितस्यैकत्रावस्थानं नृपोपद्रववारणार्थं अमात्यस्थानं मन्यतदुर्गदेशे राज्ञः कतिपयबला
धिष्ठितस्यावस्थानमेवं संध्यादिषाड्गुण्यविद्भिः द्वैधं द्विविधं कीर्त्यते १६७ अर्थेति शत्रुभिः
पीड्यमानस्य शत्रुपीडानिवृत्त्यर्थं प्रयोजनसिद्ध्यर्थमसत्यामपि तत्कालपीडायां भाविशत्रुपी

एकाकिनश्चात्ययिके कार्ये प्राप्ते यदृच्छया । संहतस्य च मित्रेण द्विविधं यानमुच्यते १६५ ।
क्षीणस्य चैव क्रमशो दैवात्पूर्वकृतेन वा । मित्रस्य चानुरोधेन द्विविधं स्मृतमासनं १६६
बलस्य स्वामिनश्चैव स्थितिः कार्यार्थसिद्धये । द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः
अर्थसंपादनार्थं च पीड्यमानस्य शत्रुभिः । साधुषु व्यपदेशार्थं द्विविधः संश्रयः स्मृतः १६८
यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः । तदात्वे चाल्पिकां पीडां तदा संधिं समाश्रयेत् १६९
यदा प्रहृष्टा मन्येत सर्वास्तु प्रकृतीर्भृशं । अत्युच्छ्रितं तथात्मानं तदा कुर्वीत विग्रहं १७०
यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकं । परस्य विपरीतं च तदा यायाद्रिपुं प्रति १७१ य
दा तु स्यात्परिक्षीणो वाहनेन बलेन च । तदासीत प्रयत्नेन शनकैः सान्त्वयन्नरीन् १७२

डनेत्र्यं कथमस्य नः क्रमदय महाबलेन नृपमाश्रित इति सर्वे व्यपदेशोत्पादनार्थं बलवन्नृपाश्रयणमि
त्येवं द्विविधः संश्रयः स्मृतः १६८ यदावगेति यदा तदात्वकाले निश्चितमात्मन आधिक्यं जानीयात् तदा
तत्काले चाल्पधनादिक्षयः तदा तामङ्गीकृत्यापि संधिमेवाश्रयेत् १६९ यदेत्यादि मृदमात्या
त्यादिकाः प्रकृतीः सर्वदा दानमानादिभिः अतीव परितुष्टा मन्येत आत्मानं च हस्त्यश्वकोषादिभिः प्रा
क्तिमपरणं चोपचितं तदा विग्रहमेवाश्रयेत् १७० यदेति मन्येति यदा त्वीयमशास्त्र सैन्यं हृष्टपुष्टं
धनादिना च पुष्टं तत्त्वतो जानीयात् शत्रोश्चामात्यादिबलं विपरीतं च तदानन्तं दीक्षणयायात्
यदा त्विति यदा पुनर्वाहनेन हस्त्यश्वादिना बलेन चामात्यादिना परिक्षीणस्तदासीत शनैः श

म·स्मृ·
टी·
२३५

साम्नेति शीलाद्यवदर्शनहितकथनाद्यात्मकेन साम्ना हस्त्यश्वहिरण्यादीनां च दानेन तत्सामन्तानां तदमात्यादीनां च विवादोत्पादनात्मकेन भेदेन एभिः समस्तैर्व्यस्तैर्वा उपायैः सामन्तानरीन्स्ववशं कर्तुं प्रयत्नं कुर्यात् न पुनः कदाचिद्युद्धेन ९८ अनित्येति युध्यमानयोर्बलवत्त्वाल्पबलत्वादिनियमेन जयपराजययोरदृश्यत्वात्तस्मादन्युपायासंभवे युद्धं परिहरेत् ९९ त्रयाणामिति पूर्वोक्तानां त्रयाणामपि सामादीनामुपायानामसंभवे ततो जयपराजयसंदेहेऽपि तथा सम्यक् प्रयत्नवान् युध्येत यथा शत्रून् जयेत् यतो जये फललाभोऽभिमुखमरणे च स्वर्गप्राप्तिः निःसंदिग्धे तु पराजये युद्धादपसरणं साधीयो बलवति आत्मानं सर्वतो रक्षेदिति मेधातिथिगोविन्दराजौ

साम्ना दानेन भेदेन समस्तैरथवा पृथक् विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ९८
अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् ९९
त्रयाणामप्युपायानां पूर्वोक्तानामसंभवे तथा युध्येत संपन्नो विजयेत रिपून्यथा २००
जित्वा संपूजयेद्देवान्ब्राह्मणांश्चैव धार्मिकान् प्रदद्यात्परिहारांश्च ख्यापयेदभयानि च १
सर्वेषां तु विदित्वैषां समासेन चिकीर्षितं स्थापयेत्तत्र तद्वंश्यं कुर्याच्च समयक्रियां २०२

२०० जित्वा परराष्ट्रं जित्वा तत्र ये देवास्तान्धर्मप्रधानांश्च ब्राह्मणान्भूमिसुवर्णादानसंमानादिभिः पूजयेत् जितदेशैकदेशदानादिनैव चेदं तदाह याज्ञवल्क्यः नातः परतरो धर्मो नृपाणां यद्रणार्जितं विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा यथा देवब्राह्मणार्थमप्येतद्दत्तमिति तद्देशवासिनां परिहारान्दद्यात्तथा बलाभिभवात्प्राप्तेरस्माकमपि कृतं तेषामप्यादिनामिदानीं । निर्भयाः सन्तः स्वं स्वं व्यापारमनुतिष्ठन्त्विति अभयान्यपि ख्यापयेत् १ सर्वेषामिति एषां पराजितानाममात्यानां सर्वेषामेव संक्षेपतोऽभिप्रायं ज्ञात्वा तस्मिन्राष्ट्रे तेनैव निहतराजवंश्यमेव राज्येऽभिषेचयेत् इदं तथा कार्यमिदं नेति तदमात्यानां च नियमं कुर्यात् २०२

उ·
२३५

235

स्यंदनेति समभूभागे रथाश्वैर्युध्येत् तत्तेन प्रदेशसामर्थ्यात् जयानूदके नौकाहस्तिभिः गुल्मवृक्षावृते
धनुर्भिः गर्तकंटकपाषाणादिरहितस्थाने खड्गचर्मायुधैर्युध्येत् १९२ कौरवेति कुरुक्षेत्रो
द्भवान् मत्स्यान् विराटदेशवासिनः पंचालान् कान्यकुब्जाहिछत्रोद्भवान् शूरसेनजान् माथुरान् प्रांशु
न् एव प्रायेण शरीरबललौर्याहंकारयोगात् सेनाग्रे योधयेत् अन्यानपि देशोद्भवान् दीर्घलघुदेहान् मनुष्यान्
शूराभिमानिनः सेनाग्रे एव योधयेत् १९३ प्रहर्षयेदिति बलं रचयित्वा जये धर्मो भूलाभः कृता
भिमुखहतस्य च स्वर्गप्राप्तिः पलायने च प्रभुदुरितग्रहणं नरकगमनं चेत्यादिवादैः युद्धार्थमुत्
साहयेत् तांश्च योधान् केनाभिधानेन हृष्यंति कुप्यंति वा इति परीक्षयेत् युध्यमानानामरिभिः यु
ध्यमानानामपि सैन्यपलायनपरिग्रहादि चेष्टां बुध्येत् १९४ उपरुध्येति दुर्गाश्रयमरुं गोश्रयेत्

स्यंदनाश्वैः समे युद्ध्येदनूपे नौद्विपैस्तथा वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले १९२
कौरुक्षेत्रांश्च मत्स्यांश्च पंचालान् शूरसेनजान् दीर्घान् लघूंश्चैव नरानग्रानीकेषु योधयेत्
प्रहर्षयेद्बलं व्यूह्य तांश्च सम्यक् परीक्षयेत् चेष्टांश्चैव विजानीयादरीन्योधयतामपि १९४
उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत् दूषयेच्चास्य सततं यवसान्नोदकेंधनं १९५
भिंद्याच्चैव तडागानि प्राकारपरिखास्तथा समवस्कंदयेच्चैनं रात्रौ वित्रासयेत्तथा १९६
उपजप्यानुपजपेद्बुध्येतैव च तत्कृतं युक्ते च दैवे युध्येत जयप्रेप्सुरपेतभीः १९७

वा राष्ट्रं च अस्य युध्यमानमपि श्रवेष्ट्यासीत् अस्य च देशमुत्सादयेत् तथा अस्य यवसान्नोदकेंधनानि सर्वदास्योपद्र
वर्णैर्मिश्रणादिना दूषयेत् १९५ भिंद्यादिति शत्रोपजीव्यानि तडागादीनि नाशयेत् प्राकारगोप्र
कारानि भयात् परिखाश्च भेदेन पूरणादिना वा निरुदकाः कुर्यात् देवं यातु नशंकितमेव समयाव
स्कंदयेत् तथा अशक्ति रात्रौ भेरीकाकाहलादिवाद्यैः वित्रासयेत् तदानीं च १९६ उप
जप्येति उपजप्यान् हितान् रिपुवंश्यान् राज्यार्थिनः तस्यामात्यादीन् भेदयेत् उपजप्येन अन्तः कृता
नां च तेषां चेष्टां जानीयात् शुभग्रहदशाशकुनादि शुभफलं युक्ते दैवे अवगते निर्भयो विजय

म॰ स्मृ॰ टी॰ १३६

धर्मज्ञमिति धर्मज्ञं कृतोपकारस्य स्मर्तारं सानुरागममनुरक्तं स्थिरकार्यारंभं दृढं प्रीतिमत्प्रकृतिकं प्रकृतिं मित्रमतिशयेन प्रशस्यते ९ प्राज्ञमिति विद्वांसं महाकुलं विक्रान्तं चतुरं दातारमुपकारस्मर्तारं सावष्टंभः व्यसनेऽपि धैर्ययुक्तं कष्टं पण्डिता वदन्ति तेन तथाविधेन शत्रुणा संधातव्यं १० आर्यतेति साधुत्वं पुरुषविशेषज्ञता विक्रान्तत्वं कृपालुत्वं सर्वदा च स्थौललक्ष्यं बहुप्रदत्वं अत एव सर्वस्य दानमस्य स्थौललक्ष्यं दानशौण्डावबहुप्रदत्वमभिधानिकाः स्थौललक्ष्यमर्थेषु बहुलं दर्शनमिति मेधातिथिगोविन्दराजयोः पदार्पकयनमनागमेपि एतत्तूदासीन

धर्मज्ञं च कृतज्ञं च तुष्टप्रकृतिमेव च अनुरक्तं स्थिरारंभं लघुमित्रं प्रशस्यते ९ प्रा
ज्ञं कुलीनं शूरं च दक्षं दातारमेव च कृतज्ञं धृतिमन्तं च कष्टमाहुररिं बुधाः १० ।
आर्यता पुरुषज्ञानं शौर्यं करुणवेदिता स्थौललक्ष्यं च सततमुदासीनगुणोदयः ११ ।
क्षेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीमपि परित्यजेन्नृपो भूमिमात्मार्थमविचारयन् १२
आपदर्थं धनं रक्षेद्दारान्रक्षेद्धनैरपि आत्मानं सततं रक्षेद्दारैरपि धनैरपि १३

गुणसामग्र्यं तस्मादेवंविधमुदासीनमाश्रित्य कालहरणेनापि अरिणा सह योद्धव्यम् पशुवृद्धिकरी द्रष्टव्य ११ क्षेम्यामिति अनामयादिकल्याणमपि नित्यमातृकं सदा सस्यप्रदामपि प्रचुरतृणादियोगात् पशुवृद्धिकरीमपि भूमिमात्मरक्षार्थमविलम्बमानो राजा निजरक्षाप्रकारान्तराभावात् परित्यजेत् तस्मात्सर्वविषयात्संरक्षणधर्मः स्मर्यते १२ आपदिति आपन्निवारणार्थं धनं रक्षेत् यागीयं धनं परित्यागेनापि दारान्रक्षेत् आत्मानं पुनः सर्वदा धनदारत्यागेनापि रक्षेत् सर्वत एवात्मानं गोपायेदिति श्रुत्या प्राणरक्षा प्रमत्तरणव्यतिरेकेणात्मरक्षोप

म॰ टी॰ १३६

136

प्रमाणानीति तेषां परकीयानां धर्मोदत्तपेताधर्मान्न्यायधर्मेन याथान्न्येणाभ्युपेतान्प्रमाणीकुर्यां
देवं चाभिषिक्तममात्यादिभिः सहरत्नादिदानेन पूजयेत् ३ यस्मात् आदानमिति यद्यप्य
भिलषितानां द्रव्याणां ग्रहणमप्रियकरं तु सर्गः तथापि समयविशेषे दानमादानं च प्रशस्य
ते तस्मात्तस्मिन्काले एवं पूजयेत् ४ सर्वकर्मेदमिति यत्किंचित्संपाद्यते तत्सर्वं जन्मार्जित
सुकृतदुःकृतरूपेकर्मणा दैवमाहात्म्याभिधेयेन यदिह लोकार्जितं मानुषशब्दवाच्यं व्यापारस्या
पत्तनयोर्मध्ये दैवं चिन्तयितुमशक्यं मानुषे तु पर्यालोचनमस्ति अतो मानुषद्वारेणैव का
र्यसिद्धये यतितव्यं ५ सहवापीति एवमुपक्रमणीयेन शत्रुणा सह प्रवृद्धेन कर्त्तव्यं यदि ।

प्रमाणानि च कुर्वीत तेषां धर्मान्यथोदितान् । रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह
आदानमप्रियकरं दानं च प्रियकारकम् । अभीप्सितानामर्थानां काले युक्तं प्रशस्यते ४
सर्वं कर्मेदमायत्तं विधाने दैवमानुषे । तयोर्दैवमचिन्त्यं तु मानुषे विद्यते क्रिया ५ ।
सह वापि व्रजेद्युक्तः संधिं कृत्वा प्रयत्नतः । मित्रं हिरण्यं भूमिं वा संपश्यंस्त्रिविधं फलं
पार्ष्णिग्राहं च संप्रेक्ष्य तथाक्रन्दं च मण्डले । मित्रादप्यमित्राद्वापि यात्राफलमवाप्नुयात् ७
हिरण्यभूमिसंप्राप्त्या पार्थिवो न तथैधते । यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम् ८

वा स एवमित्रं तेन दत्तं हिरण्यं भूम्येकदेशो वा यत एतत्त्रयं तत्र यत्फलं मत्वा तेन सह संधिं कृ
त्वा प्रयत्नवान्व्रजेत् ६ पार्ष्णीति विजिगीषोररिं प्रति निर्यातस्य यः पृष्ठवर्ती नृप
तिर्देशाक्रमणं ध्याचरति पार्ष्णिग्राहः तस्य तथाकृतवतो यो निवारकः तस्यानन्तरो नृपः
स्याक्रन्दः तावपेक्ष्य यातव्यान्मित्रीभूताद्मित्राद्वा यात्राफलं गृह्णीयात्तावनपेक्ष्य गृ
ह्णन्कदाचित्तत्कृतेन दोषेण गृह्यते ७ हिरण्येति सुवर्णभूमिलाभेन तथा राजा न वृ
द्धिमेति यथेदानीं कृशमप्यागामिकाले वृद्धियुक्तं स्थिरं मित्रं लब्ध्वा वर्द्धते ८

एवमिति एवंविधपरीक्षादिप्रयत्नं वाहनशय्यासनभोजनस्नानानुलेपनेषु सर्वेषु चालंका-
रार्थेषु कुर्वीत २० भुक्तवानिति कृतभोजनश्चांतःपुरे भार्यादिभिः सह क्रीडेत् काला-
नतिक्रमेण च सप्तमे दिवसस्य भागे विहृत्याष्टमे भागे पुनः कार्याणि चिंतयेत् २१ अलंकृ-
तेति कृतालंकारः सन्नायुधजीविनं वाहनान्यश्वादीनि सर्वाणि च शस्त्राणि खड्गादीनि चा-
लंकाराणि संपश्येत् २२ संध्यामिति गत्वेति ततः संध्योपासनं कृत्वा ततः प्रदेशान्त-
रं विविक्तं प्रकोष्ठं वा आश्रमं गत्वा गृहांतरे धृतशस्त्रो रहस्याभिधायिनां चाराणां

एवं प्रयत्नं कुर्वीत यानशय्यासनेशने स्नाने प्रसाधने चैव सर्वालंकारकेषु च २० ।
भुक्तवान्विहरेच्चैव स्त्रीभिरंतःपुरे सह विहृत्य च यथाकालं पुनः कार्याणि चिंतयेत्
अलंकृतश्च संपश्येदायुधीयं पुनर्जनं वाहनानि च सर्वाणि शस्त्राण्याभरणानि च २२
संध्यां चोपास्य शृणुयादंतर्वेश्मनि शस्त्रभृत् रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितं ।
गत्वा कक्षांतरं त्वन्यत्समनुज्ञाप्य तं जनं प्रविशेद्भोजनार्थं च स्त्रीवृतोंतःपुरं जनः २४
तत्र भुक्त्वा पुनः किंचित्तूर्यघोषैः प्रहर्षितः संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः २५
एतद्विधानमातिष्ठेदरोगः पृथिवीपतिः अस्वस्थः सर्वमेवैतद्भृत्येषु विनियोजयेत् ।
२२६ इति श्रीमानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां सप्तमोध्यायः ७

व्यापारं शृणुयात् ततस्तं च जनं संप्रेष्य परिवारकस्त्रीवृतः पुनर्भोक्तुमंतःपुरं प्रविशे-
त् २३ तत्रेति तत्रांतःपुरे वादित्रघोषैः श्रुतिसुखैः प्रहर्षितः पुनः किंचिद्भुक्त्वाना-
तितृप्तः कालानतिक्रमेणायातार्द्धप्रहरायां रात्रौ स्वप्यात् ततो रात्रेः पश्चिमयामे विश्रा-
न्तः सन्नुत्तिष्ठेत् २५ एतदिति एतत्सर्वोक्तं प्रजारक्षणादि नीरोगो राजा स्वयमनुतिष्ठे-
त् अस्वस्थः पुनः सर्वमेतद्योग्यश्रेष्ठामात्येषु समर्पयेत् २२५ इति सप्तमोध्यायः ७

137

सहेति कोपदत्तयप्रकृतिकोपमित्रसत्वव्यसनादिकाः सर्वा आपदो युगपदतिशयेनोत्पन्नात्तान्तान्
मोहसूयेमात् अपितु व्यस्तान्समस्तान्वा सामादीनुपायाञ्च शास्त्रतः सम्प्रयुञ्जीत २४ उपे
तान्मित्यादि उपेताश्चात्माउपेयं प्रासव्यं उपायाः सामादयः सर्वत्र परिपूर्णा एतत्त्रयमव
लंब्य पप्यासामर्थ्यमात्मप्रयोजनसिद्धये यत्नं कुर्यात् २५ एवमिति एवमुक्तप्रकारे
ण सर्वं राजकृत्यं मंत्रिभिः सह विचार्यानंतरं मायुधाभ्यासाधनाव्यायामकृत्वा मध्याह्ने
स्नानादिकमाध्याह्निकं निर्वर्त्य भोक्तुमंतःपुरं प्रविशेत् २६ तत्रात्मइति तत्रांतःपुरे
आत्मतुल्यैः भोजनकालवेदिभिरभेद्यैः सूपकारादिभिः कृतं सुष्ठु परीक्षितं चकोरा।

सह सर्वाः समुत्पन्नाः प्रसमीक्ष्यापदो भृशं संयुक्तांश्च वियुक्तांश्च सर्वोपायान्प्रयोजयेत्
उपेतारमुपेयं च सर्वोपायांश्च कृत्स्नशः एतत्त्रयं समाश्रित्य प्रयतेतार्थसिद्धये २५।
एवं सर्वमिदं राज्ञा सह संमंत्र्य मंत्रिभिः व्यायम्याप्लुत्य मध्याह्ने भोक्तुमंतःपुरं विशेत् २६
तत्रात्मभूतैः कालज्ञैरहार्यैः परिचारकैः सुपरीक्षितमश्नीयादन्नं मंत्रैर्विषापहैः २७
विषघ्नैरगदैश्चापि सर्वद्रव्याणि योजयेत् विषघ्नानि च रत्नानि नियतो धारयेत्सदा २८
परीक्षितास्त्रियश्चैव व्यजनोदकधूपनैः वेषाभरणसंशुद्धाः स्पृशेयुः ससमाहिताः २९

दिदर्शनेन सविषमन्नं दृष्ट्वा चकोरस्याक्षिणी रक्ते भवतः विषापहैश्च मंत्रैर्जप्तमन्नमद्यात्
२७ विषघ्नैरित्यादि विषनाशिभिरौषधैः सर्वाणि भोजनद्रव्याणि योजयेत् विषहराणि
च रत्नानि यत्नवान्सर्वदा धारयेत् २८ परीक्षिताइति स्त्रियश्च गूढचारद्वारेण कृत
परीक्षा गुप्ता प्रथमग्रहणविषविलिप्ताभरणधारणशंकया नित्यं पितवेषाभरणाश्च
नन्यमनस्काः चामरस्नानपानाद्युदकधूपनैरेनं राजानं परिचरेयुः २९

स्त्रीपुं० तेषामष्टादशानां मध्ये आद्यो विहरणादानं विचार्यते तस्य स्वरूपमुक्तं नारदेन ऋणं देयमदेयं च येन यत्र यथा च यत् दानग्रहणधर्मश्च ऋणादानमुच्यते ततः स्वधनस्यान्यस्मिन्नर्पणरूपो निक्षेपः अस्वामिना कृतो विक्रयः संभूय वणिगादीनां कर्मानुष्ठानं दत्तस्य धनस्यापात्रबुध्या क्रोधादिना वा ग्रहणं कर्मकरस्य भृतेरदानं कृतव्यवस्थातिक्रमः क्रयविक्रयं कृत्वा पश्चाद्विप्रतिपत्तिः स्वामिपशुपालयोर्विवादो ग्रामादिसीमाविप्रतिपत्तिः वाक्पारुष्यमाक्रोशनादि दंडपारुष्यं ताडनादि छलेनैव निह्नवेन धनग्रहणं साहसं प्रसह्य धनग्रहणं स्त्रियाश्च परपुरुषसंपर्कः स्त्रीसहितस्य पुंसो धर्मव्यवस्थापनं पैतृकादिधनस्य विभागः द्यूतमक्षादिक्रीडा आह्वयं प्राणिव्यवस्थापनपूर्वकं पक्षिमेषादियोधनमित्येवमष्टादशैतानि लोकव्यवहारप्रवृत्तेः स्थानानि निमित्तानि यद्यप्यृणादानरूपत्वेन ऋतानां तरविशेषत्वादष्टादशसंख्योपपत्तिः ॥ ६ ॥ ७ ॥

स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वयमेव च । पदान्यष्टादशैतानि व्यवहारस्थिताविह ॥ ७ ॥
एषु स्थानेषु भूयिष्ठं विवादं चरतां नृणाम् । धर्मं शाश्वतमाश्रित्य कुर्यात्कार्यविनिर्णयम् ॥ ८ ॥
यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम् । तदा नियुंज्याद्विद्वांसं ब्राह्मणं कार्यदर्शने ॥ ९ ॥
सोऽस्य कार्याणि संपश्येत्सभ्यैरेव त्रिभिर्वृतः । सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा ॥ १० ॥
यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः । राज्ञश्चाधिकृतो विद्वान्ब्रह्मणस्तां सभां विदुः ॥ ११ ॥

एषु ऋणादानादिव्यवहारस्थानेषु बाहुल्येन विवादं कुर्वतां मनुष्याणां मन्वादिपारंपर्यागतत्वेनानित्यं धर्ममवलंब्य कार्यनिर्णयं कुर्यात् भूयिष्ठपदेनान्यान्यपि विवादपदानि संतीति सूचयति तानि प्रकीर्णकशब्देन नारदाद्युक्तानि अत एव नारदः न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णकमिति ॥ ८ ॥ यदा यदा कार्यमिति रागालस्यारोगादिना वा राजा स्वयं कार्यदर्शनं न कुर्यात् तदा तद्दर्शनार्थं कार्यदर्शनाभिज्ञं ब्राह्मणं नियुंजीत ॥ ९ ॥ सोऽस्य स ब्राह्मणोऽस्य राज्ञो द्रष्टव्यानि कार्याणि त्रिभिः ब्राह्मणैः सभायां साधुभिः सभ्यैः कार्यदर्शनाभिज्ञैः वृतस्तामेव राज्ञः सभां प्रविश्योपविष्टः स्थितो वा न तु चंक्रममाणः तस्या चित्तव्याक्षेपसंभवात् तादृग्ग्रहणादानादीनि कार्याणि पश्येत् ॥ १० ॥ यस्मिन् यस्मिन्स्थाने ऋग्यजुःसामवेदिनः त्रयोऽपि ब्राह्म

मानवस्तावत्सां तेषां व्याख्यानं वामयाङ्गिन्नाः प्राचीनाश्चपि च विराव्याख्यानं मुपोषाणां एवं
विधपक्षमहीक्षितः प्रजानां रक्षणाद्दृष्टनिग्रहनित्यतासामेवेतरेतरविवादजपीडापरिहारा
र्थं व्यवहारान् ऋणादानाद्यष्टादशविषयविकल्पाख्यानि प्रत्यर्थिवाक्यजनितसंदेहहारी विचा
र एव व्यवहारः अत्राह कात्यायनः विनानार्थेवसंदेहे हरणं हार उच्यते नानासंदेहहरणाद्व्य
वहार इति स्मृतः तान्व्यवहारान् द्रष्टुमिच्छन्पृथिवीपतिर्वक्ष्यमाणलक्षणान्वितैर्ब्राह्मणैर
मात्यैश्च मन्त्रसाध्यायोगपंचांगमंत्रज्ञैः सह विनीतो वाक्पाणिपादचापलविहाराद्युक्तः अ
विनीते तन्नृपे वादिप्रतिवादिनां प्रतिभाक्षत्यादसम्यगभिधाने तत्त्वनिर्णयो न स्यात् तदर्थो व।

व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः मंत्रज्ञैर्मंत्रिभिश्चैव विनीतः प्रविशेत्सभां १
तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणं विनीतवेषाभरणः पश्येत्कार्याणि कार्यिणां
प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः अष्टादशसु मार्गेषु निबद्धानि पृथक्पृथक् ३ ते
षामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः संभूय च समुत्थानं दत्तस्यानपकर्म च ४ वेतन
स्यैव चादानं संविदश्च व्यतिक्रमः क्रयविक्रयानुशयो विवादः स्वामिपालयोः ५ सीमा
विवादधर्मश्च पारुष्ये दंडवाचिके स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च ६

क्ष्यमाणलक्षणान्वितां सभां प्रविशेत् व्यवहारदर्शनेन च प्रजानामितरेतरपीडायां तत्त्वनिर्ण
येन रक्षणं पूर्ववक्ष्यमाणदृष्टादृष्टात्मकरक्षणफलेनैव फलवत् १ तत्र तस्यां सभायां
कार्यिणो वा पुत्रयो परिविष्टो लचलितकार्ये उपविष्टोपि वा पाणिमुद्यम्य वाकुपरः दक्षिणं बाहुमु
द्धृत्यानुद्धृत्य वेषालंकारः पूर्वश्लोके उद्दिष्टानां ऋत्यमुक्तो ताद्दृशः कार्याणि विचारयेत् २
प्रत्यहं तानि ऋणादानादीनि कार्याण्यष्टादशसु व्यवहारमार्गेषु पतितानि देशजातिकु
लव्यवहारावगतैः शास्त्रावगतैश्च साक्षिदिव्यादिभिर्हेतुभिः पृथक्पृथक् प्रत्यहं विचा
रयेत् ३ तान्येवाष्टादशगणयन्ति तेषां ४ वेत ५ सीमा ६

पाद इति व्यवहारदर्शनाधर्मसंबंधी चतुर्थो भागोऽर्थिनमधर्मकर्तारं प्रत्यर्थिनं वा गच्छति अपरश्च
तुर्थो भागः साक्षिणमसत्यवादिनमन्यः पादः सभासदः सर्वान्धर्मज्ञानिवारकानन्यो
ऽपि पादः राजानं व्रजति अनियमकारित्वात्सर्वेषां पापसंबंधो भवतीत्यत्र विवक्षितं १८ रा
जा यस्यां पुनः सभायामसत्यवादित्वान्निंदार्होऽर्थी प्रत्यर्थी वा सम्यक्न्यायदर्शनेन निंद्यते
तत्र राजा निःपापो भवति सभासदश्च पापेन न संबध्यंते अधर्मकारिणमेव कर्तारं पापमु
पैति १९ जातीति ब्राह्मणजातिमात्रं यस्य विद्यते न तु ब्राह्मणकर्मानुष्ठानं वाक्षिगादिवत्
साह्वादिद्वारेणास्य तस्यापान्यायनिरूपणात्मा ब्राह्मणजातिरपि वा यस्य संदिग्धा सा
न ब्राह्मणब्रुवोऽपि सर्वरगतः ब्राह्मणाभावे कामं विना कार्यदर्शनेन नृपतेर्धर्मप्रवक्ता भवेत् न तु

पादोऽधर्मस्य कर्तारं पादः साक्षिणमृच्छति पादः सभासदः सर्वान्पादो राजानमृच्छति
राजा भवत्यनेनास्तु मुच्यंते च सभासदः एनो गच्छति कर्तारं निंदार्हो यत्र निंद्यते १९
जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथंचन २०
यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनं तस्य सीदति तद्राष्ट्रं पंके गौरिव पश्यतः २१
यद्राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रांतमद्विजं विनश्यत्याशु तत्कृत्स्नं दुर्भिक्षव्याधिपीडितं
धर्मासनमधिष्ठाय संवीतांगः समाहितः प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत् २३

धार्मिकोऽपि व्यवहारज्ञोऽपि शूद्रः ब्राह्मणो धर्मवक्तेति विधानादेव शूद्रनिवृत्तिसिद्धौ पुनर्न तु शू
द्र इति निषेधो योग्यब्राह्मणाभावे क्षत्रियवैश्यपरिग्रहानुज्ञानार्थः अत एव कात्यायनः य
त्र विप्रो न विद्वान्स्यात्क्षत्रियं तत्र योजयेत् वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् २०
यस्मात् यस्येति यस्य राज्ञो धर्मविवेचनं शूद्रः कुरुते तस्य पश्यतः पंके गौरिव तद्राष्ट्रम
वसन्नं भवति २१ यद्राष्ट्रं यद्राष्ट्रं शूद्रबहुलं परलोकाभाववादिनास्तिकाक्रांतं द्विजशून्यं तत्स
र्वं दुर्भिक्षरोगपीडितं शीघ्रं विनश्यति अग्नौ प्रास्ताहुतिः सम्यगित्याद्यभावाद्वृष्टिविरहा
दुपजातदुर्भिक्षरोगाद्युपसर्गोपात्पंकमाभावाच्च २२ धर्मेति धर्मदर्शनार्थमासनमु
पविश्याच्छादितदेहोऽनन्यमना लोकपालेभ्यः प्रणामं कृत्वा कार्यदर्शनमुपतिष्ठेत् २३

धर्मभाषकाश्च तथा सह वर्तन्त इति विद्धस्तं हन्ति रेवात्र सभाशब्देनाभिमता यस्मिन्देशे सभां विद्ध-
हन्ति तं धर्मः सत्याभिधानजन्मानृताभिधानजन्मेनाधर्मेण पीडितश्चागच्छति अर्थिप्रत्यर्थि-
नोर्मध्ये एकस्य सत्याभिधानाद् परस्य मृषावादात्तं च सभासदो धर्मस्य पीडाकरत्वाच्छल्य-
मिवाधर्मेणोद्धरन्ति तदा त एव तेनाधर्मशल्येन विद्धा भवन्ति १२ यत एवमतः सभा सभा-
मवगम्य व्यवहारदर्शनार्थं तत्प्रवेशनं न कर्तव्यं प्रविष्टश्चेत्तदा सत्यमेव वक्तव्यं अन्यथा
तूष्णीमवतिष्ठमानो मृषावा वदंस्तु भयपापविभागतः पापी भवति मेधातिथिना च स-
भा वा न प्रवेष्टव्येति सञ्चैव पठितं १३ यत्र यस्यां सभायामर्थिप्रत्यर्थिभ्यामधर्मेण धर्मो
नाश्यते यत्र च साक्षिभिः सत्यमनृतेन नाश्यते सभासदां प्रेक्षमाणानां तान्नाहं सते प्रतीका-
रं कुर्वन्ति भवन्ति धनलोभाद्भयाद्वा दीनो वा तत्र त एव सभासदः पापेन हता भवन्तीत्यर्थः।

धर्मो विद्धस्त्वधर्मेण सभां यत्रोपतिष्ठते शल्यं चास्य न कृन्तन्ति विद्धास्तत्र सभासदः १२
सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम् अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी १३
यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः १४
धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् १५
वृषो हि भगवान्धर्मस्तस्य यः कुरुते ह्यलं वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत् १६
एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः शरीरेण समं नाशं सर्वमन्यद्धि गच्छति १७

माणानामिति षष्ठी चानादरे द्रष्टव्या न च षष्ठी १४ धर्म यस्माद्धर्म एवातिक्रान्तो हन्ता हन्तारं
सहन्तारं हन्ति नार्थिप्रत्यर्थ्यादिस्त एवानतिक्रान्तस्तान्स रक्षति तस्माद्धर्मो नातिक्रमणी-
यः मा स्मान्नतः सहितानतिक्रान्तो धर्मो वधीदिति सभ्यानामनुमवप्रवृत्तप्राड्विवाकसंबोध-
नमिदं अथवा नञो निषेधः अयं न हन्तो धर्मोनरान्मावधीदिति नहन्तव्यैव तामभिप्रायः १५ वृ
षो हि कामानवर्षतीति वृषः वृषशब्देन धर्मउच्यते अलंशब्दो वधार्थः यस्मात्तस्य धर्म-
स्य वारणं कुरुते तं देवा वृषलं जानन्ति न जातिवृषलं वृषलः शाकध्वादित्वात् तस्माद्धर्मं
नोद्वध्यादिति धर्मव्यतिक्रमं विरुन्धार्थं वृषलशब्दार्थनिर्वचनं १६ एकः धर्म एवैको
मित्रं यो मरणे ऽप्यभीष्टफलदानार्थमनुगच्छति यस्मादन्यत्सर्वं भार्यापुत्रादि शरीरेण सह।

म-स्मृ-
टी-
२५०

जीव त्वेपस त्रानेन तदधिकारिणो रक्षामः इदं धनमित्यादिव्याजेन ये बान्धवास्तां जीवं
तीनां तद्धनं गृह्णन्ति तांस्तस्य मागणे चौरदण्डेन धार्मिको राजा दण्डयेत् २९ प्रनष्टं प्रज्ञात।
स्वामिकं धनं राजा कस्य किं प्रनष्टमिति पटहादिना घोष्य राजद्वारादौ रक्षितं वर्षत्रयं स्था
पयेत् वर्षत्रयमध्ये यदि धनस्वाम्यागच्छति तदा स एव गृह्णीयात् तदूर्द्ध्वं नृपतिर्वि
विनियुञ्जीत ३० मम मदीयं धनमिति यो वदति स किंरूपं किंसंख्याकं कुत्र प्रनष्ट
तद्धनमित्यादिविधानेन प्रष्टव्यः ततो यदि रूपसंख्यादीन्सम्यगेव वदति तदा तत्र

240

जीवंतीनां तु तासां ये तद्धरेयुः स्वबांधवाः तान् शिष्याच्चौरदंडेन धार्मिकः पृथि
वीपतिः २९ प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् अर्वाक् त्र्यब्दाद्धरे
त्स्वामी परेण नृपतिर्हरेत् ३० ममेदमिति यो ब्रूयात्सोनुयोज्यो यथाविधि ।
संवाद्य रूपसंख्यादीन्स्वामी तद्द्रव्यमर्हति ३१ अवेदयानो नष्टस्य देशं कालं च
तत्त्वतः वर्णं रूपं प्रमाणं च तत्समं दंडमर्हति ३२ आददीताथ षड्भागं प्रन
ष्टाधिगतान्नृपः दशमं द्वादशं वापि सतां धर्ममनुस्मरन् ३३

धनस्वामी तद्धनं ग्रहीतुमर्हति ३१ अवे नष्टस्य द्रव्यस्य देशकालौ अस्मिन्देशे अस्मि
न्काले नष्टमिति यथावर्णं शुक्लादि आकारं कटकमुकुटादि परिमाणं च यथावद
जानन्नष्टद्रव्यसमं दंडमर्हति ३२ देशकालादिसंवादे पुनः आद यदि राज्ञा प्र
नष्टं द्रव्यं प्राप्तं तस्मात् षड्भागं दशमं द्वादशं वा रक्षादिनिमित्तं पूर्वेषां साधूनाम
यं धर्म इति जानन् राजा गृह्णीयात् धनस्वामिनो निर्गुणत्व सगुणत्वापेक्षयायं
षड्भागादिग्रहणादिग्रहणविकल्पः अवशिष्टं स्वामिने समर्पयेत् ३३

उ.
२५०

अर्थेति प्रजारक्षणे साधनात्मकावैहिकावर्थानर्थौ बुद्ध्वा परलोकार्थं धर्माधर्मौ चैव केव
लावनुरुध्य यथा दृष्टादृष्टविरोधो न भवति तथा कार्यार्थिनां कार्याणि पश्येत् वर्णक्रमे
लके ब्राह्मणादिक्रमेण पश्येत् २४ वाह्यैरिति वाह्यैः स्वरादिभिर्लिङ्गैरभिधानाद
वधारितैरव्यभिचारैरपि प्रत्यर्थिनामन्तर्गतमभिप्रायं निरूपयेत् स्वरो गद्गदादिः
स्वाभाविकवर्णादन्यः हृष्टशोषमुखवैकालिमादिः इङ्गितमधोनिरीक्षणादि आकारो दे
हभवः स्वेदरोमाञ्चादिः चेष्टा हस्तस्फालनादिः २५ यस्मात् आका आकारादिभिः गृ।
बोन्तर्गमा च स्खलनमादादिकया अन्तर्गतं मनो बुद्धिरूपेण परिणतमवधार्यते २६ बा
लेति अनाथबालस्वामिकं धनं पितृव्यादिभिरन्यायेन गृह्यमाणं तावद्राजा रक्षेद्या

अर्थानर्थावुभौ बुद्ध्वा धर्माधर्मौ च केवलौ वर्णक्रमेण सर्वाणि पश्येत्कार्याणि का
र्यिणां वाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणां स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन
च आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः
बालदायादिकं रिक्थं तावद्राजानुपालयेत् यावत्स स्यात्समावृत्तो यावच्चातीतशैश
वः वशापुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च पतिव्रतासु च स्त्रीषु विधवास्वातुरासु

वदसौ षट्त्रिंशदाब्दिकं चर्यमित्युक्तप्रकारेण गुरुकुलात्समावृत्तो भवति तावद्यथा स्या
वशपकवाल्यविगमा यत्स्वशत्रुपादिना बाल एव समावर्त्तते सोऽपि यावदतीतशैशवो भ
वति तावत्तस्य धनं रक्षेत् बाल्यं च षोडशवर्षपर्यन्तं बाल आषोडशाद्वर्षादिति नार
दवचनात् २७ वशेति वशा सवन्ध्या सकृतदारान्तरपरिग्रहः स्वामी निर्वाहार्थोप
कल्पितधनो यासु निरपेक्षः पुत्रासु स्त्रीषु प्रोषितभर्तृकासु निष्कुलासु सपिण्डर
हितासु साध्वीषु स्त्रीषु विधवासु रोगिणीषु पत्न्यां च तस्यापि बालधनस्येव राज्ञा रक्ष
णं कार्यम् अत्र चानेकशास्त्रोपादाने गोवलीवर्दन्यायेन पुनरुक्तिपरिहारः २८

यं त॰ यं पुनरस्वामिकं पुरातनं भूम्यन्तर्गतं निधिं राजा लभते तस्माद्ब्राह्मणेभ्योऽर्धं दत्त्वार्धमात्मीयधनागारे प्रवेशयेत् ३८ निधी॰ निधीनां पुरातनानामस्वामिकानां विद्वद्ब्राह्मणेतरस्वानां सुवर्णाद्युत्पत्तिस्थानानां चार्धहरो राजा यस्मादसौ रक्षति भूमेश्च प्रभुः ३९ दा॰ यद्रुतं लोकानां चौरापहृतं तत् ज्ञात्वा चौरेभ्य आहृत्य धनस्वामिभ्यो देयं तद्धनं राजा स्वयमुपयुञ्जानश्चौरस्य पापं प्राप्नोति ४० जाति॰ धर्मान्ब्राह्मणादिषु जातिनियतान्जानपदांश्च प्रतिनियतदेशव्यवस्थितानाम्नायाविरुद्धान् श्रेणिधर्मान् कुलधर्मांश्चाम्नायैरप्रतिषिद्धाः प्रमाणमिति गौतमवचनात् श्रेणीधर्मान्वणिगादिधर्मा

यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ तस्माद्द्विजेभ्यो दत्त्वार्धमर्धं कोशे प्रवेशयेत् ३८ निधीनां तु पुराणानां सर्वेषामेव च क्षितौ अर्धभाग्रक्षणाद्राजा भूमेरधिपतिर्हि सः ३९ दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनं राजा तदुपयुञ्जानश्चौरस्याप्नोति किल्बिषं ४० जातिजानपदान्धर्माञ्छ्रेणीधर्मांश्च धर्मवित् । समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत् ४१ स्वानि कर्माणि कुर्वाणा दूरे संतोऽपि मानवाः प्रिया भवंति लोकस्य स्वे स्वे कर्मण्यवस्थिताः ४२ नोत्पादयेत्स्वयं कर्म राजा नाप्यस्य पूरुषः न च प्रापितमन्येन ग्रसेदर्थं कथंचन ४३

न्कुलधर्मांश्च प्रतिनियतकुलव्यवस्थितान् ज्ञात्वा तदविरुद्धान् राजा व्यवहारेषु तत्तद्धर्मान्व्यवस्थापयेत् ४१ स्वानि॰ जातिदेशकुलधर्मादीन्यात्मीयकर्माण्यनुतिष्ठंतः स्वे स्वे नित्यनैमित्तिकादौ कर्मणि वर्तमाना दूरेऽपि संतः सान्निध्यनिबंधनस्नेहाभावेऽपि लोकस्य प्रिया भवंति ४२ प्रासंगिकमिदमभिधाय पुनः प्रकृतमाह नोत्पा॰ राजा राजनियुक्तो वा पुरुषो धनलोभादिना कार्यमृणादानादिविवादं नोत्पादयेत् तदाह कात्यायनः न राजा तु वशित्वेन धनलोभेन वा पुनः स्वयं कार्याणि कुर्वीत नराणामविवादिनां न चार्थिप्रत्यर्थिभ्यां निवेदितं विवादं धनादिलोभेन नोपेक्षेत ४३

241

प्रन तद्द्रव्यं कस्यापि प्रनष्टं स्वस्वामिपुरुषैः प्राप्तं रक्षापुरुषैरधिष्ठितं कृत्वा राजस्थाप्यं तस्मिंश्च द्रव्ये
यांश्चौरान्राजा गृह्णीयात् तान् हस्तिना घातयेत् गोविंदराजस्तु शतादभ्यधिके वध इति
दर्शनाद्यत्रापि घातनं सुवर्णमूल्याधिकद्रव्यहरणे वधमाह तच्च संधिं कृत्वा तदयं चोपमिति प
स्वाम्येपि प्रनष्टराजरक्षितहरणेनैव विशेषेणावधविधानाद्दशाधिके वध इत्यस्य विशेषाप
दिष्टवधेन तद्विषयत्वात् ३४ ममायमिति यो मानुषः स्वयं निधिं लब्ध्वान्येन वा निधौ त
वध्यं ममायं निधिरिति वदति स तेन प्रमाणेन च स्वसंबंधं बोधयति तस्य पुरुषस्य निर्गुणत्व
सगुणत्वापेक्षया ततो विधानात् षष्ठं भागं द्वादशं भागं वा राजा गृह्णीयादवशिष्टं तस्यापि प्र
व ३५ अनृतमिति अस्वीयं स्वीयमिति ब्रुवन् स्वधनस्याष्टमं भागं दंड्यः तस्यैव वा निधेरंशं
नाल्पधनं गणयित्वा येनावसादं न गच्छति विषयपक्षलभ्यते तद्दंड्यः अल्पीयसीमिति त्र

प्रनष्टाधिगतं द्रव्यं तिष्ठेद्युक्तैरधिष्ठितं यांस्तत्र चौरान्गृह्णीयात्तान्राजेभेन घातयेत्
ममायमिति यो ब्रूयान्निधिं सत्येन मानवः तस्याददीत षड्भागं राजा द्वादशमेव वा ३५
अनृतं तु वदन्दंड्यः स्ववित्तस्यांशमष्टमं तस्यैव वा निधानस्य संख्यायाल्पीयसीं कलां
विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितं निधिं अशेषतोप्याददीत सर्वस्याधिपतिर्हि सः ३७

नर्निर्देश्यादल्पोयं दंड्यः विकल्पं निर्गुणसगुणापेक्षः ३६ विद्वा विद्वांस्तु न ब्राह्मणः पू
र्वैरुपनिहितं निधिं दृष्ट्वा सर्वं गृह्णीयान्न राज्ञो भागं दद्यात् यस्मात्सर्वस्य धनजातस्य स प्रभुः
अत एवोक्तं सर्वं स्वं ब्राह्मणस्येदमिति तत्स्याम्यपरनिहितनिधिविषयमेतद्वचनमिति तथा च
नारदः परेण निहितं लब्ध्वा राजा त्वपहरेन्निधिं राजगामी निधिः सर्वः सर्वेषां ब्राह्म
णादृते याज्ञवल्क्योप्याह राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योर्द्धं द्विजः पुनः विद्वानशे
षमादद्यात्स सर्वस्य प्रभुर्यतः अतोयमेधातिथिगोविंदराजाभ्यां ममायमिति यो ब्रूया
दित्युक्तो राजादेयांशं निरासार्थं पित्रादिनिहितविषयत्वमेवास्य वचनस्य व्याख्यातं तदसमं
जसं नारदादिमुनिव्याख्याविपरीतत्वकल्पितं मेधातिथिगोविंदराजव्याख्यानमा

तानुपायानाह धर्मेणेति धर्मादिना प्रयुक्तमर्थं साधयेत् तत्र धर्ममाह बृहस्पतिः सुहृत्संबंधि
संदिष्टैः साम्ना वानुगमेन वा प्रायेण वा ऋणी दाप्यो धर्म एष उदाहृतः देयधने अधमर्णस्य
प्रतिपन्नो व्यवहारेणलप्यावस्थति अर्थेपव्ययमानमिति मेधातिथिस्तु निःसोपःसव्य
वहारेण दापयितव्यः अन्यत्कर्मोपकरणं धनं दत्वा कृषिवाणिज्यादिना व्यवहारयितव्यः
तदुत्पन्नं धनं तस्माद्गृह्णीयादित्याह छलादीनि त्रीण्याह बृहस्पतिः छद्मना याचितं चा
र्थमानीय ऋणिकाद्धली आत्माहितादिवा कृत्यदाप्यते यत्र सोपधिः दारपुत्रपशून्हत्वा
कृत्वाद्वारोपवेशनं यत्रर्णी दाप्यतेर्थं स्वं तदाचरितमिष्यते बध्वा स्वगृहमानीय ताडनाद्यै
रुपक्रमैः ऋणिको दाप्यते यत्र बलात्कारः स कीर्तितः ४८ यः स्वः यमुत्तमर्णः संप्रति

धर्मेण व्यवहारेण छलेनाचरितेन च प्रयुक्तं साधयेदर्थं पंचमेन बलेन च ४८ यः स्व
यं साधयेदर्थमुत्तमर्णोधमर्णिकात् न स राज्ञाभियोक्तव्यः स्वकं संसाधयन्धनं ५०
अर्थेपव्ययमानं तु करणेन विभावितं दापयेद्धनिकस्यार्थं दंडलेशं च शक्तितः ५१
अपह्नवेधमर्णस्य देहीत्युक्तस्य संसदि अभियोक्ता दिशेद्देश्यं करणं वान्यदुद्दिशेत् ५२

पन्नार्थमधमर्णं स्वयं बलादिना साधयति सर्वीयं धनं समभ्यकर्षायता प्रसान्निवेद्य कि
मिति बलादिकं कृतवानसीति न स राज्ञाभियोक्तव्यः ५० अर्थेति नाहमस्मै धारयामीति य
न विषये अपह्नवानमधमर्णिकं करणेन लेख्यसाक्षिदिव्यादिना प्रतिपादितार्थमुत्तम
र्णस्य राजा दापयेत् दंडलेशं वापह्नवे द्विगुणमिति वक्ष्यमाणादशक्तभावाद्दंडादल्पमपि दं
डं पुरुषशक्त्यपेक्षया दापयेत् ५१ अप उत्तमर्णोऽस्य धनं देहीति सभायां प्राड्विवाकेनोक्ते
ऽधमर्णेऽस्मै नाहमस्मै धारयामीति अपलापे सति अभियोक्ता पाठे देश्यं धनप्रयोगदेश
वर्तिनं साक्षिणं निर्दिशेत् प्रायेण साक्षिभिरेव त्वामृषादिमाधारजन्तु लोपनिर्णया
त्करणान्तरमुपन्यासः अन्यद्वा करणं लेख्यं पत्रादिकमुपेत ५२

यथा यथा मृगस्य शस्त्रविद्धस्य रुधिरपातैर्व्याधः पदं स्थानं प्राप्नोति तथानुमानेन दृष्टप्रमाणेन राजा धर्मतत्त्वं निश्चिनुयात् ४४ सत्यं व्यवहारदर्शने प्रवृत्तो राजा छलमपहाय सत्यं पश्येत् तथार्थं प्रसादितात्मना पीयोच अर्थं वर्तते गोहिरण्यादिविषयं व्यवहारं पश्येत् न त्वहमनेनात्मनिकोचकेनोपहसित इत्यादिकमल्पापराधं आत्मानं च तत्त्वनिर्णये स्वर्गादिफलभागिनं साक्षिणश्च सत्यवादिनः देशं कालं च देशकालोचितरूपं व्यवहारस्वरूपं गु

यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदं नयेत्तथानुमानेन धर्मस्य नृपतिः पदं ४४
सत्यमर्थं च संपश्येदात्मानमथ साक्षिणः देशं कालं च रूपं च व्यवहारविधौ स्थितः ४५
सद्भिराचरितं यत्स्याद्धार्मिकैश्च द्विजातिभिः तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत्
अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः दापयेद्धनिकस्यार्थमधमर्णाद्विभावितं ४७
यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः तैस्तैरुपायैः संगृह्य दापयेदधमर्णिकं ४८

तु

रुलघुतादिकं पश्येत् ४५ सद्भिः विद्वद्भिर्धर्मप्रधानैर्द्विजातिभिर्यदनुष्ठीयमानं शास्त्रमप्यनुष्ठितं तद्देशकुलजात्यविरुद्धमादाय व्यवहारनिर्णयं कुर्यात् एतत्सकलव्यवहारसाधारणं परिभाषात्मकमुक्तं ४६ सांप्रतमृणादानमधिकृत्याह अथ अधमर्णादर्थसिद्ध्यर्थं धनस्वामिना राजा बोधितो वक्ष्यमाणलेख्यादिप्रमाणेन प्रतिपादितं धनमुत्तमर्णं दापयेत् ४७ कथं दापयेदित्याह यैः यैर्वक्ष्यमाणै रुपायैः स्वप्रयुक्तमर्थमुत्तमर्णो लभेत तैस्तैरुपायैर्वशीकृत्य तदर्थं दापयेत् ४८

म. स्मृ.
टी.
२४३

यः अधमर्णो यत्परिमाणं धनमपलपति अर्थिकः यत्परिमाणे धने मिथ्या वदति तावधा
र्मिकौ अपह्नुतमिथ्योक्तधनाद्द्विगुणं दण्डं नृपेण दापनीयौ अधर्मज्ञाविति वचनात् ज्ञानपूर्व
कमिथ्यापलापोक्तिविषयमिदं भ्रमादिना त्वपलापे मिथ्याभियोगे अपह्नवे तद्द्विगुण
मिति प्रागेव दशमभागं दण्डं वक्ष्यति ५९ पृष्टः धनार्थिना उत्तमर्णेन राजपुरुषाकर्षणा
दाहूतः अधमर्णः प्राड्विवाकेन पृष्टः सन् यदा न धारयामीत्यपह्नुवानो भवति तदा नृप
तिप्रियकृतब्राह्मणसमक्षं त्र्यवरैः साक्षिभिः त्रयोऽवरा न्यूना येषां तैरर्थिना भावनीयः
६० यादृशान् उत्तमर्णादिभिः ऋणादानादिव्यवहारेषु यथाविधाः साक्षिणः क

यो यावन्निह्नुवीतार्थं मिथ्या यावति वा वदेत् तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगु
णं दमं ५९ पृष्टोऽपव्ययमानस्तु कृतावस्थो धनैषिणा त्र्यवरैः साक्षिभिर्भाव्यो
नृपब्राह्मणसन्निधौ ६० यादृशा धनिभिः कार्या व्यवहारेषु साक्षिणः तादृशा
न्संप्रवक्ष्यामि यथावाच्यमृतं च तैः ६१ गृहिणः पुत्रिणो मौलाः क्षत्रविट्शूद्रयो
नयः अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि ६२ आप्ताः सर्वेषु वर्णेषु कार्याः
कार्येषु साक्षिणः सर्वधर्मविदोऽलुब्धा विपरीतांस्तु वर्जयेत् ६३

243

र्तव्यास्तथाविधानुद्देक्ष्यामि यथा च तैः सत्यं वक्तव्यं तदपि प्रकारं वक्ष्यामि ६१ गृहि
कृतदारपरिग्रहाः पुत्रवन्तस्तद्देशजाः क्षत्रियवैश्यशूद्रजातीया अर्थिनिर्दिष्टाः सन्तः
साक्षित्वाय योग्या भवन्ति नेह दारपुत्रपरिभवभयात् तद्देशवासिविरोधाच्च नान्यथा
वदन्ति न तु ये केचिद् ऋणादिव्यवहारेषु साक्षिणः स्युः आपदि तु वाग्दण्डपारुष्यस्त्रीसं
ग्रहणादिषु उक्तव्यतिरिक्ता अपि साक्षिणो भवन्ति ६२ आप्ताः क्षत्रियविट्शूद्रयो
नयः उक्तत्वात् ब्राह्मणपरिग्रहार्थं सर्वेषु वर्णेष्विति अभिधानं सर्ववर्णेषु मध्ये य
थावत्सत्यवादिनः सर्वधर्मज्ञा लोभरहितास्ते साक्षिणः कर्तव्याः उक्तव्यतिरिक्तांश्च

म.
टी.
२४३

अदेश्यं यत्र अपदिश्य ५५ असं यथ ब्रूहि अदेश्यं यत्र देशो धर्मशास्त्रेण कालेन सर्वदाश्रव । स्थानेन संभवति निर्दिश्य वा देश्यादिकं नेतन्मया निर्दिष्टमित्यपलपति यः पूर्वोत्तरान्वा कान यान्विरुद्धान्वावगच्छति यश्च मद्धस्तात्सुवर्णमुपलमनेन गृहीतमिति निर्दिष्टं निर्दिश्यपमत्तु नेहस्तात्गृहीतमित्यादिनाम: पुनरपसरति यः सम्यक्प्रतिज्ञातमर्थं कस्मात्तु पारावावसाक्षि कोदत्तमित्येवमादिप्राड्विवाकेन पृष्टः सन्न समाधत्ते यः साक्षिसंभाषणेन तैर्हि निर्जनादिदेशे साक्षिभिः सार्द्धमन्योन्यं संभाषते यश्चाभाषितार्थस्थिरीकरणाय निरुच्यमानं प्राड्विवाकव चनं नेच्छति यश्च निष्पतेत् न प्रत्युक्तः स्यात् तमत्र पतेदेहस्पोन्यात्योग्यव्यवहार उभिधाय ग्रामात

अदेश्यं यश्च दिशति निर्दिश्यापह्नुते च यः । यश्चाधरोत्तरानर्थान्विगीतान्नावबुध्यते
अपदिश्यापदेश्यं च पुनर्यस्त्वपधावति सम्यक्प्रणिहितं चार्थं पृष्टः सन्नाभिनन्दति
असंभाष्ये साक्षिभिश्च देशे संभाषते मिथः निरुच्यमानं प्रश्नं च नेच्छेद्यश्चापि निष्पतेत्
ब्रूहीत्युक्तश्च न ब्रूयादुक्तं च न विभावयेत् न च पूर्वापरं विद्यात्तस्मादर्थात्स हीयते ५६
साक्षिणः सन्ति मेत्युक्त्वा दिशेत्युक्तो दिशेन्न यः धर्मस्थः कारणैरेतैर्हीनं तमपि निर्दिशेत्
अभियोक्ता न चेद्ब्रूयाद्बध्यो दण्ड्यश्च धर्मतः न चेत्त्रिपक्षात्प्रब्रूयाद्धर्मं प्रति पराजितः

रंगच्छेत् यश्च ब्रूहीत्युक्तो न किंचिद्ब्रवीति उक्तं साध्यं न प्रमाणेन प्रतिपादयति पूर्वं साध्य नमपरं साध्यं तयोनज्ञानातिप्रसाधनमेव साधनत्वेन निर्दिशति असाध्यमेव शशशृङ्गादि तेथन्नदेयमित्यादि साध्यत्वेन निर्दिशति स तस्मात्साध्यार्थाद्धीयते ५७ साक्षिणः सन्ति सा क्षिणो मम विद्यन्त इत्युक्त्वा इति वा पाठः निर्दिशेत्युक्तो यो न निर्दिशति पूर्वोक्तैरेतैः कारणैः धर्मस्थः प्राड्विवाकः पराजितं कथयेत् नानारः सन्ति मेत्युक्त्वा इति वा पाठः अत्र च च्छन्दा समिकारस्य शुद्धिं नृपतेः ५८ अभियोक्ता योर्थी स न राजस्थाने निवेदयन् भाषां न ब्रूयात्तदा विषयगौरवापेक्षया बध्यो लघुविषये दण्ड्यश्च धर्मतः स्यात् प्रत्यर्थी पुनर्यदि पक्षत्रयमध्ये

म स्मृ
टी०
२५५

स्त्रीणां स्त्रीणामन्योन्यऋणादानव्यवहारे स्त्रियः साक्षिण्यो भवन्ति द्विजानां ब्राह्मणक्षत्रियविशां सदृशाश्च सजातीयाः साक्षिणः स्युः एवं शूद्रः साधवः शूद्राणां चाण्डालादयः चाण्डालादीनां साक्षिणः स्युः एतच्च सजातीयसाक्ष्याभिधानमुक्तलक्षणसजातीयसाक्षिसंभवे असंभवे विजातीया अपि साक्षिणः स्युः अत एव याज्ञवल्क्यः यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ६८ अनुगृहाभ्यन्तरे अरण्यादौ चौरादिकृतोपद्रवे देहोपघाते वा ऽ तत्काले य आकृतेयः कश्चिदुपलब्धा ते स विवादिनोः साक्षी भवति न तु ऋणादानादिवदुक्तलक्षणोपेतः तदेवोदाहरणा स्पष्टयति ६९ स्त्रिया अन्तर्वेश्मादावुक्तसाक्ष्यभावे सति स्त्रीबालवृद्धशिष्यबन्धुदासकर्मकरा अपि साक्षिणः स्युः नन्वस्थिरबुद्धित्वादिना स्त्रीबालादीनां कथमत्र साक्षित्वमित्याह

स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः
अनुभावी तु यः कश्चित्कुर्यात्साक्ष्यं विवादिनां अन्तर्वेश्मन्यरण्ये वा शरीरस्यापि चात्यये ६९
स्त्रियाप्यसंभवे कार्यं बालेन स्थविरेण वा शिष्येण बन्धुना वापि दासेन भृतकेन वा ७०
बालवृद्धातुराणां च साक्ष्येषु वदतां मृषा जानीयादस्थिरां वाचमुत्सिक्तमनसां तथा ७१
साहसेषु च सर्वेषु स्तेयसंग्रहणेषु च वाग्दण्डयोश्च पारुष्ये न परीक्षेत साक्षिणः ७२
बहुत्वं परिगृह्णीयात्साक्षिद्वैधे नराधिपः समेषु तु गुणोत्कृष्टान्गुणिद्वैधे द्विजोत्तमान्

७० बाल बालवृद्धव्याधितानामुपप्लुतमनसां च मत्तोन्मत्तादीनां साक्ष्येष्वनृतं वदतां नस्थिरा वाग्भवति अतस्तामनुमानेन जानीयात् यथोक्तं वाह्यैर्विभावयेल्लिङ्गैरिति ७१ साह। गृहदाहादिसाहसेषु चौर्यस्त्रीसंग्रहणवाग्दण्डपारुष्येषु च गृहिणः पुत्रिण इत्याद्युक्तसाक्षिपरीक्षां न कुर्यात् स्त्रियाप्यसंभवे कार्यमित्यस्यैवोदाहरणप्रपंचः ७२ बहु साक्षिणां परस्परविरुद्धाभिधाने बहुभिर्यदुक्तं तदेव निर्णयार्थं तेन राजा गृह्णीयात् समेषु विरुद्धाभिधायिषु गुणवतः प्रमाणीकुर्यात् गुणवतामेव विप्रतिपत्तौ द्विजोत्तमान् द्विजेषु यज्ञतमाः क्रियावतः तान्प्रमाणीकुर्यात् अत एव बृहस्पतिः गुणिद्वैधे क्रियायुक्ता इति गोविंद

उ०
२५५

244

नार्थ ऋणाद्यर्थसंबंधिनो धमर्णाद्याः नाप्ता मित्राणि सहायास्तत्परिचारकाः शात्रवः स्पष्टांतरा
वगतकौटसाक्ष्याः असम्याश्च रोगपीडिताः महापातकादिदूषिताः साक्षित्वेन कर्तव्याः।
लोभाद्रागद्वेषस्मृतिभ्रमादीनामन्यथाभिधानहेतूनां संभवात् ३४ न साक्षी प्रभुत्वात्साक्षि
धर्मेण प्रष्टुमयोग्यत्वात् राजा साक्षी कार्यः कारुः सूपकारादिः कुशीलवो नटादिः तयोः
स्वकर्मव्यग्रत्वात्प्रायेण धनलोभाच्च साक्षित्वे श्रोत्रियोऽध्ययनव्यग्रतया न साक्षी
लिंगस्थो ब्रह्मचारी संगविनिर्गतः परिव्राजकः तयोरपि स्वकर्मव्यग्रत्वाद्ब्रह्मनिष्ठत्वा।
च्च न साक्षित्वं श्रोत्रियग्रहणादग्निहोत्रादिव्यग्रेतरब्राह्मणस्य न निषेधः ३५ नाध्यधी
नि अध्यधीनोन्यतंत्रः गर्भदासः वक्तव्यो विहितकर्मत्यागाल्लोकगर्हितो दस्युः क्रूरकर्मा

नार्थसंबंधिनो नाप्ता न सहाया न वैरिणः न दृष्टदोषाः कर्तव्या न व्याध्यार्ता न दूषिताः ३४
न साक्षी नृपतिः कार्यो न कारुककुशीलवौ न श्रोत्रियो न लिंगस्थो न संगेभ्यो विनिर्गतः
नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत् न वृद्धो न शिशुर्नैको नांत्यो न विकलेंद्रियः
नार्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः न श्रमार्तो न कामार्तो न क्रुद्धो नापि तस्करः ३७

न चौरः नापि तस्कर इति वक्ष्यमाणत्वात् विकर्मकृत् निषिद्धकारी एतेषां रागद्वेषसंभवात् न
वृद्धः प्रायेण स्मृतिभ्रंशसंभवात् न बालोऽप्राप्तव्यवहारत्वात् नैको विनाशप्रवासयोः कृपा
तस्यत्र्यवरैरिति विधानादर्थात्प्रतिषेधसिद्धे एकस्य चिदवस्थायां द्वयोरप्यनुज्ञानात्पुनर्नि
षेधवचनं अंत्यः श्वपाकचांडालादिः स्वधर्मानभिज्ञत्वात् विकलेंद्रियः उपलब्धिवैकल्यत्वान्न
साक्षी कार्यः ३६ नार्तः आर्तो बंधुविनाशादिना मत्तो मद्यादिना उन्मत्तो भूतावेशा।
दिना क्षुधापिपासया पीडितः श्रमार्तोऽध्वगमनादिना खिन्नः कामार्त उमत्तः क्रोधश्चो
रश्च साक्षी न कार्य इति संबध्यते तत्रार्तस्य बुद्धिवैकल्यात् चोरस्याधार्मिकत्वात् ३७

म॰ स्मृ॰ टी॰ २४५

स्वभा यत्साक्षिणो भयादिव्यतिरेकेण स्वभावाद्ब्रूयुस्तद्व्यवहारनिर्णयार्थं ग्राह्यं यत्पुनः स्वभावविकाद
भयादेरन्यथा विकारेण ब्रूयुस्तद्धर्मविषये निःप्रयोजनं तन्न ग्राह्यं ७८ सभां सभामध्यं साक्षि
णः संप्राप्तानर्थिप्रत्यर्थिसमक्षं राजाधिकृतो ब्राह्मणः प्राड्विवाको वक्ष्यमाणप्रकारेण पृ
च्छेत् ७९ यद्द्वयोः यद्द्वयोरर्थिप्रत्यर्थिनोरनयोः परस्परमस्मिन्कार्ये चेष्टितं जानीथ तत्सर्वं
सत्येन कथयत युष्माकमत्र साक्षित्वं ८० सत्यं साक्षी साक्ष्यकर्मणि सत्यं ब्रुवन् पूर्वोक्तं ब्रह्मलो
कानाप्नोति इह लोके च प्रकृष्टां ख्यातिं लभते यस्मादेषा सत्यात्मिका वाक् तेर्मत्वेन पूजिता ।

स्वभावेन च यद्ब्रूयुस्तद्ग्राह्यं व्यावहारिकं अतो यदन्यद्विब्रूयुः धर्मार्थं तदपार्थकं ७८ सभां
तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ प्राड्विवाकोऽनुयुञ्जीत विधिनानेन सान्त्वयन् ७९
यद्द्वयोरनयोर्वेत्थ कार्येऽस्मिन् चेष्टितं मिथः तद्ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता ८० सत्यं सा
क्ष्ये ब्रुवन्साक्षी लोकानाप्नोति पुष्कलान् इह चानुत्तमां कीर्तिं वागेषा ब्रह्मपूजिता ८१ साक्ष्ये
नृतं वदन् पाशैर्बध्यते वारुणैर्भृशं विवशः शतमाजातीस्तस्मात्साक्ष्यं वदेदृतं ८२ सत्येन पू
यते साक्षी धर्मः सत्येन वर्द्धते तस्मात्सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः ८३ आत्मैव ह्या
त्मनः साक्षी गतिरात्मा तथात्मनः मावमंस्थाः स्वमात्मानं नृणां साक्षिणमुत्तमं ८४

245

८२ सा यस्मात्साक्ष्ये मृषा कथयन् वरुणसंबन्धिभिः पाशैः सर्परज्जुभिर्जलोदरेण वा परतंत्री
कृतः शतं जन्मानि यावद्दृढं पीड्यते तस्मात्साक्ष्ये सत्यं ब्रूयात् ८२ सत्ये यस्मात्सत्येन पूर्वार्जि
तादपि पापात्साक्षी मुच्यते धर्मश्चास्य सत्याभिधानेन वृद्धिमेति तस्मात्सर्ववर्णविषये साक्षि
भिः सत्यं वक्तव्यं ८३ आ यस्माच्छुभाशुभप्रवृत्तिष्वात्मन आत्मैव साक्षी तथा आत्मन आत्मै
व शरणं तस्मादेनं नराणां मध्ये उत्तमं साक्षिणं मा मृषाभिधाने नावज्ञासीः ८४

समक्षदर्शनाच्चक्षुर्भ्यां साक्षाद्दर्शनाच्छ्रोत्राभ्यां च श्रवणात्साक्ष्यं सिध्यति तत्र साक्षी सत्यं ब्रुवन्धर्मार्थाभ्यां
न मुच्यते सत्यवचने धर्मो यतो दंडाभावेन चार्थहान्यभावात् ७४ साक्षी साक्षी दृष्टश्रुतादन्यादृश
मार्यसभायां वदन्नधोमुखो नरकं गच्छति परलोके कर्मांतरजन्यस्वर्गरूपफलादानेन पापेन प्रति
बंधे सति हीयते ७५ यत्र तमस्मिन्विषये भव साक्षीत्येवमकृतोपि यत्र किंचिद्दृणदानादि य
पश्यति वाक्पारुष्यादि वा शृणोति तत्रापि साक्षी सन्पृष्टः सन्यथोपलब्धं कथयेत् अयमकृत
साक्षी सामान्येन मनुनोक्तः अस्येव ग्रामश्च प्राड्विवाकश्च राजा चेत्यादिना नारदादिभिः सप्तविध

समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिध्यति साक्षी तत्र ब्रुवन्सत्यं धर्मार्थाभ्यां न हीयते ७४
साक्षी दृष्टश्रुतादन्यद्विब्रुवन्नार्यसंसदि अवाङ्नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते ७५
यत्रानिबद्धोवीक्षेत शृणुयाद्वापि किंचन पृष्टस्तत्रापि तद्ब्रूयात् यथादृष्टं यथाश्रुतं ७६
एकोलुब्धस्तु साक्षी स्याद्बह्व्यः शुच्योपि न स्त्रियः स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येपि ये वृताः

मनुः ७७ एको एकोलुब्ध उभयत्र प्रकारप्रश्लेषः लोभादिरहित एकोपि साक्षी स्यात् तत्र ए
व व्यासः श्रुचिक्रियश्च धर्मज्ञः साक्षी यत्रानुभूतवाक् प्रमाणमेकोपि भवेत्साहसेषु विशेष
तः मेधातिथिगोविंदराजाभ्यां तु एकोलुब्धस्तु साक्षी स्यादिति पठितं व्याख्यातं च लोभवाने
कः साक्षी न भवति एवं चालुब्धो गुणवान्कस्मिंश्चिदवस्थायामेको साक्षी भवतीति स्त्रियः पुन
र्यशोचादियुक्ता बह्व्योपि अस्थिरबुद्धित्वाद्दृणदानादौ पर्यालोचितव्यवहारे साक्षिण्यो न स्युः
अपर्यालोचनेन तु स्तेयवाग्दंडपारुष्यादौ स्त्रियाप्यसंभवे कार्यमिति माहितल्लमनुः स्तेये पलपादि

म॰ स्मृ॰
टी॰
२५६

यमो सर्वसंयमनाद्यमः परमात्मा वैवस्वतः वैवस्वतस्तु दण्डधारित्वात् यो तस्मादेवः यस्तवैष
हृदि तिष्ठति तेन सह यत्पापं कथनेन यदि तव विवादः यस्तत्त्वतोऽन्तर्गतमसावन्यथा जानाति तव
सत्यपापं कथयसि तदा तथा मिथ्या सह तव विप्रतिपत्तिः स्यात् एवं सति सत्याभिधानेनैव
निःपापत्वं कृतकृत्योऽसीति पापनिर्दहनार्थं मा गङ्गां मा च कुरुक्षेत्रं यासी मनूक्तमेव गङ्गा
कुरुक्षेत्रयोः स्नानं मत्स्यपुराणेष्वाम्नानस्फुटीकृतं कुरुक्षेत्रसमा गङ्गा यत्र तत्रावगाहि
तेति मेधातिथिगोविन्दराजौ तु विवस्वतः पुत्रो यो यमो दक्षिणादिक्पालो लोकतः कर्मणां
चरीभूतत्वात् तव हृदये स्फुरति तेन सहार्थमेकाविनाभावाद्यदि तव विवादो नास्ति तदा मे

यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः ९२
नग्नो मुण्डः कपाली च भिक्षार्थी क्षुत्पिपासितः अन्धः शत्रुगृहं गच्छेद्यः साक्ष्यमनृतं वदेत्
अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं पतेत् यः प्रश्नं वितथं ब्रूयात्पृष्टः सन्धर्मनिश्चये
अन्धो मत्स्यानिवाश्नाति सकण्टकैः स नरः सह यो भाषतेऽर्थवैकल्यमप्रत्यक्षं सभां गतः ९५
यस्य विद्वान्हि वदतः क्षेत्रज्ञो नाभिशङ्कते तस्मान्न देवाः श्रेयांसं लोकेऽन्यं पुरुषं विदुः ९६

246

गङ्गां मा कुरुक्षेत्रं यासीरिति व्याचक्षते ९२ नग्नो यः साक्ष्यमनृतं वदेत्स नग्नः कृतवपनो मुण्ड
न पुनरिभवो अन्धः खर्परिहस्तः क्षुत्पिपासितो भिक्षार्थी शत्रुगृहं गच्छेत् ९३ अवाक् यो धर्मनिश्चयनि
मित्तं पृष्टः सन्प्रश्नं वितथं ब्रूयात्स पापवान्योमहान्धकारे यानरकं तत्र गच्छेत् ९४ अन्धो यः सभां प्रा
प्तः तत्त्वार्थस्यापार्थस्याभिधानं तत्र उपलब्धमुक्तो वा लाभादिसत्त्वलेशलोभेन कथयति स नरोऽन्ध
इव सकण्टकान्मत्स्यानश्नाति स एव दुःखमाप्नोति तेऽत्र एवमेव महदुःखं भजते ९५ यस्य यस्य वद
तः सर्वज्ञोऽन्तर्यामी किमयं सत्यमाह उतानृतमिति न शङ्कते किं तु सत्यमेवायं वदतीति निर्विशङ्कः
संपद्यते तस्मात्पुरुषाद् अन्यं श्रेष्ठं नरं पुरुषं देवा न जानन्ति ९६

उ॰
२५६

मन्नं पापकारिणो मन्यन्ते अस्मान्धर्मप्रवृत्तान्न कश्चित्पश्यतीति तान्पुनर्वक्ष्यमाणाः देवाः पश्यन्ति स्वस्यान्तरात्मा च पश्यति ८५ द्यौः स्वर्लोकः पृथिवी जलं हृदयस्थजीवश्चन्द्रादित्याग्नियमवायुरात्रिसंध्याद्वयधर्माः सर्वशरीरिणां शुभाशुभकर्मज्ञाः दिवादीनां वाधिष्ठात्री देवतास्ति सा च प्रशरीरिणां पापपुण्यावस्थितेव सर्वं जानाति मनुष्याणामेतद्दैवतदर्शनेन तदङ्गीकरोति यत्नेन ८६ देवप्रतिमादिदेवब्राह्मणसन्निधाने द्विजातिप्रभृतीन्प्राङ्मुखानुदङ्मुखान्वा स्वयं प्रयतः प्राड्विवाकः पूर्वाह्णकाले सभ्यान्सत्यं साक्ष्यं पृच्छेत् ८७ ब्रूहि ब्रूहीत्येव शब्दमुच्चार्य ब्राह्मणं पृच्छेत् सत्यं ब्रूहीति क्षत्रियं गोबीजसुवर्णापहारे पातकं पतितत्वानृताभिधाने स्यादित्येवं वैश्यं।

मन्यन्ते वै पापकृतो न कश्चित्पश्यतीति नः तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः ८५ द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः रात्रिः संध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनां ८६ देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान् उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वै शुचिः शुचीन् ८७ ब्रूहीति ब्राह्मणं पृच्छेत्सत्यं ब्रूहीति पार्थिवं गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ८८ ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा ८९ जन्मप्रभृति यत्किंचित्पुण्यं भद्र त्वया कृतं तत्ते सर्वं शुनो गच्छेद्यदि ब्रूयास्त्वमन्यथा ९० एकोऽहमस्मीत्यात्मानं यत्त्वं कल्याण मन्यसे नित्यं स्थितस्ते हृद्येष पुण्यपापेक्षिता मुनिः ९१

शूद्रं पुनः सर्वैर्वक्ष्यमाणपापैः संबध्यसे यदि मृषा वदसीति पृच्छेत् ८८ ब्रह्म ब्राह्मणहन्तुः स्त्रीघातिनो बालघातिनश्च ये नरकादिलोका ऋषिभिः स्मृताः ये च मित्रद्रोहकारिणो ये चोपकर्तुरपकारिणस्ते ते लोका अनृतं वदतो भवेयुः ८९ जन्म हे भद्र आचार यत्त्वया जन्मप्रभृति यत्सुकृतं कृतं तत्ते सर्वं कुक्कुरान्संक्रामति यद्यसत्यं ब्रवीषि ९० एकोऽहमस्मि एक एवाहमस्मि जीवमात्मानं कल्याण यन्मन्यसे मैवं मंस्थाः यस्मादेव पुण्यपापानां द्रष्टा मुनिः सर्वज्ञः सर्वहृदये परमात्मा नित्यमवस्थितः तथा च श्रुतिः द्वा सुपर्णा

सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ९१

म॰ स्मृ॰ टी॰ २५०

247

कृपयानृतं वदन्स्वर्गाद्वा च्यवत इत्यत आह शूद्र यस्मिन्व्यवहारे सत्याभिधाने सति शूद्रवैश्यक्षत्रविप्राणां वधः संपद्यते तत्रानृतं वाच्यं यस्मादस्मिन्विषयेऽनृताभिधानं तत्प्राणरक्षणेन सत्याद्विशिष्यते एतच्च प्रमादस्खलितधर्मकविषयेऽनृतम् न तु धार्मिकसंधिकारस्तेनास्मिन्विषये तथा गौतमः नानृतवदने दोषो जीवनं चेत्तदधीनं न तु पापीयसो जीवनमिति न च जातु ब्राह्मणं हन्यात्सर्वपापेष्ववस्थितमिति मनुनैव वक्ष्यमाणत्वात् ब्राह्मणस्य वधप्रसक्तिरिति वाच्यं उत्पन्नदंडत्वाद्राज्ञः कथंचित्संभवात् अत्र च वचने शूद्रादिक्रमेणाभिधानं वधस्यामंगलत्वात् ॥ वाग्दैवत्यैरिति तेन साक्षिणोऽनृताभिधायिनो वाग्देवताकैश्चरुभिः सरस्वतीं यजेरन् तस्यानृताभिधानजनितपापस्य प्रकृष्टां शुद्धिं कुर्वाणाः साक्षिबहुत्वापेक्षया चरुबहुत्वं न तु एकस्यैव साक्षिणः कपिंजलाधिकरणन्यायेन चरुत्रयं प्रयोज्यं वाग्देवताके चरौ वाक्शब्देनैव देवतात्वेन सरस्वतीग्रहणेन विधिशक्त्या मंत्रेऽभावः स्यादिति न्यायात् तथापि वाग्वै सरस्वतीति श्रुतेर्वाक्सरस्वत्योरेकार्थत्वात्सरस्वतीमित्युपसंहारः अप्रकरणे वेदप्रायश्चित्ताभिधानस्य च

शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते ४ वाग्दैवत्यैश्च चरुभिर्यजेरंस्ते सरस्वतीं अनृतस्यैनसस्तस्य कुर्वाणा निष्कृतिं परां ५ कूष्मांडैर्वापि जुहुयाद्घृतमग्नौ यथाविधि उदित्यृचा वा वारुण्या तृचेनाब्दैवतेन वा ६ त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः तदृणं प्राप्नुयात्सर्वं दशबंधं च सर्वतः ७ यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः ८ असाक्षिकेषु त्वर्थेषु मिथो विवदमानयोः
अविंदंस्तत्त्वतः सत्यं शपथेनापि लंभयेत् ९

वार्थं न तु नियमार्थं शूद्रविट्क्षत्रियविप्रवधविषयानृतवादिनः तत्पापविकल्पः स्यात् ५ कूष्मांडैरिति कूष्मांडैर्यजुर्वैदिकामंत्रा यद्देवा देवहेडनमित्यादयः तैर्मंत्रैर्मंत्रदेवताभ्यो घृतमग्नौ जुहुयात् यथाविधि परिस्तरणादिहोमधर्मेणाग्नौ होमे तु उदुत्तमं वरुणपाशमस्मदवाधममित्येतया वरुणदेवताकया वा ऋचा आपो हि ष्ठेति मनेनाब्दैवताकेन वा त्रृचेन जुहुयात् घृतमग्नाविति सर्वत्रानुषंगः ६ त्रिपक्षादिति अव्याधितः साक्षी ऋणदानादिव्यवहारेषु पक्षत्रयपर्यन्तं यदि साक्ष्यं न वदेत्तदा तद्विवादास्पदं सर्वमृणमुत्तमर्णाय स दद्यात् तस्य च सर्वस्य ऋणस्य दशमभागं राज्ञे दंडं दद्यात् ७ यस्य यस्य साक्षिणः उक्तसाक्ष्यस्य सप्ताहमध्ये व्याधिरग्निदाहः स्वजनपुत्रादिज्ञातिमरणानामन्यतमं भवति देवकृतमिति मिथ्यावादित्वात् ऋणमुत्तमर्णाय दंडं राज्ञे दाप्यः ८ असाक्षिकेति अविद्यमानसाक्षिके व्यवहारे द्वयोः परस्परं विवदमानयोः ततः छलादिव्यतिरेकेण सत्यमलभमानः प्राड्विवाकः शपथेनवस्मै

७

मनुस्मृतिटीका

पृ॰ २५०

यस्य यस्मिन्नश्वादिनिमित्ते साक्ष्येऽनृतं वदन्यावतः संख्यान्पित्रादीन्स्वकृपातान्नरके योजयति तत्संख्या-
कान्क्रमेण परिगणनया मयोच्यमानान्सौम्य शृणु एवं यावतो बांधवान्हंतीति यावतो बांधवानां ह-
नन फलं प्राप्नोति तावत्संख्याकान्शृणु पञ्च इत्येतदनृताभिधाननिंदार्थमिदं ९७ पंच पश्व-
विषयेऽनृते पंच बांधवान्नरके योजयति पंचानां बांधवानां हननजफलं प्राप्नोति एवं दश गोविषये
शतमश्वविषये सहस्रं पुरुषविषये संख्यागौरवं च दंडप्रायश्चित्तगौरवार्थं ९८ हंति हिरण्यविषयेऽनृतं वदन्जाता-
न्पित्रादीनजातांश्च पुत्रप्रभृतीन्नरके योजयति येषां हननफलं प्राप्नोति भूमिविषये चानृतं
वदन्सर्वप्राणिनां हननफलं प्राप्नोति तस्माद्भूमिविषयेऽनृतं मा वदीरिति विशिष्याभिधानं प्राप।

यावतो बांधवान्यस्मिन्हंति साक्ष्येऽनृतं वदन्। तावतः संख्यया तस्मिन्शृणु सौम्यानुपूर्वशः ९७
पंच पश्वनृते हंति दश हंति गवानृते। शतमश्वानृते हंति सहस्रं पुरुषानृते ९८ हंति जाता-
नजातांश्च हिरण्यार्थेऽनृतं वदन्। सर्वं भूम्यनृते हंति मा स्म भूम्यनृतं वदीः ९९ अप्सु भूमिव-
दित्याहुः स्त्रीणां भोगे च मैथुने। अब्जेषु चैव रत्नेषु सर्वेष्वश्ममयेषु च १०० एतान्दोषान-
वेक्ष्य त्वं सर्वाननृतभाषणे। यथाश्रुतं यथादृष्टं सर्वमेवांजसा वद १०१ गोरक्षकान्वाणिज-
कांस्तथा कारुकुशीलवान्। प्रेष्यान्वार्धुषिकांश्चैव विप्रान्शूद्रवदाचरेत् १०२ तद्वदन्ध-
र्मतोऽर्थेषु जानन्नप्यन्यथा नरः। न स्वर्गाच्च्यवते लोकाद्दैवीं वाचं वदंति तां। १०३

श्चित्तगौरवार्थं ९९ अप्सु तडागकूपवाप्युदकादिविषयेऽनृते स्त्रीणां च मैथुनार्थभोगविषये अब्जेषु
च रत्नेषु मुक्ताप्रवालादिपाषाणमयेषु वैदूर्यादिष्वनृते भूमिवद्दोषमाह १०० एतानिति सर्वा-
ननृतभाषणे दोषानवगम्य दृष्टश्रुतानतिक्रमेण सर्वमेवांजसा तत्त्वतो ब्रूहि १०१ गोर गोरक्षा-
जीविनो वाणिज्योपजीविनः सूपकारादिकारुकर्मजीविनः प्रतिषिद्धवृत्तिजीविनो ब्राह्मणान्स्वकृत-
साक्षिप्रश्ने शूद्रवत्पृच्छेत् १०२ तद्वद तद्देतत्साक्ष्यमन्यथापि जानन्नतत्त्वतया धर्मतो दयादिना व्यव-
हारेष्वन्यथा वदन्स्वर्गाल्लोकान्न भ्रश्यति यस्मात्तद्देवनिमित्तं विशेषेण समाभिधानं तां दैवं

यस्मिन् यस्मिन्व्यवहारे साक्षिभिरनृतमुक्तमिति निश्चितं स्यात्तत्तत्कार्यं समाप्तमपि प्राड्विवा-
को निवर्तयेत् यदपि समाप्तं दण्डपर्यन्तं नीतं तदपि पुनरीक्षेत ॥१७॥ लोभादिति वक्ष्यमाणदण्डवि-
शेषार्थं लोभादीन्पृथङ्निर्दिशति लोभेन विपरीतज्ञानेन भयेन मित्रभावेन कामेन क्रोधेन अज्ञ-
ानेनावधानेन साक्ष्यमसत्यमुच्यते ॥१८॥ एषामिति एषां लोभादीनां मध्यादन्यतरस्मिन्निमि-
त्ते सति यो मिथ्या साक्ष्यं वदेत् यस्य तस्य दण्डविशेषान्क्रमशो वदिष्यामि ॥१९॥ लोभादिति लोभेन
मिथ्याभिधाने सति पणानां सहस्रं दण्ड्यः मोहेन प्रथमसाहसं वक्ष्यमाणं भयेन च वक्ष्यमाणौ
मध्यमसाहसौ दण्ड्यौ मैत्रात् प्रथमसाहसं चतुर्गुणं ॥२०॥ कामादिति स्त्रीसंभोगरूपकामानु-
रोधेन मिथ्या वदन्प्रथमसाहसं दशगुणं दण्ड्यः क्रोधेन उत्तमसाहसं त्रिगुणं दण्ड्यः अज्ञाना-

यस्मिन्यस्मिन्विवादे तु कौटसाक्ष्यं कृतं भवेत् तत्तत्कार्यं निवर्तेत कृतं चाप्यकृतं भवेत् ॥१७॥
लोभान्मोहाद्भयान्मैत्रात्कामात्क्रोधात्तथैव च अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते ॥१८॥
एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत् तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्वशः ॥१९॥
लोभात्सहस्रं दण्ड्यस्तु मोहात्पूर्वं तु साहसं भयाद्द्वौ मध्यमौ दण्ड्यौ मैत्रात्पूर्वं चतुर्गुणं ॥२०॥
कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परं अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव च ॥२१॥
एतानाहुः कौटसाक्ष्ये प्रोक्तान्दण्डान्मनीषिभिः धर्मस्याव्यभिचारार्थमधर्मनियमाय च ॥२२॥
कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत् ॥२३॥

द्द्वे पणशते पूर्णे बालिश्यादनवधानात्पणशतमेव दण्ड्य इति सर्वत्रानुषङ्गः ॥२१॥ एतानिति नृपध-
र्मस्यापरिलोपार्थमसत्यनृपाधर्मस्य वारणार्थं एतान्कौटसाक्ष्यविषये पूर्वैर्मुनिभिः प्रोक्तान्द-
ण्डान्मन्वादय आहुः ॥२२॥ एतत्सम्यक्कौटसाक्ष्ये भूयो भूयः कौटसाक्ष्यं कुर्वाणान् क्षत्रिया-
दीन्त्रीन्वर्णान्कौटसाक्ष्ये प्रवृत्तान्पूर्वोक्तदण्डेन दण्डयित्वा धार्मिको राजा स्वराष्ट्रान्निर्वासयेत् ब्रा-
ह्मणं तु हननदण्डव्यतिरेकेण स्वराष्ट्रान्निःसारयेत् न जातु ब्राह्मणं हन्यात्सर्वपापेष्ववस्थितं
राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतमिति पुनः स्ववक्ष्यमाणत्वात् गोविन्दराजस्तु ब्राह्मणं पु-
नः पूर्वदण्डेन दण्डयित्वा नग्नं कुर्यादिति व्याचष्टे मेधातिथिस्तु ब्राह्मणस्य विवासनं वासोपह-
रणं गृहभङ्गो वेति व्याचष्टे ॥२३॥

सह सप्तर्षिभिः विमलेत्यादेर्देवैश्च ब्रह्मादिभिः सन्दिग्धकार्यनिर्णयार्थं शपथाः कृताः वसिष्ठोपनेन पुत्र
शतेभक्षितमिति विश्वामित्रेण कृष्टः स विशुद्ध्येऽपि जनकापतेस्तु दासराजनिशापथं च कारानेकापि
नाऽऽह्ना तूर्णं शपथमिह करोति मूर्खः २० नत्व अल्पेऽपि कार्ये विद्वान् मिथ्याशपथं न कुर्यात् यस्मान्मिथ्या
शपथं कुर्वन् इह लोके परलोके घोरकीर्तिनरकादिप्राप्त्या नरो नश्यति २१ कामि वरुभार्यस्वनाम्ना
महेकामयेन मेव मम प्रेयसी इत्येवं विशिष्ट स्वर्तुला भार्याकामिनी विषये विवाहविषये चान्याम
मावोरव्याग वार्यव्या साय यहारेश्य गो हो मार्थमिथुना यहारेब्राह्मणरक्षार्थं संशोकमप्रधानादेमि
थ्याशपथे पापं नास्ति २२ समे ब्राह्मणं समया होच्चारणेन शपथेत् क्षत्रियं वाहनायुधैः ममनिः
फलेस्यादिति वैश्यं च गोबीजकाञ्चनानि मम मनिः फलानि स्युरिति एवं शूद्रं सर्वाणि पातकानि मे

महर्षिभिश्च देवैश्च कार्यार्थं शपथाः कृताः वसिष्ठश्चापि शपथं शेपे पैजवने नृपे २० नत्व
पापापश्यंकुर्यात् स्वल्पेऽपि नरो बुधः वृथा हि शपथं कुर्वन् प्रेत्य चेह विनश्यति २१ कामि
नीषु विवाहेषु गवां भक्ष्ये तथेन्धने ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकं २२ सत्येन शा
पयेद्विप्रं क्षत्रियं वाहनायुधैः गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः २३ अग्निं वाहाय
येदेनमप्सु चैनं निमज्जयेत् पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत् पृथक् २४ यमिद्धोऽग्निर्न दह
त्यग्निरापोनोन्मज्जयन्ति च न चार्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः २५ वत्सस्य ह्यभि
शस्तस्य पुरा भ्रात्रा यवीयसा नाग्निर्ददाह रोमापि सत्येन जगतः स्पृशः २६.

स्मृतिमेवं शपथयेत् कार्यगौरवापेक्षया २३ अग्निं अग्निसन्निभं पंचाशत्पलिकमयं गोलमयः
पिंडं हस्तद्वये विन्यस्य तं नाशयेत् पुत्रस्य शूद्रादिकं स त पदानि पितामहायुक्तविधिना यहार
येत् जलोकाद्यादिरहिते स्थिरतोये चैनं निमज्जयेत् अथवा धेतिकर्तव्यता स्मृत्यन्तरोक्ता ज्ञेया पु
त्राणां दाराणां वा पृथक् पृथक् शिरांस्येनं स्पर्शयेत् २४ अग्नौ यं यमिद्धोऽग्निर्न दहति आपश्च
यं नोर्ध्वं नयन्ति न चार्तिं तदैव पुत्रमरणादिना महतीं पीडां प्राप्नोति स शपथे विशुद्धो ज्ञेयो
२५ अत्र पुराकृतार्थवादमाह वत्स यस्मात्पूर्वकाले वत्सनामकस्य ऋषेः कनिष्ठभ्रात्रा ब्राह्मणः शूद्रो
भ्रान्तोऽसीत्येवं कनीयसा भ्रात्रा वै मात्रेयेण कुष्ठस्येनेत देवमिति शपथे पापं माग्नि प्रविष्टस्य
त्रिः सर्वस्य जगतः शुभाशुभकर्मद्रष्टाऽऽचारभूतः सत्येन हेतुना रोमैकमपि न ददाह २६.

म॰स्मृ॰
टी॰
२५८

जालांतं गवाक्षादिविवरं प्रविष्टे सूर्ये यद्विमञ्चुपलभ्यते सूक्ष्मं रजो दृश्यते तेन दृश्यपरिमाणानामाद्यं त्रसरेणुं वदंति ३२ त्रसरेणवोऽष्टौ लिक्षैका परिमाणेन तास्तिस्रो राजसर्षपो ज्ञेयः ते त्रयो गौरसर्षपः ३३ सर्षपाः षट् गौरसर्षपाः षट् मध्यो नातिस्थूलो नातिसूक्ष्मो यवः स्यात् त्रिभिर्यवैः कृष्णलं रक्तिकेति प्रसिद्धं तैः पंचभिर्माषः षोडशमाषाः सुवर्णः स्यात् पल्लिंगमप्यार्षं परिमाणवचनः ३४ पलं चत्वारः सुवर्णाः पलं स्यात् दशपलानि धरणं स्यात् कृष्णलद्वयं सममकृतानुलमधृतं रूप्यमाषको व्यवहारः ३५ ते षोडश ते रूप्यषोडशमाषका रौप्यधरणं पुराणश्च राजतो रजतसंबंधी स्यात् कार्षिकः कर्षप्रमाणः ताम्रमयः कार्षापणः पण इति चक्ष्यते कर्षश्च शास्त्रीयपलच-

जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः प्रथमं तत्प्रमाणानां त्रसरेणुः प्रचक्षते ३२ त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः ता राजसर्षपस्तिस्रः ते त्रयो गौरसर्षपः ३३ सर्षपाः षट् यवो मध्यस्त्रियवं त्वेककृष्णलं पंचकृष्णलिको माषस्ते सुवर्णस्तु षोडश ३४ पलं सुवर्णाश्चत्वारः पलानि धरणं दश द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः ३५ ते षोडश स्याद्धरणं पुराणश्चैव राजतः कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ३६ धरणानि दश ज्ञेयः शतमानस्तु राजतः चतुःसुवर्णको निष्को विज्ञेयस्तु प्रमाणतः ३७ पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः मध्यमः पंच विज्ञेयाः सहस्रं त्वेव चोत्तमः ३८ ऋणे देये प्रतिज्ञाते पंचकं शतमर्हति अपह्नवे तद्द्विगुणं तन्मनोरनुशासनं ३९ वसिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्द्धिनीं अशीतिभागं गृह्णीयान्मासाद्वार्द्धुषिकः शते ४०

तुर्थभागो बोद्धव्यः अत एव पलकर्षचतुष्टयमित्याभिधानिकाः ३६ धरणानि दश राजतधरणानि विशेषशतमानो ज्ञातव्यः चतुर्भिः सुवर्णैः निष्कः प्रमाणेन बोद्धव्यः ३७ पणानां पंचाशदधिके द्वे पणशते प्रथमसाहसो मन्वादिभिः कृतः पंच पणशतानि मध्यमः पणसहस्रं तूत्तमः ३८ ऋणे मयोत्तमर्णाय धारयामीति प्रतिज्ञाते सभायामधमर्णेन प्रमादवधमर्णः पणशतानि पंच पणाङ्मेवं दंडमर्हति यदि तु सभायामपि न किंचिदस्मै धारयामीति अपलपति तदा पणशतेदशपणं दंडार्हः स्यात् ३९ इति मनुस्मृतौ दंडप्रकारः वसिष्ठेनोक्तां वृद्धिं धर्मतां धनवृद्धिकरीं वृद्धिजीवी गृह्णीयात् तामेव दर्शयति प्रतिमासं शतमध्यसी

दश । हिरण्यगर्भो मनुर्दशस्थानानि दण्डस्योक्तवान् । यानि क्षत्रियादिवर्णत्रयविषये भवन्ति ब्राह्मणः पुनर्महत्यपराधेप्यक्षतशरीरो देशान्निर्वास्यः २५ उप । लिंगादीन्येतानि दशदण्डस्थानानि अल्पसंदर्शनापराधेऽपराधे लाघवगौरवापेक्षयापानं तदंगताडनछेदनादिकं कार्यं राधे यथाशास्त्रं ते धनदण्डः देहदण्डो मारणं महापातकादौ २६ अनु । पुनः पुनरित्यानि सपराधे कारणं मध्यस्यग्रामारण्यादिवापराधस्थानं दिवारात्र्यादिकं चापराधकालं सम्यग्ज्ञात्वा सामर्थ्यं चापराधकारिणो धनशरीरादिसामर्थ्यमपराधं च लघुगुरुभावेनालोच्य दण्डनीयेषु दण्डं कुर्यात् । एतन्नाभिधायमानं सर्वदण्डदोषभूतं २७ अधर्म । जीवतः ख्यातिर्यशो मृतस्य ख्यातिः कीर्ति-

दशस्थानानि दण्डस्य मनुः स्वायंभुवोऽब्रवीत् । त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत् २५ उपस्थमुदरं जिह्वा हस्तौ पादौ च पंचमम् । चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च २६ अनुबंधं परिज्ञाय देशकालौ च तत्त्वतः । सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् २७ अधर्मदण्डनं लोके यशोघ्नं कीर्तिनाशनम् । अस्वर्ग्यं च परत्रापि तस्मात्तत्परिवर्जयेत् २८ अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकं चैव गच्छति २९ वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम् । तृतीयं धनदण्डं तु वधदण्डमतः परम् ३० वधेनापि यदा त्वेतान् । निगृहीतुं न शक्नुयात् । तदैषु सर्वमप्येतत्प्रयुंजीत चतुष्टयम् ३१ लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि । ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः ३२

र्यशस्तद्वं यथा यत्र्यस्य दण्डनमिह लोके यशोनाशनं मृतस्य च कीर्तिनाशनं च परलोके च जन्मान्तरार्जितस्वर्गप्रतिबन्धकं तस्मात्तत्परिवर्जयेत् २८ अद । राजदण्डानर्हान्पुत्रोमादिना दण्डयन् दण्डार्हांश्चानुरोधादिना उत्सृजन्महतीमख्यातिं प्राप्नोति नरकं च गच्छति २९ वाग्धि । नसाधुकृतवानसि मैवं भूयः कार्षीरिति वाग्दण्डं प्रथममपराधे गुणवतः कुर्यात् । धिक्त्वत्पानोपशम्य तितदाभूर्जन्मा ते माजीवा दर्शनं मेऽपापिष्ठस्य भूयादिति धिग्दण्डमादितस्य कार्यं तथापि यथा साम्मार्गो न निवर्तते तत्र धनदण्डमस्यातीयं कुर्यात् एवमपि चेन्न निवर्तते तदा वधदण्डमंगताडनादिरूपं तत्सकर्पीतन मारणं यथापराधं वधेनापि यदात्मानीति ३० वधे । यदा त्वेतानांगच्छेदनादिना

संप्रति यत्किंचिद्दशवर्षाणीत्यनंतरं भोगेन सत्वहानिं वक्ष्यति तदपवादार्थमिदं तु स्यमानाधीः उष्ट्रो
अश्वश्च वहन्दमनार्थं प्रयुक्तो बलीवर्दादिः एते प्रीत्याश्रमेण भुज्यमानाः कदाचिदपि स्वामिनो न
नश्यंति प्रदर्शनार्थं चेदं प्रीत्योपभुज्यमानं न नश्यतीति विवक्षितं सामान्योपक्रमं चेदं विशेषाभिधा
नमिति न पुनरुक्तिर्गता ॥५५॥ यत्तु यत्किंचिद्दशवर्षाणि तत्र समक्षमेव प्रीत्यादिव्यतिरेकेण परैर्द
शवर्षाणि भुज्यमानं स्वामी प्रेक्षते मा भुज्यतामिति प्रतिषेधोक्तिं च न रचयति नाशो तद्भो
गेन भवति तत्र स्वाम्यं न भवतीत्यर्थः ॥५६॥ अजड जडो बुद्धिविकलः न्यूनषोडशवर्षः पोगंडः
तथा च नारदः बाल आषोडशाद्वर्षात्पोगंडः परिकीर्तितः स धनस्वामी यदि जडः पोगं
डश्च न भवति तदीयदर्शनविषये च तद्धनं भुज्यते तदा स्वामिनो व्यवहारेण नष्टं तत्रोपभो

संप्रीत्या भुज्यमानानि न नश्यंति कदाचन । धेनुरुष्ट्रो वहन्नश्वो यश्च दम्यः प्रयुज्यते ॥५५॥
यत्किंचिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी । भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥५६॥
अजडश्चेदपोगंडो विषये चास्य भुज्यते । भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हति ॥५७॥ आ
धिः सीमा बालधनं निक्षेपोपनिधिः स्त्रियः । राजस्वं श्रोत्रियद्रव्यं नोपभोगेन जीर्यति ॥५८॥
यः स्वामिनाननुज्ञातमाधिं भुंक्तेऽविचक्षणः । तेनार्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिः ॥
कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता । धान्ये शदे लवे वाह्ये नातिक्रामति पंचताम् ॥ ५।

क्तैव तद्धनं प्राप्नोति ॥५७॥ आधिः बंधकः ग्रामादिमर्यादा बालधनं निक्षेपो वसनस्थमनाख्याय
समुद्रं यन्निधीयते इति नारदोक्तलक्षणो उक्तेन दशवर्षभोगेन स्वामिनो न नश्यंति न वा भोक्तृ
स्वतं भजंते ॥५८॥ यः इति योऽधमर्णदत्तमाधिं बंधं स्वाम्यननुज्ञातव्यतिरेकेण मूढत्वान्निह्नवेन भु
क्ते तेन तस्य भोगस्य संशुध्यर्थमर्धवृद्धिस्त्यक्तव्या बलभोगेन भोक्तव्यो बलाद्भुक्तेरिति स
र्ववृद्धित्याग एवोक्तः ॥५९॥ कुसी वृध्या धनप्रयोगः कुसीदं तत्र या वृद्धिः सकृद्गृहीता सा द्वै
गुण्यं नातिक्रामति मूलद्विगुणैव भवति तेन प्रतिदिनं प्रतिमासं दियासादि मूलधनेन
द्विगुणाधिकापि यासेति तात्पर्यं धान्ये पुनर्वृद्धिः आ शदे क्षेत्रफले लवपतितलवक
र्णादिलोमतां मिन वाहनीये बलीवर्दादौ प्रयुक्ते चिरेणापि कालेन मूलधान्यादिना सह प

750

द्विकं ब्राह्मणानामासेन होपलो वृद्धिं गृह्णीयात् साधूनामयं धर्म इति मन्यमानः यस्माद्द्विकं शतं गृ-
ह्णन् वृद्धिग्रहणेन किल्बिषी भवति ॥ ४२ ॥ द्विकं ब्राह्मणादिवर्णानां क्रमेण द्विकं त्रिकं चतुष्कं पंच-
कं च शतं सममतिसृज्य नाधिकां मासस्य संबंधिनीं वृद्धिं गृह्णीयात् ननु अशीतिभागो लघुः द्विकश-
तग्रहणं गुरुतरमिति कथमिमौ ब्राह्मणस्यैव गुरुलघुविकल्पौ कल्पेते अत्र मेधातिथिगोविंद-
राजौ पूर्वश्लोकाभिहितो ह्यसंभवे द्विकशतवृद्धिपरिग्रह इति व्याचक्षाते तदयुक्तं वदामः सबंधके
अशीतिभागग्रहणं बंधकरहिते द्विकशतवृद्धिपरिग्रहः तदाह याज्ञवल्क्यः अशीतिभा-
गो वृद्धिः स्यान्मासि मासि सबंधके वर्णक्रमाच्छतं द्वित्रिचतुःपंचकमन्यथा वेदांतोज्जीतमह-
सो मनोर्व्याख्यानमपि द्वेपेत द्विकं शतं लघुः प्रवनिबद्धमधुनातनैः ॥ ४२ ॥ न त्वे भूमिगोदासादौ
भोग्यार्थबंधके धने प्रयोगाभवायमनंतरोक्तां वृद्धिमुत्तमर्णो न लभते कालसंरोधश्चिरका-

द्विकं शतं वा गृह्णीयात् सतां धर्ममनुस्मरन्। द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी ॥ ४१ ॥
द्विकं त्रिकं चतुष्कं च पंचकं च शतं समम्। मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः ॥ ४२ ॥
न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात्। न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः ॥ ४३ ॥
न भोक्तव्यो बलादाधिर्भुंजानो वृद्धिमुत्सृजेत्। मूल्येन तोषयेच्चैनमाधिस्तेनोऽन्यथा भवेत् ॥
आधिश्चोपनिधिश्चोभौ न कालात्ययमर्हतः। अवहार्यौ भवेतां तौ दीर्घकालमवस्थितौ ॥ ४५ ॥

लावस्थानेन न भोग्याधेश्चिरकालावस्थो द्विगुणीभूतमूलधनप्रवेशोऽपि निसर्गोऽन्यस्मै दानं न
चान्यतो विक्रयः मेधातिथिगोविंदराजौ तु आधेश्चिरकालावस्थानेऽपि न निसर्गो नाम अन्यत्र बंधक-
त्वेन दानमिति व्याचक्षाते अत्र च सर्वदेशीयशिष्टाचारविरोधः बंधकीकृतस्य भूम्यादेरन्यत्रा-
धीकरणस्य भावात् ॥ ४३ ॥ न भोक्तव्यो बलादाधिरिति विषयमिदं वचनं वस्त्रालंकारादिगोप्याधिर्बला-
न्न भोक्तव्यः भुंजानो वृद्धिं त्यजेत् भोगमूल्येन चैनं तोषयेत् यदा भोगेनासारतामाधौ नी-
ते साम्यावस्थासंबंधिमूल्यदानेन स्वामिनं संतोषयेत् अन्यथा बंधकचौरः स्यात् ॥ ४४ ॥ आधिः
आधिर्बंधकः उपनिधीयते इत्युपनिधिः प्रीत्या भोगार्थमर्पितं द्रव्यं नारदस्मृतिलिखितो चानिः-
क्षेपोपनिधी द्वयमेतदुपनिधिशब्देन गृह्यते एतावाधुपनिधी चिरकालावस्थितावपि न स्व-

म.स्मृ. टी. २५२

251

ऋद यदि द्वैगुण्यात् वृद्धिं हिरण्यमपि समग्रं दातुं न शक्नोति तदा तद्दत्वा पुनस्त्वैव क्रियमाणे लेख्ये
शेषं वृद्धिं हिरण्यं शोधनमारोपयेत् यत्प्रमाणं च वृद्धिधनं तद्दिने संभवति तद्दातुमर्हति ५४ चक्र
वृद्धिश्चोक्तेनाचक्रवद्धकटाभाटकादिरूपो वृद्धिरभिमतास्तां च चक्रवृद्धिमाश्रितउत्तमर्णो देश
प्राकालव्यवस्थितः यदि वाराणसीपर्यंतं तव गुरुं वा कलत्रादि शकटेन वहामि तदा मम मे यद् नभा
टकारूप्यं तद्दातव्यमिति देशव्यवस्थितिः यदि मासं यावद्वहामि तदा मम मे द्रुप्यं नदातव्यमिति काल
व्यवस्थितिः एवमभ्युपगत देशकालनियमा तौ देशकालौ अतिक्रान्तो यदि दैवात् दूरं यनु शक
टादिनावहत्वा भूयफलं समग्रं न प्राप्नोति प्रपितत ५५ समु स्थलपण जलपण्यगमने निपु
णा दूरदेशपर्यंतं मियत्कालपर्यंतं वा समानेमेत्ति नावन्नाभो ग्रहीतं पुक्तमेव देशकालधनस्या

अदर्शयित्वा तत्रैव हिरण्यं परिवर्तयेत् यावती संभवेद्वृद्धिस्तावतीं दातुमर्हति ५४ चक्र
वृद्धिं समारूढो देशकालव्यवस्थितः अतिक्रामन्देशकालौ न तत्फलमवाप्नुयात् ५५ समुद्र
यानकुशला देशकालार्थदर्शिनः स्थापयन्ति तु यां वृद्धिं सा तत्राधिगमं प्रति ५६ योयस्य
प्रतिभूस्तिष्ठेद्दर्शनायेह मानवः अदर्शयन् स तं तस्य प्रयच्छेत्स्वधनादृणं ५७ प्रातिभा
व्यं वृथादानमाक्षिकं सौरिकं च यत् दण्डशुल्कावशेषं च न पुत्रो दातुमर्हति ५८ दर्शनप्र
तिभाव्ये तु विधिः स्यात्पूर्वचोदितः दानप्रतिभुवि प्रेते दायादानपि दापयेत् ५९ अदात
रि पुनर्दाता विज्ञातप्रकृतावृणं पश्चात्प्रतिभुवि प्रेते परीप्सेत्केन हेतुना ॥

वाणिज्यादयो यां वृद्धिं तथाविधविषये व्यवस्थापयन्ति सैव व्यवस्था तत्राधिगमनं धनप्राप्तिं प्रति
प्रमाणं ५६ योयस्य योमनुष्यो यस्य दर्शनाय प्रतिभूस्तिष्ठेत् धनदानकाले समायं दर्शनीयो यो ध
मर्णइति मत्वा तस्मिन्काले उत्तमर्णाय यदादर्शयन् स्वधनात्तदृणं दापयेत् ५७ प्राति प्रतिभू
त्वाद्देयं यदृणं प्रातिभाव्यं वृथादानं पत्नीपरिहासनिमित्तं नटादिभ्यो देयत्वेन पित्रा स्वीकृतं शुल्कनि
मित्तं सुरानिमित्तं च यद्देयं दण्डशुल्कावशेषादिदेयं तद्वशेषं पितृसंबंधि धनं पितरि मृते पुत्रो दातु
मर्हति ५८ दर्शनप्रातिभाव्ये न पुत्रो दातुमर्हतीति पाश्चात्यो पदेशः सदर्शनप्रतिभुवः पितृदेय
वाहकः दानप्रतिभुवि तु मृते तान्पितृकरणं दापयेत् ५९ अदा अदातरि दानप्रतिभुवोन्य
स्मिन्दर्शनप्रतिभुवि मृते यत्प्रतिभुविवाविज्ञातप्रातिभाव्यकारणे ऋणं शोधनोचितधनग्रहणं

उ. २५२

त्वात् कृतायां वृद्धौ द्विकं त्रिकमिति शास्त्रेण वर्णक्रमायोक्तात् स्मृतिशास्त्रानुसारादधिकाव्यतिरि-
क्ताः तोऽन्या वृद्धिः कृतेऽस्मिन्नपि सा न भवति किं तु कृतापि वृद्धिः वर्णक्रमेण द्विकत्रिकशतादिरूपे-
व मासेन ग्राह्या तथा च विष्णुः वृद्धिं दद्युः कृतामपि वत्सरातिक्रमे यथाभिहितां वर्णक्रमेण
द्विकत्रिकादिनेत्यर्थः प्रकृतस्यैव विशेषान्तरमाह कुसीतादुत्तरसंबंधः इति कुसीद
पथः अधमर्णस्य द्विविषयोक्तपंचकशतं द्विजातेरपि गृह्णीयादेवं कुसीतः पथाः
पूर्वोक्ताद्धर्मवृद्धिप्रकारादपकृष्टमिति मेधातिथिमन्वादयश्चाहुः अपि चाकृता वृद्धिकृद्वारविषयेयाव
नोर्द्देशोऽस्या तदाह कात्यायनः प्रीतिदत्तं न वर्द्धेत यावन्न प्रतियाचितं याच्यमानं न दत्तं चेद्व
र्द्धते पंचकं शतं ५२ नेति समैकस्मिन्मासे मासद्वये मासत्रये वा गते तस्य वृद्धिं द्विगुणामृण
कादात् नमूल्यं विधिनियमपूर्वकं वृद्धिग्रहणं उत्तमर्णः संवत्सरपर्यन्तं कुर्यात् नातिक्रान्ते
संवत्सरे नियमवृद्धिं गृह्णीयात् न च यां शास्त्रादृष्टामवक्तव्यं द्विकत्रिकशतादधिकां गृह्णी

कृतानुसारादधिका व्यतिरिक्ता न सिध्यति कुसीदपथमाहुस्तं पंचकं शतमर्हति ५२ ।
नातिसंवत्सरीं वृद्धिं न चादृष्टां विनिर्हरेत् चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या
ऋणं दातुमशक्तो यः कर्तुमिच्छेत्पुनः क्रियां स दत्वा निर्जितां वृद्धिं करणं परिवर्तयेत् ५२

यात् अधमर्णबोधनार्थोऽनिषेधः चक्रवृद्ध्यादिचतुष्टयं चाधमर्णतोऽयं न गृह्णीयात् तासां स्वरू-
पमाह बृहस्पतिः कायिका कायसंयुक्ता मासग्राह्या च कालिका वृद्धेर्वृद्धिश्चक्रवृद्धिः का-
रिता ऋणिना कृता तत्र चक्रवृद्धिः स्वरूपेण वृद्धिगर्हिता कालवृद्धिर्द्विगुणाधिका यह
णेन कायिका तिवाहदोहादिना कारिता चर्णिकेन यासु आपत्काल एव उत्तमर्णोऽपीडयन् कृ-
तापि च तत्स्वोत्कृष्टीकृत्य वाऽग्रीपात यथा च बृहस्पतिः भागो यद्द्विगुणादूर्ध्वं चक्रवृद्धिश्च गृह्य-
ते मूलं च सोदयं दद्यात्पश्चाद्दद्यात्कुसीदं द्विगुणं हितं कात्यायनः ऋणिकेन तु या वृद्धिर-
धिका संप्रकल्पिता आपत्काले कृता नित्यं दातव्या कारिता तु सा अन्यथा कारिता वृद्धि-
र्न दातव्या कदाचन ५२ ऋणं यो धमर्णो धनदानासामर्थ्यात् तत्र लेख्यादिक्रियां
कर्तुमिच्छति स निर्जिताम् उत्तमर्णेनात्मसात्कृतां वृद्धिं दत्वा करणं लेख्यं पुनः कुर्यात् ५२

त्रयः साक्षिणः प्रतिभूः कुलं च धर्मार्थं व्यवहारेषु त्रय एते परार्थे क्लेशमनुभवन्ति तस्मादेते
न साक्ष्यप्रतिभाव्यव्यवहारेष्वृणं न कापि कार्यमित्यत्राः चत्वारः पुनर्ब्राह्मणोत्तमर्णो वणिग्राजानः
परार्थदानफलोत्पादनऋणदृव्यार्थणविक्रयव्यवहारेष्वृणेषूपकृष्टाणां धनोपचयं प्राप्नुवं
ति तस्माद्विप्रो न दाता आढ्यो वाधमर्णो वणिक् नक्रेता राजा न व्यवहर्तारं बलेन प्रवर्तयेत् ६८
पूर्वश्लोकाभिहितबलनिषेधस्यैवायं प्रपंचः अना। अग्राह्यग्रहणाद्ग्राह्यस्यापरिग्रहस्य परित्या
गाच्च राज्ञः पौरैरसामर्थ्यं ख्याप्यते ततश्च प्रेत्याधर्मेण नरकादिभोगादिहलोके वाकीर्तिर्नश्यति
अ न्याय्यधनग्रहणाद्वर्णानां संकीर्णजातीयैः शास्त्रीयपरिणयनादिसंबंधात् महावर्णसंसर्गाद् ।

त्रयः परार्थे क्लिश्यन्ति प्रतिभूः साक्षिणः कुलं चत्वारस्तूपचीयन्ते विप्र आढ्यो वणिङ्नृपः
अनादेयं नाददीत परिक्षीणोऽपि पार्थिवः न चादेयं समृद्धोऽपि सूक्ष्ममप्यर्थमुत्सृजेत् ६९
अनादेयस्य चादानादादेयस्य च वर्जनात् दौर्बल्यं ख्याप्यते राज्ञः स प्रेत्येह विनश्यति ७०
स्वादानाद्वर्णसंसर्गात्त्वबलानां च रक्षणात् बलं संजायते राज्ञः स प्रेत्येह च वर्द्धते ७१ तस्मा
द्यम इव स्वामी स्वयं हित्वा प्रियाप्रिये वर्तेत याम्यया वृत्त्या जितक्रोधो जितेन्द्रियः ७२ यस्त्व
धर्मेण कार्याणि मोहात्कुर्यान्नराधिपः अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः ७३ का
मक्रोधौ च संयम्य योऽर्थान्धर्मेण पश्यति प्रजास्तमनुवर्तन्ते समुद्रमिव सिन्धवः ७४ यः सा
धयन्तं छन्देन वेदयेद्धनिकं नृपे स राज्ञा तच्चतुर्भागं दाप्यस्तस्य च तद्धनं ७५

णासंकरादिमन्त्रापि रक्षणादिति योजनीयं प्रजानां दुर्बलानां च बलवद्भ्यो रक्षणात् बलवानिति रा
ज्ञा ख्याप्यते ततो सावि इहलोके परलोके च वर्द्धते ७० यत एवं तस्माद्यम इव राजा वशीकृतक्रोधो
जितेन्द्रियस्स्वकीये प्रियाप्रिये परित्यज्य यमस्येव चेष्टया सर्वत्र साम्यरूपया वर्तेत ७२ यतः यस्तु नृपः पु
नर्नृपतिर्लोभादिव्यामोहादधर्मेण व्यवहारदर्शनादीनि कार्याणि कुरुते तं दुष्टचित्तप्रकृतियोग
विनाशाच्छीघ्रमेव शत्रवो निगृह्णन्ति ७३ कामं यो राजा रागद्वेषौ विहाय धर्मेण कार्याणि निरूप
यति तं राजानं प्रजा भजन्ते न पुनः समुद्रान्निवर्तन्त तेनैकतां यान्ति प्रजा अपि तस्मान्न पार्श्वे निवर्तन्ते
तदेकतानाभवतीति साम्यं ७४ यद्वेति यो धमर्णो राजवल्लभोऽहमिति मत्वा उत्तमर्णे स्वेच्छया

252

निरा असौ दर्शनप्रतिभूः यस्तु प्रतिभूर्वा यदि निरादिष्टधनः प्रथमर्णेन निसृष्टधनः अलं
धनो यावता धनेन असौ प्रतिभूः तावद्धनपर्याप्तधनः तदा स्वधनादेव तद्दद्यान्निरादिष्टो ऽनि
रादिष्टधनस्तु चौल्लक्षणयोगात ऋणं तत्र मर्णोपदद्यादिति शास्त्रमर्यादा ॥६२॥ मत्ता मद्या
दिमत्तोन्मत्तव्याधिपीडोपहतास्वतंत्रबालवृद्धैः असंबद्धेन च पितृभ्रातृनियुक्तो द्व्यतिरेके
नाऽपि व्यवहारो न सिध्यति ॥६३॥ सत्या इदमयानुष्ठेयमिति सम्मादिकापि भाषा लेख्यादिना स्थिरी
कृतापि यदि शास्त्रीयधर्मान्नियताद्व्यावहारिकाद्बहिर्भाष्यते तदा सत्या न भवति न तद्दर्शनु

निरादिष्टधनश्चेत्तु प्रतिभूः स्यादलंधनः स्वधनादेव तद्दद्यान्निरादिष्ट इति स्थितिः ॥६२॥
मत्तोन्मत्तार्त्ताध्यधीनैर्बालेन स्थविरेण वा असंबद्धकृतश्चैव व्यवहारो न सिध्यति ॥६३॥
सत्या न भाषा भवति यद्यपि स्यात्प्रतिष्ठिता बहिश्चेद्भाष्यते धर्मान्नियताद्व्यावहारिकात्
योगाधमनविक्रीतं योगदानप्रतिग्रहं यत्र वाप्युपधिं पश्येत्तत्सर्वं विनिवर्त्तयेत् ॥६४॥
गृहीता यदि नष्टः स्यात्कुटुंबार्थे कृतो व्ययः दातव्यं बांधवैस्तत्स्यात्प्रविभक्तैरपि स्वतः ॥६५॥
कुटुंबार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत् विदेशे वा स्वदेशे वा तं ज्यायान्न विचालयेत्
बलाद्दत्तं बलाद्भुक्तं बलाद्यच्चापि लेखितं सर्वान्बलकृतानर्थानकृतान्मनुरब्रवीत्

छलः ॥६३॥ यो योगाधमनाद्यो छललक्षणो छलेन यद्वं धनविक्रयदानप्रतिग्रहाः क्रियंते न तत्
तोन्यत्रापि निःक्षेपादौ यत्र छद्म जानीयात्तत्तु तानि निःक्षेपादीन् कृतं तत्सर्वं निवर्त्तयेत् ॥६४॥
गृही ऋणग्रहीता यदि मृतः स्यात्तेन च पूर्वं विभक्ताविभक्तसर्वभ्रातृकुटुंबसंवर्द्धनार्थं
तदृणं व्ययः कृतस्तदा तदृणं विभक्तैरविभक्तैश्च स्वधनाद्देयं ॥६५॥ कुटुं तद्देशस्थादे
यान्तरस्थो वा स्वामिनि स्वामिसंबंधि कुटुंबव्ययनिमित्तं दासोपि यदृणादिकं करोति तत्स्वा
म्यनुमन्येत ॥६६॥ बलात् बलाद्दत्तं प्रतिग्रहासादि बलाद्भुक्तं भूम्यादि बलाल्लेखित
वकरुंठितपत्रादिप्रदर्शनेनैतान्सर्वाननिवर्त्त्यान् कृतान्व्यवहारान्निवर्त्तनीयान्मनुराह ॥६७॥

म॰स्मृ॰
टी॰
२५३

तेषां । तेषां चारग्रहणानां यत्रिःक्षिप्तं हिरण्यं यथाविधि यथान्यस्तं यदि न दद्यात्तदा द्वावपि निःक्षेपोपनिधिपक्षौ चासंनिधिनो संप्रदापनीयः स्यादिमेवं नृपाधर्मस्य धारणा निश्चयः । योनिक्षेपमित्यादि श्लोकचतुष्टयस्य च इत्येवं पाठक्रमो मेधातिथिभोजदेवादिभिर्लिखितः । गोविंदराजेन तु सामान्यभावत्वेन श्लोकास्तपत्रपठितः । तदा चनार्थसंगतिर्न वा हृद्यतामादरः ८५ निःक्षे निःक्षेप्यतरति निःक्षेपः स्वद्रव्यं कितमगणितं वस्तनस्थं यत्र धीयते सउपनिधिः ब्राह्मणपरिव्राजकादयुपदेशभेदतो निःक्षेपोपनिधी नित्यं न देयौ प्रत्यनन्तरं तदीयपुत्रभ्रात्रादौ तदनंतरं तद्धनाधिकारिणि कदाचिन्न देयौ यतस्तस्य पुत्रादेः पितुरसमर्पणे विनाशाः तौ निःक्षेपोपनिधी विनश्यतः निःक्षेपधारिण्य देयोऽसनिःक्षेपधनं तद्धनाधिकारि पुत्रादौ तद्धनस्थापितः स्वयमेनवयः समर्पयति सराज्ञा निःक्षेप्तृपुत्रादिभि र्वा अन्यदपि

तेषां न दद्याद्यदि तु तद्धिरण्यं यथाविधि उभौ निगृह्य दाप्यः स्यादिति धर्मस्य धारणा ८४ निःक्षेपोपनिधी नित्यं न देयौ प्रत्यनन्तरे नश्यतो विनिपाते तावनिपाते त्वनाशिनौ ८५ स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे न स राज्ञाभियोक्तव्यो न निःक्षेप्तुः स्वबंधुभिः ८६ अच्छलेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकं विचार्य तस्य वा वृत्तं साम्नैव परिसाधयेत् ८७ निःक्षेपेष्वेषु सर्वेषु विधिः स्यात्परिसाधने समुद्रे नाप्नुयात्किंचिद्यदि तस्मान्न संहरेत् ८८ चौरैर्हृतं जलेनोढमग्निना दग्धमेव च न दद्याद्यदि तस्मात्स न संहरति किंचन ८९ निःक्षेपस्यापहर्तारमनिःक्षेप्तारमेव च सर्वैरुपायैरन्विच्छेच्छपथैश्चैव वैदिकैः ९० यो निःक्षेपं नार्पयति यश्चानिःक्षिप्य याचते तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्स

तदपि निःक्षिप्तमस्तीति नादेयं तत्र ८६ यदि कश्चिदत्राभिनिवेशे सति तदा अच्छलेन तद्धस्ते धनांतरस्य भावलक्षणं वाकूटलेखादिपरिहारेणैव प्रीतिपूर्वकं निःक्षेपं याचेत् न तु झटिति दिव्यादिदानेन तस्य निःक्षेपधारिणः शीलमवेक्ष्य धार्मिको यमिति ज्ञात्वा साम प्रयोगेन निःक्षेपं साधयेत् निःक्षेपेष्विति तेषु सर्वेषु निःक्षेपोपनिधि याचमानेषु एषसाम्यभावेऽसमादिपूर्वोक्तो विधिर्निर्णयसिद्धोऽसात् मुद्रितादौ तु नस्तेन धारी यदि तत्र द्रव्यं निहितमित्यादिनानार्थमप्यपहरेत् तदा तस्मिन्नर्पितेन किंचिद्धर्मं प्राप्नुयात् ८८ चौरै चौरैर्मोषितं उदकेन देशांतरं प्रापितमग्निना दग्धं निःक्षेपधारी न दद्यात् यदि तत्तस्मात् किंचिदपहरेत् ८९ निःक्षे निःक्षेपस्यापहर्तारं अनिःक्षिप्य तत्प्राप्ताचितारं सर्वैः सामादिभिरुपायैर्वैदिकैः शपथैश्च स्वहस्तादिभिर्नृपो निर्णयेत् ९० यो निः निःक्षेपं निःक्षेपधनं योऽनर्पयति यश्चानिःक्षिप्य याचते तावुभौ चौरवच्छास्यौ चौरवद्दंड्यौ स्वल्पविषये तावता

कर्म समानजातिरुत्कृष्टजातिर्वाधमर्णो धनाभावे सति तज्जात्यनुरूपकर्मकरणेनापि समं कुर्यात् निकृष्टजातिस्त्वम
र्णोऽधमर्णव्यपदेशेन धनिकसमतामात्मानं कुर्यात् समजातिरत्र ब्राह्मणेतरः कर्मणा त्वविशिष्टस्य
समहीनांस्तु दापयेत् इति कात्यायनवचनेन विशेषितत्वात् श्रेयांस्तूत्कृष्टजातिर्न कर्म कारयितव्यः
किंतु शनैः शनैः तद्धनं यथासंभवं दद्यात् ७६ अनेन अनेनोक्तप्रकारेण परस्परं विवदमानानामर्थिप्र
त्यर्थिनां साक्ष्यादिप्रमाणनिर्णीतानि कार्याणि विप्रतिपत्तिखण्डनेन समीकुर्यात् ७७ कुल कुलप्रसूते
सदाचारवति धर्मवेदिनि सत्याभिधायिनि बहुपुत्रपौत्रादिपरिजनोपेते ऋजुप्रकृतौ मनुष्ये बुधो निक्षे
पं स्थापयेत् ७८ यद्रूति यो मनुष्यो येन प्रकारेण मुद्रासहितममुद्रं वा ससाक्षिकम
साक्षिकं वा यमर्थं सुवर्णादिकं यस्य हस्ते निःक्षिपेत्सोऽर्थस्तस्मिन्देयत्वे तथैव ग्राह्यो यस्मात् येन प्रकारेण

कर्मणापि समं कुर्याद्धनिकायाधमर्णिकः समोऽवकृष्टजातिस्तु दद्याच्छ्रेयांस्तु तच्छनैः ७६ अने
न विधिना राजा मिथो विवदतां नृणां साक्षिप्रत्ययसिद्धानि कार्याणि समतां नयेत् ७७ प्रपंमविवा
दप्रकरणसमाप्तं कुलजे वृत्तसंपन्ने धर्मज्ञे सत्यवादिनि महापक्षे धनिन्यार्ये निःक्षेपं निःक्षि
पेद्बुधः ७८ यो यथा निःक्षिपेद्धस्ते यमर्थं यस्य मानवः स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः
यो निःक्षेपं याच्यमानो निःक्षेप्तुर्न प्रयच्छति स याच्यः प्राड्विवाकेन तन्निःक्षेप्तुरसंनिधौ ८० सा
क्ष्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः अपदेशैश्च संन्यस्य हिरण्यं तस्य तत्त्वतः ८१ स यदि प्रति
पद्येत यथान्यस्तं यथाकृतं न तत्र विद्यते किंचिद्यत्परैरभियुज्यते ८२

समर्पणं तेनैव प्रकारेण ग्रहणं न्याय्यं समुद्रस्थापितस्य सुवर्णशतादेर्निःक्षेप्तारं पमेव समुद्रमभिलाषन्
वदति ममैतत्तुल्यमिदं समर्पणीयमित्यमभिधानमेतदर्थमिदं ७९ यः यः प्रकृष्टो देहमनिःक्षिप्ते हिर
ण्यमिन्यत्र वैतनिःक्षेप्तारं याच्यमानस्तस्मै प्रार्थ्यमानं समर्पयति तदा निःक्षेप्त्रा याचितेन प्राड्विवाकेन चास्य
निःक्षेप्तुरसंनिधाने याचनीयः ८० किं कृत्वा याचनीय इत्याह साक्ष्य प्रथमं निःक्षेपसाक्ष्यभावेऽस्य
कीयजातीयश्चारपुरुषैर्यतिज्ञातवाक्यैः सौम्याकृतिभिर्न्यायपुरुषैर्व्याजाभिधायिभिर्हिरण्यमेतत्
नि निःक्षेपयितव्याः तेरेव चारपुरुषैस्तन्निःक्षेपधारी प्राड्विवाकेन चारपुरुषनिःक्षिप्तं सुवर्णं याच
यितव्यः स च निःक्षेपधारी यथान्यस्तं समुद्रममुद्रं वा यथाकृतं तद्रूपं तत्कारुस्थापनादिप्रकारेण
तं यदि तथैव प्रतिपद्येत समर्पयति तदा परेण पूर्वनिःक्षेप्त्रा प्राड्विवाकापितैः
क्षिप्तमभियुज्यते तेन तत्र किंचिद्दण्डादिप्रतिलक्षणं ८२

म-स्मृ-
टी-
२५५

अस्वा॰ अस्वामिना यद्दत्तं विक्रीतं वा तत् दत्तमकृतमेव बोद्धव्यं व्यवहारेण यथा मर्यादा तथा कृतं न भवतीत्यर्थः
१९६ संभो॰ यस्मिन्वस्तुनि भोगो विद्यते क्रयविक्रयादिरूपस्त्वागमो नास्ति तत्र प्रथमपुरुषगोचर आगम
एव प्रमाणं न भोगमात्रमिति शास्त्रमर्यादा १९७ विक्र॰ विक्रीयते यस्मिन्निति विक्रयदेशो विक्रयः ततो
यत्किंचिद्द्रव्यं किंचिद्व्यवहर्तृसमूहसमक्षं क्रीयते तेनेति क्रयो मूल्यं तेन यस्मात्गृह्णीयात्तेनाप्यसत ए
वास्वामिविक्रेतृसकाशात् मूल्यक्रयादि शुद्धं मूल्यधनं लभते १९८ अथ॰ अथ मूलमस्वामिविक्रे
तारमरणदेशान्तरगमनादिना वा हर्तुं न शक्यते प्रकाशक्रयेणैनासौ निश्चितस्तदा दण्डानर्हः एवक्रेता
राज्ञा मुच्यते न पुनः धनस्वामी च यदस्वामिना विक्रीतं द्रव्यं तत् क्रेतृहस्तात्लभते अत्र च विषये द्रव्यमूल्यं क्रे
तुर्दत्वा स्वधनं स्वामिना ग्राह्यं तदाह बृहस्पतिः वणिग्वीथीपरिगतं विज्ञातं राजपुरुषैः अविज्ञाताश्र

254

अस्वामिनः कृतो यस्तु क्रयो विक्रय एव च अकृतः स तु विज्ञेयो व्यवहारे यथास्थितिः १९६ सं
भोगो दृश्यते यत्र न दृश्येतागमः क्वचित् आगमः कारणं तत्र न संभोग इति स्थितिः १९७ विक्रया
द्यो धनं किंचित् गृह्णीयात्कुलसन्निधौ क्रमेण स विशुद्धं हि न्यायतो लभते धनं १९८ अथ मूल
मनाहार्यं प्रकाशक्रयशोधितं अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनं १९९ नान्यदन्येन
संसृष्टरूपं विक्रयमर्हति न चासारं न च न्यूनं न दूरेण तिरोहितं २०० अन्यां चेद्दर्शयित्वान्या
कन्या वोढुः प्रदीयते उभे ते एकशुल्केन वहेदित्यब्रवीन्मनुः २०१ नोन्मत्ताया न कुष्ठिन्या
न च या स्पृष्टमैथुना पूर्वं दोषानभिख्याप्य प्रदाता दण्डमर्हति २०२

यात्क्रीतं विक्रेता यत्र वा मृतः

स्वामी दत्वार्धं मूल्यं तु गृह्णीयात्स्वकं धनं अर्धं द्वयोरपि हृतं तत्र स्याद्व्यवहारतः १९९ नान्य॰ कुङ्कुमादि
द्रव्यं कुसुम्भादिना मिश्रीकृत्य न विक्रेतव्यं न चासारमसारमभिधाय न तुलादिना न्यूनं न परोक्षावस्थितं
न च रागादिनाच्छादितरूपं अत्र च स्वामिविक्रयसाहचर्यादस्वामिविक्रयदण्ड एव स्यात् २०० अन्यां
शुल्कदेयां कन्यां शुल्कव्यवस्थाकाले निरवद्यां दर्शयित्वा यदि सावद्या वरस्य दीयते तदा द्वे अपि कन्ये ते
नैवैकेन शुल्केनासौ वरः परिणयेदिति मनुराह शुल्कग्रहणपूर्वककन्यादानस्य विक्रयरूपत्वाद
स्वामिविक्रयप्रसङ्गेनास्याभिधानं २०१ नोन्म॰ उन्मत्तायाः क्षयकुष्ठवत्या या चानुभूतमैथुना त
स्याश्च ग्रहणादि विवाहात्पूर्वमुन्मत्तादीन्दोषान्कथयित्वा दाता दण्डार्हो न भवति तेनाकथने न दं
ड्य इति गम्यते यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छतीति २०२

उ-
२५५

निक्षे निःक्षेपापहारिणं निक्षिप्तसमं धनं दंडयेत् समपिहितत्वादनिर्दिष्टसंख्याचितारमपि न च पुनः
रुक्तिः महत्स्यपरायैव ब्राह्मणेन रस्तचौरवदिति पूर्वश्लोकेन शारीरदंडस्याभिप्रायेणेनात्रिद्रव्यमिदंदाप
येदिति धनदंडनियमान्न चानेन पूर्वश्लोकनिधिर्मद्वादिचिह्नितनिहितधनं तस्यापहर्त्तारं निःक्षे
पहर्त्तृकपिलविशेषेणास्माद्दंडदापयेत् ९० उप राजा तयि रुष्टस्य सा हारस्वामि मे धनं देहि
धनकन्यादिलाभोपकारं चानृतमभिधायान्यशन्तायः पर द्रव्यं हरति तत्र बलधनयुग्रहस्य सहका
रिसहितः वक्तुजनस्य समस्तं करचरणशिरः छेदनादिभिर्नानाप्रकारैर्वधोपायैः राज्ञो हंतव्यः ९१
निक्षे यः सुवर्णादिर्यावत्परिमितो येन साक्षिसमक्षं निक्षेपः कृतः तत्परिमाणादिविप्रति
पत्तौ साक्षिवचनात्तावानेव स ज्ञातव्यः विप्रतिपत्तिं कुर्वन्नन्यतरस्तत्रानुसारेण दंडं दाप्यः ९२

निक्षेपस्यापहर्त्तारं तत्समं दापयेद्दमं तथोपनिधिहर्त्तारमविशेषेण पार्थिवः ९० उप
धाभिश्च यः कश्चित्परद्रव्यं हरेन्नरः ससहायश्च हन्तव्यः प्रकाशं विविधैर्वधैः ९१ निक्षे
पो यः कृतो येन यावांश्च कुलसन्निधौ तावानेव स विज्ञेयो विब्रुवन्दंडमर्हति ९२ मिथोदा
यः कृतो येन गृहीतो मिथ एव वा मिथ एव प्रदातव्यो यथा दायस्तथा ग्रहः ९३ निक्षिप्तस्य
धनस्यैवं प्रीत्योपनिहितस्य च राजा विनिर्णयं कुर्यादक्षिण्वन्न्यासधारिणं ९४ इति निक्षेपवि
वादप्रकरणं समाप्तं विक्रीणीते परस्य स्वं योऽस्वामी स्वाम्यसंमतः निस्त्वयो न पस्त्वः प्राप्नः सा
चौरकिल्बिषं ९५

मिथ रहसि यो निःक्षेपोर्पितः निःक्षेपधारिणा च रहस्येव गृहीतः स निःक्षेपो रहस्येव प्रत्यर्पणीयः
न प्रत्यर्पणे साक्ष्यपेक्षा यस्माद्येनैव प्रकारेण दानं तेनैव प्रकारेण प्रत्यर्पणं दातव्यमिति च वचनान्निःक्षे
पधारिणो यं नियमविधिः यो यथा निक्षिपेद्धस्त इति तु निःक्षेप्तुर्नियमार्थं गृहीतव्यमिति प्रयुक्तत्वाद्दतो
न पुनरुक्तिः ९३ निक्षि राजा निःक्षिप्तधनस्यान्यस्य समस्य इत्यस्वाउपनिकृपसत्यापी त्याकृति
चित्कालं भोगार्थमर्पितस्यानेनोक्तप्रकारेणान्यस्त धनधारिणमपीडयन्निर्णयं कुर्यात् ९४ वि
क्री अस्वामी यः स्वामिनाननुमतः परकीयद्रव्यं विक्रीणीते तं च स्तेनं चौरमात्मानं मन्यमानं सा
क्ष्यादिकृपत्वेन स्थान्वयः संबंधी भवति तदा षट् पणशतान्यवहीदंड्यः यदि पुनः स्वामिनः सं
बंधी पुत्रादेः सकाशाज्ञाप्तिं तदा चौरसवधिरायं प्राप्नोति तद्दंडं दंडनीयः ९५

ना·स्मृ·
टी·
२५५

संभूय शिल्पिना गृहनिर्माणादीनि कर्माणि लोके स्थापत्तिसूत्रधारादिभिर्मनुष्यैः कुर्वद्भिरनेन दक्षि
णाविधानाश्रयणेन विज्ञानवयःप्राधान्यापेक्षया भागकल्पना कार्या १० इदानीं दत्तानपकर्मा
ह धर्मार्थं येन याचमानाद्धर्मार्थं कस्मैचिद्याचमानाय धनं दत्तं प्रतिश्रुतं वा स्यात्पश्चाच्च न तत्तु
मार्गे यागाद्यर्थं यदि न विनियुञ्जीत तदा दत्तमपि प्रत्याहर्तव्यं प्रतिश्रुतं च न देयं तदाह गौतमः
प्रतिश्रुत्याप्यधर्मयुक्ताय न दद्यात् ११ यदि यदि तद्दत्तमसौ प्रतिगृहीता लोभादहंका
राद्वा न परित्यजति प्रतिश्रुतं वा बलेन गृह्णाति तदा तस्य चौर्यपापस्य प्रायश्चित्तार्थं राज्ञा सुवर्णं

संभूय स्वानि कर्माणि कुर्वद्भिः सहमानवैः अनेन विधियोगेन कर्तव्यांशः प्रकल्पना १०
धर्मार्थं येन दत्तं स्यात्कस्मैचिद्याचते धनं पश्चाच्च न तथा तत्स्यान्न देयं तस्य तद्भवेत् ११
यदि संसाधयेत्तत्तु दर्पाल्लोभेन वा पुनः राज्ञा दाप्यः सुवर्णं स्यात्तस्य स्तेयस्य निष्कृतिम् १२
दत्तस्यैषोदिता धर्म्या यथावदनपक्रिया अतः परं प्रवक्ष्यामि वेतनस्यानपक्रियां १३
भृतो नार्तो न कुर्याद्यो दर्पात्कर्म यथोदितं स दण्ड्यः कृष्णलान्यष्टौ न देयं तस्य वेतनम्
आर्तस्तु कुर्यात्स्वस्थः सन्यथाभाषितमादितः सुदीर्घस्यापि कालस्य तल्लभेतैव वेतनम्
यथोक्तमार्तः स्वस्थो वा यस्तत्कर्म न कारयेत् न तस्य वेतनं देयमल्पकस्यापि कर्मणः १४

255

दण्डदापनीयो भवेत् १२ दत्त एतद्दत्तस्याप्रतिपादनं धर्मोक्तं येन तत्तदुक्तम् अतोऽनन्तरं भृते
रप्यसमर्पणादिकं वक्ष्यामि १३ भृत यो भृतिपरिक्रीतो व्याध्यपीडितो यथा निरूपितं क
र्माहंकारान्न करोति स्वस्थः सन्याहग्भाषितं पूर्वं तादृक्कुर्यात् स चिरकालादपि वेतनं तत्कर्मा
नुसारि लभेतैव १४ यथा तत्कर्म यथाभाषितं पीडितोऽन्येन कारयेत् स्वस्थो वा न कुर्यात् ना
पि कारयेत् तस्य किंचिदूनस्यापि कृतस्य कर्मणो वेतनं न देयं १५

उ सकर्मानुसारेण सुवर्णकृष्णलान्यष्टौ दण्डनीयः वेतनं चास्य न देयं १३ आर्तो यदा व्याध्यादिपीडया

उ·
२५५

अथ संभूयोत्थानमाह ऋत्वि यज्ञे वृत ऋत्विग्यदि किंचित्कर्म कृत्वा व्याध्यादिना किंचित्कर्मेप
परित्यजति तदा तस्य तत्र ऋत्विग्भिः यथालोचकृतानुसारेण दक्षिणांशो देयः ५ दक्षि मध्यंदि
नसवनादौ दक्षिणाकाले स दत्तासु व्याध्यादिना कर्मत्यजन्नृत्विगन्यद्वारा दिना कृत्स्नमेव दक्षिणाभा
गं लभेत कर्मशेषमकृतमन्येन कारयेत् ६ यस्मि यस्मिन्कर्मणि आधानादौ यंगामंगं प्रति
या दक्षिणा यत्संबंधेनश्रुतास्तुः स एव कितास्ता आददीत उत तदङ्गमात्रं सर्वे विभज्य गृह्णी
रन्निति संशयः सिद्धांतमाह ७ रथं केषांचिच्छाखिनामाधाने अध्वर्यवे रथो देयः तेनाम्नायते
ब्रह्मणे च वेगवानश्वः होत्रेश्वः होत्रे वाश्वः उद्गात्रे सोमक्रये सोमवहनं शकटं प्रतीयवस्था
आम्नायसमाम्नायादक्षिणायत्संबंधेन श्रूयते स एव तामाददीत ८ संप्रति धनदक्षि

ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत्। कृत्स्नमेव लभेतांशमन्येनैव च कारयेत्॥
यस्मिन्कर्मणि यास्तु स्युरुक्ताः प्रत्यङ्गदक्षिणाः। स एव ता आददीत भजेरन्सर्व एव वा॥ ६
रथं हरेद्वाध्वर्युर्ब्रह्माधाने च वाजिनं। होता वापि हरेदश्वमुद्गाता चाप्यनः क्रये॥ ७
सर्वेषामर्धिनो मुख्यास्तदर्धेनार्धिनोऽपरे। तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः॥ ८
संभूय स्वानि कर्माणि कुर्वद्भिः सह मानवैः। अनेन विधियोगेन कर्तव्यांशप्रकल्पना॥

णाविभागमाह सर्वे तथा तेन शतं दक्षिणोत्पते तत्र सर्वेषां षोडशानामृत्विजां मध्ये
मुख्या ऋत्विजः होत्रध्वर्युब्रह्मोद्गातारः स समग्रदक्षिणायास्तेषामर्धहरा अर्धं चत्वारिंशा ऽ
भाजो भवंति अतएव कात्यायनेन द्वादशशतमिति यमेकं द्वादशगोदानं विहितं पष्टिपत
स्यार्धं पंचाशद्भवति तथापि द्वे स्मृता ईग्रहणेनापि अर्धिन उच्यते साम्याप्याद्यमेवं ताव
त्र्यणां प्रतिस्थाता ब्राह्मणाच्छंसि प्रस्तोता रस्तु मुख्यानिरग्रहीतु दक्षिणार्धग्रहणेनार्धिन उच्यं
तेततो मिनो तृतीयांशा नेष्टाग्नीध्र प्रतिहर्तारस्तु मुख्यार्धं निग्रहीतस्ततो तृतीयमंशं लभंते पादिन
स्तु ग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्याः पतेमाव्यावार्धं निग्रहीतस्य चतुर्थमंशं लभंते एतच्च षट्
द्वितीये भ्यश्चत्वारः तृतीयेभ्य इत्यादिः उत्तरेभ्य इति सूत्रयता कात्यायनेन स्फुटीकृतं ९

म॰ स्मृ॰
टी॰
२५६

अक इत्युक्तं कन्या क्षतयोनिरिति यो मनुष्यो द्वेषेण ब्रूयात्स तस्या उक्तदोषमविभावयन्पणशतं राजदंडं प्राप्नु
यात् उक्तमस्याः अकन्येति वादिनो दंडो यस्मात् २३ पाणीति अर्यमणं नु देवं कन्या अग्निमयक्षत इत्येव
मादयो वैवाहिका मनुष्याणां मंत्राः कन्याविषया एव अकन्या स्वेव व्यवस्थिता नाकन्याविषये क्वचित् तस्मा
धर्मविवाहासिद्धये व्यवस्थिताः असमवेतार्थत्वात् अत एवाहताः क्षतयोनयो वैवाहिकमंत्रैः संस्क्रिय
माणा अपि यस्मादपेतधर्मविवाहादिक्रियाप्राप्तिर्न भवंति नासौ धर्मो विवाह इत्यर्थः न तु क्षतयोने
वैवाहिकमंत्रहोमादिनिषेधकमिदं यागर्भिणी संस्कृते तत्पावोढः कन्या समुद्भव इति क्षतयोनेरपि
मनुनैव विवाहाख्यसंस्कारस्य वक्ष्यमाणत्वात् देवलेन तु गांधर्वादिविवाहे तु पुनर्वैवाहिको विधिः
कर्तव्यस्त्रिभिर्वर्णैः समयेनाग्निसाक्षिक इति गांधर्वादिविवाहे तु होममंत्रादिविवाहविधिरुक्तः

256

अकन्येति तु यः कन्यां ब्रूयाद्द्वेषेण मानवः स शतं प्राप्नुयाद्दंडं तस्या दोषमदर्शयन् २३ पाणिग्रह
णिका मंत्राः कन्यास्वेव प्रतिष्ठिताः नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः २४ पाणिग्रह।
णिका मंत्रा नियतं दारलक्षणं तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे २५ यस्मिन्यस्मिन्कृते
कार्ये यस्येहानुशयो भवेत् तमनेन विधानेन धर्मे पथि निवेशयेत् २६ पशुषु स्वामिनां चैव।
पालानां च व्यतिक्रमे विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः २७

गांधर्वस्त्रीसमागमपूर्वो भवति तत्र च क्षतयोनिविषये धर्मत्वं मनुनैवोक्तं अतः सामान्येविशेषस्यापातादित
रविषयोयं क्षतयोनेर्विवाहस्याधर्मत्वोपदेशः २४ पाणि वैवाहिकमंत्रा निश्चितं भार्यात्वनिमित्तं तेषां
त्वेषं यथाशास्त्रं प्रयुक्ते भार्यात्वे निष्पत्ते तेषां तु मंत्राणां सा च सप्तपदी भवति मंत्रेण कन्यायाः सप्तमेद
त्तेपदे भार्यात्वनिष्पत्तेः यास्त्रतेः समाप्तिर्विज्ञेया यवं च सप्तपदी दानात्प्राग्भार्यात्वानिष्पत्तेः स्मृत्यनुश
यस्त्याज्योऽर्थः २५ न केवलं क्रयविक्रय एवायं त्यन्यत्रापि यस्मिन्संविद्धे तन्नादौ कार्ये यस्य पश्चात्तापो
जायते तमनेन दशाहविधिना धर्मादनपेते मार्गे नृपः स्थापयेत् २६ पशु गवादिपशुविषये स्वा
मिनां पालानां च व्यतिक्रमजाते विवादं सम्यक् धर्मयाथात्म्यात्प्रव्यवस्थापादस्यामि २७

पु॰
२५६

एष एषा यथावस्था वेतनादानाख्यस्य कर्मणो निःशेषेणोक्तानंतरं संविद्व्यतिक्रमकारिणां दंडादिव्यवस्थां वदिष्यामि १८ यो ग्रामदेशसंघानां ग्रामदेशशब्दाभ्यां तन्निवासिनो लक्ष्यंते संघो वणिगादिसमूहः उक्तमस्माभिः कार्यमिदं न कार्यमित्येवंरूपसंकेतं सत्यादिशपथेन कृत्वा यो नरो लोभादिनातिक्रमेत्तं राष्ट्राद्विप्रवासयेत् १९ निगृह्य शपथेन संविद्व्यतिक्रमकारिणं निरोध्य चतुरः सुवर्णान् षट् निष्कान् प्रत्येकं चतुःसुवर्णपरिमितान् राजतं च शतमानं त्रिंशत्त्वधिकरक्तिकाशतत्रयपरिमाणं त्रयमेतद्द्विषयगौरवलाघवापेक्षया समुदितं व्यस्तं वा राजा दंडं दापयेत् २० एवं ग्रामेषु ब्राह्मणादिजातिसमूहेषु च समयातिक्रमकारिणामेतं दंडविधिं धर्मप्रधानो राजा अनुतिष्ठेत् २१

एष धर्मोऽखिलो लोके वेतनादानकर्मणः अत ऊर्ध्वं प्रवक्ष्यामि धर्मं समयभेदिनां १८
यो ग्रामदेशसंघानां कृत्वा सत्येन संविदं विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् १९
निगृह्य दापयेच्चैनं समयव्यभिचारिणं चतुःसुवर्णान्षट्निष्कान्शतमानं च राजतं २०
एवं दंडविधिं कुर्याद्धार्मिकः पृथिवीपतिः ग्रामजातिसमूहेषु समयव्यभिचारिणां २१
क्रीत्वा विक्रीय वा किंचिद्यस्येहानुशयो भवेत् सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वा २२
परेण तु दशाहस्य न दद्यान्नापि दापयेत् आददानो ददच्चैव राज्ञा दंड्यौ शतानि षट् २३
यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति तस्य कुर्यान्नृपो दंडं स्वयं षण्णवतिं पणान् २४

इदानीं क्रयविक्रयानुशयमाह क्रीत्वा क्रीत्वा विक्रीय वा किंचिद्द्रव्यमविनश्वररूपं स्थिरार्घं भूमिताम्रपट्टादि यस्य लोके पश्चात्तापो जायते न साधु मया क्रीतमिति स क्रीतं दशाहमध्ये प्रत्यर्पयेत् विक्रीतं च गृह्णीयात् २२ परे दशाहादूर्ध्वं क्रीतेन मन्येत् नापि विक्रीतं विक्रयिको बलेन दापयेत् विक्रीतं बलेन गृह्णन् क्रीतं च प्रत्यर्पयन् राजा षट् पणशतानि दंड्यः २३ यस्तु नोन्मत्ताया इति सामान्येनोक्तं दंडविशेषाभिधानार्थमिदं उन्मत्तत्वादिदोषानकथयित्वा दोषवतीं कन्यां पिता प्रयच्छति तस्य राजा स्वयमादरेण षण्णवतीन्पणान्दंडं कुर्यात् अनुशयप्रसंगाच्चैतत्कन्यायामनूच्यते २४

तत्र तस्मिन् परीहारस्थाने यदि केनचिद् दत्तावृतिकं धान्यमन्नं तत्र पशवो हिंस्युर्भक्षयेयुः तदा राजा पालानां
दंडं न कुर्यात् ३६ वृतिं तत्र परीहारस्थाने क्षेत्रे वृतिं कंटकादिमयीं तथाविधां महतीं कुर्यात् याम
परपार्श्वगत उष्ट्रो नावलोकयेत् तस्यां च यत्किंचित् छिद्रं श्वसूकरप्रवेशयोग्यं तत्सर्वं पूरयेत् पथि
वर्त्मसमीपे वा परीहारस्थे क्षेत्रे दत्तवृतौ सपालः पशुः पालानिवारितो द्वारादिना कथंचित्प्रविष्टो
यदा भक्षयति तदा पणशतं दंड्यः पशोश्च दंडासंभवात् पाल एवात्र दंड्यः विपालांस्तु न भक्षयतः प
शून् तत्क्षेत्ररक्षको निवारयेत् ३८ क्षेत्रे वर्त्मग्रामाभ्यां व्यतिरिक्तेषु पशुर्भक्षयन्सपादं पणं द
डमर्हति अत्रापि पाल एव दंड्यः सर्वत्र क्षेत्रे पशुभक्षितं फलं स्वामिने पालेन स्वामिना वा यथापरा
धं दातव्यमिति निश्चयः ३९ अनि प्रसूतां गां अनिर्गतदशाहां तथा चक्रशूलांकितान्वृषा

तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि न तत्र प्रणयेद्दंडं नृपतिः पशुरक्षिणां ३६ वृतिं तत्र प्र
कुर्वीत यामुष्ट्रो नावलोकयेत् छिद्रं च वारयेत्सर्वं श्वसूकरमुखानुगं ३७ पथि क्षेत्रे परि
वृते ग्रामांतीयेऽथवा पुनः सपालः शतदंडार्हो विपालान्वारयेत्पशून् ३८ क्षेत्रेष्वन्येषु तु प
शुः सपादं पणमर्हति सर्वत्र तु सदो देयः क्षेत्रिकस्येति धारणा ३९ अनिर्दशाहां गां सू
तां वृषान्देवपशूंस्तथा सपालान्वा विपालान्वा न दंड्यान्मनुरब्रवीत् ४० क्षेत्रिकस्या
त्यये दंडो भागाद्दशगुणो भवेत् ततोऽर्धदंडो भृत्यानामज्ञानात्क्षेत्रिकस्य तु ४१ एत
द्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः स्वामिनां च पशूनां च पालानां च व्यतिक्रमे ४२
सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः ज्येष्ठे मासि नयेत्सीमां सुप्रकाशेषु सेतुषु ४३

न् विहायादिदेवसंबंधिपशून्पालसहितान्पालरहितान्वा सस्यस्य भक्षणप्रवृत्तान्मनुरदंड्या
नब्रवीत् उक्तदृष्टीनां वृषाणामपि गवां गर्भार्थं गोकुले गोपैर्धारणात्सपालत्वसंभवः ४०
क्षेत्रि क्षेत्रकर्षिकस्यात्मपशुसस्यभक्षणे यथाकालावपनादौ वापराधे सति यावतो राज
भागस्य तेन हानिः कृता ततो दशगुणो दंडः स्यात् क्षेत्रिकाविदिते भृत्यानामज्ञानापराधे क्षेत्रि
कस्यैव दशगुणादर्धदंडः क्षेत्रप्रसंगादिदमुक्तं ४१ एत स्वामिनां पालानां चारक्षणादप
राधे पशूनां च सस्यभक्षणे नृपव्यतिक्रमे धर्मप्रधानो नृपतिरेतदुक्तं कर्तव्यमनुतिष्ठे
त् ४२ सीम द्वयोर्ग्रामयोर्मर्यादां प्रति विप्रतिपन्नोऽसत्यां ज्येष्ठे मासि विनापशुक्षततृणे

दिवेति दिवा पशूनां पालहस्तस्थानां योगक्षेमविषये दोषे जाते पालस्य गर्हणीयता रात्रौ पुनः प्रत्यर्पि-
तानां स्वामिगृहे स्थितानां स्वामिनो दोषो यदि रात्रावपि पालहस्तगता भवंति तदा दोषउत्पन्ने पा-
ल एव गर्हणीयतां प्राप्नोति २८ गोप योगोपालो गवां भृत्यः क्षीरेण भृतो न तु भक्तादिना स स्वाम्यनु-
ज्ञया दशभ्यो गोभ्यः श्रेष्ठामेकां गां भृत्यर्थं दुह्यात् सा भक्तादिभिरभृते गोपाले भृतिः स्यादेवं चैक-
गवी क्षीरदानेन दश गाः पालयेदित्युक्तं २९ नष्ट नष्टं दृष्टिपथातीतं कृमिभिर्नाशितं श्वभिः
खादितं विवरादिपातमृतं प्रदर्शनार्थं चैतत् पालसंबंधिरक्षणादिपुरुषव्यापाररहितं मृतं
पलायितं वा गवादि पशुपाल एव स्वामिने दद्यात् ३० विघु चौरैः पुनःपुनः परहाद्युद्धुष्य हृतं

दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे योगक्षेमोऽन्यथा चेत्स्यात्पालो वक्तव्यतामियात् २८
गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वरां गोस्वाम्यनुमते भृत्यः सा स्यात्पालेऽभृते भृतिः २९ ।
नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतं हीनं पुरुषकारेण प्रदद्यात्पाल एव तु ३० विघुष्य
तु हृतं चौरैर्न पालो दातुमर्हति यदि देशे च काले च स्वामिनः स्वस्य शंसति ३१ कर्णौ चर्म
च वालांश्च बस्तिं स्नायुं च रोचनां पशुषु स्वामिषु दद्यान्मृतेष्वंगानि दर्शयेत् ३२ अजाविके
तु संरुद्धे वृकैः पाले त्वनायति यां प्रसह्य वृको हन्यात्पाले तत्किल्बिषं भवेत् ३३ तासां चे-
दवरुद्धानां चरंतीनां मिथो वने यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्बिषी ३४ धनुःश-
तं परीहारो ग्रामस्य स्यात्समंततः शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु ३५

पालो दातुं नार्हतीति विघुष्येति ३१ कर्णौ स्वयं मृतेषु पशुषु कर्णौ चर्म लांगूलवालस्नायुं पृथ्वीभागस्था-
पुरोचनां गोस्वामिने दद्यादन्यानि च चिह्नानि शृंगखुरादीनि दर्शयेत् ३२ अजावि अजाश्चा-
विकाश्च अजाविकं गवाश्वप्रभृतीनि चेत्यत्र पठितत्वादेकवद्भावः तस्मिन्नजाविके वृकैः परिवृते
सति पाले चागच्छति यामजामेडकां वा वृको हन्यात्तत्पालस्य दोषः स्यात् ३३ तासां तासामजा-
जाविकानां पालेन नियमितानां संघीभूय वने चरंतीनां मध्यादुद्दिश्य वृकः कुतश्चित्तेजसा
उत्प्लुत्य मारयति तां पालो विहन्यान्न तत्र पालः दोषभाक् ३४ धनु चतुर्हस्तो धनुः शम्यायष्टिः
तस्याः पातः प्रक्षेपः ग्रामसमीपे सर्वासु दिक्षु चत्वारि हस्तशतानि त्रीणि वा यष्टिप्रक्षेपान्यावत्
पशुप्रचारार्थं सस्यवपनादिनिरोधपरिहारः कार्यः नगरसमीपे पुनरयं त्रिगुणः कर्तव्यः ३५

म॰ स्मृ॰ टी॰ १५८

ग्राम। ग्रामीयजनसमूहानां ग्रामद्वयनियुक्तयोः वादिप्रतिवादिनोश्च समक्षं सीमाविषये सीमालिं
गसंदेहे लिङ्गानि साक्षिणः प्रष्टव्याः ५२ ते। ते साक्षिणः पृष्टाः समस्ता इदं येन सीमाविषयेन प्रका
रेण निश्चयं ब्रूयुस्तेन प्रकारेण विस्मरणार्थं पत्रके सीमां लिखेत् तांश्च सर्वानेव साक्षिणो नामादि
मागतो लिखेत् ५३ शिरो। ते साक्षिणः स्रग्विण इति सामान्यश्रवणेपि रक्तस्रग्वसनाः सीमान
येयुरिति याज्ञवल्क्यवचनाद्रक्तपुष्पमालाधारिणो रक्तवाससः समस्तके मृल्लोष्टानि गृहीत्वा
यदस्माकं सुकृतं तन्निःफलं स्यादित्येवमात्मीयैः सुकृतैः शापिताः सन्तस्तां सीमां यथासत्यं निर्णये
युः ५४ साक्ष्य। तद्ग्रामद्वयसंबंधिसीमाविवादे साक्ष्यभावे चतुर्दिशां समन्तभवा देशाः सीमन्ता
लङ्घासिनः चत्वारो ग्राम्याः साक्षिधर्मेण राजसमक्षं सीमाविनिर्णयं कुर्युः प्रयताः प्रयत्नतः ५६

ग्रामेयककुलानां तु समक्षं सीम्नि साक्षिणः प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः ५२ ते
पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निश्चयं निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः ५३ शिरो
भिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसं ५४ यथो
क्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमं ५५ साक्ष्यभावे तु
चत्वारो ग्रामसीमान्तवासिनः सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ ५६ सामन्तानामभावे
तु मौलानां सीम्नि साक्षिणां इमानप्यनुयुञ्जीत पुरुषान्वनगोचरान् ५७ व्याधान् शाकुनिकान् गो
पान्कैवर्तान्मूलखानकान् व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान् ५८ ते पृष्टास्तु यथा ब्रू
युः सीमासंधिषु लक्षणं तत्तथा स्थापयेद्राजा धर्मेण ग्रामयोर्द्वयोः ५९ क्षेत्रकूपतडागा
नामारामस्य गृहस्य च सीमान्तेऽन्त्यप्रत्ययः सभासेतुविनिश्चयः ६०

सीम। साक्षिधर्मेण राजा समक्षं समन्तभवा ग्रामवासिनां ग्रामनिर्माणकालादारभ्य पुरुषक्रमेण तज्ज्ञा
मस्थानां सीमासाक्षिणामभावे इमान्वक्ष्यमाणान्सन्निहितवनचारिणः पुरुषान्पृच्छेत् ५६ व्याध।
लुब्धकान्पक्षिवधजीविनो मूलोत्पादनजीवनान्सर्पग्राहिणः शिलोञ्छवृत्तीनन्यांश्च फलपुष्पेन्धना
द्यर्थं वनव्यवहारिणः पृच्छेत् एते हि स्वप्रयोजनार्थं तेन ग्रामे सर्वदा वनं गच्छन्तः तद्ग्रामसीमाभि
ज्ञाः भवन्ति। ५८ ते पृ। ते व्याधादयः पृष्टाः सीमासंधिषु येन प्रकारेण चिह्नं ब्रूयुः तेनैव प्रका
रेण राजा द्वयोर्ग्रामयोः व्यवस्थां कुर्यात् ५९ क्षेत्र। एकग्रामेपि क्षेत्रकूपतडागोद्यानगृहाणां सीमासे
तुविवादे देशसामन्तसाक्षिप्रमाणक एव मर्यादाचिह्ननिश्चयो ज्ञेयो न व्याधादिप्रमाणकः ६०

डे॰ १५८

158

सीम न्यग्रोधादीन्पादपान्क्षीरिणश्चोदुंबरादींश्च चिरस्थायिनः सीमालिंगभूतान्कुर्यात् ४४ गुल्म
गुल्मान्मूलकांडरहितान्वेणून् अश्मचुरककंटकितादिभेदेन नानाप्रकारान् शमीवृक्षान्वल्लीलताः स्थू
लानि भूमौन्नतभूभागान् शरान् कुब्जकरूपगुल्मांश्च प्रचुरोपभोग्यत्वेनादरार्थं पृथक् निर्दिष्टा
न्सीमालिंगभूतान्कुर्यात् एवं च कृते सीमा न नश्यति ४५ तडा तडागकूपदीर्घिकाजलनि
र्गममार्गदेवगृहाणि सीमासंधिषु ग्रामद्वयमध्यस्थानेषु कार्याणि एतेषु सीमानिर्णयाय
लोकविख्यातत्वेन सदा यत्किंजना एवं श्रुतिपरंपरया चिरकालेपि सीमाज्ञानं भवति ४६
उप सीमानिर्णये सर्वदा भ्रान्तिर्लोके मनुष्याणां भ्रमत्वात् दृष्ट्वाभिहितव्यतिरिक्तान्यपि गूढानि
वक्ष्यमाणानि सीमाचिह्नानि कारयेत् ४७ अश्म ४८ स्थूलपाषाणान् प्रचुराण्यस्थीनि गोवालतुषभ

सीमावृक्षांस्तु कुर्वीत न्यग्रोधाश्वत्थकिंशुकान् शाल्मलीसाललतालांश्च क्षीरिणश्चैव पादपान्
गुल्मान्वेणूंश्च विविधान् शमीवल्लीस्थलानि च शरान्कुब्जकगुल्मांश्च तथा सीमा न नश्यति
तडागान्युदपानानि वाप्यः प्रस्रवणानि च सीमासंधिषु कार्याणि देवतायतनानि च ४६
उपच्छन्नानि चान्यानि सीमालिंगानि कारयेत् सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययं ४७
अश्मनोस्थीनि गोवालांस्तुषान्भस्म कपालिकाः करीषमिष्टकांगारान् शर्करा वालुकास्तथा
यानि चैवंप्रकाराणि कालाद्भूमिर्न भक्षयेत् तानि संधिषु सीमायामप्रकाशानि कारयेत् ४८
एतैर्लिंगैर्नयेत्सीमां राजा विवदमानयोः पूर्वभुक्त्या च सततमुदकस्यागमेन च ४९ य
दि संशय एव स्यात् लिंगानामपि दर्शने साक्षिप्रत्यय एव स्यात्सीमावादविनिर्णये ५०

स्मकपालिकाः अश्मकगोमयपक्वेष्टकांगारपाषाणकणिकाः सिकताः अन्यान्येवंप्रकाराणि का
लांतरेणापि अस्थिप्रभृतीनि यानि चिरकालेनापि भूमिरात्मसान्न करोति तानि ग्रामयोः सं
धिसीमायां प्रतिप्रकुंभेषु तानि सीमांते विनिदध्यात् पथिस्थितिः दृष्टस्य तिवचनात्स्थूलपाषाण
व्यतिरिक्तानि कुंभेषु कृत्वा प्रच्छन्नानि भूमौ निधाय धारयेत् ४९ एते विवदमान
योः ग्रामयोः एतैश्चिह्नैः राजा सीमां नयेत् वसतोः पूर्ववच्छन्नया भुक्त्या
सीमानिर्णयः न तु त्रिपुरुषादिकं तथा तदनादिः सीमेति पर्यंदत्त ग्रामद्वयसंधिस्थान
स्यादि प्रवाहेन पारंपर्येण यामपाश्च सीमां निश्चिनुयात् ५० यदि यदि प्रच्छन्नप्रकाशलिंग
दर्शनेपि केचित्प्रच्छन्नागारकं भात्रसमीक्ष्याननंतरं नोक्तानि पातनाप्रमाण्याय सीमातत्त्वः सन

म॰ स्मृ॰ टी॰ २५९

नाम अभिद्रोहेणाक्रोशः ब्राह्मणादीनामरे त्वं यज्ञदत्त ब्राह्मणापसद इत्याद्याक्रोशेन नामजातिग्रहणं
कुर्वतो लोहकीलो अग्निना प्रदीप्तो दशांगुलो मुखे प्रवेश्यः ७१ धर्मं कञ्चिद्धर्मलेशमवगम्या
यं ते धर्मोऽनुष्ठेय इति ब्राह्मणस्याहंकारेणोपदिशतो शूद्रस्य मुखे कर्णयोश्च राजा ज्वलत्तैलं प्र
क्षेपयेत् ७० श्रुतं समानजातिविषयमिदं दण्डलाघवात् तत्र शूद्रस्य द्विजातीनां श्रुतादिविपर्ययेन तत्पतकु
तेन भवानेतद्देशजो न तत्त्वेषां जातिः न तव शरीरसंस्कारकमुपनयनादिकर्मकृतमित्येवमहंकारे
णमिथ्यावदन् द्विशतं दण्डं दाप्यः स्यात् वितथेनेति तृतीयाभिधाने प्रकृत्यादिभ्य उपसंख्यानमिति
तृतीया ७२ काणं एकाक्षि विकलं पादविकलं अन्यं वापि तथाविधं हस्ताद्यंगविकलं सत्येनापि।
काणादिशब्देन ब्रुवन्नपचितं तावत्कार्षापणं दण्डं दाप्यः ७३ मातरं आक्षारितः आक्षारिकोऽभिशस्तेत्यमर

नामजातिग्रहं त्वेषामभिद्रोहेण कुर्वतः। निक्षेप्योऽयोमयः शंकुर्ज्वलन्नास्ये दशांगुलः ७१।
धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः। तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ७० श्रु
तं देशं च जातिं च कर्म शारीरमेव वा। वितथेन ब्रुवन्दर्पाद्दाप्यः स्याद्द्विशतं दमम् ७२ काणं
वाप्यथवा खंजमन्यं वापि तथाविधं। तथ्येनापि ब्रुवन्दाप्यो दण्डं कार्षापणावरं ७२ मातरं पि
तरं जायां भ्रातरं पितरं गुरुं। आक्षारयञ्छतं दाप्यः पन्थानं चाददद्गुरोः ७३ ब्राह्मणक्षत्रिया
भ्यां तु दण्डः कार्यो विजानता। ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः ७४ विट्शूद्रयोरेवमे
व स्वजातिं प्रति तत्त्वतः। छेदवर्जं प्रणयनं दण्डस्येति विनिश्चयः ७५ एष दण्डविधिः प्रोक्तो
वाक्पारुष्यस्य तत्त्वतः। अत ऊर्ध्वं प्रवक्ष्यामि दण्डपारुष्यनिर्णयं ७५

मरकोषः मात्रादीन् पातकादिना अभिशापयन् गुरोश्च पन्थानमददत् शतं दण्ड्यः अत्र मातृभ्रातृभार्यादी
नां गुरुलघुपातकाभिशापेन दण्डसाम्यं समाधेयं मेधातिथिस्त्वब्रह्मचारिणो भेदमुक्तवान् मातापित्रादीनां पर
स्परभेदेन कर्तुरपि दण्डविधिरिति व्याख्यातवान् ७३ ब्राह्मे ब्राह्मणक्षत्रियाभ्यां परस्परं पतनीयाक्रो
शे कृते दण्डशास्त्रज्ञेन राज्ञा दण्डः कार्यः तमेव विशेषमाह ब्राह्मणे क्षत्रियाक्रोशनि प्रथमसाहसः क्ष
त्रे ब्राह्मणाक्रोशनि पुनः क्षत्रिये मध्यमसाहसः ७४ विडिति वैश्यशूद्रयोरन्योन्यजातिं प्रति पत
नीयाक्रोशे ब्राह्मणक्षत्रियवद्वैश्यस्य शूद्राक्रोशनि प्रथमसाहसः शूद्रे वैश्याक्रोशिनि मध्यमसाहसः
एवं शूद्रे दण्डस्य प्रणयनं जिह्वाछेदरहितं यथावत्कार्यमिति शास्त्रनिश्चयः एवं चैकजातिद्विजाती
नीति प्राप्तो जिह्वाछेदो वैश्यनिवारितो ब्राह्मणक्षत्रियविषय एवावतिष्ठते ७५ एष दण्डविधिः

सं॰ २५९

259

ग्रामं सीमाचिह्ननिमित्तं विवदमानानां मनुष्याणां यदि समन्तदेशवासिनो मिथ्या ब्रूयुस्तदा ते सर्वे प्रत्ये-
कं मध्यमसाहसं दण्डनीयाः एवं वा सामन्तरूपाणां पूर्वोक्तद्विशतो दमो ज्ञेयः ६२ गृहं गृहतडागोद्या-
नक्षेत्राणामन्यतमं मारणबन्धनादिभयकथनपूर्वकमाक्रम्य हरणे पञ्चपणशतानि दण्डनीयः स्या-
त् अज्ञानादाहरतो द्विशतो दण्डः ६३ सीमालिङ्गसाक्ष्याद्यभावे न सीमायां परिच्छेत्तुमशक्यायां रा-
जैव धर्मज्ञः पक्षपातरहितो ग्रामद्वयमध्यवर्तिनीं सीमाविवादविषयां भूमिमेषामेव ग्रामवासिनामु-
पकारातिशयो भवति तद्व्यतिरेकेण महान्निर्वाहो भवतीति तेषामेव दद्यादिति शास्त्रव्यवस्था ६४
एष एषोऽनन्तरोक्तो धर्मोऽनयेन सीमानिर्णये निःशेषेणोक्तः अनन्तरं वाक्पारुष्यविषये विनिर्णयं
वक्ष्यामि प्रायेण दण्डपारुष्याद्वाक्पारुष्यप्रवृत्तेः पूर्वाभिधानं तदनन्तरं पारुष्यं दण्डवा-

सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां नृणाम् । सर्वे पृथक्पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ६२ ।
गृहं तडागमारामं क्षेत्रं वा भीषया हरन् । शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः ६३ सीमा-
यामविषह्यायां स्वयं राजैव धर्मवित् । प्रदिशेद्भूमिमेतेषामुपकारादिति स्थितिः ६४ एषो-
ऽखिलेनाभिहितो धर्मः सीमाविनिर्णये । अत ऊर्ध्वं प्रवक्ष्यामि वाक्पारुष्यविनिर्णयम् ६५ शतं ब्रा-
ह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति । वैश्योऽप्यर्धशतं द्वे वा शूद्रस्तु वधमर्हति ६६ पञ्चाशद्ब्राह्म-
णो दण्ड्यः क्षत्रियस्याभिशंसने । वैश्ये स्यादर्धपञ्चाशच्छूद्रे द्वादशको दमः ६७ समवर्णे ।
द्विजातीनां द्वादशैव व्यतिक्रमे । वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ६८ एकजातिर्द्विजा ।
तींस्तु वाचा दारुणया क्षिपन् । जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः ६९

धिक इति दण्डपारुष्याद्वाक्पारुष्यस्याल्पत्वाद्दे पूर्वनिर्देशः ६५ शतमिति ब्राह्मणस्य चोरेत्याद्याक्षेपरूपं प-
रुषमुक्त्वा क्षत्रियः पणशतं दण्डमर्हति एवं सार्धं पणशतं द्वे वा शते यथा गौरवलाघवं वैश्यः
शूद्रोऽप्येवं ब्राह्मणमाक्रोशन् ताडनादिरूपं वधमर्हति ६६ विप्रः ब्राह्मणः क्षत्रियस्योक्तरूपाक्रो-
शे कृते पञ्चाशतं पणान् दण्ड्यः वैश्यशूद्रयोर्यथोक्ताक्रोशे कृते पञ्चविंशतिर्द्वादश पणाः क्रमेण
ब्राह्मणस्य दण्डः स्यात् ६७ सम द्विजातीनां समानजातिविषये यथोक्ताक्रोशे द्वादशैव पणा
दण्डः अवचनीयेषु पुनराक्रोशविषयेषु मातृभगिन्याद्यश्लीलरूपेषु तदेवेति नपुंसकनिर्दे-
शाद्द्वादश तद्ब्राह्मणमाक्रुश्य पञ्चाशदादिप्रकृतं तदेव द्विगुणं दण्डरूपं भवेत् ६८ एकेति शूद्रो द्विजाती-
न्पातकाभियोगिन्या वाचाक्रुश्यन् जिह्वाच्छेदं लभेत यस्मादसौ पादाख्यान्निकृष्टाङ्गाज्जातः ६९

अंगा अंगानां करचरणादीनां पीडायां व्रणशोणितयोः पीडायां समुत्थानविव्ययं यावता कालेन पू
र्ववत्स्वास्थ्यं प्राप्नोति तत्समुत्थानं तद्व्ययो भवति तावता कालेन पथ्यौषधादिना यावान्व्ययो भवति तमसौदा
पनीयः अथवा तेषां पीडोन्मादको न दातुमिच्छति तदा पः समुत्थानव्ययो यश्च दंडस्तत्सर्वं दंड्यत्वेन रा
ज्ञा दाप्यः ८७ द्रव्या द्रव्याण्यन्तर्विशेषद्वानि कटकताम्रचटादीनि यो यस्य ज्ञानादज्ञानाद्वा ना
शयेत्स तस्य तद्द्रव्यान्तरादिना तस्य तुष्टिमुत्पादयेत् राज्ञश्च विनाशितद्रव्यसमं दंडं दद्यात् ८८ चर्म
चर्मणि कृते वरत्रादौ चर्मकाष्ठमृत्तिकानिर्मिते च भांडेषु मूलफलेषु पुष्पसनाशितेषु तन्मूल्यात्प
चगुणो दंडो राज्ञा देयः स्वामिनस्तु तुष्टिरुत्पादनीयैव ८९ यान यानस्य रथादेः यातुश्च सारथ्याः
देः स्वामिनश्च यस्तु यानं तेषां छिन्ननासादीनि दश निमित्तानि निवर्त्तमानानि दंडमतिक्रम्य वर्त्तन्ते ए

अंगावपीडनानां च व्रणशोणितयोस्तथा समुत्थानव्ययं दाप्यः सर्वदंडमथापि वा ८७ द्रव्याणि
हिंस्याद्यो यस्य ज्ञानतोऽज्ञानतोऽपि वा स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समं ८८ चर्मचार्मिकभांडेषु
काष्ठलोष्टमयेषु च मूल्यात्पंचगुणो दंडः पुष्पमूलफलेषु वा ८९ यानस्यैव यातुश्च यान
स्वामिन एव वा दशातिवर्तनान्याहुः शेषे दंडो विधीयते ९० छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमु
खागते अक्षभंगे च यानस्य चक्रभंगे तथैव च ९१ छेदने चैव यंत्राणां योक्त्ररश्म्योस्तथैव च
आक्रंदे चाप्यपैहीति न दंडो मनुरब्रवीत् ९२ यत्रापवर्त्तते युग्यं वैगुण्यात्प्राजकस्य तु तत्र स्वामी
भवेद्दंड्यो हिंसायां द्विशतो दमः ९३ प्राजकश्चेद्भवेदाप्तः प्राजको दंडमर्हति युग्यस्थाः प्राजके

तेषु निमित्तेषु सत्सु प्राणिमारणे द्रव्यनाशे च प्रवृत्ते यानस्वाम्यादीनां दंडो न भवतीति मन्वादय आहुः ए
तद्व्यतिरिक्तनिमित्तेषु पुनर्दंडो विधीयते ९० ९१ छिन्न छेदनासाया भवनास्य घोरावयवा यस्य तस्य
यः सा चेह बलीवर्दादिनासंबंधिनी रज्जुः छिन्ननासरज्जौ बलीवर्दादिके भग्नयुगाख्यकाष्ठे च पादो भूमि
वैषम्यादिना तिरश्चीनं प्रतीचीनं चागते तेन प्रावर्त्तते प्रविष्टात् अक्षकाष्ठभंगे चक्रस्य भंगे यंत्राणां
चर्मबंधनानां छेदने योक्त्रस्य पशुग्रीवारज्ज्वो रश्मेः प्रग्रहस्य छेदने अपसरापसरेत्यादिशब्दैः प्रोच्चैः सार
थ्यादिना कृते च यानेन प्राणिहिंसा द्रव्यनाशयोः स्वाम्यादेर्दंडो नास्तीति मनुराह ९२ यत्र यत्र सारथे
रकौशल्यान मार्गात्प्रच्युतिः तत्र हिंसायां प्राणिहिंसायां स्वाम्यपि नियोगात्स्वामी द्विशतं दंडो दाप्यः स्यात्
९३ प्राज यदि तु सारथिः कुशलः स्यात्तदा सारथिरेवोक्तं द्विशतं दमं वक्ष्यमाणं च मनुष्यमारणाद्
मादिकं दंडमर्हति न स्वामी अकुशले तु तस्मिन् सारथौ स्वामिव्यतिरिक्ता अन्येऽपि यानारूढा अकुशल

येन केनचिदंगेन अंत्यजः शूद्रो येन केनचित्कर चरणादिनांगेन सजात्यादुत्कृष्टं द्विजातिं प्रहरेत्तदेवांगमस्य छेदनीयमिति श्रयं मनोरुपदेशः मनुग्रहणमादरार्थमनुसेवोत्तरत्र प्रपंचः ७९ पाणिमुद्यम्य दंडं वा उद्यम्यः प्रवर्तते स पाणिच्छेदं लभते पादेन कोपात्प्रहरन्पादच्छेदं प्राप्नोति ८० सह ब्राह्मणेन सहैवासनोपवेशी शूद्रः कट्यां तप्तलोहकृतचिह्नो देशान्निर्वास्यः स्फिचं वास्य यथा न म्रियते तथा कर्तयेत् ८१ अव दर्पेण श्लेष्माणं ब्राह्मणमवमानयतः शूद्रस्य राजा द्वावोष्ठौ छेदयेत् मूत्रयतो पादप्रमाणयतो मेढ्रं शर्धनं गुदशब्दः पर्दइति यावत्तेनावमानयतो दर्पात्प्रमादात्गुदं छेदयेत् ८२ केशे दर्पादिमनुवर्तते अहंकारेण केशेषु ब्राह्मणं गृह्णतः शूद्रस्य पीडा स्याज्जातामजातां वेमविचारयन् हस्तौ छेदयेत् तथा पादयोः श्मश्रुणि ग्रीवायां वृषणे च हिंसा

येन केनचिदंगेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनं ७९ पाणिमुद्यम्य दंडं वा पाणिच्छेदनमर्हति पादेन प्रहरन्कोपात्पादच्छेदनमर्हति ८० सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः कट्यां कृतांको निर्वास्यः स्फिचं वास्यावकर्तयेत् ८१ अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः अवमूत्रयतः शिश्नमवशर्धयतो गुदं ८२ केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् पादयोर्दाढिकायां च ग्रीवायां वृषणेषु च ८३ त्वग्भेदकः शतं दंड्यो लोहितस्य च दर्शकः मांसभेत्ता तु षण्निष्कान्प्रवास्यस्त्वस्थिभेदकः ८४ वनस्पतीनां सर्वेषामुपभोगो यथा यथा तथा तथा दमः कार्यो हिंसायामिति धारणा ८५ मनुष्याणां पशूनां च दुःखाय प्रहृते सति

र्थं गृह्णतो हस्तद्वयमेव छिंद्यात् ८३ त्वक् चर्ममात्रभेदकः समानजातिर्न तु शूद्रो ब्राह्मणस्य दंड्यो वा मयणयातं दंडनीयः तथा रक्तोत्पादकोपि पणशतं दंड्यः मांसभेदी निष्कान्दंड्यः अस्थिभेदकस्तु देशान्निर्वास्यः ८४ वन वृक्षगुल्मादीनां सर्वेषां येन प्रकारेण उपभोगः फलपुष्पपत्रादिना उत्तममध्यमरूपो भवति तथा तथा हिंसायामुत्तमसाहसादिर्दंडो विधेय इति निश्चयः तथा च विष्णुः फलोपगमद्रुमच्छेदी उत्तमसाहसं पुष्पोपगमच्छेदी मध्यमं भोगवल्लीगुल्मच्छेदी कार्षापणशतं तृणच्छेदी एकं कार्षापणं सर्वे पणा एव हीनदंडा तेन मनुना यागुक्ता वेदितव्याः ८५ मनु मनुष्याणां पशूनां पीडोत्पादनार्थं प्रहारे कृते सति यथा यथा पीडाधिक्यं तथा तथा दंडमप्याधिक्यं कुर्यात् एवं च मर्मस्थानादौ त्वक्भेदादिप्रकृते तत्र त्वग्भेदकः शतं दंड्य इत्ये तस्मादप्यधिको दंडो उक्त विशेषापेक्षया कार्यः ८६

म·स्मृ·
टी·
२६२

सर्वतः प्रजारक्षतो राज्ञः सर्वस्माद्वृत्तिदान्तुर्बाणगादेः शूद्रान्तात् श्रोत्रियादेः सकाशाद्धर्मषड्भागो भवति
अरक्षतश्चाधर्मादपि लोकेन कृतात् षड्भागः स्यात् तस्माद्यत्नतः स्तेननिग्रहेण प्रजारक्षणं कुर्या
त् न च भूतिपरिक्षीणत्वाद्राज्ञो धर्मषड्भागो न युक्त इति वाच्यं भूम्या धर्मषड्भागेन च परिक्रयस्य स्था।
पीयमानात् २ यं यत्कश्चिद्जपयागदानदेवार्चनादीनि करोति तस्य राजा सम्यक्प्रजापरिपालने
न षड्भागं प्राप्नोति रक्षन् भूतानि सर्वाणि स्थावरजङ्गमानि यथाधर्मशास्त्रं दण्डप्रणयनरूपेण ध।
र्मेण राजा रक्षन् घातयन् अहरहर्यज्ञैर्लक्षगोदक्षिणैर्यजते तज्जन्यं पुण्यं प्राप्नोति ३ यस्त्विति यो राजा
रक्षामकुर्वन् बलिधान्यादेः षड्भागादिकं करं ग्रामपुरनिवासिभ्यः प्रतिमासं भाद्रपौषादिनिय

सर्वतो धर्मषड्भागो राज्ञो भवति रक्षितुः अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षितुः ३०१ यद
धीते यद्यजते यद्ददाति यदर्चति तस्य षड्भागभाग्राजा सम्यग्भवति रक्षणात् ३०२ रक्षन्
धर्मेण भूतानि राजा वध्यांश्च घातयन् यजतेहरहर्यज्ञैः सहस्रशतदक्षिणैः ३०३ योर
क्षन्बलिमादत्ते करं शुल्कं च पार्थिवः प्रतिभोगं च दण्डं च स सद्यो नरकं व्रजेत् ३०४ अर
क्षितारं राजानं बलिषड्भागहारिणं तमाहुः सर्वलोकस्य समग्रमलहारकं ३०५ अन
पेक्षितमर्यादं नास्तिकं विप्रलुम्पकं अरक्षितारमत्तारं नृपं विद्यादधोगतिं ३०६ अ
धार्मिकं त्रिभिर्न्यायैर्निगृह्णीयात्प्रयत्नतः निरोधनेन बन्धेन विविधेन वधेन वा ३०७

262

मेन वा ग्रासं शुल्कं स्थलजलपथादिना वाणिज्यकारिभ्यो नियतस्थानेषु द्रव्यानुसारेण ग्रा
संदानमिति प्रसिद्धं प्रतिभोगं फलकुसुमशाकतृणाद्युपायनं प्रतिदिनं ग्रासं दण्डं व्यवहारादौ
गृह्णाति स मृतः सन् सद्य एव नरकं याति ४ अन यो राजा रक्षति अथ च धान्यादिषड्भागं ब
लिरूपं गृह्णाति तं सर्वलोकानां सकलपापस्वीकारिणं मन्वादय आहुः ५ अन उल्लङ्घित
शास्त्रनियमं परलोकाभावबुद्धिशालिनं अनुचितदण्डादिना धनग्राहिणं रक्षणरहितं क
रबल्यादेर्भक्षितारं राजानं नरकगामिनं जानीयात् ६ अधा अधार्मिकं चौरादिकं अपरा
धान् नृपतयस्त्रिभिरुपायैः प्रयत्नेन नियमयेत् तानाह कारागारप्रवेशनेन निगडबन्धने
न ताडनकरचरणच्छेदनादिनानाप्रकारहिंसनेन ७

उ·
२६२

सरति स चेत्प्राजकः संमुखागतैः प्रचुरबलीवर्दादिभी रथांतरेण वा संरुद्धः स्वरथगमनानवधानाद्य
गणयन्प्राणिनः संकटेपि स्वरथं तुरगान्प्रेरयन्तुरगैरथेन रथावयवैर्वा प्राणिनो व्यापादयति तदा प्र
विचारितो दंडः कार्यः २९३ रथसंकटापराधः कीदृशस्तमाह मनु तत्र मनुष्यमारणे प्राजकस्यानव
धानयानेन कृते शीघ्रमेव चौरदंड उत्तमसाहसो भवेत् न तु मारणे नृपः प्राणभृत्सु महत्त्वमिति
श्ववणाङ्गोगजादिषु महत्सु प्राणिषु मारितेषु उत्तमसाहसस्यार्धं पंचशतानि दंडो भवेत् तु क्षु
द्रकाणां पशूनां जातितो विशेषोपादिष्टेन माणवकानां वानरादीनां मारणे द्विशतो दमः स्यात् २९४ गर्द
भच्छागोडकानां पुनर्मरणे पंचरूप्यमाषकपरिमाणो दंडः स्यात् २९५ भार्येति भार्यादयः कृ
तापराधाः रज्ज्वा पाटितलघुवेणुशलाकया वा ताड्या भवेयुः शिक्षार्थं ताडनं विनाहत्य दंडापवा

स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा। प्रमापयेत्प्राणभृतस्तत्र दंडो विचारितः २९२ मनुष्य
मारणे क्षिप्रं चौरवत्किल्बिषं भवेत् प्राणभृत्सु महत्स्वर्धं गोगजोष्ट्रहयादिषु २९३ क्षुद्रकाणां
पशूनां च हिंसायां द्विशतो दमः पंचाशत्तु भवेद्दंडः शुभेषु मृगपक्षिषु २९४ गर्दभाजाविका।
नां तु दंडः स्यात्पंचमाषिकः माषिकस्तु भवेद्दंडः श्वसूकरनिपातने २९५ भार्या पुत्रश्च दासश्च प्रे
ष्यो भ्राता च सोदरः प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा २९६ पृष्ठतस्तु शरीरस्य
नोत्तमांगे कथंचन अतोऽन्यथा तु प्रहरन्प्राप्तः स्याच्चौरकिल्बिषं २९७ एषोऽखिलेनाभिहि
तो दंडपारुष्यनिर्णयः स्तेनस्यातः प्रवक्ष्यामि विधिं दंडविनिर्णये २९८ परमं यत्नमाति
ष्ठेत्स्तेनानां निग्रहे नृपः स्तेनानां निग्रहादस्य यशो राष्ट्रं च वर्धते २९९ अभयस्य हि यो दाता।
स पूज्यः सततं नृपः सत्रं हि वर्धते तस्य सदैवाभयदक्षिणं ३००

दः २९६ पृष्ठ रज्ज्वादिभिरपि देहस्य पृष्ठदेशे ताडनीया न तु शिरसि उक्तप्रकारव्यतिरेकेण प्रहर
न्वाग्दंडरूपं चौरदंडं प्राप्नुयात् २९७ एष एष दंडपारुष्यनिर्णयेन निरवशेषेणोक्तः अत ऊर्ध्वं चौ
रदंडनिर्णयविधानं वक्ष्यामि २९८ पर चौराणां नियमे राज्ञा प्रकृष्टो यत्नः कर्तव्यः यस्माच्चौर
निग्रहाद्राज्ञः ख्यातिर्निरुपद्रवेण च राष्ट्रं च वर्द्धते २९९ अभ हिरवधारणे चौराणां नियमे
न यो नृपतिः साधूनामभयं ददाति स एव पूज्यः सर्वेषां स्वाध्यः संभवति सत्रं गवामयनादि
क्रतुविशेषः यस्मात्सत्रमिव सत्रं तत्फलदानाच्चौरनिग्रहरूपाभयदक्षिणं सर्वदैव तस्य वृ
द्धिमेति अन्यत्किल सत्रं नियतकालीनमदक्षिणं च एतत्सर्वकालीनमभयदक्षिणं चेति व्यतिरे

अन्नाद ब्रह्महा तस्यान्नं विधि योऽन्नमत्ति तस्मिन्नसौ स्वपापं संक्रामयति भ्रूणहान्नभोक्तुः पापं भवती-
ति एतदत्र विवक्षितं न तु ब्रह्मघ्नः पापं नश्यति तथा भार्या व्यभिचारिणी जारं पतिं क्षममा-
णे भर्तरि पापं संश्लेषयति शिष्यश्च संध्याग्निकार्याद्यकरणजन्यं पापं गुरौ सहमानेन्यस्य-
ति याज्यश्च विधिमतिक्रामन्याजके क्षममाणे पापं निःक्षिपति स्तेनश्च राजन्युपेक्षमाणे
पापमर्पयति तस्माद्राज्ञा स्तेनो निगृहीतव्यः १७ राजभिः सुवर्णस्तेयादीनि पापानि कृ-
त्वा पश्चाद्राजभिः विहितदण्डा मनुष्याः सन्तः प्रतिबन्धकदुरिताभावात्पूर्वार्जितपुण्यवशेन
साधवः सुकृतकारिण इव स्वर्गं गच्छन्ति एवं च यस्मिन्नदण्ड्यस्यापि पापत्वहेतुत्वमुक्तं १८
यस्तु कूपसमीपे रज्जुघटं वा जलोद्धारणाय स्थितयो रज्जुघटं वा हरेत् यः पानीयदानगृहं

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषं १७
राजभिः कृतदण्डास्तु कृत्वा पापानि मानवाः निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा १८
यस्तु रज्जुं घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपां स दण्डं प्राप्नुयान्माषं तच्च तस्मिन्समाहरेत् १९
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनं २०
तथा धरिममेयानां शतादभ्यधिके वधः सुवर्णरजतादीनामुत्तमानां च वाससां २१

विदारयेत् स सौवर्णमाषं दण्डं प्राप्नुयात् अनिर्दिष्टं तु सौवर्णमाषं तत्र प्रकल्पयेदिति कात्या-
यनवचनात् तच्च रज्ज्वादि तस्मिन्कूपे समापयेत् १९ धान्यं द्विपलशतं द्रोणः विंशतिद्रोणः
कुम्भः दशसंख्याकुम्भेभ्योऽधिकं धान्यं हरतो वधः स च हर्तृस्वामिगुणवत्तापेक्षया ताडनाङ्ग-
च्छेदनमारणात्मको ज्ञेयः शेषे पुनः एकस्मादारभ्य दशकुम्भहरणे अपहर्तेकादशगुणं द-
ण्डं दाप्यः स्वामिनश्चापहृतं दापनीयः २० तथा धरिममेयानां तुलाधृतपरिमेयाना-
मपि सुवर्णरजतादीनामुत्कृष्टानां च वाससां पट्टादीनां पलशतादधिके हृते वधः कर्तव्यः वि-
षमसमीकरणं चात्र देशकालापहर्तृद्रव्यस्वामिजातिगुणाद्यपेक्षया पापविहरणीयं एवमु-
त्तरत्रापि ज्ञेयं २१

1.62

मे॰ १६२

नित्यं पापशालिनां निग्रहेण उत्तमानां संमानेन च द्विजातय इव महायज्ञादिभिः सर्वकालं नृ-
पतयः पवित्रीभवन्ति तस्मादधार्मिकं निगृह्णीयात् साधूंश्चानुगृह्णीयात् ८ क्षन्तं कार्यि-
वतामर्थिप्रत्यर्थिनां दुःखितानां दोषोक्तिं स्वपतां तथा बालवृद्धव्याधितानां चाक्षिपतां वक्ष्यमा-
णमात्मनो मुण्डपकारमिच्छता प्रभुणा क्षमणीयं सर्वदा ९ यस्तु दुःखितैराक्षिप्तः सहते
यत्तेन स्वर्गलोके पूजां लभते यस्त्वैश्वर्यान्न सहते स नरकं गच्छति १० राजा स्तेयं यद्यपि सु-
वर्णस्तेये प्रकृतिप्रकरणादिना प्रायश्चित्तप्रकरणे वक्ष्यति तथापि सुवर्णस्तेयं प्रति राजदण्डरू-
पतामस्य दर्शयितुं दण्डप्रकरणे पाठः ब्राह्मणसुवर्णचोरेण मुक्तकेशेन वेगाद्गच्छता

निग्रहेण च पापानां साधूनां संग्रहेण च द्विजातय इवेज्याभिः पूयन्ते सततं नृपाः ८
क्षन्तव्यं प्रभुणा नित्यं क्षिपतां कार्यिणां नृणां बालवृद्धातुराणां च कुर्वता हितमात्मनः ९
यः क्षिप्तो मर्षयत्यार्तैस्तेन स्वर्गे महीयते यस्त्वैश्वर्यान्न क्षमते नरकं तेन गच्छति १०
राजा स्तेनेन गन्तव्यो मुक्तकेशेन धावता आचक्षाणेन तत्स्तेयमेवंकर्मास्मि शाधि मां
स्कन्धेनादाय मुसलं लकुटं वापि खादिरं शक्तिं चोभयतस्तीक्ष्णामायसं दण्डमेव वा १२
शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते अशासित्वा तु तं राजा स्तेनस्याप्नोति किल्बिषं

मया ब्राह्मणसुवर्णमपहृतमिति स्तेयं ख्यापयता मुसलाख्यमायुधं खादिरमयं वा दण्डमुभय-
तस्तीक्ष्णां शक्तिं वा लोहमयं वा दण्डं स्कन्धेन गृहीत्वा राजसमीपं गन्तव्यं ततो ब्राह्मणसुवर्णहा-
र्यहं मुसलादिना व्यापादयेत्येवं राज्ञे वक्तव्यं ११ १२ शासनं मुक्तान्मुसलादिप्रहा-
रेण प्राणपरित्यागजननान्मृतकल्पस्य जीवतोऽपि वा परित्यागात्स चोरस्तस्मात्पापाद्वि-
मुच्यते अत एव याज्ञवल्क्यः मृतकल्पः प्रहारार्त्तो जीवन्नपि विशुध्यतीति तं पु-
नः स्तेनं कारुण्यादिभिरहत्वा स्तेनस्य यत्पापं राजा तत्प्राप्नोति १३

परीति अपालनत्वेषु धान्येषु शाकादिषु चापहृतेषु निरन्वयो द्रव्यस्वामिना संबंधः येन कश्चिदपि संबं
धो नास्ति एकग्रामवासादि तत्र शतं दण्डः सान्वये तु पंचाशत्पणो दमः खलस्थेषु धान्येषु अयं दंडः त
त्र हि परिपूर्यते गृहस्थेभ्य एकादशगुणो दंडः प्रागुक्तः ३१ स्यादिति यद्द्रव्यादिकं कर्म स्वामिसमक्ष
मेव बलाद्धृतं तत्साहसं स्यात् रहो बलेन तद्द्रव्यं साहसं अत इह स्तेये दंडो न कार्यः उत्तमदंडस्तेय प्रकर
णोक्तः यत्पुनः स्वामिपरोक्षे हृतं तत्स्तेयं भवेत् यच्च हृत्वा अपह्नुते तदपि स्तेयमेव ३२ यस्त्विति
यः पुनरेतानि सूत्रादिद्रव्याणि उपभोगार्थं कृतसंस्काराणि मनुष्यश्चोरयेत् यश्च त्रेताग्निं वा अ
ग्निगृहाच्चोरयेत् तं राजा प्रथमं साहसं दंडयेत् अग्निस्वामिनश्चाधानोपयुक्तो दातव्यः गोविंदरा
जस्तु लौकिकमपि अग्निं चोरयतो यं दंडमाह तदयुक्तं अल्पापराधे गुरुदंडस्यान्याय्यत्वात् ३३ येनेति
येन येनांगेन हस्तपादादिना येन प्रकारेण संधिच्छेदादिना चोरो मनुष्येषु विकर्म धनापहारादिकं चेष्ट

परिपूतेषु धान्येषु शाकमूलफलेषु च निरन्वये शतं दंडः सान्वयेर्द्धशतं दमः ३१ स्यात्साहसं
त्वन्वयवत्प्रसभं कर्म यत्कृतं निरन्वयं भवेत्स्तेयं हृत्वापह्नुयते च यत् ३२ यस्त्वेतान्युपकॢप्तानि द्र
व्याणि स्तेनयेन्नरः तमाद्यं दंडयेद्राजा यश्चाग्निं चोरयेद्गृहात् ३३ येन येन यथांगेन स्तेनो नृषु
विचेष्टते तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ३४ पिताचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः
नादंड्यो नाम राज्ञोस्ति यः स्वधर्मे न तिष्ठति ३५ कार्षापणं भवेद्दंड्यो यत्रान्यः प्राकृतो जनः तत्र रा
जा भवेद्दंड्यः सहस्रमिति धारणा ३६ अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषं षोडशैव तु वैश्य
स्य द्वात्रिंशत्क्षत्रियस्य तु ३७

तेत तत्तदेवांगं प्रसंगवारणाय राजा छेदयेत् द्रव्यधनस्वाम्युत्कर्षापेक्षोयमंगच्छेदः ३४ पिता पि
त्राचार्यमित्रमातृपत्नीपुत्रपुरोहितानामप्ययं स्वधर्मेनावतिष्ठते स राज्ञोदंडनीयो नास्ति अपि
तु सर्वो दंडनीय एव ३५ कार्षापणमिति यत्रापराधे राजव्यतिरिक्तो जनः कार्षापणं दंडनीयो
भवेत्तस्मिन्नपराधे राजा पणसहस्रं दंडनीय इति निश्चयः आत्मदंडं च राजा अप्सु प्रवेशयेत् ब्राह्मणे
भ्यो वा दद्यात् ईशो दंडस्य वरुण इति वक्ष्यमाणत्वात् ३६ अष्टेति ब्राह्मणस्य च तत्पष्टिः पूर्णा वा
पि स्यात्भवेत् द्विगुणो वा चतुःषष्टिः तद्दोषगुणविद्धि सः तद्दोषगुणविद्धिस इति सर्वत्र संबध्य
ते यस्मिन्स्तेये यो दंड उक्तः स स्तेयगुणदोषज्ञस्य शूद्रस्याष्टाभिरापाद्यते गुणयितव्य इति अष्टगुणः
कर्तव्यः षोडशगुणो गुणदोषविदुषो वैश्यस्य द्वात्रिंशद्गुणः तथाविधस्य क्षत्रियस्य च तः य

263

उ॰
२६३

पंच शतोत्कानां पंचशतादूर्ध्वं यावदपहारे कृते हस्तच्छेदनं मन्वादिभिरिष्यते शेषेषु पुनरेकपलादारभ्य पंचाशत्पलपर्यन्तापहारे हृतधनादेकादशगुणं परिच्छेद्यानां दण्डं प्रकल्पयेत् ॥२२॥ पुरु। महाकुलजातानां मनुष्याणां विशेषेण स्त्रीणां महाकुलप्रसूतानां श्रेष्ठानां च रत्नानां वैदूर्यादीनां अपहारे वधमर्हतीति ॥२३॥ महा। महापशूनां हस्त्यश्वगोमहिषादीनां तथा खड्गादीनां कल्याणघृतादेरौषधस्य च वर्ण्यादिरूपं कार्यं चार्थप्रयोजनं सदसज्ज्ञात्वा योग्यतानुरूपं निरूप्य राजा तास्ताडनांगच्छेदनवधरूपं दण्डं कुर्यात् ॥२४॥ गोष्विति। ब्राह्मणसंबंधिनीनां गवामपहारे वन्ध्यायाश्च गोर्वाहनार्थं नासाच्छेदने पशूनां चाजैडकानां दण्डभूयस्त्वापादकानामपहरणे तदनन्तरमेवाहिंस्रार्धपादः कार्यः ॥ सूत्रेति श्लोकचतुष्ट

पंचाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते । शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥२२॥ पुरुषाणां कुलीनानां नारीणां च विशेषतः । मुख्यानां चैव रत्नानां हरणे वधमर्हति ॥२३॥ महापशूनां हरणे शस्त्राणामौषधस्य च । कालमासाद्य कार्यं च दण्डं राजा प्रकल्पयेत् ॥२४॥ गोषु ब्राह्मणसंस्थासु छुरिकायाश्च भेदने । पशूनां हरणे चैव सद्यः कार्योऽर्धपादिकः ॥२५॥ सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च । दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च । वेणुवैदलभाण्डानां लवणानां तथैव च । मृण्मयानां च हरणे मृदो भस्मन एव च ॥२७॥ मत्स्यानां पक्षिणां चैव तैलस्य च घृतस्य च । मांसस्य मधुनश्चैव यच्चान्यत्पशुसंभवम् ॥२८॥ अन्येषां चैवमादीनां मद्यानामोदनस्य च । पक्वान्नानां च सर्वेषां तन्मूल्याद्द्विगुणो दमः ॥२९॥ पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च । अन्येष्वपरिपूतेषु

यं। कार्पासादि सूत्रस्य कार्पासस्य किण्वस्य सुराबीजद्रव्यस्य स्थूलवेणुखण्डनिर्मितजलाहरणभाण्डानां पशुसंभवं मृगचर्मास्थिशृंगादि अन्येषामप्येवंविधानामसारद्रव्याणां मतः शिलादीनां मद्यानामोदनस्य च पक्वान्नानां च सर्वेषां मोदकव्यतिरिक्तानामपूपमोदकादीनां कार्यं सादिमद्याभिधेयानां च प्रसिद्धानामपहारे अपहृतद्रव्यस्य मूल्याद्द्विगुणो दण्डः कार्यः ॥२९॥ पुष्पेष्विति। पुष्पेषु हरितेन च तेन धान्ये गुल्मलतावृक्षेषु चापरिपूतेषु अनपनीततुषेषु वल्पमाणश्लोकेन धान्यानि देशात्परिपवनसंभावाच्च धान्येषु अन्येषु सर्वेषु पुरुषभारहार्येष्वपहृतेषु देशकालाद्यपेक्षया वर्णस्वरूपं पंचकृष्णलपरिमाणो दण्डः स्यात् ॥३०॥

आत्मनश्चेति ब्राह्मणादिभिस्त्रिभिर्वर्णैः शस्त्रमायुधं गृहीतव्यं यस्मिन्काले वर्णाश्रमिणां साहसिका
दिभिर्धर्मः कर्तुं न दीयते तथा त्रैवर्णिकानां राजकोपरचक्रागमनादिकालजनिते स्त्रीसंकरादौ प्राप्ते
तथा स्वरक्षार्थं दक्षिणाधनगवाद्यपहारनिमित्ते च संग्रामे स्त्रीब्राह्मणरक्षार्थं च धर्मेण युद्धेनान्यया
तिकं तथा पराक्रमन्न दोषभागी भवति परमारणे ... साहसे दण्डो न कार्यः ३४९ गुरुं वेति गुरुं वा
बालवृद्धौ वा बहुश्रुतं ब्राह्मणं वा आततायिनमेव वधोद्यतमागच्छन्तं विषाग्न्यादिभिरुत्कृष्टपलायनादिभिरपि स्व
निस्तारासंभवे निर्विचारं हन्यात् अत एव शास्त्रगृहीतशस्त्रमाततायिनं हत्वा न दोषः स्यात् कामापनः
भृगुशास्त्रोक्तत्वेन मनुश्लोकमेवमर्थं व्याख्यातवान् आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मनः व
धस्तत्र नैव पापं स्याद्धीने वधो भृगुः मेधातिथिगोविन्दराजौ तु स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दु
ष्यतीति पूर्वोक्तस्यायमनुवादः गुर्वादिकमपि हन्यादिति मूलान्यमिति व्याचक्षाते ३५० नाततायीति

आत्मनश्च परित्राणे दक्षिणानां च संगरे। स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दुष्यति ३४९

गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं। आततायिनमायान्तं हन्यादेवाविचारयन् ३५०

नाततायिवधे दोषो हन्तुर्भवति कश्चन। प्रकाशं वा प्रकाशं वा मन्युस्तं मन्युमृच्छति ३५१

परदाराभिमर्षेषु प्रवृत्तान्नॄन्महीपतिः। उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत् ३५२

तत्समुत्थो हि लोकस्य जायते वर्णसंकरः। येन मूलहरोऽधर्मः सर्वनाशाय कल्पते ३५३ परस्य प

त्न्या पुरुषः संभाषां योजयन् रहः। पूर्वमाक्षारितो दोषैः प्राप्नुयात्पूर्वसाहसं ३५४ यस्त्वनाक्षारि

जनसमक्षं रहसि वा वधोद्यतमारणे हन्तुर्न कश्चिद्दन्यमानगतः क्रोधं निवर्तयति साहसे चापराधे गौर
व अपि स्वधर्मप्रायश्चित्तदण्डाख्यदोषो भवति। यस्मात्तद्गतो मन्युः क्रोधाभिमानिनी देवता या
मारणागच्छेत् न धनग्रहणादयो दण्डाः कार्याः ३५१ इदानीं स्त्रीसंग्रहणमाह परदारेति परदार
भोगेषु प्रवृत्तान्नरानुद्वेगजनकैर्दण्डैर्नासोष्ठकर्तनादिभिरङ्कयित्वा राजा देशान्निःसारयेत् ३५२
तत्समुत्थेति यस्मात्परदारगमनात्संभूतो लोकस्य वर्णसंकरः संपद्यते येन वर्णसंकरेणाविशुद्धप
त्नीकयागाद्यधिकृतयजमानाद्यभावात् यज्ञाभावात् ...तिरिक्तसाभावे सति वृष्ट्यभावे जगन्मूलविना
शपधर्मो जगन्नाशाय संपद्यते ३५३ परस्येति न तत्स्त्रीप्रार्थनादिदोषैः पूर्वमुक्तो भिशापः पुरुषस्त
त्रितवारणाव्यतिरेकेण परभार्यया सह संभाषणं कुर्वन्प्रथमसाहसं दण्डं प्राप्नुयात् ३५४ यस्त्विति यः पूर्वं त
त्स्त्रीप्रार्थनाद्यभिशापरहितः केनचित्कारणेन तया सह अभिभाषणं कुर्यात् स दण्डं नो किंचिद्दोषं न प्राप्नुयात्

264

उ॰ १६४

३५ वानस्पत्यमिति वीरुद्वनस्पतीनां च पुष्पाणि स्ववदाददीत फलानि चापरिवृतानामिति गौतम वचनात् अपरिवृतवनस्पत्यादीनां मूलफलं होमीयाग्न्यर्थं च दारु गोग्रासार्थं तृणं परकीयमस्तेयं मनुर ब्रवीत् अतस्तदादानेनाप्यधर्मः ३६ योदत्तेति अदत्तादायिनश्चोरस्य हस्तात् यो ब्राह्मणो याजनाध्यापनप्रतिग्रहैरपि परकीयधनं ज्ञात्वा लब्धुमिच्छेत् स चोरतुल्यो ज्ञेयः तत्र स एव दण्ड्यः ३७ द्विज इति द्विजातिः पथिकः क्षीणपाथेयः द्वाविक्षू द्वे च मूलके परकीयक्षेत्राद्गृह्णन् दण्ड्यो न भवति ३८ असंदितानामिति अबद्धानां गवादीनां परकीयानां योद्बन्धनं करोति एवं बन्धितानां बद्धानां मोक्षकः दासाश्वरथानां योपहारी स चोरदण्डं प्राप्नुयात् स च गुरुलघुअपराधानुसारेण मारणाङ्गच्छेदरूप

ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत् द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः ३५ वानस्पत्यं मूलफलं दार्वग्न्यर्थं तथैव च तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत् ३६ योदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनं याजनाध्यापनेनापि यथा स्तेनस्तथैव सः ३७ द्विजोध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके आददानः परक्षेत्रान्न दण्डं दातुमर्हति ३८ असंदितानां संदाता संदितानां च मोक्षकः दासाश्वरथहर्ता च प्राप्तः स्याच्चोरकिल्बिषं ३९ अनेन विधिना राजा कुर्वाणः स्तेननिग्रहं यशोस्मिन्प्राप्नुयाल्लोके प्रेत्य चानुत्तमं सुखं ४० ऐन्द्रं स्थानमभिप्रेप्सुर्यशश्चाक्षयमव्ययं नोपेक्षेत क्षणमपि राजा साहसिकं नरं ४१ वाग्दुष्टात्तस्कराच्चैव दण्डेनैव च हिंसतः साहसस्य नरः कर्ता विज्ञेयः पापकृत्तमः ४२ साहसे वर्तमानं तु यो मर्षयति पार्थिवः स विनाशं व्रजत्याशु विद्वेषं चाधिगच्छति ४३ न मित्रकारणाद्राजा विपुलाद्वा धनागमात् समुत्सृजेत्साहसिकान्सर्वभूतभयावहान् ४४ शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते द्विजातीनां च वर्णानां वि

नाद्यपहारनृपो बोद्धव्यः ३९ अनेनेति अनेनोक्तविधानेन राजा चोरनिग्रहं कुर्वाणः इहलोके ख्यातिं चाविनाशिनीं परलोके चोत्कृष्टसुखं प्राप्नुयात् ४० इदानीं साहसमाह ऐन्द्रमिति सर्वाधिपत्यलक्षणं पदं ख्यातिं चाविनाशिनीं अतिशयेन प्राप्तुमिच्छन् राजा बलेन गृहदाहधनग्रहणकारिणं मनुष्यं क्षणमपि नोपेक्षेत ४१ वाग्दुष्टेति वाक्पारुष्यकृतश्चौराद्दण्डपारुष्यकारिणश्च मनुष्यात् साहसकृन्मनुष्योतिशयेन पापकारी बोद्धव्यः ४२ साहस इति यो राजा साहसे प्रवर्त्तमानं क्षमते स पापकृतां सम्पत्क्षयं प्राप्नोति अपकृतमानराष्ट्रजनानां द्वेषं च गच्छति ४३ न मित्रेति मित्रत्वात् नवकृत्वा धनग्राह्यत्वाद्वा सर्वभूतभयजनकान् साहसिकान् राजा न त्यजेत् ४४

म-स्मृ-
टी-
२६५

किंचिदिति निर्जनदेशे चारणभार्यात्मोपजीविस्त्रीभिः संभाषणं कुर्वन्नल्पं दण्डलेशं राज्ञा दापनीयः स्यात्
तासामपि परदारत्वात् प्रैष्याभिर्दासीभिरवरुद्धाभिर्बौद्धादिव्रतचारिणीभिः सह संभाषणं कुर्वन् किंचिद्दण्डमे
वदाप्यः स्यात् ६० योऽकामामिति यस्तुल्यजातिरनिच्छन्तीं कन्यां गच्छति स तत्क्षणादेव ब्राह्मणेतरो लि
ङ्गच्छेदादिकं वधमर्हति इच्छन्तीं पुनर्गच्छन्न वधार्हो मनुष्यो भवति ६१ कन्यामिति कन्यां संभोगार्थ
मुत्कृष्टजातिं पुरुषं सेवमानामल्पमपि दण्डं राजा न दापयेत् हीनजातिं पुनः सेवमानां बद्ध्वा स्थाप
येत् यावद्विनिवृत्ताभिलाषा स्यात् ६२ उत्तमामिति हीनजातिरुत्कृष्टजातीयां कन्यामिच्छन्तीं गच्छ
न्यदि पिता नानुमन्यते तदा पितृशुल्कमनुरूपमाहरेद्वद्यान्न दण्ड्यः सा च तेनैव वोढव्या ६३ अभीति
यो मनुष्योऽभिषह्य बलात्कारेण समानजातीयां कन्यां गमनवर्जं मदंकारेणाङ्गुलिप्रक्षेपमात्रेण

किंचिदेव तु दाप्यः स्यात्संभाषां ताभिराचरन् प्रैष्यासु चैकभक्तासु रहः प्रव्रजितासु च ६० यो
ऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः ६१ कन्यां भज
न्तीमुत्कृष्टं न किंचिदपि दापयेत् जघन्यं सेवमानां तु संयतां वासयेद्गृहे ६२ उत्तमां सेवमानस्तु
जघन्यो वधमर्हति शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि ६३ अभिषह्य तु यः कन्यां कुर्या
द्दर्पेण मानवः तस्याशु कर्त्ये अङ्गुल्यौ दण्डं चार्हति षट्शतं ६४ सकामां दूषयंस्तुल्यो नाङ्गुलिच्छे
दमाप्नुयात् द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये ६५ कन्यैव कन्यां या कुर्यात्तस्याः स्याद्द्विशतो
दमः शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश ६६ या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौण्ड्यमर्ह
ति अङ्गुल्योरेव वा छेदं खरेणोद्वहनं तथा ६७ भर्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता तां
श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते ६८

दूषयेत् तस्य शीघ्रमेवाङ्गुलिद्वयं छेदनीयं षट्पणशतानि च दापनीयः ६४ सेति समान
जातिमिच्छन्तीं कन्यामङ्गुलिप्रक्षेपमात्रेण नाशयन्नाङ्गुलिच्छेदमाप्नोति किं तु पुनः प्रसक्तिनिवारणाय
द्विशतं दण्डं दाप्यः ६५ कन्यैवेति या कन्यैव परां कन्यामङ्गुलिप्रक्षेपेण नाशयेत् तस्या द्विशतो दण्डः
कार्यः कन्यानुरूपं च शुल्कं द्विगुणं कन्यापित्रे दद्यात् शिफाप्रहारांश्च दश प्राप्नुयात् ६६ या त्विति
या पुनः कन्यामङ्गुलिप्रक्षेपेण स्त्री नाशयेत् सा तत्क्षणादेव शिरोमुण्डनमङ्गुलिद्वयं वा अङ्गुल्योरेव
छेदं गर्दभेन च राजमार्गे वहनमर्हति ६७ भर्तारमिति या पुनः स्त्री प्रबलधनिकपित्रादिबा
न्धवदर्पेण सौन्दर्यादिगुणदर्पेण च स्वामिनं पुरुषान्तरगमनेनोपलङ्घयेत्तां राजा बहुजनाकीर्णदे

मं-
२६५

265

परेति तीर्थारण्यादिकं निर्जनदेशोपलक्षणार्थं यः पुरुषः परस्त्रीमुद्दिश्य वनस्थमार्गे रण्ये ग्रामाद्बहिः
गुल्मलताकीर्णे निर्जने देशे वने बहुवृक्षसंतते नदीनां संगमे पूर्वमनाकारिते पिकारणादपि संभाषेत स
संग्रहणादंडं वक्ष्यमाणं प्राप्नुयात् सम्यक् गृह्यते ज्ञायते येन परस्त्रीसंभोगाभिलाष इति संग्रहणं ५६
उपचार इति स्रक्चन्दनगन्धानुलेपनप्रेषणाद्युपचारकरणं केलिः परिहासादिकायालंकारवस्त्राणां
स्पर्शनमेकखट्वासनमित्येतत्सर्वं संग्रहणं मन्वादिभिः स्मृतं ५७ स्त्रियमिति यः स्पृष्टमनुचितस्त-
नजघनादिदेशे स्त्रियं स्पृशेत्तया वा वृषणादिदेशे स्पृष्टः क्षमते तदा अन्योन्याङ्गीकरणे सर्वं संग्रहणं
मन्वादिभिः स्मृतं ५८ अब्राह्मण इति अब्राह्मणो नक्षत्रियादिर्दण्डभूयस्त्वात् ब्राह्मणस्य मनिरुद्धतां
उत्तमसंग्रहणे प्राणान्तं दण्डमर्हति चतुर्णामपि वर्णानां धनपुत्रादिमध्यादतिशयेन दाराः सर्वे
दारक्षणीयाः तेन ब्राह्मणे संग्रहीते निवृत्ते सर्वोत्कृष्टसंग्रहणादपि वर्णानां भार्या रक्षणीयाः ५९ भिक्षु

परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा। नदीनां वापि संभेदे स संग्रहणमाप्नुयात् ५६ उ-
पचारक्रिया केलिः स्पर्शो भूषणवाससाम्। सह खट्वासनं चैव सर्वं संग्रहणं स्मृतं ५७ स्त्रियं
स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया। परस्परस्यानुमते सर्वं संग्रहणं स्मृतं ५८ अब्राह्म-
णः संग्रहणे प्राणान्तं दण्डमर्हति। चतुर्णामपि वर्णानां दारा रक्ष्यतमाः सदा ५९ भिक्षु-
का बन्दिनश्चैव दीक्षिताः कारवस्तथा। संभाषणं सह स्त्रीभिः कुर्युरप्रतिवारिताः ६०।
न संभाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत्। निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति ६१
नैष चारणदारेषु विधिर्नात्मोपजीविषु। सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति हि ६२

भिक्षाजीवनस्तुतिपाठकाः यज्ञार्थं प्रवृत्ता दीक्षिताः सूपकारादयश्च भिक्षादिस्वकार्यार्थं गृहस्त्रीभिः
सह संभाषणमनिवारिता एव कुर्युः एवं चैषां संग्रहणाभावः ६० न संभाषामिति स्वामिना नि-
षिद्धः स्त्रीभिः संभाषणं न कुर्यात् प्रतिषिद्धसंभाषणमाचरंस्तु राज्ञः षोडशमाषात्मकसुवर्णदण्ड-
योग्यो भवति ६१ नैष इति परस्त्रियं योऽभिवदेदित्यादिसंभाषणनिषेधविधिर्नटगायनदारे-
षु नास्ति यथा भार्या पुत्रः स्वका तनुरित्युक्तेर्जायैवात्मा आत्मन उपजीवन्ति धनलाभाय तस्मा-
द्वृत्तमेते तेषु नटादिव्यतिरिक्तेष्वपि प्रकाशलेष्वयं निषेधविधिर्नास्ति तस्माच्चारणाद्यात्मोपजी-
वनश्च परपुरुषानानीयते स्वभार्याः संश्लेषयन्ति स्वयमात्मानं प्रच्छन्नाभूत्वा स्वाज्ञा-
नविभावयन्तो व्यवहरन्ति ६२

सहस्रमिति रक्षितां ब्राह्मणीं ब्राह्मणो बलेन गच्छन्सहस्रं दंड्यः स्यात् इच्छंत्या पुनः संगतः पुनः पंचश
तानि दंड्यो भवेत् ७५ मौंड्यमिति ब्राह्मणस्य वधस्थाने मुंडनं दंडः प्राणांतिकः प्रदिश्यते क्षत्रि
यादीनां पुनः प्राणांतिको दंडो भवति ७६ न जात्विति ब्राह्मणं सर्वपापकारिणमपि कदाचिन्न ह
न्यात् अपितु सर्वधनयुक्तमक्षतशरीरं राष्ट्रान्निर्वासयेत् ७७ नेति ब्राह्मणवधान्महान्पृथिव्याम
धर्मो न विद्यते तस्माद्राजा सर्वपापकारिणोपि ब्राह्मणस्य मनसापि वधं न चिंतयेत् ७८ वैश्यश्चेति
रक्षितां क्षत्रियां यदि वैश्यो गच्छेत् क्षत्रियो वा यदि रक्षितां वैश्यां तदा तयोर्ब्राह्मण्यामगुप्तायां गमने
यो दंडस्तु तौ वैश्यं पंचशतानि कुर्यात् क्षत्रियं तु सहस्रमित्याह मिताक्षरायां क्रमो दंडो वैश्यक्षत्रियावर्हतः ७९

सहस्रं ब्राह्मणो दंड्यो गुप्तां विप्रां बलाद्व्रजन् शतानि पंच दंड्यः स्यादिच्छंत्या सह संगतः ७५ मौंड्यं
प्राणांतिको दंडो ब्राह्मणस्य विधीयते इतरेषां तु वर्णानां दंडः प्राणांतिको भवेत् ७६ न जातु ब्रा
ह्मणं हन्यात्सर्वपापेष्वपि स्थितं राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतं ७७ न ब्राह्मणवधाद्भूया
नधर्मो विद्यते भुवि तस्मादस्य वधं राजा मनसापि न चिंतयेत् ७८ वैश्यश्चेत्क्षत्रियां गुप्तां वै
श्यां वा क्षत्रियो व्रजेत् यो ब्राह्मण्यामगुप्तायां तावुभौ दंडमर्हतः ७९ क्षत्रियां चैव वैश्यां च गुप्ता
तां ब्राह्मणो व्रजन् न मूत्रमुंडः कर्तव्यो दाप्यस्तूत्तमसाहसं ८० सहस्रं ब्राह्मणो दंडं दाप्यो गुप्ते तु
ते व्रजन् शूद्रायां क्षत्रियविशोः साहस्रो वै भवेद्दमः ८१ क्षत्रियायामगुप्तायां वैश्ये पंचशतं दमः।
मूत्रेण मौंड्यमृच्छेत्तु क्षत्रियो दंडमेव वा ८२ अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् श
तानि पंच दंड्यः स्यात्सहस्रं त्वंत्यजस्त्रियं ८३ यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक् न सा

वं च वैश्यस्य रक्षितक्षत्रियागमने पंचशतं तु यो दंडो लघुत्वात् तृण एव हि वैश्यस्य निर्गुणजातिमात्रोपजीवि।
क्षत्रियायाश्च शूद्राभीमादिगमनं विप्रयोर्वोढव्यः क्षत्रियस्य रक्षितवैश्यायां रक्षतो युक्तं एवं सहस्रं दंडः
८१ सहस्रमिति ते क्षत्रियावैश्ये रक्षिते ब्राह्मणो गच्छन्सहस्रं दंडं दापनीयः शूद्रायां रक्षितायां क्ष
त्रियवैश्ययोर्गमने सहस्रमेव दंडः स्यात् ८२ क्षत्रियायामिति अरक्षितक्षत्रियागमने वैश्यस्य पंचश
तानि दंडः स्यात् क्षत्रियस्य त्वरक्षितक्षत्रियागमने गर्दभमूत्रेण मुंडनं लभते पंचशतं रूपं वा दंडं प्राप्नु
यात् ८३ अगुप्ते इति अरक्षितां क्षत्रियां वैश्यां शूद्रां वा ब्राह्मणो गच्छन्पंचशतानि दंड्यः स्यात् अंत्येभवो
ऽन्त्यः चांडालादिः तत्स्त्रियं गच्छन्सहस्रं दंड्यः ८३ यस्येति यस्य राज्ञो राष्ट्रे चोरः परदारगामी दु
ष्टवाक् साहसकारी वा दंडपारुष्यकर्ता च नास्ति स राजा शक्रभवनं याति ८४

पुमांसमिति । तं चानेन तथोक्ता या जारं पापकारिणं पुरुषं लोहमये शयने प्रज्वलिते दाहयेत् । तत्र च वध्य-
घातिनः काष्ठानि निक्षिपेयुः यावदसौ पापकारी दग्धः स्यात् ॥ ७२ ॥ संवत्सरेति । परस्त्रीगमनदोषेण दु-
ष्टस्य सदोष इति तस्य पुनः संवत्सरातिक्रमेण तस्यामेवाभिशस्तस्य पूर्वदण्डाद्द्विगुणो दण्डः कर्तव्यः । तथा
व्रात्यजातीयागमने यो दण्डः परिकल्पितः चाण्डाल्या सह निर्देशात् चाण्डालीगमनरूपतया चाण्डालीग-
मने यो दण्डः सहस्रं तं मन्त्रस्त्रिपमिति संवत्सरेतीते यदि तामेव व्रात्यजातीतामेव चाण्डालीं पुनर्गच्छति
तदा द्विगुणः कर्तव्यः । एतच्च पूर्वश्लोकोदाहरणं दर्शयत्रात्यागमनेपि चाण्डालीगमनदण्डप्रदर्शना-
र्थं सर्वस्यैव तु पूर्वाभिशस्तदण्डस्य संवत्सरातिक्रमेणाभिगच्छतः पूर्वदण्डाद्द्विगुणो दण्डः कार्यः
॥ ७३ ॥ शूद्र इति । रक्षितामरक्षितां वा द्विजातिस्त्रियं शूद्रो यदि गच्छेत्तदा रक्षारहितां गच्छन् लिङ्गस-

पुमांसं दाहयेत्पापं शयने तप्त आयसे । अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत् ॥ ७२ ॥ संवत्सरा-
भिशस्तस्य दुष्टस्य द्विगुणो दमः । व्रात्यया सह संवासे चाण्डाल्या तावदेव तु ॥ ७३ ॥ शूद्रो गुप्तमगु-
प्तं वा द्वैजातं वर्णमावसन् । अगुप्तमङ्गसर्वस्वैर्गुप्तं सर्वेण हीयते ॥ ७४ ॥ वैश्यः सर्वस्वदण्डः
स्यात्संवत्सरनिरोधतः । सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं मूत्रेण चार्हति ॥ ७५ ॥ ब्राह्मणीं यद्यगुप्तां तु
गच्छेतां वैश्यपार्थिवौ । वैश्यं पञ्चशतं कुर्यात्क्षत्रियं तु सहस्रिणम् ॥ ७६ ॥ उभावपि तु तावेव ब्राह्म-
ण्या गुप्तया सह । विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ॥ ७७ ॥

र्वस्वाभ्यां वियोजनीयः तत्राङ्गविशेषाश्रवणेपि वा अभिगमने लिङ्गोद्धारः सर्वस्वहरणं गुप्तां चेद्ग-
च्छति तदा वधोधिकमिति गोतमस्मरणात् लिङ्गच्छेद एव रक्षितां पुनर्गच्छन् शरीरधनहीनः कर्तव्यः ॥ ७४ ॥ वै-
श्य इति । वैश्यस्य गुप्तब्राह्मणीगमने संवत्सरं बन्धनादनन्तरं सर्वस्वग्रहणरूपो दण्डो भवेत् । क्षत्रिय-
गमने तु वैश्यस्यैव क्षत्रियस्य गुप्तामभिगच्छतः क्षत्रियस्य गुप्तब्राह्मणीगमने सह संवत्सरं दण्डो भवेत् खरमूत्रे-
णाचास्य मुण्डनं कर्तव्यं ॥ ७५ ॥ ब्राह्मणीं अरक्षितां ब्राह्मणीं यदि वैश्यक्षत्रियौ गच्छतः तदा वैश्यं पं-
चशतं दण्डयेत् क्षत्रियं पुनः सहस्रं दण्डयेत् । वैश्यस्य चापि पञ्चशतं दण्डः शूद्राभ्यामादिना निर्गुणा जाति-
मात्रोपजीविब्राह्मणीगमनविषयः तदितरब्राह्मणीगमने वैश्यस्यापि सहस्रमेव ॥ ७६ ॥ उभा-
वपि तावेवोभावपि क्षत्रियवैश्यौ ब्राह्मणीं पार्थिवतां सह तमेव पूर्वो शूद्रवत् पूर्वं सर्वेण हीय-
त इति दण्ड्यौ यद्वा कटेन संवेष्ट्य दग्धव्यौ तच्च वैश्यपालो हितत्वदर्भैः क्षत्रियः शरपत्रैर्वा वेष्ट्य
इति वसिष्ठोक्तो विशेषो बोद्धव्यः शूद्रवत् सह क्षत्रियो दण्ड्यो वैश्यः सर्वस्वापि स्मृतमादयं ब्राह्मणी-

म०स्मृ० टी० १६७

शाल्मलीति शाल्मल्यादिवृक्षसंबंधिफलके प्रकामे रजकः शनैः शनैः वासांसि प्रक्षालयेत् न चान्यवासांसि
अन्यपरिधानार्थं दद्यात् यद्येवं कुर्यात्तदा प्रागुक्तो दंडः स्यात् ३९३ तंतुवाय इति तंतुवायो वस्त्रनिर्माणा
र्थं दशपलानि सूत्रं गृहीत्वा पिच्छभक्ताद्यनुप्रवेशादेकादशपलं वस्त्रं दद्यात् यदि ततो न्यूनं दद्यात्।
तदा द्वादशपलान् राज्ञा दंडं दाप्यः स्वामिनश्च तुष्टिः कर्तव्यैव ३९४ शुल्केति स्थलजलपथव्यवह
ते भ्यो राजग्राह्यो भागः शुल्कं तस्य व्यवस्थानेषु ये कुशलाः तथा सर्वपण्यानां सारासारज्ञाः ते पण्य
स्य यमर्घं मूल्यमनुरूपं कुर्युस्ततो लाभधनाद्विंशतिभागं राजा गृह्णीयात् ३९५ राज्ञ इति राज्ञः सं
बंधितया पण्यानि नाम द्रव्याणि प्रख्यातानि राज्ञो यथा गजानि हस्त्यश्वादीनि मणिमुक्तादीनि च तद्देशो
द्भवानि तथा यानि च प्रतिषिद्धानि यथा दुर्भिक्षे धान्यं देशांतरं न नेयमिति तानि लोभाद्देशांतरं नय

267

शाल्मलीफलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ३९३
तंतुवायो दशपलं दद्यादेकपलाधिकं अतोऽन्यथा वर्तमानो दाप्यो द्वादशकं दमं ३९४ शुल्क।
स्थानेषु कुशलाः सर्वपण्यविचक्षणाः कुर्युरर्घं यथापण्यं ततो विंशं नृपो हरेत् ३९५
राज्ञः प्रख्यातभांडानि प्रतिषिद्धानि यानि च तानि निर्हरतो लोभात्सर्वहारं हरेन्नृपः ३९६
शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययं ३९७ आग
मं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ विचार्य सर्वपण्यानां कारयेत्क्रयविक्रयौ ३९८ पंचरात्रे
पंचरात्रे पक्षे पक्षेऽथवा गते कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः ४००

तोऽस्य वाणिजः सर्वस्वहरणं राजा कुर्यात् ३९६ शुल्कमिति शुल्कमोषणाय तमपेन रात्र्यादिकाले
रात्र्यादौ क्रयविक्रयं करोति शुल्कार्थं विक्रीयमाणद्रव्यसंख्याः अन्यथा वदति स राजदेयमत्ययमष्ट
गुणं दंडनीयस्तस्माद्दाप्यः ३९७ आगममिति कियतो दूराद्देशादागतमिति देशांतरीयद्रव्यस्यागमं कियद्
दूरं नीयत इति स्वदेशोद्भवस्य निर्गमं कियंतं कालं स्थितमिति यस्मिंल्लाभस्त इति स्थानं तथा कियती
वृद्धिरत्र तथा कर्मकाराणां भक्ताच्छादनादिना च कियानत्र व्ययः एवं विचार्य यथा वणिजां क्रेतॄणां
च पीडा न भवति तथा सर्वपण्यानां क्रयविक्रयौ कारयेत् ३९८ पंचेति आगमनिर्गमोपपत्त्या
देः पण्यानां मूल्यनिर्णयं कृत्वा अस्थिरार्घाणां पंचरात्रे गते स्थिरार्घाणां पक्षे पक्षे गते वणि
जां सन्निधौ प्रत्यक्षं नृपतिरात्मपुरुषैरर्घव्यवस्थितिं कुर्यात् ४००

कु० १६७

एतेषामिति एतेषां स्तेनादीनां स्वराष्ट्रे निग्रहः समानजातीयेषु राजसु मध्यराज्ञः सामन्तप्रभृतिः इह लोके च य
शस्करो भवति ८४ ऋत्विजमिति योयाज्यः ऋत्विजं स्वकर्मानुष्ठानसमर्थं पानकादिदोषरहितं ऋत्वि।
ग्याज्यासमर्थं यजतिनयोः शतं दण्डः कार्य इति दण्डप्रसंगादिदमुक्तं ८६ नमातेति मातापितृभार्याः।
पुत्रा त्यागमयोषणशुश्रूषायामकेनार्हति तस्मादेतान्पातकादिरहितान्परित्यजन्नेकैकस्यापि परित्या
गे राज्ञा शतानि षट् दण्ड्यः ८७ आश्रमेति द्विजातीनां गार्हस्थ्याद्याश्रमविषये कार्ये पशास्त्रार्थेनापृथ
स्त्वार्थे इति परस्परं जातविवादानां राजा स्वीयहितं चिकीर्षुः स्वयं शास्त्रार्थं इति सहसा न विशेषेण ब्रूयात्
८८ यथेति योयाहं यो पूज्यामर्हति तं तं यथा पूजयित्वा स्वेत ब्राह्मणैः सह प्रथमं सान्त्वेनागतकोपं कृत्वा तदे
षां पः स्वधर्मे स्वबोधयेत् ८९ प्रातीति निरन्तरगृहवासी प्रातिवेश्यः तदनन्तरगृहवासी अनुवेश्यः

एतेषां निग्रहो राज्ञा पंचानां विषये स्वके। सामन्तप्रभृतिभ्यश्च लोके चैव यशस्करं ८४ ऋत्विजं
यस्त्यजेद्याज्यो याज्यं चर्त्विक् त्यजेद्यदि। शक्तं कर्मण्यदुष्टं च तयोर्दण्डः शतं शतं ८६ न माता न पिता न
स्त्रीन पुत्रस्त्यागमर्हति। त्यजन्नपतितानेतान् राज्ञा दण्ड्यः शतानि षट् ८७ आश्रमेषु द्विजातीनां।
कार्ये विवदतां मिथः। न विब्रूयान्नृपो धर्मं चिकीर्षन् हितमात्मनः ८८ यथार्हमेतानभ्यर्च्य ब्राह्मणैः
सह पार्थिवः। सान्त्वेन प्रशमय्यादौ स्वधर्मं प्रतिपादयेत् ८९ प्रातिवेश्यानुवेश्यौ च कल्याणे।
विंशतिद्विजः। अर्हावभोजयन्विप्रो दण्डमर्हति माषकं ९० अन्धो जडः पीठसर्पी सप्तत्या स्थविरश्च
यः। श्रोत्रियेषूपकुर्वाणा न दाप्याः केनचित्करं ९१ श्रोत्रियं व्याधितार्त्तौ च बालवृद्धावकिंचनं
महाकुलीनमार्यं च राजा संपूजयेत्सदा ९२

यस्मिन् उत्सवे विंशतिसंख्या ब्राह्मणा भोज्यन्ते तत्र प्रातिवेश्यानुवेश्यौ प्रातिवेश्यब्राह्मणानिमंत्रणे तिक्रम
कारी चेति विसृष्टवचनात् ब्राह्मणो भोजनार्हावभोजयन् ब्राह्मणस्तत्रत्य हेरण्यग्रहणादि हरेण्यमा
षकं दण्डमर्हति ९० श्रोत्रियमिति विद्याचारवान्सत्यादिगुणवन्तं विभवकार्येषु विवाहादिषु अ
कृतवान् प्रतिवेश्यानुवेश्यावाभोजयन् तदन्नमभोजितात् द्विगुणं दाप्यो हिरण्यमाषकं च राज्ञः अन्ध
इति अन्धोबधिरः पंगुः संपूर्णसप्ततिवयस्कः सप्ततमेति कृत्यादिन्यपउपसर्पणमिति स्थविरो य
श्रोत्रियेषु धनधान्यशुश्रूषादिना उपकारकः एतेन किंचिदपि [illegible] राज्ञा करं दाप्याः
रन्दाप्याः ९१ श्रोत्रियमिति विद्याचारवन्तं ब्राह्मणं रोगिणं प्रज्ञाविकलमादि दुःखितं बालवृद्ध
दरिद्रं महाकुलप्रसूतं जनको पेतांश्च राजा दानमानादिहितकरणैः सदा संपूजयेत् ९२

म.स्मृ.
टी.
१६७

क्षत्रियमिति ब्राह्मणः क्षत्रियवैश्यौ वृत्त्यभावेन पीडितौ करुणया स्वानि कर्माणि रक्षणकृष्यादी।
नि कारयन् ग्रासाच्छादनादिना पोषयेत् एवं धनवान्ब्राह्मणः तावुपयोगितया विभृतवद्द्वाविति प्र
करणसामर्थ्याज्ज्ञायते ९ दास्यमिति प्रभवतो भावः प्राभवं तद्ब्राह्मणः कृतोपनयनान्द्विजातीन
निच्छतः प्रभुत्वेन लोभाद्दास्यकर्म पादधावनादिकारयन्नृपेण षट्शतानि दण्ड्यः १० शूद्रमिति
शूद्रं पुनर्भक्तादिना भृतमभृतं वा दास्यं कारयेत् यस्मादसौ ब्राह्मणस्य दास्यायैव प्रजापतिना सृ
ष्टः ११ न स्वामिनेति यस्मादसौ ध्वजाहृतादिना दासत्वं गतः स तेन त्यक्तः स्वदासभावेपि शूद्रो
ब्राह्मणस्य दास्यान्न विमुच्यते यस्मात्तदस्य शूद्रस्य दास्यं सहजं कः शूद्रात्तज्जातिमिव दास्यमपनयति।

क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्शितौ बिभृयादानृशंस्येन स्वानि कर्माणि कारयन् ९ दा
स्यं तु कारयेल्लोभाद्ब्राह्मणः संस्कृतान्द्विजान् अनिच्छतः प्रभुत्वेन राज्ञा दण्ड्यः शतानि षट् १०
शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव वा दास्यायैव हि सृष्टोसौ ब्राह्मणस्य स्वयंभुवा ११ न
स्वामिना विसृष्टोपि शूद्रो दास्याद्विमुच्यते निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति १२ ध्व
जाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ पैत्रिको दण्डदासश्च सप्तैते दासयोनयः १३ भार्या
पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनं १४

268

अहन्मार्ग्यमप्यवर्ण्यं शूद्रेण ब्राह्मणादिद्विजशुश्रूषाकर्त्तव्येत्येवं परमेतत् अन्यथा वक्ष्यमाणदास्यक
रणपरिगणनमनर्थकं स्यात् १२ ध्वजाहृतमिति संग्रामे स्वामिसकाशाज्जितो भुक्तलाभाद्दियग
तदास्यः स्वदासागृहजादिक्रमायातः दंडादि दण्डशुध्यर्थं स्वीकृतदास्यभावः तेषां निसर्गध्वजाहृत
त्वादीनि दासत्वकारणानि १३ भार्येति भार्या पुत्रदासास्त्रय एवाधना एवं मन्वादिभिः स्मृताः
यस्माद्यद्धनं ते र्जयंति यस्य ते भार्यादयस्तस्य तद्धनं भवति एतच्च भार्यादीनां पारतंत्र्यप्रदर्शनार्थं पु
त्रस्य धर्म्यादेः षड्विधनस्य वक्ष्यमाणत्वात् धनसाध्यादृष्टार्थधर्मादेशाच्च भार्यादीनां पत्यधिकरणे
पत्न्याश्च पिपासाधिकारसांतानान्नस्त्रीपुंसयोर्मध्याधनमनुमतिद्वारेण क्रियाश्च पिकार्तृत्वात् १४

३.
ध्य.

तुलामानमिति। तुलामानं प्रस्थद्रोणादि प्रतीमानं सुवर्णादीनां परिच्छेदार्थं यत् क्रियते तत्सर्वं सुनिरू-
पितं यथा स्यात् षट्सु च मासेषु गतेषु पुनस्तत्सर्वं राजपुरुषैर्नृपतिः परीक्षयेत्॥ ४०२ पणमिति। भा-
ण्डपूर्णानि यानानीति वक्ष्यति तेन रिक्तशकटादियानं तरविषये पणं दाप्यं एवं पुरुषश्च सभारो ऽर्धप-
णं नरे पणं दाप्यः पशुः गवादिः स्त्री च पणचतुर्भागं भाररहितो मनुष्यः पणाष्टमभागं दाप्यः॥ २ भा-
ण्डपूर्णानीति। अपि पण्यद्रव्यपूर्णानि शकटानि तन्मूल्यापेक्षया तरपण्यं दाप्यानि द्रव्यरहितानि पुनर्गो-
णीकण्डोलकादिभाण्डानि यत्किंचित् स्वल्पं दाप्यानि अपरिच्छदाः दरिद्राः पुरुषाः ईषद्दानेन यत्नमाप-
किंचिद्दापनीयाः॥ ३ दीर्घाध्वनीति। पूर्वं पारावारतरणार्थमुक्तं नदीमार्गेण दूराध्वनि गन्तव्ये प्रबलवेग-
स्थिरोदकतयादिदेशग्रीष्मवर्षादिकालापेक्षया तरमूल्यं एतच्च नदीतीरे बोद्धव्यं समुद्रे तु वाता-
धीनपोतगमनत्वात् स्थानमानाभावेन तरपण्यविशेषज्ञापकं नदीवद्योजनद्वियोजनादिकं नास्ति अतो

तुलामानं प्रतीमानं सर्वं च स्यात्सुलक्षितम्। षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत्॥ ४०२ पणं य-
ानं तरे दाप्यं पौरुषोऽर्धपणं तरे। पादं पशुश्च योषिच्च पादार्धं रिक्तकः पुमान्॥ २ भाण्डपूर्णानि
यानानि तार्यं दाप्यानि सारतः। रिक्तभाण्डानि यत्किंचित्पुमांसश्चापरिच्छदाः॥ ३ दीर्घाध्वनि यथादे-
शं यथाकालं तरो भवेत्। नदीतीरेषु तद्विद्यात्समुद्रे नास्ति लक्षणम्॥ ४ गर्भिणी तु द्विमासादिस्त-
था प्रव्रजितो मुनिः। ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे॥ ५ यन्नावि किंचिद्दाशानां विशीर्ये-
तापराधतः। तद्दाशैरेव दातव्यं समागम्य स्वतोंऽशतः॥ ६ एष नौयायिनामुक्तो व्यवहारस्य निर्णयः।
दाशापराधतस्तोये दैविके नास्ति निग्रहः॥ ७ वाणिज्यं कारयेद्वैश्यं कुसीदं कृषिमेव च। प-

ऽनियतमेव तरपण्यं शास्त्रं॥ ४ गर्भिणीति। सत्तामासद्वयादूर्ध्वं तथा प्रव्रजितो भिक्षुः मुनिर्वानप्रस्थो
ब्राह्मणश्च लिङ्गिनो ब्रह्मचारिणस्तरपण्यं तरे न दाप्याः॥ ५ यन्नावीति। नौकारूढानां यत्किंचिन्ना-
विकापराधेन द्रव्यं नष्टं तन्नाविकैरेव मिलित्वा स्वांशभागं दातव्यं॥ ६ एष इति। नाविकापरा-
धादुदके नष्टं तन्नाविकैरेव दातव्यं इति पूर्वोक्तमनूदितं दैविके नास्ति निग्रह इति विधातुं नौ-
यायिनामेष व्यवहारस्य निर्णय उक्तः दैवोपजातवात्यादिना नौभङ्गेन धनादिनाशे नाविका-
नां दण्डः॥ ७ वाणिज्यमिति। वाणिज्यकुसीदकृषिपशुरक्षणानि वैश्यं कारयेत्। शूद्रं।
च राजा द्विजातीनां दास्यं कारयेत् अकुर्वाणो वैश्यः शूद्रो वा राज्ञा दण्ड्य इत्येवमर्थोपमिहास्या

म·स्मृ·
टी·
१५५

कालइति प्रदानकाले पिता कन्यामददद्गर्ह्यो भवति प्रदानं प्रागृतोरिति गौतमवचनात् ऋतोः प्राक्
प्रदानकालः पतिश्च ऋतुकाले पत्नीमगच्छन् गर्हणीयो भवति पत्यौ तु मृते मातरमरक्षन्पुत्रो निन्द्यः
४ सूक्ष्मेभ्य इति स्वल्पेभ्योपि दुःसंगेभ्यः दौःशील्यसंपादकेभ्यो विशेषेण स्त्रियो रक्ष्याः किं पुनर्महद्
भ्यः यस्मादुपेक्षितरक्षणा एता द्वयोः पितृभर्तृकुलयोः संतापजनयेयुः ५ इममिति सर्वेषां ब्राह्म
णादिवर्णानां भार्यारक्षणलक्षणं धर्मं वक्ष्यमाणं श्लोकरीत्या सर्वेभ्यो धर्मेभ्य उत्कृष्टं धर्मं जानन्तो
हि पंगवंधबधिरादयोपि भार्यां रक्षितुं यतन्ते ६ स्वामिति यस्माद्भार्याव्यभिचाररहितारक्षन्न संकीर्ण
विशुद्धापत्योत्पादनेन स्वसंततिं तथा शिष्टसमाचारं पितृपितामहाद्यन्वयं आत्मानं विशुद्धसंतान।

काले दाता पिता वाच्यो वाच्यश्चानुपयन्पतिः मृते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता ४ सूक्ष्मेभ्यो
पि प्रसंगेभ्यः स्त्रियो रक्ष्या विशेषतः द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ५ इमं हि सर्ववर्ण।
र्णानां पश्यन्तो धर्ममुत्तमं यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि ६ स्वां प्रसूतिं चरित्रं च कु
लमात्मानमेव च स्वं च धर्मं प्रयत्नेन जायां रक्षन्हि रक्षति ७ पतिर्भार्यां संप्रविश्य गर्भो भूत्वे
ह जायते जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ८ यादृशं भजते हि स्त्री सुतं सूते तथा
विधं तस्मात्प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत्प्रयत्नतः ९ न कश्चिद्योषितः शक्तः प्रसह्य परिर
क्षितुं एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुं १०

निर्मलत्वेऽदैहिकलाभेन स्वधर्मविशुद्धभार्यस्याधानाद्यधिकाराद्रक्षति तस्मात्स्त्रियो रक्षितुं यतेते
ति पूर्वस्यशेषः ७ पतिरिति पतिः शुक्ररूपेण भार्यां प्रविश्य गर्भो भूत्वा मासाद्यास्तां भार्यायां पुत्ररूपे
ण जायते तथा च श्रुतिः आत्मा वै पुत्रनामासीति जायायास्तदेव जायात्वं यदेतस्यां पतिः पुनर्जायते
तथा च बह्वृचब्राह्मणं पतिर्जायां प्रविशति गर्भो भूत्वा स मातरं तस्यां पुनर्नवो भूत्वा दशमे मासि
जायते तज्जाया जाया भवति यदस्यां जायते पुनः ततश्चासौ रक्षणीयेत्येतद्दर्शनाय मुनिर्वचनं ८ या
दृशमिति यस्माद्यादृशं पुरुषं शास्त्रेण विहितं प्रतिषिद्धं स्त्री सेवते तादृशमेव विहितं पुरुषसे
वनेन उत्कृष्टं निषिद्धपुरुषनिषेवनेन च निकृष्टं पुत्रं जनयति तस्मादपत्यविशुद्ध्यर्थं पत्नीं प्र
यततो रक्षेत् ९ कथं रक्षणीयेत्यत आह न कश्चिदिति कश्चिद्बलात्संरोधनादिना स्त्रि
यो रक्षितुं न शक्तः तत्रापि व्यभिचारदर्शनात् १०

769

टी·
१५५

विस्रब्धमिति निर्विचिकित्समेव शूद्राद्दासाद्धनग्रहणं ब्राह्मणः कुर्यात् तस्य किंचिदपि स्वं नास्ति य
स्माद्भर्तृग्राह्यधनोसौ एवं चापद्विषयत्वादपि दासात् ब्राह्मणो धनं गृह्णन् राजा दण्डनीयः इत्येतद्दर्शयितुमेवोच्य
ते ४१७ वैश्यशूद्राविति वैश्यं कृष्यादीनि शूद्रं च द्विजशुश्रूषादीनि स्वानि कर्माणि प्रयत्नेन राजा कार
येत् तस्मात्तौ स्वकर्मभ्यः च्युतौ वैश्यस्त्रीयोपार्जितधनमदादिना जगदाकुलीकुर्यातां। ४१८ अहन्यह
नीति प्रत्यहं तदधिकृततद्द्वारेणारब्धगृहप्राकारादिकर्मणां निष्पत्तिं प्रतिनिरूपयेत् तथा हस्त्यश्वा
दीनि किमद्य प्रविष्टं निःसृतमिति च सुवर्णरत्नाद्युत्पत्तिस्थानानि भाण्डागारं चावेक्षेत व्यवहारस
मापनेपि राज्ञा धर्मेण मन्त्रयेत् इति दर्शयितुमस्यापि पुनर्वचनं ४१९ एवमिति एवमुक्तप्रका
रेणैतान्सर्वान्नृणादानादीन्व्यवहारान्निर्णीततौ निर्णयेनान्तं नयन्राजा पापं सर्वमपहाय स्वर्गादिरूपां

विस्रब्धं ब्राह्मणः शूद्राद्द्रव्योपादानमाचरेत् नहि तस्यास्ति किंचित्स्वं भर्तृहार्यधनो हि सः ४१७
वैश्यशूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत् तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेतामिदं जगत् ४१८
अहन्यहन्यवेक्षेत कर्मान्तान्वाहनानि च आयव्ययौ च नियतावाकरान्कोशमेव च ४१९ एवं स
र्वानिमान्राजा व्यवहारान्समापयन् व्यपोह्य किल्बिषं किंच प्राप्नोति परमां गतिं ४२० ।
इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां प्रकरणेऽष्टमोऽध्यायः ८ पुरुषस्य स्त्रियाश्चैव धर्मे।
वर्त्मनि तिष्ठतोः संयोगे विप्रयोगे च धर्मान्वक्ष्यामि शाश्वतान् १ अस्वतन्त्राः स्त्रियः कार्याः
पुरुषैः स्वैर्दिवानिशं विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे २ पिता रक्षति कौमारे भ
र्ता रक्षति यौवने रक्षन्ति स्थाविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ३

स्वर्गां गतिं लभते ४२० इति राजधर्मवर्णनं नामाष्टमोऽध्यायः ८ पुरुषस्येति पुरुषस्य पत्न्या।
स्वधर्माधिहिते अन्योन्याव्यभिचारलक्षणे वर्त्मनि वर्तमानयोः संयुक्तयोः स्वधर्मान्यावत्पर्यायात
तेन नित्यान्वक्ष्यामि इदं पत्योः परस्परधर्मव्यतिक्रमे सत्यन्यतरमपेक्ष्य राज्ञा दण्डेनापि स्वधर्मव्य
वस्थापनं कर्तव्यमिति व्यवहारमध्ये अस्योपदेशः १ अस्वतन्त्रा इति स्वीयैर्भर्त्रादिभिः सदा
स्त्रियः स्वाधीनाः कार्याः अनिषिद्धेष्वपि रूपरसादिविषयेषु प्रसज्जमाना आत्मवशाः कार्याः
२ पितेति पिता विवाहात्पूर्वं स्त्रियं रक्षेत् पश्चाद्भर्ता तदभावे पुत्रास्तस्मान्न स्त्री क्वापि
स्वातन्त्र्यं भजेत् भर्त्रा रक्षिता यौवनमित्यादि प्रायिकमभर्तृ पुत्राणां सन्निहितानां

नास्तीति जातकर्मादिक्रिया स्त्रीणां मन्त्रैर्नास्तीति एषा मर्यादा शास्त्रस्य व्यवस्थिता ततश्च मन्त्रवर्जसं-
स्कारणाभावात् न निष्पापता: करणं इन्द्रियं प्रमाणं धर्मे प्रमाणं श्रुतिरहितत्वात् धर्मज्ञा: अम-
न्त्रा: पापापनोदनमन्त्रजपरहितत्वात् जातेऽपि पापे तन्निर्णेजनाक्षमा: अनृतवदशुभा: स्त्रिय: इति शा-
स्त्रमर्यादा तस्मात् अत्यन्तं रक्षणीया इत्युपदेशार्थं १८ तथा चेति अभिचारशीलत्वं स्त्रीणां स्वभावत
स्तत्र श्रुतिं प्रमाणं तयोपन्यस्यति तथा च बह्व्य: श्रुतयो बहूनि श्रुतिवाक्यानि नु वेदेषु च यो ब्राह्म-
णा वा श्रोत्रा ब्राह्मणा वेति एवमादिनि गामेषु स्त्रीणां व्यभिचारशीलत्वं तत्परिज्ञानार्थं पठितानि ता-
सां श्रुतीनां मध्ये निष्कृतिरूपा व्यभिचारप्रायश्चित्तभूता या: श्रुती: शृणुत एकस्या: श्रुतेर्बहुप्रमा-
णत्वात् श्रुतिं शृणुतेत्यर्थ: सुपां सुलुक् इति द्वितीयैकवचनेन बहुवचनं १९ यन्मइति क।
क्रियां वा मातुर्मानसव्यभिचारमवगम्य ब्रूते मनोवाक्कायकर्मभि: पतिव्यतिरिक्तं पुरुषं यान।

नास्ति स्त्रीणां क्रिया मन्त्रैरिति धर्मे व्यवस्थिति: निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थिति:
तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृती: १९
यन्मे माता प्रलुलुभे विचरन्त्यपतिव्रता तन्मे रेत: पिता वृङ्क्तामित्यस्यैतन्निदर्शनं २० ध्या-
यत्यनिष्टं यत्किंचित्पाणिग्राहस्य चेतसा तस्यैष व्यभिचारस्य निह्नव: सम्यगुच्यते २१ यादृ-
ग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि तादृग्गुणा सा भवति समुद्रेणेव निम्नगा: २२

कामयते सा पतिव्रता ततोऽन्या: पतिव्रता सती परगृहान् गच्छन्ती यन्मे माता प्रलुलुभे परपुरुषं प्रति जातलो-
भा तन्मे परपुरुषसंकल्पदुष्टं मातृरजो रूपं रेत: मम पिता शोधयतु पतिरस्य प्रकृतत्वात् स्त्रियाव्यभिचार
शीलित्वस्य एतद् इति करणं तन्मन्त्रपदं तत्पत्नीपकाश्रयं च मन्त्रस्यान्ते मीमांसादिषु विनियुक्त: संप्रति मा-
नसव्यभिचारस्य प्रायश्चित्तरूपतामस्य मन्त्रस्याह २० ध्यायतीति भर्तुरनिष्टं यत्किंचित् परपुरुषगाम-
नं स्त्री मनसा चिन्तयति तस्य मानसव्यभिचारस्यैव प्रकृतो मन्त्र: सम्यक् शोधनो मन्त्रादिभि: कथ्यते मा-
नेति श्रवणात् प्रत्यक्षस्यैव प्रायश्चित्तरूपोऽयं मन्त्रो न मानु: २१ यादृगिति यादृग्रूपेण भर्त्रा साधु-
ना वा स्त्री विवाहविधिना संयुज्यते सा भर्तु: सदृशगुणैव भवति यथा समुद्रेण संयुज्यमाना नदी सा-
स्वादुदकापि क्षारजला जायते भर्तुरात्मसमता पत्नीत्वस्त्रीरत्नानां पापानां मोपदेशार्थमिदं २२

किंतु तैरेव समाप्तैः रक्षणोपायप्रयोगैस्ता रक्षितुं शक्याः तानुपायानाह अर्थस्येति धनस्य संग्रह
णे विनियोगे च द्रव्यशरीरस्य शुद्धौ भर्त्रग्निशुश्रूषादिके धर्मे अन्नसाधने परिणाह्यस्य गृहोपकरणस्य
शय्यासनकुण्डकटाहादिरवेक्षणे एनां नियोजयेत् ११ स्त्रीस्वतंत्ररक्षिताइति आप्ताश्चते आज्ञा
कारिणश्चेति तैः पुरुषैर्गृहे निरुद्धा अप्यरक्षिता भवेति याः पुनः शीलवत्यामात्मानमात्मानं रक्ष
न्ति ताएव सुरक्षिता भवंति अतो धर्माधर्मफलस्वर्गनरकप्राप्त्याद्युपदेशेन तासां संयमः कार्यः इ
ति मुख्यं रक्षणोपायकथनमिदं १२ पानमिति मद्यपानमसत्पुरुषसंगो भर्त्रा सह विरह इत
स्ततश्च भ्रमणमकारणे स्वापः परगृहनिवास इत्येतानि षट् स्त्रियाव्यभिचाराख्यदोषजनका

अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे ११ अर
क्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः १२ पा
नं दुर्जनसंसर्गः पत्या च विरहोऽटनं स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट् १३ नै
तारूपं परीक्षंते नासां वयसि संस्थितिः सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते १४ पौं
श्चल्याच्चलचित्ताच्च नैःस्नेहाच्च स्वभावतः रक्षिता यत्नतोपीह भर्तृष्वेता विकुर्वते १५
एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजं परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति १६ शय्यास
नमलंकारं कामं क्रोधमनार्जवं द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत् १७

नि तस्मादेतेभ्यस्ता रक्षणीयाः १३ नैताइति नैताः कमनीयं रूपं विचारयंति न चासां यौव
नादिके वयस्यादरोस्ति किं तु सुरूपं कुरूपं वा पुमानिमेतावतैव नरमुपभुंजते १४ अपि च
पौंश्चल्यादिति पुंसां दर्शनेन संभोगाभिलाषशीलत्वात् चित्तस्थैर्याभावात् स्वभावतः स्ने
हरहितत्वाच्च एताः प्रयत्नतोपि लोके रक्षिताः सद्योव्यभिचाराप्रयोगेण भर्तृषु विक्रियां गच्छं
ति १५ एवमिति एवं पूर्वश्लोकद्वयोक्तमासां स्वभावं हिरण्यगर्भसृष्टिकालजनितं ज्ञा
त्वा रक्षणार्थं प्रकृष्टं यत्नं पुरुष उपातिष्ठेत् १६ शय्येति शयनोपवेशनालंकरणशी
लत्वं कामक्रोधावनार्जवं परहिंसात्वं कुत्सिताचारत्वानि सर्गादौ मनुः स्त्रीभ्यः कल्पितवान् ।
स्मायत्नतो रक्षणीयाः १७

पुत्रमिति पुत्रमधिकृत्य शिष्टैर्मन्वादिभिः पूर्वैरस्मत्तः पूर्वैश्च महर्षिभिरभिहितमिमं वक्ष्यमाणं सर्वज
नहितं विवादं शृणुत ३१ भर्तुरिति भर्तुः पुत्रो भवतीति मन्यन्ते भर्तरि द्विप्रकारा श्रुतिर्वर्तते
केचिदुत्पादकमवोढारमपि भर्तारं तेन पुत्रेण पुत्रिणमाहुः अन्ये तु वोढारं भर्तारमनुत्पादकम
प्युजानि तेन पुत्रेण पुत्रिणमाहुः ३२ क्षेत्रभूतेति स्त्री सा पुमन्निस्थाने क्षेत्रं तत्तुल्यत्वात् मुनि
भिः स्मृता पुरुषश्च व्रीह्यादिबीजतुल्यः स्मृतः यथा पुनरेतो बीजं तत्स्थापितं तदधिकरणं तत्ता स्मृतयो।
बीजमिति यत्पदिश्यते क्षेत्रबीजसंयोगात्सर्वप्राणिनामुत्पत्तिरेवं चोभयोः कारणत्वमपि।
पूर्वान्तप्रश्नाविप्रतिपत्तिः किं पत्यं संबंधि क्षेत्रिणस्तापत्यमुत पदीयं बीजं तस्येति ३३ विशिष्टमिति
क्वचिद्बीजप्राधान्यं ज्ञातापत्यनिष्पन्नायामपि प्रमानितां [illegible] त्यन्नो बीजिनो व्यधत्त्व सोमसत

पुत्रं प्रत्युदितं सद्भिः पूर्वजैश्च महर्षिभिः विश्वजन्यमिमं पुण्यमुपन्यासं निबोधत ३१ भ
र्तुः पुत्रं विजानन्ति श्रुतिद्वैधं तु भर्तरि आहुरुत्पादकं केचिदपरे क्षेत्रिणं विदुः ३२ क्षेत्र
भूता स्मृता नारी बीजभूतः स्मृतः पुमान् क्षेत्रबीजसमायोगात्संभवः सर्वदेहिनां ३३
विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव कुत्रचित् उभयन्तु समं यत्र सा प्रसूतिः प्रशस्यते ३४।
बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते सर्वभूतप्रसूतिर्हि बीजलक्षणलक्षिता ३५
यादृशन्तूप्यते बीजं क्षेत्रे कालोपपादिते तादृग्रोहति तत्तस्मिन्बीजं स्वैर्व्यञ्जितं गुणैः ३६ ३ म।
इयं भूमिर्हि भूतानां शाश्वती योनिरुच्यते न च योनिगुणान्कांश्चिद्बीजं पुष्यति पुष्टिषु ३७

प्राधान्यमस्मरणप्रसंगात् क्वचिद्बीजिनामेव सुताः क्वचित्क्षेत्रप्राधान्यं यथायमजः प्रमीतस्येति वक्ष्य।
ति अत एव विचित्रवीर्यक्षेत्रजानां क्षत्रियाणां ब्राह्मणोत्पादितानामपि धृतराष्ट्रादयः क्षत्रियाः क्षेत्रिणः
एवमुत्पत्तिः यत्र पुनर्बीजयोन्योः साम्यं यत्र वोढैव जनयिता तदपत्यं प्रशस्तं भवति ३४
तत्र बीजप्राधान्यमपेक्षेतावदाह बीजस्येति बीजक्षेत्रयोर्मध्ये बीजं प्रधानमभिधीयते यस्मात्स
र्वेषां भूतानामुत्पत्तिर्बीजगतावर्णरूपादिचिह्नरूपलक्षितादृश्यते ३५ यादृशमिति यज्जाती
यं बीजं व्रीह्यादि ग्रीष्मादिकाले कर्षणादिना संस्कृते क्षेत्रे उप्यते तज्जातीयमेव तद्बीजमात्मीयैर्वर्णादि
भिरुपलक्षितं तस्मिन्क्षेत्रे जायते ३६ एवमन्वयप्रकारेण बीजप्राधान्यमुक्त्वा व्यतिरेकमुखे
न दर्शयितुमाह इयमिति हिरवधारणे इयमेव भूमिर्भूतानां वृक्षगुल्मलतादीनां नित्या योनिः
कारणं क्षेत्रात्मकं सर्वलोके रुच्यते न च भूम्याख्यो योनिः स्वधर्मान्कांश्चिदपि मृत्तिकारूपतादीन्बीजस्व

771

अत्रोत्कर्षाय दृष्टांतमाह अक्षमालेति अक्षमालाख्यानिकृष्टयोनिजा वसिष्ठेन परिणीता तथा चट
का मंदपालाख्येन ऋषिणा संगता पूज्यतां गता २३ एताश्चेति यद्यपि द्वे प्रकृते तथापि बहुदर्शना
र्थमनयोर्मतायाप्ता इति बहुवचनं कृतं एताश्चान्याश्च सत्यवत्यादयो निकृष्टप्रसूतयः स्वभर्तृगुणैः
प्रकृतैस्तथापि शुभैरस्मिंल्लोके उत्कृष्टतां प्राप्ताः २४ एषेति एष लोकाचारो जायापतिविषयः।
सदा शुभ उक्तः इदानीमिह लोके चोत्तरकाले सुखहेतून्क्षेत्रिणोपमसुतबीजिने उत्पादीन्प्रजा
धर्मान्निबोधत २५ प्रजनार्थमिति यद्यप्यासां रक्षणार्थं दोषा उक्तास्तथापि शश्वत्प्रतिकारना
तेषां न तास्त्रियोपकारगर्भा यस्मात्प्रजनार्थं बहुकल्याणभाजनभूता वस्त्रालंकारादिदानेन संमाना

अक्षमाला वसिष्ठेन संयुक्ताधमयोनिजा । शांडी च मंदपालेन जगामाभ्यर्हणीयतां २३
एताश्चान्याश्च लोकेस्मिन्नपकृष्टप्रसूतय उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्तृगुणैः शुभैः २४
एषोदिता लोकयात्रा नित्यं स्त्रीपुंसयोः शुभाः प्रेत्येह च सुखोदर्कान्प्रजाधर्मान्निबोधत ।
प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः स्त्रियश्श्रियश्च गेहेषु न विशेषोस्ति कश्चन २६
उत्पादनमपत्यस्य जातस्य परिपालनं प्रीत्यर्थं लोकयात्रायाः प्रत्यक्षं स्त्री निबंधनं २७
अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह २८ ।
पतिं या नाभिचरति मनोवाक्कायकर्मभिः साभर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते
व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निंद्यतां शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ३०

हाः स्वगृहशोभाकारिण्यो गेहेषु स्त्रियः श्रियश्च लक्ष्म्यानानयोर्विशेषो विद्यते यथा निःश्री
कं गृहं न राजते एवं निःस्त्रीकमपि २६ अपत्यमिति अपत्योत्पादनमुक्तमप्येतदभ्यर्हितत्वख्याप
नार्थं पुनरभिधानं धर्मकार्याणि उत्कृष्टा रतिः पितॄणामात्मनश्चापत्यजननादिना स्वर्गं इत्येत
द्दाराधीनं सर्वं २८ पतिमिति या स्त्री मनोवाक्देहसंयता सती विशेषणोपादानमासमप्य
त्मनोवाग्देहैर्यानव्यभिचरति सा भर्त्रा सहार्जितान्स्वर्गादिलोकानाप्नोति इह लोके च शिष्टैः साध्वी
त्युच्यते २९ व्यभिचारादिति पुरुषांतरसंपर्कात्स्त्री लोके निंद्यतां जन्मांतरे च शृगालयोनिं प्रा
प्नोति न्यपरोगादिभिश्च पीड्यते पंचमाध्याये स्त्रीधर्म उक्तमप्येतत्स्त्रीलोकद्वयस्य सदपत्यतत्सार्थ्य

म॰ स्मृ॰
टी॰
१७२

एतावानिति नैवैकः पुरुषो भवति अपि तु भार्या स्वदेह अपत्यानीत्येतत् परिमाण एव पुरुषः तथा
च वाजसनेयब्राह्मणं अर्द्धो वा एष आत्मनो यज्जाया तस्माद्यावज्जायां न विन्दते नैव तावत्प्रजायतेऽ
सर्वो हि तावद्भवति अथ यदैव जायां विन्दतेऽथ प्रजायते तर्हि सर्वो भवति तथा चैतद्वेद
विदो विप्रा वदन्ति यो भर्त्ता सैव भार्या स्मृतेति एवं च लब्धा सुतमादितः भर्त्तुरेवापत्यं भवतीति यतश्च दम्प
त्योरैक्यमतः ॥४५॥ नेति निःक्रयो विक्रयो विसर्गस्त्यागो ताभ्यां स्त्री भर्त्तुर्भार्यात्वान्नापैतीति एवं स
र्वे प्रजापतिना सृष्टं नित्यं धर्मं मन्यामहे एवं च क्रयादिनापि परस्त्रियमात्मसात्कृत्वा तदुत्पादितापत्यं
क्षेत्रिण एव भवति न बीजिनः ॥४६॥ सकृदिति पित्रादिधनविभागोऽन्नादीनां च धर्मतः सकृदेव
भवति न पुनरन्यथा क्रियते तथा प्रतिपादिता कन्या पित्रादिना सकृदेकस्मै दत्ता पुनर्नान्यस्मै दीयते एवं च
पूर्वमन्यस्मै दत्तायामपक्रान्तायां पित्रादिभिस्ततः प्राप्तायामपि जनितमपत्यं न बीजिनो भवतीत्येतदर्थमस्यो

एतावानेव पुरुषो यज्जायात्मा प्रजेति ह विप्राः प्राहुस्तथा चैतद्यो भर्त्ता सा स्मृताङ्गना ॥४५॥ न
निःक्रयविसर्गाभ्यां भर्त्तुर्भार्या विमुच्यते एवं धर्मं विजानीमः प्राक्प्रजापतिनिर्मितं ॥४६॥ सकृदं
शो निपतति सकृत्कन्या प्रदीयते सकृदाह ददामीति त्रीण्येतानि सतां सकृत् ॥४७॥ यथा
गोऽश्वोष्ट्रदासीषु महिष्यजाविकासु च नोत्पादकः प्रजाभागी तथैवान्याङ्गनास्वपि ॥४८॥ ये
ऽक्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः ते वै सस्यजातस्य न लभन्ते फलं क्वचित् ॥४९॥ यदन्य
गोषु वृषभो वत्सानां जनयेच्छतं गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभं ॥५०॥

पन्यासः तथा कन्यालोकसिद्धमपि गवादिद्रव्ये सकृदेव नीयाह पुनस्तदन्यस्मै न दीयत इति त्रीण्येतानि सता
सकृद्भवन्ति यद्यपि कन्यादानस्य सकृत्त्वेरणं प्रकृतोपयुक्तं तथापि प्रसङ्गादंशदानयोरपि
सकृत्त्वाभिधानं सकृदाह ददानीत्यनेनैव कन्यादानस्यापि सकृत्त्वे सिद्धे पुनस्तदुपादानं तदादरा
र्थमभिधानं ॥४७॥ यथेति यथाश्वगवादिपरकीयासु स्ववृषभादिकं नियुज्य वत्साद्युत्पादको न
तद्भागी तथा परकीयभार्यास्वपि नोत्पादकः प्रजाभागी भवति ॥४८॥ येऽक्षेत्रिण इति क्षेत्रस्वामिनो ये
न भवन्ति अथ च बीजस्वामिनः सन्तः परक्षेत्रे बीजं वपन्ति ते तत्क्षेत्रजातस्य धान्यादेः फलं कुत्रचिदपि
देशे न लभन्त इति प्रकृतस्य दृष्टान्तः ॥४९॥ यदिति यद्यन्यगवीषु वृषभो वत्सशतमपि जनयेत्सर्वे
ते वत्साः स्त्रीगवीस्वामिनामेव भवन्ति न तु वृषभस्वामिनः वृषभस्य यच्छुक्रसेचनं तद्वृषस्वामिनो
निःफलमेव यथा गोष्वश्वास्तुष्वपि परमनुष्यादेरपि प्रजाभागित्वं न भवतीति एतत्सर्वं तेन हृदयान्तः उक्तः

आर्षवदेत्तत्स्वामिनः प्रजाभागित्वं भवतीत्याह
तथान्यस्त्रीषु ॥५०॥

मं॰
१७२

272

अपि च भूमाविति भूमावप्येकस्मिन्नपि केदारे कर्षकैः वपनकालोप्तानि व्रीहिमुद्गादीनि नानारूपाणि बीजस्वभावाज्जायन्ते न तु भूमेरेकरूपत्वादेकरूपाणि भवन्ति ३८ तथा हि व्रीहय इति व्रीहयः षष्टिकाः शालयः कलमाद्याः तथा मुद्गादयो बीजस्वभावानतिक्रमेण नानारूपा जायन्ते ३९ एवं च सति अन्यदिति व्रीहिरुप्तो मुद्गो जायत इत्येतन्न संभवति तस्माद्यद्बीजमुप्यते तत्तदेव जायते एवं च बीजगुणान्वयेन नान्वेत्र धर्मानुवृत्तेश्च ब्राह्मणादीनामनुलोमेष्वपि बीजप्राधान्यं ४० संप्रति क्षेत्रप्राधान्यमाह तदिति तद्बीजं सहजप्रज्ञावता पित्रादिभिरनुशिष्टेन ज्ञापनेनेति ज्ञानं वेदः एवं विज्ञानमपि तदङ्गादिविषयज्ञानं तद्विदा आयुरिच्छता न कदाचित् परस्त्रियां वपनीयं ४१ अत्रेति अतीतकालज्ञा अस्मिन्नर्थे वायुप्रोक्ता गाथाः छन्दोविशेषरू।

भूमावप्येककेदारे कालोप्तानि कृषीवलैः नानारूपाणि जायन्ते बीजानीह स्वभावतः ३८
व्रीहयः शालयो मुद्गास्तिला माषास्तथा यवाः यथाबीजं प्ररोहन्ति लशुनानीक्षवस्तथा ३९
अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते उप्यते यद्धि यद्बीजं तत्तदेव प्ररोहति ४० तत्प्राज्ञे
न विनीतेन ज्ञानविज्ञानवेदिना आयुष्कामेन वप्तव्यं न जातु परयोषिति ४१ अत्र गा
था वायुगीताः कीर्तयन्ति पुराविदः यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे ४२ नश्यतीषु
र्यथा विद्धः खे विद्धमनुविध्यतः तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे ४३ पृथोरपीमां

तानि वाक्यानि कथयन्ति यथा पुरुषेण परपत्न्यां बीजं न वप्तव्यमिति ४२ नश्यतीति यथान्ये न विद्धमृगे क्षिप्त इषुस्तस्मिन्नेव छिद्रे पश्चादन्यस्य विध्यतः क्षिप्त इषुर्बाणो निष्फलो भवति पूर्व विद्धत्वात् तस्यैव तन्मृगलाभादेवं परपत्न्यामुप्तं बीजं बीजिन एव निष्फलं भवति गर्भ ग्रहणानन्तरं क्षेत्रिकस्यापत्यफलत्वात् ४३ पृथोरिति इमामपि पृथिवीं पृथुना पूर्वं परि गृहीतत्वादनेकराजसंबन्धेपि पृथोर्भार्यामिमामतीतकालज्ञा जानन्ति तथा स्थाणुं छि नत्तीति स्थाणुच्छेदः कर्मणा येन स्थाणुमुच्छिद्य क्षेत्रं कृतं तस्यैव तत् क्षेत्रं वद न्ति यथा शरादिशल्यं येन पूर्वं मृगे प्रक्षिप्तं तस्यैव तं मृगमाहुः एवं च पूर्वं परिगृ हीतः साक्षाद्दूरे वापत्यं न भवति न जनयितुः ४४

म॰स्मृ॰ टी॰ २७३

देवराद्वेति संतानाभावे स्त्रिया पत्यादिगुरुनियुक्तया देवरादन्यस्माद्वा सपिंडात्सम्यग्वक्ष्यमाणघृताक्ताद्विनियमवत्पुत्र एष गमनेनेप्सितप्रजोत्पादयितव्या उत्पत्तिलाभिधानमपत्यकार्यत्वमपुत्रान्तरत्वं पुत्रार्थमनार्थं ५९ विधवायामिति विधवायामित्यपत्योत्पादनयोग्यमपत्यभावपरमिदं जीवतोपि पत्यावयोग्यपत्यादिगुरुनियुक्तो घृताक्तसर्वगात्रो मौनी रात्रावेकं पुत्रं जनयेत्तन्न कथंचिद्द्वितीयं ६० द्वितीयमिति अन्ये पुनराचार्या नियोगात्पुत्रोत्पादनविधिज्ञा अपुत्र एकपुत्र इति शिष्टप्रवादाद्निष्पन्नं नियोजनं मन्यमानास्त्रीषु पुत्रोत्पादनं द्वितीयं धर्मतो मन्यन्ते ६१ विधवायामिति विधवादिकायां नियोगप्रयोजने गर्भधारणे यथाशास्त्रं संपन्ने सति ज्येष्ठो भ्राता कनिष्ठभ्रातृभार्या च परस्परं गुरुवत्स्नुषावद्व्यवहरेयातां ६२ नियुक्ताविति ज्येष्ठकनिष्ठभ्रातरौ यौ परस्परभार्यायां नियुक्तौ घृ

देवराद्वा सपिंडाद्वा स्त्रिया सम्यङ्नियुक्तया । प्रजेप्सिताधिगंतव्या संतानस्य परिक्षये ५९ विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि । एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन ६० द्वितीयमेके प्रजनं मन्यंते स्त्रीषु तद्विदः । अनिर्वृत्तं नियोगार्थं पश्यंतो धर्मतस्तयोः ६१ विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि । गुरुवच्च स्नुषावच्च वर्तेयातां परस्परं ६२ नियुक्तौ यौ विधिं हित्वा वर्तेयातां तु कामतः । तावुभौ पतितौ स्यातां स्नुषागगुरुतल्पगौ ६३ नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः । अन्यस्मिन्हि नियुंजाना धर्मं हन्युः सनातनं ६४ नोद्वाहिकेषु मंत्रेषु नियोगः कीर्त्यते क्वचित् । न विवाहविधावुक्तं विधवावेदनं पुनः ६५ अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः । मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ६६

तादिविधानं त्यक्त्वा कामतो वर्तेयातां तौ स्नुषागगुरुदारगौ पतितौ भवतः ६३ एवं तन्नियोगमभिधाय स्वयमेव तं निषेद्धुमाह नान्यस्मिन्निति ब्राह्मणादिभिर्विधवा द्विजाती भर्तुरन्यस्मिन्देवरादौ न नियोक्तव्या अन्यस्मिन्नियुंजाना स्त्रीणामेकपतिकत्वधर्मं सनातनं दूषयेयुः ६४ नोद्वाहिकेष्विति अर्यमणं नु देवं कन्या अग्निमयक्षतेत्यादिषु विवाहप्रयोजकेषु मंत्रेषु क्वचिदपि शाखायां न नियोगः कथ्यते न च विवाहविधायकशास्त्रे अन्येन पुरुषेण सह पुनर्विवाह उक्तः ६५ अयमिति यस्मादयं पशुसंबंधी मनुष्याणामपि व्यवहारो विद्वद्भिर्निंदितः यो यमधार्मिके वेणे राज्यं कुर्वाणे तेनैकतन्मतयापि प्रोक्तः अतो वेणादारभ्य प्रवृत्तोयं सनातनानां नैतिनियते ६६

मु॰ २७३

273

तथैवेति यथा गवादिगर्भेषु तथैव स्त्रीष्वप्यपत्यरहिताः संतः परकीयभार्यायां ये बीजं वपंति ते क्षे
त्रस्वामिनामेवापत्यलक्षणमर्थं कुर्वंति बीजसेक्ता त्वपत्याख्यं फलं लभते न तु ५२ फलमिति य
दस्यामुत्पद्यतेपत्यं तदुभयोरेवेत्येवं पूर्वनियमेन कृतसंवित्तिः संदिग्धमेव क्षेत्रिणामपत्यमतउ
क्तरीत्या बीजात्क्षेत्रं बलवत् ५२ क्रियेति यदत्रापत्यं भविष्यति तदावयोरुभयोरेवेति नि
यमेन तत्क्षेत्रस्वामिना बीजवपनार्थं यद्बीजिनो दीयते तस्यापत्यस्य लोके बीजिक्षेत्रिणौ द्वाव
पि भागिनौ दृष्टौ ५३ ओघेति यद्बीजं जलवेगवाताभ्यामन्यदीयक्षेत्रादानीतं यस्य क्षेत्रे जा
यते तत्क्षेत्रस्वामिन एव तद्बीजं भवति न तु येन बीजमुप्तं स तत्फलं लभते एवं स्वभार्याभ्र

तथैवाक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः कुर्वंति क्षेत्रिणामर्थं बीजी न लभते फलं ५२
फलं त्वनभिसंधाय क्षेत्रिणां बीजिनां तथा प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्गरीयसी
क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत्प्रदीयते तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ५३
ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति क्षेत्रकस्यैव तद्बीजं न बीजी लभते फलं ५४
एष धर्मो गवाश्वस्य दास्युष्ट्राजाविकस्य च विहंगमहिषीणां च विज्ञेयः प्रसवं प्रति ५५
एतद्वः सारफल्गुत्वं बीजयोन्योः प्रकीर्तितं अतः परं प्रवक्ष्यामि योषितां धर्ममापदि ५६
भ्रातुर्ज्येष्ठस्य भार्या या गुरुपत्न्यनुजस्य सा यवीयसस्तु या भार्या स्नुषा ज्येष्ठस्य सा स्मृता ५७
ज्येष्ठो यवीयसो भार्यां यवीयान्वाग्रजस्त्रियं पतितौ भवतो गत्वा नियुक्तावप्यनापदि ५८

मेणापि परभार्यायामनेन ममायं पुत्रो भवतीत्येवमभ्युपगमेपि क्षेत्रिण एवापत्यमित्यनेनैव द
र्शितं ५४ एष इति एषैव व्यवस्था गवाश्वादीनां संततिं प्रतिज्ञातव्या यत्क्षेत्रस्वाम्येव गवा
श्वादेः संततिस्वामी न तद्वृषभस्वामी नियमे तु कृते सत्युभयोरेव संततिस्वाम्यं ५५ एत
दिति एतद्बीजयोन्योः प्राधान्याप्राधान्यमुक्तं युष्माकं अतोनंतरं स्त्रीणां संतानाभावे यत्क,
र्तव्यं तद्वक्ष्यामि ५६ भ्रातुरिति ज्येष्ठस्य भ्रातुर्भार्या या भार्या सा कनिष्ठस्य भ्रातुर्गुरुवत्प
त्नी भवति कनिष्ठस्य भ्रातुर्या भार्या सा ज्येष्ठस्य भ्रातुः स्नुषा मुनिभिः स्मृता ५७ एवं च ज्ये
ष्ठ इति ज्येष्ठकनिष्ठभ्रातरावितरेतरयोर्भार्यां गत्वा संतानाभावं विनानियुक्तावपि पतितौ

यस्त्विति योदोषवतीं कन्यां दोषाननभिधाय प्रदद्याति तस्य कन्यादातुर्दुरात्मनो दानं तस्मै तदर्पणेन वितथं कु र्यात् एतदपि मायादोषकथनार्थं विधायेति कार्यवान्मनुष्यः पत्न्या ग्रासाच्छादनादि प्रकल्प्य देशांत रं गच्छेत् यस्माद्ग्रासाद्यभावपीडिता स्त्री शीलवत्यपि पुरुषांतरं भजेत् ७३ विधायेति भर्त्ताच्छाद नादि दत्वा यस्मिं देशांतरं गते देहप्रसादनपरगृहगमनवर्जिता जीवेत् अदत्वा पुनर्गते सूत्रनिर्मा णादिभिरनिंदितशिल्पैर्जीवेत् ७४ प्रोषितइति गुर्वाज्ञासंपादनादिधर्मकार्यनिमित्तं प्रोषि तः पतिरष्टौ वर्षाणि प्रतीक्षणीयः अत ऊर्द्ध्वं पतिसन्निधिं गच्छेत् तदाह वसिष्ठः प्रोषितपत्नी पंच वर्षाण्युपासीत ऊर्द्ध्वं पंचभ्यो भर्तृसकाशं गच्छेदिति विद्यार्थं प्रोषितः षड्वर्षाणि प्रतीक्ष्यः निज विद्यादिविभावनेन यशोर्थमपि प्रोषितः षडेव भार्यांतरोपभोगार्थं तु गतस्त्रीणि वर्षाणि ७५

यस्तु दोषवतीं कन्यामनाख्यायप्रयच्छति तस्य तद्वितथं कुर्यात्कन्यादातुर्दुरात्मनः ७३ विधा य वृत्तिं भार्यायाः प्रवसेत्कार्यवान्नरः अवृत्तिकर्षिता हि स्त्री प्रदुष्येत्स्थितिमत्यपि ७४ वि धाय प्रोषिते वृत्तिं जीवेन्नियममास्थिता प्रोषिते त्वविधायैव जीवेच्छिल्पैरगर्हितैः ७५ प्रोषितो धर्मकार्यार्थं प्रतीक्ष्योष्टौ नरः समाः विद्यार्थं षट् यशोर्थं वा कामार्थं त्रींस्तु वत्सरान् संवत्सरं प्रतीक्षेत द्विषंतीं योषितं पतिः ऊर्द्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संविशेत् ७७ अति क्रामेत्प्रमत्तं या मत्तं रोगार्त्तमेव वा सा त्रीन्मासान्परित्याज्या विभूषणपरिच्छदा ७८ उन्म त्तं पतितं क्लीवमवीजं पापरोगिणं द्विषाण्या न त्यागोस्ति न चादायापवर्त्तनं ७९

संवत्सरमिति पतिविषये संजातद्वेषां स्त्रियं वर्षं यावत्प्रतीक्षेत अत ऊर्द्ध्वमपि द्विषंती स्वदत्तमलंका रादिधनं हृत्वा नोपगच्छेत् ग्रासाच्छादनमात्रं तु देयमेव ७६ अतिक्रामेदिति या स्त्री द्यूतादिप्रमा दवंतं मद्यजलपानादिना मत्तं व्याधितं वा शुश्रूषाद्यकरणेनावजानाति सा विगतालंकारशय्या दिपरिच्छदा त्रीन्मासान्नोपगंतव्या ७७ उन्मत्तमिति वातादिदोषादप्रकृतिस्थं पतितमेकादशा ध्याये वक्ष्यमाणेन प्रसंगमबीजं वातरेतस्त्वादिना बीजरहितं कुष्ठाद्युपहतं च पतिमविद्विषन्त्या। स्त्यागो न करणीयो न च धनग्रहणं करणीयं ७८ मद्यपेति निषिद्धमद्यमद्यपानरता असा ध्वाचारा भर्तुः प्रतिकूलाचरणशीला कुष्ठादिव्याधियुक्ता भृत्यादिताडनशीला सततमतिव्य यकारिणी या भार्या भवेत् साधिवेत्तव्या तस्यां सत्यां विवाहः कार्यः ७९

274
-2

सइति सर्वेलोमहीसमग्रांपूर्वंपालयन्नतएवराजर्षिश्रेष्ठोनतथापिवर्णानांकामोपहतबुद्धिर्भ्रातृभार्यो
दिगमनरूपंवर्णसंकरंप्रवर्तितवान् ६७ ततइति वेणकालात्प्रभृतियोमृतभर्तृकादिस्त्रियंप्रमादादप
त्यानादपत्यनिमित्तंदेवरादौनियोजयतितंसाधवोनितरांगर्हन्तेअयंचस्त्रीणांनियोगनिषेधःक
लियुगविषयः तदाहबृहस्पतिः उक्तोनियोगोमनुनानिषिद्धःस्वयमेवतु युगक्रमादशक्योऽयंक
र्तुमन्यैर्विधानतः तपोज्ञानसमायुक्ताः कृतत्रेतायुगेनराः द्वापरेचकलौनृणांशक्तिहानिर्हिनिर्मि
ता अनेकधाकृताःपुत्राः ऋषिभिश्चपुरातनैः नशक्यन्तेऽधुनाकर्तुंशक्तिहीनैरिदन्तनैः अतोयज्ञो
विन्दराजेनप्रागविशेषमत्वातासर्वदेवसंतानाभावेतियोगान्नियोगपक्षःश्रेयानितिस्वमनीषित
याकल्पितंतन्मुनिव्याख्याविरोधाज्ज्ञायामहेआपस्तम्बमनुवाक्येषुमुनिव्याख्यामहंलिखन्नापरा
धीनस्मिविदुषांकाहंसर्वविभःकागीः नियोगप्रकारतांकन्यायांतंविशेषमाह यस्याइति यस्याः

समहीमखिलांभुञ्जन्राजर्षिप्रवरःपुरा वर्णानांसंकरंचक्रेकामोपहतचेतनः ६७ ततःप्रभृतियो
मोहात्प्रमीतपतिकांस्त्रियं नियोजयत्यपत्यार्थंतंविगर्हन्तिसाधवः ६८ यस्याम्रियेतकन्याया
वाचासत्येकृतेपतिः तामनेनविधानेननिजोविन्देतदेवरः ६९ यथाविध्यधिगम्यैनांशुक्ल
वस्त्रांशुचिव्रतां मिथोभजेताप्रसवात्सकृत्सकृदृतावृतौ ७० नदत्त्वाकस्यचित्कन्यांपुनर्दद्या
द्विचक्षणः दत्त्वापुनःप्रयच्छन्हिप्राप्नोतिपुरुषानृतं ७१ विधिवत्प्रतिगृह्यापित्यजेत्कन्यां
विगर्हितां व्याधितांविप्रदुष्टांवाछद्मनाचोपपादितां ७२

कन्यायावाग्दानेकृतेसतिभर्त्ताम्रियतेतामनेनवक्ष्यमाणानुष्ठानेनभर्तुःसोदरोभ्रातापरिण
येत् ६९ यथेति सदेवरोविवाहविधिनैनांस्वीकृत्यशुक्लवस्त्रांकायवाङ्मनःशौचशालिनीमा
गर्भग्रहणादृतावृतौएकैकंवारंगच्छेदेवंचास्यापिनियोगप्रकारत्वात् विवाहस्यागर्भग्र
हणान्नगमनंस्यात्यस्मैवाग्दत्तातस्यैवतदपत्यंभवति ७० नदत्त्वेति कस्मैचिद्वाचाकन्यांदत्त्वा
तस्मिन्मृतेदानगुणदोषज्ञःतामन्यस्मैददत्सहस्रंपुरुषानृतेउक्तंदोषंप्राप्नोतिसमनुप
दीकरणाख्याजातत्वाद्दानस्यानिष्पत्तेःपुनर्दानशंकायामिदंवचनं ७१ विधिवदिति अद्भिरे
वद्धिनागृह्णामीत्येवमादिविधिनाप्रतिगृह्यापिकन्यांवैधव्यादिलक्षणोपेतांरोगिणींजातयो
निताश्चाभिशापवतींअधिकांगादिनापनछद्मनोपपादितांसम्यक्षदोषकथनाद्याकन्यांत्यजेत्

कामममिति संजातार्तवापि कन्या वरं मरणपर्यन्तं पितृगृहे तिष्ठेत् न पुनरेनां विद्यागुणरहिताय कदाचित्पित्रादिर्दद्यात् ८९ त्रीणीति पित्रादिभिर्गुणवद्वरायादीयमाना कन्या संजातार्तवा सती त्रीणि वर्षाणि प्रतीक्षेत वर्षत्रयात्पुनरूर्ध्वमधिकगुणवरालाभे समानजातिगुणं स्वयं वृणीत ९० । अदीयमानेति पित्रादिभिरदीयमाना कुमारी यथोक्तकाले यदि भर्तारं स्वयं वृणुते तदासौ न किंचित्पापं प्राप्नोति यं च पात्रं सोपि न दण्डादिकं प्राप्नोति ९१ अलंकारमिति स्वयंवृतपतिका कन्या वरणात्पूर्वं पितृमातृभ्रातृदत्तमलंकारं तेभ्यः समर्पयेत् तदा चौरी भवति ९२ पित्र इति ऋतुमतीं कन्यां परिणयन्नरः पित्रे शुल्कं न दद्यात् यस्मात्स पिता ऋतुकार्यापत्योत्पत्तिनिरोधात् कन्या

कामम् आमरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ८९ त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिं ९० अदीयमाना भर्तारमधिगच्छेद्यदि स्वयं नैनः किंचिदवाप्नोति न च यं साधिगच्छति ९१ अलंकारं नाददीत पित्र्यं कन्या स्वयंवरा । मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरेत् ९२ पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन् स च स्वाम्यादतिक्रामेदृतूनां प्रतिरोधनात् ९३ त्रिंशद्वर्षोद्वहेत्कन्यां हृद्यां द्वादशवार्षिकीं त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ९४ देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन् ९५ प्रजनार्थं स्त्रियः सृष्टाः संतानार्थं च मानवाः तस्मात्साधारणो धर्मः श्रुतौ पत्न्या सहोदितः

याः स्वामित्वाद्धीयते ९३ त्रिंशदिति त्रिंशद्वर्षः पुमान्द्वादशवर्षवयस्कां मनोहारिणीं कन्यामुद्वहेत् चतुर्विंशतिवर्षो वाष्टवर्षां गार्हस्थ्यधर्मे वसादं गच्छति त्वरावान् एतच्च योग्यकालप्रदर्शनार्थं नात्र नियमार्थं प्रायेणैतावता कालेन गृहीतवेदो भवति त्रिभागवयस्का च कन्या वोढुर्यूनो योग्येति गृहीतवेदस्यापत्यात्पादनकाले गृहस्थाश्रमप्रतिपत्तिनिबन्धनेति मन्तव्यम् ९४ देवदत्तामिति भार्यां यमा सविनायुर्यधिमसंतानुर्या ईयमा देवा उत्थादिमन्त्रलिङ्गाद्देवैर्दत्ता भार्यां तां पतिर्लभते न स्वेच्छया तां साध्वीं देवानां प्रियं कुर्वन्वस्त्राच्छादनादिना सदा हेषायुपेता मपि पोषयेत् ९५ प्रजनार्थमिति यस्माद्गर्भग्रहणार्थं स्त्रियः सृष्टाः गर्भाधानार्थं च मनुष्यास्तस्माद्गर्भोत्पादनमिवाग्न्याधानादिरपि धर्मः पत्न्या सह साधारणः सोमेव सार्धं ... मादधीयानामित्यादिर्वेदेऽभिहितः तस्माद्भार्यापत्नी

वंध्याष्टमइति प्रथमऋतुमारभ्याविद्यमानप्रसवाष्टमेऽधिवेदनीया मृतापत्या दशमे स्त्रीजनन्येकादशे। अप्रियवादिनी तु सद्य एव यद्यपुत्रा स्यात् तु तदा तु तस्यां धर्मप्रजासंपन्ने दारे नान्यां कुर्वीतान्यतरापाये तु कुर्वीत नप्यतानि मेधादधिवेदनं कार्यं ८१ यारोगिणीति या पुनर्व्याधिता सती पुनरनुकूला भवति शीलवती च स्यात् तामनुज्ञाप्यान्यो विवाहः कार्यः कदाचिच्चासौ नावमाननीया ८२ अधीति या पुनः कृताधिवेदना स्त्री कुपिता गृहान्निर्गच्छति सा तदहरेव रज्ज्वादिना बध्वा स्थापनीया या वा पतिवृत्तेः पित्रादिकुलसन्निधौ वा त्याज्या ८३ प्रतीति या पुनः क्षत्रियादिका स्त्री भर्त्रादिनिवारिता विवाहाद्युत्सवेऽपि निषिद्धं मद्यं पिबेत् नृत्यादिस्थाने जनसमूहे वा गच्छेत् सा षड्वराटकृष्णलाः।

मद्यपासाधुवृत्ता च प्रतिकूला च या भवेत् व्याधिता वाधिवेत्तव्या हिंस्रार्थघ्नी च सर्वदा ८० वंध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ८१ या रोगिणी स्यात्तु हिता संपन्ना चैव शीलतः सानुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हिचित् ८२ अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात् सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसंनिधौ ८३ प्रतिषिद्धापि चेद्या तु मद्यमभ्युदयेष्वपि प्रेक्षासमाजं गच्छेद्वा सा दंड्या कृष्णलानि षट् ८४ यदि स्वाश्चापराश्चैव विंदेरन्योषितो द्विजाः तासां वर्णक्रमेण स्याज्ज्यैष्ठ्यं पूजा च वेश्म च ८५ भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यिकं स्वा चैव कुर्यात् सर्वेषां नास्वजातिः कथंचन ८६ यस्तु तत्कारयेन्मोहात्सजात्या स्थितयान्यया यथा ब्राह्मणचांडालः पूर्वदृष्टस्तथैव सः उत्कृष्टायाभिरूपाय वराय सदृशाय च अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि ८८

निषिद्धव्यवहारप्रकरणाद्धान्त्याद्दंडनीया ८४ यदीति यदि द्विजातयः सजातीया विजातीयाश्च भार्या उद्वहेयुः तदा तासां जातिक्रमेण ज्येष्ठ्यं मानदायविभागोत्कर्षो येन्ये ज्येष्ठत्वं पूजा च वस्त्रालंकारादिना गृहं च प्रधानं स्यात् ८५ भर्तुरिति भर्तुर्दैहिकं सर्वेषां द्विजातीनां स्वजातिभार्यैव कुर्यान्न तु विजातीयेति ८६ यस्त्विति यः पुनः सजातीयायां सन्निहितायां देहशुश्रूषादिकं कर्म विजातीयया मोहात्कारयेत् यथा ब्राह्मण्यां शूद्राज्जातो ब्राह्मणचांडालः तथैव पूर्वैर्ऋषिभिर्दृष्ट इति पूर्वानुवादः ८७ उत्कृष्टायेति कुलाचारादिभिरुत्कृष्टाय सुरूपाय समानजातीयाय वराय प्राप्तकालामपि विवाहयेदष्टवर्षामेवं धर्मो न हीयत इति दद्यात् तस्मादपि कालात्प्रागपि कन्यां वरहा।

ज्येष्ठ इति ज्येष्ठ एव पितृसंबंधि धनं सर्वं गृह्णीयात् कनिष्ठाः पुनर्ज्येष्ठं भक्ताच्छादनार्थं पितरमिवोपजीवे-
युः एवं चाविभागेनैव स्थानं ६ ज्येष्ठेनेति उत्पन्नमात्रेण ज्येष्ठेन संस्काररहितेनापि मनुष्यः पुत्रवान्भवति
यतस्तेनात्पुत्रस्य लोको लीति श्रुतेः पुत्रपत्नोभकाभावपरीहारो भवति तथा प्रजया पितृभ्य इति श्रुतेः पुत्रेण
जातमात्रेण पितॄणामनृणश्च भवत्यतो ज्येष्ठ एव सर्वं धनमर्हतीति पूर्वस्य शेषः ७ यस्मिन्निति यस्मिञ्जा-
ते ऋणं संनयति येन जातेनामृतत्वं प्राप्नोति तथा च श्रुतिः ऋणमस्मिन्संनयति अमृतत्वं च गच्छति पुत्र-
स्य जातस्य पश्येच्चेज्जीवतो मुखमिति स एव पितुर्धर्मेण हेतुना जातः पुत्रो भवतीति तेनैकेन वृत्ताऽन्य
न यतो युपकारस्याकृतत्वादितरांस्तु पुत्रान्काममात्रहेतुजन्मनो मुनयो जानन्तीति तस्मात्सर्वधनं स गृह्णीया-
दित्यस्यैवायमपि शेषः ८ पितेवेति ज्येष्ठो भ्रातृविभागाभावे कनिष्ठान्भ्रातॄन्पिता पुत्रानिव पालयेत् अनुजाताश्च
भ्रातरः पुत्रवज्ज्येष्ठभ्रातरि धर्मात् वर्तेरन् ९ ज्येष्ठ इति अकृतविभागो ज्येष्ठो यदि धार्मिको भवति त-

ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः शेषास्तमुपजीवेयुर्यथैव पितरं तथा ६ ज्येष्ठेन जातमा-
त्रेण पुत्री भवति मानवः पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति ७ यस्मिन्नृणं संनयति येन चा-
नन्त्यमश्नुते स एव धर्मजः पुत्रः कामजानितरान्विदुः ८ पितेव पालयेत्पुत्रान्ज्येष्ठो भ्रातॄन्यवीयसः
पुत्रवच्चापि वर्तेरन्ज्येष्ठे भ्रातरि धर्मतः ९ ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः ज्येष्ठः पूज्यतमो लो-
के ज्येष्ठः सद्भिरगर्हितः १० यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः अज्येष्ठवृत्तिर्यस्तु स्यात्स संपूज्य-
स्तु बन्धुवत् ११ एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया १२
ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरं ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः १३

दा अनुजानामपि तदनुयायित्वेन धार्मिकत्वात् ज्येष्ठः कुलं वर्धयति यदि अधार्मिको भवति तदानुजाना-
मपि तादृशत्वात् ज्येष्ठः कुलं नाशयति तथा गुणवान् ज्येष्ठो लोके पूज्यतमः साधुभिश्चागर्हितो भवति १० य इ-
ति यो ज्येष्ठोऽनुजेषु भ्रातृषु पितृवद्वर्तते स पितेव मातेव वा हितोऽभ्यो भवति स पुनस्तथा न वर्तते तस्मान्मातुला-
दिवद्बन्धुवदर्हणीयः ११ एवमिति एवमविभक्ता भ्रातरः सह वसेयुर्यदि वा धर्मकामनया कृतविभा-
गाः पृथग्भवेयुः यस्मात्पृथगवस्थाने सति पृथक्पञ्चमहायज्ञाद्यनुष्ठानाद्धर्मो विवर्धते तस्माद्विभा-
गक्रिया धार्मिकधर्म्या तथा च बृहस्पतिः एकपाकेन वसतां पितृदेवद्विजार्चनं एकं भवेद्विभक्तानां त-
देव स्याद्गृहे गृहे १२ ज्येष्ठस्येति उद्ध्रियत इत्युद्धारः ज्येष्ठस्याविभक्तधनादुद्धृत्य विंशतितमो भागः स-
र्वद्रव्येभ्यश्च यत् श्रेष्ठं तद्दातव्यं मध्यमस्य चत्वारिंशत्तमो भागो देयः कनिष्ठस्य पुनरशीतितमो भागो देयः

276

म

उ॰ १२९

कन्यामिति कन्यायां दत्तशुल्कायां सत्यां न तु जातविवाहायां यदि शुल्कदो वरो म्रियते तदा देवराय पित्रा- दिभिरसौ कन्या दातव्या यदि सा स्वीकरोति यस्मात् मृयतेति प्रागुक्तं नियोगरूपस्त्वत्र ग्रहणविषयं ९७ आददीत शास्त्रानभिज्ञः शूद्रोऽपि दुहितरं ददत् शुल्कं न गृह्णीयात् किं पुनः शास्त्रविद्द्विजातिः यस्मात् शुल्कं गृह्णन् प्रच्छन्नं दुहितृविक्रयं करोति तेन कन्यायाः पिता विद्वानित्यनेन निषिद्धमपि शुल्कग्रहणं । न्यायां दत्तशुल्कायामिति गृहीतशुल्कायां शास्त्रीयत्वशंकायां पुनरत्र निषिध्यते ९८ एतत्त्विति ए तत्पुनः पूर्वशिष्टाः न कदाचित्कृतवन्तो नाप्यपरे वर्तमानकालीना कुर्वन्ति यदन्यस्य कन्यामङ्गीकृत्यान्यस्मै दीयते एतच्च गृहीतकन्याशुल्क विषयं न दत्ताकस्यचित्कन्यामिति तत्र गृहीतशुल्कविषयं ९९ नानुशुश्रुमेति पूर्वकल्पेष्वप्येतद्वृत्तमिति न कदाचिद्वयं श्रुतवन्तो यत् शुल्काभिधानेन कश्चित्साधुर्दु-

कन्यायां दत्तशुल्कायां म्रियते यदि शुल्कदः देवराय प्रदातव्या यदि कन्यानुमन्यते ९७ आददीत न शूद्रो- ऽपि शुल्कं दुहितरं ददत् शुल्कं हि गृह्णन्कुरुते छन्नं दुहितृविक्रयं ९८ एतत्तु न परे चक्रुर्नापरे जातु साधवः यदन्यस्य प्रतिज्ञाय पुनरन्यस्य दीयते ९९ नानुशुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु शुल्क- संज्ञेन मूल्येन छन्नं दुहितृविक्रयं १०० अन्योन्यस्याव्यभीचारो भवेदामरणान्तिकः एषधर्मः समासेन। ज्ञेयः स्त्रीपुंसयोः परः १ तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ यथा नाभिचरेतां तौ वियुक्तावित रेतरं २ एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः आपद्यपत्यप्राप्तिश्च दायधर्मं निबोधत ३ ऊ र्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समाः भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः ४

हितृविक्रयमकार्षीदिति शुल्कनिषेधानुवादः १०० अन्योन्यस्येति भार्यापत्योर्मरणान्तं यावद्धर्मा- र्थकामेषु परस्परमव्यभिचारः स्यादिति यत्संक्षेपतः स्त्रीपुंसयोः प्रकृष्टो धर्मो ज्ञातव्यः १ तथा नित्यमिति स्त्रीपुंसौ कृतविवाहौ तथा सदा यत्नं कुर्यातां यथा धर्मार्थकामविषये वियुक्तौ सन्तौ परस्परं नाभिचरेतां २ एष इति एष भार्यापत्योरन्योन्याव्यभिचारप्रयुक्तो धर्मो युष्माकमुक्तः सन्तानाभावे चा- पत्यप्राप्तिरुक्ता इदानीं दीयत इति दायः पित्रादिधनं तस्य विभागाद्युच्यमानं शृणुत ३ ऊर्ध्वमिति । भ्रातरो मिलित्वा पितृमरणादूर्ध्वं पैतृकं मातृमरणादूर्ध्वं मातृकं धनं समं कृत्वा विभजेरन् ज्येष्ठस्योद्धा- रतपोद्धारस्य वक्ष्यमाणत्वात् सम भागो यज्ज्येष्ठोऽप्युद्धारमर्हति इति बोद्धव्यः पित्रोर्मरणादूर्ध्वमि- ति भागो हेतुमाह यस्मात्ते पुत्रा जीवतोः पित्रोः तदीय धनस्वामिनो न भवन्ति मातुरपि प्रकृतत्वात्तत्का- भागोऽहेतुमाह...

अजाविकमिति एकशफाश्वादयः अजाविकमेषां एकशफसहितं विभागकाले समं कृत्वा विभक्तमशु।
कालन्नाविभजेत् किंतु ज्येष्ठस्यैव तत्स्यात् न तु तत्तस्य द्रव्यान्तरदानेन समीकृत्य विक्रीय वा तन्मूल्य
विभजेत् अजाविकमिति पशुद्वंद्वविभाषैकवद्भावः १९ यवीयानिति कनिष्ठो यदि ज्येष्ठभ्रातृभा
र्यायां नियोगेन पुत्रं जनयेत् तदा तेन पितृव्येन सह तस्य क्षेत्रजस्य समो विभागः स्यात् न तु पितृवद्विंशो
द्धारोस्य भवतीति विभागव्यवस्था नियता नियोगेन तत्र स्थानेभिन्नत्ववत्स्यति यद्यपि समे न्यभ्रातरः समं
उत्पन्नं तथापि स्मादेव लिंगात्मे त्रस्यापि मृतपितृकस्य पैतामहधने पितृव्यवद्विभागोस्तीति गम्य
ते २० उपसर्जनमिति ज्येष्ठभ्रातुः क्षेत्रजः पुत्रोपि पितेव सोद्धारविभागभागी प्राप्नुत इत्येतदाशंक्य
निराकृतम पूर्वोक्तमेव हेतुमाह अप्रधानं क्षेत्रजः पुत्रः प्रधानस्य क्षेत्रिणः पितुर्धर्मेण सोद्धारविभा

अजाविकं सैकशफं न जातु विषमं भजेत् अजाविकं तु विषमं ज्येष्ठस्यैव विधीयते १९ यवी
यान्ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि समस्तत्र विभागः स्यादिति धर्मो व्यवस्थितः २० उ
पसर्जनं प्रधानस्य धर्मतो नोपपद्यते पिता प्रधानं प्रजने तस्माद्धर्मेण तं भजेत् २१ पुत्रः।
कनिष्ठो ज्येष्ठायां कनिष्ठायां तु पूर्वजः कथं धर्मविभागः स्यादिति चेत्संशयो भवेत् २२
एकं वृषभमुद्धारं संहरेत स पूर्वजः ततोपरे ज्येष्ठवृषास्तदूनानां स्वमातृतः २३ ज्येष्ठ
स्तु जातो ज्येष्ठायां हरेद्वृषभषोडशाः ततः स्वमातृतः शेषा भजेरन्निति धारणा २४

गग्रहणरूपेण न संबध्यते क्षेत्रजोपि पितृवदुद्धारेण पृथग्भाग्भवेत् प्रधानं तस्मात् पूर्वोक्तेनैव धर्मेण वि
भागव्यवस्थारूपेण पितृव्येन सह तं क्षेत्रजं विभजेदिति पूर्वस्यैव शेषः २१ पुत्र इति यदि प्रथमो
ढायां कनीयान्पुत्रो जातः पश्चादूढायां ज्येष्ठस्तदा तत्र कथं विभागो भवेदिति संशयो भवेत् किंतु
त्र उद्धारक्रमेण पुत्रस्य ज्येष्ठत्वमुत जन्मक्रमेणेति तदाह २२ एकमिति पूर्वस्यां जातः पूर्वजः प्र
थमं तावद्धस्ते अष्टमुद्धारं कुलमिति हस्तः सकनिष्ठोप्येकं श्रेष्ठं वृषभमुद्धारं गृह्णीयात् ततः श्रेष्ठवृषादन्ये य
स्तत्र श्रेष्ठवृषास्ते तस्याज्येष्ठिनेयान्मातृतज्जातानां कनिष्ठानां समेकैको भवतीति मातृक्रमेणोद्धार
क्रमेण ज्येष्ठाः २३ ज्येष्ठस्तु प्रथमोढायां पुत्रयोजातो जन्मना च भ्रातृभ्यो ज्येष्ठः स वृषभः षोडशो
यासां गवां तासां गृह्णीयात् पञ्चदश गावः एकश्च वृषभ इति मर्थः ततोनंतरं शेषमेव गृह्णीयुः जातास्तस्वमातृ

ज्येष्ठ इति ज्येष्ठकनिष्ठौ सर्वस्य धनस्य मध्यमोद्धारं गृह्णीयातां ज्येष्ठकनिष्ठव्यतिरिक्ता ये मध्यमास्तेषां मध्ये ज्ये-
ष्ठकनिष्ठतामनपेक्ष्य मध्यमस्योद्धारश्चत्वारिंशद्भागः प्रत्येकं दातव्यः मध्यमानां सर्वेषां ज्येष्ठकनिष्ठदेयभा-
गवैषम्यवारणार्थमिदं २४ सर्वेषामिति सर्वेषां धनप्रकाराणां मध्यात् श्रेष्ठं धनं तत् ज्येष्ठो गृह्णीयात्
सर्वद्रव्याच्च यद्वरमित्युक्तमप्यनूदितं समुच्चयबोधनाय यच्चैकमपि प्रकृष्टं द्रव्यं विद्यते तदपि ज्येष्ठ एव
गृह्णीयात् तथा दशतः पशूनामिति गोतमस्मरणात् दशभ्यो गवादिपशुभ्यः एकं श्रेष्ठं ज्येष्ठो लभेत
इदं ज्येष्ठो गुणवानितरे निर्गुणा इति विषयं सर्वेषां समगुणत्वे तु २५ उद्धार इति दशानां वरमिति योज्य।
मुद्धारश्च नाः साध्ये यजनादिस्वकर्मसंपन्नानां भ्रातॄणां ज्येष्ठस्य किंतु तत्रापि यत्किंचिदल्पमपि द्रव्यं पूजा-
करं ज्येष्ठाय देयं एवं च समगुणेषूद्धारप्रतिषेधदर्शनात् पूर्वं गुणाधिक्यापेक्षयोद्धारवैषम्यं बो-
द्धव्यमिति २६ एवमिति एवमुक्तप्रकारेण समुद्धृतविंशतिभागादिके धने अवशिष्टं धनं समभागा-

ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितं येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनं २४ स-
र्वेषां धनजातानामाददीताग्र्यमग्रजः यच्च सातिशयं किंचिद्दशतश्चाप्नुयाद्वरं २५
उद्धारो न दशस्वस्ति संपन्नानां स्वकर्मसु यत्किंचिदेव देयं तु ज्यायसे मानवर्धनं २६।
एवं समुद्धृतोद्धारे समानंशान्प्रकल्पयेत् उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना २७।
एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽनुजः अंशमंशं यवीयांस इति धर्मो व्यवस्थितः २८।
स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक् स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः

न्भागान्प्रकल्पयेत् विंशतिमभागादौ पुनरनुद्धृते वक्ष्यमाणभागकल्पना भवेत् २७ ए-
काधिकमिति एकांशाधिकमंशद्वयमिति यावत् ज्येष्ठपुत्रो गृह्णीयात् अधिकमर्धं यस्यांशस्य त-
मंशं ज्येष्ठानन्तरजातो गृह्णीयात् कनिष्ठाः पुनरेकैकमंशं गृह्णीयुरिति व्यवस्थितो धर्मः इदं च
ज्येष्ठतदनुजयोर्विद्यादिगुणवत्त्वात् कनिष्ठानां च निर्गुणत्वे बोद्धव्यं ज्येष्ठतदनुजयोराधिक्यदर्शनात्
२८ स्वेभ्य इति ब्राह्मणस्य सवर्णपत्न्यां जाताश्चत्वारो भ्रातरस्तज्जातापत्येभ्यः चतुरोंऽशान्हरेद्विप्र
इत्यादिना वक्ष्यमाणेभ्यो भागेभ्यश्चातुर्भागाच्चतुर्थभागं एवं कन्याभ्योऽनूढाभ्यो भगिनीभ्यो
यथा समोदर्या भगिनी सवर्णाः संस्कारार्थं प्रदद्युः तथा च याज्ञवल्क्यः असंस्कृतास्तु संस्का-
र्या भ्रातृभिः पूर्वसंस्कृतैः भगिन्यस्तु निजादंशाद्दत्वांशं तु तुरीयकं यदि भगिनीसंस्कारार्थं चतुर्भागं
दातुं नेच्छन्ति तदा पतिता भवेयुः एतेनैकजातीया वैमात्रेयपुत्रभगिनी सजातीयापि स्वादंशाद्भागि

म॰ स्मृ॰ टी॰ १२८

मातुरिति मातुर्दुहितृलं मृतायां कुमारीभाग एव स्यात् न पुत्राणां तत्र भागः कुमारी चानूढाभिप्रेता तु
स्याः सोदर्यः स्त्रीणां धनं दुहितृणां अपुत्राणां समप्रजानां च सपत्नीछाना च सपुत्र च मातामहस्य मृतस्य दौ
हित्र एव अकृतत्वात् पौत्रिके पक्षे समग्र धनं गृह्णीयात् १३४ दौहित्र इति दौहित्र एव प्रकृतत्वात्
पौत्रिके पक्षे एव तस्य मातामह धनग्रहणं मन्तव्यं नान्यजनक धनग्रहणं पिण्डदानार्थो यस्मात् स पितु
मातृपक्षे तत्रैव प्रसिद्धत्वात् अस्य पौत्रिकेय पुत्राणां रहित स्वजनकस्य समग्रं गृह्णीयात् स एव पितुर्मा
तामहाय द्वौ पिण्डौ दद्यात् पिण्डदानश्राद्धोपलक्षणार्थं पौत्रिकेय तेन जनक धनग्रहणे पिण्डदानं यामौ
हनिर्णयार्थं वचनं १३५ पौत्रेति पौत्रदौहित्रयोर्लोके धर्मक्रमेण कश्चिद्विशेषोऽस्ति यस्मात्तयोर्मातापि
तरौ तस्य देहादुत्पन्नाविति पूर्वस्यैवानुवादः १३६ पुत्रिकायामिति कृतायां पुत्रिकायां यदि तदनु
पुत्रोऽनन्तरं जायते तदा तयोर्विभागो भवेत् नोद्धारः पुत्रिकायुर्दयो यस्माज्ज्येष्ठाया अपि तस्य उद्धार
विषमे ज्येष्ठतानादरणीया १३७ अपुत्रायामिति अपुत्रायां पुत्रिकायां कथंचन मृतायां तदीयं धन

यत्तद्वा मातृपक्षाः पुत्रः पुत्रेण दुहितासमो तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् १३२ मातुस्तु यौतकं
यत्स्यात्कुमारीभाग एव सः दौहित्र एव च हरेदपुत्रस्याखिलं धनं १३३ दौहित्रो ह्यखिलं रिक्थमपुत्रस्य।
पितुर्हरेत् स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च १३४ पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्मतः
तयोर्हि मातापितरौ संभूतौ तस्य देहतः १३५ पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते समस्तत्र विभागः
स्याज्ज्येष्ठता नास्ति हि स्त्रियाः १३६ अपुत्रायां मृतायां तु पुत्रिकायां कथंचन धनं तत्पुत्रिकाभर्ता हरेतैवा।
विचारयन् १३७ अकृता वा कृता वापि यं विन्देत्सदृशात्सुतं पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनं १३८

178

न तद्धनं वा विचारयन् गृह्णीयात् पुत्रिकायाः पुत्रसमत्वेनापि अपत्नीरहितमृतपुत्रस्यैव पितुर्धनग्रहणं
असन्नोऽतन्निवारणार्थमिदं वचनं १३८ अकृतावेति अकृता वा कृता वेति पुत्रिकाया एवं द्वैविध्यं तत्र यदपत्यं
भवेदस्यां तन्मम स्यात्स्वधाकरमिति अभिध्याय कन्यादानकाले क्रियते सा कृता अभिसंधि
मात्रकृता वाग्व्यवहारेण न कृता सा अकृता तथा च गौतमः अभिसंधिमात्रात्पुत्रिकेत्येकेषामिति अ
त एव पुत्रिकाधर्मसंशयोपेति अविवादात्वं कृतपुत्रिके वा कृता अकृता वा पुत्रं सदृशान्नजातीयाद्वोढु
रुत्पादयेत्तेन दौहित्रेण पौत्रकार्यकरणेन तु पौत्रवान्मातामहः तस्मात्तस्मै स पिण्डं दद्यात् गोविं
दराजस्तु अकृतावेत्सपुत्रिके वड्हिताना तत्पुत्रो मातामहधनं पौत्रिके पद्रव मातामहाद्दिसत्वपि
अधिकारी माह तन्न पुत्रिकायाः पुत्रत्वं स्थात्वात् पुत्रिकापुत्रयोरत्सत्वेन तत्पुत्रयोस्तु सत्ता

पुत्रिकाविधि

मु॰ १२८

सदृशस्त्रीष्विति। समानजातीयस्त्रीषु जातानां पुत्राणां जातिगतविशेषाभावे सति मातृक्रमेण ज्यैष्ठ्यमपि तु जन्मक्रमेण ज्यैष्ठ्यमृषिभिरुच्यते जन्मज्येष्ठानां तु पूर्वोक्त एव विंशोद्धारादिरुद्धारो बोद्धव्यः। एवं मातृज्यैष्ठ्यस्य विहितप्रतिषिद्धत्वान्मोऽयं षड्ग्रहणग्रहणवद्विकल्पः स च गुणवन्निर्गुणतया प्राग्वहाणां गुरुलघुत्वादिवचनाद्व्यवस्थितो भवति। अत एव जन्मविद्यागुणज्येष्ठो ऽंशं दद्यपमात्रपादिति वृहस्पत्यादिभिर्जन्मज्येष्ठस्य विद्यागुणोत्कर्षेणोद्धारो लक्षणकः। अयं च निर्गुणस्य एकं वृषभमिति अन्यगुणस्य वृषभषोडशाद्व तिमातृज्येष्ठाय पत्नीनद्धारो बोद्धव्यं मातृज्येष्ठ्यविधेन्यूर्नानुवादमेधातिथिर्वेदत्र सम्यगाह यो विद्यानत्वं सममतं ज्येष्ठेनैव तत्र विभागे ज्येष्ठ्यं किंतु २६ जन्मज्येष्ठेनेति सुब्रह्मण्याख्या ज्योतिष्टोमाङ्गो मन्त्रः तत्र ह्वानं प्रयुज्यते तत्र प्रथमपुत्रेणापितरमाह्वयमाह्वानं क्रियते अमुकस्य पिता यजत एवमृषिभिः स्मृतं यमयोश्च गर्भे एककालनिषिक्तयोरपि जन्मक्रः-

सदृशस्त्रीषु जातानां पुत्राणामविशेषतः। न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते ॥ २५ ॥
जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम्। यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता ॥ २६ ॥
अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम्। यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम् ॥ २७ ॥
अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति ॥ २८ ॥
अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाः। विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः ॥ ३० ॥

मेणैव ज्येष्ठता स्मृता गर्भेष्विति बहुवचनं स्त्रीबहुत्वापेक्षया २७ अपुत्र इति अविद्यमानपुत्रो ऽनेन वक्ष्यमाणेन विधिना सुतां पुत्रिकां कुर्वीत यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरमिति संकल्पादिना वाक्येना मातामहप्रतिपत्तिरूपविधानेन दुहितरं पुत्रिकां कुर्वीत अत्र परकृतिरूपमनुवादमाह २८ अनेनेति दक्षः प्रजापतिः। अनेनोपादेयेन विधिना स्ववंशवृद्ध्यर्थमनेनाकारेण स्वात्मा दुहितरः पूर्वं पुत्रिकाः स्वयं कृतवान् कान्तमेषयते २९ ददाविति स दक्षो भावि पुत्रिका पुत्रलाभेन प्रीतात्मा सत्कारादिना सत्कृत्य दश पुत्रिका धर्माय त्रयोदश कश्यपाय सप्तविंशति सोमाय चन्द्रपत्नीनां नामौषधीनां च राज्ञे दत्ता नासत्कारवचनमप्येषामपि पुत्रिकाकरणे सत्कारे लिंगं दक्षेणान्यादि चव ह्रीनामपि पुत्रिकाकरणे न्यायकं ३० अपि वेति आत्मस्थानीयः पुत्रः आत्मा वै पुत्रनामासीति मन्त्रलिंगात् तत्समा च दुहिता तस्यामात्मायां तिष्ठन्त्यामन्यः कथं धनं हरेत् पुत्रिकायां पुत्रे पुत्रिकापतिरि-

म. स्मृ. टी. १९९

गोत्रेति गोत्रधनेजनककर्मसंबंधिनीदत्तकोनकदाचिद्गृह्णीयात् पिंडश्चगोत्ररिक्थानुगामीयस्यगोत्ररि
क्थेभजतेतस्यैवपिंडोदीयतेतस्मात्पुत्रंददतोजनकस्यस्वधापिंडश्राद्धादितत्पुत्रकर्तृकंनिवर्तते ४४
अनियुक्तेति योगुर्वादिनियोगंविनाजातोयश्चसपुत्रयानियोगेनापिदेवरादेःकामात्मुत्पादितःतौउ
भौजारजातोयत्रकामाभिलाषजौधनभागंनार्हतः ४५ नियुक्तायामिति नियुक्तायामपिस्त्रि
यांघृताक्तत्वनियोगेनकर्तव्यतांविनापुत्रोजातःसक्षेत्रिकस्यपितुर्धनंलब्धुंनार्हतियस्मात्सोपति
तेनोत्पादितःनियुक्तोयोविधिंहित्वायनेनपतितस्योक्तत्वात् ४६ हरेदिति तत्रनियुक्तायांयो
जातःक्षेत्रजःपुत्रःसऔरसइवधनंहरेत् तस्माद्यत्तस्यकारणंभूतंबीजंतत्क्षेत्रस्वामिनए

वुत्वो।

गोत्ररिक्थेजनयितुर्नहरेद्दत्त्रिमःक्वचित् गोत्ररिक्थानुगःपिंडोव्यपैतिददतःस्वधा ४४
अनियुक्तासुतश्चैवपुत्रिण्याप्तश्चदेवरात् उभौतौनार्हतोभागंजारजातककामजौ ४५
नियुक्तायामपिपुमान्नार्यांजातोविधानतः नचार्हःपैतृकंरिक्थंपतितोत्पादितोहिसः ४६
हरेत्तत्रनियुक्तायांजातःपुत्रोयथौरसः क्षेत्रिकस्यतुतद्बीजंधर्मतःप्रसवश्चसः ४७
धनंयोबिभृयाद्भ्रातुर्मृतस्यस्त्रियमेववा सोपत्यंभ्रातुरुत्पाद्यदद्यात्तस्यैवतद्धनं ४८

279

वतत्कार्यकरत्वात् अपत्यमपिचधर्मतःतदर्थमेतयवीयानुज्येष्ठभार्यायांपुत्रमुत्पादयेदि
दीत्यनेनक्षेत्रजस्यपितामहधनेपितृव्येनसहसमभागस्योक्तत्वात् गुणवान्क्षेत्रजस्यौ
रसवत्सोद्धारभागप्राप्त्यर्थमिदमौरसस्यतुल्यत्वाभिधानं ४७ धनमितियोमृतस्यभ्रातुः
स्थावरजंगमधनंपत्नीरक्षणार्थमथवासमर्पितंरक्षतावपुष्णीयात् सनियोगधर्मेणात
स्यांभ्रातुरुत्पाद्यापत्यांभ्रातुस्तद्धनंतस्यापत्यस्यैवदद्यात् एतच्चधनंयोबिभृयाद्भ्रातुरित्य
भिधानाद्विभक्तभ्रातृविषयंयवीयान्ज्येष्ठभार्यायामितित्वविभक्तविषयंसमभागाभि
धानात् ४८

उ. १९९

पुत्रेणेति पुत्रेणजातेन स्वर्गादिकान् प्राप्नोति पौत्रेण तेष्वेव चिरकालमवतिष्ठते तदनंतरं पुत्र।
स्य पौत्रेणादित्यलोकं प्राप्नोति अस्य च दायभागप्रकरणे विधानात् पितृद्वेन पत्न्यादिसद्भावे पुत्र
स्तत्तदभावे पौत्रस्येव पुत्रपुत्रसंतानाधिकारबोधनार्थं ३९ पुन्नाम्न इति यस्मात्पुन्नामधेयन
रकात्सुतः पितरं त्रायते तस्मात्त्राणादात्मनैव ब्रह्मणा पुत्र इति प्रोक्तः तस्मान्महोपकारकत्वा
त्तत्रस्य पुत्रत्वतः पुत्रसंतानस्य दायभागित्वमिति पूर्वश्लोकद्वयार्थमिदं ४० पौत्रेति दौहित्रः पुत्रि
कापुत्रः पौत्रदौहित्रयोर्लोके कश्चिद्विशेषो न संभाव्यते यस्माद्दौहित्रोऽपि मातामहं परलोके पौ
त्रवन्नरकान्निस्तारयति एतच्च पौत्रिकेयस्य पौत्रेण साम्यप्रतिपादनं पुत्रिकाकरणानंतरं जात
पौत्रेण सह तत्स्य भागबोधनार्थं ४१ मातुरिति पौत्रिकेयः प्रथमं मातुः पिंडं द्वितीयं पितुस्तृती
यं मातुः पितामहाय दद्यात् पित्रादीनां तु पितृमातामहायेत्युक्तत्वात् पितृक्रमेणैव पिंडदाने ४२

पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपं ३९
पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ४०
पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते दौहित्रोऽपि ह्यमुत्रैनं संतारयति पौत्रवत् ४१
मातुः प्रथमतः पिंडं निर्वपेत्पुत्रिकासुतः द्वितीयं तु पितुस्तस्यास्तृतीयं तत्पितुः पितुः ४२
उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्त्रिमः स हरेतैव तद्रिक्थं संप्राप्तोऽप्यन्यगोत्रतः ४३

उपपन्नमिति यत्राः पुत्राः रिक्थहराः पितुर्वित्तित्वाद्दायादत्राणामेव पितृद्रव्यहरत्वं वक्ष्यति द
शापरे तत्क्रमशः इति औरसक्षेत्रजाभावे दत्तकस्यापि पितृद्रव्यहरत्वं प्राप्तमेव अत एव सत्यप्यौर
से दत्तस्य सर्वगुणोपपन्नस्य पितृद्रव्यभागप्राप्त्यर्थमिदं वचनं यस्य दत्तकः पुत्रोऽध्ययनादि
सर्वगुणोपेतो भवति सोऽन्यगोत्रादागतोऽपि सत्यप्यौरसे पितृद्रव्यभागं गृह्णीयात् तत एव
कश्चौरसः पुत्रः पितुः सवर्णः प्रभुरित्यस्येव सर्वोत्कर्षाभिधानात्तेनास्य समभागित्वं कि
तु क्षेत्रजोक्तषष्ठभागित्वमेवास्य न्याय्यं गोविंदराजस्तु औरसक्षेत्रजाभावे सर्वगुणोपपन्नस्य
व दत्तकस्य पितृरिक्थभागित्वार्थमिदं वचनमित्यवोचत् तत्र कृत्रिमादीनां निर्गुणानामपि
च स्तरिक्थभागित्वं दत्तकस्य तत्र पृथक्पाठात्तस्यापि सर्वगुणोपपन्नस्यैव निर्गुणस्य न्याय्यता

म॰ स्मृ॰
टी॰
२८२

यद्यपीति यदि ब्राह्मणो द्विजातिस्त्रीषु सर्वासु विद्यमानपुत्रः स्यात् अविद्यमानपुत्रो वा तथापि शूद्रा
पुत्रायानंतराधिकारी यस्ते पुत्रदशमभागादधिकं धर्मतो न दद्यात् एवं शूद्रापुत्रविषये निषेधाद्
विद्यमानसजातिपुत्रस्य क्षत्रियावैश्यापुत्रौ सर्वरिक्थहरौ स्यातां १५४ ब्राह्मणेति ब्राह्मणक्षत्रि
यवैश्यानां शूद्रापुत्रो धनभाक् न भवति किं तु यदेवास्मै पिता दद्यात्तदेव तस्य धनं भवेदेवं च पूर्वो।
क्तो विभागनिषेधाद्विकल्पः सत्त्वगुणवद्गुणापेक्षः अगुणवान्नूनं शूद्रापुत्रविषयोऽयं दशमभाग
निषेधः १५५ समवर्णास्विति द्विजातीनां समानजातिभार्यासु ये पुत्रा जातास्ते सर्वे ज्येष्ठायोद्धारं।
किंचिद्दत्त्वावशिष्टं समं कृत्वा ज्येष्ठेन सहान्ये विभजेरन् १५६ शूद्रस्येति शूद्रस्य पुनः समानजातीयैव

यद्यपि स्यात्तु सत्पुत्रो यद्यपुत्रो विभावयेत् नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः १५४ ब्रा
ह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक् यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत् १५५
समवर्णासु ये जाताः सर्वे पुत्रा द्विजन्मनां उद्धारं ज्यायसे दत्त्वा भजेरन्नितरे समं १५६ शू
द्रस्य तु सवर्णैव नान्या भार्या विधीयते तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत् १५७
पुत्रान्द्वादश यानाह नृणां स्वायंभुवो मनुः तेषां षड्बंधुदायादाः षडदायादबांधवाः १५८

280

भार्या यदि च पुत्रे नोत्कृष्टापकृष्टा वा तस्यां च ये जातास्ते पुत्रशतमपि यदि तदा समभागा एव भवेयुः
१५७ पुत्रानिति यान्द्वादश पुत्रान्हिरण्यगर्भापत्यं मनुराह तेषां मध्यादाद्याः षड्बांधवाः गोत्रदाया
दाश्च तस्माद्बांधवत्वेन सपिंडसमानोदकानां पिंडोदकदानादि कुर्वंति अनंतराभावे च गोत्रदायं
गृह्णंति षट् रिक्थहराः पितुरिति द्वादशपुत्राणामेव पितृरिक्थभाक्त्वस्य वक्ष्यमाणत्वात् उ
त्तरे षट् गोत्रधनहरा न स्युर्बांधवास्तु भवंति ततश्च बंधुकार्यमुदकदानादि कुर्वंति मेधाति
थिस्तु षडदायादबांधवा इति उत्तरषट्कस्यादायादत्वं सबांधवत्वं चाह तत्र बौधायनेन वै पुनस्या
भिहितत्वात् तदाह कानीनं च सहोढं च क्रीतं पौनर्भवं तथा स्वयंदत्तं निषादं च गोत्रभाजः प्रचक्षते १५८

कु॰
२८०

यानियुक्तेति यान्त्रीगुर्वादिभिरनुज्ञाता देवरादन्यतो वा सपिंडादपि उत्पन्नस्तस्मादपेत सपदि कामजो भ
वति नदातमरिक्थभागमन्वाद्यो वदंति अकामज एव रिक्थभागी मद्यव्याहृतो नारदेनन्तु वान्
मुखे परिहृत्य गात्रैर्गात्राण्यसंस्पृशन् इत्येतद्वृशेषे च संतानार्थं न कामत इति ४९ एतदिति
समानजातीयासु स्त्रीषु बह्वीषु उत्पन्नानां पुत्राणां विभागः श्रूणुत ५० ब्राह्मणस्येति ब्राह्मणस्य
मुदिक्रमेण ब्राह्मण्यां याश्च तस्तो भार्या भवेयुस्तासां पुत्रेषु उत्पन्नेषु वक्ष्यमाणो विभागविधि
र्मन्वादिभिः स्मृतः ५१ कीनाशइति कीनाशो भूमिकर्षकः गवां सेक्ता वृषभो यानं मन्वादिषु
तं कारो अंगुलीयकादिकं गृहं च प्रधानं यावत् श्रायादे यालेया मेकः प्रधानभूतो याइमेते ब्रा

यानियुक्तान्यतः पुत्रं देवराद्वापि वाप्नुयात् तं कामजमरिक्थीयं मिथ्योत्पन्नं प्रच
क्षते ४९ एतद्विधानं विज्ञेयं विभागस्यैकयोनिषु बह्वीषु चैव जातानां।
नानास्त्रीषु निबोधत ५० ब्राह्मणस्यानुपूर्व्येण चतस्रस्तु यदि स्त्रियः ता
सां पुत्रेषु जातेषु विभागोयं विधिः स्मृतः ५१ कीनाशो गोवृषो यानमलं।
कारश्च वेश्म च विप्रस्यौद्धारिकं देयमेकांशश्च प्रधानतः ५२ त्र्यंशं दा।
दाहरेद्विप्रो द्वावंशौ क्षत्रियासुतः वैश्यपुत्रो हरेद्द्व्यंशमंशं शूद्रासुतो हरेत् ५३

ह्मणीपुत्रस्योद्धारार्थं वक्ष्यमाणरीत्या विभजनीयं ५२ त्र्यंशमिति त्रीनंशान्ब्राह्मणीपुत्रो धनाद्
गृह्णीयात् द्वौ क्षत्रियापुत्रः सार्द्धं वैश्यापुत्रः अंशं शूद्रासुतः एवं च यत्र ब्राह्मण्यां क्षत्रियापुत्रौ द्वावे
व विद्यते तत्र पंचधा कृते धने त्रयो भागा ब्राह्मणस्य द्वौ क्षत्रियापुत्रस्य अनयैव दिशा ब्राह्मणीक्ष
त्रियावैश्याशूद्राणां वैकैकस्या द्वित्रादि पुत्रादौ च कल्पना कार्या ५३ सर्वमिति तद्धा सर्वं रिक्थजातं प्रका
रेमनुद्धृतोद्धारं दशधा धा कृत्वा विभागधर्मज्ञो धर्मो स्नपेतं विभागं वक्ष्यमाणविधिना कुर्वीत च
तुरोंशानिति चतुरो भागान्ब्राह्मणीपुत्रो गृह्णीयात् त्रीणि क्षत्रियापुत्रो द्वौ वैश्यापुत्रः एकं शूद्रापुत्रः अ
थापि ब्राह्मण्याः क्षत्रियापुत्रसद्भावे सप्तधा धने कृते चत्वारो भागा ब्राह्मण्याः त्रयः क्षत्रियापुत्रस्य

एक इति व्याध्यादिना प्रथममौरसपुत्राभावे क्षेत्रजादिषु पश्चाद्दौषध्याभ्यासादिना विगतव्याधेरौर
से उत्पन्ने सतीदं उच्यते औरस एवैकः पितृधनस्वामी शेषाणां पुनः क्षेत्रजव्यतिरिक्तानां तच्छ
स्त्रादेव स्वप्रमाणत्वात् पापसंबन्धपरिहारार्थं ग्रासाच्छादनं दद्यात् १६३ षष्ठमिति औरस
पुत्रः पितृसंबन्धिदायं विभजन्क्षेत्रजस्य ततः षष्ठमंशं पंचमांशं वा दद्यात् निर्गुणसगुणापेक्ष
श्चायं विकल्पः १६४ औरस इति पितृधनस्य भागिनौ औरसक्षेत्रजौ पुत्रावुक्तप्रकारेण पितृध
नहरौ स्यातां अन्ये पुनर्दत्तकादयः पुत्रा गोत्रभाजो भवंति पूर्वाभावे परः पर एवं क्रमेण धनांशं
भागहराश्च १६५ स्व इति स्वभार्यायां कन्यावस्थायामेव कृतविवाहसंस्कारायां स्वयमुत्पादये
त् तं पुत्रं औरसं मुख्यं विद्यात् सवर्णायां संस्कृतायां स्वयमुत्पादितमौरसं विद्यादिति बौधाय
नदर्शनात् सजातीयायामेव स्वयमुत्पादित औरसो ज्ञेयः य इति यो मृतस्य नपुंसकस्य च स्व।

एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजावनं १६४
षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् औरसो विभजन्दायं पित्र्यं पंचममेव वा १६५
औरसक्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादयेत्तु यं १६६
तमौरसं विजानीयात्पुत्रं प्रथमकल्पितं यः तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा
स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः माता पिता वा दद्यातां यमद्भिः पुत्रमापदि
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः १६८

विरोधिव्याध्युपेतस्य वा भार्यायां घृताक्तत्वादिनियोगधर्मेण गुरुनियुक्तायां जातः स क्षेत्रजः पु
त्रो मन्वादिभिः स्मृतः मातेति शुक्रशोणितसंभवः पुरुषो मातापितृनिमित्तकः तस्य प्रदानवि
क्रयपरित्यागेषु मातापितरौ प्रभवत इति वसिष्ठस्मरणात् मातापितरौ परस्परानुज्ञया यं पुत्रं प्र
तिगृहीतुः समानजातीयं तस्य च पुत्राभावनिमित्तायामापदि प्रीतियुक्तं न भयादिना उदकपूर्वं द
द्यातां स दत्रिमाख्यः पुत्रो ज्ञेयः सदृशमिति यं पुनः समानजातीयं पित्रोः पारलौकिकश्राद्धा।
दिकरणाकरणाभ्यां गुणदोषौ भवतः तमेवमादि पुत्रगुणैश्च मातापित्रोराराधनादिभिः ।
युक्तं पुत्रं कुर्यात्स कृत्रिमाख्यः पुत्रो बोद्धव्यः १६८

181

उ॰
२८२

औरस इति औरसादयो वक्ष्यमाणलक्षणाः षट् रिक्थभाजो बांधवाश्च भवंति ५९ कानीन
इति कानीनादयो वक्ष्यमाणलक्षणाः षट् गोत्ररिक्थभाजो न भवंति बांधवाश्च भवंतीति
व्याख्यानं औरसेन सह क्षेत्रजादीनां पाठात्तत्तुल्यत्वशंकायां तन्निरासार्थमाह ६० यादृशमि
ति तृणादिनिर्मितकुप्लवादिभिरुदकं तरन्यथाविधं फलं प्राप्नोति तथाविधमेव कु
पुत्रैः क्षेत्रजादिभिः पारलौकिकं दुःखमुत्तरन्प्राप्नोतीत्यनेन क्षेत्रजादीनां मुख्यौरसपुत्रवत्सं
पूर्णकार्यकरणक्षमत्वं न भवतीति दर्शितं ६१ यद्येकमिति अपुत्रेण परक्षेत्रे नियोगो
त्पादितः सुतः उभयोरप्यसौ रिक्थी पिंडदाता च धर्मत इति याज्ञवल्क्योक्तविषये यदा क्षे

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च । गूढोत्पन्नोऽपविद्धश्च दायादा बांधवाश्च षट्
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयंदत्तश्च शौद्रश्च षडदायादबांधवाः ६०
यादृशं फलमाप्नोति कुप्लवैः संतरञ्जलं । तादृशं फलमाप्नोति कुपुत्रैः संतरंस्तमः
यद्येकरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ । यस्य यत्पैतृकं रिक्थं स तद्गृह्णीत नेतरः ६१

त्रिकस्य पितुः क्षेत्रजानंतरमौरसः पुत्रो भवति तदा तावौरसक्षेत्रजावेकरिक्थिनावेकस्य पि
तुर्यद्यपि रिक्थार्हौ भवेतां तथापि स्वस्वजनकसंबंधि धनं स्वतदेव गृह्णीयान्न क्षेत्रजः क्षेत्रि
कस्य पितुः यत्तु वक्ष्यति षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् औरसो विभजन्दायमिति तत्तु
पुत्रवत्प्रतिनिधिविषयं यत्तु याज्ञवल्क्येनोभयसंबंधिरिक्थहरत्वमुक्तं तत् क्षेत्रिकपितुरौरसपु
त्राभावे बोद्धव्यं मेधातिथिगोविंदराजौ तु औरसमुत्पन्ने प्रकाशं पुत्रं चाविशेषेणोक्तमिमं श्लोकं
व्याचक्षाते तत्र अनियुक्तापुत्रस्य क्षेत्रजत्वादनियुक्तासुतश्चैवेत्यनेन तस्य रिक्थाय
हरणनिषेधाद्यद्येकरिक्थिनाविंत्यन्वयात् ६१

म· स्मृ· टी· २५२

782

मातेत्यादि यो मृतमातापितृकः त्यागोचितकारणं विनाद्वेषादिना वा ताभ्यां त्यक्तो आत्मानं यस्मै द
द्यात्तस्य स्वयंदत्ताख्यः पुत्रो मन्वादिभिः स्मृतः १७६ यं ब्राह्मणस्त्विमादि विन्नास्वेषविधिः स्मृ
त इति याज्ञवल्क्यवचनात् परिणीतायामेव शूद्रायां ब्राह्मणः कामार्थं पुत्रं जनयेत् स जीवन्नेव
व शवतुल्य इति पारशवः स्मृतः यद्यपि स पितुरुपकारार्थं श्राद्धादिकमेकरोत्येव तथाप्यसंपू
र्णोपकारत्वात् शवव्यपदेशः ७७ दास्यामिति ध्वजाहृतायामुक्तलक्षणायां दासस्य संबंधिन्यां दा
स्यां वा यः शूद्रस्य पुत्रो जायते स पित्रा परिणीतापुत्रैः समानभागो भवेत् भवतीति अनुज्ञात
स्तु स भागं लभत इति शास्त्रव्यवस्था नियता ७९ क्षेत्रजादीनिति एतानन्तरोक्तान्क्षेत्र
जादीनेकादश पुत्रान्पुत्रोत्पादनविधिनो यः पुत्रकर्तव्यश्राद्धादिलोपश्च मा भूदित्येवमर्थं पुत्र

मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात्। आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृतः १७६
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतं। स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः ७७
दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत्। सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः
क्षेत्रजादीन्सुतानेतानेकादश यथोदितान्। पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः
य एतेऽभिहिताः पुत्राः प्रसंगादन्यबीजजाः। यस्य ते बीजतो जातास्तस्य ते नेतरस्य तु ८० ।
भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत्। सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ८१

प्रतिच्छन्दकान्मुनय आहुः ७९ य एत इति य एते क्षेत्रजादयोऽन्यबीजोत्पन्नाः पुत्रा औरसप्रसं
गेनोक्तास्ते यद्बीजोत्पन्नास्तस्यैव पुत्रा भवन्ति न क्षेत्रिकादेरिति सत्यौरसे पुत्रिकायां च सत्यां न ते
पुत्रप्रतिनिधयः कर्तव्या इत्येवंपरमिदं अन्यबीजा एकादश पुत्रा यल्लक्षणं पुत्रबीजजा
तावपि यो न भवशोऽत्र न कर्तव्यो अत एव बृहस्पतिः आज्यं विना यथा तैलं सद्भिः प्रतिनिधिः कृतः
तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना ८० भ्रातॄणामिति भ्रातॄणामेकमातापितृकाणां मध्ये
एकः पुत्रवान्भवति अन्ये च पुत्ररहितास्तदा तेनैकेन पुत्रेण सर्वे ते भ्रातरः पुत्रवन्तो मनु
राह न तस्मात् तस्मिन्सति अन्यपुत्रप्रतिनिधयो न कर्तव्याः स एव पिण्डदो रिक्थहरश्च भवतीत्यनेन
नोक्तं न तच्च पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा तत्सुता इत्यादि याज्ञवल्क्यानुशासना

उ· २५२

उत्पद्यत इति यस्य गृहे अवस्थितायां भार्यायां पुत्र उत्पद्यते सजातीयोयं भवति ज्ञाने पि कस्मात्पुरुषाद्वि
शेषाज्ज्ञातो सावित्रिन ज्ञायते स गृहे अप्रकाशमुत्पन्नत्वात्स पुत्रः स्याद्यदीयभार्यायां जातः १६९ मा
तेति मातापिताभ्यां मुक्तं उभयोरन्यतरस्य वा ऽन्यतरेण वा मुक्तं यं पुत्रं स्वीकुर्यात् सोपविद्धाख्य
पुत्र उच्यते १७० पितृवेश्मनीति पितृगृहे यं पुत्रं अप्रकाशं कन्या जनयेत् तं कन्यासमुद्भवं कन्या
परिणेतुः पुत्रं नाम्ना कानीनं वदेत् १७१ या गर्भिणीति या गर्भवती ज्ञाताज्ञातगर्भा वा परिणीयते
तस्यां जातः परिणेतुः पुत्रो भवति सहोढ इति व्यपदिश्यते १७२ क्रीणीयादिति योधनी पुत्रा

उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः १६९ मा
तापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते १७० पितृ
वेश्मनि कन्या तु यं पुत्रं जनयेद्रहः तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवं १७१ या ग
र्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती वोढुः स गर्भो भवति सहोढ इति चोच्यते १७२ ।
क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् स क्रीतकः सुतस्तस्य सदृशोसदृशोपि वा
या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते १७४ सा
चेदक्षतयोनिः स्याद्गतप्रत्यागतापि वा पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति १७५

यो मातापित्रोः सकाशात् यं क्रीणीयात् स क्रीतकस्तस्य पुत्रो भवति क्रेतुर्गुणैस्तुल्यो हीनो वा भ
वेत् न तु जातितः सादृश्यं वैसादृश्यं सजातीयस्यैव यतो क्तं सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिरिति याज्ञवल्क्ये
न सर्वेषामेव पुत्राणां सजातीयत्वाभिधानात् तेन मानवेपि शूद्रव्यतिरिक्ताः पुत्राः समानजा
तीयाः सर्वे बोद्धव्याः १७३ या पत्या चेति या भार्या परित्यक्ता मृतभर्तृका वा स्वेच्छया अन्यस्य पु
नर्भार्या भूत्वा पुत्रमुत्पादयेत्स उत्पादकस्य पौनर्भवः पुत्र उच्यते १७४ सा चेदिति सा स्त्री यद्यक्ष
तयोनिः सती अन्यमाश्रयेत तदा तेन पौनर्भवेन भर्त्रा पुनः संस्कारं विवाहाख्यमर्हति य
द्वा कौमारं पतिमुत्सृज्य अन्यमाश्रित्य तमेव पुनः प्रत्यागता भवति तदा तेन कौमारेण भर्त्रा पुन

म-स्मृ-टी-
२८३

अनंतरमिति अस्य वचनस्यौरसादिसपिंडमात्रविषयत्वे वैयर्थ्यमेव स्यात् ततश्चानंतरपत्न्यादीनां दायग्रहणार्थ
मिदं सपिंडमध्यात्सन्निकृष्टभावो यः सपिंडः पुमान्स्त्री वा तस्य मृतधनं भवति तत्रैवमौरसः पुत्रस्तत्तुल्यत्वात् स एव
मृतपितृधनेऽधिकारी तेन गुणवद्दत्तकपौत्रप्रपौत्राः पंचमं षष्ठं वा भागं दद्यात् तेन नादिपुत्राणां संवर्द्धनमा
त्रं कुर्यात् औरसाभावे पुत्रिका तत्पुत्रश्च दौहित्र एव च रुदेवपुत्रस्यापि विलंधनमित्युक्तत्वादौरसपुत्ररहित एव तदा
पुत्रो विवक्षितः तदभावे क्षेत्रजादय एकादश पुत्राः क्रमेण पितृधनाधिकारिणः परिणीतशूद्रापुत्रश्च दश
मभागमात्राधिकारी नाधिकं दशमाद्दद्यात् शूद्रापुत्राय स्नेहात् दशमभागावशिष्टं धनं सन्निकृष्टसपिंडो गृह्णीया
त् त्रयोदशपुत्राभावे पत्नी सर्वभर्तृधनभागिनी यदाह याज्ञवल्क्यः पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा तत्सुतो
गोत्रजो बंधुशिष्यसब्रह्मचारिणः एषामभावे पूर्वस्य धनभागुत्तरोत्तरः स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः
बृहस्पतिरप्याह आम्नाये स्मृतितंत्रे च लोकाचारे च सूरिभिः शरीरार्धं स्मृता जाया पुण्यापुण्यफले समा यस्य नोप
रता भार्या देहार्धं तस्य जीवति जीवत्यर्धशरीरे तु कथमन्यः स्वमाप्नुयात् सकुल्यैर्विद्यमानैस्तु पितृमातृसनाभिभिः

अनंतरः सपिंडाद्यस्तस्य तस्य धनं भवेत् अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा। ८७

783

अपुत्रस्य प्रमीतस्य पत्नी तद्भागहारिणी पूर्वं प्रणीताग्निहोत्रं मृते भर्तरि तद्धनं विंदेत्पतिव्रता नारी धर्म एष सनातनः
जंगमं स्थावरं हेम कुप्यं धान्यं तथांबरं आदाय दापयेच्छ्राद्धं मासषाण्मासिकादिकं पितृव्यगुरुदौहित्रान्भर्तुः स्व
स्त्रीयमातुलान् पूजयेत्कव्यपूर्ताभ्यां वृद्धानाथातिथीन्स्त्रियः [illegible] तत्सपिंडा बांधवा वा ये तस्याः
परिपंथिनः हिंस्युर्धनानि तान् राजा चौरदंडेन नाशयेत् वृद्धमनुः अपुत्रा शयनं भर्तुः पालयंती व्र
ते स्थिता पत्न्येव दद्यात्पिंडं तत्कृत्स्नमंशं लभेत सा पत्नी तत्स्त्रीणां जीवनं दद्यादिति संवर्द्धनमात्रव
चनं तत्तु दुःशीला धार्मिका सविकारयौवनस्थपत्नीविषयं अतो यन्मेधातिथिना पत्नीनामंशभागित्वं
निषिद्धं तदसंबद्धं पत्नीनामंशभागित्वं बृहस्पत्यादिसंमतं मेधातिथिर्निराकुर्वन्न प्रीणाति सतां मनः पत्न्यभावेऽपु
त्रिका पितुर्दुहिता तदभावे पिता माता च तयोरभावे सोदर्यभ्राता तदभावे तत्सुतः तदभावे मातृपितृव्यदत्तायोऽपि
तृमाता हरेद्धनमिति वचनप्रमाणत्वात् पितृमाता तदभावे अन्योऽपि सन्निकृष्टसपिंडो मृतधनं गृह्णीयात् त
था पितामहसंतान एवमन्यदप्यूह्यं अत ऊर्द्धं सपिंडसंतानाभावे समानोदका आचार्यशिष्यः क्रमेण।

उ-
२८३

सर्वासामिति एकपतिकानां सर्वासां स्त्रीणां मध्ये यद्येका पुत्रवती स्यात्तदा तेन पुत्रेण सर्वास्ताः पुत्रयु-
क्ता मनुराह तत्तश्च सपत्नीपुत्रे सति स्त्रियाः न दत्तकादिपुत्राः कर्तव्या इत्येतद्दर्श्यमिदं ८२ श्रेयस इति
औरसादीनां सर्वेषां पुत्राणां प्रकृतत्वात् औरसादीनेवोपक्रम्य तेषां पूर्वः श्रेयान् स एव दायहरः स
चान्यान्बिभृयादिति विष्णुवचनाच्च औरसादीनां पुत्राणां पूर्वपूर्वाभावे परः परो रिक्थमर्हति पू-
र्वसद्भावे परः संवर्द्धनं एव लभेत् एवं च सिद्धे पुत्रत्वे शूद्रापुत्रस्य द्वादशपुत्रमध्ये पाठः क्षेत्रजादि-
सद्भावे धनानर्हत्वज्ञापनार्थः तेन सार्थकः अन्यथा तत्त्रिपादेश्या पुत्रवज्ज्ञौरसत्वात् क्षेत्रजादि-
सद्भावेपि धनं लभेत पूर्वस्य परसंवर्द्धनमात्रं चापवादेतरविषये द्रष्टव्यं क्षेत्रजगुणवत्त्वे तु कल्पः पञ्च-
मषष्ठं वा भागमौरसो दद्यादिति विहितत्वात् यदि तु समानरूपा पत्नीभेदाद्बहवः पुत्रा भवंति

सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत् सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ८२
श्रेयसः श्रेयसोऽलाभे पापीयान्रिक्थमर्हति बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः ८२
न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः पिता हरेदपुत्रस्य रिक्थं भ्रातर एव च ८४ त्रया-
णामुदकं कार्यं त्रिषु पिंडः प्रवर्तते चतुर्थः संप्रदातैषां पंचमो नोपपद्यते ८५

तदा सर्वं एव विभज्य रिक्थं गृह्णीयुः ८२ नेति न सहोदरभ्रातरो न पितरः किंत्वौरसाभावे
क्षेत्रजादयो गौणपुत्राः पितृरिक्थहरा भवंतीति अनेनोच्यते औरसस्थले क एवौरसः पुत्रः इत्य-
नेनैव सिद्धत्वाद्विद्यमानस्याप्यपुत्रस्य पत्नीदुहितृरहितस्य च पिता धनं गृह्णीयात् तेषां भ्रात-
रो धनं गृह्णीयुरेतच्चानंतरं प्रपंचयिष्यामः ८४ इदानीं क्षेत्रजादीनामपि पितापितामहादिधने-
प्यधिकारं दर्शयति त्रयाणामिति त्रयाणां पित्रादीनामुदककार्यं त्रिष्वेव च तेभ्यः पिंडो
देयश्चतुर्थश्च पिंडोदकयोर्दाता पंचमस्यात्र संबंधो नास्ति तस्माद्युक्तमपुत्रपितामहधने गौ-
णपुत्राणामधिकारः औरसपुत्रपौत्रयोः पुत्रेण लोकान्जयतीत्यनेनैवापुत्रपितामहध-
नभागित्वमुक्तं ८५

म॰स्मृ॰
टी॰
१८४

अध्यग्नीति। अव्ययं विभक्तिसमीपेत्यादिना सूत्रेण समीपार्थेऽव्ययीभावः। विवाहकाले अग्निसन्निधौ य
त्पित्रादिदत्तं तदध्यग्नि स्त्रीधनं तदाह कात्यायनः। विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसन्निधौ। तदध्यग्नि
कृतं सद्भिः स्त्रीधनं परिकीर्तितं। यत्पुनः पितृगृहाद्भर्तृगृहं नीयमानया लब्धं तदध्यावहनिकं तथा च कात्या
यनः। यत्पुनर्लभते नारी नीयमाना हि पैतृकात्। अध्यावहनिकं नाम तत्स्त्रीधनमुदाहृतं। प्रीतिहेतुक
कर्मणि श्वश्रूश्वशुरादिदत्तं तथा भ्रात्रा मात्रा च पित्रा च समर्पितं यद्दत्तं एवं षट्प्रकारकं स्त्रीधनं स्मृतं १९४ अन्वा
धेयं च। अन्वाधेयं च व्याख्यातं कात्यायनेन। विवाहात्परतो यत्तु लब्धं भर्तृकुले स्त्रिया। अन्वाधेयं तदुक्तं तु
लब्धं पितृकुलेन वा। विवाहादूर्ध्वं भर्तृकुले पितृकुले च स्त्रिया लब्धं भर्त्रा प्रीतेन च यद्दत्तं अध्यग्न्यादि पूर्वोक्तं तच्च
तद्भर्तरि जीवति मृतायाः स्त्रियाः सर्वं धनं तदपत्यानां भवति १९५ ब्राह्मेति ब्राह्मादिषु पंचविवाहेषूक्त

अध्यग्न्यध्यावहनिकं दत्तं च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतं १९४ अन्वाधेयं च यद्दत्तं
पत्या प्रीतेन चैव यत्। पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत् १९५ ब्राह्मदैवार्षगांधर्वप्राजापत्ये
षु यद्वसु। अप्रतीतायामप्रजसि भर्तुरेव तदिष्यते १९६ यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु। अप्रजा
यामप्रजसि मातापित्रोस्तदिष्यते १९७ स्त्रियां तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन। ब्राह्मणी तद्धरेत्कन्या त
दपत्यस्य वा भवेत् १९८ न निर्हारं स्त्रियः कुर्युः कुटुंबाद्बहुमध्यगात्। स्वकादपि च वित्ताद्धि स्वस्य भर्तुर
नुज्ञया १९९ पत्यौ जीवति यः स्त्रीभिरलंकारो धृतो भवेत्। न तं भजेरन्दायादा भजमानाः पतन्ति ते २००

लक्षणोपेतेषु यत्स्त्रियाः षड्विधमपि धनं तदनपत्यायां मृतायां भर्तुरेव मन्वादिभिरिष्यते १९६ यत्त्विति
यत्पुनः स्त्रियाः आसुरपैशाचेषु उक्तलक्षणेषु षड्विधमपि धनं तदनपत्यायां मृतायां मातापित्रोरिष्यते
१९७ स्त्रियामिति यत्पुनः स्त्रियाः ब्राह्मणस्य नानाजातीयासु पत्नीषु सतीषु यादृशि स्त्रियामनपत्यायां पुत्रि
कायां मृतायां तस्याः पितृदत्तं धनं सजातिविजातीयसापत्न्यकन्यापुत्रसद्भावेऽपि ब्राह्मणी सापत्नेयी क
न्या गृह्णीयात् तदभावे तदपत्यस्य तद्धनं भवेत् १९८ नेति भ्रात्रादिवर्गसाधारणत्वात् कुटुंबधना
द्बहुमध्यगात् स्त्रीभिरात्मालंकारार्थं धनसंचयो न कर्तव्यः नापि भर्तुः स्वकीयाद्वित्तात् विना भर्तुराज्ञया धनादपि कार्यं
ततश्च नेदं स्त्रीधनं १९९ पत्याविति भर्तरि जीवति तदनुमत्या योऽलंकारः स्त्रीभिः धृतः तस्मि
न्मृते विभागकाले पुत्रादयो न विभजेरन् भजमानाः पतिता भवन्ति २००

उ॰
१८४

सर्वेषामिति सर्वेषामभावे तु इति वक्तव्ये सर्वेषामप्यभावे तु इति यदुक्तं तेन तत्सब्रह्मचार्यादेरपि धनहारित्वार्थं सर्वाभावे ब्राह्मणा वेदत्रयाध्यायिनोऽपि बाह्याभ्यंतरशौचयुक्ता जितेन्द्रियाश्च धनहारिणो भवन्ति त एव च पिंडदाः तथा सति धनिनो मृतस्य श्राद्धादिधर्महानिर्न भवति ८८ अहार्यमिति ब्राह्मणसंबंधि धनं न राजा कदाचिद्गृह्णीयादिति शास्त्रमर्यादा किंतु तत्तद्गुणब्राह्मणाभावे ब्राह्मणमात्रेभ्योऽपि देयं क्षत्रियादिधनं पुनः पूर्वोक्तरिक्थहराभावे राजा गृह्णीयात् ८९ संस्थितस्येति अनपत्यस्य मृतस्य भार्या समानगोत्रात् पुंसो गुरुनियुक्ता सती नियोगधर्मेण पुत्रमुत्पादयेत् तस्मिन्मृतविषये यत्किंचित् द्रव्यजातं भवेत्तत्तस्मिन्पुत्रे समर्पयेत् देवराद्वा सपिंडाद्वेत्युक्तत्वात् सगोत्रनियोगोपलक्षणार्थं जातस्य रिक्थभागित्वार्थमिदं ९० द्वौ त्विति पत्यकरिक्थिनोस्त्रा

सर्वेषामप्यभावेन ब्राह्मणाः रिक्थभागिनः। त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते॥
अहार्यं ब्राह्मणद्रव्यं राजा नित्यमिति स्थितिः। इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः॥ ८९
संस्थितस्यानपत्यस्य सगोत्रात्पुत्रमाहरेत्। तत्र यद्रिक्थजातं स्यात्तत्तस्मिन्प्रतिपादयेत्॥
द्वौ तु यौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने। तयोर्यद्यस्य पित्र्यं स्यात्तत्स गृह्णीत नेतरः॥ ९१
जनन्यां संस्थितायां तु समं सर्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः॥ ९२
यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्या धनात्किंचित्प्रदेयं प्रीतिपूर्वकम्॥ ९३

द्वाविति औरसक्षेत्रजयोः सुतयोः इदं तु औरसपौनर्भवविषयं यदा कश्चिदौरसा मृतभर्तृकत्वाद्वा त्यागपतनाद्वा यास्वामिधनं स्वीकृत्य पौनर्भवभर्तुः सकाशात्पुत्रांतरं जनयेत्तस्यापि च पौनर्भवस्य मृतत्वात्तद्रिक्थहरांतराभावात् धनं गृहीतवती पश्चात्तौ द्वाभ्यां जातौ यदि विवदेयातां मातृहस्तगतधनेन तदा तयोर्यस्य जनकसंबंधि धनं स एव गृह्णीयात् न त्वपितृजोऽन्यजनकस्य ९१ जनन्यामिति मातरि मृतायां सोदर्यभ्रातरो भगिन्यश्च सोदर्या अनूढा मातृधनं समं कृत्वा गृह्णीयुः ऊढास्तु धनानुरूपसम्मानं लभंते तदाह बृहस्पतिः स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी अप्रत्ता चेत्समूढा तु लभते मानमात्रकं ततश्चानूढानां मातृधने भ्रातृणां समभागित्वात्तयोर्भागो देयः ९२ तासामिति

अनुपघ्नन्निति पितृधनानुपघातेन यत्कृष्यादिक्लेशेनार्जयेत्तत्स्वचेष्टाप्राप्तमनिच्छन्भ्रातृभ्यो दातुं नार्हति
९ पैतृकमिति यत्पुनः पितृसंबंधिधनं तेन पित्रा सामर्थ्याभावेनोपेक्षितत्वादनवाप्तं पुत्रः स्वशक्त्या प्राप्नुयात् तत्स्व
यमर्जितमनिच्छन्पुत्रैः सह न विभजेत् १० विभक्ता इति पूर्वं सोदर्या ये निरूह्यावाविभक्ता भ्रातरः पश्चा
देकीकृत्य धनं सह जीवंतो यदि पुनर्विभागं कुर्वंति तदा तत्र समो भागः कार्यः ज्येष्ठस्योद्धारो न देयः ११
येषामिति येषां भ्रातॄणां मध्ये कश्चिद्विभागकाले प्रव्रज्यादिना स्वांशाद्धीयेत मृतो वा भवेत् न तस्य भा
गो लुप्यते किंतु १२ सोदर्या इति सोदर्या भ्रातरः समागम्य संहिता भगिन्यश्च सोदर्यास्तमंशं कृत्वा
विभजेरन् सोदर्याणां सापत्न्यानामपि मध्ये मिथः कृतधनत्वेनैकयोगक्षेमास्ते विभजेरंस्तु सर्वे सो

अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जितं स्वयमीहितलब्धं तन्नाकामो दातुमर्हति ९ पैतृ
कं तु पिता द्रव्यमनवाप्तमवाप्नुयात् न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितं १० विभक्ताः सह
जीवंतो विभजेरन्पुनर्यदि समस्तत्र विभागः स्याज्ज्येष्ठ्यं तत्र न विद्यते ११ येषां ज्येष्ठः क
निष्ठो वा हीयेतांशप्रदानतः म्रियेतान्यतरो वापि तस्य भागो न लुप्यते १२ सोदर्या
विभजेरंस्तं समेत्य सहिताः समं भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः १३ यो
ज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीयसः सोऽज्येष्ठः स्यादभागश्च नियंतव्यश्च राजभिः १४
सर्व एव विकर्मस्था नार्हंति भ्रातरो धनं न चादत्त्वा कनिष्ठेभ्यो ज्येष्ठः कुर्वीत यौतकं १५
भ्रातॄणामविभक्तानां यद्युत्थानं भवेत्सह न पुत्रभागं विषमं पिता दद्यात्कथंचन १६

दर्याः सापत्ना वा एतच्च पुत्रपत्नी पितृमात्रभावे द्रष्टव्यं १३ य इति यो ज्येष्ठो भ्राता लोभेन कनी
यसो भ्रातॄन्वंचयेत् स ज्येष्ठभ्रातृपूजाशून्यः सोद्धारभागरहितः राजदंड्यः स्यात् १४ सर्व
इति अपतिता अपि ये भ्रातरो द्यूतवेश्यासेवादिविकर्मासक्ताः ते ऋक्थं नार्हंति न च कनिष्ठे
भ्यो न कल्प्य ज्येष्ठः साधारणाद्धनादात्मार्थमसाधारणं धनं कुर्यात् १५ भ्रातॄणामि
ति भ्रातॄणां पित्रा सहावस्थितानामविभक्तानां यदि सह धनार्जनं स्यात्तदा विभागकाले न
कस्यचित्पुत्रस्याधिकं भागं पिता कदाचिद्दद्यात् १६

785

अनंशावितिं नपुंसकपतितजात्यंधबधिरोन्मत्तजडमूकाः पितृप्रदत्तधर्मापेता अप्सरसः हताः ये च कुलेऽयं वादयो विकलेंद्रियाः ते पित्रादिधनहरा न भवंति १ सर्वेषामिति सर्वेषामेषां क्लीबादीनां शास्तुः तेन उक्त्या हि णा यावज्जीवनं ग्रासाछादनं देयं अददत्पापी स्यात् २ यदीति कथंचन संभिधानात् क्लीबादयो विवाहानर्हा इति सूचितं यदि कथंचिदेषां विवाहेच्छा भवेत् तदा क्लीबस्य क्षेत्रे अन्येनोत्पन्नानाम् अपत्यं धनभाग्भवति ४ यदिति पितरि मृते सति भ्रातृभिः सह विभक्तो ज्येष्ठो यत्किंचित्तत्पौरुषेण धनं लभेत ततो धनाद्विद्याभ्यासवतां तेषां भागो भवति नेतरेषां अविद्यानामिति सर्वेषां भ्रातॄणाम् अविद्यानां कृष्यादिवाणिज्यादिचेष्टया यदि धनं लभेत तदा पित्र्यवर्जितं तत्सिन्नू धने स्वार्जिते समो विभागः स्यात् न तु द्व्यंशादि इति निश्चयः ५ विद्याधनमिति विद्यामैत्रीविवाहार्जितं मधुपर्कदानकाले पूज्यतया यल्लब्धं तत्तस्यैव स्यात् यत्किंचित्पितरि

अनंशौ क्लीबपतितौ जात्यंधबधिरौ तथा उन्मत्तजडमूकाश्च ये च केचिन्निरिंद्रियाः २ स
र्वेषामपि तु न्याय्यं देयं शक्त्या मनीषिभिः ग्रासाच्छादनमत्यंतं पतितो ह्यददद्भवेत् ३ य
द्यर्थिता तु दारैः स्यात् क्लीबादीनां कथंचन तेषामुत्पन्नतंतूनामपत्यं दायमर्हति ४ अवि।
द्यानां तु सर्वेषामीहातश्चेद्धनं भवेत् यत्किंचित्पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति ५ ।
भागो यवीयसां तत्र यदि विद्यानुपालिनः समस्तत्र विभागः स्यादपित्र्य इति धारणा ६ ।
विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत् मैत्रमौद्वाहिकं चैव माधुपर्किकमेव च ७ भ्रातॄ
णां यस्तु नेहेत धनं शक्तः स्वकर्मणा स निर्भाज्यः स्वकादंशात्किंचिद्दत्त्वोपजीविनं ८

यत्किंचिदित्यस्यापवादः विद्याधनं त्वग्राह्यं तं कामापनेन परभक्तप्रदानेन प्राप्तां विद्याप्राप्तिरन्यतः त
या प्राप्तं च विधिना विद्याप्राप्तं तदुच्यते उपन्यस्ते च यल्लब्धं विद्याप्रापणपूर्वकं विद्याधनं तु तद्विद्या
द्विभागे न विभज्यते शिष्यादार्त्विज्यतः प्रश्नात्संदिग्धप्रश्ननिर्णयात् अज्ञानसंशनाद्वादाल्लब्धं प्रा
ध्ययनाच्च यत् विद्याधनं तु तत्प्राहुर्विभागे न विभज्यते अतो यन्मेधातिथिर्गोविंदराजाभ्यां मधु
पर्किकमार्त्विज्यधनं व्याख्यातं तदयुक्तं विद्याधनत्वात् ७ भ्रातॄणामिति राजानुगमनादिस्वकर्म
णा यो धनमर्जितुं शक्तो भ्रातॄणां साधारणं धनं नेच्छति स स्वीयांशात् किंचिदुपजीवनं दत्त्वा भ्रा
तृभिः पृथक्कार्यः तेन तत्पुत्रादयः तत्र धने कालांतरेण न विवदंते ८

म. स्मृ. टी. २०६

प्रकाशमिति प्रकटमेतच्चौर्यं यद्द्यूतसमाह्वयौ तस्मात्तयोर्निवारणे राजा नित्यं यत्नयुक्तः स्यात् २४ अप्राणिभि
रिति अक्षशलाकादिभिरप्राणिभिर्यत्क्रियते तल्लोके द्यूतं कथ्यते यत्तु नः प्राणिभिर्वृषभकुक्कुटादिभिः पणपू
र्वं क्रियते स समाह्वयो ज्ञेयः लोकप्रसिद्धयोरेव तयोः लक्षणकथनं परिहारार्थं २५ द्यूतमिति द्यूतसमाह्वयौ
यः कुर्यात् यो वा सभिकः कारयेत् तेषामपराधापेक्षया राजा हस्तच्छेदादिकं कुर्यात् यज्ञोपवीतादिद्विजचिह्न।
धारिणः शूद्रान्हन्यात् २६ कितवानिति द्यूतादिसेवनो नर्तकगायकान्वेदविद्विषः श्रुतिस्मृतिबाह्यव्रत
धारिणो नापदि परकर्मजीविनो मद्यपानशौण्डमनुष्यान् क्षिप्रं राजा राष्ट्रान्निर्वासयेत् २७ कितवसंगना
न्येषामप्यभिधानमात्रहेतुमाह एतइति एते कितवादयो गूढचौरा राज्ये स्थित्वा सततनिर्बंधनात्मकक्रियया

प्रकाशमेतत्तास्कर्यं यद्देवनसमाह्वयौ तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान्भवेत् २४ अप्राणिभिर्यत्क्रि
यते तल्लोके द्यूतमुच्यते प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः २५ द्यूतं समाह्वयं चैव यः कु।
र्यात्कारयेत वा तान्सर्वान्घातयेद्राजा शूद्रांश्च द्विजलिंगिनः २६ कितवान्कुशीलवान्क्रूरान्पाषंड
स्थांश्च मानवान् विकर्मस्थान्शौण्डिकांश्च क्षिप्रं निर्वासयेत्पुरात् २७ एते राष्ट्रे वर्तमाना राज्ञः प्र
च्छन्नतस्कराः विकर्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः २८ द्यूतमेतत्पुरा कल्पे दृष्टं वैरकरं।
महत् तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् २९ प्रच्छन्नं वा प्रकाशं वा तन्निषेवेत यो नरः त
स्य दंडविकल्पः स्याद्यथेष्टं नृपतेस्तथा ३० क्षत्रविट्छूद्रयोनिस्तु दंडं दातुमशक्नुवन् आनृण्यं।
कर्मणा गच्छेद्विप्रो दद्याच्छनैः शनैः ३१ स्त्रीबालोन्मत्तवृद्धानां दरिद्राणां च रोगिणां शिफाविद।
लरज्ज्वाद्यैर्विदध्यान्नृपतिर्दमं ३२ ये नियुक्तास्तु कार्येषु हन्युः कार्याणि कार्यिणां धनोष्मणा प
च्यमानास्तान्निःस्वान्कारयेन्नृपः ३३

286

जानां पीडयति २८ द्यूतमिति नेदानीमेव पारंपर्येण पूर्वस्मिन्नपि कल्पे द्यूतमेतदतिशयेन वैरकारि दृष्ट
मतः प्राज्ञः परिहासार्थमपि तन्न सेवेत २९ प्रच्छन्नमिति यो मनुष्यस्तद्द्यूतं गूढं प्रकटं वा कृत्वा सेवेत
तस्य यथा नृपतेरिच्छा भवेत् तथाविधो दंडः स्यात् ३० इदानीं पराजितानां धनाभावे सति दंडमाह क्षत्रे
ति क्षत्रियो वैश्यः शूद्रजातीयो निर्धनत्वेन दंडधनं दातुमसमर्थः तदुचितकर्मकरणेन दंडधनशोधनं कु
र्यात् ब्राह्मणः पुनर्यथालाभं क्रमेण दद्यान्न कर्म कारयितव्यः ३१ स्त्रीति स्त्र्यादीनामनपेक्ष्यापराधा
नुसारेण शिफापातितवेणुशकलारज्जुप्रभृतिभिस्ताडनेन राजा नियमं कुर्यात् ३२ य इति ये व्यवहा
रेक्षणादिषु राज्ञा नियुक्ताः उत्कोचधनतेजसा विकारं भजन्तोऽर्थ्यादीनां कार्याणि नाशयेयुः तान्गृही
तसर्वस्वान्राजा कारयेत् ३३

टी. २०६

ऊर्ध्वमिति यदि जीवत एव पितुः पुत्राणामिच्छया विभागः कृतस्तदा विभागादूर्ध्वं जातः पुत्रः पितरि मृते पि
पितृमृक्थमेव गृह्णीयात् पूर्वं ये कृतविभागाः पित्रा सह पुनः मिश्रीकृतधनास्तैः सहापि पितरि मृते विभ
जेत् १६ अनपत्येति अनपत्यस्य पुत्रस्य माता धनं गृह्णीयात् पूर्वं पिता हरेदपुत्रमृक्थं भ्रातर एव वा उ
क्तत्वादिह माता हरेदिमेनेन याज्ञवल्क्येन च पितरौ विशेषकरणाद्धि सुताच्चापुत्रस्य धनं पत्न्य।
भिगामि तदभावे दुहितृगामि तदभावे पितृगामी त्वेकशेषस्य वक्तृत्वान्मातापितरौ विभज्य गृह्णीयातां मात
रि च मृतायां पितृभ्रातृजातस्याभावे पितुर्माता धनं गृह्णीयात् १७ ऋणे इति ऋणे पित्रादिधार्यमाणे
तदीये च धने सर्वस्मिन् यथाशास्त्रं विभक्ते सति पश्चाद्यत्किंचिदविज्ञातमृणं धनं वा विभागकाले तत्पुनरुपलब्धे
तेन तत्सर्वं समं कृत्वा विभजनीयं न तु योऽधमर्णं प्राप्तवान् ज्येष्ठस्योद्धारो देयः १८ वस्त्रमिति वस्त्रवाहनमाभर।

ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनं संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह १६ अनपत्यस्य
पुत्रस्य माता दायमवाप्नुयात् मातर्यपि च वृत्तायां पितुर्माता हरेद्धनं १७ ऋणे धने च सर्वस्मिन्
प्रविभक्ते यथाविधि पश्चाद्दृश्येत यत्किंचित्तत्सर्वं समतां नयेत् १८ वस्त्रं पत्रमलंकारं कृतान्नमु
दकं स्त्रियः योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते १९ अयमुक्तो विभागो वः पुत्राणां च क्रि
याविधिः क्रमशः क्षेत्रजादीनां द्यूतधर्मं निबोधत २० द्यूतं समाह्वयं चैव राजा राष्ट्रान्निवारयेत्
राज्यान्तकरणावेतौ द्वौ दोषौ पृथिवीक्षितां २१

णम् विभागकाले येन यदुपभुक्तं तत्तस्यैव विभाज्यं न तत्र नातिन्यूनाधिकद्रव्यविषयं पत्रं कृत्वा मूल्यमाभरणा
दि तत्सर्वं विभज्यमेव विज्ञेयं यदत्राभरणमिति बृहस्पतेर्विभागवचनं कृतान्नमोदनसक्त्वादि तन्न विभजनीयं
तत्रापि प्रचुरमूल्यं सक्त्वादि तावन्मात्रधनैर्वा कृतान्नं चाकृतान्नेन परिवर्त्य विभज्यत इति बृहस्पतिवचनाद्वि
भजनीयमेव उदकं कूपतडागादि यत्तत्सर्वैरुपभोग्यमेव भजनीयं स्त्रियो योषिद्दास्यादयस्तु न विभागा न भवन्ति
ताश्च विभाज्याः किं तु तत्कर्मकारयितव्याः योगक्षेमं मंत्रपुरोहितादि योगक्षेमहेतुत्वात् प्रचारो गवादी
नां प्रचरणमार्गः एतत्सर्वं मन्वादयोऽविभाज्यमाहुः १९ अयमिति पर्षदाम्भवाः पुत्राणां क्षेत्रजादी
नां क्रमेण करणप्रकारो युष्माकमुक्तः इदानीं द्यूतव्यवस्थां शृणुत २० द्यूतमिति द्यूतं समाह्वयं च
माणं तस्मै राजा स्वराष्ट्रान्निवारयेत् यस्मादेतौ द्वौ दोषौ राज्ञां राज्यविनाशकारिणौ २१

म॰स्मृ॰
टी॰
२८७

प्रायश्चित्तमिति शास्त्रविहितं पुनः प्रायश्चित्तं कुर्वाणा ब्राह्मणादयो वर्णा राज्ञा ललाटे ग्रंकनीया न
भवेयुः उत्तमसाहसं पुनः दंडनीयाः ५२ आगःस्विति उतरे कृतवंतः स्विति उत्तरस्लोके श्रूयमाणा
मकामत इति चात्रापि योजनीयं नाकामतस्य पुरापराधेषु गुणवतो ब्राह्मणस्य मध्यमसाहसो दंडः कार्यः
पूर्वोक्तात्पत्तरस्मान्मोनिर्गुणस्य द्रव्यः कामतस्तेष्वपराधेषु धनधान्यादिपरिछदसहितो ब्राह्मणो नि
र्वास्यः ५३ इतर इति ब्राह्मणादन्ये पुनः क्षत्रियादयः एतानि पापान्यनिकृतंतः सर्वस्वहरणमर्हंति
इदं च सर्वस्वहरणं पूर्वोक्तेनोत्तमसाहसेन सह द्रष्टव्याय पेच्छयावस्थापनीयं इच्छातः पुनरेषामेषु
पराधेषु प्रवासनं वधो हेति प्रवासं परासंनिसूदनं निर्हिंसनमिति वधपर्यायं प्रवसनशब्दं पठंत्य
भिधानिकाः ५४ नाददीतेति धार्मिको राजा महापातकिसंबंधि धनदंडरूपं न गृह्णीयात् तल्लोभात्पुनः

प्रायश्चित्तं तु कुर्वाणाः सर्वे वर्णा यथोदितं नीयाराज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसं ५२ आग
स्सु ब्राह्मणस्यैव कार्यो मध्यमसाहसः विवास्यो वा भवेद्राष्ट्रात्सद्रव्यः सपरिच्छदः ५३ इतरे कृ
तवंतस्तु पापान्येतान्यकामतः सर्वस्वहारमर्हंति कामतस्तु प्रवासनं ५४ नाददीत नृपः सा
धुर्महापातकिनो धनं आददानस्तु तल्लोभात्तेन पापेन लिप्यते ५५ अप्सु प्रवेश्य तं दंडं वरु
णायोपपादयेत् श्रुतवृत्तोपपन्ने वा ब्राह्मणे प्रतिपादयेत् ५६ ईशो दंडस्य वरुणो राज्ञां दं
डधरो हि सः ईशः सर्वस्य जगतो ब्राह्मणो वेदपारगः ५७ यत्र वर्जयते राजा पापकृद्भ्यो धनागा
मं तत्र कालेन जायन्ते मानवा दीर्घजीविनः निःपद्यंते च सस्यानि यथोप्तानि विशां पृथक् बा
लाश्च न प्रमीयंते विकृतं न प्रजायते ५८ ब्राह्मणान्बाधमानं तु कामादवरवर्णजं हन्याच्चित्रै
र्वधोपायैरुद्वेजनकरैर्नृपः ६०

सतकृत महापातकदोषेण संबध्यते ५५
काप्युनर्दंडधनस्य प्रतिपत्तिरित्यत आह अप्स्विति तद्दंडधनं नद्यादिजले प्रक्षिप्य वरुणाय दद्यात् श्रु
तवृत्तसंपन्नाय ब्राह्मणाय वा दद्यात् ५६ ईश इति महापातकिदंडधनस्य वरुणः स्वामी यस्माद्राज्ञामपि दंड
धारयिता प्रभुः तथा ब्राह्मणः समस्तवेदाध्यायी सर्वस्य जगतः प्रभुः अत एव प्रभुत्वात्तौ दंडमर्हतः
५७ यत्रेति ५८ निष्पद्यन्त इति यत्र देशे प्रकृतं महापातकिधनं राजा न गृह्णाति तत्र परिपूर्ण
काले मनुष्या उत्पद्यन्ते दीर्घायुश्च भवन्ति वैश्यादीनां यथोप्तानि धान्यादिसस्यानि तथैव पृथक् पृथक्काले
संजायन्ते दीर्घजीविन इ... पादरार्थं पुनर्वचनं बालानां मरणं च न किंचिद्विकृतमुत्पद्यते ५९ ब्रा
ह्मणानिति शारीरपीडा... दानादिभिः शूद्रमपि कृतब्राह्मणान्बाधमानं हस्तच्छेदादिभिरुद्वे

[illegible] अ॰ ९

अ॰
२८७

कूटेति कूटशासनकर्तॄन् प्रकृतीनाममात्यानां च भेदकांश्च स्त्रीबालब्राह्मणघातिनः शत्रुसेविनश्च राजा हन्यात्
३४ तीरितमिति यत्र क्वचिदृणादानादिव्यवहारे यत्कार्यं धर्मतस्तीरितं पारतीरकर्मसमाप्तिं नीतं
दिपायात्तशास्त्रव्यवस्था निर्णीयते अनुशिष्टं दण्डपर्यन्ततां च नीतं स्यात् तद्धर्मं गीकुर्यात् पुनर्न
निवर्तयेत् एवं चकः [illegible] दितः कृतं निवर्तयेदेव ३५ अमात्या इति अमात्याः प्राड्विवाको वा व्य
वहारेक्षणे नियुक्तो यद्वस्म्यग्विवादनिर्णयं कुर्युः तत्स्वयं राजा कुर्यात् तांश्च प्रत्येकं सहस्रं दण्ड
येत् इदं चोत्कोचग्रहणेतरविषयं उत्कोचग्रहणे येन नियुक्तास्तिरस्कृतात् ३६ ब्रह्महेति यो
मनुष्यो ब्राह्मणं हतवान् ब्रह्महा सुरापो द्विजातिः पैष्ट्याः पाता ब्राह्मणः पैष्टीमाध्वीगौडीनां स्तेयी
ब्राह्मणस्वर्णहारी मनुष्यः यः कश्चिद्गुरुपत्नीगामी एते सर्वे प्रत्येकं महापातकिनो बोद्धव्याः ३७ च

कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकान् । स्त्रीबालब्राह्मणघ्नांश्च हन्याद्द्विट्सेविनस्तथा ॥ ३४ ॥
तीरितं चानुशिष्टं च यत्र क्वचन यद्भवेत् । कृतं तद्धर्मतो विद्यान्न तद्भूयो निवर्तयेत् ॥ ३५ ॥
अमात्याः प्राड्विवाको वा यत्कुर्युः कार्यमन्यथा । तत्स्वयं नृपतिः कुर्यात्तान्सहस्रं च दण्डयेत् ॥ ३६ ॥
ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः । एते सर्वे पृथग्ज्ञेया महापातकिनो नराः ॥ ३७ ॥
चतुर्णामपि चैतेषां प्रायश्चित्तमकुर्वताम् । शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत् ॥ ३८ ॥
गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः । स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमान् ॥ ३९ ॥
असंभोज्या ह्यसंयाज्या असंपाठ्याविवाहिनः । चरेयुः पृथिवीं दीनाः सर्वधर्मबहिष्कृताः ॥ ४० ॥
ज्ञातिसंबन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः । निर्दया निर्नमस्कारास्तन्मनोरनुशासनम् ॥ ४१ ॥

चतुर्णामिति चतुर्णाम प्येतेषां महापातकिनां प्रायश्चित्तमकुर्वतां शारीरं धनग्रहणेन धनसं
युक्तं यथापराधानुसारेण धर्मादनपेतं वक्ष्यमाणं दण्डं कुर्यात् ३८ गुरुतल्पे भग इति नोक्त्वारा
तललाटे सुरिविवक्ष्यमाणत्वात् ललाटमेवाकस्थानमवगम्यते तत्र गुरुपत्नीगमने पा
पवर्जीवस्थापितलोहेन ललाटे भगाकृतिगुरुपत्नीगमनचिह्नं कार्यं एवं सुरापाने कृते पान
ध्वजाकारं चीर्णं सुवर्णापहारे सत्यपहर्तुः कुक्कुरपादरूपांकं कुर्यात् ३९ ब्रह्महनि कवं
धः पुमान्कार्यः असंभोज्या इति अन्नादिकं नैतेभ्यो जपितव्याः नैते याजनीयाः नाध्येतव्याः
याः नाध्यैतेकन्याः दानसंबन्धः कार्यः [illegible] नेहितत्ता याचनादिदैन्ययुक्ताः सकलश्रौतादिध
र्मवर्जिताः पृथिवीं पर्यटेयुः ४० ज्ञातीति ज्ञातिभिः संबन्धिभिः मातुलादिभिरेते कृताकास्मा

म.स्मृ.
टी.
२८८

किं च उत्कोचका इति ६० असम्यक्कारिण इति ६१ एवमिति उत्कोचका ये कार्यिकेभ्यो धनं गृहीत्वा कार्यं प्रकृतं कुर्वन्ति औपाधिका भयप्रदर्शनाद्ये धनमुपजीवन्ति वञ्चका ये सुवर्णादिद्रव्यं गृहीत्वा द्रव्यप्रक्षेपेण वञ्चयन्ति कितवा द्यूतसमाह्वयदेविन धनपुत्रलाभादि मङ्गलमादिश्य ये वर्तन्ते ते मङ्गलादेशवृत्ताः भद्राः कल्याणाकाराश्छन्नपापा ये धनग्राहिणः ईक्षणिका हस्तरेखाद्यवलोकनेन शुभाशुभफलकथनजीविनः महामात्रा हस्तिपकास्तज्जीविनः चिकित्सकाश्चिकित्साजीविनः असम्यक्कारिण इति महामात्रचिकित्सकविशेषणं शिल्पोपचारयुक्ताः स्त्रियः केशरचनादिषूपजीविनस्तेष्वपि निपुणमानशिल्पोपायेन शोभा साहसेनेव धनं गृह्णन्ति पण्यस्त्रियश्च परवशीकरणे कुशलास्तेवमादीन् प्रकाशान् लोककण्टकान् वा

उत्कोचकाश्चौपधिका वञ्चकाः कितवाः शठाः मङ्गलादेशवृत्ताश्च भद्राश्चेक्षणिकैः सह ६०
असम्यक्कारिणश्चैव महामात्राश्चिकित्सकाः शिल्पोपचारयुक्ताश्च निपुणाः पण्ययोषितः ६१
एवमाद्यान्विजानीयात्प्रकाशाँल्लोककण्टकान् निगूढचारिणश्चान्याननार्यानार्यलिङ्गिनः ६२
तान्विदित्वा सुचरितैर्गूढैस्तत्कर्मकारिभिः चारैश्चानेकसंस्थानैः प्रोत्साद्य वशमानयेत् ६३
तेषां दोषानभिख्याप्य स्वे स्वे कर्मणि तत्त्वतः कुर्वीत शासनं राजा सम्यक्सारापराधतः ६४
न हि दण्डादृते शक्यः कर्तुं पापविनिग्रहः स्तेनानां पापबुद्धीनां निभृतं चरतां क्षितौ ६५
सभाप्रपापूपशालावेशमद्यान्नविक्रयाः चतुष्पथाश्चैत्यवृक्षाः समाजाः प्रेक्षणानि च
जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च शून्यानि चाप्यगाराणि वनान्युपवनानि च ६७ ॥

विजानीयात् अन्यानपि प्रच्छन्नचारिणः शूद्रादीन्ब्राह्मणादिवेषधारिणो धनग्राहिणो जानीयात् ६२ तानिति तान् तान्वञ्चकान्सभ्यैः प्रच्छन्नैस्तत्कर्मकारिभिर्वणिग्जनैस्तैरेव वणिग्वेषैरेवमादिभिः पुरुषैः एतद्व्यतिरिक्तैः सत्त्वमात्याप्यापोपादिष्टकापटिकादिभिः चारैरनेकस्थानस्थैर्ज्ञात्वा प्रोत्साह्य वशमानयेत् ६३ तेषामिति तेषां प्रकाशाप्रकाशानां तस्कराणां स्वकर्मणि चौर्यादौ ये यादृशाः सन्धिच्छेदादयः तान् लोके प्रख्याप्य तत्कृतधनशारीरादिसामर्थ्यापेक्षया अपराधापेक्षया च राजा दण्डं कुर्यात् ६४ न हि दण्डेति यस्मात् चौराणां पापाचरणबुद्धीनां विनीतवेषाणां पृथिव्यां चरतां दण्डव्यतिरेकेण यायापक्षि या मानि यमनं कर्तुं अशक्यं तस्मादेव एषां दण्डं कुर्यात् ६५ सभेति ६६

॥ श्री ॥ टी. २८८ शास्त्रि

यावानिति अवध्यस्य वधे यावानधर्मो नृपतेः स्यात् तेन त्रातः तावानेव वध्यस्यागोपि स्यात् अतो दण्ड्यं दण्डं कुर्वतो
धर्मः स्यात् ४२ उदितोऽयमिति अष्टादशसु ऋणादानादिषु परस्परं विवदमानयोरर्थिनोः कार्यनिर्णयो
विस्तरेणोक्तः ४३ एवमिति अनेनोक्तप्रकारेण धर्मादनपेतान् व्यवहारनिर्णयान् राजा जनानुरागाद
लब्धान्देशान् लब्धुमिच्छन् लब्धांश्च सम्यक्पालयेत् एवं सम्यग्व्यवहारदर्शनस्य लब्धदेशस्य सम्पूर्णत्व
मुक्तं ४४ सम्यगिति जांगलेषु सस्यसम्पन्नमित तदीयास सम्यगाश्रितदेशः तत्र सत्रमाध्यायोक्तप्रकारेण
कृतदुर्गाश्रयो रसाहसिकादिकण्टकनिवारणे प्रकृष्टं यत्नं सदा कुर्यात् ४५ रक्षणादिति यस्मात्साध्वाचा
राणां रक्षणाच्चौरादीनां च शासनात् प्रजापालनोद्युक्ता राजानः स्वर्गं यान्ति तस्मात्कण्टकोद्धारणे यत्नं कुर्यात्

यावानवध्यस्य वधे तावान्वध्यस्य मोक्षणे अधर्मो नृपतेर्दृष्टो धर्मस्तु विनियच्छतः ४२ उदितोऽयं विस्त
रशो मिथो विवदमानयोः अष्टादशसु मार्गेषु व्यवहारस्य निर्णयः ४३ एवं धर्म्याणि कार्याणि सम्यक्कुर्वन्
महीपतिः देशानलब्धान् लिप्सेत लब्धांश्च परिपालयेत् ४४ सम्यङ्निविष्टदेशस्तु कृतदुर्गश्च शास्त्र
तः कण्टकोद्धरणे नित्यमातिष्ठेद्यत्नमुत्तमम् ४५ रक्षणादार्यवृत्तानां कण्टकानां च शोधनात् नरेन्द्रास्त्रिदिवं
यान्ति प्रजापालनतत्पराः ४६ अशासंस्तस्करान्यस्तु बलिं गृह्णाति पार्थिवः तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गा
च्च परिहीयते ४७ निर्भयं तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितं तस्य तद्वर्धते नित्यं सिच्यमान इव द्रुमः ४८
द्विविधांस्तस्करान्विद्यात्परद्रव्यापहारकान् प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः ४९ प्रकाशा
वञ्चकास्तेषां नानापण्योपजीविनः प्रच्छन्नवञ्चकास्त्वेते ये स्तेनाटविकादयः ५०

अथ अशासन्निति यः पुनर्नृपतिश्चौरादीननिराकुर्वन् षड्भागादिकं करं गृह्णाति तस्य राष्ट्रवासिनो
जनाः क्षुभ्यन्ति कर्मान्तरार्जिताच्च स्वर्गाद्भ्रश्यति च नरकं गच्छतीत्यर्थः ४७ निर्भयमिति यस्य राज्ञो बाहुवीर्या
श्रयेण राष्ट्रं चौरादिभयरहितं भवति तस्य तन्नित्यं वृद्धिं गच्छति उदकसेकेनेव वृक्षः ४८ द्विविधानि
ति चारा एव चौरस्थानहेतुत्वात् चक्षुरिति च यथा सौ राजा चारैरेव प्रकटगूढतस्करान्पश्यति प्रकाशान्न्यायेन
परधनग्राहिणो राजा जानीयात् ४९ प्रकाशेति तेषां पुनश्चौराणां मध्ये ये तुला प्रतिमानोपच
यापचयादिना हिरण्यादिपण्यविक्रयिणः परधनमनुचितेन गृह्णन्ति प्रकाशा वञ्चकाः ये च
स्तेनाश्चौराः सन्धिच्छेदादिना गुप्ताश्च अटव्याश्रयाश्च ये परधनं गृह्णन्ति ते प्रच्छन्नवञ्चकाः ५०

म-स्मृ-
टी-
३८८

यश्चेत्यादि याजनप्रतिग्रहादिना परस्य यागदानादिधर्मे उत्पाद्य यो जीवति स धर्मजीवनो ब्राह्मणः सोऽपि यो धर्ममर्यादातश्च्युतो भवति तमपि स्वधर्मात्परिभ्रष्टं दंडेनोपयातयेत् ७४ ग्रामेत्यादि ग्रामलुंठनेन तस्करादिभिः क्रियमाणे हिताभंगे जलसेतुभंगे जाते चेत्तत्र शस्यनाशनेन वृत्तिभंगो भवति मोषाभिः पथि चौर्यदर्शने तन्निकवर्तिनो यथाशक्ति परित्राणार्थं न धावंति ते ग्रामाद्वा स्वादिपरिच्छदसहिता देशान्निःसारणीयाः ७६ राज्ञ इत्यादि राज्ञो धनग्रहात्तद्धनापहारिणः तथा तदाज्ञाव्याघातकारिणः शत्रूणां च राज्ञा सह वैरवृद्धिकारिणोऽपराधापेक्षया करचरणजिह्वाच्छेदनादिना नानाप्रकारदंडैर्घातयेत् ७७ संधिमित्यादि ये रात्रौ संधिच्छेदं कृत्वा परधनं तस्कराः गृह्णंति तेषां राजा हस्तद्वयच्छेदनं कृत्वा तीक्ष्णशूले तानारोपयेत् ७८ अंगुलीत्यादि पटप्रांतादिस्थितसुवर्णादिद्रव्यं ग्रंथिमोक्षणेन यश्चौ

यश्चापि धर्मसमयात्प्रच्युतो धर्मजीवनः दंडेनैव तमप्योषेत्स्वकाद्धर्माद्विच्युतं ७५ ग्रामघाते हिताभंगे पथि चोराभिमर्शने शक्तितो नाभिधावंतो निर्वास्याः सपरिच्छदाः ७६ राज्ञः कोशापहर्तॄंश्च प्रतिकूले च संस्थितान् घातयेद्विविधैर्दंडैररीणां चोपजापकान् ७७ संधिं छित्त्वा तु ये चौर्यं रात्रौ कुर्वंति तस्कराः तेषां छित्त्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत् अंगुलीर्ग्रंथिभेदस्य छेदयेत्प्रथमे ग्रहे द्वितीये हस्तचरणौ तृतीये वधमर्हति ७९ अग्निदान्भक्तदांश्चैव तथा शस्त्रावकाशदान् संनिधातॄंश्च मोषस्य हन्याच्चौरानिवेश्वरः तडागभेदकं हन्यादप्सु शुद्धवधेन वा तद्वापि प्रतिसंस्कुर्याद्दाप्यस्तूत्तमसाहसं ८१ कोष्ठागारायुधागारदेवतागारभेदकान् हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन् ८२

र्यं करोति स ग्रंथिभेदकः तस्य प्रथमे द्रव्यग्रहणेऽंगुलीच्छेदयेत् ते चांगुष्ठतर्जन्यौ उत्क्षेपकग्रंथिभेदौ करसंदंशहीनकाविति याज्ञवल्क्यस्मरणात् द्वितीये ग्रहणे हस्तपादौ छेदयेत् तृतीये धनग्रहणे वध्यो भवति ७९ अग्नीत्यादि ग्रंथिभेदादिकारिणो विज्ञाय अग्निभक्तशस्त्रावस्थानप्रदानमुष्यत इति मोषस्थापि धनं तस्यावस्थापकान् चोरवद्राजा निगृह्णीयात् ८० तडागेत्यादि यः स्नानपानादिनाजलोपकारकं तडागं सेतुभेदनादिना विनाशयति तमप्सु निमज्जनेन प्रकारांतरेण वा हन्यात् यदा यदि तडागं पुनः संस्कुर्यात्तदोत्तमसाहसं दंड्यः ८१ कोष्ठेत्यादि राजसंबंधिधान्यागारायुधागारयोर्देवप्रतिमागृहस्य च बहुधनव्ययसाध्यस्य विनाशकान् हस्त्यश्वरथापहर्तॄंश्च शीघ्रमेव हन्यात् यत्तु संक्रमध्वजयष्टीनां देवताप्रतिमाभेदिनः पंचशतं दंडं वक्ष्यति सोऽस्मादेव देवतागार

उ-
३८८

789

एवंविधानिति सभाग्रामनगरादौ नियतं जनसमूहं प्रपा जलदानगृहं पूपविक्रयवेश्म पण्यस्त्रीगृहं म
द्यान्नविक्रयस्थानानि चतुष्पथाः प्रख्यातवृक्षमूलानि जनसमूहस्थानानि रङ्गो गीतस्थानानि जीर्णो
वाटिकाश्चाटव्यः शिल्पिगृहाणि शून्यनिगृहाणि ग्रामादिवनानि कृत्रिमोद्यानानि एवंप्रकारान्देशान्गु
ल्मैः पदातिसमूहैः स्थावरजंगमैरेकस्थानस्थितैः प्रचारिभिश्चान्यैस्तस्करैस्तस्करनिराकरणार्थं
प्रचारयेत् प्रापणीविविधदेशान्नपानस्त्रीभोगाः पूर्वचौरान्वेषणार्थं तस्करानुवर्तिष्ठते ६७ त
त्सहायैरिति तेषां चोराणां साहाय्यं प्रतिपाद्यमानैस्तच्चरितानुष्ठानिभिः संधिच्छेदादिनानाकर्मोत्थज्ञान
वादिभिः पूर्वचौरैश्चारत्वरूपैश्चरमापापानिपुणैस्तान्तस्करान्जानीयादुत्सादयेच्च ६९ भक्ष्येति तेषु
वैचोराश्चारभूताः आगच्छतास्मकं गृहं गच्छाम तत्र मोदकपायसादीन्भक्षयिष्याम इत्येवं भक्ष्यभोज्यव्याजेना
मकदेशे ब्राह्मणोऽस्ति सोऽभिलषितार्थसिद्धिं जानाति तं पश्याम इत्येवं ब्राह्मणदर्शनैः कश्चिदेक०

एवंविधान्नृपो देशान्गुल्मैः स्थावरजंगमैः तस्करप्रतिषेधार्थं चारैश्चाप्यनुचारयेत् ६८
तत्सहायैरनुगतैर्नानाकर्मप्रवेदिभिः विद्यादुत्सादयेच्चैव निपुणैः पूर्वतस्करैः ६९
भक्ष्यभोज्यापदेशैश्च ब्राह्मणानां च दर्शनैः शौर्यकर्मापदेशैश्च कुर्युस्तेषां समागमं ७०
ये तत्र नोपसर्पेयुर्मूलप्रणिहिताश्च ये तान्प्रसह्य नृपो हन्यात्समित्रज्ञातिबान्धवान् ७१
न होढेन विना चौरं घातयेद्धार्मिको नृपः सहोढं सोपकरणं घातयेदविचारयन् ७२
ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायकाः भाण्डावकाशदाश्चैव सर्वांस्तानपि घातयेत्
राष्ट्रेषु रक्षाधिकृतान्सामन्तांश्चैव चोदितान् अभ्याघातेषु मध्यस्थाञ्छिष्याच्चौरानिव द्रुतम् ७४

बन्धुभिः सह योत्स्यते तं पश्याम इत्येवं शौर्यकर्मापदेशेन तेषां चोराणां राज्ञो दंडधारकपुरुषैः समागा
मं कुर्युः ग्राहयेयुश्च ७० ये तत्रेति ये चोरा राज्ञ भक्ष्यभोज्यादौ नियहशंकमाना नोपसर्पन्ति ये च मूलराज
नियुक्तपुराणचोरवर्गप्रणिहिताः सावधानाः न तैः सह संगतिं भजन्ते तान्प्रसह्य बलेनापि तान्तदेकता
पन्नमित्रज्ञातिस्वजनसहितान्बलादाक्रम्य राजा हन्यात् ७१ न होढेनेति धार्मिको राजा हृतद्रव्यसंधिछे
दोपकरणव्यतिरेकेण निश्चितचोरभावं न घातयेत् किंतु हृतद्रव्येण चौर्योपकरणेन निश्चितचोरभावम
विलम्बमानो घातयेत् ७२ ग्रामेष्विति ग्रामादिष्वपि ये केचिच्चोराणां चौरत्वं ज्ञात्वापि भक्तदाः चौर्योपयुक्त
भाण्डादिगृहावस्थानं ये ददति तानपि नैरंतर्यायापराधगौरवापेक्षया घातयेत् ७३ राष्ट्रेष्विति ये राष्ट्रेषु
रक्षानियुक्ताः ये च सीमान्तवासिनः आक्रुष्टाः सन्तः चौर्यापहृतद्रव्येषु मध्यस्थाः भवन्ति तान्चौरवान्ति

प्राकारेत्यादि राजगृहपुरादिसंबंधिनः प्राकारस्य भेदकं तदीयानामेव परिखाणां पूरकं तद्द्वाराणामेव हारा
णां भंजनं क्षिप्रमेव देशान्निःसारयेत् २८२ अभीत्यादि अभिचारहोमादिषु शास्त्रीयेषु मारणोपायेषु लौकि
केषु च स्पृष्टिविनष्टपादपांशुग्रहणादिषु अनुजातमरणफलेषु द्विशतपणग्रहणरूपो दंडः कार्यः म
रणे तु मनुष्यमारणदंड एवं मातृपितृभार्यादिव्यतिरिक्तेष्वीमोसद्धनग्रहणाद्यर्थं वशीकरणे तथा आकृ
त्यासूच्चाटनापाटवादिषु हेतुषु क्रियमाणेषु नानाप्रकारेषु द्विशतपण एव दंडः कार्यः २८२ अबी
जेत्यादि अबीजं पुरोहाससमर्थं व्रीह्यादि प्ररोहसमर्थमिति कृत्वा यो विक्रीणीते तथानुत्कृष्टमेककालिचित
प्रकृष्टरूपेण सर्वमिदं सोत्कर्षमिति कृत्वा यो विक्रीणीते यश्च ग्रामनगरादिसीमाविनाशयति स विकृतेक
र्णनासादिकर्त्तनरूपं दंडं प्राप्नुयात् २८३ सर्वेत्यादि सर्वकंटकानां मध्ये अतिशयेन पापतमं सुवर्णकारं
तुलाद्यपकर्षपरिवर्त्तापद्रव्यप्रक्षेपादिना हेमादिचौर्ये प्रवर्त्तमानमन्यायवर्त्तिनं पार्थिवः अंगविशेषं सर्वदेहे

प्राकारस्य च भेत्तारं परिखाणां च पूरकं द्वाराणां चैव भक्तारं क्षिप्रमेव प्रवासयेत् २८२ अभि।
चारेषु सर्वेषु कर्त्तव्यो द्विशतो दमः मूलकर्मणि चानाप्तेः कृत्यासु विविधासु च २८२ अबीज।
विक्रयी चैव बीजोत्कृष्टा तथैव च मर्यादाभेदकश्चैव विकृतं प्राप्नुयाद्वधं २८३ सर्वकंटकपापि
ष्ठं हेमकारं च पार्थिवः प्रवर्त्तमानमन्याये छेदयेल्लवशः क्षुरैः २८४ सीताद्रव्यापहरणे श।
स्त्राणामोषधस्य च कालमासाद्य राजा न दंडं च प्रकल्पयेत् २८५ स्वाम्यमात्यपुरंराष्ट्रं कोशं दंड
सुहृत्तथा सप्त प्रकृतयो ह्येताः सप्तांगं राज्यमुच्यते २८६ सप्तानां प्रकृतीनां तु राज्यस्यासां यथा
क्रमं पूर्वं पूर्वं गुरुतरं जानीयाद्व्यसनं महत् २८७

वा खंडशः क्षुरैः छेदयेत् २८४ सीताद्रव्येत्यादि कृष्यमाणभूमिद्रव्याणां हलकुद्दालादीनां च शस्त्रा
णां खड्गादीनामोषधस्य च कल्याणघृतादेः चौर्ये सत्युपयोगकालं तत्कालापेक्षया प्रयोजनापेक्षया
च राजा दंडं कुर्यात् २८६ स्वामीत्यादि स्वामी राजा अमात्यो मंत्र्यादिः पुरं राजःकृतदुर्गनिवासनगरं राष्ट्रं दे
शः कोशो वित्तनिचयः दंडो हस्त्यश्वरथपादातं मित्रं विविधं सप्तमा ध्याप्योनेमि सेनाः सप्त प्रकृतयोऽंगा
नि सर्वमिदं राज्यमुच्यते २८६ ततः किमित्याह सप्तानामित्यादि आसां राज्यस्य प्रकृतीनां सप्तानां क्रमोक्ता
नां उत्तरस्माद्विनाशमपेक्ष्य पूर्वस्य विनाशमतिव्यसनागरीयः यथा सुहृन्नाशाद्दंडनाशो दंडव्यसनात् को
शव्यसनं गरीयः कोशनाशो बलस्यापि नाशनात् कोशाद्वा राष्ट्रं गरीयो राष्ट्रनाशे उत्तः कोशोत्पत्तिः एवं राष्ट्रं दु
र्गं गरीयः राष्ट्रनाशेऽपि दुर्गादेव पुनरवसानादिसंपत्त्या राज्यरक्षासिद्धेः दुर्गादमात्यो गरीयान् प्रधानामात्य
नाशे सर्वोपायवैकल्यात् अमात्यादप्यात्मा सर्वस्योपायत्वात् तस्माद् उत्तरापेक्षया पूर्वं यत्नतो रक्षेत् २८७

यस्त्वित्यादि यः पुनः सर्वोपभोग्यं पूर्वकेन चितं कृतं तडागस्योदकमेव गृह्णाति तत्पयोदकागमनमार्गमेव यः सेतु
बंधादिना नाशयति स प्रथमसाहसं दंड्यः ८३ समुत्सृजेत् अनापत्समन्वो राजमार्गे पुरीषं कुर्यात् स पणद्व
यं दंड्यः स्यात् तच्चामेध्यं स यत्र अपसारयेत् ८४ आपद्गत्यादि व्याधितवृद्धगर्भिणीबाला न दंड्या याः किं
तु मा पुनः इत्यनुमितिपरिभाषणीयाः तच्चामेध्यं शोध्यमिति शास्त्रमर्यादा ८५ चिकित्सेत्यादि सर्वेषां
कायशाल्यादिभिषजां दुश्चिकित्सां कुर्वतां दंडः कार्यः तत्र गवाश्वादिविषये दुश्चिकित्सां कुर्वतां प्रथ
मसाहसो दंडः मानुषमध्ये पुनर्मध्यमसाहसः ८६ संक्रमेत्यादि संक्रमो जलोपरिगमनार्थंका।
ष्ठशिलादिरूपः ध्वजचिह्नं राजद्वारादौ यष्टिः पुष्करिण्यादौ प्रतिमाः दारुमृन्मय्यादयः तासां विना
शकः पंच पणशतानि दंड्यः दद्यात् तच्च विनाशितं सर्वं पुनर्नवं कुर्यात् ८७ अदूषितानामित्यादि अ

यस्तु पूर्वनिविष्टस्य तडागस्योदकं हरेत् आगमं वाप्यपां भिंद्यात् स दाप्यः पूर्वसाहसं ८३ समुत्
सृजेद्राजमार्गे यस्त्वमेध्यमनापदि स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत् ८४ आपद्ग
तोऽथवा वृद्धा गर्भिणी बाल एव वा परिभाषणमर्हंति तच्च शोध्यमिति स्थितिः ८५ चिकि
त्सकानां सर्वेषां मिथ्याप्रचरतां दमः अमानुषेषु प्रथमो मानुषेषु तु मध्यमः ८६ संक्रम
ध्वजयष्टीनां प्रतिमानां च भेदकः प्रतिकुर्याच्च तत्सर्वं पंच दद्याच्छतानि च ८७ अदूषिता
नां द्रव्याणां दूषणे भेदने तथा मणीनामपवेधे च दंडः प्रथमसाहसः ८८ समैर्हि विष।
मं यस्तु चरेद्वा मूल्यतोऽपि वा समाप्नुयाद्दमं पूर्वं नरो मध्यममेव वा ८९ बंधनानि च सर्वा।
णि राजमार्गे निवेशयेत् दुःखिता यत्र दृश्येरन्विकृताः पापकारिणः ९०

दुष्टद्रव्याणामपद्रव्यप्रक्षेपणेन दूषणेन मणीनां च माणिक्यादीनां मुक्तावेधानां विदारणे वेधानामपि
मुक्तामण्यादीनामस्थानवेधेन प्रथमसाहसो दंडः कार्यः सर्वत्र परकीयद्रव्यनाशे द्रव्यांतरदानादि
ना स्वामितुष्टिः कार्या ८८ समैर्हीत्यादि समैः समूल्यदातृभिः सह उत्कृष्टापकृष्टद्रव्यदानेन यो वि
षमं व्यवहरति समं मूल्यं द्रव्यं दत्वा यः कस्यचिदधिकमूल्यं कस्यचिदल्पमूल्यमिति विषमं मूल्यं गृह्णा
ति स तु वंशविशेषापेक्षया प्रथमं साहसं वा दंडं प्राप्नुयात् ८९ बंधनानीत्यादि बंधनगृहाणि स
र्वजनदृश्ये राजमार्गे कुर्यात् यत्र निगडबंधनाद्युपेताः क्षुत्तृष्णाभिभूता दीर्घकेशनखश्मश्रवः
कृशाः पापकारिणः अन्येऽकार्यकारिभिः कार्यांनिवृत्त्यर्थं दृश्येरन् ९०

इंद्रेत्यादि इंद्रादिसंबंधिनो वीर्यस्यानुरूपं चरितं राजानुतिष्ठेत् यथा राजा कंटकोद्धारणेन प्रतापानुरागाभ्यां यु-
ज्यते ४ कथमिंद्रचरितमनुतिष्ठेदित्यत आह वार्षीत्यादि अतः संवत्सरस्य चाश्रयणोदकं च्यावते यथा अ-
पाश्रावणादीन् चतुरो मासान् इंद्रः स्वादिमिंदुमेव वर्षति एवमिंद्रचरितमनुतिष्ठन् राजा स्वदेशीयान्साधू-
नभिलषितार्थैः पूरयेत् ५ अष्टावित्यादि यथा सूर्यो मार्गशीर्षाद्यष्टमासान् रश्मिभिस्तोयं रसमोषद्यु-
गेनादानेन तथा राजा राष्ट्रात् योग्यकरान् पीडया सर्वदा राष्ट्रीयेभ्यो गृह्णीयात् यस्मादेतदर्कव्रतं ६ प्रविश्ये-
त्यादि यथा प्राणरूपो वायुः सर्वजनेषु अंतःप्रविश्य विचरति एवं राज्ञा चारद्वारेण स्वपरजनेषु चिकी-
र्षितज्ञानार्थमंतःप्रवेष्टव्यं यस्मादेतन्मारुतं चरितं ७ यथेत्यादि यथापि यमः स्वशत्रुमित्रे तथापि

इंद्रस्यार्कस्य वातस्य यमस्य वरुणस्य च इंदस्याग्नेः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत् ४ वार्षि-
कांश्चतुरो मासान्यथेंद्रोऽभिप्रवर्षति तथाभिवर्षेत्स्वं राष्ट्रं कामैरिंद्रव्रतं चरेत् ५ अष्टौ
मासान्यथादित्यस्तोयं हरति रश्मिभिः तथा हरेत्करं राष्ट्रान्नित्यमर्कव्रतं चरेत् ६ प्रवि-
श्य सर्वभूतानि यथा चरति मारुतः तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतं ७ यथा
यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति तथा राज्ञा नियंतव्याः प्रजास्तद्धि यमव्रतं ८
वरुणेन यथा पाशैर्बद्ध एवाभिदृश्यते तथा पापान्निगृह्णीयाद्व्रतमेतद्धि वारुणं ९ (वरु-
णेन यथा पाशैर्बद्ध एवाभिदृश्यते) परिपूर्णं यथा चंद्रं दृष्ट्वा हृष्यंति मानवाः तथा प्रकृ-
तयो यस्मिन्स चंद्रव्रतिको नृपः प्रतापयुक्तस्तेजस्वी नित्यं स्यात्पापकर्मसु दुष्टसाम-
तहिंस्रश्च तदाग्नेयं व्रतं स्मृतं ११

तन्निंदकार्थकयोः शत्रुमित्रव्यपदेशः यथा यमो मित्रशत्रुमरणकाले प्राप्ते तुल्यवन्नियमयति
एवं राज्ञापराधकाले रागद्वेषपरिहारेण प्रजाः शासनीयाः यस्मादेतद्यमस्य व्रतं ८ वरु-
णेत्यादि यो वरुणेन सर्परज्जुभिर्बंधयितुमिष्टः स यथा तेनाविशंकितः पाशैर्बद्ध एव लक्ष्यते तथा
पापकारिणो विशंकितानेव यावन्न पलायंते तावद्ग्रासयेत् यस्मादेतद्वरुणस्य व्रतं ९ परीत्या-
दि यथा पूर्णेंदुदर्शनेन मनुष्या हर्षमुपयांति एवं ममात्यादयो यस्मिन् दृष्टे तुष्टिमुपयांति स
चंद्रव्रतिको नृपः १० प्रतापेत्यादि पापकारिषु सर्वदा दंडपातनेन प्रचंडोऽसहनश्च स्यात्
तथा शत्रुकुलानामपि हिंसनशीलो भवेत् तदस्याग्निव्रतं भवति ११

181

सप्ताङ्गस्येत्यादि उक्तसप्ताङ्गवतो लोके राज्यस्य त्रिदंडवदन्योन्यसंबद्धस्य परस्परविलक्षणोपकारगुणा
त् न किंचिदधिकं भवति यद्यपि पूर्वश्लोके पूर्वपूर्वस्याङ्गस्याधिक्यमुक्तं तथाप्येषामङ्गानां मध्यादन्यतरा
संबंधिनमुपकारमन्यदङ्गं कर्तुं न शक्नोति तस्मादुक्तयोजनयाङ्गमप्युपेक्षणीयमिति एवं परोपमाधिका
निषेधः अत्र श्रुतिः इति त्रिदंडमत्र हस्तात्तद्वित्तत्रिरंगुलगोवालवेष्टनादन्योन्यसंबद्धं न वर्तन्ते
दंडधारणशास्त्रार्थैकस्मिन् दंडे ऽधिको भवति २९७ तैस्तैरित्यादि यस्मात्तेषु तेषु संपाद्येषु तत्तदङ्गं सातिशय
यं भवति तत्कार्यस्यान्येन कर्तुमशक्यत्वात् एवं च येनाङ्गेन यत्कार्यं संपाद्यते तस्मिन्कार्ये तदेव प्रधान
मुच्यते तत्रान्योन्यगुणवैशिष्ट्यादि निपुणेन देवानेन स्पष्टीकृते चारेणेत्यादि स्वपरमात्यायोन्तः
कार्यं टीकादिनावलोत्साहयोगेन कर्मणश्च हानिवृद्धिवर्धनादीनां अनुष्ठानेन ज्ञातां शत्रोरात्मन
श्च शक्तिं राजा जानीयात् २९८ पीडनानीत्यादि पीडनानि दुर्भिक्षमारकादीनि व्यसनानि कामक्रोधोद्भ

सप्ताङ्गस्येह राज्यस्य विष्टब्धस्य त्रिदंडवत् अन्योन्यगुणवैशिष्ट्यान्न किंचिदतिरिच्यते २९६ तेषु ते
षु च कृत्येषु तत्तदङ्गं विशिष्यते येन यत्साध्यते कार्यं तत्तस्मिन्विद्यात्परात्मनः पीडनानि च
सर्वाणि व्यसनानि च सर्वशः आरभेत ततः कार्यं संचिन्त्य गुरुलाघवं २०० आरभेतैव कर्मा
णि श्रान्तः श्रान्तः पुनः पुनः कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते २०१ कृतं त्रेतायुगं
चैव द्वापरं कलिरेव च राज्ञो वृत्तानि सर्वाणि राजा हि युगमुच्यते २०२ कलिः प्रसुप्तो भ
वति स जाग्रद्द्वापरं युगं कर्मस्वभ्युद्यतस्त्रेता विचरंस्तु कृतं युगं २०३

वानि च स्वपरचक्रागतानि तेषां च गुरुलाघवं विदित्वा संधिविग्रहादिकार्यमारभेत् २०० आरभेत्यादि
राजा स्वराज्यवृद्धिं प्रति यत्र यन्निमित्तानि कर्माणि कृषिविदन्नान्न फलान्यप्यारभ्यापि खिन्नः पुनः पुनरारभ्या
रभेतैव यस्मात्कर्मसु यत्नपुरुषं निरंतरं श्रीर्निषेवते तथा च बृहस्पतिः उत्साहेनानाप्ताप्यश्रीरस्तीतिरोहि
तः श्रूयते इति न च युगानुरूपाणि कर्माणि फलंतीति राज्ञा शक्यमित्यत आह २०१ कृतमित्यादि कृतत्रेता
द्वापरकलयो राज एव चेष्टाविशेषाः तैरेव सत्यादिविशेषैश्चेष्टितैः तस्माद्राजैव कृतादियुगमभिधीयते २०२
कीदृक्चेष्टितः सन्कृतादियुगमित्याह कलिरित्यादि यदा मदान्नानालस्यादिना निरुद्यमो राजा भवति तदा
कलिः स्यात् यदा जानन्नपि कर्माणि नानुतिष्ठति तदा द्वापरं कर्मानुष्ठानव्यवसितस्तु त्रेता यथाशास्त्रं पुनः का
र्माण्यनुतिष्ठन्कृतयुगं तस्माद्राज्ञा कर्मानुष्ठानपरेण भवितव्यमिति तिनानर्थं न तु वास्तवं कृतयुगादि
पलापः २०३ श्रीराम

म॰ स्मृ॰
टी॰
३८२

क्षत्रेत्यादि क्षत्रियस्य ब्राह्मणान्प्रति सर्वथा पीडार्थमतिशयेन प्रवृद्धस्य ब्राह्मण एव शापाभिचारादिना सम्यङ् नियंतारः यस्मात्क्षत्रियो ब्राह्मणात्संभूतः ब्रह्मणो बाहुप्रसूतत्वान्नयाच २१ अद्भ्य इत्यादि जलब्राह्मणपाषाणेभ्यो अग्निक्षत्रियशस्त्राणि जातानि तेषां संबंधि तेजः सर्वत्र दहनाभिभवच्छेदात्मकं कार्यं कारणेषु जलब्राह्मणपाषाणेष्वेषु दहनाभिभवच्छेदरूपं कार्यं न करोति २२ नाब्रह्मेत्यादि ब्राह्मणरहितो न क्षत्रियो वर्द्धते शांतिकपौष्टिकव्यवहारेक्षणादिधर्मरहितत्वादिति एवं क्षत्रियरहितोपि ब्राह्मणो न वर्द्धते रक्षादिविना यागादिकर्मानुपपत्तेः किं तु ब्राह्मणः क्षत्रियश्च परस्परसंबंधे इह। लोके परत्र च धर्मार्थकाममोक्षावाप्त्या वृद्धिमेति दंडप्रकरणे चेयं ब्राह्मणस्तुतिः ब्राह्मणानामपराधिनामपि लघुदंडप्रयोगेन नियमार्थं यदा तु निष्ठुरं दर्शनेनाचिकित्स्यव्याधिना वा सन्नमृत्युर्भवति त

क्षत्रस्यातिप्रवृद्धस्य ब्राह्मणान्प्रति सर्वशः। ब्रह्मैव संनियंतृ स्यात्क्षत्रं हि ब्रह्मसंभवं २१ अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितं तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति २२। नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्धते ब्रह्म क्षत्रं च संपृक्तमिहामुत्र च वर्धते २३ द। त्त्वा धनं तु विप्रेभ्यः सर्वदंडसमुत्थितं पुत्रे राज्यं समासृज्य कुर्वीत प्रायणं रणे २४ एवं चरन्सदा युक्तो राजधर्मेषु पार्थिवः हितेषु चैव लोकस्य सर्वान्भृत्यान्नियोजयेत् २५ एषोऽखि। लः कर्मविधिरुक्तो राज्ञां सनातनः इमं कर्मविधिं विद्यात्क्रमशो वैश्यशूद्रयोः २६ वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहं वार्तायां नित्ययुक्तः स्यात्पशूनां चैव रक्षणे २७

दाह २३ दत्त्वा धनमित्यादि महापातकिधनव्यतिरिक्तं विनियुक्तावशिष्टं सर्वदंडधनं ब्राह्मणेभ्यो दत्त्वा पुत्रे राज्यं समर्प्य आसन्नमृत्युः फलातिशयप्राप्तये संग्रामे प्राणत्यागं कुर्वीत संग्रामासंभवे त्वनशनादिनापि २४ एवमित्यादि एवमध्यायद्वयोक्तराजधर्मेषु व्यवहरमाणो राजा सर्वदा यत्नवान्प्रजाहितेषु सर्वान्भृत्यान्नियोजयेदिति २५ एष इत्यादि एतद्राज्ञः कर्मानुष्ठानं पारंपर्यागतं नित्यमुक्तं इदानीं वैश्यशूद्रयोः क्रमेणैव वक्ष्यमाणमिदं कर्मानुष्ठानं जानीयात् २६ वैश्य इति वैश्यः कृतोपनयनपर्यंतसंस्कारो विवाहं कृत्वा जीविकार्थं वक्ष्यमाणायां पशुपालने च सर्वदा युक्तः स्यात् पशुरक्षणस्य वार्तांतर्गतत्वेपि प्राधान्यख्यापनार्थं पृथगभिधानं तथा चोत्तरश्लोकाभ्यां प्राधान्यं दर्शयति २७

उ॰
३८२

192

यथेत्यादि यथा पृथिवी सर्वाणि भूतानि स्थावरजंगमानि उत्कृष्टापकृष्टानि समं तुल्यं धारयति तथा कार्याकारिणः ताडितप्रियंकरानाख्यादिसर्वभूतानि रक्षणधनदानादिसमानेन धारयतः पृथिवीसंबंधि व्रतं भवति ।
१२ एतैरुक्तैरुपायैरन्यैश्चानुक्तैरपि स्वबुद्धिप्रभवैर्युक्तो राजानलसः सन् स्वराष्ट्रे चौरान् संनिवेशयेच्च परराष्ट्रे वसेतः तद्देशमागाम्य निकृन्तितान् भयप्रकाराच्च निगृह्णीयात् सोऽग्निर्भवति वायुश्चेत्येवमादिना पूर्वं सिद्धवदुक्तम् ।
आदिरूपत्वं यतः तद् हृदतद्गुणयोगेन स्तुत्यर्थं कृतमित्यपुनरुक्तिः १३ परामपीत्यादि कोपात्कल्पादिना प्रकृष्टामप्यापदं प्राप्तो राजा ब्राह्मणान्न प्रकोपयेत् यस्मात्ते रुष्टाः सबलवाहनमेनं सद्य एव शापाभिचाराभ्यां हन्युः १४ तथा हि यैरित्यादि यैर्ब्राह्मणैरभिशापेन सर्वभक्षोऽग्निः कृतः समुद्रश्चापेयजलः चंद्रक्षययुक्तः पश्चात्परिपूरितः तान्कोपयित्वा को न नश्येत् १५ किंच लोकानित्यादि ये स्वर्गादिलोकानन्या

यथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतं १२ एतैरुपायैरन्यैश्च युक्तो नित्यमतन्द्रितः स्तेनान् राजा निगृह्णीयात् स्वराष्ट्रे पर एव च १३ परामप्यापदं प्राप्य ब्राह्मणान्न प्रकोपयेत् ते ह्येनं कुपिता हन्युः सद्यः सबलवाहनं १४ यैः कृतः सर्वभक्ष्योऽग्निरपेयश्च महोदधिः क्षयी चाप्यायितः सोमः को न नश्येत्प्रकोप्य तान् १५ लोकानन्यान्सृजेयुर्ये लोकपालांश्च कोपिताः देवान्कुर्युरदेवांश्च कः क्षिण्वंस्तान्समृध्नुयात् १६ यानुपाश्रित्य तिष्ठन्ति लोका देवाश्च सर्वदा ब्रह्म चैव धनं येषां को हिंस्यात्ताञ्जिजीविषुः १७ अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् १८ ।
श्मशानेष्वपि तेजस्वी पावको नैव दुष्यति हूयमानश्च यज्ञेषु भूय एवाभिवर्धते १९ एवं यद्यप्यनिष्टेषु वर्तन्ते सर्वकर्मसु सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत् २०

न्यांश्च लोकपालान्सृजन्तीति संभाव्यन्ते देवांश्च शापेन मानुषान्कुर्वन्ति तान्पीडयन् कः समृद्धिं प्राप्नुयात्
१६ अपि च यानित्यादि यान्ब्राह्मणानध्ययनयाजनकर्मानाश्रित्य यज्ञोपास्ताहुतिरिति न्यायेन पृथिव्यादिलोकाश्च स्थितिं लभन्ते वेद एव च येषां अभ्युदयसाधनं तपार्जनाध्यापनादि धनोपायत्वाच्च धनं तान् जीवितुमिच्छन् को हिंस्यात् १७ एवं तर्हि अविद्वांसं ब्राह्मणमवमन्येत अत आह अविद्वानित्यादि यथा अप्राहितोऽग्निः महती देवता एवं मूर्खो विद्वांश्च ब्राह्मणः प्रकृष्टा देवता १८ श्मशानेष्वित्यादि
१९ एवमित्यादि यथाग्निर्महातेजाः श्मशाने शवदहनकार्येऽपि नैव दुष्टो भवति किंतु पुनरपि यज्ञे हूयमानाहुतिभिर्वर्धते एवमेवं कुत्सितकर्मस्वपि सर्वेषु यद्यपि ब्राह्मणाः प्रवर्तन्ते तथापि सर्वप्रकारेण ब्राह्मणाः पूज्याः यस्मात् प्रकृष्टदैवतं तत्समर्थत्वाच्छासन यथाश्रुतार्थं विरोधः शंकनीयः २०

म॰स्मृ॰
टी॰
११६ उ

विप्राणामित्यादि शूद्रस्य पुनर्वेदविदां गृहस्थानां स्वकर्मानुष्ठानेन यशोयुक्तानां विप्रादीनां या परिचर्या सैव
श्रेयसः स्वर्गादिश्रेयसो हेतुर्धर्मः ३३४ शुचिरुत्कृष्टेति बाह्याभ्यन्तरशौचोपेतः स्वजात्यपेक्षयोत्कृष्टद्विजाति
परिचरणशीलोऽपरुषवाक् निरहंकारः ब्राह्मणाद्याश्रयः तदभावे क्षत्रियवैश्याश्रयोऽपि स्वजाते
रुत्कृष्टां जातिमाप्नोति ३३५ एष इत्यादि एष वर्णानां चतुर्णामनापदि कर्मविधिः शुभो धर्मः उक्तः
आपद्यपि हि यस्त्वेषां धर्मस्तं संकीर्णसंभवश्रवणादूर्ध्वं क्रमेण शृणुत ३३६ इति मनुटीकायां ९
गौडे नन्दनवासिनाम्नि सुजनैर्वन्द्ये वरेन्द्र्यां कुले विप्रो भट्टदिवाकरस्य तनयः कुल्लूकभट्टोऽभवत् स
ध्यायद्ग्रामे मनुस्मृतिपरिज्ञानाय वृत्तिः स्फुटा तेनेयं क्रियते हिताय विदुषां मन्वर्थमुक्तावली मा
नवकृत्तावर्ण्यास्ते याव्याख्यामयात्र न चोद्धृताः प्राचीनाप्यपि किं विरुद्धमाख्याहृ णामशेषाणां वृषय शूद्र
धर्मानन्तरं संकीर्णानां च संभवमिति प्रतिज्ञातत्वात् तस्मिन्वाच्ये वर्णाभ्य संकीर्णानां तु मनुर्वाक्यं

विप्राणां वेदविदुषां गृहस्थानां यशस्विनां। शुश्रूषैव तु शूद्रस्य धर्मो नैश्रेयसः परः ३३४ शुचिरुत्कृष्टशु
श्रूषुर्मृदुवागनहंकृतः ब्राह्मणाद्याश्रयो नित्यमुत्कृष्टां जातिमश्नुते ३३५ एषोऽनापदि वर्णानामुक्तः
कर्मविधिः शुभः आपद्यपि हि यस्तेषां क्रमशस्तन्निबोधत ३३६ इति मानवे धर्मशास्त्रे नवमोऽध्यायः
९ अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः प्रब्रूयाद्ब्राह्मणस्त्वेषां नेतराविति निश्चयः १ स
र्वेषां ब्राह्मणो विद्याद्वृत्त्युपायान्यथाविधि प्रब्रूयादितरेभ्यश्च स्वयं चैव तथा भवेत् २ वैशेष्यात्प्र
कृतिश्रैष्ठ्यान्नियमस्य च धारणात् संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः ३

त्वादार्यत्रैवर्णिकस्य प्रधानधर्ममध्ययनं ब्राह्मणस्य चाध्यापनमनुवदति ब्राह्मणादयस्त्रयो वर्णा अध्यय
नांगभूतकर्मानुष्ठातारो वेदं पठेयुः एषां मध्ये ब्राह्मण एवाध्यापनं कुर्यात् न क्षत्रियवैश्यौ अयं निश्च
यः प्रब्रूयाद्ब्राह्मणस्त्वेषामित्यनेनैव क्षत्रियवैश्ययोरध्यापननिषेधसिद्धौ नेतराविति पुनर्निषेधव
चनं प्रायश्चित्तगौरवार्थं किंच १ सर्वेषां वर्णानां जीवनोपायान्यथाशास्त्रं ब्राह्मणो जानीयात् तेभ्यश्चो
पदिशेत् स्वयं च यथोक्तवृत्तिनियमाननुतिष्ठेत् २ अत्रार्थवादः जात्युत्कर्षात् प्रकृतिः कारणं हिरण्य
गर्भोत्तमांगरूपकारणोत्कर्षात् नियम्यतेऽनेनेति नियमो वेदः अध्यापनव्याख्यानादिप्रकारविषयवे
दधारणात् अत एव ब्राह्मणस्यैव धारणादिति अविस्मृतवेदधारणेनेत्यर्थः ३ उक्तं गोविन्दराजस्तु स्ना
तकव्रतानां धारणादिति व्याख्यातवान् न तत्क्षत्रियादिसाधारणम् संस्कारस्योपनयनाख्यस्य क्षत्रिया
द्यपेक्षया कालस्य च विधानेन विशेषात् वर्णानामध्यापनवृत्त्युपदेशात् ब्राह्मणस्य प्रभुः ३

कु॰
११६

293

प्रजापतिरित्यादि यस्माद्ब्रह्मा पशून्सृष्ट्वा रक्षणार्थं वैश्याय दत्तवान् रक्षणीयाः पशव इति पूर्वं स्यात्तद्वादः ब्राह्मणाय राज्ञे च सर्वाः प्रजा ब्राह्मणाय राज्ञे च दत्तवानेतत्पुनः प्रसंगादुक्तं २८ न चेत्यादि पशुरक्षणं न करोमीति वैश्येनेच्छा न कर्तव्या अतः कृष्यादिवृत्तिसंभवेपि वैश्येन पशुरक्षणमवश्यं कर्तव्यं वैश्ये चेच्छति पशुरक्षणं नान्यः कारयितव्यः २९ मणीत्यादि मणिमुक्ताप्रवाललोहवस्त्राणां गंधानां कर्पूरादीनां रसानां लवणादीनामुत्तममध्यमानां देशकालापेक्षया मूल्योत्कर्षापकर्षौ वैश्यो जानीयात् ३० बीजानामिति बीजानां सर्वेषां वपनविधिज्ञः स्यात् इदं बीजमस्मिन्काले तत्र संहतं वा प्ररोहतीत्येवं तथा इदं क्षेत्रमिदं सस्यप्रदमित्यादि क्षेत्रगुणदोषज्ञः स्यात् मानयोगांश्च प्रस्थद्रोणादीन् तुलायोगांश्च सर्वान् तत्त्वतो जानीयात् यथान्यो न वंचयति ३१ सारासारमित्यादि इदमुत्कृष्टमिदमपकृष्टमिति एकजातीयानामपि द्रव्याणां ।

प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः २८ न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति वैश्ये चेच्छति नान्येन रक्षितव्याः कथंचन २९ मणिमुक्ताप्रवालानां लोहानां तान्तवस्य च गंधानां च रसानां च विद्यादर्घबलाबलं ३० बीजानामुप्तिवित्स्यात् क्षेत्रदोषगुणस्य च मानयोगांश्च जानीयात्तुलायोगांश्च सर्वशः ३१ सारासारं च भांडानां देशानां च गुणागुणान् लाभालाभं च पण्यानां पशूनां परिवर्धनं ३२ भृत्यानां च भृतिं विद्याद्भाषाश्च विविधा नृणां द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च ३३ धर्मेण च द्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमं दद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः ३४

एवं विशेषं जानीयात् तथा देशानां शाकपश्चिमादीनां किमल्पमूल्यं किं बहुमूल्यं चेति देशगुणदोषान् । ध्येत् विक्रेयद्रव्याणां च इयता कालेन इयांल्लाभ इयान् व्ययो वेति विद्यात् तथास्मिन्देशेस्मिन्काले च अनेन तृणौषधोदकादिना पशवो वर्धन्ते अनेन दोषं तदुत्पन्नं तदपि जानीयात् ३२ भृत्यानामित्यादि गोपालमाहिषपालादीनामिदमस्मै देयमिति देशकालकर्मानुरूपं वेतनं जानीयात् गौडदाक्षिणात्यादीनां च मनुष्याणां नानाप्रकारभाषास्तैः सह क्रयविक्रयार्थं जानीयात् तथा इदं द्रव्यमेवं स्थाप्यमनेन संयुक्तं चिरं तिष्ठतीति बुध्येत् तथा इदं द्रव्यमस्मिन्देशे काले च इयता विक्रीयत इति जानीयात् ३३ धर्मेणेत्यादि धर्मेण द्विकपञ्चकादिना प्रकारेण धनवृद्ध्यर्थं प्रकृष्टं यत्नं कुर्यात् हिरण्यादि दानमपेक्ष्याप्यन्नमेव प्राणिभ्यो विशेषेण दद्यात् ३४

क्षत्रियाच्छूद्रायां क्रूरायां क्रूरचेष्टः क्रूरकर्मरतिः क्षत्रशूद्रस्वभावस्तु उग्राख्यः पुत्रो जायते ९ ब्राह्मणस्य क्षत्रियादिवर्णत्रयस्त्रीषु क्षत्रियस्य वर्णद्वये वैश्यस्य च शूद्रायां वर्णत्रयाणामेते षट् पुत्राः सवर्णपुत्रकार्यापेक्षया अपसदा अपध्वस्ता निकृष्टाः स्मृताः एवमनुलोमानुक्त्वा प्रतिलोमानाह १० विवाहासंभवाद्ब्राह्मणकन्याग्रहणं स्त्रीमात्रप्रदर्शनार्थं ब्राह्मण्यां क्षत्रियाज्जातः सूतनामा पुत्रो जायते वैश्यात्क्षत्रियाब्राह्मण्योर्मागधवैदेहाख्यौ पुत्रौ भवत इति एषां च वृत्तयो मनुनैवाभिधास्यन्ते ११ शूद्राद्वैश्याक्षत्रियाब्राह्मणीषु क्रमेणायोगवः क्षत्ता नृणामधमश्चण्डालश्चेत्येते वर्णसंकरे ये जनयितव्यास्ते वर्णसंकरा जायन्ते १२ एकान्तरे वर्णे ब्राह्मणाद्वैश्यकन्यायामम्बष्ठः क्षत्रियाच्छूद्रकन्यायामुग्रः एतावानुलोम्येन यथा स्पर्शाद्यर्हौ तद्वदेकान्तरे प्रतिलोमजननेऽपि शूद्रात्क्षत्रियायां क्षत्ता वैश्याद्ब्राह्मण्यां वैदेहक एतावपि स्पर्शादियोग्यौ विज्ञेयौ एकान्तरोत्पन्नयोः स्पर्शाद्यभ्यनुज्ञानादनन्तरोत्पन्नानां सूतमागधायोगवानां स्पर्शा-

क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्। क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते ९ विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः। वैश्यस्य वर्णे चैकस्मिन् षडेतेऽपसदाः स्मृताः १० क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः। वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ ११ शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसंकराः १२ एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ। क्षत्तृवैदेहकौ तद्वत्प्रातिलोम्येऽपि जन्मनि १३ पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम्। ताननन्तरनाम्नस्तु मातृदोषात्प्रचक्षते १४ ब्राह्मणादुग्रकन्यायामावृतो नाम जायते। आभीरोऽम्बष्ठकन्यायामायोगव्यां तु धिग्वणः १५ आयोगवश्च क्षत्ता च चण्डालश्चाधमो नृणाम्। प्रातिलोम्येन।

दियोग्यत्वं सिद्धं भवति अतः चाण्डाल एवैकः प्रतिलोमजः स्पर्शादौ निरस्यते १३ मातृदोषादिति हेतुप्रदर्शनात् अनन्तरग्रहणमेकान्तरद्व्यन्तरोपलक्षणार्थं यद्द्विजातीनामनन्तरैकान्तरद्व्यन्तरजातिस्त्रीष्वानुलोम्येनोत्पन्नाः पूर्वमुक्ताः पुत्रास्तान् हीनजातिमातृदोषान्मातृजातिव्यपदेश्यान्वदन्ति ते मातापितृव्यतिरिक्तसंकीर्णजातीयत्वेऽपि मातृजातिव्यपदेशान्मातृजातिसंस्कारादिधर्मप्राप्त्यर्थं १४ क्षत्रियेण शूद्रायामुत्पन्ना उग्रा उच्यते सा चासौ कन्या चेति उग्रकन्या तस्यां ब्राह्मणादावृतो नाम जायते ब्राह्मणेन वैश्यकन्यायामुत्पन्ना अम्बष्ठी तस्यां ब्राह्मणादाभीराख्यो जायते शूद्रेण वैश्यायामुत्पन्ना आयोगवी तस्यां ब्राह्मणाद्धिग्वणो जायते १५ आयोगवः क्षत्ता चण्डालश्च मनुष्याणामधमा उत्पत्तेः यो ऽमुत्र मी वैश्यात्क्षत्रियाब्राह्मणीषु पुत्रकार्यादपगतास्त्रयः शूद्राज्जायन्ते पुत्रकार्यादपगता अतिपाद

294

ब्राह्मणादयस्त्रयो वर्णाः द्विजातयः तेषामुपनयनविधानात् शूद्रः पुनः चतुर्थो वर्ण एकजातिरुपनय नाभावात् पंचमः अनर्वर्णो नास्ति संकीर्णजातीनामश्वतरवत् मातापितृजातिव्यतिरिक्तजात्यन्तरत्वात् न वर्णत्वं अयं च वर्णसंख्योपदेशः शास्त्रसंव्यवहारार्थः ४ ब्राह्मणादिषु वर्णेषु चतुर्ष्वपि समानजातीयासु यथाशास्त्रं परिणीतास्वक्षतयोनिष्वानुलोम्येन ब्राह्मणेन ब्राह्मण्यां क्षत्रियेण क्षत्रियायामित्येवमनुक्रमेण जातास्ते मातापित्रोर्जात्या युक्तास्तज्जातीया एव ज्ञातव्याः आनुलोम्यग्रहणं चात्र मंदोपयोगमन्तरोत्तरउपयोगत्वेन गवाश्वादिवदवयवसन्निवेशस्य ब्राह्मणजात्यभिव्यञ्जकत्वस्याभावात् एतद्ब्राह्मण्या दिलक्षणं पुत्रस्य च पत्नीग्रहणाद्दस्यपत्नीजनितानां न ब्राह्मण्यादिजातिमत्त्वं तथा च देवलः द्वितीये नवयवः पित्रा सवर्णायां प्रजापतेर्यथवरेट् इति व्यातः शूद्रधर्मा सनातनः व्रतहीना असंस्कार्या सवर्णा सपिपेसताः उत्पादिताः सवर्णेन व्रात्या जातिबहिष्कृताः व्यासः ऊढाजातास्समानासु संस्कारास्स्युरनुलोमया याज्ञवल्क्योपि सवर्णेभ्यः सवर्णासु जायंते हि द्विजातयः इत्यभिधाय विन्नास्वेष विधिः स्मृतं ब्रुवाणः य

ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पंचमः ४ सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु आनुलोम्येन संभूता जात्या ज्ञेयास्त एव ते ५ स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान्सुतान् सदृशानेव तानाहुर्मातृदोषविगर्हितान् ६ अनन्तरासु जातानां विधिरेष सनातनः द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं विधिं ७ ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते निषादः शूद्रकन्यायां यः पारशव उच्यते ८

त्पादितस्यैव ब्राह्मणादिजातीयत्वं निश्चिकाय ५ आनुलोम्येनाव्यवहितवर्णजातीयासु भार्यासु द्विजातिभिः उत्पादिताः सुता यथा ब्राह्मणेन क्षत्रियायां क्षत्रियेण वैश्यायां वैश्येन शूद्रायां तान् मातृहीनजातीयत्वे दोषेण गर्हितान् पितृसदृशानेव तु पितृजातीयमन्वादय आहुः पितृसदृशग्रहणान्मातृजातेरुत्कृष्टाः पितृजातितो निकृष्टा ज्ञेयाः एतेषां च नामानि मूर्द्धावसिक्तमाहिष्यकरणाख्यानि याज्ञवल्क्योक्तानि वृत्तयश्चैषामुशनोक्ता हस्त्यश्वरथशिक्षाऽस्त्रधारणं च मूर्द्धावसिक्तानां नृत्यगीतनक्षत्रजीवनं सस्यरक्षा च माहिष्याणां द्विजातिशुश्रूषा धनधान्याध्यक्षता राजसेवा दुर्गान्तःपुररक्षा च पारशवोग्रकरणानामिति ६ एष पारम्पर्यगतो नित्यो विधिरनन्तरजातिभार्योत्पन्नानामुक्तः एकेन द्वाभ्यां वान्तराभ्यां व्यवहितासूत्पन्नानां यथा ब्राह्मणेन वैश्यायां क्षत्रियेण शूद्रायां द्व्यन्तरितानां धर्मादन्यं तं विधिं जानीयात् ७ कन्याग्रहणस्य ऊढायामित्यध्याहार्यं विन्नास्वेष विधिः स्मृतः इति याज्ञवल्क्येन स्फुटीकृतत्वा

म॰ स्मृ॰
टी॰
२८५

एते षडुक्ताः षट् प्रतिलोमाः स्वयोनिषु स्वतुल्योत्पत्तिषु यथा शूद्रेण वैश्यायां जातस्त्वायोगवस्त्वायोगव्यामे
व मातृजातौ च वैश्यायां प्रवरासु च क्षत्रियाब्राह्मण्योर्योनिषु चकारादधमयोरपि शूद्रजातौ सर्वे हि सदृशान्
वर्णान् जनयन्ति सदृशात्वं नापि त्वपेक्षया किं तु मातृजात्यादिषु चातुर्वर्ण्ये स्त्रीष्वेव पितृतोऽधिकगर्हितान् ।
पुत्रोत्पत्तेर्वैरूप्यमाणत्वात् सदृशान् पित्रधिकगर्हितान् स्वजातावपि जनयन्तीत्येतावदेव शास्त्रत्वात्
अनेन विधीयते किं त्वनन्तरवर्णोनोत्तमवर्णस्त्रीषु जनितत्वात् क्षत्रियपाङ्क्तिभ्य आयोगवादयः प्रतिलो
मजाः क्षत्रियपाङ्क्तिभ्यां मातापितृभ्यां तुल्याभ्यामपि जनितत्वादायोगवादादिर्ब्रह्महत्वं जनितेतरजनितो ब्रह्म
हत्वमातापितृजनितवत् अधिकदुष्ट एव कस्मात् यः शूद्राद्ब्राह्मण्यां द्विजातीयेन शूद्राद्ब्राह्मण्यादिषु स्वजाती
यासु जनितः पितृतुल्य एवोचितः न तु क्षत्रियपाङ्क्तिभ्यः प्रजनितो पितृत्या ॥ २७ ॥ यथा त्रयाणामित्यस्याह ।
यो द्विजातिषु वैश्यपर्यन्तेषु अनन्तरब्राह्मण्यस्यानुलोम्याद्द्विजत्वमुत्पद्यते स्वजातीयायां च द्विजो जायते एवं बाह्येष्व
पि वैश्यपर्यन्तक्षत्रियाभ्यां क्षत्रियाब्राह्मण्योर्जाते शूद्रवर्णापकर्षो भवति शूद्रजातिप्रतिलोमापेक्षया द्विजातिषु

एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु ॥ २७ ॥
यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते आनन्तर्यात् स्वयोन्यां तु तथा बाह्येष्वपि क्रमः
ते चापि बाह्यान् सुबहूंस्ततोऽप्यधिकदूषितान् परस्परस्य दारेषु जनयन्ति विगर्हितान् ॥ २९ ॥
यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते ॥ ३० ॥ प्र
तिकूलं वर्तमाना बाह्या बाह्यतरान् पुनः हीना हीनान् प्रसूयन्ते वर्णान् पञ्चदशैव तु ॥ ३१ ॥

त्वा प्रतिलोम त्रयायास्यार्थमिदं मेधातिथिस्तु द्विजत्वप्रतिपादकमेतेषां वचनं व्याख्यातवानर्थमित्याह
तत्र प्रतिलोमजास्तु धर्महीना इति गौतमेन संस्कारनिषेधात् ॥ २८ ॥ ते चायोगवादयः षट् परस्पर
जातीयासु भार्यासु बहूनात्मनोऽप्यधिकदुष्टान् षट्क्रियाबहिर्भूतान् जनयन्ति तद्यथा आयोगवः
क्षत्र्यामात्मनो हीनतरं जनयति तथा क्षत्तापि आयोगव्यामात्मनो हीनतरमुत्पादयति एवमन्येष्व
पि प्रतिलोमेषु द्रष्टव्यं ॥ २९ ॥ यथा ब्राह्मण्यां शूद्रोऽपकृष्टं चाण्डालाख्यं प्राणिनं जनयति एवं बाह्य
श्चाण्डालादिभ्योऽप्यपकृष्टं पुत्रं प्रसूयते तदेव विस्तारयति ॥ ३० ॥ अत्र मेधातिथिर्गोविन्दराजश्चोभौ
नं चतुर्वर्णेष्वा ब्राह्मण्यां चाण्डालक्षत्रायोगवाः शूद्रः सूता वैश्यात्स्वर्णेषु गर्हितः आत्मनो हीनतरा
न परस्परापेक्षया अपकृष्टोत्कृष्टान् पञ्चदश वर्णान् प्रभवान् संपादयति तद्यथा चाण्डालः शू
द्रायामात्मनो हीनतरं वैश्यात् क्षत्रियाब्राह्मण्योर्जाते पञ्चदश हीनं जनयति एवं वैश्यायां

३.
२८५

वैश्यात्क्षत्रियायां ब्राह्मण्यां मागधवैदेहौ क्षत्रियात्तु ब्राह्मण्यां सूत इत्येवं प्रातिलोम्येनापरेऽपि त्रयः पुत्रा अप
सदा जायन्ते १७ निषादात् शूद्रायां जातः जात्या पुक्कसो भवति निषाद्यां पुनः शूद्राज्जातः स कुक्कुटना
मा स्मृतः १८ शूद्रेण क्षत्रियायां जातः क्षत्ता क्षत्रियेण शूद्रायां जातोऽग्रस्तेन तस्यां जातः श्वपाक इति की
र्त्यते वैदेहकेन पुनर्वैश्यतो ब्राह्मण्यां जातेनाम्बष्ठ्यां ब्राह्मणाद्वैश्यायां जातायामुत्पन्नो वेण उच्यते
१९ द्विजातयः सवर्णासु स्त्रीषु यान्पुत्रानुत्पादयन्ति ते चेदुपनयनाख्यव्रतपरिहीना भवन्ति तद्
तान्कृतोपनयनान्व्रात्यानुपनयनासंस्कृतान्व्यपदिशेत् अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृता इति व्रात्याल क्ष
णं प्रतिलोमजपुत्रवत्तु पितृरूपकारात्तमाजप्रदेशानामार्यामस्मिन्संकीर्णप्रकरणे निर्दिष्टं २० व्रा
त्यात् ब्राह्मणात्सवर्णादिमनुष्ठत्वे ब्राह्मण्यां पापस्वभावो भूर्जकण्टको जायते तथावन्त्यवाटधान

वैश्यान्मागधवैदेहौ क्षत्रियात्सूत एव तु । प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः ॥ १७ ॥ जातो निषादा
च्छूद्रायां जात्या भवति पुक्कसः । शूद्राज्जातो निषाद्यां तु स वै कुक्कुटकः स्मृतः ॥ १८ ॥ क्षत्तुर्जातस्तथोग्रायां
श्वपाक इति कीर्त्यते । वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ॥ १९ ॥ द्विजातयः सवर्णासु जनयन्त्यव्रतां
स्तु यान् । तान्सावित्रीपरिभ्रष्टान्व्रात्यानिति विनिर्दिशेत् ॥ २० ॥ व्रात्यात्तु जायते विप्रात्पापात्मा भूर्जकण्टकः ।
आवन्त्यवाटधानौ च पुष्पधः शैख एव च ॥ २१ ॥ झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च । नटश्च करण
श्चैव खसो द्रविड एव च ॥ २२ ॥ वैश्यात्तु जायते व्रात्यात्सुधन्वाचार्य एव च । कारुषश्च विजन्मा च मैत्रः
सात्वत एव च ॥ २३ ॥ व्यभिचारेण वर्णानामवेद्यावेदनेन च । स्वकर्मणां च त्यागेन जायन्ते वर्णसंकराः ॥ २४ ॥
संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः । अन्योन्यव्यतिषक्ताश्च तान्प्रवक्ष्याम्यशेषतः ॥ २५ ॥ सूतो
वैदेहकश्चैव चाण्डालश्च नराधमः । मागधः क्षत्तृजातिश्च तथायोगव एव च ॥ २६ ॥

पुष्पधशैखा जायन्ते एकस्यैव चैतानि देशभेदप्रसिद्धानि नामानि २१ राजन्यात् व्रात्यात्सवर्णायां झल्लम
ल्लनिच्छिविनटकरणखसद्रविडाख्या जायन्ते एतान्यप्येकस्यैव नामानि २२ वैश्यात्पुनर्व्रात्यात्स
वर्णायां सुधन्वाचार्यकारुषविजन्ममैत्रसात्वताख्या जायन्ते एकस्यैवैतानि नामानि २३ ब्राह्मणादि
वर्णानामन्योन्यस्त्रीगमनेन सगोत्राद्यविवाह्याविवाहेनोपनयनरूपस्वकर्मत्यागेन वर्णसंकरा जा
यन्ते अतोऽस्मिन्प्रकरणे व्रात्यानामभिधानं २४ ये संकीर्णयोनयः प्रतिलोमेऽनुलोमे परस्परसंबं
धाज्जायन्ते तान्विशेषान्विशेषेण वक्ष्यामि २५ एते उक्तलक्षणाः सूतादयो जात्या मनून्यन्ते २६

म० स्मृ० टी० १९६

केशरचनादिप्रसाधनानां संवाहनादिदासकर्मजीवनं पाशादिबंधेन मृगादिवधाद्वृत्तिं तज्जीवनं सैरंध्रिनामा यं स्त्रीवर्णवाह्यरूपजानामिति शेषः केनचिद्दुत्तमाणोदस्युरायोगवीजातौ स्त्री द्वेएवं वैश्यायां जातायोगवनं पतिपतत्वा स्यामृगयादिमारणमार्गणं दैवपित्र्योपधार्यविदितव्यं ३२ वैश्यागूद्रायोगवीजातो वैदेहकः स पश्चकुलायामा योगव्यां मैत्रेयकं मधुरभाषणेन जनयति यः प्रातर्घंटावादनात्तु राजप्रभृतीनुत्तमजनान्स्तौति ३३ ब्राह्मणेन शूद्रायां जातो निषादः प्रागुक्तः स पञ्चकुलायामायोगव्यां मार्गवं दासापरनामानं नौव्यापारजीवनं जनयति यमार्यावर्तदेशनिवासिनः कैवर्तशब्देन कीर्तयंति ३४ एते सैरंध्रिमैत्रेयमार्गवाहीनजातीयास्त्र योमृतवस्त्रपरिधानास्तु रोहिष्यादिमत्स्यासायोगवीषुपितृभेदभिन्ना भवंति ३५ वैदेह्यामेव जायंतइति तत्रस्थाद्ध्याहारणगत अत्रापितदपेक्षयामेवं संबध्यते निषादाद्वैदेह्यां कारावारा व्यवस्थाश्चर्मच्छेदनकारी जायते

प्रसाधनोपचारज्ञमदासं दासजीवनं सैरंध्रं वागुरावृत्तिं सूते दस्युरयोगवे ३२ मैत्रेयकं तु वैदेहो माधूकं संप्रसूयते नॄन्प्रशंसन्नजस्रं यो घंटाताडोरुणोदये ३३ निषादो मार्गवं सूते दाशं नौकर्मजीवनं कैवर्तमिति यं प्राहुरार्यावर्तनिवासिनः ३४ मृतवस्त्रभृत्स्वनार्यासु गर्हितान्नाशनासु च भवंत्यायोगवीष्वेते जातिहीनाः पृथक्त्रयाः ३५ कारावरो निषादात्तु चर्मकारः प्रसूयते वैदेहकादंध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ३६ चांडालात्पांडुसोपाकस्त्वक्सारव्यवहारवान् आहिंडिको निषादेन वैदेह्यामेव जायते ३७ चांडालेन तु सोपाको मूलव्यसनवृत्तिमान् पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ३८ निषादस्त्री तु चांडालात्पुत्रमंत्यावसायिनं श्मशानगोचरं सूते बाह्यानामपि गर्हितं ३९ संकरे जातयस्त्वेताः पितृमातृप्रदर्शिताः प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः ४०

ते ग्रामप्रवेशानवासां कारावाराणां च चर्मच्छेदनं जीवनं वृत्तिरिनेनोक्तं वैदेहकादंध्रमेदाख्यौ ग्रामबहिर्वासिनौ भवतौ निर्दे शाद्वैदेहकेन च वैदेह्यां जातस्य गर्हितत्वे देहकस्योचितत्वात्कारावारा निषादजाते स्त्रीलोके सन्निधानात्कारा वराः निषादस्त्रियोरेवक्रमेणजायते ३६ वैदेह्यां चांडालात्पांडुसोपाकनामा वेणुव्यवहारजीवी जायते निषादेन च वैदेह्यामेवाहिंडिकाख्यो जायते अप्रसत्तु बंधनस्थानेषु वाह्यसंरक्षणादाबाहिंडिकानामितो शानसेतत्त्रिरत्ना समान मातापितृकत्वेपिकाभावरा हिंडिकयोर्वृत्तिभेदं संरक्षणार्थ यद्पदेशाभेदः ३७ शूद्रायां निषादेन जाता या पुक्कसा चांडालेन जनितः सोपाख्यः पापी सर्वदा साधुभिर्निंदितः मरणोचित पराधस्य मूलवधरूपव्यसनेन राजादेशेन मारणात्तेन वृत्तिर्यस्य जायते ३८ निषादस्त्री चांडालादंत्यावसायि संज्ञं चांडालादपि हीनं श्मशानवासिनं तद्वृत्तिं च जनयति ३९ वर्णसंकरविषयेजातयो ऽप्युपजन यित्री अयंजनक एवं जातीय इति एवं पितृमातृकथनपूर्वकं प्रदर्शितास्तया गूढाः प्रकटा वा ज्ञातव्याः स्वोचित

के० १९६

296

शूद्रस्त्रीतादपकृष्टं क्षत्रियाब्राह्मणीजाताभ्याम् उत्कृष्टं जनयति ततोऽपकृष्टं क्षत्रियायां ब्राह्मणीजाताद् उत्कृष्टं ज-
नयति ततोऽपि हीनं ब्राह्मण्यां जनयति एवं क्षत्रायोगवादपि चातुर्वर्ण्ये चतस्र उत्तरोत्तरजनयत इत्येते शूद्रप्रभवे-
भ्यश्चंडालक्षत्रायोगवेभ्यश्चातुर्वर्ण्ये द्वादशप्रभेदा उत्पद्यंते आत्मना च चंडालक्षत्रायोगवास्त्रय इत्येवं शूद्रप्र-
भवाः पंचदश संपद्यंते एवं वैश्यात्क्षत्रियब्राह्मणीप्रभवा अपि पंचदश संभवंति एवं वैश्यात्क्षत्रियब्राह्मणीप्रभवा
अपि पंचदश संपद्यंते एवं वैश्यात्क्षत्रियब्राह्मणीप्रभवा अपि पंचदश संभवंति एवं षष्टिश्चातुर्वर्ण्येन सह चतुःषष्टिः स-
प्रभेदाः संभवंति ते च परस्परागमनेनानंतानुवर्णाननुजनयंतीति तन्मनोहरं पूर्वश्लोके षण्णां प्रतिलोमजानां प्रकृत-
त्वात् न द्विजातिकथनार्थं तावत्ता एव अत्रापि श्लोके प्रतिकूलं वर्तमानाः इत्युपादानात् प्रतिलोममात्रविषयोऽयं श्लो-
को नानुलोमविषयः तदा चैवं वैश्यात्क्षत्रियब्राह्मणप्रभवाः पंचदश संभवंति एवं षष्टिरिति निःसंगत्वेन च संभ-
वमात्रेणैव षष्टिरुक्ता न तु ष्टतयाः शूद्रप्रभवाः योगवक्षत्तृचांडालाः एवं चतुर्वर्णपुत्रसंतानोपेताः पंचदश ग-
र्हिता इति वाच्यं यतो वैश्यक्षत्रियाभ्यामपि प्रतिलोमोत्पादितानां ब्राह्मण्यां हीनत्वात् एतैरपि चातुर्वर्ण्ये जनिता-
नां गर्हितत्वस्य तथा वा सतत्वात् संचातुर्वर्ण्य प्रसूयत इति मनुनैवानंतरं स्फुटमुक्तत्वात् पुत्राभ्यामपि तथैव व्या-
ख्यातव्यं चातुर्वर्ण्येन सह च चतुःषष्टिरिति च सर्वेषां वा प्रकृतत्वेन हि संकीर्णप्रकरणे शुद्धचातुर्वर्ण्यग्रहणमनु-
चितं किं च वर्णानां पंचदश प्रसूयंत इति श्रुयमाणे द्वादशजनानामुक्ता तेनात्मना चांडालक्षत्रायोगवास्त्रय इत्ये-
वं शूद्रप्रभवाः पंचदशेति न युक्तं अपि चात्मना सह पंचदश संपादयंतीति निःसंगत्वेन असमंजसत्वादात्मनः
पंचदश संपद्यंते इति च व्याख्याने अध्याहार एव दोषः तस्मादेवं व्याख्यायते प्रतिकूलं वर्तमानाः प्रतिलोमजाः
बाह्याः द्विजप्रतिलोमजेभ्योऽपि निकृष्टत्वात् शूद्रप्रभवा योगवक्षत्तृचांडालाः त्रयः पूर्वश्लोकादनुवर्तमाने चातु-
र्वर्ण्ये जाता एते षट् सहस्राणि तत्र क्षत्तृजात्युत्पन्ना सापि पितृतो गर्हितत्वाभिधानात्स्वापेक्षया तथा वा प्रतरास्म-
न्येकं पंचदश पुत्राञ्जनयंति तद्यथायोगवक्षत्रात् वर्ण्ये स्त्रीषु आयोगव्यां चात्मनिकृष्टान् पंचपुत्राञ्जनयंति
एवं क्षत्तृचांडालावपि प्रत्येकं पंच पुत्राञ्जनयतः एवं त्रयः पंचदश पुत्राञ्जनयंति तथा अनुलोम-
जेभ्यो हीना वैश्यक्षत्रियाप्रभवा मागधवैदेहकसूता आत्मापेक्षया हीनान् पूर्वं च चातुर्वर्ण्ये स्त्रीषु स्वजातौ
च प्रत्येकं पंच पुत्राञ्जनयंतो हीना अपि त्रयः पंचदश पुत्राञ्जनयंति एवं त्रिंशद् एते भवंति अथ वा बाह्याः
शास्त्रो हीनशब्दः प्रतिलोमजानाह एवं वा बाह्याश्चांडालक्षत्रायोगवैदेहमागधसूताः षट् यथोक्तमुत्कर्षात् प्र-
तिलोम्येन स्त्रीषु वर्तमाना बाह्यतराः पंचदश दशैव पुत्राञ्जनयंति तद्यथा चांडालः क्षत्रादिषु पंच तथा स्त्री-
षु वर्तमानो बाह्यतरान् पंचदशैव पुत्राञ्जनयंति तद्यथा चांडालः क्षत्रादिषु पंच सस्त्रीषु क्षत्ता योगवा-
दिषु चतसृषु आयोगवो वैदेह्यादिषु तिसृषु वैदेहो मागधीसूत्योर्मागधः सूतायां सूतस्त्व प्रतिलोमा-
भावात् प्रतिलोम्येन न जनयति एवमेते प्रातिलोम्येन पंचदशैव पुत्राञ्जनयंति पुनरिति निर्देशात् ही-

क्षत्त्रादीनां बिलवासिगोधादिवधबंधनं धिग्वणानां चर्मकरणं तद्विक्रयं च चर्मकरणं तद्विक्रियजीवनं धिग्व।
णानामित्यौशनसदर्शनात् अत एव कारावरेभ्यः पृथग्भेदः वेणानां कांस्यमुरजादिवाद्यभांडवादनं
४८ ग्रामादिसमीपे ख्यातवृक्षश्चैत्यद्रुमः तन्मूलेषु श्मशानपर्वतवनसमीपेषु वासी प्रकाशाः संतः स्वक
र्मभिः जीवंतो वसेयुः ४९ प्रतिश्रयो निवासः चांडालश्वपाकानां ग्रामाद्बहिः कर्तव्यः पात्रबहिःकृताः
कर्तव्याः यत्र लोहादिपात्रे तैर्भुक्तं तत्संस्कारेणापि न व्यवहर्तव्यं धनमेतेषां गर्दभश्वकुक्कुरादि न वृषा
दि ५० शववस्त्राणि भिन्नशरावादिषु च भोजनं लोहवलयादि चालंकरणं सर्वदा च भ्रमणशील।

क्षत्तोग्रपुक्कसानां तु बिलौकोवधबंधनं धिग्वणानां चर्मकार्यं वेणानां भांडवादनं ४८
चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च वसेयुरेते विज्ञाताः वर्तयंतः स्वकर्मभिः ४९ चांडा
लश्वपचानां तु बहिर्ग्रामात्प्रतिश्रयः अपपात्राश्च कर्तव्या धनमेषां श्वगर्दभं ५० वासां
सि मृतचैलानि भिन्नभांडेषु भोजनं कार्ष्णायसमलंकारः परिव्रज्या च नित्यशः ५१ न तैः स
मयमन्विच्छेत्पुरुषो धर्ममाचरन् व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ५२ अन्नमेषां परा
धीनं देयं स्याद्भिन्नभाजनं रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ५३ दिवा चरेयुः कार्यार्थं चि
ह्निता राजशासनैः अबांधवं शवं चैव निर्हरेयुरिति स्थितिः ५४ वध्यांश्च हन्युः सततं यथा
शास्त्रं नृपाज्ञया वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च ५५

297

त्वं धर्मानुष्ठानसमये चांडालादिश्वपाकैः सह दर्शनसंभाषणादिव्यवहारं न कुर्यात् तेषां ऋणदाना
दिव्यवहारः समानजातीयैः सहान्योन्यं स्यात् ५१ ५२ अन्नं चैषां परायत्तं साक्षाद्देयं न देयं किंतु प्रे
ष्यैर्भिन्नपात्रे च दातव्यं ते रात्रौ ग्रामनगरेषु न पर्यटेयुः ५३ दिवा ग्रामादौ क्रयविक्रयादिकार्यार्थं राजा
दिकृतचिह्नाङ्किताः संतः पर्यटेयुः अबांधवं शवं ग्रामाद्बहिर्निर्हरेयुरिति शास्त्रमर्यादा ५४ शा
स्त्रानतिक्रमेण शूलारोपणादिना सर्वदा राजाज्ञया हन्युः तद्वस्त्रशय्यालंकारानि गृह्णीयुः ५५

द्विजातीनां समानजातीयास्तु जातास्तथानुलोम्येनोत्पन्ना ब्राह्मणेन क्षत्रियावैश्ययोः क्षत्रियेण वैश्यायामेवं षट् पु
त्रा द्विजधर्माण उपनेयाः तान् अनन्तरानामपि त्रिष्विति मनुनोक्तं जातिव्यपदेशार्थं न संस्कारार्थमिति कस्यचित्
धर्मः स्यात् अतः एषां द्विजातिसंस्कारार्थमिदं वचनं ये पुनरन्ये द्विजात्युत्पन्नाश्चापि सूतादयः प्रतिलोमजास्ते
शूद्रधर्माणस्तेषामुपनयनं नास्ति ४० ते स्वजातिजानन्तरजाः तपःप्रभावेन विश्वामित्रवद्बीजप्रभावेन
ऋष्यशृङ्गवत् कृतत्रेतादौ युगे मनुष्येषु मध्ये जात्युत्कर्षं गच्छन्ति अपकर्षं च वक्ष्यमाणहेतुमाह ४२ उ
मावक्ष्यमाणाः क्षत्रियजातय उपनयनादिक्रियालोपेन ब्राह्मणानां च याजनाध्यापनप्रायश्चित्तार्थं दर्श
नाभावात् शनैः शनैः लोके शूद्रत्वं प्राप्ताः ४२ पौण्ड्रादिदेशोद्भवाः क्षत्रियाः सन्तः क्रियालोपादिना शू

स्वजातिजानन्तरजाः षट् सुता द्विजधर्मिणः शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः ४०
तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे उत्कर्षं चापकर्षं च मनुष्येष्विह जन्मतः ४२ शनकै
स्तु क्रियालोपादिमाः क्षत्रियजातयः वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ४२ पौण्ड्रका
श्चौड्रद्रविडाः काम्बोजा यवनाः शकाः पारदाः पह्लवाश्चीनाः किराता दरदाः खसाः ४३ मु
खबाहूरुपज्जानां क्रियालोपाद्य ते बहिः म्लेच्छवाचोऽर्यवाचो वा सर्वे ते दस्यवः स्मृताः ४४ ये
द्विजानामपसदा ये चापध्वंसजाः स्मृताः ते निन्दितैर्वर्तयेयुर्द्विजानामेव कर्मभिः ४५ सू
तानामश्वसारथ्यमम्बष्ठानां चिकित्सितं वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः ४६
मत्स्यघातो निषादानां त्वष्टिस्त्वायोगवस्य च मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनं ४७

द्रत्वमापन्नाः ४३ ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रियालोपादिना जात्यन्तरे या बाह्यजातयस्ताः म्लेच्छभाषा
युक्ता आर्यभाषोपेता वा सर्वे दस्यवः स्मृताः ४४ ये द्विजानामनुलोम्येनोत्पन्नाः षडेतेऽपसदाः स्मृताः
इति तेषामपि पितृतो जात्यन्तरेनापसदशब्देन प्रागभिधानात् अपध्वंसजाः प्रतिलोमजाः ते च द्विजा
त्युपकारकैरेव निन्दितैर्वक्ष्यमाणकर्मभिर्जीवेयुः ४५ सूतानामश्वदमनयोजनादिनाश्वसारथ्यं जी
वनार्थमम्बष्ठानामर्थमम्बष्ठानां कायशल्यादिचिकित्सा वैदेहकानामन्तःपुररक्षा मागधानां स्थलजलप
थरक्षा ४६ निषादानामन्त्यानां मत्स्यवधः आयोगवस्य काष्ठतक्षणं मेदान्ध्रचुञ्चुमद्गूनामारण्यपशु
मारणं चञ्चुमद्गू च वैदेहकवद्क्षत्रियायां ब्राह्मणेन जातौ वैधायनेनोक्तौ वैधायनीवं वधिष्ठा वैश्य क्षत्रियेण

म॰ स्मृ॰ टी॰ २५८

एवं शूद्रोऽन्त्यस्त्रीकन्यायां शूद्रो ब्राह्मणतामेतीति ब्राह्मणः शूद्रतामेतीति ब्राह्मणेन ब्राह्मण्यां शूद्रायां समुत्पन्नः पारशवः स यदि शुभामनुत्कृष्टो केवलं शूद्रोद्वाहेन तस्यां शुभां समेव जनयति सोऽपि केवलं शूद्रोद्वाहेन परं शुभां समेव जनयति। सोऽप्येवं तदा सप्तमे ब्राह्मणः सप्तजन्मप्राप्तक्रमेण बीजनिकर्षेण तु केवलं शूद्रतां प्राप्नोति एवं च क्षत्रियाद्वैश्याच्च शूद्रायां जातस्योत्कर्षापकर्षौ जानीयात् किं तु जातेरपकर्षेणोत्कर्षो युगे ज्ञेयः पञ्चमे सप्तमे वेति याज्ञवल्क्यदर्शनात् क्षत्रियाज्जातस्य पञ्चमे जन्मनि उत्कर्षापकर्षौ बोधव्यौ वैश्याज्जातस्य तृतीये अपकर्षा तु याज्ञवल्क्येनापि विवाहोद्वहेन पक्षान्तरस्यासंगृहीतत्वात् द्रष्टव्या मेधातिथिबोधाच्च तृतीये जन्मनि उत्कर्षापकर्षौ ज्ञेयौ अन्ये तु क्षत्रियेन ब्राह्मणेन वैश्यायां जातस्य पञ्चमे जन्मनि उत्कर्षापकर्षौ क्षत्रियायां जातस्य तृतीये क्षत्रियेन वैश्यायां जातस्य तृतीये एव ६४ एकः शूद्रायामप[illegible]याऽनार्यायामपि ब्राह्मणेन ज्ञः अन्यो

शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्। क्षत्रियाज्जातमेवं तु विद्याद्वैश्यात्तथैव च ६४ अनार्यायां समुत्पन्नो ब्राह्मणात्तु यदृच्छया। ब्राह्मण्यामप्यनार्यात्तु श्रेयस्त्वं क्वेति चेद्भवेत् ६५ जातो नार्यामनार्यायामार्यादार्यो भवेद्गुणैः। जातोऽप्यनार्यादार्यायामनार्य इति निश्चयः ६६ तावुभावप्यसंस्कार्याविति धर्मो व्यवस्थितः। वैगुण्याज्जन्मनः पूर्व उत्तरः प्रतिलोमतः ६७ सुबीजं चैव सुक्षेत्रे जातं संपद्यते यथा। तथार्याज्जात आर्यायां सर्वं संस्कारमर्हति ६८

298

ब्राह्मण्यां शूद्राज्जातः तयोर्मध्ये कतरो ज्यायान् श्रेयस्त्वमिति चेत् संशय एव यस्मात् संशयबीजं च यथा बीजोत्कर्षात् ब्राह्मणात् शूद्रायां जातः साधुः शूद्र एव क्षत्रियोत्कर्षात् ब्राह्मण्यामपि शूद्रेण जातः किमिति साधुः शूद्रो न स्यात् तत्र निर्णयमाह ६५ शूद्रायामपि ब्राह्मणेन जातः स्मृतेः पाकयज्ञादिभिर्गुणैरनुष्ठीयमानैः यज्ञैः प्रशस्तो भवति शूद्रेण ब्राह्मण्यां जातः प्रतिलोमोत्पन्नतया शूद्रधर्मेष्वप्यनधिकारत्वात् अप्रशस्य इति निश्चयः न्यायतो नोऽप्यर्थविवचनं प्रामाण्यादुत्तवोध्यते ६६ तौ पारशवचाण्डालौ द्वावप्यनुपनेयावित्येवं व्यवस्थितः शास्त्रमर्यादा पूर्वः पारशवः शूद्राज्जातत्वेन जातिवैगुण्यादनुपनेयः प्रातिलोम्येन शूद्रेण ब्राह्मण्यां जातत्वात् चण्डालः तत्त्वेनानुपनेयः ६७ यथा शोभनं बीजं शोभने क्षेत्रे जातं समृद्धं भवति एवं द्विजातेर्द्विजातिस्त्रियां सवर्णायामानुलोम्येन क्षत्रियावैश्ययोर्जातः सर्वमेव संस्कारं क्षत्रियवैश्यसंस्कारं च सर्वं श्रौतं स्मार्तं वार्हतीति न पारशवचाण्डालाविति पूर्वोक्तसदृशार्थमेतत् दर्शनात्

मं॰ २५८

वर्णापेतेन मनुष्यवर्णसंकरजातं लोके सत्यापितेनाज्ञातं प्रतएवार्यसदृशं वस्तुतः पुनरनार्यं निन्दितयोरनुरू
पाभिश्चेष्टाभिर्वक्ष्यमाणाभिर्निश्चिनुयात् ॥५६॥ निष्ठुरत्वं हिंसात्वं विहितानुष्ठानत्वं संकरजातमस्मिन्
लोके प्रकटीकुर्वन्तीति यस्मात् ॥५७॥ असौ च संकरजो दुष्टयोनिः पितृसंबंधि दुष्टस्वभावत्वं सेवते मातृसं
बंधि वा न कदाचिदसौ आत्मकारणं गोपयितुं शक्नोति ॥५८॥ महाकुलप्रसूतस्यापि यस्य योनिसंकरः
प्रच्छन्नो भवति स मनुष्यो जनकस्वभावं स्तोकं प्रचुरं वा सेवत एव ॥५९॥ यस्मिंश्च राष्ट्रे एते वर्णसंकराः
वर्णानां दूषका जायंते तद्राष्ट्रं राष्ट्रवासिजनैः सह शीघ्रमेव विनश्यति तस्मात् राज्ञा वर्णसंकरो नि
वारणीयः ॥६०॥ गोब्राह्मणस्त्रीबालानामन्यतमस्यापि परित्राणार्थं दृष्टप्रयोजनानपेक्षः प्राणत्या

वर्णापेतमविज्ञातं नरं कलुषयोनिजं आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत् ॥५६॥ अ
नार्यता निष्ठुरता क्रूरता निःक्रियात्मता पुरुषं व्यंजयंतीह लोके कलुषयोनिजं ॥५७॥ पित्र्यं वा
भजते शीलं मातुर्वोभयमेव वा न कथंचन दुर्योनिः प्रकृतिं स्वां नियच्छति ॥५८॥ कुले मुख्ये
पि जातस्य यस्य स्याद्योनिसंकरः संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु ॥५९॥ यत्र त्वेते परिध्वं
साज्जायंते वर्णसंकराः राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति ॥६०॥ ब्राह्मणार्थे गवा
र्थे वा देहत्यागोऽनुपस्कृतः स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणं ॥६१॥ अहिंसा सत्यम
स्तेयं शौचमिन्द्रियनिग्रहः उद्गं समासकं धर्मं चातुर्वर्ण्ये ब्रवीन्मनुः ॥६२॥ शूद्रायां ब्राह्म
णाज्जातः श्रेयसा चेत्प्रजायते अश्रेयाञ्छ्रेयसीं जातिं गच्छत्यासप्तमाद्युगात् ॥६३॥

गः प्रतिलोमजानां स्वर्गप्राप्तिकारणं ॥६१॥ अहिंसा हिंसा[illegible] अभिधानं ।
अस्तेयं अन्यायेन परधनस्याग्रहणं शौचं मृज्जलादिभिः [illegible] इन्द्रियसंयम एवं धर्मं संक्षिप्तं चा
तुर्वर्ण्येऽनुष्ठेयं मनुराह प्रकरणसामर्थ्यात् संकीर्णानामप्ययं धर्मो वेदितव्यः उदाहृतानां सर्ववर्णे
षु तुल्यत्वादिति एतल्लक्षणव्यतिरेके किमपि ब्राह्मणादिदर्शयितुमाह ॥६२॥ शूद्रायां ब्राह्म
णाज्जातः पारशवाख्यो वर्णः प्रजायते इति सामर्थ्यात् स्त्रीरूपा सा यदि ब्राह्मणेनोढा सती प्रसूते
सा च दुहितरमेव जनयति सापि अन्येन ब्राह्मणेनोढा सती दुहितरमेव जनयति सापि एवमेव सप्तमे
युगे जन्मनि पारशवाख्यो वर्णो बीजप्राधान्यात् ब्राह्मणत्वं प्राप्नोति आसप्तमाद्युगादित्यभि

ब्राह्मणापेक्षया क्षत्रियस्याध्यापनयाजनप्रतिग्रहाख्यानि त्रीणि कर्माणि निवर्त्तन्ते अध्यापनयाग
दानानि तु तस्यापि भवंति ७६ यथा क्षत्रियस्याध्यापनादीनि निवर्त्तन्ते तथैव वैश्यस्यापि शास्त्रव्यवस्थापकस्मा
न्मनुः प्रजापतिः तौ क्षत्रियवैश्यौ प्रति तानि त्रीणि कर्माणि कर्त्तव्यत्वेन नोक्तवान् एवं च वैश्यस्याप्यध्य
यनयागदानानि भवंति ७७ शस्त्रं खड्गादि अस्त्रं बाणादि एतद्धारणं प्रजारक्षार्थं क्षत्रियस्य वृत्तिः वाणि
ज्यपशुपालनकर्षणानि वैश्यस्य जीवनार्थानि धर्म्मार्थाः पुनरनयोर्दानाध्ययनयागा भवंति ७८ वेदा
भ्यासोऽध्यापनं तु सर्वाभ्यासहोपदेशात् तत्र ब्राह्मणस्य प्रजारक्षणं क्षत्रियस्य कृषिवाणिज्यपशुरक्षणानि वै
श्यस्य एतान्येषां स्वस्वकर्मसु श्रेष्ठानि ७९ अधुनापद्धर्ममाह यथोक्तेनाध्यापनादिना स्वकर्मणा
ब्राह्मणो नियतकर्मनिष्ठोऽन्नं कुटुम्बसंवर्द्धनपूर्वकमजीवन् क्षत्रियकर्मणा ग्रामनगररक्षणादिना जीवे

त्रयो धर्म्मा निवर्त्तन्ते ब्राह्मणात्क्षत्रियं प्रति अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः ७६ वैश्यं प्र
ति तथैवैते निवर्त्तेरन्निति स्थितिः न तौ प्रति हि तान्धर्मान्मनुराह प्रजापतिः ७७ शस्त्रास्त्रभृत्त्वं।
क्षत्रस्य वणिक्पशुकृषीर्विशः आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः ७८ वेदाभ्यासो ब्राह्म।
णस्य क्षत्रियस्य च रक्षणं वार्त्ताकर्म्मैव वैश्यस्य विशिष्टानि स्वकर्मसु ७९ अजीवंस्तु यथोक्तेन
ब्राह्मणः स्वेन कर्म्मणा जीवेत्क्षत्रियधर्म्मेण स ह्यस्य प्रत्यनन्तरः ८० उभाभ्यामप्यजीवंस्तु कथं।
स्यादिति चेद्भवेत् कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकां ८१ वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः
क्षत्रियोऽपि वा हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ८२ कृषिं साध्विति मन्यन्ते सा वृत्तिः स।
द्विगर्हिता भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखं ८३

त् यस्मात् क्षत्रियधर्म्मोऽस्य सन्निकृष्टा वृत्तिः ८० ब्राह्मणस्ववृत्तिक्षत्रियवृत्तिभ्यामुभाभ्यामप्यजीवन् केन प्र।
कारेण वर्त्तेतेति यदि संशयः स्यात्तदा कृषिपशुरक्षणमाश्रित्य वैश्यवृत्त्या जीवेत् कृषिगोरक्षग्रहणं वा
णिज्यस्यापि दर्शनार्थं तथा च वक्ष्यति सत्यानृतं तु वाणिज्यं ते चेत्कृष्यादि ब्राह्मणस्य यदि वृत्तिः असत्प्रतिग्रहस्य
नान्तराभ्यां जीवेदिति अनापद्येव विहितत्वात् सप्रतिकृष्यादेर्बलाबलमाह ८२ ब्राह्मणः क्षत्रियो वा
वैश्यवृत्त्यापि जीवन् भूमिष्ठभूमिष्ठजन्तुहिंसाबहुलां बलीवर्दादिपराधीनां कृषिं यत्नतः सर्जयत् अतः पशुपा।
लनादि यथावत्कृषिः कार्येति दृष्टमतः क्षत्रियोऽपि चेत् आपदि नान्यत्क्षत्रियस्यापद्यात्मीयवृत्त्यभावे वैश्यवृत्तिरुक्त
त्वीति गम्यते ८२ साध्विदं जीवनमिति कृषिं केचिन्मन्यन्ते सा पुनर्जीविका साधुभिर्निन्दिता यस्मादलङ्कु
दालादि लोहमुखं काष्ठं भूमिं भूमिष्ठजन्तूंश्च हन्ति ८३

799

केचित्संपूजिता बीजं प्रशंसंति स्तुवंति हि हरिण्यामुत्पन्नस्य ऋष्यशृंगादेर्ब्रह्ममुनित्वदर्शनात् अपरे पुनः क्षेत्रं
स्तुवंति क्षेत्रस्वामिनः पुत्रत्वदर्शनात् अन्ये पुनर्बीजक्षेत्रे उभे अपि स्तुवंति सबीजस्य क्षेत्रे सम्यग्वृद्धिदर्शनात्
एतस्मिन्मतिभेदे वक्ष्यमाणेयं व्यवस्था ज्ञेया ६९ ऊषरक्षेत्रे बीजमुत्सृष्टं फलमदत्वैवांतराले विनश्यति शो
भनमपि क्षेत्रं बीजरहितं स्थलमेव केवलं भवेत् न तत्र सस्यमुत्पद्यते तस्मात्प्रत्येकं निंद्यं सबीजं चैव क्षे
त्रमिति प्रागुक्तमुभयप्राधान्यमेवाभिमतं ७० इदानीं बीजप्राधान्यार्थं पक्षे दृष्टांतमाह यस्माद्बीजमा
हात्म्येन तिर्यग्जातिहरिण्यादिजाता अपि ऋष्यशृंगादयो मुनित्वं प्राप्ताः पूजिताश्चाभिवादनादिना वेद।
ज्ञानादिना प्रशस्ताश्च तस्माद्बीजं प्रशस्यते प्रकृष्यते एतच्च बीजप्राधान्यनिगमनं बीजयोन्योर्मध्ये बीजोत्कृ
ष्टा जातिः प्रधानमित्येवं परतया बोध्यं ७१ शूद्रं द्विजातिकर्म्मकारिणं द्विजातिं च शूद्रकर्म्मकारिणं ब्र
ह्माऽवधार्य न समौ नाऽसमाविति प्रोवाच यतः शूद्रो द्विजातिकर्म्मापि न द्विजातिसमः तस्यानधिकारित्वे

बीजमेके प्रशंसंति क्षेत्रमन्ये मनीषिणः । बीजक्षेत्रे तथैवान्ये तत्रेयं तु व्यवस्थितिः ॥ ६९ अक्षे
त्रे बीजमुत्सृष्टमंतरैव विनश्यति । अबीजकमपि क्षेत्रं केवलं स्थंडिलं भवेत् ॥ ७० यस्मा
द्बीजप्रभावेन तिर्यग्जा ऋषयोऽभवन् । पूजिताश्च प्रशस्ताश्च तस्माद्बीजं प्रशस्यते ॥ ७१ अ
नार्यमार्यकर्म्माणमार्यं चानार्यकर्म्मिणं । संप्रधार्याऽब्रवीद्धाता न समौ नासमाविति ॥ ७२
ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिताः । ते सम्यगुपजीवेयुः षट्कर्म्माणि यथाक्रमं ॥ ७३
अध्यापनमध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहश्चैव षट्कर्म्माण्यग्रजन्मनः ॥ ७४ ष
ण्णां तु कर्मणामस्य त्रीणि कर्म्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥ ७५

द्विजातिकर्म्माचरितेऽपि तत्साम्याऽभावात् एवं शूद्रकर्म्मापि द्विजातिर्न शूद्रसमो निषिद्धसेविनोऽपि जा
त्युत्कर्षाऽनपायात् नाप्यसमो निषिद्धाचरणे शुभाचरणेपि उभयोः परमत्वात् तस्माद्यद्यस्य विहि
तं तत्तेन कर्त्तव्यमिति संकरपर्यंत वर्णधर्म्मोपदेशः ७२ इदानीं ब्राह्मणादीनामापद्धर्म्मं प्रतिपा
दयितुमाह ये ब्राह्मणा ब्रह्मप्राप्तिकारणं ब्रह्माध्ययननिष्ठाः स्वकर्म्मानुष्ठाननिरताश्च ते षट्कर्म्मा
णि वक्ष्यमाणान्यध्यापनादीनि क्रमेण सम्यगनुतिष्ठेयुरित्यर्थः तानि दर्शयति ७३ अध्यापनाऽध्ययने
सांगस्य वेदस्य तथा यजनं याजनं दानं प्रतिग्रहश्चेति एतानि षट्कर्म्माणि ब्राह्मणस्य विहितानि ७४ ।
अस्य ब्राह्मणस्य एषामध्यापनादीनां कर्म्मणां मध्यात् याजनाध्यापनविशुद्धप्रतिग्रहैर्जीवनं लिप्सेत द्विजा
तिभ्यो धनं लिप्सेत प्रशस्तेभ्यो द्विजोत्तम इति वचनात् निर्दोषात् द्विजातेः प्रतिग्रह इत्येतानि जीवना

उक्तदोषेभ्यो मांसादिभ्योऽन्येषां प्रसिद्धानां पण्यानां उद्धृतानां तत्प्रमादात् दध्यादिरसैः संसृष्टानां सप्तरात्रिविक्रये
णवैश्यभावं प्राप्नोति ९२ रसा गुडादयो रसैर्घृतादिभिः परिवर्तनीयाः न तु लवणं पुनः रसान्तरेण परिव
र्तनीयम् सिद्धान्नं चामान्नेन परिवर्तनीयं तिला धान्येन प्रस्थः प्रस्थेनैवं तत्समाः परिवर्तनीयाः ९३ क्षत्रि
योऽप्यापदं प्राप्य तेनेमाभिधायसर्वेणापि पण्याभिधानात् ब्राह्मणगोचरतया निषिद्धेनापि रसादिविक्रयेण वै
श्यवत् जीवेत् न पुनः कदाचित् ब्राह्मणजीविकामाश्रयेत् न केवलं क्षत्रियो यावदन्योऽपि ९४ योनिकृष्टजा
तिः सन् लोभादुत्कृष्टजातिविहितकर्मभिः जीवेत् तं राजा गृहीतसर्वस्वं कृत्वा तत्क्षणादेव देशान्निःसारयेत् ९५
विगुणमपि स्वकर्म कर्तुं न्याय्यं न परकीयं सगुणमपि स्वजातिविहितकर्मणा जीवन् तत्क्षणादेव स्वजा

इतरेषां तु पण्यानां विक्रयादिह कामतः ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ९२ रसा रसैर्निमातव्या
न त्वेव लवणं रसैः कृतान्नं चाकृतान्नेन तिला धान्येन तत्समाः ९३ जीवेदेतेन राजन्यः सर्वेणाप्यनयं गतः
न त्वेव ज्यायसीं वृत्तिमभिमन्येत कर्हिचित् ९४ यो लोभादधमो जात्या जीवेदुत्कृष्टकर्मभिः तं राजा निर्धनं कृ
त्वा क्षिप्रमेव प्रवासयेत् ९५ वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः परधर्मेण हि जीवन् सद्यः पतति जा
तितः ९६ वैश्योऽजीवन् स्वधर्मेण शूद्रवृत्त्यापि वर्तयेत् अनाचरन्नकार्याणि निवर्तेत च शक्तिमान् ९७
अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनां पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः ९८
यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः तानि कारुककर्माणि शिल्पानि विविधानि च ९९
वैश्यवृत्तिमनातिष्ठन् ब्राह्मणः स्वे पथि स्थितः अवृत्तिकर्षितः सीदन्निमं धर्मं समाचरेत् १००

तितः पततीति दोषोपवर्णनार्थः ९६ वैश्यः स्वजात्याजीवितुमशक्नुवन् शूद्रवृत्त्यापि द्विजातिशुश्रूष
याउच्छिष्टभक्षणाः कुर्वन् वर्तेत निस्तीर्णापत्तः शूद्रवृत्तेर्निवर्तेत ९७ शूद्रो द्विजातिशुश्रूषां क
र्तुमक्षमः क्षुदवसन्नात्मकलत्रः सूपकारादिकर्मभिः जीवेत् ९८ पूर्वोक्तकारुककर्मविशेषाभि
धानार्थमिदं यैः कर्मभिः कृतैः द्विजातयः परिचर्यन्ते तानि च तक्षणादीनि शिल्पानि च चित्रले
खादीनि नानाप्रकाराणि कुर्वीत ९९ ब्राह्मणः स्वमभावे पीडितोऽप्यवसादं गच्छन् क्षत्रियवैश्यवृ
त्तिमनातिष्ठन् वरं स्वधर्मो विगुण इत्युक्तत्वात् स्वमार्ग एव वर्तमानः दुर्वृत्त्या पीड्यमानः इमं धर्ममनु
तिष्ठेत् अनन्तरं विगुणप्रतिग्रहादिरूपं समभवेऽपकृष्टमाश्रयणं तेषां १००

200

ब्राह्मणस्य क्षत्रियस्य चात्मीयवृत्तेरभावे धर्म्मैकश्रुतिपथोत्तरं निष्ठानवं त्यजतो वैश्यपणेन यद्विक्रेतव्यं द्रव्यजातं तद्वि
वर्द्धितं वक्ष्यमाणवर्जनीयं धनवृद्धिकरं विक्रेयं तन्निवर्जनीयमित्याह ॥ ८४ ॥ सर्वान्वक्ष्यमाणान् तथा सिद्धा
न्नं तिलपाषाणलवणपशुमानुषान्न विक्रीणीयात् रसत्वेन लवणस्यापि निषेधे सिद्धे विशेषेण निषेधो दो
षगौरवार्थः पुनर्वचनं प्रायश्चित्तगौरवार्थः पुनर्वचनं एवमन्यस्यापि पृथङ्निषेधो व्याख्येयः ॥ ८५ ॥ सर्वं
तान्तवं निर्मितं वस्त्रं कुसुंभादिरक्तं वर्जयेत् शाणक्षौमाविकानि तु यद्यपि विलोमभवानि च ययलोहितान्यपि भवे
युः तथापि न विक्रीणीत तथापि फलमूलगुडूच्यादीन् वर्जयेत् ॥ ८६ ॥ जललोहविषमांससोमान्तो
र्दधिगुडघृततिलचूर्णं दर्भान् तथा गन्धवन्ति द्रव्याणि कर्पूरादीनि क्षौद्रं माक्षिकं मधु मधूच्छिष्टं शस्त्रं ।

इदं तु वृत्तिवैकल्यात्त्यजतो धर्मनैपुणम् । विट्पण्यमुद्धृतोद्धारं विक्रेयं वित्तवर्द्धनं ॥ ८५ ॥ सर्वान्
रसानपोहेत कृतान्नं च तिलैः सह । अश्मनो लवणं चैव पशवो ये च मानुषाः ॥ सर्वं च तान्तवं
रक्तं शाणक्षौमाविकानि च । अपि चेत्स्युररक्तानि फलमूले तथौषधीः ॥ ८६ ॥ अपः शस्त्रं विषं ।
मांसं सोमं गन्धांश्च सर्वशः । क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥ ८७ ॥ आरण्यांश्च प
शून्सर्वान्दंष्ट्रिणश्च वयांसि च । मद्यं नीलीं च लाक्षां च सर्वांश्चैकशफांस्तथा ॥ ८८ ॥ काममु
त्पाद्य कृष्यां तु स्वयमेव कृषीवलः । विक्रीणीत तिलाञ्छुद्धान्धर्मार्थमचिरस्थितान् ॥ ८९ ॥
भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः । कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ॥ ९० ॥
सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ॥ ९१ ॥

णेव मधूच्छिष्टमिति याज्ञवल्क्यवचनात् पठितं वर्जयेत् ॥ ८७ ॥ आरण्यान्सर्वान्पशून्हस्त्यादीन् दंष्ट्रिण
श्च व्याघ्रादीन् तथा पक्षिमद्यनीलज्रं तृणैकशफांश्च अश्वादीन्न विक्रीणीत ॥ ८८ ॥ कर्षकः स्वय
मेव कर्षणेन तिलानुत्पाद्य द्रव्यान्तरेणामिश्रितानुत्पन्नानन्तरमेव न तु लाभार्थं कालान्तरं धृतान् वि
क्रीणीत निषिद्धस्यापि तिलविक्रयस्य धर्मार्थं प्रतिप्रसवः ॥ ८९ ॥ भोजनाभ्यञ्जनाद्दानव्यतिरिक्तं यदन्य
त् विक्रयादि निषिद्धं तिलानां करोति तेन पितृभिः सह मज्जति कुक्कुरपुरीषे ॥ ९० ॥ मांसलाक्षालवणा
विक्रयैः ब्राह्मणस्तत्क्षणादेव पतति दोषगौरवख्यापनार्थमेतत् पञ्चानामेव महापातकानां पातनमहे
तुनाव क्षमाणत्वात् क्षीरविक्रयात् त्र्यहेण शूद्रतां प्राप्नोति तदपि दोषगौरवात् प्रायश्चित्तगौरवाख्या

याजनाध्यापने अत्यन्तात्प्राक् च उपनयनसंस्कृतानां द्विजानामेव क्रियेते प्रतिग्रहः पुनर्निकृष्टजातेः शूद्रादपि क्रियते तस्माद्दोषतोऽप्यगर्हितः ८ याजनाध्यापनेन यदुत्पन्नं तत्पापं प्रायश्चित्तप्रकरणे वक्ष्यमाणेन जपहोमेन यच्चासत्प्रतिग्रहजनितं पुनः प्रतिगृहीतद्रव्यत्यागेन मासं गोष्ठे पयः पी। त्वेत्येवमादितपसा वक्ष्यमाणेनापगच्छति ९ ब्राह्मणः स्ववृत्त्याजीवन् यतस्ततउञ्छयवानकणादि श्यापि शिलोञ्छं गृह्णीयात् न तु तत्संभवे असत्प्रतिग्रहं कुर्यात् यस्मात्प्रतिग्रहाच्छिलः श्रेष्ठः सं जपा त्वकाले कणैकैकधान्योच्चयनं शिलः तत उञ्छः श्रेष्ठः एकैकधान्यादिगुडकोच्चयनमुञ्छः १० स्नातकैः ब्राह्मणैर्धनाभावात् क्षुधार्तैर्वा धर्मार्थिर्वा वसनादेरपेक्षकैः सवर्णराजन्यतिरिक्तधान्य वस्त्रादिकुप्यं धनं यत्ताम्रयुक्तं हिरण्यादापि आयत्नकरणे तत्त्विषोप्युञ्छास्तवतो याचितव्यः

याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनां प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः ८
जपहोमैरपैत्येनो याजनाध्यापनैः कृतं प्रतिग्रहनिमित्तं तु त्यागेन तपसैव च ९ शि।
लोञ्छमप्याददीत विप्रोऽजीवन्यतस्ततः प्रतिग्रहाच्छिलः श्रेयांस्ततोऽप्युञ्छः प्रशस्यते १०
सीदद्भिः कुप्यमिच्छद्भिः धने वा पृथिवीपतिः याच्यः स्यात्स्नातकैर्विप्रैरदित्संस्त्यागमर्हति
अकृतं च कृतात्क्षेत्राद्गौरजाविकमेव च हिरण्यं धान्यमन्नं च पूर्वं पूर्वमदोषवत् १२ स
प्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च १३

त्वदातेनेष्टुतिकृपणत्वेनावधारितः स्यात्तेन याचनीयः मेधातिथिगोविन्दराजौ तु त्यागमर्हतीति तस्य देशान्निर्वासनमिति व्याचक्षाते ११ अकृतमनुप्तसस्यक्षेत्रं कृतात् उप्तसस्यात् प्रतिग्रहे दोषरहितं तथा गोछागमेषहिरण्यधान्यसिद्धान्नानां मध्यात् पूर्वमसंभवे तत्तेषां पूर्वपूर्वाभावे परः परो ग्राह्यः १२ दायादयः सप्त धनागमाः यथाधिकारं धर्म्यादनपेताः तत्र दायः क्रमागतधनं लाभो निध्यादेः मैत्रादिलब्धस्य च क्रयः प्रसिद्धः एतत्त्रयं सर्वेषामपि धर्म्याः याज्यत्वेन तु क्षत्रियस्य धर्म्यो जयः प्रयोगः वृद्ध्याधनस्य कर्मयोगः कृषिवाणिज्ये एते क्रमयोगे वैश्यस्य धर्म्यो सत्प्रतिग्रहो ब्राह्मणस्य धर्म्यः एवं चैषां धर्मतवचनादेतदभावे अन्येषामापद्विहितेषु वृत्तिकर्मसु प्रवर्तितव्यं तदभावे चापद्विहितेषु प्रवृत्तेष्वपि न दोषमिहोच्यते १३

ब्राह्मणः आपद्ग्रस्तः सर्वेभ्यो निन्दिततरेभ्यः क्रमेण प्रतिग्रहं कुर्यात् अर्थान्तरोपन्यासो नामालंकारः य
स्मात्पवित्रं गंगाजलादि रथ्योदकादिना न दुष्यति एतच्छास्त्रान्नोपपद्यते यस्मात् १०२ ब्राह्म
णानामापदि गर्हिताध्यापनयाजनप्रतिग्रहैरधर्मो न भवति यस्मात्स्वभावतः पवित्रत्वेनाग्न्यर्कतु
ल्यास्ते २ यः प्राणात्ययं प्राप्तः प्रतिलोमजादप्यन्नमश्नाति सोऽन्तरिक्षमिव कर्दमेन पापेन न लिप्यते
अत्र परकृतिरूपोऽर्थवादः ३ ऋषिरजीगर्ताख्यो बुभुक्षितः पुत्रं शुनःशेपनामानं स्वयं विक्रीतवा
न् एतच्च बह्वृचब्राह्मणे शुनःशेपे व्यक्तं ४ वामदेवाख्यो मुनिर्धर्माधर्मविचक्षणः क्षुधार्तः प्राण

सर्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयं गतः पवित्रं दुष्यतीत्येतद्धर्मतो नोपपद्यते १०२
नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात् दोषो भवति विप्राणां ज्वलनार्कसमा हि ते २
जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः आकाशमिव पंकेन न स पापेन लिप्यते ३ अ
जीगर्त्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः न चालिप्यत दोषेण क्षुत्प्रतीकारमाचरन् ४
श्वमांसमिच्छन्नार्त्तोऽत्तुं धर्माधर्मविचक्षणः प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान् ५
भारद्वाजः क्षुधार्त्तस्तु सपुत्रो विजने वने बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो महातपाः ६
क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीं चांडालहस्तादादाय धर्माधर्मविचक्षणः ७
प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ८

रक्षणार्थं श्वमांसादिकमिच्छन् दोषेण न लिप्तवान् ५ भारद्वाजाख्यो मुनिर्महातपस्वी पुत्रस
हितो विजने वने उषित्वा तु क्षुत्पीडितो वृधनाम्नः तक्ष्णो बह्वीर्गाः प्रतिगृहीतवान् ६ स विश्वामि
त्रो धर्माधर्मज्ञः क्षुत्पीडितः चांडालहस्ताद्गृहीत्वा कुक्कुरजघनमांसं भक्षितुमध्यवसितवान् ७
गर्हितानामध्यापनयाजनप्रतिग्रहाणां मध्याद्ब्राह्मणस्य परत्र प्रतिग्रहो निकृष्टः परलोके निःस्पृहे
वः तस्मादापदि प्रथमं निंदिताध्यापनयाजनयोः प्रवर्तितव्यं तदसंभवे त्वसत्प्रतिग्रह इत्येवं प
रमेतत् अत्र हेतुमाह ८

म॰ स्मृ॰ टी॰ २०२

गौडे नंदनिवासिनाम्नि सुजनैर्वंद्ये वरेंद्र्यां कुले श्रीमद्भट्टदिवाकरस्य तनयः कुल्लूकभट्टोऽभवत् । इतिसे नमनुस्मृतौ शिवपुरेध्याये तथैकादशोरम्भेयं क्रियते हिताय विदुषां मन्वर्थमुक्तावली ॥ अनन्तरः प्र वक्ष्यामि प्रायश्चित्तविधिं शुभं इति प्रायश्चित्तं वक्तव्यं तत्प्राप्तिस्थाय तत्सांतानिकादिभ्यो देयमिति प्रा देः कः प्रस्तावः उच्यते दानेनाकार्यकारिणां इति प्रागुक्तत्वाद्दानेन च धनिर्मिकं सप्तादीनामश क्तत्वनिमादेर्वत्सर्गाणात्वाच्च प्रकृष्टप्रायश्चित्तात्मकदानपात्रोपन्यासः प्रकृतोपयुक्त एव वक्ष्यति श्रम । धर्मेव्यतिरिक्तत्वाय प्रायश्चित्तादिनैमित्तिकधर्मकथनार्थत्वाच्चास्याध्यायस्य प्रायश्चित्तादिनैमित्तिकस्य धर्मस्या त्रोपन्यासोयुक्तः संतानप्रयोजनार्थत्वात् विवाहस्य सांतानिको विवाहार्थी यक्ष्यमाणोऽवश्यकर्त्ता ।

सांतानिकं यक्ष्यमाणमध्वगं सार्ववेदसं गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः १
नवैतान्स्नातकान्विद्याद्ब्राह्मणान्धर्मभिक्षुकान् निःस्वेभ्यो देयमेतेभ्यो दानं विद्यावि शेषतः २ एतेभ्यो हि द्विजाग्र्येभ्यो देयमन्नं सदक्षिणं इतरेभ्यो बहिर्वेदि कृतान्नं देय मुच्यते ३ सर्वरत्नानि राजा तु यथार्हं प्रतिपादयेत् ब्राह्मणान्वेदविदुषो यज्ञार्थं चैव दक्षिणां ४

यक्ष्योति ष्टोमादिकयागं चिकीर्षुः अध्वगः पांथः सार्ववेदसः सर्वस्वदक्षिणविश्वजिद्यागकृद्वि । यागुरोर्ग्रासाच्छादनाद्यर्थं प्रयोजनं यस्य स गुर्वर्थः एवं पितृमात्रर्थावपि स्वाध्यायार्थी स्वाध्याया ध्ययनकालीनाच्छादनाद्यर्थी ब्रह्मचारी उपतापी रोगी राजरोगाद्यभिभूतः एतान्नव ब्राह्मणान्ध र्मभिक्षाशीलान्स्नातकान्जानीयात् एतेभ्यो निर्धनेभ्यो याचमानेभ्यो गोहिरण्यादि दीयते इति दानं विद्याविशेषानुरूपेण दद्यात् १ २ एतेभ्यो नवभ्यो ब्राह्मणश्रेष्ठेभ्यः अंतर्वेदि सदक्षिणमन्नं दातव्यं एतद्व्यतिरिक्तेभ्यः पुनर्सिद्धान्नं बहिर्वेदि देयमिति नोपदिश्यते धनदाने तु नियमः ३ राजा पुनः सर्वाणि रत्नानि माणिक्यमुक्तादीनि यागोपयोग्यानि च दक्षिणार्थं धनं विद्यानुरूपेण वेदविदु

२०२

ये पुनः शूद्राः स्वधर्मवेदिनो धर्मप्राप्तिकामास्त्रैवर्णिकानामाचारमनिषिद्धमाश्रिताः तेन नमस्का
रेण मंत्रेण पंचयज्ञान्न हापयेदिति याज्ञवल्क्यवचनात् केवलनमस्कारमंत्रेण मंत्रांतररहितं
पंचयज्ञादिधर्मानुष्ठानमप्रमवर्णयंति ख्यातिं च लोके लभंते १२७ परगुणानिंदकः शूद्रो यथा
यथाहिंसात्म्याचारमनिषिद्धमनुतिष्ठति तथा तथा जनैरनिंदित इहलोके उत्कर्षः स्मृतः स्वर्गा
दिलोकं च प्राप्नोति १२८ धनार्जनसमर्थेनापि शूद्रेण पोष्यवर्गसंवर्द्धनपंचयज्ञाद्युचितादधिक

धर्मेप्सवस्तु धर्मज्ञाः सतां धर्ममनुष्ठिताः मंत्रवर्ज्जं न दुष्यंति प्रशंसां प्राप्नुवंति च १२७
यथा यथा हि सद्वृत्तमातिष्ठत्यनसूयकः तथा तथेमं चामुं च लोकं प्राप्नोत्यनिंदितः १२८
शक्तेनापि हि शूद्रेण न कार्यो धनसंग्रहः शूद्रोपि धनमासाद्य ब्राह्मणानेव बाधते १२९
एते चतुर्णां वर्णानामापद्धर्माः प्रकीर्तिताः यान्सम्यगनुतिष्ठंतो व्रजंति च परां गतिं १३०
एष धर्मविधिः कृत्स्नश्चातुर्वर्ण्यस्य कीर्तितः अतऊर्द्ध्वं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभं
१३१ इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां दशमोध्यायः १०

बहुधनसंचयो न कर्तव्यो यस्माच्छूद्रो बहुधनं प्राप्य शास्त्रानभिज्ञत्वेन धनमदात् शुश्रूषाया अक
रणेन ब्राह्मणानेव पीडयत्यतो निषेधानुवादः १२९ अमी चतुर्णां वर्णानामापद्यनुष्ठेया धर्मा उ
क्ताः यान्सम्यगाचरंतो विहितानुष्ठानान्निषिद्धावर्जनाच्च निःपापतया ब्रह्मज्ञानलाभेन परमां ग
तिं मोक्षलक्षणां लभंते १३० अयं चतुर्णां वर्णानां धर्माचारसंग्रहः कथितः अतः परं प्रायश्चि
त्तानुष्ठानं शुभमभिधास्यामि १३१ इति श्रीवारेंद्रनंदनवासीयभट्टदिवाकरात्मजकुल्लूकभट्टवि

यज्ञस्य द्वित्र्यङ्गवैकल्ये सति तान्यङ्गानि त्रीणि द्वे वाङ्गानि निर्वर्तयितुं द्रव्याभावे निर्विशंकं शूद्रस्य गृहात् बलेन चौर्येण वाहरेत् यस्मात् शूद्रस्य कश्चिदपि यज्ञसंबन्धो नास्ति न यज्ञार्थं धनं शूद्राद्भिक्षेतेति वक्ष्यमाणप्रतिषेधः शूद्राद्याचनस्यैव न बलग्रहणादेः १२ योऽनाहिताग्निर्गोशतपरिमाणधनः आहिताग्निरपि वा योऽग्निष्टोमादियाजी गोसहस्रपरिमाणधनः तयोरपि गृहाभ्यां प्रकृतमङ्गद्वयं वा यष्टिं ब्राह्मणक्षत्रियाभ्यामपि ब्राह्मणेनाहरेत् क्षत्रियस्य तु दस्युनिष्क्रियावत् ब्राह्मणस्वहरणं निषेधयिष्यति १३ प्रतिग्रहादिना आदानं धनग्रहणं नित्यं यस्य स आदाननित्यो ब्राह्मणः तस्मादिष्टापूर्तदानरहितादनुपयुक्ताङ्गद्वययाचितो याचितोऽपि अददतो बलेन चौर्येण वाहरेत् तथाकृतेऽस्य यशः ख्यातिः प्रकाशते धर्मश्च वर्द्धते १४ सायं प्रातर्भोजनोपदेशात् त्रिरात्रोपवासे सप्तमे च तस्मिन्नहनि प्रातः सप्तमे भक्ते प्राप्ते दाना

आहरेत्त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः । न हि शूद्रस्य यज्ञेषु कश्चिदस्ति परिग्रहः ॥ १२ ॥
योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः । तयोरपि कुटुम्बाभ्यामाहरेदविचारयन् ॥ १३ ॥
आदाननित्याच्चादातुराहरेदप्रयच्छतः । तथा यशोऽस्य प्रथते धर्मश्चैव विवर्द्धते ॥ १४ ॥
तथैव सप्तमे भक्ते भक्तानि षडनश्नता । अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ॥ १५ ॥
खलात्क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते । आख्यातव्यं तु तत्तस्मै पृच्छते यदि पृच्छति ॥ १६ ॥
ब्राह्मणस्वं न हर्तव्यं क्षत्रियेण कदाचन । दस्युनिःक्रिययोस्तु स्वमजीवन्हर्तुमर्हति ॥ १७ ॥
योऽसाधुभ्योऽर्थमादाय साधुभ्यः संप्रयच्छति । स कृत्वा प्लवमात्मानं संतारयति तावुभौ ॥ १८ ॥
धनं यद्यज्ञशीलानां देवस्वं तद्विदुर्बुधाः । अयज्वनां तु यद्वित्तमासुरस्वं तदुच्यते ॥ १९ ॥

दिवसं यदि भोजनं न लब्धं तदा हीनकर्मण एकदिनपर्याप्तमन्नं चौर्यादिनाहर्तव्यं १५ धान्यादिमर्दनस्थानात् क्षेत्राद्वा गृहाद्वा यतो वान्यस्मात्प्रदेशात् धान्यं हीनकर्मसंबन्धि लभ्यते ततो हर्तव्यं यदि चासौ धनस्वामी पृच्छति किं निमित्तं त्वया कृतमिति तदा तस्मै पृच्छते निमित्तं वक्तव्यं चौर्यादि १६ उक्तेष्वपि निमित्तेषु क्षत्रियेण ब्राह्मणस्य धनं न कदाचिदपि चौर्यं कृत्वा न हर्तव्यं समानन्यायतया वैश्यशूद्राभ्यामुत्कर्षजातितो न हर्तव्यमप्रतिषिद्धत्वात् विहितानुष्ठायिनोः पुनर्ब्राह्मणक्षत्रिययोः स्वं तादृगापदि क्षत्रियो हर्तुमर्हति १७ योऽसाधुभ्यो हीनकर्मादिभ्य उक्तेभ्योऽनुक्तेभ्योऽभिहितेषु उक्तानुरूपं यज्ञयागादिसाधनं कृत्वा साधुभ्यो यागादिभ्यो ददाति स यथा हि यतितस्माद्यागात् यस्मै ददाति तदुभौ नौपहारादिनैव तदा वापितावात्मानं प्लवं कृत्वा दुःखा

यः सभार्यः संतत्यादिनिमित्तमंतरेणाऽपरं विवाहं भिक्षित्वा करोति तस्य रतिमात्रं फलं धनदातुः तदुत्प
न्नानि यान्यपत्यानि भवंतीति निंदातिशयेनैवंविधेन द्रव्यं याचित्वान्यो विवाहः कर्त्तव्यः नाप्येवंविधाय
नियमतो धनं देयमित्यर्थः ५ यस्यावश्यपोष्यभरणपर्याप्तं वर्षत्रयपर्याप्तं तदधिकं वा भक्तादि स्यात्
स काम्यसोमयागं कर्त्तुमर्हतीति नित्यस्य पुनर्यथाकथंचिदवश्यकर्त्तव्यतावगमान्नायं निषेधः अत एवमा
तैसौमिकौ मे विवितिनित्यविषयमुक्तत्वात् ६ त्रैवार्षिकधनादल्पतरे धने सति यः सोमयागं करो
ति तस्य प्रथमसोमयागो नित्योऽपि न संपन्नो भवति सुतरां द्वितीययागः काम्यः ७ यो बहुधनत्वाद्दानश
क्तः सन्नवश्यभरणीये पितृमात्रादिज्ञातिजने दौर्गत्ययुक्ते दुःखोपेते सति स्वोदार्यार्थमन्येभ्यो ददाति स

कृतदारोऽपरान्दारान्भिक्षित्वा योऽधिगच्छति रतिमात्रं फलं तस्य द्रव्यदातुस्तु संततिः ५ य
स्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये अधिकं वापि विद्येत स सोमं पातुमर्हति ६ अतस्त्वल्पी
यसि द्रव्ये यः सोमं पिबति द्विजः सपीतसोमपूर्वोऽपि न तस्याप्नोति तत्फलं ७ शक्तः परज
ने दाता स्वजने दुःखजीविनि मध्वापातो विषास्वादः स धर्मप्रतिरूपकः ८ भृत्यानामुप
रोधेन यः करोत्यौर्द्धदेहिकं तद्भवत्यसुखोदर्कं जीवतोऽस्य मृतस्य च ९ वृद्धौ च मातापित
रौ साध्वी भार्या शिशुः सुतः अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् यज्ञश्चेत्प्रतिरुद्धः ।
स्यादेकेनांगेन यज्वनः ब्राह्मणस्य विशेषेण धार्मिके सति राजनि १० यो वैश्यः स्याद्बहु ।
पशुर्हीनक्रतुरसोमपः कुटुंबात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये ११

तस्य दानविशेषो धर्म इति च्छंदकोऽनत्वधर्म एव मध्वापातो मधुरोपक्रमः अधर्मपर्यवसायित्वात्
विषास्वादश्चांते नरकफलत्वात् तस्मादेतन्न कर्त्तव्यं ८ पुत्रदाराद्यवश्यपोष्यपीडनेन यत्पार ।
लौकिकं धर्मबुद्ध्या दानादि करोति तदस्य दातुर्जीवतो मृतस्य च दुःखफलं भवति दृष्टादृष्टफ
लं न भवति पूर्वश्लोकोक्तमादिदृष्टार्थदानप्रतिषेधार्थं उक्तः अयं तु अदृष्टार्थदानप्रतिषेधार्थः ९ यदा क्ष
त्रियादेर्यजमानस्य विशेषतो ब्राह्मणस्य यज्ञ उत्तरांगसमाप्तौ सत्यामेकेनांगेनासंपूर्णः स्यात्तदा यो वै
श्यो बहुपश्वादिधनः पाकयज्ञादिरहितोऽसोमपायी स्यात्तस्य गृहात्तदंगोचितद्रव्यं बलेन चौ
र्येण वा हरेत् एतच्च धर्मप्रधाने सति राजनि कार्यं स हि पापाच्चापयमनुतिष्ठंतमनुगृह्णाति १० ११

म॰स्मृ॰
टी॰
२०४

धर्मज्ञो ब्राह्मणः किंचिदप्यपहर्तृत्वेन राज्ञः कथयेत् अपि तु स्ववीर्येणैव स्वमारणाभिचारादिना तानपकारि-
णो निगृह्णीयात् ननु स्वकीयधर्मविरोधादपहृतादपकारकाणां स्वत्वभिचारादिनदोषायेत्येवं पर-
मेतत् न त्वभिचारो विधीयते राजनिवेदवेदिनत्वान्निषिध्यते ३० यस्मात्स्वसामर्थ्याच्च पराधीनराजसा-
मर्थ्यापेक्षया स्वसामर्थ्यमेव स्वाधीनतया बलीयः तस्मात्स्ववीर्येणैव शत्रून् ब्राह्मणो निगृह्णीयात् किं तत्
स्ववीर्यमित्याह ३१ अथर्ववेदे दृष्टाङ्गिरसाख्या अभिचारश्रुतीरविचारयन् कुर्यात् तदर्थमभिचारम-
नुतिष्ठेदित्यर्थः यस्मादभिचारमंत्रोच्चारणजपात्मिका ब्राह्मणस्य वागेव शस्त्रकार्यकरणात् स्त्रं तेन
न ब्राह्मणः शत्रून्निगृह्णीयात् ३२ क्षत्रियः स्वपौरुषेण शत्रुतः परिभवलक्षणमात्मन आपदं निस्तरे-
त् वैश्यशूद्रौ पुनः प्रतिकर्तृके धनदानेन ब्राह्मणस्त्वभिचारात्मकैः जपहोमैः ३३ विधाता विहितक-

न ब्राह्मणो वेदयेत किंचिद्राजनि धर्मवित् स्ववीर्येणैव तांछिष्यान्मानवानपकारिणः ३० स्ववी-
र्याद्राजवीर्याच्च स्ववीर्यं बलवत्तरं तस्मात्स्वेनैव वीर्येण निगृह्णीयादरीन्द्विजः ३१ श्रुतीरथ-
र्वाङ्गिरसीः कुर्यादित्यविचारयन् वाक्शस्त्रं वै ब्राह्मणस्य तेन हन्यादरीन्द्विजः ३२ क्षत्रियो बा-
हुवीर्येण तरेदापदमात्मनः धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः ३३ विधाता शासि-
ता वक्ता मैत्रो ब्राह्मण उच्यते तस्मै नाकुशलं ब्रूयान्न शुष्कां गिरमीरयेत् ३४ न वै कन्या न
युवतिर्नाल्पविद्यो न बालिशः होता स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथा ३५ नरके हि पत-
न्त्येते जुह्वतः स च यस्य तत् तस्माद्वैतानकुशलो होता स्याद्वेदपारगः ३६ प्राजापत्यमदत्त्वा-
श्वमग्न्याधेयस्य दक्षिणां अनाहिताग्निर्भवति ब्राह्मणो विभवे सति ३७

र्मणामनुष्ठाता पुत्रशिष्यादीनां शास्ता प्रायश्चित्तादिधर्माणां वक्ता सर्वभूतमैत्रीप्रधानो ब्राह्मण उ-
च्यते तस्मै निगृह्णतामयमित्यादिनानिष्टं ब्रूयात् नाप्याक्रोशवाचं वा मदंरदिदुरूपां तस्योच्चारयेत्
३४ कन्या अनूढा अकृतापितकरणेन यात्स्याध्याय्यपि बालिशा मूर्खव्याध्यादिपीडितानुपनीताः श्चैतानु-
त्तार्यं प्रातर्होमाङ्गं कुर्युः न हावयेदित्यनेन प्रशक्तावपर्कन्यादीनां प्रतिषेधः ३५ एते कन्यादयो हो-
मं कुर्वाणा नरकं गच्छन्ति यस्य च तदग्निहोत्रं प्रतिनिधिरूपेण कुर्वन्ति सोपि नरकं व्रजति तस्माच्छ्रौ-
तकर्मप्रवीणः समस्तवेदाध्यायी होता कार्यः ३६ आधाने प्रजापतिदेवताकमश्वं धनसंपन्नो सत्यां
ब्राह्मणो दक्षिणामदत्त्वा कृतेप्याधानेनाहिताग्निर्भवति आधानफलं न लभते तस्मादाधाने अश्वद-
क्षिणां दद्यात् ३७

204

उ॰
२०४

तस्मिन्नुत्पन्ननिमित्ते चौर्यं बलात्कारं कुर्वाणो धर्मप्रधानो राजा दण्डं न कुर्यात् । यस्माद्राज्ञो मूढत्वाद्ब्राह्मणः क्षु
धावसादं गच्छति तत्तस्य ॥ २० ॥ तस्य ब्राह्मणस्याध्ययनपभरणीयपुत्रादिवर्गं ज्ञात्वा श्रुताचारौ च तदुपयुक्तां वृ
त्तिं जीविकां राजा स्वगृहात्प्रकल्पयेत् ॥ २१ ॥ अस्य ब्राह्मणस्य जीविकां विधाय पश्चाच्चौरादेः सर्वत एनं रक्षेत् । य
स्माद्ब्राह्मणं रक्षित्वा तस्य धर्मषड्भागं प्राप्नोति ॥ २२ ॥ यत्तस्मिन्दुर्भिक्षे यत्नेन ब्राह्मणः कदाचिच्छूद्राद्याचेत् । य
स्माच्छूद्राद्याचित्वा यज्ञं कुर्वाणो मृतः चाण्डालो भवति । अतो याचननिषेधात् शूद्रादयाचितोपस्थितमन्न
प्राप्यमप्यविरुद्धं ॥ २३ ॥ यत्तस्मिन्यज्ञार्थं धनं याचित्वा योऽपरेन सर्वं विनियुङ्क्ते स शतं वर्षाणि भासतां काकत्वं प्राप्नो
ति ॥ २४ ॥ प्रतिमादिदेवतार्थमुत्सृष्टं धनं देवस्वं ब्राह्मणधनं च लोभादपहरति स पापस्वभावो जन्मान्तरे गृ

न तस्मिन्धारयेद्दण्डं धार्मिकः पृथिवीपतिः । क्षत्रियस्य हि बालिश्याद्ब्राह्मणः सीदति क्षुधा ॥ २० ॥
तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बान्महीपतिः । श्रुतशीले च विज्ञाय वृत्तिं धर्म्यां प्रकल्पयेत् ॥ २१ ॥
कल्पयित्वास्य वृत्तिं च रक्षेदेनं समन्ततः । राजा हि धर्मषड्भागं तस्मात्प्राप्नोति रक्षितात् ॥ २२ ॥
न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत धर्मवित् । यजमानो हि भिक्षित्वा चाण्डालः प्रेत्य जायते ॥ २३ ॥
यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति । स याति भासतां विप्रः काकतां वा शतं समाः ॥ २४ ॥
देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः । स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ॥ २५ ॥
इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये । क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसम्भवे ॥ २६ ॥
आपत्कल्पेन यो धर्मं कुरुते नापदि द्विजः । स नाप्नोति फलं तस्य परत्रेति विचारितम् ॥ २७ ॥
विश्वैश्च देवैः साध्यैश्च ब्राह्मणैश्च महर्षिभिः । आपत्सु मरणाद्भीतैर्विधेः प्रतिनिधिः कृतः ॥ २८ ॥
प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते । न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम् ॥ २९ ॥

ध्रोच्छिष्टेन भोजनरूपेण जीवति ॥ २५ ॥ सम्पन्नैर्वर्षैर्द्विजो यदि वर्षप्रवृत्तिरब्दपर्ययः चैत्रशुक्लादिस्तु वर्षप्रवृ
त्तिः तत्र वर्षान्ते वैश्वानरीमिष्टिं विहितपशुसोमयागाकरणासम्भवे तदकरणदोषनिर्हरणार्थं सर्वदा श्रद्धा
धनग्रहणस्वरूपामिष्टिं कुर्यात् ॥ २६ ॥ आपद्विहितेन विधिना योऽनापदि धर्मानुष्ठानं द्विजः कुरुते
तस्य तत्परलोके निःफलं भवतीति मन्वादिभिर्विचारितम् ॥ २७ ॥ विश्वेदेवाख्यैर्देवैः साध्यैश्च तथा महर्षि
भिर्ब्राह्मणैर्मरणाद्भीतैरापत्सु मुख्यस्य विधेः सोमयागे वैश्वानर्यादिप्रतिनिधिरनुष्ठितो सोमयागासम्भ
वे कार्य इति तत्र मुख्यासम्भवे ॥ २८ ॥ यो मुख्यानुष्ठानसमर्थः सन्नापद्विहितेन प्रतिनिधिनानुष्ठानं करोति
तस्य दुर्बुद्धेः पारलौकिकमभ्युदयं स प्रमत्तो परिवारार्थं किञ्चन फलं न भवति आपत्कालेन यो धर्ममि

म॰स्मृ॰ टी॰ २०५

अबुद्धिपूर्वकृते पापे प्रायश्चित्तं भवतीति पण्डिता मन्यन्ते एके तु मनवाचार्याः कामतः कृतेऽपि पापे प्रा
यश्चित्तं भवतीत्याहुः एतच्च पृथक्कृताभिधानं प्रायश्चित्तगौरवार्थं श्रुतिनिदर्शनादिति इन्द्रो य
तीन् शालावृकेभ्यः प्रायच्छत् तमश्लीला वागभ्यवदत् स प्रजापतिमुपाधावत् तस्मै प्रजापति
रेतमुपहव्यं प्रायच्छत् इत्यस्यार्थः इन्द्रो यतीन् बुद्धिपूर्वकं श्वभ्यः खादितुं दत्तवान् स प्राय
श्चित्तार्थं प्राजापतिसमीपमगमत् तस्मै प्रजापतिरुपहव्याख्यं कर्म प्रायश्चित्तं दत्तवान् अतः
कामकृतेऽप्यस्ति प्रायश्चित्तं ॥४५॥ अनिच्छातः कृतं पापं वेदाभ्यासेन नश्यति वेदाभ्यासेनेति
कामकृतविषयप्रायश्चित्तोपलक्षणार्थं प्रायश्चित्तान्तराणामपि विधानात् रागद्वेषात् हिंस्र

205

अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ॥४५॥
अकामतः कृतं पापं वेदाभ्यासेन शुध्यति कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः ॥४६॥
प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा न संसर्गं व्रजेत्सद्भिः प्रायश्चित्तेऽकृते द्विजः ॥४७॥
इह दुश्चरितैः केचित्केचित्पूर्वकृतैस्तथा प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययं ॥४८॥

तत्पापं पुनर्विज्ञानतः कृतं नानाप्रकारैः प्रायश्चित्तैर्विद्याधनतपोभिर्नश्यतीति गुरुप्रायश्चित्तपरं य
तः पूर्वोक्तस्यैव समभ्याहारः यद्यप्यधिकारिनिरूपणं प्रकृतं प्रायश्चित्तं तत्त्वानन्तरं वक्ष्यते
तथापि प्रसक्तानामल्पतु प्रायश्चित्ताधिकारोक्तानां गुरुप्रायश्चित्तेष्वधिक्षिप्यतइत्यधिकारिनि
रूपणमेवेदं ॥४६॥ दैवात्प्रमादादन्यशरीरकृतेन पूर्वजन्मार्जितदुःकृतेन वा क्षयरोगादिसूचि
तेन प्रायश्चित्तार्हतां प्राप्याकृते प्रायश्चित्ते साधुभिः सह पानभोजनादिना संसर्गं न गच्छेत् ॥४७॥
इह जन्मनि निषिद्धाचरणैः केचित्केचित्पूर्वजन्मनि कृतैः दुष्टस्वभावा मनुष्याः कौनख्यादि
कं रूपविपर्ययं प्राप्नुवन्ति ॥४८॥

कु॰ २०५

श्रद्धावान्वशीकृतेन्द्रियो यज्ञव्यतिरिक्तानि तीर्थसेवादीनि पुण्यानि कर्माणि कुर्यात् न त्वल्पदक्षि-
णैर्यज्ञैर्यजेत परोपक्रियार्थत्वाद्दक्षिणायाः अल्पेनापि ज्ञातिगतानि सिद्धा विदं वचनं
३९ चक्षुरादीनीन्द्रियाणि जीवतः ख्यातिरूपं यशः स्वर्गो मृषीमृतस्य ख्यातिरूपा कीर्तिः अपत्यानि पशू-
श्चाल्पदक्षिणो यज्ञो नाशयति तस्मादल्पदक्षिणादानेन न यागं कुर्यात् ४० अग्निहोत्री ब्राह्मण इच्छा-
तोऽग्नीनुत्सृज्य प्रातर्होमान् कृत्वा मासं चान्द्रायणं कुर्यात् यस्माद्वीरः पुत्रस्तत्पातहननेन तत्तुल्यमेतत् ।
तथा च श्रुतिः वीरहा वा एष देवानां भवति योऽग्निमुद्वासयेत् अन्ये तु मासमपविध्येति संबध्नन्ति ४१
शूद्राद्धिगम्यप्राप्येति सामान्यनिर्देशाद्याचनेनायाचनेन चार्थं लीकृत्य वृषलाग्न्युपसेविनामिति
वक्ष्यमाणलिङ्गात् श्रद्धाधानपूर्वकमग्निहोत्रमनुतिष्ठन्ति ते शूद्राणामेव याजकाः न त्वते यौ भवन्ति

पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः न त्वल्पदक्षिणैर्यज्ञैर्यजेतेह कथंचन ३९ इंद्रि-
याणि यशः स्वर्गमायुः कीर्तिं प्रजाः पशून् हन्त्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनो यजेत् ४०
अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः कामकारतः चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत् ४१ ।
ये शूद्राद्धिगम्यार्थमग्निहोत्रमुपासते ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः ४२ ते-
षां सततमज्ञानां वृषलाग्न्युपसेविनां पदा मस्तकमाक्रम्य दाता दुर्गाणि संतरेत् ४३ अकु-
र्वन्विहितं कर्म निन्दितं च समाचरन् प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ४४

न ते वेदवादिषु निन्दिताः ४२ तेषां शूद्रधनाहिताग्निपरिचरणानां मूर्खाणां मूर्ध्नि पादं दत्वा दाता
शूद्रस्तेन दानेन सततं परलोके दुःखेभ्यो निस्तरति न तु यजमानानां फलं स्यात् ४३ नित्यम-
हितं नैत्यं भीपासनादि नैमित्तिकं पावस्पर्शादौ स्नानादि तदकुर्वन् तथा प्रतिषिद्धं हिंसाद्यनु-
तिष्ठन् अविहितनिषिद्धेषु च विषयेषु संनतार्त्तिकुर्वन्नरो मनुष्यजातिमात्रः प्रायश्चित्तमर्ह-
ति नन्विन्द्रियार्थेषु सर्वेषु न प्रसक्तो न कामतः इति प्रतिषेधान्निन्दितग्रहणे[illegible]व प्रसक्तश्चेन्द्रि-
यार्थेष्विन्यपि संगृहीतं यतः एषकृ न वक्तव्यं उच्यते [illegible] पाठान्तरव्रता-
नीमानि धारये[illegible]क्रमाण्यनापि प्रतिषेधः किं तु व्रतविधिः तर्हि[illegible]कुर्वन्नु विहितं क-
र्मसु तेनैव [illegible] प्रान्त्यात् पृथक् न कर्तव्यं उक्तिवेन्न स्नातके त[illegible]विषये नाप्यसफल

ब्राह्मणप्राणवियोगफलव्यापारो ब्रह्महत्या स च साक्षादन्यस्वामिनियुक्तस्य योधो हिरण्यादिग्रहणनिमि
त्तार्जकस्यापि तदुद्देशेन ब्राह्मणमरणेन ब्रह्महत्यानन्तेव मित्रुवाकारादीनामपीघादिनिमित्तोत्पादनद्वा
रेण तत्पावधस्यापि हंतृत्वात् नमन्यो प्यातनद्वारा ब्रह्महत्यासाक्षात् उच्यते शास्त्रे तेम्पस्य ब्राह्मणं हंतुमव
गम्यते स एव ब्रह्महंता अतस्तत्रघातानां तयः सोभू हिरण्यग्रहणमात्रीसंबंधकृतेपि वापमुद्दिश्य प्रयोजनु
प्राणत्यक्तेन ब्रह्महा भवेत् एवं चान्यान्यपि शास्त्रीयान्येव ब्रह्मवधे निमित्तानि तेयानि तथा रागा
द्वेषात्प्रमादद्वा स्वतः परतएव वा ब्राह्मणं नु चात्मपेयस्तुतमाकुर्वेद्य चातकमिति अनेन प्रयोजक
स्यापि ब्रह्महंतृत्वं दर्शितं तथा निषिद्धसुरायाः पानं ब्राह्मणस्य वर्ज्यं हरणं गुरुभार्यागमनमेतैः स
ह संवत्सरेण पततीति वक्ष्यमाणप्रकारेण संसर्गाइत्येतानि महापातकान्याहुः महापातकसंज्ञा चे
यं वक्ष्यमाणस्योपपातकादेः संज्ञा ताचवार्थं ॥४४॥ तान्युक्तनिमित्तनैमित्तिकभावरणं प्रत्याह ब्राह्मण

ब्रह्महत्या सुरापान स्तेयं गुर्वंगनागमं महांतिपातकान्याहुः संयोगश्चैव तैः सह ॥४५॥ अनृतं च समुत्कर्षे रा
जगामि च पैशुनं गुरोश्चालीकनिर्बंधः समानि ब्रह्महत्यया ॥४६॥ ब्रह्मोज्झतावेदनिंदाकौटसाक्ष्यं सुहृद्वधः
गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट् निक्षेपस्यापहरणं नराश्वरजतस्य च भूमिवज्रमणीनां च रु
क्मस्तेयसमं स्मृतं ॥४७॥ रेतःसेकः स्वयोन्यासु कुमारीष्वंत्यजासु च सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः

अब्रवीत् राजन्निच्छलेनादीनां परेषां मारणे फलकंटकोषाभियानं गुरोश्चानृताभिशंसनं तथा गोत्रमः यो।
गुरोरनृताभिशंसनमिति महापातकसमानीति एतानि ब्रह्महत्यासमानीति ॥४८॥ ब्रह्मोज्झता अधीत
वेदानभ्यासेन विस्मरणं अप्रसक्त्या [illegible] नवेदकुत्सनं साक्षी मृषाभिधानं मित्रस्या ब्राह्मणस्य वधोनि
षिद्धलशुनादेर्भक्षणं अन्नाद्यपुरीषादेरदनं मे धातिपित्तन भोज्यमेतत्मयेति संकल्प्य पद्भ्यां तेनद
त्रायमिम्या वष्टेयतानि षट् सुरापानतुल्यानि ॥४९॥ ब्राह्मणस्तु वर्ज्यं व्यतिरिक्तं निक्षेपस्य हरणं तथा म
नुष्याश्वरजतभूमिहीरकमणीनां हरणं सुवर्णस्तेयतुल्यं ॥५०॥ सोदर्याभगिनी कुमारी चाण्डाली सखि
सुतभार्यासुतपोरेतःसेकस्तु गुरुभार्यागमनसमानमाहुः एषां भेदो वा समीकरणं यथेन समीकरणं तु
स्ततद्गीमपायश्चित्तार्थं मनुकौटसाक्ष्ये हृद्वधयोः सुरापानसमीकृतयो ब्रह्महत्याप्रायश्चित्तं वक्ष्यति
तद्विकल्पार्थं यः पुनः गुरोरलीकनिर्बंधस्य ब्रह्महत्यासमीकृतस्य पुनरुपरि ब्रह्महत्याप्रायश्चि

ब्राह्मणस्वर्णचौरः कुनखित्वं प्राप्नोति निषिद्धसुरापः श्यावदन्ततां ब्रह्महा क्षयरोगित्वं गुरुभा-
र्यागामी दुश्चर्मत्वं विद्यमानपरदोषाभिधायी पिशुनः दुर्गन्धनासिकत्वं अविद्यमानदोषारोपकः सूच-
कः दुर्गन्धमुखत्वं धान्यादेरपहर्ता अङ्गहीनत्वं मिश्रणेनातिरिक्ताङ्गत्वं अन्नचौरो मन्दानलत्वं अननुज्ञाताध्यायी मू-
कत्वं वस्त्रचौरः श्वेतकुष्ठित्वं अश्वचौरः पङ्गुत्वं प्राप्नोति एवं बुद्धिबाह्यचक्षुःश्रोत्रविकलाविकृताकृतयः साधु-
भिर्गर्हिताः प्राक्तनमार्जितदुःकृतावशेषेण सम्प्रापयन्ते यत एवं ४८ ५१ यस्मादनिःकृतमनासित
मेनो येस्ते निःकृतैनसोऽकृतप्रायश्चित्ताः परलोकोपभुक्तदुःकृतावशेषेण निन्द्यैर्लक्षणैः कुनख-
त्वादिभिर्युक्ता जायन्ते तस्माद्विशुद्धये पापनिर्हरणार्थं प्रायश्चित्तं सदा कार्यं एवं चोभिन्नजुहोतीति
वन्नैमित्तिकमात्रं प्रायश्चित्तं किं तु निःकृतैनसउपादानान्यपि विशुद्धये पापनिर्हरणार्थं चरित ।

सुवर्णचौरः कौनख्यं सुरापः श्यावदन्तताम् । ब्रह्महा क्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः ४८
पिशुनः पूतिनासिक्यं सूचकः पूतिवक्त्रताम् । धान्यचौरोऽङ्गहीनत्वमातिरैक्यं च मिश्रितः
अन्नहर्तामयावित्वं मौक्यं वागपहारकः । वस्त्रापहारकः श्वैत्र्यं पङ्गुतामश्वहारकः ५०
दीपहर्ता भवेदन्धः काणो निर्वापको भवेत् । हिंसया व्याधिभूयस्त्वमरोगित्वमहिंसया ५१
एवं कर्मविपाकेन जायन्ते सद्विगर्हिताः । जडमूकान्धबधिरा विकृताकृतयस्तथा ५२ च
रितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये । निन्द्यैर्हि लक्षणैर्युक्ता जायन्ते निःकृतैनसः ५३

व्यमित्युपदेशात् पापक्षयार्थिनः एव प्रायश्चित्तेऽधिकारः तथा हि प्रायश्चित्तं चरितव्यमिति विध्या-
वधिकारापेक्षायां फलमात्रानिर्देशाद्रात्रिसत्रन्यायेन श्रूयमाणमेव विशुद्ध्युपदुतिफलम् ।
धिकारिविशेषणं युक्तं तदेवं च मन्वर्थं स्फुटयति याज्ञवल्क्यः विहितस्याननुष्ठानान्निन्दितस्य
च सेवनात् अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये पत-
नमृच्छति पापं प्राप्नोति मर्त्यः विशुद्धये पापनाशाय बहून् वर्षगणान् घोरान्नरकान् प्राप्य तत्
क्षयात् संसारमापन्नं प्रतिपद्यन्ते महापातकिनामित्यादिना महापातकादीनां नरकादिप्राप्तिं वद-
ति तेन नैमित्तिकमात्रत्वं प्रायश्चित्तानां नानं स्यगाह्वेति तस्मादृदृष्टक्षयिजनितपापक्षयार्थिन एव प्रा-
यश्चित्तविधावधिकार इति दर्शितं ५३

ब्राह्मणस्य दंडहस्तादिना पीडाक्रिया यदतिशयदुर्गंधितया अघ्रेयं लशुनपुरीषादि तैस्तत्समद्यस्य।
चघ्राणं कौटिल्यं पुंसि च पायुदादौ मैथुनं रेतस्सेकं जातिभ्रंशकरं स्मृतं ६६ गर्दभमश्वो
ष्ट्र हस्तिछागमेषमत्स्यसर्पमहिषाणां प्रत्येकं वधः संकरीकरणं ज्ञेयं ६७ अग्राह्यधनेभ्यः प्रति
ग्रहो वाणिज्यं शूद्रस्य च परिचर्या अनृताभिधानमित्येतत्प्रत्येकमपात्रीकरणं ज्ञेयं ६८ कृमयः क्षु
द्रजंतवः तेभ्यईषत्स्थूलाः कीटाः तेषां पक्षिणां च हननं मद्यानुगतं यत् भोज्यं मद्यपिण्याकादि एकत्र।
पिटकादौ कृतामेवैन सहानीतं तस्य भोजनं मद्यानुवृत्तिमद्यानुगतमन्यम स्पृष्टमाह तन्न तत्राप
श्रितगोरवाल फलकाष्ठपुष्पाणां च चौर्यं स्वल्पेष्वपि च अधैर्यं तत्कालव्यसनेनाशत्प्रत्येकं मलिनी

सर्वाकारेष्वधीकारो महायंत्रप्रवर्तनं हिंसौषधीनां स्त्र्याजीवोभिचारो मूलकर्म च ६३ इंधना
र्थमशुष्काणां द्रुमाणामवपातनं आत्मार्थं च क्रियारंभो निंदितान्नादनं तथा ६४ अनाहिता
ग्निता स्तेयमृणानां चानपक्रिया असच्छास्त्राभिगमनं कौशीलव्यस्य च क्रिया ६५ धान्य
कुप्यपशुस्तेयं मद्यपस्त्रीनिषेवणं स्त्रीविट्शूद्रक्षत्रवधो नास्तिक्यं चोपपातकं ६६ ब्राह्म
णस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः जैह्म्यं पुंसि च मैथुनं जातिभ्रंशकरं स्मृतं ६६ खरा
श्वोष्ट्रमृगेभानामजाविकवधस्तथा संकरीकरणं ज्ञेयं मीनाहिमहिषस्य च ६७ निंदिते
भ्यो धनादानं वाणिज्यं शूद्रसेवनं अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणं ६८ कृमिकी
टवयोहत्या मद्यानुगतभोजनं फलैधःकुसुमस्तेयमधैर्यं च मलावहं ६९ एतान्येनां
सि सर्वाणि यथोक्तानि पृथक्पृथक् यैर्यैर्व्रतैरपोह्यंते तानि सम्यङ्निबोधत ७० ब्रह्महा
द्वादश समाः कुटीं कृत्वा वने वसेत् भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरो ध्वजं ७१

करणं ६९ एतानि ब्रह्महत्यादीनि सर्वपापानि भेदेन यथोक्तानि यैर्यैः प्रायश्चित्तैर्नश्यंति तानि प
थाक्रमं शृणुत ७० यो ब्राह्मणहतवान् स वने कुटीं कृत्वा हतस्य शवशिरः कपालं तदभावे अन्य
स्य चिह्नं कृत्वा भैक्ष्यभुगात्मनः पापनिर्हरणाय द्वादशवर्षाणि वसेत् व्रतं कुर्यात् अत्र च कृत
वसनो वसेदित्यादि विधिं वक्ष्यति मन्यंतरोक्ता अपि विशेषा यथाहुः तथा च यमः सर्वकालमेव मूर्ध्नि
शिरःकपालं स्थापितानि च सर्वाणि तानि शातनकौवि धूमे भक्तावज्र्तने भ्रूणघ्नो देहिमेभिक्षां मनोवि
ख्याप्य संचरेत् एककालं चरेद्भैक्ष्यं तदलब्धोदकं पिबेत् अयं द्वादशवार्षिकविधिः ब्राह्मण
स्याज्ञानकृतब्राह्मणवधे द्रष्टव्यः विधि शुद्धिकृदितास्मा प्याकामतो द्विजमितिवक्ष्यमाणेनात्

इदानीमुपपातकान्याह गोवधेति गोहननं जातिकर्मदुष्टानां याजनं परपत्नीगमनं आत्मविक्रयो मातृपितृगु-
रूणां च शुश्रूषाद्यकरणं सर्वदा त्यक्तस्य त्यागः वेदविस्मरणमध्ययनाभावो ऽकृतत्वात् अग्नेश्च स्मार्तस्य ।
त्यागः श्रौतानामग्निहोत्र्यपविध्याग्नीनित्युक्तत्वात् सुतस्य च संस्कारभरणाद्यकरणं कनीयसो दै ।
विवाहे कृते ज्येष्ठस्य परिवित्तित्वं दाराग्निहोत्रमित्यादिना प्रागुक्तं कनिष्ठस्य परिवेत्तृत्वं तयोश्च कन्याप्रदा-
नं तयोरेव विवाहहोमादियागेष्वार्त्विज्यं कन्यायामेथुनवर्ज्जमंगुलीप्रक्षेपादिना दूषणं रेतःसेक-
पर्यन्तं वार्धुष्यं भार्यापत्यविक्रयः यथाकालमनुपनयनं यथोक्तमतऊर्ध्वं त्रयोऽप्येते यथाकाल-
मसंस्कृता इति बान्धवानां पितृव्यादीनां त्यागः अननुवृत्तिः बान्धवत्यागः उक्तेनैव मात्रादीनां त्यागा-
प्राप्तौ यथा पुनरुक्तनिंदार्थं पितृव्यादिबान्धवत्यागो नावश्यं प्रायश्चित्तं किंतु मात्रादित्यागप्रा-
यश्चित्तान्न्यूनं भवति प्रतिनियतवेतनग्रहणपूर्वकमध्यापनं प्रतिनियतवेतनभृताच्चाध्ययनं
अविक्रेयाणां तिलादीनां विक्रयः सर्ववर्णेषु मतिस्थाने सुराजाज्ञयाधिकारः महतामुदकप्रवा-
हप्रतिबंधकहेतूनां सेतुबंधादीनां च प्रवर्तनं ओषधीनामन्नादीनां इति पाठः एतच्चैवानन्तरं का

गोवधोऽयाज्यसंयाज्यपारदार्यात्मविक्रयः गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च ५९
परिवित्तानुजेऽनूढे परिवेदनमेव च तयोर्दानं च कन्यायास्तयोरेव च याजनं ६०
कन्याया दूषणं चैव वार्धुष्यं व्रतलोपनं तडागारामदाराणामपत्यस्य च विक्रयः ६१ व्रात्यता बान्धवत्या-
गो भृत्याध्यापनमेव च भृताच्चाध्ययनादानमपण्यानां च विक्रयः ६२

हिंसायां प्रायश्चित्तगौरवात् भार्यादिस्त्रीणां वेश्यात्वंकृत्वा तदुपजीवनं यत्तेषेनादिनाना पराद्रव्यमा
रणादि मंत्रौषधादिना वशीकरणं मूलकर्म पाकादिहृष्टप्रयोजनार्थं माद्रेन्धनच्छेदः अनावस्यदे
वपित्राद्युद्देशमंतरेण पाकाद्यनुष्ठानं निंदितान्नस्य लसुनादेः सकृदनिच्छया भक्षणं बुद्धिपूर्वका-
भ्यासभक्षणे पुनर्गर्हितान्नाद्यं योजयिष्यतीत्युक्तं समधिकारेऽग्न्याधानं सुवर्णेतरद्रव्यादन्यस्य स्तावद्र-
व्यस्यापहरणं ऋणानां चात्रिभिर्ऋणैरेतेषु ऋणेनावाप्यापतेतदनपाकरणं श्रुतिस्मृतिविरुद्धशा-
स्त्रावेक्षणं नृत्यगीतवादित्रोपसेवनं धान्यस्यतान्नलोहादेः पशूनां च चौर्यं हिताहितानां पीतमद्य-
स्त्रियागमनं स्त्रीशूद्रवैश्यक्षत्रियहननं अस्तिक्यभावबुद्धिः एतत्सर्वमेकमुपपातकं ५९
६० ६१ ६२
एतत्कृष्णजातीनामोषधीनामित्यादिनावक्ष्यति तत्रैकं हिंसायां प्रायश्चित्तलाघवात् ५

वेदानां मध्यादेकं वेदं जपन् स्वल्पाहारः संनियतेन्द्रियो ब्रह्महत्यापापनिर्हरणाय योजनानां शतं गच्छेत् एत
दप्यज्ञानकृते जातिमात्रेण ब्राह्मणवधे निर्गुणकस्य प्रायश्चित्तं तथा च भविष्यपुराणे अयमेव ज्ञा
कः पतितो व्याख्यातश्च जातिमात्रं यदा विप्रं हन्यादमतिपूर्वकं वेदविद्याग्निहोत्री च तदा तस्य भवेदिदं
जपन्वान्यतमं वेदं योजनानां शतं व्रजेत् ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रियः ७४ सर्वस्वं वा वेद
विदे ब्राह्मणाय दद्यात् यावत् धनं जीवनाय पर्याप्तं गृहं वा सन्नभोजी विद्यात शस्त्रवणादरम्य समर्थं गृ
हं वा गृहोपयोगि धनधान्यादियुक्तमतः सर्वस्वं गृहं वा सपरिच्छदं दद्यात् जीवनायालमिति वचनात्
जीवनपर्याप्तं सर्वस्वं गृहं वा दद्यात् न न्यूनं एतच्चाज्ञानतो जातिमात्रब्राह्मणवधे ब्राह्मणस्य प्रायश्चि
त्तं तथा च भविष्यपुराणे जातिमात्रं यदा हन्याद्ब्राह्मणो ब्राह्मणं गृह वेदाभ्यासविहीनो वै धनवानग्नि
विवर्जितः प्रायश्चित्तं तदा कुर्यादिदं पापविशुद्धये धनं वा जीवनायालं गृहं वा सपरिच्छदं ७५ नीवा।

जपन्वान्यतमं वेदं योजनानां शतं व्रजेत् ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रियः ७४ स
र्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत् धनं हि जीवनायालं गृहं वा सपरिच्छदं ७५ ह
विष्यभुग्वानुसरेत्प्रतिस्रोतः सरस्वतीं जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहितां ७६
कृतवापनो निवसेद्ग्रामान्ते गोव्रजेऽपि वा आश्रमे वृक्षमूले वा गोब्राह्मणहिते रतः ७७

रादि हविष्यभोजी प्रख्यातपत्रप्रवणादरभ्य पश्चिमोदधेः स्रोतः स्रोतःप्रति सरस्वतीं यायात् ए
तच्च जातिमात्रब्राह्मणवधे ज्ञानपूर्वके तथा च भविष्यपुराणे जातिमात्रे हते विप्रे द्वेषमतिपूर्वकं
हं तावदा वेदहीनो धनेन च भवेद्गृह तदेतत्कल्मषं तस्य प्रायश्चित्तं निबोध मे हविष्यभुक्चरेद्वापि
प्रतिस्रोतः सरस्वतीं तथा परिमितं हविष्याहारस्त्रीन्वारान् वेदसंहितां जपेत् संहिताग्रहणं मन्त्र
मन्त्रदासः अत्रापि भविष्यपुराणीयो विशेषः जातिमात्रं तथा हन्याद्विप्रं त्वमतिपूर्वकं ब्राह्मणोऽसत
गुणवांस्त्वेवं प्रविकल्पयेत् जपेद्वा नियताहारस्त्रिः कृत्वो वेदसंहितां ऋचो यजूंषि सामानि त्रैवि
द्यं त्वेतदुत्तम ७६ इदानीं समाप्तं द्वादशवार्षिकमुपसंहारार्थं द्वादशवार्षिकं सविशेषमाह लू
नकेशनखश्मश्रुर्गोब्राह्मणोपकारार्थं वने ग्रामसमीपे गोष्ठे वा मुनिरूपदेशे वृक्षमूले वा नामन्यत्र
मध्यमस्मिन्वसेत् वनकृतवाज्ञो इति स्वविकल्पार्थमिदं ७७

क्षत्रियवैश्यशूद्राणां मनूक्तं तत्र द्वादशवार्षिकं द्विगुणं त्रिगुणं चतुर्गुणं च द्रष्टव्यं यथोक्तं भविष्यपु
राणे द्विगुणं क्षत्रियाणां तु वैश्यानां त्रिगुणं तु सा चतुर्गुणं तु शूद्राणां पर्षदुक्ता महात्मना पर्ष
द्व्रतं प्रोक्तं शुद्धये पापकर्मिणां यावद्विप्रो ब्राह्मणे ब्राह्मणानां सभा ततो द्विगुणैः क्षत्रियैः क्षत्रि
याणां द्रष्टव्यव्यवहारदर्शनाय धर्मसभा भवति त्रिगुणैर्वैश्यैर्वैश्यानां चतुर्गुणैः शूद्रैः शूद्राणां सभा व्र
क्षत्रियादीनां च याणां व्रतमपि द्विगुणं त्रिगुणं चतुर्गुणमित्यर्थः एतानि च मनूक्तब्रह्मवधप्रायश्चि
त्ताचरणं निर्गुणवत् तन्निर्गुणब्राह्मणहननविषयत्वेन ब्रह्मपुराणे व्याख्यातानि हत्वा चेन्गुण
वान्वीरब्रह्मकामान्निर्गुणो हतः कर्तव्यानि मनूक्तानि कृत्वा वैश्रामामेधिकं व्रतं हा द्वादशाब्दानि कुटी
कृत्वा वने वसेत् गच्छेद्द्वव्रभूतं वा पिण्डकामान्निर्गुणो हते जातिमात्रगुणोपेतं त्वसत्तु द्विकृतं तपा अ
त्ववंधादिविनापुशापश्चित्तं नकल्पयेदिति विश्वामित्रप्रायश्चित्तवचनात् प्रायश्चित्ताधिक्यमूहनी
यं कामतो ब्रह्मवधे द्विगुणं ब्रह्मवधप्रायश्चित्तं चतुर्विंशतिवार्षिकं तदाहांगिराः अकामतः कृते पापे प्रा
यश्चित्तं न कामतः स्यात्तु कामकृते पत्र द्विगुणं बुद्धिपूर्वके ॥ १२ ॥ मनुः शरव्यायामुष्यधारिणां पुण्यमानां

लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः ॥ १२ ॥
यजेत वाश्वमेधेन स्वर्जिता गोसवेन च अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा ॥ १३ ॥

मं ब्रह्मवधपापक्षपणार्थमयंलक्षीभूत एवं जानन्तीति इच्छयात्मन्लक्ष्यभूतो वा वतिष्ठेत् यावन्मृतो मृत
कल्पो वा स्यात्तदाह याज्ञवल्क्यः संग्रामे वा हतो लक्ष्यभूतः शुद्धिमवाप्नुयात् मृतकल्पः प्रहारार्तो
जीवन्नपि विशुध्यति अग्नौ वा प्रदीप्ते अधोमुखस्त्रीन्वारानुपरि शरीरं प्रक्षिपेत् तथा प्रास्येद्यथा म्रिय
ते मा प्रस्तन्वचनादेव प्रक्षिपेद्यथा म्रियते एतत्प्रायश्चित्तं द्वयमनन्तरवक्ष्यमाणं च यजेत वाश्वमे
धेनेत्येव प्रायश्चित्तत्रयं दकामतः क्षत्रियस्य ब्राह्मणवधविषयं मनुस्मृतौ कमेव लिखितायस्मा
द्व्याख्यातं भविष्यपुराणे लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः प्रास्येदात्मानमग्नौ वा स
मिद्धे त्रिरवाक्शिराः यजेत वाश्वमेधेन क्षत्रियो ब्रह्मघातकः प्रायश्चित्तत्रयं ह्येतत्तत्क्षत्रियस्य प्र
कीर्तितं क्षत्रियो निर्गुणो वीरब्राह्मणं वेदपारगं निहन्त्यकामतो वीरलक्ष्यं शास्त्रभृतां भवेत्
चतुर्वेदविदं वीरब्राह्मणं चाग्निहोत्रकं निहन्त्यकामतः आत्मानं क्षिपेदग्नावर्वाक्शिराः निर्गुणं
ब्राह्मणं हत्वा कामतो गुणवान्गृह यजेत वाश्वमेधेन क्षत्रियो यो महीपतिः ॥ १२ ॥ यजेत वाश्वमे
धेनानन्तरमेव व्याख्यातं स्वर्जिता गोसवेनवाभिजिता वा त्रिवृताग्निष्टुता वा यजेत

यस्माद्ब्राह्मणो धर्मस्य कारणं ब्राह्मणेन धर्मोपदेशे कृते धर्मानुष्ठानात् राजन्यस्याग्रं प्रांतं मन्वादि
भिरुच्यते ताभ्यां ब्राह्मणक्षत्रियाभ्यां समूलाग्रधर्मतत्त्वनिष्पत्तेः तस्मात्तेषां समागमे स्वमेधेया
पनि वेद्याव भृथे स्नातः शुध्यतीति पूर्वस्यैव शेषः ८२ ब्राह्मण उत्पत्तिमात्रेणैव किं पुनः श्रुता
दिभिर्देवानामपि पूज्यः स्वतरां मनुष्याणां लोकस्य च प्रत्यक्षत्वप्रमाणं तदुपदेशस्य प्रामाण्यात् य
स्माद्वेद एव कारणं वेदमूलकत्वात् तदुपदेशस्य यत एव मतः ८३ तेषां ब्राह्मणानां मध्ये वेदशास्त्र
ज्ञास्त्रयोपि किमुताधिकाः यत् पापनिर्हरणाय प्रायश्चित्तं ब्रूयुस्तत्पापिनां शुद्धये स्यात् यस्माद्विदुषां
वाक् पाविनी ततश्च प्रकाश प्रायश्चित्तानां पर्षद्विदुषामपि परिषत्कृत मनसं वयंपकार्यं रहस्यप्रायश्चित्ते पुन
रेतन्नास्ति रहस्यत्वविरोधात् ८४ यस्मात्प्रायश्चित्तचरणादन्यतमं प्रायश्चित्तं ब्राह्मणादिः संयत

धर्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते तस्मात्समागमे तेषामेनो विख्याप्य शुध्यति ८२
ब्राह्मणः संभवेनैव देवानामपि दैवतं प्रमाणं चैव लोकस्य ब्रह्मात्रैव हि कारणं ८३ ते
षां वेदविदो ब्रूयुस्त्रयोऽप्येनःसु निष्कृतिं सा तेषां पावनाय स्यात्पवित्रा विदुषां हि वाक् ८४
अतोन्यतममास्थाय विधिं विप्रः समाहितः ब्रह्महत्याकृतं पापं व्यपोहत्यात्मवत्तया ८५

मनाः आश्रितप्रशस्तात्मकतया ब्रह्महत्याकृतं पापमपनुदति यत्तु ब्रह्मवधादि प्रायश्चित्तं सकृत्पा
पकरणविषयं पापाभ्यासे तु तावर्त्तनीयं एनसि गुरुणि गुरूणि लघुनि लघूनीति गौतमवचनात् प्राणि
नां तस्य स्यात् ब्रह्महत्याव्रतं चरेदिति वक्ष्यमाणं प्रायश्चित्तं वक्तव्यं तस्य वक्ष्यमाणत्वात् द्वितीयः प्रायश्चि
कादस्मात् द्वितीये द्विगुणस्मृतं तृतीये त्रिगुणं प्रोक्तमिति देवलवचनाच्च गृहदाहादिना युगपदनेक
ब्राह्मणहनने तु अभ्यासविषयत्वं नो विशेषः कस्यचित् ब्राह्मणस्य वीरब्राह्मणस्य बहूनपि निहत्य युगपद्वी
रव्रतं प्रायश्चित्तं किं चरेत् कामतस्तु यदा हन्यात् तदा ब्राह्मणान्तरसत्तमं तदा मानं दहेदग्नौ विधिनाने
न तत्कृण्वं एतद्वचनानां विषयं तथा कामतो यदा हन्यात् ब्राह्मणान् ब्राह्मणो गुरुः चरेद्व्रतेन तदा वीरे
यावत्प्राणपरित्यागं पथ तत्र ज्ञानत... तत्वात् प्रायश्चित्तविषयं क्रममारणे तद्विधिः प्राय

209

प्रक्रान्ते द्वादशवार्षिके अन्तरा यद्युद्दकाहिंसकाद्याक्रान्ते ब्राह्मणस्य गोर्वा परित्राणार्थं निःसंदेहं प्राणान्
परित्यजन् ब्रह्महत्याया मुच्यते गोब्राह्मणे वा ततः परित्रातायमृतोपि मुच्यते ७८ सेनादिभिर्ब्रा
ह्मणस्य सर्वस्वे ह्रियमाणे तदानयनार्थं निर्व्याजं यथाशक्ति प्रयत्नं कुर्वन् तदा त्रीन्वारान् युद्धे प्रवर्त्तमा
नो नानीतेपि सर्वस्वे ब्रह्महत्यापापान्मुच्यते अथवा प्रथमवार एव विप्रसर्वस्वमपहृतं जित्वार्प
यति तद्धृतनिमित्तं पापान्मुच्यते यदा धनापहारकालेनाप्येव ब्राह्मणे युद्धेन मरणे सर्वस्वपा प्रव
र्तते तदा यथापहृतसमधनदानेन तज्जीवयति तदा तन्निमित्तेत स्य प्राणलाभे ब्रह्महत्यापापान्मु।
च्यते एतदितरप्रकारान्तरेण तद्रक्षणे गोघ्ना गोब्राह्मणस्य चेत्यपुनरुक्तिः ७९ एवमुक्तम्।

ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान्परित्यजेत्। मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च
त्र्यवरं प्रतिरोद्धा वा सर्वस्वमभिविजित्य वा। विप्रस्य तन्निमित्तं वा प्राणलाभे विमुच्यते ७९
एवं दृढव्रतो नित्यं ब्रह्मचारी समाहितः। समाप्ते द्वादशे वर्षे ब्रह्महत्यां व्यपोहति ८० शि
ष्ट्वा वा भूमिदेवानां नरदेवसमागमे। स्वमेवं वाभृथस्नातो हयमेधे विमुच्यते ८१

कारेण सर्वदा नियमेनोपहितः स्त्रीसंयोगादिशून्यः संयतमनाः समाप्ते द्वादशे वर्षे ब्रह्महत्याप
पं नाशयति एवं ब्राह्मणार्थे गवार्थे चेत्यादि सर्वं प्रक्रान्ते द्वादशवार्षिकस्यैवोपपद्यं ८० शिष्ट्वामे
धे ब्राह्मणानामृत्विजां क्षत्रियस्य च यजमानस्य समागमे स्वं ब्रह्महत्यापापं शिष्ट्वा निवेद्यावभृथे।
स्नातो ब्रह्महत्यापापान्मुच्यते द्वादशवार्षिकस्योपसंहृतत्वादिति नमेवेदं प्रायश्चित्तं तथा च भ
विष्यपुराणे यदा तु गुणवान् विप्रो हन्याद्विप्रं तु निर्गुणं अकामतस्तदा शुद्ध्येत्स्नानं चैवा
श्वमेधिकं गोविन्दराजस्तु अश्वमेधवर्जितसकलप्रायश्चित्तशेषतायाः प्रक्रान्तद्वादशवार्षि
कादिप्रायश्चित्तस्यान्तरावभृथस्नानेनैव शुद्धिरित्याह तदयुक्तं भविष्यपुराणोपवचनविरोधा

गोमूत्रजलगोक्षीरगव्यघृतगोमयरसानामन्यतममग्निवर्णमग्निस्पर्शं यावन्मरणात्पिबेत् ९०
अथवा गोवालरोमादिकृतवासा जटावान्सुराभाजनचिह्नः तण्डुलावयवान्वाह्नमेकवारं सं-
वत्सरपर्यन्तं सुरापानपापक्षयार्थं भक्षयेत् इदमबुद्धिपूर्वकमुख्यसुरापाने द्रष्टव्यं न तु मरणान्तिक-
त्वे कालबहुत्वात् ९१ यस्मादन्नं तण्डुलपिष्टसंपाद्यत्वात्सुराख्यमन्नमलं मलशब्देन च पापमुच्यते तस्माद्ब्रा-
ह्मणक्षत्रियवैश्याः पैष्टीं सुरां न पिबेयुरिमनेन प्रतिषेधे सति एतदतिक्रमे सुरापी भवतीति प्रायश्चित्तम-
नुमतार्थवादाच्च पैष्टीनिषेध एव स्फुटः त्रैवर्णिकस्य मन्त्रेनैवोक्तः ९२ गुडेन कृता गौडी पिष्टेन कृता
पैष्टी मधूकपुष्पैस्तथा मधुनलपुष्पैः कृता माध्वी इत्येवं त्रिप्रकारा सुरा विज्ञेयेति मुख्यसुरामात्रबोधनं।
भिन्नत्रयापेक्षया ब्राह्मणस्य गौडीमाध्वीपाने प्रायश्चित्तगौरवार्थं यथा चैका पैष्टी मुख्या सुरा पूर्ववचना-
क्यनिषिद्धत्वात् त्रैवर्णिकस्यापेयत्वात् तथा पूर्वं गौडीमाध्वी द्विजोत्तमैर्ब्राह्मणैर्न पातव्या ९३ मद्यम

> गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा। पयो घृतं वामरणाद्गोशकृद्रसमेव वा ९० कणान्वा
> भक्षयेदब्दं पिण्याकं वा सकृन्निशि। सुरापानापनुत्त्यर्थं वालवासा जटी ध्वजी ९१ सुरा वै मलम-
> न्नानां पाप्मा च मलमुच्यते तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ९२ गौडी पै-
> ष्टी च माध्वी च विज्ञेया त्रिविधा सुरा यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः ९३ यक्षर-
> क्षःपिशाचान्नं मद्यं मांसं सुरासवं तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविः ९४

न्निषिद्धं पैष्टीगौडीमाध्वीव्यतिरिक्तं नवविधं बोधव्यं तदाह पुलस्त्यः पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवं
माध्वीकं टंकमाध्वीकमैरेयं नारिकेलजं समानानि विजानीयान्मद्यान्येकादशैव तु द्वादशं तु सुरामद्यं
सर्वेषामधमं स्मृतं मांसं च प्रतिषिद्धं सुरा च पूर्वश्लोकोक्ता त्रिप्रकारा स्पष्टतः आसवो मद्यपानमेवावस्था-
विशेषः मद्यः शुक्तसंधानोत्पन्नमद्यभावः यक्षादिकृतमेतदुपलक्षणं तेषामपि वित्तं तद्देवतं कं वा तन्नैव
पानसादेरपि यो रसः सद्योजातं तु पीत्वा महापातकं भवेत् द्विजोत्तमः एतन्मद्यादिचतुष्टयं यक्षरक्षःपिशा-
चसम्बन्धमन्नं अतस्तत् ब्राह्मणेन देवानां हविर्भक्षयता नाशितव्यं निषिद्धा याज्ञवल्क्यस्य साहचर्यात् हो पादानं
मद्यरक्षःपिशाचान्नार्थं तथा निर्दिष्टमन्नके चित् देवानामश्नता हविरिति पुल्लिङ्गनिर्देशात् ब्राह्मण-
स्यैव मद्यप्रतिषेधो नान्यस्य पाइमाउक्तदेवतत् पतिलोकं न सा याति ब्राह्मणी या सुरां पिबे-
त् इहैव सा शुनी गृध्री सूकरी चोपजायते इति याज्ञवल्क्यादिस्मृतिविरोधात् ९४

२२०

ष्टकृतत्वात् ब्राह्मण्या गर्भे स्त्रीपुंनपुंसकत्वेनाविज्ञाते हत्वा क्षत्रियं वैश्यं वा यागप्रवृत्तं हत्वा आत्रेयीं च
स्त्रियं ब्राह्मणीं तथाऽऽत्रेयीं च ब्राह्मणीमिति यमस्मरणात् हत्वा ब्रह्महत्याप्रायश्चित्तं कर्तव्यं आत्रे
यी च रजस्वला ऋतुस्नातोच्यते रजस्वलामृतुस्नातामात्रेयीमिति वसिष्ठवचनात् एवं चानात्रेयी
ब्राह्मणीवधे त्रयीणां वार्षिकं उपपातकं यथोक्तं स्त्रीशूद्रविट्क्षत्रियवध इति यत्तु तत्स्तोके कृताच्च।
स्त्रीसहस्रधामिति तदाहिताग्नेर्ब्राह्मणस्य ब्राह्मणी भार्याविषयं तथा चाङ्गिराः आहिताग्नेर्द्विजाग्र
स्य हत्वा पत्नीमनिन्दितां ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव च ८६ हिरण्यभूम्यादिगवादिविषये
साक्ष्यमनृतमुक्त्वा गुरोश्च मिथ्याभिशापमुक्त्वा याज्ञनिःक्षेपं च ब्राह्मणस्य सुवर्णव्यतिरिक्तं रजतादिद्र
व्यं हत्वा निःक्षेपादेः सुवर्णमप्यपहृत्य स्त्रीवधं च यथा व्याख्यातं कृत्वा मित्रं च ब्राह्मणं निहत्य ब्रह्महत्याप्राय
श्चित्तं कुर्यात् ८७ एतत्प्रायश्चित्तं तु अकामतो विशेषोपदेशव्यतिरेकेण कामतो ब्राह्मणवधे अभिहितं
कामतस्तु ब्राह्मणवधे नेयं निःकृतिर्नैतस्या प्रायश्चित्तं विधीयते किं तु तद्द्विगुणं द्विकरणं तत्कमिति

हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् राजन्यवैश्यौ चेजानावात्रेयीमेव च स्त्रियं ८६ उक्त्वा
चैवानृतं साक्ष्ये प्रतिरुध्य गुरुं तथा अपहृत्य च निक्षेपं कृत्वा च स्त्रीसुहृद्वधं ८७ इयं वि
शुद्धिरुदिता प्रमाप्याकामतो द्विजं कामतो ब्राह्मणवधे निःकृतिर्न विधीयते ८८ सुरां
पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत् तया सकाये निर्दग्धे मुच्यते किल्बिषात्ततः ८९

प्रायश्चित्तगौरवार्थं न तु प्रायश्चित्तापवादार्थं कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैरिति पूर्वोक्त
विरोधात् ८८ सुरा चात्र पैष्टीमात्रे मुख्या न तु गौडी पैष्टी माध्वी च त्रिविधेति पानुगतैकरूपाभावात् अत्र मे
वं च शक्तित्रयकल्पने प्राप्ते त्रयकल्पनागौरवात् गौड्यादिमदिरास्वपि गौणप्रवृत्त्यापि सुराशब्दः प्रवर्तते:
अत एव भविष्यपुराणे सुरा च पैष्टी मुख्योक्ता न तस्यास्त्वितरे समे पैष्ट्यापाने तु चैतासां प्रायश्चि
त्तं निबोध मे मनुनोक्तं महाभाग समासव्यासयोगतः एतासामिति निर्द्धारणे षष्ठी एतासां गौडीपै
ष्टीमाध्वीनां मध्ये पैष्टीपाने मनूक्तं प्रायश्चित्तं सुरां पीत्वा द्विजो मोहादिति बोधते मुख्यः माध्वीसु ।
रापैष्टीरागादिव्यामूढत्वपादि द्विजो ब्राह्मणक्षत्रियवैश्यः पीत्वाग्निवर्णां सुरां पिबेत् तया सुरया
शरीरे दग्धे सति द्विजस्तस्मात्पापान्मुच्यते एतच्च गुरुत्वात् कामकृतसुरापानविषयं तथा च बृ
हस्पतिः सुरापानं कामकृतं ज्वलन्तीं चैव तां मुखे विनिक्षिपेत् तया स निर्दग्धो मृतः शुद्धिमवाप्नुयात्

म-स्मृ-
टी-
२२२

नेनोक्तत्वात् गुरुः पिता तल्पं भार्या यस्य गुरुतल्पी गुरुभार्यागामी स्वकीयं गुरुभार्यागमन
... हत्वा ... गुरुतल्पी ... शयने सुप्यात् लोहमयीं स्त्रीं प्रतिकृतिं ज्वलन्तीं वाश्लिष्येत् तदा मृत्युना
शुद्ध्येत् ... स्वयमेव शिश्नवृषणावुत्कृत्याञ्जलौ निधाय नैरृतीं दिशं अजिह्मगः आशरीरपतनं गच्छेत् एतद्व्रतं
... एतच्चोक्तं प्रायश्चित्तद्वयं कामतो ज्ञानतः सवर्णागुरुभार्यागमने तत्र तु स्मृत्यन्तरे पुनर्विशेषः
३ खट्वाङ्गी ... चीरवासाः ... श्मश्रुलोमधारी संयतमना निर्जने वने वर्षमेकं प्राजापत्यं व्रतं कुर्यात्
एतच्च ... प्रायश्चित्तं ... स्वभार्याभ्रमेण ... विषयं बोध्यं ४ महागुरुभार्यागमनपाप
निर्हरणाय संयतेन्द्रियः फलमूलादिना हविष्येण नीवारादिकृतयवाग्वा वा मासान् त्रीन् चान्द्रायणान्याचरे
येत् एतच्च ... नादपि ... माध्वीगमने ... स्वर्णादि ... ५ एतैरुक्तैर्ब्रह्महत्यादिमहा
पातककारिणः पापानि निर्हरेयुः गोवधाद्युपपातककारिणः पुनर्वक्ष्यमाणैर्व्रतैरनेकरूपैः पापानि।
निर्हरेयुः अनेन विधिना ... ६ उपपातकसंयुक्तो गोघ्नो ... यवाग्रूपेणाश्नीयात्

एभिर्व्रतैरपोहेत पापं स्तेनकृतं द्विजः। गुरुस्त्रीगमनीयं तु व्रतैरेभिरपानुदेत्॥ १ गुरुतल्पी अभि।
भाष्यैनस्तप्ते स्वप्यादयोमये। सूर्मीं ज्वलन्तीं वाश्लिष्य मृत्युना स विशुध्यति॥ २ स्वयं वा शिश्नवृ
षणावुत्कृत्याधाय चाञ्जलौ। नैरृतीं दिशमातिष्ठेदानिपातादजिह्मगः॥ ३ खट्वाङ्गी चीरवा।
सा वा श्मश्रुलो विजने वने। प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितः॥ ४ चान्द्रायणान् वा त्रीन्मा
सानभ्यस्य नियतेन्द्रियः। हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये॥ ५ एभिर्व्रतैरपोहेयुर्महा
पातकिनो मलम्। उपपातकिनस्त्वेवमेभिर्नानाविधैर्व्रतैः॥ ६ उपपातकसंयुक्तो गोघ्नो मा
सं यवान् पिबेत्। कृतवापो वसेद्गोष्ठे चर्मणार्द्रेण संवृतः॥ ७ चतुर्थकालमश्नीयादक्षारलव।
णं मितम्। गोमूत्रेणाचरेत्स्नानं द्वौ मासौ नियतेन्द्रियः॥ ८

मासं यवान् पिबेत् सशिखं मुण्डितशिरा ... हतगोचर्मणाच्छादितदेहो मासद्वयमेव गोष्ठे
वसेत् गोमूत्रेण स्नानं चरेत् संयतेन्द्रियः निन्दितलवणवर्जं हविष्यमन्नं प्रातमेकमहरभुक्त्वा द्वितीये
हनि ... मासद्वयपर्यन्तं ... मासद्वयमेव दिवा ... तत्तासां गवां
... उत्थितासु तिष्ठेत् ... परिचर्यया ... आदि
... उपविष्टासु उपविशेत् ... तिष्ठेत् ... तासु ... प
... उपविशेत् ... व्याधिताश्चोरव्याघ्रादिभयपीडिताः
... गावः ... उपवि ... विवर्णं ... स्थिते ...
... कर्षति ... आत्मनस्त्राणं न कुर्यात् ... गृहे
... भक्षयन्तीं वत्सं च पिबन्तं ... कस्यचिदपि ... अनेनोक्तविधानेन योगो

उ-
२२२

221

ब्राह्मणो मद्यपानमूढबुद्धिः सन्नशुचौ निपतेत् अवैदिकं म्लेच्छभाषितं वाक्यं वा उच्चारयेत् ब्रह्महत्याद्य
कार्यं वा कुर्यात् अतस्तेन मद्यं न पातव्यमिति पूर्वस्यैवानुवादः ९४ यस्य ब्राह्मणस्य कायगतो वेदः संस्का
रद्वारेणावस्थित एकदेहद्वारा मद्येन सहसा प्लाव्यते तस्य ब्राह्मण्यमपगच्छति शूद्रत्वं च स व्रजति तो मद्यमपि पु
र्वानुवाद एव ९६ इदं सुरापानजनितस्य पापस्य नानाप्रकारं प्रायश्चित्तमुक्तं अथ सामरं ब्राह्मणसुवर्णचौ
र्यपापस्य प्रायश्चित्तं वक्ष्यामः ९७ अपहृतसुवर्णस्तु ब्राह्मणस्य यतः स्वयमिति निशात तपसरणात् ब्रा
ह्मणः सुवर्णचौरो राजानं गत्वा ब्राह्मणसुवर्णहरणलक्षणं कर्म कथयन् ममानुग्रहं करु इति ब्रूयात् ब्रा
ह्मणग्रहणं मनुष्यमात्रप्रदर्शनार्थं प्रायश्चित्ती पतेन रइति प्रक्रान्तत्वात् क्षत्रियादीनां प्रायश्चित्तान्तरा
भिधानाच्च ९८ स्कन्धेनाधाय मुशलमित्यादेरुक्तत्वात् तेनार्पितं मुशलादि गृहीत्वा तं सुवर्णस्तेयकारिणं
मनुष्यमेकवारं राजा स्वयं हन्यात् स च तेनैव वधेन मुशलादिघातेन हतो मृतो वा शुचिरिति याज्ञवल्क्य
वचनात् मृतो मृतकल्पो वा जीवन्नपि तस्मात्पापान्मुच्यते ब्राह्मणस्तपसैव तस्माद्वधकारणान्न ब्राह्मणो ह
न्यात् सर्वपापेष्ववस्थितमित्युक्तत्वाच्च तपसैव शुद्ध्यति अत एव मनुव्याख्यानपरे भविष्यपुराणे यदे
तद्वचनं वीरब्राह्मणस्तपसैव वा तत्रैककारणाद्धि हन्याद्ब्राह्मणस्य सहत्राधिप तपएव मनेन हत प्रति मेयो वधः

अमेध्ये वा पतेन्मत्तो वैदिकं वाप्युदाहरेत् अकार्यमन्यत्कुर्याद्वा ब्राह्मणो मदमोहितः ९५ यस्य
कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत् तस्य व्यपैति ब्राह्मण्यं शूद्रत्वं च स गच्छति ९६ एषा विचि
त्राभिहिता सुरापानस्य निःकृतिः अत ऊर्ध्वं प्रवक्ष्यामि सुवर्णस्तेयनिःकृतिः ९७ सुवर्ण
स्तेयकृद्विप्रो राजानमभिगम्य च स्वकर्म ख्यापयन् ब्रूयान्मां भवाननुशास्त्विति गृहीत्वा मुस
लं राजा सकृद्धन्यात्तु तं स्वयं वधेन शुद्ध्यति स्तेनो ब्राह्मणस्तपसैव वा ९९ तपसापनुनु
त्सुस्तु सुवर्णस्तेयजं मलं चीरवासा द्विजोऽरण्ये चरेद्ब्रह्महणो व्रतं १००

सत्ववासाद्वः क्षत्रियादीनामपि तपसो विकल्पार्थः ब्राह्मणस्य तु तप एवेति नियमो न तु ब्राह्मणस्यैव
तपः अत एव भविष्यपुराणे इतरेषामपि विप्रोक्तं तपो न प्रतिषिध्यत इति तदेव तपआह ९९ तपसा
सुवर्णस्तेयोत्पन्नं पापं द्विजो हन्तुमिच्छन्नरण्ये ब्रह्महणः संबन्धि व्रतं द्वादशवार्षिकं कुर्यात् एत
द्वादशवार्षिकं लोमगौरवात् क्षत्रियादीनां मरणान्तिकं कल्पितत्वाच्च ब्राह्मणसंबन्धिनः सुवर्णस्य पंच
कृष्णलको माषस्तेन सुवर्णस्तु षोडशो माषकः परिमाणं सुवर्णस्यापहारे द्रष्टव्यं न ततो न्यूनस्य परिमाण
मेतावता मन्युक्तपरिमाणस्य गृहीतत्वाच्चापह्नवात् ततोऽधिकपरिमाणं भविष्यपुराणे श्रूयते तत्र चादि
धा न्यूने सुवर्णमात्रापहारे तथाविधप्रायश्चित्तविषयमेव तथा च भविष्यपुराणे क्षत्रियामात्रस्यैव
[illegible] सति: सुवर्णतस्करः युगलकृत्स्नविप्रस्य पंच निष्कान् हरति चेत् निष्कमेकाद्यतनपादग्र
[illegible] निमित्तर्क्षीर चरेत् मात्रामत्स्पृश्य ब्राह्मणसुवर्णस्तेयजनितं पापमेभिर्द्विजो
[illegible] त्या पामनुक्तमपि प्रायश्चि

नं कल्पनीयमिति ज्ञापनार्थं गुरुस्त्रीगमननिमित्तं तु पाप
मेभिर्व्रतैर्वक्ष्यमाणप्रायश्चित्तैर्निर्हरेत् १००

म॰स्मृ॰
टी॰
२१२

एतं ... हत्वा ... उत्पन्ने पूर्वोक्तगार्द्दभ पश्वादिकृत्वा गार्द्दभवासः परिधायेति हमौतिस्मर
णं ... अवकीर्णी ... चर्मेशाहत्यावकीर्णीमिति एवं स्वपापं ख्यापयन् सप्तगृहाणि भैक्षं चरेत् २२
तेभ्यः सप्तगृहेभ्यो लब्धेन भैक्षेण एककालमाहारं कुर्वन् सायंप्रातर्मध्यंदिनेषु स्नानमाचरन् सोवकी
र्णी संवत्सरेण शुध्यति २२ ब्राह्मणस्य रुजः कृत्वेत्यादिना जातिभ्रंशकरं कर्मोक्तं तन्मध्यादन्यतमं कर्म
विशेषमिच्छातः कृत्वा वक्ष्यमाणं सांतपनं कृच्छ्रं सप्ताहसाध्यं कुर्यात् अनिच्छातः प्राजापत्यं कुर्यात् २३
खराश्वोष्ट्रमृगादिना संकरीकरणान्युक्तानि निंदितेभ्यो धनादानमित्यादिना चापात्रीकरणान्युक्ता
नि तेष्वन्यतमं तिच्छातः कृत्वा चांद्रायणं पवायूमसीयात् २४ ब्रह्महत्याव्रतात् द्वादशवार्षिकात्
तुरीयो भागः क्षत्रियवधे स्मृतः त्रैवार्षिकरूपः एतच्च प्रायश्चित्तं वृत्तस्थ क्षत्रियवधः ... पपान्तका

न

एतस्मिन्नेनसि प्राप्ते वसित्वा गार्द्दभाजिनं । सप्तागारं चरेद्भैक्षं स्वकर्म परिकीर्त्तयन् २२
तेभ्यो लब्धेन भैक्ष्येण वर्त्तयन्नेककालिकं । उपस्पृशंस्त्रिषवणमब्देन स विशुध्यति २२
जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया । चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया २३
संकरापात्रकृत्यासु मासं शोधनमैंदवं । मलिनीकरणीयेषु तप्तः स्याद्यावकैस्त्र्यहं २४
तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः । वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः २५
अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः । वृषभैकसहस्रा गा दद्यात्सुचरितव्रतः २६
त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतं । वसन्दूरतरे ग्रामाद्वृक्षमूलनिकेतनः २७

२१२

तेनोपदिष्टं त्रैमासिकापेक्षया गुरुत्वाद्वृत्तस्य क्षत्रियस्य कामतो वधे बोध्यं वैश्ये साध्वाचारे काम
तो हतेऽष्टमो भागः सार्द्धवार्षिकं वृत्तस्थे शूद्रे हतस्य कामतो हते षोडशभागो नवमासिकं द्रष्टव्यं
२५ अबुद्धिपूर्वं पुनः क्षत्रियं निहत्य वृषभैकाधिकं सहस्रं गवां सम्यगाचरितव्रतो ब्राह्म
णो दद्यात् २६ यहासंयतो जटावान् ग्रामाद्विप्रकृष्टवृक्षमूलकृतनिवासो ब्रह्महणोक्तं
वा ब्रह्महा द्वादश समा उत्पादितं वर्षत्रयं कुर्यात् नवत्वरीष्यो ब्रह्महत्या पाउ अनेन पुनरुक्तिर्वा
च्या जटी दूरतरे ग्रामाद्वृक्षमूलनिकेतन इति तस्यानिरिक्ता वासरोध्वज धारणादि सकल
धर्मनिवृत्त्यर्थं नाद ... कामाधिकारास्त्वेदकामतः ... अवमप्युचितं २७

अ॰
२१२

१९ २४ वृषभैकादशा गा यास्तासां सर्वासां समाप्तानुष्ठिते प्रायश्चित्ते दद्यात् अविद्यमाने तावति धने सर्वस्वं वेदविद्भ्यो ब्राह्मणेभ्यो दद्यात् २५ अपरेषूपपातककारिणो वक्ष्यमाणावकीर्णिवर्जितान् पापनिर्हरणार्थं एतदेव गोवधप्रायश्चित्तं चान्द्रायणं वा कुर्युः चान्द्रायणस्य लघुत्वात् लघुषूपपातकेषु सति ज्ञातिशक्तिगुणापेक्षया वा योजनीयं २६ अवकीर्णी वक्ष्यमाणः काणेन गर्दभेन रात्रौ चतुष्पथे पाकयज्ञविधानेन निर्ऋतिनाम्नीं देवतां यजेत २७ ततो नैर्ऋतेन गर्दभयागादिविधिना होमान् प

द्ध्वानुगच्छेत्ता यास्तु तिष्ठन्नूर्द्ध्वं रजः पिबेत् शुश्रूषित्वा नमस्कृत्य रात्रौ वीरासनं वसेत् १९ तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत् आसीनासु तथासीनो नियतो वीतमत्सरः २० आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः पतितां पङ्कलग्नां वा सर्वप्राणैर्विमोचयेत् २१ उष्णे वर्षति शीते वा मारुते वाति वा भृशं न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः २२ आत्मनो यदि वान्येषां गृहे क्षेत्रेऽथवा खले भक्षयन्तीं न कथयेत् पिबन्तं चैव वत्सकं २३ अनेन विधिना यस्तु गोघ्नो गामनुगच्छति स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति २४ वृषभैकादशा गाश्च दद्यात्सुचरितव्रतः अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् २५ एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः अवकीर्णिविशुद्ध्यर्थं चान्द्रायणमथापि वा २६ अवकीर्णी तु काणेन गर्दभेन चतुष्पथे पाकयज्ञविधानेन यजेत निर्ऋतिं निशि २७ कृत्वाग्निं विधिवद्धोमानन्ततश्च समित्यृचा वातेन्द्रगुरुवह्नीनां जुहुयात्सर्पिषाहुतीः २८ कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः अतिक्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मवादिनः २९ मारुतं पुरुहूतं च गुरुं पावकमेव च चत्वारो व्रतिनोऽभ्येति ब्राह्मं तेजोऽवकीर्णिनः ३०

यावत्चतुष्पथे कृत्वाग्निं तेनामाज्येन मारुतेन्द्र ... चामारुतं द्व्यह ... पत्नीनां हुतेनाकृतीर्जुहुयात् प्रसिद्धत्वात् अवकीर्णिव्रतलक्षणमाह २८ इच्छातो द्विजातिरवकीर्णी भवेत् गमना ब्रह्मचारी तपोवस्थितमिति याज्ञवल्क्यस्मरणानुष्ठी योनौ शुक्रोत्सर्गं ब्रह्मचर्यस्यातिक्रममूचुः धर्मज्ञा वेदविदः प्राहुः २९ ब्रह्मचारिणो नियमानुष्ठानजं तेजस्तदवकीर्णिनः एतेषु ... वायवादीननुवर्तते इत्यतस्तेभ्यश्चाज्याहुतीर्जुहुयात् आज्याहुतीव

अश्वं हत्वा [illegible] हत्वा पंचनीलान्वृषभान्दद्यात् अजामेषयोः प्रत्येकं हत्वा वृषभं दद्यात् गर्दभं हत्वा ए-
कवर्षं वत्सं दद्यात् ७५ आममांसभक्षिणो मृगान्व्याघ्रादीन्हत्वा बहुक्षीरां धेनुं दद्यात् अनाममांस-
भक्षकान्हरिणादीन्हत्वा प्रौढवत्सिकां दद्यात् उष्ट्रं हत्वा सुवर्णरक्तिकां दद्यात् ७६ ब्राह्मणादि-
वर्णाचतुष्टयस्त्रियोऽनवस्थिताः पक्षमात्रकृष्टव्यभिचारिणीर्हत्वा ब्राह्मणादिक्रमेण चर्मपुटधनुः-
छागमेषान्प्रत्यर्थं दद्यात् ७७ अथ च सर्पप्रभृतीनामभावे दानेन सर्पादिवधपापनिर्हरणं कर्तुमसम-
र्थो ब्राह्मणादिः प्रत्येकं वधे कृच्छ्रं प्राजापत्यं द्विजः पापनिर्हरणार्थं कुर्यात् सर्पादयश्चाभि-
कार्ष्णामसीदयादिपादिप्रारभ्यत्र नवस्थितासमेतस्पर्शलाग्रसंते ७८ अनस्थिसाहचर्यादस्थिमतां प्रा-
णिनां कृकलासादीनां वधे सहस्रस्य वधे शूद्रवधप्रायश्चित्तमोपदेशिकं कुर्यात् अस्थिरहितानां तु म-

वासो दद्याद्धयं हत्वा पंच नीलान्वृषान्गजं अजमेषावनड्वाहं खरं हत्वैकहायनं ७५ क्र-
व्यादांस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीं अक्रव्यादान्वत्सतरीमुष्ट्रं हत्वा तु कृष्णलं ७६
चर्मकार्मुकबस्तादीन्पृथग्दद्याद्विशुद्धये चतुर्णामपि वर्णानां नारीर्हत्वानवस्थिताः ७७
दानेन वधनिर्णेकं सर्पादीनामशक्नुवन् एकैकशश्चरेत्कृच्छ्रं द्विजः पापापनुत्तये ७८
अस्थिमतां तु सत्वानां सहस्रस्य प्रमापणे पूर्णे चानस्यनस्थ्नां तु शूद्रहत्याव्रतं चरेत् ७९ किंचि-
द्देयं तु विप्राय दद्यादस्थिमतां वधे अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति ८० फलदा-
नां तु वृक्षाणां छेदने जप्यमृक्शतं गुल्मवल्लीलतानां च पुष्पितानां च वीरुधां ८१

त्कुणादीनां शकटपरिमितानां वधे एतदेव प्रायश्चित्तं कुर्यात् ७९ अस्थिमतां तु दुर्बलानां कृक-
लादीनां प्रत्येकं वधे किंचिद्देयं दद्यात् अस्थिमतां वधे पणो देय इति सुमन्तुस्मरणात् किंचिद्देयमिति पणो
द्रष्टव्यः अनस्थ्नां तु यूकामत्कुणादीनां प्रत्येकं वधे प्राणायामेन शुद्धो भवति प्राणायामश्च सव्याहृतिकां
सप्रणवां गायत्रीं शिरसा सह त्रिः पठेदयं प्राणायामः स्मर्यते इति वसिष्ठोक्तलक्षणो ग्राह्यः
८० फलदानां वृक्षाणामाम्रादीनां कूष्माण्डादीनां वल्लीनां गुडूच्यादीनां लतानां द्राक्षाशाखासक्तानां पु-
ष्पितानां च वीरुधां कूष्माण्डादीनां प्रत्येकं छेदने पापमोचनार्थं सावित्र्यादि ऋक्शतं जपनीयं यद्यपीन्धनार्थ-
मशुष्काणां द्रुमाणामवपातनमित्युपपातकमध्ये पठितस्य गुरुप्रायश्चित्ताभिधानात् फलदद्रुमादि

213

एतदेव द्वादशवार्षिकं व्रतमकामाधिकारादकामतः साध्वाचारं वैश्यं हत्वा वर्षमेकं ब्राह्मणादिः कुर्यात् एकाधिकं वा गोशतं दद्यात् २७ एतदप्यकामतः इदमेव व्रतं शूद्रहा षण्मासान् चरेत् वृषभैकादशो वा सिता गाः शुक्लवर्णा दश ब्राह्मणायैव दद्यात् २८ विडालनकुलचाषभेककुक्कुरगोधापेचककाकानामेकैकं हत्वा शूद्रहत्याव्रतं चरेत् स्त्रीशूद्रविट्क्षत्रवधश्चोपपातकप्रायश्चित्तं गोवधव्रतं चान्द्रायणं चरेत् न तु शूद्रे ते पत्तुः षोडशोन्मादिपापस्खलनाद्वा चान्द्रायणम् एतत्कामतोऽभ्यासात् इति विषये द्रष्टव्यः २९ अबुद्धिपूर्वं मार्जारादीनां वधे त्रिरात्रं क्षीरं पिबेत् । तत्र मंदानलत्वादिना असमर्थः त्रिरात्रं योजनमध्वनो गच्छेत् तत्राप्यशक्तः त्रिरात्रं नद्यां स्नायात् त।

एतदेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः । प्रमाप्य वैश्यं वृत्तस्थं दद्याच्चैकशतं गवां २७ एतदेव व्रतं कृत्स्नं षण्मासान् शूद्रहा चरेत् वृषभैकादशा वापि दद्याद्विप्राय गाः सिताः २८ मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् ३० पयः पिबेत्त्रिरात्रं वा योजनं वाध्वनो व्रजेत् उपस्पृशेत्स्रवन्त्यां वा सूक्तं वाब्दैवतं जपेत् ३१ अभ्रिं कार्ष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः पलालभारकं षण्ढे सीसकं चैव माषकं ३२ घृतकुम्भं वराहे तु तिलद्रोणं तु तित्तिरौ शुके द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनं ३३ हत्वा हंसं बलाकां च बकं बर्हिणमेव च वानरं श्येनभासौ च स्पर्शयेद्ब्राह्मणाय गां ३४

ब्राह्मणः त्रिरात्रमापोहिष्ठामयोभुव इत्यादि जपेत् यद्योत्तरं बलवत्त्वात् पूर्वोऽसंभवे उत्तरपरिग्रहः न तु वैकल्पिकः ३१ सर्पं हत्वा ब्राह्मणः अयतीक्ष्णाग्रं लोहदण्डं कुद्दालं दद्यात् नपुंसके हते पलालभारं सीसकमाषकं च ब्राह्मणाय दद्यात् ३२ शूकरे हते घृतपूर्णं घटं ब्राह्मणाय दद्यात् तित्तिरिसंज्ञके पक्षिणि हते चतुराढकपरिमाणं तिलद्रोणं दद्यात् शुके हते द्विहायनं वत्सं क्रौञ्चपक्षिणं हत्वा त्रिहायनं वत्सं ब्राह्मणाय दद्यात् ३३ हंसबलाकाबकमयूरवानरश्येनभा[illegible]णामन्यतमं हत्वा ब्राह्मणाय गां दद्यात् ३४

ये स्थीं सुराभांडे इतरमद्यभांडे वा स्थिता अपः सुरारसगंधवर्जिताः पीत्वा शंखपुष्प्याख्यौषधिश्रृतेप
ण पयः क्षीरं न तूदकं शंखपुष्पीविपक्केन क्षीरेण वर्त्तयेदिति बौधायनस्मरणात् पंचरात्रं पिबेत् सु
रामद्ययोः स्नानपाने न गुरुलघुप्रायश्चित्तादिविधानादिहापि स्नानादिप्रकारभेदेन विषयसमीकर
णं समाधेयं वाचस्पतिकमेव प्रायश्चित्तसाध्यमिति मेधातिथिः ४६ सुरां स्पृष्ट्वा दत्त्वा च स्वस्तिवाचनपू
र्वकं च प्रतिगृह्य शूद्रोच्छिष्टाः पीत्वापः कुशैः सम्पादनात् ब्राह्मणोऽम्भः क्वथितं उदकं त्र्यहं पिबेत् ४७
ब्राह्मणः कृतसोमयागः सुरापस्य मुखसंबंधि सुरागंधं घ्रात्वा जलमध्ये प्राणायामत्रयं कृत्वा घृतं प्राश्य शु
द्धो भवति ४८ विड्वराहादीनां वस्त्रमाणानाद्बुद्धिपूर्वं मनुष्यसंबंधि मूत्रं पुरीषं वा स्वाद्य सुरासंस्पृष्टं च भ

अपः सुराभाजनस्था मद्यभांडस्थितास्तथा पंचरात्रं पिबेत्पीत्वा शंखपुष्पीश्रृतं पयः ४६
स्पृष्ट्वा दत्त्वा च मदिरां विधिवत्प्रतिगृह्य च शूद्रोच्छिष्टाश्च पीत्वापः कुशवारि पिबेत्त्र्यहं ४७
ब्राह्मणस्तु सुरापस्य गंधमाघ्राय सोमपः प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुध्यति ४८
अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातयः ४९
वपनं मेखला दंडो भैक्ष्यचर्या व्रतानि च निवर्त्तंते द्विजातीनां पुनः संस्कारकर्मणि ५०
अभोज्यानां तु भुक्त्वान्नं स्त्रीशूद्रोच्छिष्टमेव च जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान् पिबेत् ५१

क्षादिरसास्वादे सति भक्षयित्वा द्विजातयस्त्रयो वर्णाः पुनरुपनयनमर्हंति ४९ शिरोमुंडनमेखलादंडधा
रणभैक्ष्यचरणानि मधुमांसस्त्रीवर्जनरूपाणि प्रायश्चित्तार्थे उपनयने द्विजातीनां भवंति ५० अभो ।
ज्यान्नानां श्रोत्रियपक्वतैलपक्वे इत्यायुक्तानामन्नं भुक्त्वा जलमिश्रितसक्तुरूपेण यवागूरूपेण वा यवान्या
नयोग्यान् कृत्वा सप्तरात्रं पिबेत् यद्यप्यस्मिन्नेव विषये मत्या भुक्त्वा चरेत्कृच्छ्रमिति चतुर्थाध्याये प्राय
श्चित्तमुक्तं तेन सहैतद्वैकल्पिकं विकल्पश्चाकर्तृशक्त्यपेक्षः तथा द्विजातिस्त्रीणामुच्छिष्टं शूद्रोच्छि
ष्टं च भुक्त्वा एतदेव कुर्यात् तथा क्रव्यादसूकरोष्ट्राणामित्यादिना यत्र प्रायश्चित्तविशेषो नोक्त
स्तत्रैव मांसं भुक्त्वेदमेव कुर्यात् ५१

अन्नादिषु जातानां गुडादिरसजातानां च उदुम्बरादिफलसंभवानां मधूकादिपुष्पसंभवानां च सर्वप्राणिनां वधे घृतप्राशनं पापशोधनं ॥ ४२ ॥ कृष्टेषु क्षेत्रेषु जातानामोषधीनां षष्टिकादीनां वने च स्वयमुत्पन्नानां नीवारादीनां निःप्रयोजनच्छेदने क्षीराहारः सन्नेकाहं गोऽनुगमनं कुर्यात् ॥ ४३ ॥ एभिर्व्रतैः प्रायश्चित्तैर्हिंसाजनितानां पापानां ज्ञानाज्ञानकृतानां निर्हरणीयं भवेत् । इदानीमभक्ष्यभक्षणे प्रायश्चित्तं वक्ष्यमाणं शृणुत ॥ ४४ ॥ महापातकप्रकरणमध्ये नाम्नानाम्नान्नेदं मद्यं पैष्टीसुरापानविषयं वचनं किन्तु पैष्टीतरविषयं तत्र यथैवैकान्तपापं सर्वगौडीमाध्वीमुख्यसुरासाम्यं वो भुक्तमितरमद्यापेक्षया ब्राह्मणस्य प्रायश्चित्तगौरवार्थमित्युक्तं तेनाबुद्धिपूर्वं गौडीमाध्वीचयोर्गौतमोक्तं तप्तकृच्छ्रं कृत्वा पुनः संस्कारेणैव शुध्यति तथा च गौतमः अपेयपाने पयो घृतमुदकं वायुं प्रति त्र्यहं तप्तकृच्छ्रं ततोऽस्य संस्कारः इत्यमेवं व्याख्यातं भविष्यपुराणे अकामतः

> अन्नाद्यजानां सत्त्वानां रसजानां च सर्वशः । फलपुष्पोद्भवानां च घृतप्राशो विशोधनं ॥ ४२ ॥
> कृष्टजानामोषधीनां जातानां च स्वयं वने । वृथालम्भेऽनुगच्छेद्गां दिनमेकं पयोव्रतः ॥ ४३ ॥
> एतैर्व्रतैरपोह्यं स्यादेनो हिंसासमुद्भवं । ज्ञानाज्ञानकृतं कृत्स्नं शृणुतानाद्यभक्षणे ॥ ४४ ॥
> अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति । मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ॥

कृते पाने गौडीमाध्वीनराधिप तप्तकृच्छ्रविधानं स्यात् कीर्तितमेन यथोदितं बुद्धिपूर्वकपैष्टीतरमद्यपाने प्राणान्तिकमनिर्देश्यमिति शास्त्रमर्यादा तत्र गौडीमाध्वीकैर्मनासाने मरणान्तिके धादितरमद्यापेक्षया पुरुषत्वान्नमाने वमेकं मासानुभक्षयेदहमिति प्रायश्चित्तं मन्तव्यं अत एव गौडीमाध्वीः कामतः पानापनुत्त्यै भविष्यपुराणे महाश्रितैर्वा विषयेमानवीयं प्रकल्पयेत् कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि सुरापानापनुत्त्यर्थं वालवासा जटी ध्वजीति पैष्टीमाध्वीगौडीव्यतिरिक्तपुलस्त्योक्तपानसादिनवविधमद्यस्य प्रत्येकपाने लघुत्वाद्बुद्धिविषये पुनः संस्कारमात्रमेव केवलमन्यदाल्पप्रायश्चित्तं ब्राह्मणस्य प्रक्तं बुद्धिपूर्वं तु पानसादिमद्यपाने कृते वैज्ञानतो गुरुकृच्छ्रातिकृच्छ्रौ भवतः पुनः संस्कारमर्हतीति भविष्यपुराणीयं अन्येष्वेवाविधेयेषु पापनोत्तमं तत्पुनः ॥ ४५ ॥

विडालकाकमूषककुक्कुरनकुलानामुच्छिष्टं केशकीटसंसर्गदुष्टं वा कृत्वा दोषादिशुद्धिकामः सन्ब्रह्मसुवर्चलाक्वथितमुदकं पिबेत् ५८ आत्मनः शुद्धिकामेन निषिद्धमन्नं न भोक्तव्यं प्रमादाज्ञानभुक्तं वमितव्यं तदसंभवे प्रायश्चित्तैः शीघ्रं शोधनीयं ज्ञानतः पुनः पूर्वोक्तं प्रायश्चित्तं भवत्येव ५९ अभक्ष्यभक्षणे यानि प्रायश्चित्तानि तेषां नानाप्रकारकं विधानमुक्तं स्तेयपापापहारिणां अधुना प्रायश्चित्तानां विधानं श्रूयतां ६० ब्राह्मणो ब्राह्मणगृहाद्धान्यमन्नाद्यं रूप्यादिधनचौर्यमिच्छातः कृत्वा न तु सजातीयं संवत्सरप्राजापत्यव्रताचरणेन शुध्यति एतच्च देशकालद्रव्यपरिमाणस्वामिविशिष्टगुणा

विडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च केशकीटावपन्नं च पिबेद्ब्रह्मसुवर्चलां ५८
अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता अज्ञानभुक्तं तूत्तार्यं शोध्यं वाप्याशु शोधनैः ५९
एषोऽनाद्यादनस्योक्तो व्रतानां विविधो विधिः स्तेयदोषापहर्तॄणां व्रतानां श्रूयतां विधिः ६०
धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः स्वजातीयगृहादेव कृच्छ्राब्देन विशुध्यति ६१
मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च कूपवापीजलानां च शुद्धिश्चान्द्रायणं स्मृतं ६२
द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मतः चरेत्सान्तपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धये ६३
भक्ष्यभोज्यापहरणे यानशय्यासनस्य च पुष्पमूलफलानां च पञ्चगव्यं विशोधनं ६४

यथैतद्यायमहत्त्वाद्दोषह्रासमेवमुत्तरत्रापि ६१ पुरुषस्त्रीक्षेत्रगृहाणामन्यतमहरणे कूपजलस्य वापीजलस्य वा समस्तस्यापहरणे चान्द्रायणं प्रायश्चित्तं मन्वादिभिः स्मृतं ६२ द्रव्याणामल्पसाराणां अल्पप्रयोजनानां वा त्रपुसीसकादीनां परगृहाच्चौर्यं कृत्वा तदपहृतं द्रव्यं स्वामिने दत्त्वा सान्तपनं कृच्छ्रं चरेदात्मशुद्धये स्वामिनोऽपहृतद्रव्यनिर्यातनमिति सर्वप्रायश्चित्तस्तेयसंबन्धिनि शेषः ६३ भक्ष्यस्य मोदकादेर्भोज्यस्य पायसादेर्यानस्य शकटादेः शय्यादेरासनस्य च पुष्पमूलफलानां च प्रत्येकमपहरणे पञ्चगव्यपानं विशोधनं ६४

225

मानि स्वभावतो मधुरादिरसानि कालवशेनोदकपरिवासादिना चाम्लादिभावं भजन्ते तानि शुक्तानि क
षायान् विभीतकादीन् क्वथितानन्यान्यपि पीत्वा यावत्तज्जीर्णं न भवति तावदशुचिः शुद्धो भवति
५४ ग्रामसूकरखरोष्ट्रशृगालवानरकाकानां मूत्रपुरीषं वा द्विजातिर्भुक्त्वा चान्द्रायणं कुर्यात् ५५
वाय्वादिना शोषितानि मांसानि भुक्त्वा भूम्यामुद्भवानि छत्राकानि च भुक्त्वा भूमिजं वृक्षजं वापि छ
त्राकं भक्षयन्ति ये ब्रह्मघ्नांस्तान् विजानीयादिति यमेन छत्राकस्यापि निषेधात् तत्परिहारेण मांसमुक्तं ।
यो मांसमिति भक्ष्याभक्ष्यरूपतया यत्र ज्ञातं तथा सूनाहिंसास्थानं ततोपदानीतं तद्भुक्त्वा चान्द्रायण

शुक्तानि च कषायांश्च पीत्वामेध्यान्यपि द्विजः । तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः ५४
विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः । प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत्
शुष्काणि भुक्त्वा मांसानि भौमानि कवकानि च । अज्ञातं चैव सूनास्थमेतदेव व्रतं चरेत् ५६
क्रव्यादशूकरोष्ट्राणां कुक्कुटानां च भक्षणे । नरकाककखराणां च तप्तकृच्छ्रं विशोधनं
मासिकान्नं तु योऽश्नीयादसमावर्तको द्विजः । स त्रीण्यहान्युपवसेदेकाहं चोदके वसेत् ५८
ब्रह्मचारी तु योऽश्नीयान्मधु मांसं कथंचन । स कृत्वा प्राकृतं कृच्छ्रं व्रतशेषं समापयेत् ५९

मेव कुर्यात् ५७ आममांसभक्षिणां पक्षिणां गृध्रादीनां ग्रामसूकरोष्ट्रग्राम्यकुक्कुटमानुषकाक
गर्दभानां प्रत्येकं बुद्धिपूर्वकमांसभक्षणे वक्ष्यमाणं तप्तकृच्छ्रं विशोधनं यत्तु छत्राकं विड्वरा
हं चैतन्मनेन विड्वराहग्राम्यकुक्कुटयोर्बुद्धिपूर्वकभक्षणे पञ्चमाध्याये पतितमुक्तं तदभ्यासविषये
व्याख्यातमिदं त्वनभ्यासविषयं तप्तकृच्छ्रमित्यविरोधः ५८ यो ब्रह्मचारी ब्राह्मणो मासिकश्राद्ध
संबन्ध्यन्नं भुङ्क्ते एतत्सपिण्डीकरणात्पूर्वमेकोद्दिष्टश्राद्धान्नस्योपलक्षणं स त्रिरात्रमुपवसेत् त्रिरात्र
मध्ये एकस्मिन्नहनि जलमध्ये वसेत् ५९ यो ब्रह्मचारी मधु मांसं वा निषिद्धातः आपदि वा प्राश्ना

य-स्मृ-टी- १२६

तिस्त्वेताः पैतृष्वस्रेयाद्या भार्यार्थे प्रत्तो नोद्वहेत् ज्ञातित्वेन बांधवत्वेन ता नोपयंतव्याः यस्मादेता
उपयच्छन्नरकं प्रति असपिंडा च या मातुरित्यनेनैवासां निषेधसिद्धौ द्वितीयमाचारदर्शनेनानिषे
धदार्ढ्यार्थं पुनर्वचनं ११ अमानुषीषु वडवाद्यासु गोवर्जितासु गोष्वप्यवकीर्णिः संवत्सरं प्राजाप
संचरेत् इति शंखलिखिताद्गोकृतप्रायश्चित्ताभिधानात् तथा रजस्वलायामयोनितश्चान्यत्र स्त्रियां ज
ले च रेतःसेकं कृत्वा पुरुषः सांतपनं कृच्छ्रं व्रतं कुर्यात् १२ यत्र क्वापि देशे पुरुषे सेविता स्त्रियां वा
गोयुक्तयानेष्वकटादौ वा जले वा दिवाकाले च मैथुनं सेवित्वा सवस्त्रः स्नायात् १३ चांडालानाम्

एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् ज्ञातित्वेनानुयोग्यास्ताः पतति ह्युपयन्नधः ११
अमानुषीषु पुरुष उदक्यायामयोनिषु रेतः सिक्त्वा जले चैव कृच्छ्रं सांतपनं स्मृतं १२
मैथुनं तु समासेव्य पुंसि योषिति वा द्विजः गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत् १३
चांडालांत्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति
विप्रदुष्टां स्त्रियं भर्ता निरुंध्यादेकवेश्मनि यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतं १४

२२६

अन्त्यजानां म्लेच्छश्वपचादीनां अज्ञानतो भोजनं प्रतिगृह्य विषमं ज्ञानात् ब्राह्मणः स्त्रियो गत्वा तेषां
चान्नं भुक्त्वा तेभ्यः प्रतिगृह्य पतति तत्प्रायश्चित्तं कुर्यात् पतनं च गुरुत्वादभ्यासतो भोजनप्रतिग्र
हविषयं ज्ञानात् तेषां स्त्रीगमनादिकं कृत्वा साम्यं गच्छति एतच्च प्रायश्चित्तं गौरवार्थं १४ विप्रदुष्टां
प्रदुष्टामिच्छया व्यभिचारिणीमिति यावत् भर्ता निरुंध्यात् पत्नीकार्येभ्यो निवर्त्य निगडबंधनेनैक
त्र गृहे स्थापयेत् यच्च पुरुषस्य सजातीयपरदारगमने प्रायश्चित्तं तदेवैनां कारयेत् तत्र स्त्रीणा
मर्द्धं प्रदातव्यमिति यदा शिष्टा मुक्ता तदिच्छया व्यभिचारिणी कार्यं १५

उ. १२६

तृणकाष्ठद्रुमाणां शुष्कान्नस्य गुडादेः गुडचर्मवस्त्रमांसानां प्रत्येकमपहरणे त्रिरात्रमुपवासः स्यात्
६५ मणिमुक्ताविद्रुमताम्रलोहरूप्यकांस्यपाषाणानां प्रत्येकमपहरणे द्वादशाहं तण्डुलकणभक्ष
णं कार्यं सर्वत्र सकृदभ्यासदेशकालद्रव्यस्वामिगुणदोषतारतम्यापेक्षया उत्कृष्टापकृष्टद्रव्यापहार
विषमसमीकरणं समाधेयं ६६ कार्पासकृमिकोशोर्णानां द्विशफैकशफगवादेः एकशफस्यादेः प
क्षिणां च शुष्कादीनां गन्धप्रधानानां चागुरुप्रभृतीनामोषधीनां रज्ज्वाश्च प्रत्येकं हरणे त्र्यहं क्षीराहा
रः स्यात् अत्रापि पूर्ववद्विषमसमीकरणपरिहारः स्वामिनो चोत्कृष्टापकृष्टद्रव्यसमर्पणं तदपि च

तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च चैलचर्मामिषाणां च त्रिरात्रं स्यादभोजनं ६५
मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च अयस्कांस्योपलानां च द्वादशाहं कणान्नता ६६
कर्पासकीटजोर्णानां द्विशफैकशफस्य च पक्षिगन्धौषधीनां च रज्ज्वाश्चैव त्र्यहं पयः ६७
एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः अगम्यागमनीयं तु व्रतैरेभिरपानुदेत् ६८ गुरु
तल्पव्रतं कुर्याद्रेतः सिक्त्वा स्वयोनिषु सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च ६९ पै
तृष्वस्रेयीं भगिनीं स्वस्रीयां मातुरेव च मातुश्च भ्रातुराप्तस्य गत्वा चान्द्रायणं चरेत् ७०
कमनं प्रतिरागादानं स्थानानि यथान्तथा एवं प्रत्येवं ...
वनादेकरूपप्रायश्चित्तविरोधः ६७ एतैरुक्तैः प्रायश्चित्तैर्लेपजनितं पापं द्विजातिरपानुदेत्
अगम्यागमननिमित्तं पुनरेभिर्वक्ष्यमाणैः प्रायश्चित्तैर्निर्हरेत् ६८ स्वयोनिषु सोदर्याभगिनी
षु तत्सखिनः भार्यासु पुत्रपत्नीषु कुमारीचाण्डालीषु च प्रत्येकं रेतः सिक्त्वा गुरुदारगमनप्रायश्चित्तं
कुर्यात् अत्रापि तावन्मात्रासाम्यं पूर्ववत् यावत् पापमरणान्तिकमनएव रेतःसिक्त्वा कुमारीषु चाण्डा
लीषु तज्जासु च सपिण्डापत्यदारे त्रुप्राणस्य कालविधीयते इति यमेन प्राणान्तिकमुपदिष्टं अन्त्यानां
नदत्रत ६९ पैतृष्वस्रेयीं तच्चस्वस्रीयं दुहितरं मातुः सोदर्यभ्रातुर्दुहितरं सोदर्यभगिनीमिथुनि

म॰स्मृ॰
टी॰
२१२
८२८
६

पतितसंसर्गोपि पापकारिवचनः सकलपापिनां विशेषणात् एषां पतितानां मध्ये येन पापकारि
णा सह पूर्वोक्तं संसर्गं करोति स तस्यैव व्रतस्य प्रायश्चित्तं कुर्यात् न तु मरणांतिकमभिमतं तदपि व
त्संसर्गिणां किं प्रमाणं ब्रह्महा द्वादशाब्दानीत्यादिकं पादहीनं कर्त्तव्यं तथा च व्यासः योयेन संवसे
द्वर्षं सोपि तत्समतामियात् पादन्यूनं चरेत्सोपि तस्य तस्य व्रतं द्विजः ८० महापातकिनो जीवत
एवं प्रेतस्योदकक्रियावक्ष्यमाणरीत्या सपिंडैः समानोदकैर्ग्रामाद्बहिः कृत्वा ज्ञात्यृत्विग्गुरुस।
न्निधाने रिक्तापात्रं नवम्यादितिथौ दिनांते कर्त्तव्या ८२ सपिंडसमानोदकप्रयुक्ता दासीउदकपू

227

योयेन पतितेनैषां संसर्गं यातिमानवः सतस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये ८० प
तितस्योदकं कार्यं सपिंडैर्बांधवैर्बहिः निंदितेहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ ८२
दासीघटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा अहोरात्रमुपासीरन्नशौचं बांधवैः सह ८२
निवर्तेरंश्च तस्मात्तु संभाषणसहासने दायाद्यस्य प्रदानं च यात्रामेव च लौकिकी ८२
ज्येष्ठता च निवर्त्तेत ज्येष्ठावाप्यं च यद्वसु ज्येष्ठांशं प्राप्नुयाच्चास्य यवीयान्गुणतोधिकः

र्णं घटं प्रेतवदिति दक्षिणाभिमुखी भूय भूमौ पादेन क्षिपेत् यथा तन्निरुदकं भवति तदनु ते स।
पिंडाः समानोदकैः सहाहोरात्रमशौचमाचरेयुः ८२ तस्मात्पतितात्सपिंडानां संभाषणमेका
सनोपवेशनं तस्मै च रिक्थदानं च उत्सवादौ निमंत्रणादिरूपो लोकव्यवहारश्च निवर्त्तेत ८२
ज्येष्ठस्य पतितस्य प्रत्युत्थानादि तस्य न कार्यं ज्येष्ठलभ्यं च विंशोद्धारधनं न तस्य देयं यद्यप्येकस्य
दानप्रतिषेधाद्देवोद्धारप्रतिषेधोपि सिद्धस्तथापि यवीयसः प्राप्त्यर्थमनूद्यते तस्यैव ज्येष्ठस्य
वधिनसोद्धारांशोंतस्तु योगुणाधिको लभते ८५

उ॰
२१२

साध्वी सजातीयगमने तु सकृच्चांद्रायणं प्रायश्चित्तमापदि पुनः सजातीयेनाभ्यर्थिता सती तद्गमनं कुर्यात्
तदा सा प्राजापत्यं कृच्छ्रं चांद्रायणं च शोधनं मन्वादिभिः स्मृतं २४ वृषलत्वचांडालीप्रायश्चित्त
गौरवाच्चांडालीगमने यदेकरात्रेण ब्राह्मणः पापमर्जयति तद्भैक्ष्याशी नित्यं सावित्र्यादिकं जप
न्त्रिभिर्वर्षैरपनुदति तथापस्तंबः यदेकरात्रेण करोति पापं कृष्णं वर्णं ब्राह्मणः सेवमानः अधोधि
वासेन चतुर्थकालभुक्तः त्रिभिर्वर्षैस्तदपहंति पापमिति मेधातिथिस्त्विदमेव व्याख्यानं गो
विंदराजस्तु अक्रमपरिणीतशूद्रागमनप्रायश्चित्तमाह २२ इयं हिंसाद्यभक्ष्यभक्षणस्तेया
गम्यागमनकारिणां चतुर्णामपि पापकृतां विष्णुरुक्ता इदानीं साहचर्या पकर्तृभिः सह संसर्गिणा
मिमानिः कृतीः संस्तुतीः शृणुत २७ पतितेन सह संसर्गमाचरन् एकपानगमनैकासनो य

सा चेत्पुनः प्रदुष्येत सदृशेनोपमंत्रिता कृच्छ्रं चांद्रायणं चैव तदस्याः पावनं स्मृतं २६
यत्करोत्येकरात्रेण वृषलीसेवनं द्विजः तद्भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति २२
एषा पापकृतामुक्ता चतुर्णामपि निष्कृतिः पतितैः संप्रयुक्तानामिमाः शृणुत निष्कृतीः
संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनान्न तु यानासनाशनात् २८

येषां नैकपंक्तिभोजनतृणात्संसर्गात्संवत्सरेण पतति न तु याजनाध्यापनयौनात्संवत्सरेण प
तति किं तु सद्य एवेत्यर्थः अध्यापनं मंत्रोपनयनपूर्वकं सावित्र्यादि न याजनादीनां च सद्यः
पातनहेतुत्वमाह देवलः याजनं योनिसंबंधं स्वाध्यायं सहभोजनं कृत्वा सद्यः पतत्येते प
तितेन न संशयः विष्णुः विष्णुः संवत्सरात्पतितेन सहाचरन् पतति सहयानासनाभ्यां यौना
त्सद्य एव बौधायनः संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनात्सद्यो न तु या
नासनात् गोविंदराजस्तु याजनादीनां त्रयाणां संवत्सरेण पातहेतुत्वं सहगमनादीनां
तु सद्य इत्यसंवत्सरेण किं तु न स्मादिदमिति व्याचष्टे अस्मदीयमनुव्याख्यानमनिवाक्यानुसा
रिणी नेनां गोविंदराजस्य कल्पना मनुरुध्यते २९

म॰ स्मृ॰
टी॰
१९८

गर्हितेन कर्मणा निषिद्धप्रतिग्रहादिना यद्ब्राह्मणा धनमर्जयन्ति तस्य धनस्य त्यागेन जपतपोभ्यां च ते शुध्यन्ति धनत्यागेन च प्रायश्चित्तविधानात् बहुमूल्ये च करितुरगादौ अल्पमूल्ये लोहादौ प्रतिगृहीते तस्य प्रायश्चित्ताभिधानमुपपन्नं एवमविक्रेयविक्रेयादावपि ॥ १९२ ॥ त्रीणि सावित्रीसहस्राणि नियमवान् जपित्वा गोष्ठवासी मासं क्षीराहारो भूत्वा असत्प्रतिग्रहजनितपापान्मुक्तो भवति शूद्रस्य यत्प्रतिग्रहादावप्येतदेव प्रायश्चित्तं द्रव्यदोषेण च दातृदोषेण च प्रतिग्रहस्य गर्हितत्वाविशेषात् ॥ १९२ ॥ केवलक्षीराहारेण च तेन भोजननिवृत्त्या तं कृशदेहं गोष्ठात्समागतं प्रणतं नम्रीभूतं किमस्माभिः सह साम्यमिच्छसि पुनरेवासत्प्रतिग्रहं न करिष्यसीत्येवं धर्मज्ञा ब्राह्मणाः

यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनं। तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च ॥ १९२ ॥ जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः। मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात् ॥ १९२ ॥
उपवासकृशं तं तु गोव्रजात्पुनरागतं। प्रणतं परिपृच्छेयुः साम्यं सौम्येच्छसीति किं ॥ १९३ ॥
सत्यमुक्त्वा तु विप्रेषु विकिरेद्यवसं गवां। गोभिः प्रवर्तिते तीर्थे कुर्युस्तस्य परिग्रहं ॥ १९४ ॥
व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च। अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति ॥ १९५ ॥

परिपृच्छेयुः ॥ १९३ ॥ सत्यमेतत् असत्प्रतिग्रहं न करिष्यामीत्येवं धर्मज्ञा ब्राह्मणाः परिपृच्छेयुः सत्यमेतत्पुनरसत्प्रतिग्रहं न करिष्यामीत्येवं ब्राह्मणानुक्त्वा गवां ग्रासं दद्यात् तस्मिंश्च यवसभक्षणादेशे गोभिः पवित्रीकृतत्वात्तीर्थभूते ब्राह्मणास्तस्य संव्यवहारार्थं स्वीकारं कुर्युः ॥ १९४ ॥ व्रात्यानां प्रागुक्तः ऊर्ध्वं त्रयोपी त्यक्तानां व्रात्यस्तोमादियाजनं कृत्वा पितृगुर्वादिव्यतिरिक्तानां च निषिद्धौर्ध्वदेहिकानां च दाहश्राद्धादिकृत्वा अभिचारं च श्येनादिकमभिचारोऽभिचारणीयस्याहीनं यागविशेषः हीनयाजनमप्युचितकर्मेति त्रिरात्रादिस्तस्य याजनं कृत्वा त्रिभिः कृच्छ्रैर्विशुद्धो भवति ॥ १९५ ॥

उ॰
१९८

कृते पुनः प्रायश्चित्ते सपिण्डसमानोदकास्तेनैव प्रायश्चित्तिना सह पवित्रजलाधारे स्नात्वा जलपूर्णं
नवघटं प्रक्षेपेयुः इह नवघटग्रहणाद्दासीघटमिमन्त्रकृतोपयोगघटः प्रतीयते ८७ स तु प्रा-
यश्चित्ती तं पूर्वोक्तं घटं जलमध्ये क्षिप्त्वा ततः स्वकीयभवनं प्रविश्य यथापूर्वं सर्वाणि ज्ञाति-
कार्याणि कुर्यात् ८८ स्त्रीष्वपि पतितास्वेतमेव पतितस्योदकं कार्यमित्यादिविधिं भर्तृसपिण्ड-
समानोदकवर्गाः कुर्युः तासां ग्रासाच्छादनपानानि पुनरासां देयानि गृहसमीपे चासां वासार्थं
कुटीर्देया ८९ पापकारिभिरकृतप्रायश्चित्तैः सह दानप्रतिग्रहादिकमर्थं किंचिन्नाचरेत्
कृतप्रायश्चित्तांश्चैतान्न कदाचिदपि पूर्वकृतपापत्वेन निन्देत् किंतु पूर्ववद्व्यवहरेत्तस्या-

प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नवं तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये ८७
स त्वप्सु तं घटं प्रास्य प्रविश्य भवनं स्वकं सर्वाणि ज्ञातिकार्याणि यथापूर्वं समाचरेत् ८८
एतमेव विधिं कुर्याद्योषित्सु पतितास्वपि वस्त्रान्नपानं देयं च वसेयुश्च गृहान्तिके ८९ एन-
स्विभिरनिर्णिक्तैर्नार्थं किंचित्समाचरेत् कृतनिर्णेजनांश्चैतान्न जुगुप्सेत कर्हिचित् ९०
बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत् ९१
येषां द्विजानां सावित्री नानूच्येत यथाविधि तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेत्
प्रायश्चित्तं चिकीर्षन्ति विकर्मस्थाश्च ये द्विजाः ब्राह्मणञ्च परित्यक्तास्तेषामप्येतदादिशेत्

पवादमाह ९१ बालं यो हतवान् कृतघ्नमुपकारमपकाराच्च रणेन यो नाशितवान् शरणार्थ-
मागतं यो हतवान् स्त्रियं च यो व्यापादितवान् कृतप्रायश्चित्तानपि संसर्गेण न संवसेत् ९२ येषां
ब्राह्मणक्षत्रियविशां मानुकल्पिककालेषूपनयनं यथाशास्त्रं न कृतं तान् प्राजापत्यत्रयं
कारयित्वा यथाशास्त्रमुपनयेत् यत्तु याज्ञवल्क्यादिभिर्व्रात्यस्तोमादि प्रायश्चित्तमुक्तं
तेन सहास्य गुरुलाघवमनुसंधाय जातिशक्त्यपेक्षया विकल्पो मन्तव्यः ९० ये पुनर्नि-
षिद्धवृत्तिः शूद्रसेवादिजीविनो द्विजा यथोपनीता अप्यनधीतवेदाः प्रायश्चित्तं कर्तुमि-
च्छन्ति तेषामप्येतत्प्राजापत्यत्रयमुपदिशेत् ९१

वेदविहितानां कर्म्मणामग्निहोत्रादीनामनुपदिष्टविशेषप्रायश्चित्तानां लोपे स्नातकव्रतानां च य-
था प्रोक्तानामतिक्रमे सत्येकाहोपवासं प्रायश्चित्तं कुर्यात् १-१ हुं तूष्णीमास्स्वेत्यवमानापेक्ष ।
त्वंकारं च विद्याद्यधिकस्योक्त्वा अभिवादनकालादारभ्याहःशेषं यावत्स्नात्वा भोजननिवृत्तः पा-
दोपसंग्रहेण प्रसादयेत् २ प्रकृतं ब्राह्मणं तृणेनापि ताडयित्वा कण्ठे वा वाससा बध्वा वाक्-
कलहे वा जित्वा प्रणिपातेन प्रसादयेत् ३ ब्राह्मणस्य हननेच्छया दण्डमुद्यम्य वर्षशतं नरकं प्राप्नो-
ति दण्डादिना पुनः प्रहृत्य वर्षसहस्रं नरकं प्राप्नोति ४ प्रकृतस्य ब्राह्मणस्य रुधिरं यावतस्त्व्या-

वेदोदितानां नित्यानां कर्म्मणां समतिक्रमे स्नातकव्रतलोपे च प्रायश्चित्तमभोजनं १
हुंकारं ब्राह्मणस्योक्त्वा त्वंकारं च गरीयसः स्नात्वानश्नन्नहःशेषमभिवाद्य प्रसादयेत् २
ताडयित्वा तृणेनापि कण्ठे वाबध्य वाससा विवादे वापि निर्जित्य प्रणिपत्य प्रसादयेत् ३
अवगूर्य त्वब्दशतं सहस्रमभिहत्य च जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते ४ शोणितं ।
यावतः पांसून्संगृह्णाति महीतले तावन्त्यब्दसहस्राणि तत्कर्ता नरके वसेत् ५ अव-
गूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्योत्पाद्य शोणितं ६
अनुक्तनिष्कृतीनां तु पापानामपनुत्तये शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत् ७
यैरभ्युपायैरेनांसि मानवो व्यपकर्षति तान्वोऽभ्युपायान्वक्ष्यामि देवर्षिपितृसेवितान् ८

कानुदकणान्भूमौ पिण्डीकरोति तावन्त्यब्दसहस्राणि तच्छोणितोत्पादको नर-
के वसेत् ५ ब्राह्मणस्य हननेच्छया दण्डाद्युद्यमने कृते कृच्छ्रं कुर्यात् दण्डादिप्रहारे कृते अतिकृ-
च्छ्रं वक्ष्यमाणं चरेत् गात्राच्छोणितमुत्पाद्य कृच्छ्रातिकृच्छ्रौ द्वौ कुर्यात् ६ अनुक्तप्रायश्चित्ता-
नां पापानां प्रतिलोमवधादिकृतानां पापानां निर्हरणार्थं कर्तुः शरीरधनादिसामर्थ्यमवेक्ष्य
पापं च ज्ञात्वा ज्ञानकृतं सकृदावृत्तमनुबन्धादिरूपेण ज्ञात्वा प्रायश्चित्तं प्रकल्पयेत् ७ यैर्हेतु-
भिर्मनुष्याः पापान्यपनुदन्ति तान्पापनाशहेतून्देवर्षिपितृभिरनुष्ठितानभ्युपायान्वक्ष्यामि ८

प्राणान्तं परित्राणार्थमुपेतं यतः सन्नुपेत्य द्विजातिरन्यथा पंच वेदमध्याप्यन्तत्रानितं पापं वर्षेण या-
वद्यवभक्षोऽभूताद्विजापमपनुदति ९६ कुक्कुरशृगालगर्दभमनुष्याश्वोष्ट्रशूकरैर्ग्रामे ग्रामसमा-
सादेशोर्जीरादिभिर्दष्टः प्राणायामेन शुद्धो भवति ९७ अपांक्त्यापेत्तेन पतितस्त्री वा दुर्मने
नोत्ताक्तेषां विशेषत्वेनानुपदिष्टप्रायश्चित्तानां मासं ब्रह्महमभुक्तात्रितो ये हिंसायेभोजनं वेद
संहिताजपादेवकृतंयेन सोऽवयजनमसीत्यादिभिरष्टभिर्मंत्रैरष्टो होमाः प्रत्येकंपनतस्

प्राणान्तं परिमजप्य वेदं विलावनजलद्विजः संवत्सरं यवाहारस्तत्पापमपसे-
धति ९६ श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च नराश्वोष्ट्रवराहैश्च
प्राणायामेन शुध्यति ९७ षष्ठान्नकालता मासं संहिताजप एव च होमाश्च
शाकलानित्यपांक्त्यानां विशोधनं ९८ उष्ट्रयानं समारुह्य खरयानं तु का-
मतः स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति ९९ विनाद्भिरप्सु
वाप्यार्तः शरीरं संनिषेव्य च सचैलो बहिराप्लुत्य गामालभ्य विशुध्यति २००

मुद्दिष्टं पापशोधनं ९९ उष्ट्रेयुक्ते याने शाकटादि एवं खरयानमपि तत्कामतः यथाकथञ्चिदा-
व्यवधानेन उष्ट्रखराभ्यां याने प्राणायामं कृत्वा न यथाकामतः स्नानं कृत्वा प्राणायामेन शु-
द्धः स्यात् ९९ अप्सु नितिहते जलेन जलमध्ये वा वेगार्त्तो मूत्रं पुरीषं कृत्वा सचैलं स्नात्वा बहिर्ग्रामेण
ग्रामे स्नात्वा गां च स्पृष्ट्वा विशुध्यति २००

तप्तकृच्छ्रं चरन् द्विजातिः त्र्यहमुष्णोदकं क्षीरं त्र्यहं उष्णं घृतं त्र्यहमुष्णवायुमेकवारं स्नानं कृत्वा च
संयमवान् पिबेत् अत्र पयःप्रमाणे विशेषः षट्पलं तु पिबेदंभस्त्रिपलं तु पयः पिबेत् पल
मेकं पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते २२ विगतात्माभिलाषस्य संजितेंद्रियस्य द्वादशाहम
भोजनं पराकाख्यः कृच्छ्रः सकृदावृत्तिमात्रेणैव लघुगुरुसकलपापापनोदनः २३
सायंप्रातर्मध्याह्नेषु स्नानं कुर्वाणः पौर्णमास्यां पंचदशग्रासानाशित्वा ततः कृष्णप्रतिप
त्क्रमेणैकैकं ग्रासं ह्रासयेत् यथा चतुर्दश्यामेको ग्रासः संपद्यते ततोमावास्यामुपोष्य शुक्ल
प्रतिपत्प्रभृत्येकैकं ग्रासं वृद्धिं नयेत् यथा पौर्णमास्यां पंचदश ग्रासाः संपद्यंते एतत्पिपीलिका

तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः २२
यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनं पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः २३ एकैकं
ह्रासयेत्पिंडं कृष्णे शुक्ले च वर्द्धयेत् उपस्पृशंस्त्रिषवणमेतच्चांद्रायणं स्मृतं २४ एत
मेव विधिं कृत्स्नमाचरेद्यवमध्यमे । शुक्लपक्षादिनियतश्चरंश्चांद्रायणं व्रतं २५
अष्टावष्टौ समश्नीयात्पिंडान्मध्यंदिने स्थिते नियतात्मा हविष्यस्य यतिश्चांद्रायणं ।
चरेत् २६

मध्यं तु चांद्रायणं २४ एवमेव पिंडानां ह्रासवृद्धित्रिषवणस्नानात्मकं विधानं यवमध्य
चांद्रायणे शुक्लपक्षे दिनः कृत्वा संयतेंद्रियः चांद्रायणमनुतिष्ठन्नाचरेत् ततः शुक्लप
क्षप्रतिपदमारभ्यैकैकं पिंडं वर्द्धयेत् यथा पौर्णमास्यां पंचदश ग्रासाः संपद्यंते ततः कृष्णप्र
तिपदमारभ्यैकैकं पिंडं ह्रासयेत् यथामावास्यायामुपवासो भवति २५ यतिचांद्राय
णमनुतिष्ठन् शुक्लपक्षात् कृष्णपक्षाद्वारभ्य मासमेकं संयतेंद्रियः प्रत्यहमष्टावष्टौ ग्रासा
न्मध्यंदिने भुंजीत मध्यंदिन इति गृहस्थब्रह्मचारिणोः सायंभोजननिवृत्त्यर्थं २६

प्राजापत्यं कृच्छ्रं द्विजातिराचरन् त्र्यहं दिनत्रयं प्रातर्भुंजीत प्रातः शब्दोयं भोजनार्थमोचि
त्यशात्त् दिवाकालपरः अत एव वसिष्ठः त्र्यहं दिवा भुंक्ते नक्तमिति च त्र्यहं त्र्यहमयाचितव्र
तं त्र्यहमभुक्त्वा इति कृच्छ्रः आपस्तम्बोप्याह त्र्यहं नक्ताशी दिवाशी च त्र्यहं त्र्यहमयाचिताशी
त्र्यहं नाश्नीयात् किंचनेति कृच्छ्रद्वादशरात्रविधिः अपरं च दिनत्रयं सायं संध्यायामतीतायां
भुंजीत अन्यद्दिनत्रयमयाचितं तद्दत्तं भुंजीत परं च दिनत्रयं किंचिन्नाश्नीयात् अत्र ग्राससंख्या
परिमाणापेक्षया पराशरः सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिस्तथा अयाचिते चतुर्विं
शतिः परं चानशनं स्मृतं कुक्कुटाण्डप्रमाणः स्याद्यावान्वा प्रविशेन्मुखे एतद्ग्रासं विजानीयात् शुद्ध्यर्थं
कायशोधनं हविष्यमन्नमश्नीयात् प्राजापत्ये विधिः स्मृतः तथा च वसिष्ठः हविष्यं प्रातरा

त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं त्र्यहं परं तु नाश्नीयात् प्राजापत्यं चरन्द्विजः ९ गो
मूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतं १०
एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत् त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन्द्विजः

शीतेन्सायमाशीत तथैव च अयाचितं तथैवाद्यादुपवासः त्र्यहं पिबेत् ९ गोमूत्रादीनेकीकृत्य ए
कस्मिन्नहनि भक्षयेत् अन्यत् किंचिन्नाद्यात् अपरदिने चोपवासः एतत्सान्तपनं कृच्छ्रं स्मृतं
यदा तु गोमूत्रादीनि षड्द्रव्याण्येकैकं षड्दिनानि उपभुज्य सप्तमे दिने चोपवासस्तदा महासान्तपनं
मा भवति तथा याज्ञवल्क्यः कुशोदकं च गोक्षीरं दधि मूत्रं शकृद्घृतं जग्ध्वा परेऽह्न्युपवसेत्
कृच्छ्रं सान्तपनं चरन् एषां सान्तपनद्रव्याणां षडहः सोपवासकः सप्ताहेन तु कृच्छ्रोयं महा
सान्तपनः स्मृतः १० अतिकृच्छ्रं जातिरन्तु तिष्ठन् प्रातः सायमयाचितः त्र्यहेण एकैकं ग्रा
संख्या त्र्यहाणि त्रीणि भुंजीत अन्त्यं च त्र्यहं न किंचिद्भुंजीत ११

म-स्मृ-
टी-
११२

स्थानेति अहनि रात्रौ चउत्थित आसीनः स्यात् न तु शयीत असामर्थ्ये तु स्थण्डिले शयीत न तु खट्वादौ
ब्रह्मचारी स्त्रीसंयोगरहितः व्रती मौञ्जीदण्डादियुक्तः पालाशं धारयेद्दण्डं शुचिर्मौञ्जी च मेखला
मिति यमस्मरणात् गुरुदेवब्राह्मणानां च पूजको भवेत् २२ सावित्रीचेति सावित्रीं च
सदा जपेत् पवित्राणि वा अघमर्षणादीनि यथाशक्ति जपेत् एतच्च यथा चान्द्रायणे तथा प्राजाप
त्यादिकृच्छ्रेष्वपि यत्नवान् प्रायश्चित्तार्थमनुतिष्ठेत् २३ एतैरिति लोके विदितपापाद्विजातयः
एभिरुक्तैर्वक्ष्यमाणपरिषदा शोधनीयाः अप्रकाशितपापांस्तु मानवान् मन्त्रैर्होमैश्च परिषदे
व शोधयेत् यद्यपि परिषदि निवेदने रहस्यत्वक्षतात्पापित्वमनुकपापेकृतेनापि तो

221

स्थानासनाभ्यां विहरेदशक्तोऽधः शयीत च ब्रह्मचारी व्रती चाथ गुरुदेवद्विजार्चकः २२
सावित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृतः २३
एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः अनाविःकृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत्
ख्यापनेनानुतापेन तपसाऽध्ययनेन च पापकृन्मुच्यते पापात्तथा दानेन चापदि २५
यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति तथा तथा शरीरं च तेनाधर्मेण मुच्यते २६

काविदितप्रायश्चित्तं स्यादिति सामान्यप्रश्ने तद्विरोधः २४ ख्यापनेति पापकारी नरो लोके स्वनि
जपापकथनेन पिबन्ति मां पापकारिणमिति यद्वा येन च तपसा चोक्तरूपेण सावित्रीजपादिना च पा
पान्मुच्यते तथाशक्तो दानेन पापान्मुक्तो भवति ख्यापनं चेदं प्रकाशप्रायश्चित्ताङ्गभूतं न तु र
हस्यप्रायश्चित्ताङ्गं रहस्यत्वहानिप्रसंगात् अनुतापश्च रहस्यप्रकाशप्रायश्चित्ताङ्गमेव २५
यथेति यथा यथा स्वयं पापं कृत्वा नरो भाषते लोके ख्यापयति तथा तथा तेन पापेन सर्प इव
त्वचा मुच्यते अख्यापनविधेरयमनुवादः यथेति तस्य पापकारिणो मनो यथा यथा दुष्कृ
तं कर्म निन्दति तथा तथा तच्छरीरं जीवात्मा तेनाधर्मेण मुक्तो भवति अयमनुतापानुवादः

उ.
२२२
२६

चतुरः प्रातरश्नीयात् अस्तमिते च सूर्ये चतुरो ग्रासानश्नीत एतच्छिशुचान्द्रायणं मुनिभिः स्मृतं ॥ २३ ॥ यथेति नीवारादिहविष्यसंबन्धिनां ग्रासानां द्वे शते चत्वारिंशदधिके कदाचित्पंच कदाचिन्न षोडश कदाचिदुपवास इत्येवमनियमेन यथाकथंचित् पिंडान्मासेन संपन्नवा न्नश्नंश्चंद्रसलोकतां याति एवं च पापक्षयार्थमभ्युदयार्थं चेदमुक्तं भवति एवं याज्ञवल्क्यः ध र्मार्थं यश्चरेदेतच्चंद्रस्यैति सलोकतां कृच्छ्रकृद्धर्मकामस्तु महतीं श्रियमाप्नुयात् ए वं प्राजापत्यादिकृच्छ्रमपि अभ्युदयफलमिति याज्ञवल्क्येनोक्तं ॥ २४ ॥ एतदिति एतच्चां

चतुरः प्रातरश्नीयात्पिंडान्विप्रः समाहितः । चतुरोऽस्तमिते सूर्ये शिशुचांद्रायणं स्मृतं ॥ २३ ॥
यथाकथंचित्पिंडानां तिस्रोऽशीतीः समाहितः । मासेनाश्नन्हविष्यस्य चंद्रस्यैति सलोकतां ॥ २४ ॥
एतद्रुद्रास्तथादित्या वसवश्चाचरन्व्रतं । सर्वाकुशलमोक्षाय मरुतश्च महर्षिभिः ॥ २५ ॥
महाव्याहृतिभिर्होमः कर्तव्यः स्वयमन्वहं । अहिंसा सत्यमक्रोधमार्जवं च समाचरेत् ॥ २६ ॥
त्रिरह्नस्त्रिर्निशायां च सवासा जलमाविशेत् । स्त्रीशूद्रपतितांश्चैव नाभिभाषेत कर्हिचित् ॥

द्रायणाख्यं व्रतं रुद्रादित्यवसवः ऋषिभिः सह सर्वपापनाशाय फलश्रुत्युक्तपापापेक्षया । सकृदावृत्तिप्रकारेणाचरितवंतः ॥ २५ ॥ महेति महाव्याहृतिभिर्भूर्भुवः स्वरित्येताभिः आ ज्यहविना देयो न होतीति प्रविधीयतइति परिशिष्टवचनात् आज्येन स्वयं प्रत्यहं होमः कर्तव्यः अहिंसा सत्यमक्रोधमार्जवं कौटिल्यानि चानुतिष्ठेत् यद्यप्येतानि पुरुषार्थतया विहि तानि तथापि व्रतांगतयाप्यनूपदेशः ॥ २६ ॥ त्रिरह्नेति अहोरात्रारंभमध्यावसानेषु स्नानार्थं सचेलो न यावद्विजलं प्रविशेत् एतच्च पिपीलिकामध्ययवमध्यचांद्रायणेतर चांद्रायणविषयं तत्पौरुषस्पर्शं त्रिषवणमित्युक्तत्वात् स्त्रीशूद्रपतितांश्च सह पावक

ऋष ऋषयो वाङ्मनःकायनियमोपेताः फलमूलवायुभक्षास्तपसैव जंगमस्थावरसहितं पृथ्व्यं
तरिक्षस्वर्गात्मकं लोकत्रयमेकदेशस्थाः संतो निःपापांतःकरणाः प्रकर्षेण पश्यंति ३२ औष औ
षधानि व्याध्यपगमहेतुकानि अगदो गदाऽभावो नैरुज्यमिति यावत् विद्या ब्रह्मकर्मात्मवेदार्थ
ज्ञानं देवसंबंधिनी नानारूपा स्वर्गादाववस्थितिरिमानि तपसैव प्राप्यंते यस्मात्तप एवैषां प्रा
प्तिनिमित्तं ३३ यद्दुः यद्दुःखेन तीर्यते ग्रहदोषसूचितापदादि यद्दुःखेन प्राप्यते तेनैव शरीरे
ण ब्राह्मण्यादि यद्दुःखेन गम्यते मेरुपृष्ठादि यद्दुःखेन क्रियते शापवरदानादि तत्सर्वं तपसा
साधयितुं शक्यते यस्मादतिदुष्करकरणं तपो दुर्लंघ्यशक्ति ३४ महा ब्रह्महत्यादिपातक।

ऋषयः संयतात्मानः फलमूलानिलाशनाः तपसैव प्रपश्यंति त्रैलोक्यं सचराचरं ३२
औषधान्यगदो विद्या दैवी च विविधा स्थितिः तपसैव प्रसिध्यंति तपस्तेषां हि साधनं ३३
यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करं सर्वं तत्तपसा साध्यं तपो हि दुरतिक्रमं ३४ महा
पातकिनश्चैव शेषाश्चाकार्यकारिणः तपसैव सुतप्तेन मुच्यंते किल्विषात्ततः ३५
कीटाश्चाहिपतंगाश्च पशवश्च वयांसि च स्थावराणि च भूतानि दिवं यांति तपोबलात् ३६
यत्किंचिदेनः कुर्वंति मनोवाङ्मूर्तिभिर्जनाः तत्सर्वं निर्दहंत्याशु तपसैव तपोधनाः ३७

२२२

कारिणोऽन्ये चोपपातकाद्यकार्यकारिणस्तपसैवानुष्ठितेन पापान्मुच्यंते उक्तस्यापि पुनर्वचनं
प्रायश्चित्ततपःस्तुत्यर्थं ३५ कीट कीटसर्पपतंगपशुपक्षिणः स्थावराणि च वृक्षगुल्मा।
दीनि भूतान्यरण्यानि तपोमहात्म्येन स्वर्गं यांति इतिहासादौ कपोताख्यानादिषु पक्षिणामप्यग्निप्र
वेशनादिकं तपः श्रूयते कीटादीनां यज्जातिसहनं दुःखं तत्सहननं तपः तेन च क्षीणकल्म
षा अधिकारिणो जन्मांतरकृतेन सुकृतेन दिवं यांति ३६ यत् यत्किंचित्पापं मनोवा
ग्देहैर्मानवाः कुर्वंति निर्दहंति तपसैव तपोधनाः तप एव धनं येषां ते तपोधनाः ३७

कृत्वेति पापं कृत्वा पश्चात्संतप्यते तस्मात्पापान्मुच्यत इत्युक्तमपि नैवं कुर्यां पुनरिति नेतदर्थ-
मनूदितं यदा तु पश्चात्तापो नैवं पुनः करिष्यामीत्येवंरूपनिवृत्तिसंकल्पफलकः स्यात्तदा ह
तस्मात्पापात्पूतो भवति एतच्च निवृत्तिसंकल्पस्य प्रकाशाप्रकाशप्रायश्चित्ताङ्गविधा-
नार्थं २९ एवमिति एवं शुभाशुभानां कर्मणां परलोके इष्टानिष्टफलं मनसा विचार्य मनो-
वाक्कायैः शुभमेव कर्म कुर्यात् तस्य इष्टफलहेतुत्वात् नत्वशुभं नरकादिदुःखफलत्वात् अज्ञाने-
ति प्रमादादिज्ञानतो वा निषिद्धं कर्म कृत्वा तस्मात्पापान्मुक्तिमिच्छन्पुनस्तन्न कुर्यात्
एतच्च पुनः करणे प्रायश्चित्तगौरवार्थं अत एव देवलः विधेः प्राथमिकादस्माद्द्वितीये द्वि-

कृत्वा पापं हि संतप्य तस्मात्पापात्प्रमुच्यते नैवं कुर्यां पुनरिति निवृत्त्या पूयते तु सः ३०
एवं संचिन्त्य मनसा प्रेत्य कर्मफलोदयं मनोवाङ्मूर्तिभिर्नित्यं शुभं कर्म समाचरेत् २८
यस्मिन्कर्मण्यस्य कृते मनसः स्यादलाघवं तस्मिंस्तावत्तपः कुर्याद्यावत्तुष्टिकरं भवेत्
तपोमूलमिदं सर्वं दैवमानुषकं सुखं तपोमध्यं बुधैः प्रोक्तं तपोऽन्तं वेददर्शिभिः ३०
ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणं वैश्यस्य तु तपो वार्त्ता तपः शूद्रस्य सेवनं ३२

तीये द्विगुणं भवेत् २८ यस्मिन्निति अस्य पापकारिणो यस्मिन्प्रायश्चित्तात्मके कर्मणि अनुष्ठिते चित्त-
स्य संतोषः स्यात् तस्मिंस्तदेव प्रायश्चित्तं तावदावर्तयेत् यावन्मनसः संतोषः प्रसादः स्यात् ३१
तपो यदेतत्सर्वं दैवानां मनुष्याणां सुखं तत्तपः कारणं तपसैव च तत्स्थितिः तपोऽन्तं च प्र-
तिनियतावधिरेव वस्तु वेदस्तु तपसा जन्मनादि वेददर्शिभिः उक्तो उक्तं ज्ञानात्मकं तपः प्र-
संगेन वेदं तत्प्रमाणं च सर्वं तपोमहात्म्यकथनं ३० ब्राह्म ब्राह्मणस्य ब्रह्मकर्मात्मकवेदा-
भ्यासः तपः क्षत्रियस्य रक्षणं तपः वैश्यस्य कृषिवाणिज्यपशुपाल्यादिकं तपः शूद्रस्य
ब्राह्मणादिपरिचर्या तपः इति वर्णविषये शेषेण तपो धनार्थं

म. स्मृ. टी. २२३

कौत्सं कुत्सेन ऋषिणा दृष्टमप नः शोशुचदघमिति सूक्तं वसिष्ठेन ऋषिणा दृष्टं च प्रति स्तोमेभि ।
रुषसं वसिष्ठा अरुत्सतेत्यामृचं माहित्रं महि त्रीणामवोस्त्विति तत्सूक्तं शुद्धवत्य एतोन्विंद्रं स्तवाम शुद्धमिति तास्तिस्र
ऋचः प्रकृतेमासमहरहः षोडशकृत्वो जपित्वा सुरापोपि विशुध्यति अपिशब्दादतिदेशिकसुरा
पानप्रायश्चित्ताधिकृतोपि ५५ सकृद्ब्राह्मणसुवर्णमपहृत्य अस्य वामीयं अस्य वामस्य पलित
स्येतत्सूक्तं प्रकृतत्वान्मासमेकं प्रत्यहमेकवारं जपित्वा शिवसंकल्पं च यज्जाग्रतो दूरमुदैतीति
ति वाजसनेयपठितं जपित्वा द्विजः क्षणमेव विपापो भवति ५६ हवि हविष्पान्तमजरं स्वर्विदीत्येको
नविंशतिऋचात्मकं ऋचं न तमंहो न दुरितमित्यष्टौ सहस्रशीर्षेति च षोडशर्चं सूक्तं मासमेकं प्रत्यहम् ।
अभ्यसेदिति प्रवणात् प्रकृतत्वात् षोडशकृत्वाभ्यासेन जपित्वा गुरुदारगः तस्मात्पापात्प्रमुच्यते ५७ येनसां

कौत्सं जप्त्वाप इत्येतद्वासिष्ठं च ऋचं प्रति माहित्रं शुद्धवत्यश्च सुरापोपि विशुध्यति ५५
सकृज्जप्त्वास्य वामीयं शिवसंकल्पमेव च अपहृत्य हिरण्यं च क्षणाद्भवति निर्मलः ५६
हविष्पान्तीयमभ्यस्य न तमंह इतीति च जप्त्वा तु पौरुषं सूक्तं मुच्यते गुरुतल्पगः ५७
एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनं अवेत्यृचं जपेदब्दं यत्किंचिदमतीति च ५८
प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितं जपंस्तरत्समंदीयं पूयते मानवस्त्र्यहात् ५९
सोमारौद्रं तु बह्वेना मासमभ्यस्य शुध्यति स्रवन्त्यामाचरन्स्नानमर्यम्णामिति च ऋचं

२२३

स्थूलानां पापानां महापातकानां सूक्ष्माणां चोपपातकादीनां निर्हरणं कर्तुमिच्छन् अव ते हेलो वरु
णेति मो भिरित्येतामृचं यत्किंचेदं वरुण दैव्ये जनेऽत्येतां च ऋतिमिमनऽत्येतत्सूक्तं संवत्सरमेकं प्र
त्यहं जपेत् ५८ स्वरूपतो महापातकि सेवधादिना वा प्रतिग्राह्यं प्रतिगृह्यान्नं च स्वभावकालप्रति
ग्रहसंसर्गादुष्टं भुक्त्वा तरत्समन्दी धावतीति एतास्तिस्र ऋचः त्र्यहं जपित्वा तस्मात्पापान्मनुष्यः पूतो
भवति ५९ सोम सोमारुद्रा धारयेथामसुर्यमिति चतस्र ऋचः अर्यम्णां बृहस्पतिमिंद्रमिति वरु
णं मित्रं चेति त्र्यृचं नद्यां स्नानं कृत्वा मासमेकं प्रत्यहमभ्यस्य बहु पापोपि विशुध्यति पाप
स्य बहुत्वे बहूनां प्रायश्चित्तं कर्तव्यमित्येतस्य ज्ञापकमिदं ६०

उ. २२३

तपश्चर्यायाश्चित्तप्रसादो ब्राह्मणस्य यागहवींषि देवाः प्रतिगृह्णन्ति अभिलषितार्थांश्च प्रय
च्छंति ४२ प्रजा हिरण्यगर्भः सकललोकोत्पत्तिस्थितिप्रलयप्रभुः तपश्चरणपूर्वकमे
वेमं ग्रंथमकरोत् तथा ऋषयो वसिष्ठादयः तपसैव मंत्रदृशः संपन्नाः ४३ इत्येतत्सर्वस्या
स्य जंतोर्यत्पुण्यं जन्म तत्तपसः सकाशादित्येवं देवाः पश्यंतः तपोमूलमिदं सर्वमित्यादितपोम
हात्म्यं प्रवदंति ४४ वेद यथाशक्ति प्रत्यहं वेदाध्ययनं पंचयज्ञानुष्ठानमपराधसहिष्णु
त्वं चैतानि महापातकजनितान्यपि पापानि शीघ्रं नाशयंति किमुतान्यानि ४५ यथा प

तपसैव विशुद्धस्य ब्राह्मणस्य दिवौकसः । इज्याश्च प्रतिगृह्णंति कामान्संवर्धयंति च ४२
प्रजापतिरिदं शास्त्रं तपसैवासृजत्प्रभुः । तथैव वेदानृषयस्तपसा प्रतिपेदिरे ४३
इत्येतत्तपसो देवा महाभाग्यं प्रचक्षते । सर्वस्यास्य प्रपश्यंतस्तपसः पुण्यमुत्तमं ४४
वेदाभ्यासोन्वहं शक्त्या महायज्ञक्रिया क्षमा । नाशयंत्याशु पापानि महापातकजान्यपि
यथैधस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात् । तथा ज्ञानाग्निना पापं सर्वं दहति वेदवित्
इत्येतदेनसामुक्तं प्रायश्चित्तं यथाविधि । अत ऊर्ध्वं रहस्यानां प्रायश्चित्तं निबोधत ४७
सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश । अपि भ्रूणहणं मासात्पुनंत्यहरहः
कृताः ४८

ग्निः काष्ठान्यसत्त्वानि दह्यन्ते नैव तेजसाग्निः शोषं करोति तथात्मज्ञानाग्निना सर्वं पापं वेदार्थज्ञो ना
शयति इति परमात्मज्ञानस्येतरपापक्षयसाधनार्थं वेदार्थज्ञानस्य प्रशंसार्थमेतत् ४६ इत्ये
तत् ब्रह्महत्यादिपापानां प्रकाशानां प्रायश्चित्तं यथाविध्यभिहितं अत ऊर्ध्वमप्रकाशा
नां पापानां प्रायश्चित्तं शृणुत अयं श्लोको गोविंदराजेन लिखितः मेधातिथिना तु न
लिखित एव ४७ सव्या सव्याहृतिकाः सप्रणवाः सावित्रीशिरोयुक्ताः पूरक
कुंभकरेचकादिकृतमपि एतच्च प्रायश्चित्तं द्विजातीनामेव स्त्रीशूद्रादेर्मंत्रानधि
कारात् ४८

म॰स्मृ॰
टी॰
२२५

यथा, ऋग्यजुःसामात्मना त्रिधा वर्तते इति त्रिवृत् यथा महाह्रदं प्राप्य लोष्टं विलीयते तथा सर्वं पापं त्रिवृति वे
दे विनश्यति २६४ ऋच ऋचो मन्त्राः यजूंषि यजुर्मन्त्राः सामानि रथन्तरादीनि नानाप्र
काराणि अन्यान्येवं ब्राह्मणानि उपनिषदश्च एष त्रिवृद्वेदो ज्ञातव्यः य एनं वेद स वेदवि
त् २६५ आद्यं सर्ववेदानामाद्यं यत् त्र्यक्षरं ब्रह्म वेदसारं अकारोकारमकारात्मकत्वेन त्र्यक्षरं यस्मिन् त्रयो वे
दाः स्थिताः सोऽन्यः त्रिवृद्वेदः प्रणवाख्यो गुह्यो गोपनीयः वेदत्रयश्रेष्ठत्वात् परमात्माभिधाय
कत्वात् परमात्मत्वेन ध्यानजपाभ्यां मोक्षहेतुत्वाच्च यस्तं स्वरूपतोऽर्थतश्च जानाति स वेदवित्
प्रायश्चित्ते वक्रमुनिमतालोचना यन्मयोक्तं सम्यग्व्याख्यानं स्वल्पमतिना तद्गृह्णन्तु गुणज्ञाः नै
तन्मे धातोविवदभिधानात्तेऽपि मो विदुषां जो व्याख्यातारोऽन निजगुरुपरे प्रसन्नो तु र्लभं वः २६६

यथा महाह्रदं प्राप्य क्षिप्तं लोष्टं विनश्यति तथा दुश्चरितं सर्वं वेदे त्रिवृति मज्जति २६४ ऋचो
यजूंषि चान्यानि सामानि विविधानि च एष ज्ञेयस्त्रिवृद्वेदो यो वेदैनं स वेदवित् २६५ आद्यं य
त्त्र्यक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित् २६६ इति मा
नवे धर्मशास्त्रे एकादशोऽध्यायः ११ चातुर्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्मस्त्वयानघ कर्म ।
णां फलनिर्वृत्तिं शंस नस्तत्त्वतः परं १ स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः अस्य
सर्वस्य शृणुत कर्मयोगस्य निर्णयं २ शुभाशुभफलं कर्म मनोवाग्देहसंभवं कर्मजा ग
तयो नृणामुत्तमाधममध्यमाः ३

इति श्रीवारेन्द्र-मन्वर्थमुक्तावल्यामेकादशोऽध्यायः ११ गौडे नन्दननिवासिनां विदुषां वंद्ये वरेन्द्र्यां कुले ।
विप्रो भट्टदिवाकरस्य तनयः कुल्लूकभट्टोऽभवत् वृत्तिस्तेन मनुस्मृतौ शिवपुरे ध्यायेऽधुना द्वा
दशोऽध्याये विरचितेति हिताय विदुषां मन्वर्थमुक्तावली चातुर्वर्ण्यस्य हे पापरहित ब्राह्मणादिव
र्णचतुष्टयस्य सान्तरप्रभवस्य धर्मस्त्वयोक्तः इदानीं कर्मणां शुभाशुभफलप्राप्तिं जन्मान्तर
प्रभवां परमार्थरूपामस्माकं ब्रूहीति महर्षयो भृगुमूचुः १ स तान् स धर्मप्रधानो मनोरप
त्यं भृगुरस्य सर्वस्य कर्मसंबन्धस्य फलनिश्चयं शृणुतेति तान्महर्षीनाह २ शुभं मनोवाग्दे
हेतुकं कर्म विहितनिषिद्धरूपं सुखदुःखफलं तज्जन्मादेवमनुष्यतिर्यगादिभावेनोत्तममध्यमा
धमा ये तु नाम मनुष्याणां गतयो जन्मान्तरप्राप्तयो भवन्ति कर्मशास्त्रेण कायचेष्टायामिव किंच

224

उ॰
२२४

अब्दाः पलस्त्रीन्म्रियेशेषात्सर्वेषेव पापेषु कृच्छ्रमित्येवकल्पणमग्निखिन यड्मेताः सप्तनरचः ष।
एमासंजपेत् अघशस्तं मूत्रपुरीषोत्सर्गाकंजलेकृत्वामासंभैक्ष्यभोजीभवेत् ४२ मंत्रैःदे
वकृतस्येत्यादिभिः शाकलहोममंत्रैः संवत्सरमेकमग्नौ घृतहोमं कृत्वा नमरः देख्य उनेता
वाजसनेय संवत्सरं जपित्वा महापातकजमपि पापं द्विजातिरपहंति ४२ महा ब्रह्मह
त्यादिमहापातकयुक्तोभिक्षाल्पब्धाहारोवर्षमेकमपतेद्वियोगवामज्ञगामनेकावेन्न
स्वादिसूप्यामद्दिप्येत्साग्राजरचः अभ्यस्येति जपित्वातस्मात्पापात्विशुद्धोभवति ४३
अरत्निभिः पराकैः पूतोमंत्रब्राह्मणात्मिकांवेदसंहितामरण्येवारजप मभ्यस्यवाप्रय

अब्दार्धंमिंद्रमित्येतदेनशीतमन्नवंजपेत् अघशंसंतकृत्वाष्टमासमाशीतमैक्ष्यकं
मंत्रैःशाकलहोमीयैर्हुत्वाघृतंद्विजः सम्पुर्वेष्यपहंत्येनोजप्त्वानरक्षच ४२
महापातकसंयुक्तोनुगच्छेद्गाः समाहितः अभ्यस्याब्दंपावमानीभैक्ष्याहारोविशुद्ध्यति
अरण्येवात्रिरभ्यस्यप्रयतोवेदसंहिता मुच्यतेपातकैःसर्वैः पराकैःशोधितेस्त्रिभिः ४४
त्र्यहंत्वोपवसेद्युक्तस्त्रिरह्नोप्युपयन्नपः मुच्यतेपातकैःसर्वैर्जप्त्वात्रिरघमर्षणं ४६
यथाश्वमेधःक्रतुराट्सर्वपापापनोदनः तथाघमर्षणंसूक्तंसर्वपापापनोदनं ४७
हत्वालोकानपीमांस्त्रीनश्नन्नपियतस्ततः ऋग्वेदंधारयन्विप्रोनैनःप्राप्नोतिकिंचन
ऋक्संहितांत्रिरभ्यस्ययजुषांवासमाहितः साम्नांवासरहस्यानांसर्वपापैःप्रमुच्यते

मनोवाक्कायेंद्रियादौचयुक्तः सर्वैःमहापातकैर्मुच्यते ४५ त्र्यहं त्रिरात्रमुपवसन्संयतः प्रत्य
हंप्रातर्मध्याह्नसायंकाले स्नानंकुर्वन्त्रिरघमर्षणं स्नानकाल एवजलेनिमग्नःजपेत्स
यंचेमघमर्षणंसूक्तंत्रिराहत्ते जपित्वासर्वैः पापैर्मुच्यते अत्रलघुपापापेक्षयाल्पकष्ट
त्वापेक्षयावार्ताजीयमेतत् ४४ यथा यथाश्वमेधयागः सर्वयागश्रेष्ठःसकलपा
पक्षयहेतुस्तथाघमर्षणमपि सर्वपापक्षयहेतुरित्यघमर्षणसूक्तंकथं ४७ हत्वात्र
यीत्रिलोकत्रयमपिहत्वामहापातकादीनामप्यन्नमश्नन् ऋग्वेदंधारयन्विप्रादिन्नकिंचि
त्पापंप्राप्नोति ऋग्वेदधारणस्तोरहस्यप्रायश्चित्तार्थंतत्रस्त्वेरहस्यपापेक्तनेकस्तंहि

त्रिदण्डं एतेषां निक्षिप्य वागादीनां सर्वभूतगोचरं यादमनं कृत्वा एतत् दमनार्थमेव कामक्रोधौ च नियम्य ततस्तामोक्षाख्यां सिद्धिं मनुष्यो भजते कोऽसौ सिद्धिं प्राप्नोतीत्याह १० योऽस्य आत्मलोकप्रसिद्धस्य आत्मोपकारकत्वादात्मनः शरीरस्य व्यापारेषु कर्मसु प्रवर्तयिता तं क्षेत्रज्ञं पण्डिता वदन्ति यः पुनरेष व्यापारान्करोति शरीराख्यः स पृथिव्यादिभूतारब्धत्वात् भूतात्मेति पण्डितैरुच्यते ११ जीव जीवशब्दोऽयं महान्परः येनेति करणविभक्तिनिर्देशात् उत्तरश्लोके च तावुभौ भूतसंपृक्तौ महान् क्षेत्रज्ञ एव चेति महच्छब्दप्रत्यवमर्शात् शरीरक्षेत्रज्ञातिरिक्तोऽन्तः शरीर आत्मा अन्यत्वात् आत्मा जीवाख्यः सर्वक्षेत्रज्ञानां सहजआत्मा अन्यत्वप्राप्त्ये सत्स विनियोगात् येनाहंकारादिरूपेण परिणतेन कारणभूतेन क्षेत्रज्ञः प्रतिजन्म सुखं दुःखं चानुभवति १२ तौ तौ महान् क्षेत्रज्ञोऽपि पृथिव्यादि

त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः। कामक्रोधौ संयम्य ततः सिद्धिं नियच्छति १० यो
ऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ११
जीवसंज्ञोऽन्तरात्मान्यः सहजः सर्वदेहिनां येन वेदयते सर्वं सुखं दुःखं च जन्मसु १२ तावु
भौ भूतसंपृक्तौ महान्क्षेत्रज्ञ एव च उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः १३
असंख्या मूर्तयस्तस्य निष्पतन्ति शरीरतः उच्चावचानि भूतानि सततं चेष्टयन्ति याः १४
पञ्चभ्य एव मात्राभ्यः प्रेत्य दुष्कृतिनां नृणां शरीरं यातनार्थीयमन्यदुत्पद्यते ध्रुवं १५ तेना
नुभूय ता यामीः शरीरेणेह यातनाः तास्वेव भूतमात्रासु प्रलीयन्ते विभागशः १६

पञ्चभूतसंपृक्तौ वक्ष्यमाणं सर्वलोकवेदस्मृतिपुराणादिप्रसिद्धं तं पातमिति निर्दिष्टं परमात्मानमुत्कृष्टापकृष्टेषु भूतेषु अवस्थितं व्याप्याश्रित्य तिष्ठतः १३ असंख्यास्तस्य परमात्मनः शरीरादसंख्या मूर्तयो जीवाः क्षेत्रज्ञशब्देनानन्तरोक्ता लिङ्गशरीरावच्छिन्ना वेदान्तोक्तप्रकारेण अग्नेरिव स्फुलिङ्गा निःसरन्ति या मूर्तयः उत्कृष्टापकृष्टभूतानि देहरूपतया परिणतानि सर्वदा कर्मसु प्रेरयन्ति १४ पञ्चभ्य एव पृथिव्यादिभूतभागेभ्यो दुष्कृतकारिणां मनुष्याणां पीडानुभवप्रयोजनकं जरायुजादिदेहव्यतिरिक्तं दुःखसहिष्णु परलोके जायते १५ ते तेन शरीरेण ततः यमकारिता यातना दुःखानि ते जीवाः सूक्ष्माः अनुभूय स्थूलशरीरनाशे तेष्वेवारम्भकभूतभागेषु यथास्वं प्रलीयन्ते लयं यान्ति नो भूतावतिष्ठन्त इत्यर्थः १६

225

तस्येह तस्य देहसंबंधिनः कर्मण उत्तमाधममध्यमतया त्रिप्रकारस्यापि मनोवाक्कायाश्रितत्वेन त्र्यधिष्ठानस्य दशलक्षणोपेतस्य मन एव प्रवर्तकं जानीयात् मनसा हि संकल्पितमुच्यते क्रियते च तथा च तैत्तिरीयोपनिषत् तस्माद्यत्पुरुषो मनसाभिगच्छति तद्वाचा वदति तत्कर्मणा करोतीति। तानि दशलक्षणानि कर्माणि दर्शयितुमाह ४ परद्रव्यं परधनमन्यायेन गृह्णामीत्येवं चिंतनं मनसा ब्रह्मवधादिनिषिद्धाकांक्षा नास्ति परलोको देह एवात्मेत्यादि उपेवं त्रिप्रकारकं अशुभफलं मानसं कर्म एतत्त्रयविपरीतबुद्धिश्च त्रिविधं शुभफलं मानसं कर्म शुभाशुभफलकर्मेत्युभयस्यैव प्रक्रांतत्वात् ५ अप्रियाभिधानं अनृतं असत्यभाषणं परोक्षे परदूषणकथनं अप्रयोजनराजदेशपौरवार्तादेर्निष्प्रयोजनं वर्णनमित्येवं चतुःप्रकारमशुभफलं कर्म वा

तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः दशलक्षणयुक्तस्य मनो विद्यात्प्रवर्तकं ४ परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं वितथाभिनिवेशश्च त्रिविधं कर्म मानसं ५ पारुष्यमनृतं चैव पैशुन्यं चैव सर्वशः असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं ६ अदत्तानामुपादानं हिंसा चैवाविधानतः परदारोपसेवा च शारीरं त्रिविधं स्मृतं ७ वाचा वाचा कृतं कर्म कायेनैव च कायिकं शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ८ मानसं मनसैवायमुपभुंक्ते शुभाशुभं वाचिकैः पक्षिमृगतां मानसैरंत्यजातितां ९ वाग्दंडोथ मनोदंडः कायदंडस्तथैव च यस्यैते निहिता बुद्धौ त्रिदंडीति स उच्यते १०

चिकं भवेत् एतद्विपरीतं प्रियसत्यपरगुणाभिधानं श्रुतिपुराणादेश्च राजादिचरितकथनं शुभफलं अन्यायेन तु परस्वग्रहणं अशास्त्रीयहिंसा परदारगमनमित्येवं त्रिःप्रकारकं अशुभफलं शारीरं कर्म एतद्विपरीतत्रयं शुभफलं ८ मनसा पक्षे तत्कृतं उत्कृतं वा तत्फलं सुखं दुःखं वा तूपमिह जन्मनि जन्मांतरे वा मनसा उपभुंक्ते एवं वाचा कृतं शुभाशुभं वाग्व्यवहारेण मधुरवाक्कदु भाषितादिना शारीरं तु शुभफलं शरीरद्वारेणैव स्रक्चंदनादिप्रियोपभोगादिना अनुभवति शारीरमुख्यपापिनां शारीरवाचिकमानसानि त्रीण्येव पापानि संभवंति तथापि स्म यदि प्रायशो ऽधर्मं सेवते धर्ममल्पशस्तदा तु कृत्वाभिप्रायेणोदं व्याख्यातं वा कृत्स्नेन शरीरजकर्मपापैर्नरः स्थावरतां मनुष्यः प्राप्नोति वा कृत्स्नेन वा वाचकैः पक्षिमृगतां च वा कृत्स्नेन मनःकृतैः चांडालादित्वं प्राप्नोति ९ वाग्दंडः वाग्दमनं दंडः यस्य वा ... कायेनादंडा निषिद्धा

म॰ स्मृ॰
टी॰
२२६

योपदे यद्यपि सर्वमेवेदं त्रिगुणं तथापि यत्र देहे एषां गुणानां मध्ये यो गुणः यदा साकल्येनाधिको भवति तदा तद्गुणलक्षणबहुलं देहं करोति सत्त्वप्रधानत्वादीनां लक्षणमाह २५ सत्त्वं यथार्थविभासो ज्ञानं तत्सत्त्वलक्षणं एतद्विपरीतमज्ञानं तत्तमसो लक्षणं विषयाभिलाषो द्वेषात्मकं रजोलक्षणं स्वरूपं तत्सत्त्वरजस्तमसां प्रीत्यप्रीतिविषादात्मकं तथा च पठन्ति प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभिभवाश्रयजननमिथुनवृत्तयो गुणाः एतच्चैतेषां स्वरूपमनन्तरश्लोकत्रयेण वक्ष्यति एतेषां सत्त्वादिगुणानां एतज्ज्ञानादि सर्वप्राणिव्यापकं लक्षणं २६ तत्र तस्मिन्नात्मनि यत्संवेदनं प्रीतियुक्तं अस्तमितक्लेशं प्रकाशरूपमनुभवेत् तत्सत्त्वं जानीयात् २७ यत्तु यत्पुनः संवेदनं दुः

यो यदैषां गुणो देहे साकल्येनातिरिच्यते । स तदा तद्गुणप्रायं तं करोति शरीरिणं ॥ २५ ॥
सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतं । एतद्व्याप्तिमदेतेषां सर्वभूताश्रितं वपुः ॥ २६ ॥
तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् । प्रशान्तमिव शुद्धाभं सत्त्वं तदवधारयेत् ॥ २७ ॥
यत्तु दुःखसमायुक्तमप्रीतिकरमात्मनः । तद्रजोऽप्रतिघं विद्यात्सततं हारि देहिनां ॥ २८ ॥
यत्तु स्यान्मोहसंयुक्तमव्यक्तं विषयात्मकं । अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ २९ ॥
त्रयाणामपि चैतेषां गुणानां यः फलोदयः । अग्र्यो मध्यो जघन्यश्च तं प्रवक्ष्याम्यशेषतः ॥ ३० ॥
वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः । विषयोपसेवा चाजस्रं राजसं गुणलक्षणं ॥ ३२ ॥

खानुविद्धमत एव सम्यगनुष्ठानाप्यात्मप्रीतेरजनकं च सर्वदा च शरीरिणां विषयस्पृहोत्पादकं तद्दुर्निवारत्वात् रजो जानीयात् २८ यत्तु यत्पुनः सदसद्विवेकशून्यमस्फुटविषयाकारं स्वभावं अतर्कणीयस्वरूपं अन्तःकरणबहिरिन्द्रियाभ्यामज्ञेयं तत्तमो जानीयात् एषां गुणानां स्वरूपकथनं सत्त्वस्वरूपावस्थितो यत्नवता भवितव्यमित्येतत्प्रयोजनकं २९ त्रयाणां एतेषां सत्त्वादीनां त्रयाणामपि गुणानां यथाक्रममुत्तमाधममध्यमरूपो यः फलोदयः तमशेषेण वक्ष्यामि ३० वेदाभ्यासः प्राजापत्याद्यनुष्ठानं शास्त्रार्थावबोधो मृज्जलादिशौचं इन्द्रियसंयमः दानादिधर्मानुष्ठानं आत्मध्यानं परतापेतत् सत्त्वगुणकार्यं आरम्भफलार्थं काम्यानुष्ठानशीलत्वं स्वधैर्ये पुनरर्थे लाभे निषिद्धकर्माचरणं अजस्रं शब्दादिविषयोपभोगः एतद्रजोभिधानगुणस्य कार्यं ३२

३
२२६

226

सोऽनु स जीवो भूतसूक्ष्मादिलिंगशरीरावच्छिन्नो निषिद्धशब्दस्पर्शरूपरसगंधरसात्मविषयो-
पभोगजानि परलोके दुःखान्यनुभूयानन्तरं भोगोपहतपाप्मा तावेव महत्परमात्मानौ म-
हावीर्यौ ह्यावाश्रयति १८ तौ तौ महत्परमात्मानौ अनलसौ तस्य जीवस्य धर्मं पुण्यं शेषं च पापं
सह विचारयतः याभ्यां धर्माधर्माभ्यां युक्तो जीवः परलोके इहलोके च यो सुखदुःखे प्राप्नोति
१९ यद्यसौ जीवो मानुषदशायां बाहुल्येन धर्ममनुतिष्ठति अल्पं चाधर्मं तदा तैरेव भूतैः
पृथिव्यादिभिः स्थूलशरीररूपतया परिणतैर्युक्तः स्वर्गे सुखं भुंक्ते २० य यदि पुनः स जी-
वो मानुषदशायां बाहुल्येन पापमनुतिष्ठति अल्पं च पुण्यं तदा तैरेव भूतैरात्मदेहरूपतया
परिणतैस्त्यक्तो मृतः सन् अनन्तरं पंचभ्य एव मात्राभ्यः उत्पन्नं शरीरं यातनानुभावोचितसह

सोऽनुभूयासुखोदर्कान्दोषान्विषयसंगजान् व्यपेतकल्मषोऽभ्येति तावेवोभौ महौजसौ १८
तौ धर्मं पश्यतस्तस्य पापं चातन्द्रितौ सह याभ्यां प्राप्नोति संपृक्तः प्रेत्येह च सुखासुखम् १९
यद्याचरति धर्मं सः प्रायशोऽधर्ममल्पशः तैरेव चावृतो भूतैः स्वर्गे सुखमुपाश्नुते २०
यदि तु प्रायशोऽधर्मं सेवते धर्ममल्पशः तैर्भूतैः स परित्यक्तो यामीः प्राप्नोति यातनाः २०
यामीस्ता यातनाः प्राप्य स जीवो वीतकल्मषः तान्येव पंच भूतानि पुनरप्येति भागशः २१
एता दृष्ट्वास्य जीवस्य गतीः स्वेनैव चेतसा धर्मतोऽधर्मतश्चैव धर्मे दध्यात्सदा मनः २२ स
त्त्वं रजस्तमश्चैव त्रीन्विद्यादात्मनो गुणान् यैर्व्याप्येमान्स्थितो भावान्महान्सर्वानशेषतः २३

जकठिनदेहो यामीः पीडा अनुभवति २० यामीः स जीवो यमकारितास्ताः यातनाः पीडाः तेन कठि-
नदेहेनानुभूय तद्भोगेनोपहतपाप्मा तान्येव पंचभूतानि मनुष्यादिशरीरारंभकानि पृथिव्यादिभूतभागान
धितिष्ठति मानुषादिशरीरं प्राप्नोतीत्यर्थः २१ एता तस्य जीवस्य एता धर्माधर्महेतुकाः स्वर्गन
रकादिगतीः भोगोचिता याद्रिय देहप्राप्तीः स्वान्तःकरणेन ज्ञात्वा धर्मानुष्ठाने सदा मतिं कुर्यात् २२
सत्त्वं सत्त्वरजस्तमांसि त्रीणि गुणान्तेषामात्मनो महतो गुणान्वि-
नीयात् यैर्व्याप्यो महानुद्रमानस्थावरजंगमरूपान्पदार्थान्निःशेषान्व्याप्यास्थितः २४

त्रिविधेयं सत्त्वादिगुणत्रयनिमित्ता त्रिधा जन्मान्तरप्राप्तिरुक्ता सा देशकालादिभेदेन संसारहेतुभूतकर्म्मभेदात् ज्ञानभेदाच्चाधममध्यमोत्तमभेदेन पुनस्त्रिविधा बोद्धव्या ३९ स्थाव स्थावरा वृक्षादयः कृमयः सूक्ष्माः प्राणिनस्तेभ्य ईषत्स्थूलाः कीटाः तथा मत्स्यसर्पकूर्मपशुशृगालाश्च तेषां तमोनिमित्ता जघन्या गतिः हस्ति हस्त्यश्वशूद्रम्लेच्छसिंहव्याघ्रशूकरास्तमोगुणनिमित्ता मध्यमा गतिः गर्हिता इति म्लेच्छानां स्वरूपानुवादः चार: चारणा नटादयः सुपर्णाः पक्षिणः छद्मना धर्म्मचारिणः पुरुषाः राक्षसाः पिशाचाश्च तेषां तामसी उत्तमा गतिः ४० झल्ला मल्लाः क्षत्रियाद्व्रात्यात्सवर्णायामुत्पन्ना दशमाध्यायोक्ता ज्ञेयाः झल्ला यष्टिप्रहरणा मल्ला बाहुयोधिनो नटा रंगावतारकाः शस्त्रजीविनः द्यूतपानप्रसक्ताः पुरुषाश्चाधमा राजसी गतिस्तेषां ४१

त्रिविधा त्रिविधैषा तु विज्ञेया गौणिकी गतिः अधमा मध्यमाग्र्या च कर्मविद्याविशेषतः ३९
स्थावराः कृमयः कीटाः मत्स्याः सर्पाः सकच्छपाः पशवश्च शृगालाश्च जघन्या तामसी गतिः ४०
झल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः ४१
राजानः क्षत्रियाश्चैव राज्ञां चैव पुरोहिताः वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः ४२
गंधर्वा गुह्यका यक्षा विबुधानुचराश्च ये तथैवाप्सरसः सर्वा उत्तमा राजसी गतिः ४३
यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः पितरश्चैव साध्याश्च द्वितीया सात्त्विकी गतिः ४४

राजा राजानोऽभिषिक्ता जनेश्वरास्तथा क्षत्रिया राजपुरोहिताः शास्त्रार्थकलहप्रिया युद्धकुशलाश्च तेषां राजसी गतिर्मध्यमा ४२ गंध गंधर्वा गुह्यका यक्षा जातिविशेषाः पुराणादिप्रसिद्धा ये च विद्याधरादयो देवानुयायिनः अप्सरसो देवगणिकाः सर्वे ते तेषां राजसीषु गतीषु मध्ये उत्तमा गतिः तापसा यतयः ब्राह्मणाश्च ये च अप्सरोव्यतिरिक्ताः पुष्पकादिविमानचारिणो नक्षत्राणि दैत्याश्च एषां सत्त्वनिमित्ताधमा गतिः ४३ यज्वा याज्ञशीलास्तथा ऋषयो देवा वेदाभिमानिन्यश्च देवता विग्रहवत्यः इतिहासप्रसिद्धाः ज्योतींषि ध्रुवादीनि वत्सराः इतिहासदृष्टा विग्रहवन्तः पितरः सोमपादयः साध्याश्च देवयोनिविशेषाः एषां सत्त्वनिमित्ता मध्यमा गतिः ४४

लोभः अधिकाधिकधनस्पृहा निद्रालुता कातर्यं नैष्ठुर्यं परलोकाभाववुद्धिः आचारविलोपः
याचनशीलत्वं धर्मादिष्वनवधानमित्येतत्तामसाभिधानगुणस्य कार्यं ३२ त्रयाणां एषां सत्त्वादीनां
त्रयाणामपि गुणानां त्रिषु कालेषु भूतभविष्यवर्तमानेषु विद्यमानानां इदं वक्ष्यमाणं सामासिकं
क्रमेण गुणलक्षणं ज्ञेयं ३३ यत् यत्कर्म कृत्वा कुर्वन्करिष्यंश्च लज्जत्वमनुभवति कालत्रये
ह्रीरस्य वर्तते इति विबोधितं तत्सर्वं तमःकार्यं तमोभिधानगुणलक्षणं शास्त्रविदा बोद्धव्यं ३४
येनास्मिल्लोके महतीं ख्यातिमाप्नुयामित्येतदर्थमेव यत्कर्म करोति न परलोकार्थं न च तत्कर्म
णः संपत्तौ ऽभावे शोचति तद्रजःकार्यं रजोगुणलक्षणं ज्ञेयं ३५ यत्सर्वं यत्कर्म वेदा

लोभः स्वप्नोऽधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता। याचिष्णुता प्रमादश्च तामसं गुणलक्षणं
त्रयाणामपि चैतेषां गुणानां त्रिषु तिष्ठतां। इदं तामसिकं ज्ञेयं क्रमशो गुणलक्षणं ३३
येनास्मिन्कर्मणा लोके ख्यातिमिच्छति पुष्कलां। न च शोचत्यसंपत्तौ तद्ज्ञेयं गुणराजसं ३४
यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन्। येन तुष्यति चात्मास्य तत्सत्त्वगुणलक्षणं ३५
तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते। सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथोत्तरं ३६
येन यांस्तु गुणेनैषां संसारान्प्रतिपद्यते। तान्समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमं ३७
देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः। तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ३८

दिनत्वं सर्वात्मना ज्ञातुमिच्छति यच्च कर्माचरन्कालत्रयेपि न लज्जते येन कर्मणास्यात्म
मनः तुष्टिर्जायते तत्सात्त्विकगुणस्य लक्षणं ज्ञेयं ३५ तम कामप्रधानता तमसो लक्ष
णं अर्थप्रधानता रजसः धर्मप्रधानता सत्त्वस्य एषां च कामादीनामुत्तरोत्तरस्य श्रैष्ठ्यत्वं कामा
लत्वात् दर्थः श्रेयान् अर्थात्कामस्ततो धर्मः श्रेयान्तन्मूलत्वात्तयोः ३६ येन येषां सत्त्वादीनाम्
मध्ये येन गुणेन तत्कार्यं प्राप्नोति जीवः प्राप्नोति ताः सर्वा अस्य जगतः क्रमेणैव वक्ष्यामि
३७ देव ये सत्त्ववृत्तावस्थितास्ते देवत्वं प्राप्नुवन्ति ये तु रजोवृत्तावस्थितास्ते मनुष्यत्वं ये
तमोवृत्तावस्थितास्ते तिर्यक्त्वं तत्त्रेषा त्रिविधा जन्मप्राप्तिः ३८

तृणं तृणानां दूर्वादीनां गुल्मानामप्रकाण्डानां गुडूच्यादीनां आममांसभक्षिणां गृध्रादीनां दंष्ट्रिणां सिंहादीनां क्रूरकर्मकारिणां वधशीलानां व्याघ्रादीनां जातिं शतवारान्प्राप्नोति गुरुदारगामी पुरुषः ५८ हिंस्रा भक्ष्यमेव प्राणिवधशीलास्ते आममांसभक्षा मार्जारादयो भवन्ति अभक्ष्यभक्षिणो ये ते कृमयो जायन्ते ये महापातकि व्यतिरिक्ताश्चौरास्ते परस्परादिनो भवन्ति ये चाण्डालस्त्रीगामिनस्ते प्रेता व्याधा। प्राणिविशेषा जायन्ते प्रेतास्त्रीनिषेवणाद् इति छन्दः समानत्वात्स्मृतीनां सर्वविधयः छन्दसि विकल्पन्ते इति सर्गलोपे दीर्घः ५९ संयोगं यावत्कालीन पतितसंसर्गेण पतितो भवति तावन्तं कालं ब्रह्महादिभिश्चतुर्भिः सह संसर्गं कृत्वा च परेषां चाविज्ञातां ब्राह्मणस्त्रियं च सवर्णां दस्पदपहृत्य एकैक

तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि क्रूरकर्मकृतां चैव शतशो गुरुतल्पगः ५८ हिंस्रा भवन्ति क्रव्यादाः कृमयोऽभक्ष्यभक्षिणः परस्परादिनः स्तेनाः प्रेतान्त्यस्त्रीनिषेविणः ५९ संयोगं पतितैर्गत्वा परस्यैव च योषितं अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ६० मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः विविधानि च रत्नानि जायते हेमकारिषु ६१ धान्यं हृत्वा भवत्याखुः कांस्यं हंसो जलं प्लवः मधु दंशः पयः काको रसं श्वा नकुलो घृतं ६२ मांसं गृध्रो वपां मद्गुस्तैलं तैलपकः खगः चीरीवाकस्तु लवणं बलाका शकुनिर्दधि ६३ कौशेयं तित्तिरिर्हृत्वा क्षौमं हृत्वा तु दर्दुरः कार्पासतान्तवं क्रौञ्चो गोधा गां वाग्गुदो गुडं ६४

पापकारिणो ब्रह्मस्वापहारस्य ब्रह्मराक्षसो भूतविशेषो भवति ६० मणि मणिमुक्ताप्रवालादीन्मुक्ताविद्रुमोच्चना नाविधानि रत्नानि वैडूर्यादीनि लोभेन हृत्वा नानाविधप्रमादिना सुवर्णकारयोनिषु जायते कें। विन्तु हेमकारं पक्षिणमाचक्षते ६१ धान्यं धान्यमपहृत्य मूषको भवति कांस्यं हृत्वा हंसः जलं हृत्वा प्लवः मासिकं हृत्वा दंशः क्षीरं हृत्वा काकः पक्षिविशेषो विशेषोपदिष्ट गुडलवणादिव्यतिरिक्तमिक्ष्वादिकं गृहीत्वा कुक्कुरो घृतं हृत्वा नकुलो भवति ६२ मांसं मांसं हृत्वा गृध्रो भवति वपां वसां हृत्वा मद्गुनामा जलचरः पक्षी तैलं हृत्वा तैलपायिः पक्षी लवणं हृत्वा चीरीवाकः चीर्वरः कीटः दधि हृत्वा बलाका पक्षी भवति ६३ कौशेयं कीटकोशनिर्मितवस्त्रं हृत्वा तित्तिरिः पक्षी भवति क्षुमासूत्र सीतकृतं वासो क्षौमं हृत्वा मण्डूकः कार्पासतन्तुमयपट

ब्रह्मा चतुर्वेदनो विश्वसृजः स्रष्टारो मरीच्यादयो धर्मो विग्रहवान्महानव्यक्तं च सात्त्विकस्य प्रकृष्टं तत्फलं ।
तदधिष्ठातृदेवता द्वयमिह विवक्षितं अचेतनत्वात् उत्तमसत्त्वगुणसात्त्विकगतिलाभोप
त्तेः तां चतुर्वेदनायामिकां सत्त्वनिमित्तामुत्तमां गतिं वदंति ॥४९॥ एष एष मनोवाक्कायप
सम्पादन त्रयभेदेन त्रिप्रकारस्य कर्मणः सत्त्वरजस्तमोभेदेन त्रिविधः पुनरधममध्यमोत्त
मभेदेन त्रिविधः सर्वप्राणिगतः सम्यग्योगतिविशेषः कार्त्स्न्येनोक्तः सार्वभौतिक उत्तमभिधाना
देवत्वज्ञात्मकत्वमतयोरुक्तव्याः उक्तगतप्राप्तप्रदर्शनार्थाः ॥५०॥ इंद्रिय इंद्रियाणां विषयेषु प्र
संगेन निषिद्धावस्थानेन च प्रायश्चित्तादिकर्मानुष्ठानेन मूढा मनुष्याधमाः कुत्सिता गतीः प्राप्नुवं

ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ॥४९॥
एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौतिकः ॥५०॥
इंद्रियाणां प्रसंगेन धर्मस्यासेवनेन च पापान्संयांति संसारानविद्वांसो नराधमाः ॥५१॥
यां यां योनिं तु जीवोयं येन येनेह कर्मणा क्रमशो याति लोकेस्मिंस्तत्तत्सर्वं निबोधत ॥५२॥
बहून्वर्षगणान्घोरान्नरकान्प्राप्य तत्क्षयात् संसारान्प्रतिपद्यंते महापातकिनस्त्विमान् ॥५३॥
श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणां चांडालपुक्कसानां च ब्रह्महा योनिमृच्छति ॥५४॥
कृमिकीटपतंगानां विड्भुजां चैव पक्षिणां हिंस्राणां चैव सत्त्वानां सुरापो ब्राह्मणो व्रजेत् ॥५५॥
लूताहिशरटानां च तिरश्चां चांबुचारिणां हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः

ति ॥५१॥ यां यामिति यां यां योनिं जीवो येन येन पापकर्मणा इह लोके कृतेन यथाक्रमं प्राप्नोति तत्सर्वं क्रमेण शृ
णुत ॥५२॥ बहूनिति ब्रह्महत्यादिमहापातकिनो बहून्वर्षसमूहान्भयंकरान्नरकान्प्राप्य तदुपभोग
क्षयात् कृततदोषाच्च वक्ष्यमाणान् जन्मविशेषान्प्राप्नुवंति ॥५३॥ श्वसूकर कुक्कुर सूकर
गर्दभोष्ट्रगोछागमेषमृगपक्षिचांडालानां पुक्कसानां च निषादेन शूद्रायां जातानां संबंधिनी
जातिं ब्रह्महा प्राप्नोति अत्र पापशेषगौरवलाघवापेक्षया क्रमेण सर्वयोनिप्राप्तिः बोद्धव्या एवमु
त्तरत्रापि ॥५४॥ कृमि कृमिकीटसत्त्वभानां पुरीषभक्षिणां पक्षिणां हिंसनशीलानां च व्याघ्रादी
नां जातिं सुरापो व्रजति ॥५५॥ लूता ऊर्णनाभिसर्पकृकलासकानां च जलचराणां तिरश्चां कुभी

म॰ स्मृ॰ टी॰ २२९

वैश्यो भूः स्वकर्मामैत्राक्षज्योतिकनामा पूयभुक् प्रेतो जन्मांतरे भवति मित्रदेवताकत्वान्मैत्रः पायुः तदे वशुद्ध्येककर्मेंद्रियं तत्र ज्योतिर्यस्य स मैत्राक्षज्योतिकः पृषोदरादित्वात् ज्योतिषः षकारलोपः शू द्रः पुनर्न स्वकर्म्मा चैलाशकाख्यः प्रेतो भवति चैलं वस्त्रं तत्संबंधिनी यूका मत्कुणादि चैलाशकः गो विंदराजस्तु चैलाशकाख्यः कीटश्चैलं उत्पद्यते तदाख्यः संभवतीत्याह तदयुक्तं प्रेतत्वस्य प्राप्ति विशेषप्रकरणात् ६७ यथा यथा यथा पयाशब्दादि विषयानु विषयलोलुपा नितांतं सेवंते तथा तथा विषयेष्वेव तेषां प्रावीण्यं भवति ततश्च तेनैव विषयलोलुपत्वेन निषिद्धविषयोपभोगानाम भ्यासवशा त् ६९ तास्तास्तगर्हितास्तिर्यगादिजातिषु दुःखमनुभवंति ७० तामि संप्राप्नुवंतीति पूर्व

मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक् चैलाशकस्तु भवति शूद्रो धर्मात्स्वकाच्च्युतः ६७ यथा यथा नि षेवंते विषयान्विषयात्मकाः तथा तथा कुशलता तेषां तेषूपजायते ६८ ते भ्यासात्कर्मणां तेषां पापानामल्पबुद्धयः संप्राप्नुवंति दुःखानि तासु तास्विह योनिषु ६९ तामिस्रादिषु चोग्रेषु नरकेषु विवर्त्तनं असिपत्रवनादीनि बंधनछेदनानि च ७० विवि धाश्चैव संपीडाः काकोलूकैश्च भक्षणं करंभवालुकातापं कुंभीपाकांश्च दुःसहान् ७१ संभवांश्च वियोनीषु दुःखप्रायासु नित्यशः शीतातपाभिघातांश्च विविधानि भयानि च असकृद्गर्भवासेषु वासं जन्म च दारुणं बंधनानि च दुःखानि परदास्यमेव च ७३ बं धुप्रियवियोगांश्च संवासं चैव दुर्जनैः द्रव्यार्जनं च नाशं च मित्रामित्रस्य चार्जनं ७४

श्लोकद्वयं इहोलतार्द्धमनुवर्तते तामिस्रादिषु च नरकेषूग्रेषु घोरेषु दुःखमनुभवं प्राप्नुवंति त था असिपत्रवनादीनि बंधनछेदनादीनि दुःखान्याप्नुवंति ७० विवि अनेकप्रकाराः काकच पाटनादिना संपीडाः काकोलूकादिभिर्भक्षणं तप्तवालुकादिभिस्तापं कुंभीपाकांश्च दुःसहान् प्राप्नुवंति ७१ संभ तिर्यगादिजातिषु नित्यं दुःखबहुलासु उत्पत्तिं प्राप्नु वंति तत्र शीतातपादिपीडा नानाप्रकाराणि भयानि प्राप्नुवंति ७२ अस पुनः पुनः गर्भ स्थानेषु वासमुत्पत्तिं च योनियंत्रादिना दुःखावहं उत्पत्तिं श्रृंखलादिभिः बंधनपीडामनुभवं तं परदासत्वं च प्राप्नुवंति ७३ बंधु बांधवैः सह प्रियैश्च सह वियोगान् दुर्जनैः सहैकत्रावस्था

टे॰ २२९

229

कुलुं सुगंधिद्रव्याणि कस्तूर्यादीनि हृत्वा छुछुंदरिर्भवति वल्लूकादिपत्रशाकं हृत्वा मयूरः सिद्धान्नं मोद
कसक्कादि नानाप्रकारं हृत्वा श्वाविल्लेधा खुः शालीअकृतान्नं तु व्रीहियवादिकं हृत्वा शल्यकः संतोजा
यते ९० बको अग्निं हृत्वा वंकाख्यः पक्षी जायते गृहोपयोगि सूर्यमपालादि हृत्वा भिमादि मृगम्।
तिका गृहकारी सपक्षः कीटो भवति कुसुंभादिरक्तानि वासांसि हृत्वा चकोराख्यः पक्षी भवति ९२
हृत्वा मृगं हस्तिनं वा हृत्वा वृकाख्यो हिंस्रः पशुर्भवति चोटकं हृत्वा व्याघ्रो भवति फलमूलं
नामर्कटः स्त्रीं हृत्वा भल्लूको भवति पानार्थमुदकं हृत्वा चातकाख्यः पक्षी यानानि शकटादीनि ह
त्वा उष्ट्रः पशून् उत्कोलराच्च हृत्वा छागः स्यात् ९२ यद्वा यत्किंचिदसारमपि परद्रव्यमिच्छा

कुकुंदरिः शुभान्गंधान्पत्रशाकं तु बर्हिणः श्वाविन्कृतान्नं विविधमकृतान्नं तु शल्यकः ९०
बको भवति हृत्वाग्निं गृहकारी ह्युपस्करान् रक्तानि हृत्वा वासांसि जायते जीवजीवकः ९२
वृको मृगाभं व्याघ्रोश्वं फलमूलं तु मर्कटः स्त्रीमृक्षः स्तोकको वारि यानान्युष्ट्रः पशूनजः ९२
यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः ९२
स्त्रियोप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः एतेषामेव जंतूनां भार्यात्वमुपयांति ते ९४ स्वेभ्यः
स्वेभ्यस्तु कर्मभ्यश्च्युता वर्णा ह्यनापदि पापान्संसृत्य संसारान्प्रेष्यतां यांति शत्रुषु ९५ वां।
तास्त्वकामुखः प्रेतो विप्रो भवति विच्युतः अमेध्यकुणपाशी च क्षत्रियः कटपूतनः ९६

तो भानुषो हृत्वा पुरोडाशादिकं च हविरहुतं भुक्त्वा नि पतंति तिर्यक्त्वं प्राप्नोति ९३ स्त्रि स्त्रियोप्येतेन प्र
कारेण उद्भ्रांतः परद्रव्यमपहृत्य पापं प्राप्नुवंति तेन पापेन उक्तानामेव जंतूनां भार्यात्वं प्राप्नुवंति
एवं निषिद्धाचरणफलान्यभिधाय पापैर्विहिताकरणे विपाकफलमाह ९४ स्वेभ्यः ब्राह्म
णादयः चत्वारो वर्णाः आपदं विना पंचयज्ञादि स्वकर्मत्यागिनो वक्ष्यमाणाः कुत्सिता योनीः प्राप्य
ततो जन्मांतरे दस्युषु दासत्वं प्राप्नुवंति ९५ वान्ता ब्राह्मणः स्वकर्मभ्रष्टः छर्दितभुक् ज्वाला
मुखः प्रेतविशेषो जायते क्षत्रियः पुनर्नष्टकर्मा पुरीषशवभोजी कटपूतनाख्यः प्रेतविशेषः पाप
जायते ९६

वैदि वैदिके पुनः कर्मयोगे परमात्मोपासनारूपे सर्वाण्येतानि पूर्वश्लोकोक्तान्यैहिकामुष्मिकश्रे
यांसि तस्मिंस्तस्मिन्नुपासनाविधौ क्रमशः सर्वाणि संभवंति अथवा सर्वाण्येतानीति वेदाभ्यासादी
न्येव परामृश्यंते परमात्मज्ञाने वेदाभ्यासादीनि तमेवं वेदानुवचनेन विविदिषंति यज्ञेन दानेन त
पसानाशकेनेत्यादिश्रुतिविहितान्यंगत्वेनांतर्भवंति ८७ सुखो वैदिककर्मात्र ज्योतिष्टोमादि
गतीकोपासनादि च गृह्यते स्वर्गादिसुखप्रापकत्वे संसारवृत्तिहेतुत्वात्प्रवृत्ताख्यं वैदिककर्म तत्
थानिःश्रेयसं मोक्षस्तद्हेतुकर्म नैःश्रेयसिकं संसारनिवृत्तिहेतुत्वान्निवृत्ताख्यं तुल्यं वैदिकाख्यक
र्मद्विःप्रकारं वैदितव्यमेतदेव स्पष्टयति ८८ इह चा इहकामसाधनं प्रवृत्तिहेतुकारीर्यादि
परत्र स्वर्गादिसाधनं ज्योतिष्टोमादि यत्कामनया क्रियते तत्संसारप्रवृत्तिहेतुत्वात् प्रवृत्तमित्यु
च्यते इष्टादृष्टफलकामनारहितं पुनर्ब्रह्मज्ञानाभ्यासपूर्वं संसारनिवृत्तिहेतुत्वान्निवृत्तमित्युच्यते

वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः। अंतर्भवंति क्रमशस्तस्मिंस्तस्मिन् क्रियाविधौ ८७
सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च। प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकं ८८ इह।
चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते। निःकामं कामपूर्वं तु निवृत्तमुपदिश्यते ८९ प्रवृत्तं
कर्म संसेव्य देवानामेति साम्यतां। निवृत्तं सेवमानस्तु भूतान्यत्येति पंच वै ९० सर्वभूते
षु चात्मानं सर्वभूतानि चात्मनि। समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ९१ यथोक्ता
न्यपि कर्माणि परिहाय द्विजोत्तमः। आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ९२

८९ प्रवृ प्रवृत्तकर्माभ्यासेन देवसमानगतित्वं तत्फलं कर्मणा प्राप्नोति तच्च प्रदर्शनार्थं प्रत्यफ
लेन प्रवृत्तकर्मणा फलांतरमपि प्राप्नोति निवृत्तकर्माभ्यासेन पुनः शरीरारंभकाणि पंचभू।
तानि ज्ञानि क्रामति मोक्षं प्राप्नोतीत्यर्थः ९० सर्व सर्वेषु भूतेषु स्थावरजंगमात्मके पुब्रह्म
मेव परमात्मरूपेणास्मि सर्वाणि भूतानि परमात्मपरिणामत्वात् मय्येव परमात्मन्यासतेऽति
सामान्येन पश्यन्नात्मयाजी ब्रह्मार्पणन्यायेन ज्योतिष्टोमादि कुर्वन् स्वेन राजते प्रकाशते इत्यर्थः
स्वराट् तत्स्वभावः स्वाराज्यं ब्रह्मत्वं लभते मोक्षं प्राप्नोतीत्यर्थः तथा च श्रुतिः सर्वं खल्विदं ब्रह्म तज्ज
लानीति शांत उपासीत तथा च यजुर्वेदमंत्रः यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूते
षु चात्मानं ततो न विचिकित्सति ९१ यथो शास्त्रे चोदितान्यपि अग्निहोत्रादिकर्माणि परित्य
ज्य ब्रह्मध्यानेन्द्रियजयप्रणवोपनिषदादिभ्यासेषु ब्राह्मणो यत्नं कुर्यात् एतेषां मोक्षोपायांतरं
गत्वप्रदर्शनार्थं तत्त्वग्निहोत्रादिसागपरमतं ९२

जरां जरामविद्यमानप्रतीकारां व्याधिभिः पीडनं क्लेशान् पिपासादिनानाप्रकारान् तांस्तान् मृत्युं च दुर्वारं प्रा
प्नुवंति ७५ यादृ यथाविधेन सात्विकेन राजसेन तामसेन वा चेतसा यद्यत्कर्म्म शास्त्रीयं स्नानाद्यनुतिष्ठ
ति तादृशेनैव शरीरेण सात्विकेन रजोधिकेन च मोहाधिकेन वा तत्तत्स्नानादिकफलमुपभुंक्ते
७६ एष यथा युष्माकं विहितप्रतिषिद्धकर्म्मणां सर्वः फलोदय उक्तः इदानीं ब्राह्मणस्य निःश्रेय
सं मोक्षाय हितं कर्म्मानुष्ठानमिदं वक्ष्यमाणं शृणुत ७७ वेदा उपनिषदादिवेदस्य यत्नोपेत
अभ्यसनं तपः कृच्छ्रादि ज्ञानं ब्रह्मविषयमिन्द्रियजयो हिंसावर्जनं गुरुशुश्रूषणं इत्येतत्प्रकृष्टमो
क्षसाधनं ७८ सर्वे सर्वेषामप्येतेषां वेदाभ्यासादीनां शुभकर्म्मणां मध्ये किंचित्कर्म्मातिशयेन ।
मोक्षसाधनं स्यादिति वितर्केण ऋषीणां जिज्ञासायामुत्तरश्लोकेन निर्णयमाह ७९ सर्वे एषां वे
दाभ्यासादीनामपि सर्वेषां मध्यादुपनिषदुक्तं परमात्मज्ञानं प्रकृष्टं स्मृतं यस्मात्सर्वविद्यानां प्रधानं ।

जरां चैवाप्रतीकारां व्याधिभिश्चोपपीडनं क्लेशांश्च विविधांस्तांस्तान्मृत्युमेव च दुर्जयं ७५
यादृशेन तु भावेन यद्यत्कर्म निषेवते तादृशेन शरीरेण तत्तत्फलमुपाश्नुते ७६ ए
ष सर्वः समुद्दिष्टः कर्मणां वः फलोदयः नैःश्रेयसं कर्मविधिं विप्रस्येमं निबोधत ७७
वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः अहिंसा गुरुसेवा च निःश्रेयसकरं परं ७८ स
र्वेषामपि चैतेषां शुभानामिह कर्मणां किंचिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति ७९ स
र्वेषामपि चैतेषामात्मज्ञानं परं स्मृतं तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ८० षण्णा
मेषां तु सर्वेषां कर्मणां प्रेत्य चेह च श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकं ८१

अत्रैव हेतुमाह यतो मोक्षस्तस्मात्प्राप्यते ८० षण्णां एषां पुनः पूर्वोक्तानां षण्णां वेदाभ्यासादी
नां कर्म्मणां मध्याद्वैदिकं कर्म्म परमात्मज्ञानमैहिकामुष्मिकश्रेयस्करतरं ज्ञातव्यं पूर्वश्लोके हेतुमो
क्षमात्मज्ञानस्योक्तं इह त्वैहिकामुष्मिकश्रेयोत्तरहेतुत्वमुच्यते इत्यपौनरुक्त्यं तथा हि श्रुतौ
कोपासनानां स्वरूपोऽहं नाम उपास्ते यावन्नाम्नो गतं तत्रास्य कामचारो भवति सत्यं ज्ञानमेव वा ज्ञान ।
सिद्धिपीवाद्येवेदनं यत्रचोदनाद् सोपासनं चैहिकामुष्मिकानि फलानि श्रूयन्ते गोविंदे
राजस्तु एषां पूर्वश्लोकोक्तानां वेदाभ्यासादीनां षण्णां कर्म्मणां मध्यात्सर्वाणि कर्म्माणि पञ्च यान् वैदिकं
कर्मेह लोकपरलोकयोरतिशयेन कीर्त्तिस्वर्गादिश्रेयः साधनमिति व्याख्यातवांस्तदयुक्तं वे
दाभ्यासादीनां षण्णामपि प्रत्यक्षश्रुतिविहितत्वेनैतेषु मध्ये स्मार्त्तापेक्षया किंचिद्वैदिकं श्रुतिवि
हितं किंचिन्नेति न संभवति तस्मात्कल्पतरुकारपक्षो युक्तः तस्मात् यथोक्तैव व्याख्या इदा

म-स्मृ-
टी-
२३१.

बिभर्ति वेदशास्त्रं नित्यं सर्वभूतानि धारयति तथा च हविरग्नौ हूयते सोऽग्निरादित्यं तर्पयति तं सूर्यो रश्मिभिः वर्षति तेनान्नं संभवति अथेह भूतानामुत्पत्तिः स्थितिश्चेति हविर्जायत इति ब्राह्मणं तस्मादेतद्वेदशास्त्रमस्य जन्तोर्वैदिककर्माधिकारिपुरुषस्य प्रकृष्टपुरुषार्थसाधनं जानामि ९९ स सेनापतित्वराज्यदंडप्रणेतृत्वसर्वभूताधिपत्यानीत्येतत्सर्वं दृष्टपुरुषप्रयोजनं वेदशास्त्रज्ञ एवार्हति १०० यथा यथातिप्रवृद्धोऽग्निरार्द्रानपि वृक्षान्दहत्येवं वेदार्थतत्त्ववेदज्ञः निषिद्धाचरणकर्मजनितं पापमात्मनो नाशयति एवं च न केवलं वेदः स्वर्गापवर्गादिहेतुरपि तु दुरितनिवृत्तिहेतुरपीति दर्शितं १०१ वेद यस्तु वेदं तदर्थं च कर्मब्रह्मात्मकं जानाति स नित्यनैमित्तिककर्मानुगृहीतब्रह्मज्ञानेन ब्रह्मचर्याद्याश्रमेष्ववस्थितोऽस्मिन्नेव लोके तिष्ठन्ब्रह्मत्वाय कल्पते १०२ अज्ञे

मृ

231

बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनं तस्मादेतत्परं मन्ये यज्जन्तोरस्य साधनं ९९ सेनापत्यं च राज्यं च दंडनेतृत्वमेव च सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति १०० यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान् तथा दहति वेदज्ञः कर्मजं दोषमात्मनः १०१ वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् इहैव लोके तिष्ठन्स ब्रह्मभूयाय कल्पते १०२ अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः १०३ तपो विद्या च विप्रस्य निःश्रेयसकरं परं तपसा कल्मषं हन्ति विद्ययामृतमश्नुते १०४

उभयोः प्रशस्तत्वे सति अन्यतरस्यातिशयविवक्षयायं कः श्रेष्ठ इति पृष्टो विधानानुरूपं कथयति अज्ञातेभ्यः समस्तग्रन्थाध्येतारः श्रेष्ठास्तेभ्योऽधीतसमग्रग्रन्थधारणसमर्थाः श्रेष्ठास्तेभ्यो ग्रन्थिनः पठितविस्मृतग्रन्था वोद्धव्याः धारिभ्योऽधीतग्रन्थार्थज्ञाः प्रकृष्टास्तेभ्योऽनुष्ठातारः १०३ तपो तपः स्वधर्मवृत्तित्वमिति दर्शनादाश्रमविहितकर्मैवात्र तपः आत्मज्ञानं च ब्राह्मणस्य मोक्षसाधनं तत्र तपसा वा तरत्याप्यारमाह तपसा पापमपहन्ति ब्रह्मज्ञानेन मोक्षं प्राप्नोति तथा च श्रुतिः विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते विद्यातोऽन्यदविद्या कर्म मृत्युः दुःखसाधनत्वात् मृत्युः पापमुच्यते एवायमनुव्याख्येयोऽर्थः १०४

उ.
२३१

एत एतदामन्वानवेदाभ्यासाच्छि द्विजातेर्जन्म सफलत्वापादकत्वेन जन्मनः सफलत्वं विशेषे
ण ब्राह्मणस्य यस्मादेतत्प्राप्यैव द्विजातिः कृतकृत्यो भवति न प्रकारान्तरेण इदानीं वेदादेव ब्रह्म
ज्ञानं प्राप्तव्यमिति दर्शयन् वेदप्रशंसामाह ९५ पितृ पितृदेवमनुष्याणां कव्यहव्यान्नदानेषु वे
द एव चक्षुः सनातनं श्रेयः अप्रमाणत्वात् अप्रसक्तिकृष्टफलकव्यदानादौ प्रमाणान्तरानवकाशात् अश
क्यं च वेदशास्त्रं कर्तुमशक्यं अनेनापौरुषेयत्वमुक्तम् अप्रमेयं च मीमांसाद्विना यतो निरूपयितुं न
पार्यते वा अप्रमाणप्रमेयमिति व्यवस्थातस्तत्त्वमीमांसाव्याकरणादिसापेक्षकमेव ब्रह्मात्मकं वेदा
र्थं जानीयादिति विवक्षितं ९६ यानि वेदमूलानि न भवन्ति दृष्टार्थवाक्यानि चैत्यवंदनात्स्वर्गो
भवतीत्यादीनि यानि चासत्तर्कमूलानि देवतात्वादिनिराकरणात्मकानि वेदविरुद्धानि चार्वा

एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः। प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा ९५
पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्। अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः ९६
या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः
उत्पद्यन्ते विलीयन्ते यान्यतोऽन्यानि कानिचित्। तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्। भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिध्यति ९७
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः। वेदादेव प्रसूयन्ते प्रसूतिगुणकर्मतः ९८

कुदृष्टीनि तानि सर्वाणि परलोके निष्फलानि यस्मान्नरकफलानि मन्वादिभिः स्मृतानि एतदेव
स्पष्टयति ९९ उत्पद्यन्त इति सामान्यतो वेदादन्यान्यवेदमूलकानि कानिचिच्छास्त्राणि पौ
रुषेयत्वादुत्पद्यन्ते अत एवाशु नश्यन्ति उत्तानानि इदानीन्तनत्वान्निष्फलानि असत्यरूपाणि च
स्मृत्यादीनां तु वेदमूलत्वादेव प्रामाण्यं ९७ चातु ब्राह्मणोऽस्य मुखमासीदिति वेदादेव चातु
र्वर्ण्यं प्रसिध्यति ब्राह्मणी भूतमाता पितृजनितत्वमपि तदुपजीवितत्वात् स्वर्गादि लोकाश्चापि वे
दादेव सिद्धा एवं ब्रह्मचार्याद्याश्रमा अपि चत्वारो वेदमूलत्वाद्वेदादेव सिध्यन्ति किं बहुना य
त्किंचिद्वर्तीतं वर्तमानं भविष्यं च सर्वमस्मात् शास्त्रात् ज्ञायते इति न्यायेन वेदादेव सिध्यति ९७ शब्द
इह लोके परलोके च शब्दादयो विषया उपभुज्यन्ते ते प्रसूयन्ते एभिरिति प्रसूतिर्यज्ञस्तेगुण

म-स्मृ-
टी-
३३२

त्रैविद्या वेदत्रयसंबंधिविद्यावान् त्रयाणामध्येतारः श्रुतिस्मृत्यविरुद्धन्यायशास्त्रज्ञो मीमांसात्मकतर्कवित् नि
रुक्तज्ञो मानवादिधर्मशास्त्रवेदी ब्रह्मचारी गृहस्थो वानप्रस्थश्च इत्येषा दशावरा परिषत्स्यात् ५ ऋ
ग्यजुःसामवेदपारगाणां नामध्येतारः तदर्थज्ञाश्च एषा धर्मसंदेहनिरासार्थं त्र्यवरा परिषज्ज्ञे
या तदभावे ६ एको एकोपि वेदार्थधर्मज्ञो यं धर्मं निश्चिनुयात् स प्रकृष्टो धर्मो बोद्धव्यो
न वेदानभिज्ञानां दशभिः सहस्रैरप्युक्तः वेदविद्वृत्तोपि वेदार्थधर्मज्ञपरः एतच्च श्रेष्ठोपल
क्षणं स्मृतिपुराणमीमांसान्यायशास्त्रज्ञोपि गुरुपरोपदेशाविशिष्टोपि तथा केवलं शास्त्रमाश्रित्य
न कर्तव्यो निर्णयः युक्तिहीनविचारे तु धर्महानिः प्रजायते तेन वक्तृश्रुतिज्ञोपि पादिसम्यक्श

त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्मपाठकः त्रयश्चाश्रमिणः पूर्वे पर्षत्स्याद्दशावरा ५
ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये ६ ए
कोपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः स विज्ञेयः परो धर्मो नाज्ञानामुदितोऽयुतैः ७
अव्रतानाममंत्राणां जातिमात्रोपजीविनां सहस्रशः समेतानां परिषत्त्वं न विद्यते ८
यं वदंति तमोभूता मूर्खा धर्ममतद्विदः तत्पापं शतधा भूत्वा तद्वक्तॄननुगच्छति ९
एतद्वोऽभिहितं सर्वं निःश्रेयसकरं परं अस्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिं १०

यश्चित्तादिधर्मं जानाति तदा तेनाप्येकेन यस्मै उक्तः स प्रकृष्टो धर्मो ज्ञेयः अत एव यमः एको द्वौ वा
त्रयो वा यं ब्रूयुर्धर्मपाठकाः स धर्म इति विज्ञेयो नेतरेषां सहस्रशः ७ अत्र सावित्र्यादि व्र
तचर्याव्रतरहितानां मंत्रवेदाध्ययनरहितानां ब्राह्मणजातिमात्रधारिणां बहूनामपि सहस्राणां
मिलितानां परिषत्त्वं नास्ति धर्मनिर्णयसामर्थ्याभावात् ८ यं वा तमोगुणबहुला मूर्खा धर्मप्र
माणवेदार्थानभिज्ञा अतएव तत्त्वाविषयधर्मो विद्वांसो यश्चित्तादिधर्मं प्रयुक्तं ब्रूयुरुपदिशंति
तदीयं पापं शतगुणीभूय तद्धर्मवक्तॄन्गच्छति ९ एतत् एतन्निःश्रेयससाधनं सर्वं युष्माकमभि
हितं एतदनुतिष्ठन् ब्राह्मणादिः परमां गतिं स्वर्गापवर्गरूपां प्राप्नोति १०

उ-
३३२

प्रत्य धर्मस्य तत्त्वावबोधमिच्छता प्रत्यक्षमनुमानं च धर्मसाधनभूतद्रव्यगुणजातितत्त्वज्ञानार्थं प्र
शास्त्रं च वेदमूलस्मृत्यादिरूपं नानाप्रकारं धर्मस्वरूपज्ञानाय सम्यग्ज्ञातं कर्तव्यं एतदेव च प्रमाणत्रयं म
नोरभिमतं तु प्रमाणान्तराऽर्थापत्त्यादेश्चानुमान एवान्तर्भावः १०५ ऋषिदृष्टत्वादार्षं धर्मोपदेशं च
तन्मूलस्मृत्यादिकं यस्तदविरुद्धेन मीमांसादिन्यायेन विचारयति स धर्मं जानाति न तु मीमांसा
नभिज्ञः धर्मैककरणं वेदो मीमांसा चेतिकर्तव्यतास्थानीया एतदुक्तं भट्टवार्त्तिककृता धर्मे प्रमीय
माणे हि वेदेन करणात्मना इतिकर्तव्यताभागं मीमांसा पूरयिष्यति १०६ नैः एतन्निःश्रेयससा
धनं कर्म निःशेषेण यथावदुदितं अत ऊर्ध्वमस्य मानवशास्त्रस्य रहस्यं गोपनीयमिदं वक्ष्यामः।

प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्। त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता १०५
आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना। यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः १०६ नैःश्रे
यसमिदं कर्म यथोदितमशेषतः। मानवस्यास्य शास्त्रस्य रहस्यमुपदिश्यते १०७ अना
म्नातेषु धर्मेषु कथं स्यादिति चेद्भवेत्। यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः २
धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः। ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ३
दशावरा वा परिषद्यं धर्मं परिकल्पयेत्। त्र्यवरा वापि वृत्तस्था तं धर्मं न विचालयेत् ४

एवं भवेत् १ अना अस्य शास्त्रस्य समग्रधर्माभिधानार्थं कार्यास्य मानोक्त्या समग्रधर्मोपदेशक
त्वं बोधयति सामान्यविधिप्राप्तेषु विशेषानुदिष्टेषु कथं कर्तव्यं स्यादिति यदि संशयो भवेत्तदा
यं वक्ष्यमाणलक्षणाः शिष्टा ब्रूयुः स तत्र निश्चितो धर्मः स्यात् २ धर्मे ब्रह्मचर्यादिनियम
धर्मक्रमेण येन गामी मीमांसा धर्मशास्त्रपुराणाद्युपबृंहकसहितो वेदोऽधीतस्ते ब्राह्मणाः श्रु
तेः प्रत्यक्षीकरणे हेतवो यच्छ्रुतिपठितान्दर्शयत उपदिशन्ति ते शिष्टा विज्ञेयाः ३ दशा प
दिवहवः सन्निहिता न भवन्ति तदा दशावरा त्र्यवरा चोक्तवक्ष्यमाणलक्षणा दश त्र्यवरा य
स्याः सा परिषत्तदभावे त्र्यवरा यस्याः सा वा सदाचाराणां धर्मं निश्चिनुयात्तं धर्मं ते

म·स्मृ·
टी·
२३३

रुक्माभं शुद्धस्वर्णसमम् रूपमगंधमव्ययमित्युपनिषदा रूपं परमात्मनो निषिद्धं तथाप्युपा।
सनाविशेषो वेषेशुद्धसुवर्णाभं स्तुत एवं यदेषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते इत्यादिश्रुतौ दोष्याय।
निपतत्स्वप्नधीगम्यं स्वप्नतुल्यया धी ज्ञानगम्यं स्वप्नधी स्वप्नज्ञानवत्साधनीया स्वप्नधीश्चक्षुरादिबाह्येंद्रियोपरमे
नोमात्रेणाजन्यते स्मैवं परमात्मधीरपि अत एव व्यासः नैवासौ चक्षुषा ग्राह्यो न चापि शिष्टैरपींद्रियैः
मनसा तु प्रयत्नेन गृह्यते सूक्ष्मदर्शिभिः एवंविधं परमात्मानमनुचिंतयेत् एनमेनं च परमात्मानं
अग्निरित्येके याज्ञिका उपासते तथा च तमेतदग्निरित्यध्वर्यव उपासते अन्येपुनः स्रष्टारं मनुं
प्रजापतिरूपतया उपासते १२२ एके पुनरैश्वर्ययोगादिंद्ररूपेणोपासते अपरे पुनः प्राण

रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परं । एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् १२२
इंद्रमेके परे प्राणमपरे ब्रह्मशाश्वतं । एष सर्वाणि भूतानि पंचभिर्व्याप्य मूर्तिभिः १२३
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् १२४ एवं यः सर्वभूतेषु पश्यत्यात्मानमा।
त्मना । स सर्वसमतामेत्य ब्रह्माभ्येति परं पदं १२५

233

त्वेनोपासते सर्वाण्येव इमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहते इत्यादिश्रुतिदर्श-
नात् अपरे पुनरस्तगतप्रपंचसच्चिदानंदरूपं परमात्मानमुपासते मूर्तामूर्तस्वरूपे च ब्रह्म।
णोः सर्वा एवोपासना एताः श्रुतिसिद्धाः संभवंति एष एष परमात्मा सर्वाणि प्राणिनः पंचभिः
पृथिव्यादिभिर्महाभूतैः शरीरारंभकैः परिवृत्य पूर्वजन्मार्जितकर्मपेक्षया १२४ उत्प-
त्तिस्थितिविनाशैः रथादिचक्रवत् असकृदावर्तमानेन वा मोक्षात्संसारिणः करोति इदानीं
मोक्षहेतुत्वेनोक्तसर्वधर्मश्रेष्ठतया सर्वज्ञपरमात्मदर्शनमनुष्ठेयत्वेनोपसंहरति १२५
एवं एवं सर्वभूतेषु चात्मानं उक्तप्रकारेण यः सर्वभूतेषु व्यवस्थितमात्मानमात्मना

एवं भगवानैश्वर्यादिगुणयुक्तो द्योतनाद्देवो मनुरेवमुक्तप्रकारेणेदं सर्वं धर्मस्य परमार्थं गुह्यमशि
ष्येभ्यो गोपनीयं लोकहितेच्छया ममोक्तवानिति भृगुर्महर्षीणामाह एवं तूपसंहृत्यापि म
हर्षीणां हिताय मोक्षमप्यात्मज्ञानं प्रकृष्टमोक्षोपायतया प्रपञ्चयन्नाह २१ सर्वं सद्भावजातमसद्।
भावजातं च एतत्सर्वं ब्रह्मात्मानं जानन् ब्रह्मस्वरूपात्मन्यवस्थितं तदात्मकं मननसमनाध्यानप्रक
र्षेण समाहितः पश्येत् यस्मात्सर्वमात्मनि सम्पश्यन् विपरीतभावेन पश्यन् रागद्वेषाभावादधर्मे मनो न कु
रुते एतदेव स्पष्टयति २२ आत्मा इन्द्राद्याः सर्वदेवताः परमात्मैव सर्वात्मत्वात्परमात्मनः सर्वं ज
गदात्मन्यवस्थितं परमात्मपरिणामत्वात् हि यस्मादवधारणे परमात्मैवैषां देहिनां कर्मसंबन्धं जनय
ति तथा च श्रुतिः एष ह्येव साधु कर्म कारयति यमूर्ध्वं निनीषति उदासीनवत्प्रमाणं ब्रह्मध्यानविधौ।
सोपयोगितया देहिकाकाशादिषु बाह्याकाशादीनां लयमाह खं नभो बाह्याकाशमुदराद्यवच्छिन्न

एवं स भगवान्देवो लोकानां हितकाम्यया धर्मस्य परमं गुह्यं ममेदं सर्वमुक्तवान् २१ सर्वमा
त्मनि संपश्येन्नाधर्मे कुरुते मनः आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितं २२ आत्मा
हि जनयत्येषां कर्मयोगं शरीरिणां खं संनिवेशयेत्खेषु चेष्टनः स्पर्शनेऽनिलं २३ पक्तिदृ
ष्ट्योः परं तेजः स्नेहेऽपो गां च मूर्तिषु मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरं २४ वाच्यग्निं
मित्रमुत्सर्गे प्रजनने च प्रजापतिं प्रशासितारं सर्वेषामणीयांसमणोरपि २५

शरीराकाशे लीनमेकत्वेन भावयेत् तथा चेष्टास्पर्शकारणभूते दैहिकवायौ बाह्यवायुं २३ औद
र्यचाक्षुषतेजसोरग्निसूर्ययोः प्रकृष्टं तेजः दैहिकास्वप्सु बाह्या आपः शरीरपार्थिवभागे बाह्य
पृथिवीं मनसि चन्द्रं श्रोत्रे दिशः पादे क्रियाविष्णुं बले हरं वागिन्द्रियेऽग्निं पाय्विन्द्रिये मित्रं प्रजनने प्रजा
पतिं लीनमेकत्वेन भावयेत् एवमाध्यात्मिकभूतेषु बाह्यभूतादिकं लीनमेकत्वेन भावयित्वा २५ प्र
शासितारं नियन्तारं ब्रह्मादिस्तम्बपर्यन्तचेतनाचेतनस्य जगतः योपमशक्यादीनां दैहिकादिनियमोप
इत्यादिमादीनां प्रमाणोर्दिनियमो यत्नकर्मणां फलप्रतिनियतमेतत्सर्वं परमात्माधीनं तथा चेतस
चात्तुरुस्य प्रत्यगात्मनः स उपनिषत् तथा भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिन्द्रश्च वायुश्च
मृत्युर्धावति पञ्चमः अणोरप्यणीयांसमात्मस्वरूपत्वात् तथा च श्रुतिः वालाग्रशतभागस्य शतधा

इत्येषा सामासमर्थे इति शाद्भः एतद्वानवं शास्त्रं भृगुणा प्रोक्तं पठन्द्विजातिर्विहितानुष्ठानप्रतिषिद्धव
र्जनात्सदाचारवान्भवति तथाभिप्रेतां च स्वर्गादिरूपां गतिं प्राप्नुयादिति सारासारवचः प्रप
चनविधौ मेधातिथिर्विस्तरः स्लोकं वस्तुनिगूढकल्पवचसा गोविंदराजो जगौ ग्रंथेऽस्मिन्धर ।
णीधरस्त्र वकुशाः ख्यातं न्यमेतावतास्पष्टं मानवतत्त्वमर्थमखिलं वक्तुं कृतोयं श्रमः प्रायेण
निति कृत्तं कथ्यपते षामनुस्मृतेरर्पं दशाभिर्ग्रंथसहस्रैः स तत्रस्तत्पुते स्मसत्कृतावृत्तिः से
यं मया मानवधर्मशास्त्रविधायिवृत्तिर्विदुषां हिताय दुर्बोधनादेर्दधिनोत्सो भूतज्ञातान

इत्येवं मानवं शास्त्रं भृगुप्रोक्तं पठन्द्विजः भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्ग
तिं १२६ इति श्रीमानवे धर्मशास्त्रे द्वादशोऽध्यायः १२ संवत १८७२

234

नोमे जगतामधीशः २० इति श्रीवारेंद्रनंदनवासीय भट्ट श्रीदिवाकरात्मजविरचिता
यां मन्वर्थमुक्तावल्यां मनुवृत्तौ द्वादशोऽध्यायः १२ लिखितं नरायणभट्ट काश्मीरी कम्पि
स्थलमध्ये संवत १८७२ वैशाखमासे कृष्णपक्षे तिथौ १० गुरुवारे

३-
२२४

शत्रुरिति यस्मिन्मित्रे गूढं कृत्वा शत्रुमेव सेवते यश्च भृत्यादिः पूर्वं विरागाद्गतः पश्चात्प्रत्यागतः तयोः साव
धानो भवेद्यस्मात्तावतिशयेन रिपू ॥१८६॥ दण्डेति दण्डाकृतिर्व्यूहः दण्डव्यूह एवं शकटादि
व्यूहेष्वपि तत्राग्रे बलाध्यक्षो मध्ये राजा पश्चात्सेनापतिः पार्श्वयोर्हस्तिनः तत्समीपे घोटकाः
ततः पदातय इत्येवं कृतरचनो दीर्घः सर्वतः समविन्यासो दण्डव्यूहः तेन तं मार्गं सर्वतोभ
ये सति यायात् सूच्याकाराग्रः पश्चात्पृथुः शकटव्यूहः तेन पृष्ठतो भये सति गच्छेत् तत्र समपृथुव
पश्चाद्भागः पृथुमध्यो वराहव्यूहः एष एव पृथुतरमध्यो गरुडव्यूहः ताभ्यां पार्श्वभये व
जेद्वाराहविपर्ययेण मकरव्यूहस्तेनाग्रे पश्चाच्चोभयत्र भये सति गच्छेत् पिपीलिकापङ्क्तिव
दग्रपश्चाद्भागेन संहततनुः पतायत्र सैनिकावस्थानं सदीर्घः प्रवीरपुरुषमुखः सूचीव्यू

शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत्। गतप्रत्यागते चैव स हि कष्टतरो रिपुः ॥१८६॥ दं
ण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा। वराहमकराभ्यां वा सूच्या वा गरुडेन वा ॥१८७॥ य
तश्च भयमाशङ्केत्ततो विस्तारयेद्बलं। पद्मेन चैव व्यूहेन निविशेत सदा स्वयं ॥१८८॥ से
नापतिबलाध्यक्षौ सर्वदिक्षु निवेशयेत्। यतश्च भयमाशङ्केत्प्राचीं तां कल्पयेद्दिशं।
गुल्मांश्च स्थापयेदाप्तान्कृतसंज्ञान्समन्ततः। स्थाने युद्धे च कुशलानभीरूनविकारिणः।
संहतान्योधयेदल्पान्कामं विस्तारयेद्बहून्। सूच्या वज्रेण चैवैतान्व्यूहेन व्यूह्य योधयेत् ॥१९१॥

हः तेनाग्रतो भये सति यायात् ॥१८७॥ यत इति यस्या दिशः शत्रुभयमाशङ्केत तस्यामेव बलं विस्ता
रयेत् समविस्तृतपरिमण्डलो मध्योपविष्टविजिगीषुः पद्मव्यूहः तेन पुरान्निर्गमे सर्वदा कट
कनिवेशनं कुर्यात् ॥१८८॥ सेनापतीति हस्त्यश्वरथपदातीनामेकाङ्गदशकस्यैकः पतिः
कार्यः स पत्तिक उच्यते पत्तिकदशकस्यैकः पतिः सेनापतिः तद्दशकस्यैकः सेनामुखः
स एव बलाध्यक्षः तौ सेनापतिबलाध्यक्षौ समस्तासु दिक्षु संघर्षप्रवृत्त्यर्थं नियोजयेत् यस्या
श्च दिशो यतो भयमाशङ्केत तदा तामग्रे दिशं कुर्यात् ॥१८९॥ गुल्मानिति गुल्मान्सैन्यैक
देशानामाप्तपुरुषाधिष्ठितान्स्थानापसरणयुद्धार्थं कृतभेरीपटहशङ्खादिसंकेतानव
स्थानयुद्धयोः प्रवीणान्निर्भयानव्यभिचारिणः सेनापतिबलाध्यक्षानन्तरं सर्वदिक्षु

235

यथैनमिति यथैनं राजानं मित्रादयस्त्रयो नाभिसंदध्युस्तथा सर्वं संविधानं कुर्यादित्येष सांपरायिको नयो। नीतिः ८० यदा त्विति यदा पुनः शक्तः सन् शत्रुराष्ट्रं प्रति यात्रामारभते तदानेन वक्ष्यमाणप्रकारेण शत्रुदेशमन्तरमाणो गच्छेत् ८२ मार्गेति यस्य चतुरंगबलोपेतो राजा करिष्यादिगमनविलंबेन विलंबमानस्तथा हेमंतिकसस्यवर्द्धं च परराष्ट्रं जिगमिषुस्तदामासमनायशोभने. मासि मार्गशीर्षे यात्रां कुर्यात्। पुनरश्वबलवाहनयोपेतो नृपतिः शीघ्रगतिर्वा सन् सस्यवर्द्धं च परराष्ट्रं पिपासुः स फाल्गुने चैत्रे वा मासि स्वबलयोग्यकालानतिक्रमेण यायादित्यस्य मन्त्रये विवरणं परं संदेपेन यान्त्र वल्लवृचनं यदा सस्यगुणोपेतं परराष्ट्रं तदा व्रजेदिति ८२ अन्येऽत्विति उक्तकालव्यतिरिक्तेऽपि कालेषु यदा मनोनिश्चितं जयमवगाहते तिततदा स्वबलयो।

यथैनं नाभिसंदध्युर्मित्रोदासीनशत्रवः तथा सर्वं संविदध्यादेष सांपरायिको नयः ८०
यदा तु यानमातिष्ठेदरिराष्ट्रं प्रति प्रभुः तदानेन विधानेन यायादरिपुरं शनैः ८२ ।
मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः फाल्गुनं वापि चैत्रं वा मासौ प्रतिपद्यावलं
अन्येष्वपि तु कालेषु यदा पश्येद्ध्रुवं जयं तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः ८२
कृत्वा विधानं मूले तु यात्रिकं च यथाविधि उपगृह्यास्पदं चैव चरान्सम्यग्विधाय च ८४
संशोध्य त्रिविधं मार्गं षड्विधं च बलं स्वकं सांपरायिककल्पेन यायादरिपुरं शनैः ८५

यत्कालेऽथीप्यादावपि हस्त्यादिबलप्रायो विगृह्यैव यात्रां कुर्यात् तथा शत्रोऽस्मामामामाद्विप्रकृतिगोचरदेऽपाकृष्यादिव्यसने जाते विपत्तभृतायां तत्र कृतावुक्तकालादन्यत्रापि यायात् ८४ कृत्वेति ८५ संशोध्येति मूले स्वीयदुर्गराष्ट्रे नृपेयापार्ष्णिग्राहं सस्थाने प्रधानपुरुषाधिष्ठितं रक्षार्थं स्थिमेकदेशस्थापनरूपं प्रतिविधानं कृत्वा यात्रोपयोगिचवाहनायुधवर्मयात्राभिधानं यथाशास्त्रं कृत्वा यस्मिंश्च लगतस्य च येनास्यावस्थानं भवति तदुपगृह्य सन्तदीयान्भूमपद्मानात्स्वस्थाने स्थचारांश्च व्यापरिकादीनु यात्रु देशे वार्त्ताज्ञापनार्थं प्रस्थाप्य सम्यक् तथा जांगलानूपदेविकभेदेन त्रिविधं पंथानं मार्गं रोधितकगुल्मादिच्छेदनिम्नोन्नतादिसमीकरणादिना संशोध्य हस्त्यश्वरथपदातिसेनापतिकर्मकरात्मकं षड्विधं बलं यथायोगमाहारी घंय

म०स्मृ०
टी०
२०२

236

शूद्रो ब्राह्मणशुश्रूषयाऽजीवन्वृत्तिमाकाङ्क्षन् तदा क्षत्रियं परिचरेत् तदभावे धनिनं वैश्यं परिच
र्य जीवितुमिच्छेत् द्विजातिशुश्रूषणासामर्थ्ये तु प्रागुक्तानि कारुकर्माणि कुर्वीत १९ स्वर्गप्राप्त्य
र्थं यद्वा स्वर्गवृत्तिनिष्पत्त्यर्थं एवमुभयार्थं ब्राह्मणमेव शूद्रः परिचरेत् यस्माज्जातो ब्राह्मणाश्रि
तोऽयमिति शब्दो यस्य ब्राह्मणाश्रयत्वादिति समासः सास्य शूद्रस्य कृतकृत्यता तद्व्यपदेशात् यावत्कृत
कृत्यो भवतीत्यत एव मतः २० ब्राह्मणपरिचर्यैव शूद्रस्य कर्मान्तरेभ्यः प्रकृष्टं कर्म शास्त्रेऽभि
धीयते यस्मादेतद्व्यतिरिक्तं यदसौ कर्म कुरुते तदस्य निःफलं भवतीति पूर्वस्तु समर्थेन चान्यानि
स्ववर्णपाकयज्ञादीनामपि तस्य विहितत्वात् २१ तस्य परिचारकशूद्रस्य परिचर्यासामर्थ्यं कर्मो

शूद्रस्तु वृत्तिमाकाङ्क्षन् क्षत्रमाराधयेद्यदि धनिनं वाप्युपाराध्य वैश्यं शूद्रो जिजीविषेत् १९
स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यता २० वि
प्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते यदतोऽन्यद्धि कुरुते तद्भवत्यस्य निःफलं २१ प्रक
ल्प्या तस्य तैर्वृत्तिः स्वकुटुम्बाद्यथार्हतः शक्तिं चावेक्ष्य दाक्ष्यं च भृत्यानां च परिग्रहं २२ उ
च्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः २३
न शूद्रे पातकं किंचिन्न च संस्कारमर्हति नास्याधिकारो धर्मेऽस्ति न धर्मात्प्रतिषेधनं २४

सामर्थ्यं पुत्रदारादिभिर्भर्तव्यपरिमाणं चावेक्ष्य तैः ब्राह्मणैः स्वकुटुम्बादनुरूपाऽऽजीविकावृत्तिः प
रिकल्पनीया २२ एतस्मै प्रकृताश्रितशूद्राय भुक्तावशिष्टमन्नं ब्राह्मणैर्देयम् एवं न शूद्राय मतिं
दद्यादिति नोच्छिष्टमित्यनाश्रितशूद्रविषयमनुतिष्ठते तथा जीर्णानि वस्त्राणि सारधान्यजीर्णशय्यादिपरि
च्छदाश्चास्मै देयाः २३ लशुनाद्यभक्ष्यभक्षणे शूद्रे पातकं किंचिन्नास्ति नतु ब्रह्मवधादावपि ब्रह्म
हिंसासत्यमित्यादेश्चातुर्वर्ण्यसाधारणत्वेनाविहितत्वात् न चास्योपनयनादिकसंस्कारमर्हति
न चास्याग्निहोत्रादौ धर्मेऽधिकारोऽस्ति अविहितत्वात् न च शूद्रविहितात्पाकयज्ञादिधर्मादस्य
स्य निषेधोऽस्ति एवं चास्य सर्वमस्य सिद्धत्वादयं श्लोकोत्तरार्धोऽनूदितः २४

३०
२०२

आपत्स्वकरणे जीवनहेतवः इति निर्देशादेषां मध्ये यत्र यस्यानापदि जीवनं निषिद्धं तत्तस्यापदि जीवनाभ्यनुज्ञानं यथा ब्राह्मणस्य भृतिः सेवादि एवं शिल्पादावपि तत्र वेदविद्याव्यतिरिक्ता वैद्यकतर्कविषापनयनादिविद्या सर्वेषामापदि जीवनार्थं न तु ध्यति शिल्पं लिखनादि भृतिः प्रेष्यभावेन वेतनग्रहणं सेवा पराज्ञासंपादनं गोरक्ष्यं पशुपाल्यं विपणिर्वाणिज्या कृषिः स्वयंकृतापि धृतिः संतोषः तस्मिन्सति अल्पकेनापि जीव्यते भैक्ष्यं भिक्षासमूहः कुसीदं वृद्ध्या धनप्रयोगः स्वयंकृतोऽपि एभिर्दशभिरापदि जीवनीयं ॥ १६ ॥ ब्राह्मणः क्षत्रियो वापि वृद्ध्या धनप्रयोगमापद्यपि न प्रकुर्वीत किं तु निकृष्टकर्मणे धर्मार्थमल्पिकं पापीयसे दद्याद्वा प्रयुञ्जीत ॥ १७ ॥ इदानीं राज्ञामापद्धर्ममाह राज्ञो नापदि धान्यादीनामष्टमो भागग्रहणोक्तः स आपदि धान्यादेश्चतुर्थमपि भागं करार्थं गृह्णंश्च परया शक्त्या प्रजा रक्षन्नधिककरग्रहणपापे

237

विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः धृतिर्भैक्षं कुसीदं च दश जीवनहेतवः ॥ १६ ॥ ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयोजयेत् कामं तु खलु धर्मार्थं दद्यात्पापीयसेऽल्पिकं ॥ १७ ॥ चतुर्थमाददानोऽपि क्षत्रियो भागमापदि प्रजा रक्षन्परं शक्त्या किल्बिषात्प्रतिमुच्यते ॥ १८ ॥ स्वधर्मो विजयस्तस्य नाहवे स्यात्पराङ्मुखः शस्त्रेण वैश्यान्रक्षित्वा धर्म्यमाहारयेद्बलिं ॥ १९ ॥ धान्येऽष्टमं विशां शुल्कं विंशं कार्षापणावरं कर्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा ॥ २० ॥

न संबध्यते कस्मात्पुनः पुनरापद्यपि राज्ञा रक्षणान्मुच्यते यस्मात् ॥ १८ ॥ राज्ञः शत्रुविजयः स्वधर्मो विजयफलं युद्धमित्यर्थः प्रजारक्षणप्रवृत्तस्यापदि कुतश्चिद्भयात्तदा न युद्धपराङ्मुखो भवेत् एवं च शस्त्रेण वैश्यान्रक्षयित्वा दस्युतः ते यो धर्मादनपेतं शास्त्रानुरूपं बलिमाहारयेत् को सौ धर्म्यो बलिरित्येवाह ॥ १९ ॥ धान्ये विंशत्युपचये वैश्यानामष्टमं भागं शुल्कमाहारयेत् धान्यानां द्वादशो भाग उक्त आपद्यष्टमो भाग उच्यते अयं चानापदि भाग उक्तश्चतुर्थोऽपि वेदितव्यः तत्रापि विशां ग्राह्यस्तथा हिरण्यकार्षापणादीनां विंशतितमं भागं शुल्कं गृह्णीयात् तत्रापि पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः इत्यादिनानापदि पञ्चाशद्भाग उक्तः आपद्ययं विंश उच्यते तथा शूद्राः कारवः सूपकारादयः शिल्पिनश्च तक्षादयः कर्मणो वोपकुर्वन्ति न तु तेभ्य आपद्यपि करो ग्राह्यः ॥ २० ॥